This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

GIFT OF
HORACE W. CARPENTIER

SIGILLVM · VNIVERSITATIS · CALIFORNIENSIS
FIAT LVX
MDCCCLXVIII

EX LIBRIS

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 1, 2, 3 and 4.] [Vol. IV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1882.

Price Rs. 9-0 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

UNIV. OF CALIFORNIA

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. IV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1882.

Digitized by Google

UNIV. OF
CALIFORNIA

Digitized by Google

UNIV. OF CALIFORNIA
PK3591
P33
ser. 2
v. 4
MAIN

INDEX TO VOLUME IV. NEW SERIES.

ÁTMA-SOPÁNAM-NÁMA VEDÁNTAPRAKARAṆAM,	145 and 177.
BRAHMA-SÚTRA-TÁTPARYA-VIVARAṆAM,	33, 190, 353, and 401.
CHIT SUKHÍ,	459, 513, and 593.
JÍVANA-VṚITTÁNTAḤ,	291.
KÁTÍYAM ŚULBAPARIŚISHTAM WITH TRANSLATION,	94, 328, 382, and 487.
MÁDHAVÍYÁ DHÁTUVṚITTIḤ,	136, 237, 375, 416, 453, 540, and 609.
SAMKSHEPAŚÁRÍRAKAM,	113, 252, 361, 424, 581, and 625.
ŚÁŚVATA-DHARMA-DÍPIKÁ,	55.
ŚLOKAVÁRTTIKAM,	1.
ŚRAUTAPADÁRTHANIRVACHANAM,	501, 563, and 645.
VEDÁNTAPARIBHÁSHÁ WITH TRANSLATION,	103, 340, 389, 492, and 554.

521605

Digitized by Google

UNIV. OF CALIFORNIA

Digitized by Google

(*Continued from page 712 No. 12 of 1879.*)

॥ श्लोकवार्त्तिकम् ॥

पदार्थपदसम्बन्धनित्यत्वे साधिते ऽपि वः ।
नैव वेदप्रमाणत्वं वाक्यार्थम्प्रति सिध्यति ॥ १ ॥
पदानि गमयेयुस्तं प्रत्येकं सह तानि वा ।
व्यतिरिक्तो ऽथ वा शब्दः पदार्थो वापि पूर्ववत् ॥ २ ॥
तत्प्रमाणः स्मृतीनां च तथा सम्बन्धतद्धियाम् ।
प्रत्येकं संहतत्वेन तद्वदेव विकल्पनम् ॥ ३ ॥
अदृष्टसङ्गतित्वेन सर्वेषामनिमित्तता ।
अन्यः प्रतीतो न ह्यन्यं गमयिष्यत्यसङ्गतम् ॥ ४ ।
अप्रतीतश्च सम्बन्धो नाप्यसत्त्वाद्विशिष्यते ।
न चाविज्ञायमाने ऽस्य सद्भावो ऽपि प्रमाणवान् ॥ ५ ।
वाक्यवाक्यार्थयोर्नापि वस्तुत्वमुपपद्यते ।
स्पष्टं पदतदर्थाभ्यामन्यानन्यानिरूपणात् ॥ ६ ॥
न तावदवगम्येते केश्चित्तद्व्यतिरेकतः ।
यौगपद्याग्रहीतेश्च समुदायो न सिध्यतः ॥ ७ ॥
न सत्ता यौगपद्यस्य व्यवहारेण नेष्यते * ।
सर्वनित्यतया मा भूद्विशेषानवधारणम् ॥ ८ ॥
ज्ञानानां क्रमवर्तित्वाद्यौगपद्ये ऽप्यसम्भवः ।
तेन तत्समुदायो ऽपि न वाक्यार्थः प्रतीयते ॥ ९ ॥
सम्बन्धपूर्वकत्वं च वाक्यवाक्यार्थयोः स्थितम् ।
स्वतन्त्रेषु हि वाक्यत्वं कदाचिन्नोपलक्ष्यते ॥ १० ॥

* व्यवहारादृतेष्यते इति पाठान्तरम् ।

Digitized by Google

सम्बन्धश्चानपेक्षत्वात्कस्य चित्रावकल्पते ।
पदानि तावदर्थो वा स्वरूपेनै कदा चन ॥ ११ ॥
अनर्थकेष्वदृष्टत्वादपेक्षन्ते परस्परम् ।
न चानुच्चरितश्शब्दः शक्नोत्यन्यमपेक्षितुम् ॥ १२ ॥
यौगपद्यन्तु नास्त्येव न चोच्चार्य तिरोहितः ।
अपेक्षणे ऽपि सम्बन्धो नैव कश्चित्प्रतीयते ॥ १३ ॥
कार्यकारणसंयोगसमवायादिलक्षणः ।
एकार्थसमवाये ऽपि सर्वेषां व्योम्नि तुल्यता ॥ १४ ॥
तथोक्तानुक्तयोग्यादेर्न विशेष्येण सङ्गतिः ।
एककार्यनियोगो ऽपि व्यक्ते ऽन्ये ऽथ वा भवेत् ॥ १५ ॥
व्यङ्गास्तावत्पृथग्भूताः पदार्थाः पदभेदतः ।
तथा तद्विषयाप्येतैर्बुद्धिर्नैकापि जायते ॥ १६ ॥
या तु स्वविषया बुद्धिः प्रतिशब्दमसावपि ।
न चैकज्ञानजननं भिन्नस्तैः क्रमवर्तिभिः ॥ १७ ॥
न चावयवशो बोधादैक्यं वाक्यतदर्थयोः ।
न चावयवबुद्धीनां भ्रान्तित्वं बाधकादृते ॥ १८ ॥
एकनिर्भागता बुद्धे रसत्यात्सत्यता कथम् ।
अनुरागव्यवच्छेदो बुद्धीनां न च सिध्यतः ॥ १९ ॥
क्षणिकत्वादृते ऽर्थित्वं नेष्टं संसर्गभेदयोः ।
यदि ध्रियेत गोबुद्धिः शुक्लबुद्धिजनिक्षणे ॥ २० ॥
ततो ऽन्याभ्यो निवर्तेत संसृज्येत तथानया ।
संसर्गो न च बुद्धीनां संयोगादेरसम्भवात् ॥ २१ ॥
एकात्मवृत्तिता तुल्या घटहस्त्यादिधीष्वपि ।
तथा निरन्तरोत्पत्तिर्नोकाङ्क्षा वाच शब्दवत् ॥ २२ ॥

Digitized by Google

क्षणिकायुगपद्भावे का बुद्धिः कामपेक्षते ।
अत एव विशिष्टा धीस्ताभिर्नैकोपजन्यते ॥ २३ ॥
यतः कल्प्येत सर्वासां संसर्गस्तदपेक्षया ।
न च संसर्गविच्छेदनिर्भासोऽन्तः प्रकल्पितः ॥ २४ ॥
बाह्याभावोऽर्थरूपेण प्रमाणं स्वप्नवद्भवेत् ।
न च कालत्रयापेतग्राह्यार्थासम्भवे सति ॥ २५ ॥
प्रवर्तेनापि विज्ञानं न चास्मिन्ग्राह्यसम्भवः ।
अनुत्पन्नेऽपि तेनास्मिन् उत्पन्नपरिकल्पना ॥ २६ ॥
अर्थसंसर्गदृष्ट्या वा संसर्गोऽत्र प्रकल्प्यते ।
बुद्ध्योर्न तावदेवं स्याद्विशेषणविशेष्यता ॥ २७ ॥
तथैव शब्दतद्बुद्ध्योर्विशेषोत्पत्त्यसम्भवात् ।
तावानेव हि गोशब्दः शुक्लशब्देऽपि कीर्तिते ॥ २८ ॥
पूर्वशब्देऽपि तावत्ता तस्यैव तद्धियोरपि ।
विशेषणविशेष्यत्वं न च स्याच्छुक्लगोत्वयोः ॥ २९ ॥
न तयोरनुरागो हि नावच्छेदः परस्परम् ।
गोत्वेन न हि शुक्लत्वं गोत्वं वा तेन रज्यते ॥ ३० ॥
अन्योन्यात्मन्यसद्भावाद्व्यक्त्यङ्गत्वाद्द्वयोरपि ।
व्यक्तिश्चेदनुरज्येत ताभ्यां तथापि शब्दयोः ॥ ३१ ॥
न परस्परसंबन्धः स्यादतद्गोचरौ हि तौ ।
शब्दैरनुच्यमाने हि सत्यप्येकाश्रयेऽर्थतः ॥ ३२ ॥
शब्दानां नैव सम्बन्धः पृथ्वीस्थगवाश्ववत् ।
एकार्थसमवायेऽपि रूपादेर्नैव सङ्गतिः ॥ ३३ ॥
न चैकव्यक्तिवृत्तित्वे प्रमाणं गोत्वशुक्लयोः ।
सम्बन्धादेतयोस्तच्च स्यादेव व्यक्तिकल्पना ॥ ३४ ॥

Digitized by Google

तदेकत्वाच्च सम्बन्ध एवमन्योन्यसंश्रयम् ।
न चात्र पदमस्त्यन्यद्येनैकव्यक्तिधीर्भवेत् ॥ ३५ ॥
न चास्याः पदवाच्यत्वं वाच्यत्वे ऽपि न चैकता ।
गम्यमानस्य चैकत्वात्सम्बन्धो यदि कल्प्यते ॥ ३६ ॥
पार्थिवत्वाद्यभेदेन किं नस्याद्दुग्धदुग्धयोः ।
शुक्लश्रुत्या न गोत्वादिः कृष्णादिभ्यो निवर्त्यते ॥ ३७ ॥
स्वभावतो ऽवबोधश्च तद्वशान्नापसर्पति ।
कृष्णाद्यपोहनं वाच्यं शुक्लशब्दस्य यद्यपि ॥ ३८ ॥
तथापि गोगतत्वे ऽस्य प्रमाणं नैव सन्निधिः ।
एतद्विषय एवेति यावच्छब्देन नोच्यते ॥ ३९ ॥
तावत्स एव शब्दार्थः स्वातन्त्र्येणाध्यवस्यतः ।
सन्निधेरनुमीयेत तादृशं वचनं यदि ॥ ४० ॥
पुनस्सन्निध्यधीनैव तस्यैतद्विषयार्थता ।
तथापि शक्तिक्लृप्तिश्चेदनवस्था भवेदियम् ॥ ४१ ॥
षट्प्रमाणातिरिक्तत्वात्तस्मात्सन्निध्यनाश्रयः ।
सम्बन्धकारणं नापि षष्ठी गव्युपलक्ष्यते ॥ ४२ ॥
सत्यामपि तु सम्बन्धः श्रोतस्ताबन्निराकृतः ।
गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम् ॥ ४३ ॥
शब्दान्तरैर्विभक्त्या वा धूमो ऽयं ज्वलतीतिवत् ।
संसर्गे चापि भेदे वा वाक्यार्थे परिकल्पिते ॥ ४४ ॥
तस्य यावत्पदार्थत्वान्नैकवाक्यार्थसम्भवः ।
पदार्थव्यतिरेकश्च नास्ति संसर्गभेदयोः ॥ ४५ ॥
न च वस्त्वन्तरारम्भः पदार्थैस्तदनुग्रहात् ।
न हि जातिगुणैः किं चित्कार्यमारभ्यते बहिः ॥ ४६ ॥

Digitized by Google

तदभावे च बोधस्य जातो ऽपि स्वप्नवन्मृषा ।
सतामेव विशेषाणां सन्निधेर्यो ऽपि मन्यते ॥ ४७ ॥
वाक्यार्थत्वमभिव्यक्तौ तस्यापि तदनेकता ।
प्राकृतत्वे च कुतस्तेषां प्रमाणं प्रत्ययैर्विना ॥ ४८ ॥
न चैषां वस्तुसत्त्वं यत्तत्पदे ऽस्तित्वकारणम् ।
एवमाद्यान्त्यसर्वेषां पृथक् सङ्घातकल्पने ॥ ४९ ॥
अन्योन्यानुग्रहाभावात्पदानां नास्ति वाक्यता ।
आद्यं यदि पदं सर्वैः संक्रियेत विशेषणैः ॥ ५० ॥
ततस्तदेव वाक्यं स्यादन्यश्च द्योतको गणः ।
एवमन्त्येषु सर्वेषु पृथग्भूतेष्ववस्थितम् ॥ ५१ ॥
स्वतन्त्रेषु हि वाक्यत्वं कथञ्चिन्नोपलक्षितम् ।
स्फोटजातिनिषेधश्च स्यात्पदस्फोटजातिवत् ॥ ५२ ॥
वाच्यः पदक्रमो वाक्यं यथा वर्णक्रमः पदम् ।
बुद्ध्या न चोपसंहर्तुं क्रमो निष्कृष्य शक्यते ॥ ५३ ॥
पदान्येव हि तद्वन्ति वर्तन्ते श्रोतृबुद्धिवत् ।
तावत्स्वेव पदेष्वन्यः क्रमो ऽन्यश्च प्रतीयते ॥ ५४ ॥
तत्र यावत् क्रमं भेदो वाक्यार्थस्य प्रसज्यते ।
पदान्तरस्य पारार्थ्यादाख्यातं यो ऽपि मन्यते ॥ ५५ ॥
वाक्यं प्राधान्ययोगेन वाक्यार्थञ्चापि भावनाम् ।
तत्रापि न बहिर्वस्तुक्रियाकारकसङ्गतिः ॥ ५६ ॥
न कारकाणामन्योन्यं न क्रियायां प्रतीयते ।
उखायामोदनं काष्ठैर्देवदत्तः पचेदिति ॥ ५७ ॥
द्रव्याणां तावदेतस्मिन्नसम्बन्धः परस्परम् ।
अत्यन्तभेदनिष्पन्नषष्ठ्यभावानपेक्षणात् ॥ ५८ ॥

तृतीयाद्युपहारेण सन्निधेरपि साधनात् ।
काष्ठादीनां च सम्बन्धः क्रियया न स्वरूपतः ॥ ५६ ॥
आर्द्रादिधर्मकैः पाकस्तैः कृतो न हि दृश्यते ।
शक्तिः कारणमिष्टा चेदमूर्ता सापि निष्क्रिया ॥ ६० ॥
शक्तेरपि च तैः पाकस्तिष्ठद्भिर्नैव साधकः * ।
ज्वलनादिमुखेनाथ तेषां पाकेन सङ्गतिः ॥ ६१ ॥
तथापि कर्मणा कर्म न साध्यमिति दुर्लभम् ।
भिन्नार्थसमवेतत्वान्न च सम्बन्धसम्भवः ॥ ६२ ॥
न चान्यकारकोत्पाद्यं कारकं कारकान्तरम् ।
ज्वलनादीनि कुर्वन्ति न च स्युः पाकसाधनम् ॥ ६३ ॥
अपाकसाधनानां च कुतस्तेनैकवाक्यता ।
ज्वलनादिगता पाके शक्तिश्चेदुपचर्यते ॥ ६४ ॥
कर्तृत्वात्तच्च काष्ठादेः करणत्वादि दुर्लभम् ।
मुख्यं कारकवैचित्र्यमलब्धं ज्वलनादिषु ॥ ६५ ॥
कथं नु पाकवेलायामुपचारेण लभ्यते ।
स्वव्यापारे च काष्ठादेः करणत्वाद्यसम्भवः ॥ ६६ ॥
विक्लिद्यन्ति ज्वलन्तीति बिभर्तीति च दर्शनात् ।
न चैषां पाकवेलायां व्यापारान्तरमिष्यते ॥ ६७ ॥
एकप्रयोगवत्तेन कर्तृतैव प्रसज्यते ।
पचिना वानुपात्तेषु ज्वलनादिष्वसङ्गतिः ॥ ६८ ॥
न हि सद्भावमात्रेण तानि सम्बन्धकारणम् ।
न च शब्दान्तरैरेषामुपादानमतः पचिः ॥ ६९ ॥

* साध्यते इति पाठान्तरम् ।

देवदत्तक्रियावाची न स्यात्काष्ठादिसङ्गतः ।
सर्वव्यापारवाची चेत्पचिरिष्टस्तथा सति ॥ ७० ॥
कर्तृत्वमेव काष्ठादेरापन्नं देवदत्तवत् ।
धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते ॥ ७१ ॥
सर्वेषां भावनासाम्ये न ह्यन्यत्कर्तृलक्षणम् ।
काष्ठादीनि पचन्तीति विवक्षा या च दृश्यते ॥ ७२ ॥
सापि नैवोपपद्येत यद्यन्यत्कर्तृलक्षणम् ।
एकधात्वनुगृहीतानां न चास्त्यङ्गप्रधानता ॥ ७३ ॥
न कारकं ततः कर्ता प्राधान्यप्रहितसत्क्रियम् ।
अतः समप्रधानानामभिधावदसत्त्वयोः ॥ ७४ ॥
क्व चित्कारकवैचित्र्यं क्वचिदैक्यं न युज्यते ।
प्रत्ययेनापि नैवात्र ज्वलनादिपरिग्रहः ॥ ७५ ॥
कर्तृमात्रं त्वसौ ब्रूयादथ वा तद्गतां क्रियाम् ।
तस्मान्न पचतीत्यत्र काष्ठादेरस्ति सङ्गतिः ॥ ७६ ॥
सर्वत्र न च धात्वर्थः प्रत्ययार्थेन युज्यते ।
भावना प्रत्ययार्थौ हि धात्वर्थानां च तां प्रति ॥ ७७ ॥
साध्यसाधनयोगानामुपादानं न धातुभिः ।
साध्यत्वं पाकमित्येवं पाकेनैव च साधनम् ॥ ७८ ॥
पचित्येतेन रूपेण नैकोऽप्यंशः प्रतीयते ।
विधिभावनयोश्चैकप्रत्ययग्राह्यताकृतः ॥ ७९ ॥
धात्वर्थात्प्रथमं तावत्संबन्धोऽध्यवसीयते ।
विधावर्थापिते तत्र केवले भावनात्मनि ॥ ८० ॥
पश्चात्सम्बध्यमानोऽपि न धात्वर्थो विधीयते ।
विध्यधीनप्रवृत्तेस्तु न स कार्यः श्रुतेऽपि सन् ॥ ८१ ॥

Digitized by Google

एवं कारकविध्यन्तविधानस्याप्यसम्भवः ।
विध्यन्तत्वं प्रयाजादेर्निषेद्धव्यमसङ्गतम् ॥ ८२ ॥
तत्सम्बद्धत्वमेतेषां वाच्यं शुक्लगवादिवत् ।
तथार्थलक्षणा का चित्सम्भवेदपि सङ्गतिः ॥ ८३ ॥
वाक्यैरेव त्वसम्बन्धः शब्दानां न प्रकल्पते ।
अतो ऽन्योन्याश्रयत्वं स्यादेकमूलाप्रसिद्धितः ॥ ८४ ॥
एवमंशत्रयासत्त्वाज्जातो निर्विषयो विधिः ।
धात्वर्थकारकाणां तु साक्षान्नैव सिध्यति ॥ ८५ ॥
विधेर्भावनया रोधात्कर्तुस्तेष्वप्रवर्तनात् ।
क्रियाकारकसम्बन्धमूलत्वात्सर्वसङ्गतिः ॥ ८६ ॥
निषेध्या तन्निषेधेन स्वस्वामिपितृबन्धुषु ।
उपसर्गनिपातानां केन चिन्न च सङ्गतिः ॥ ८७ ॥
परस्य खल्वसिद्धेव स्वातन्त्र्येण च नामभिः ।
क्रियाविशेषणत्वाच्च विना नैवोपसर्गता ॥ ८८ ॥
वाक्यार्थासत्त्वभूतत्वादेतैर्न च विशिष्यते ।
क्रियाद्वारा च कल्प्येत सापि नाकारकात्मनः ॥ ८९ ॥
असत्त्वभूतमर्थं च नाध्यवस्यति कारकम् ।
विशेषणत्वमप्येषां नैवार्थाननुरञ्जनात् ॥ ९० ॥
आनर्थक्यान्यथासिद्धत्वविपरीतप्रसाधनात् ।
प्रलम्बते यमप्यादौ तेषां कश्चिदनर्थकः ॥ ९१ ॥
प्रसादादिषु चान्यो ऽर्थो विपरीतः प्रतिष्ठितः ।
येन स्वार्थविरोधेन विशेष उपजन्यते ॥ ९२ ॥
विशेषणं तदेवेष्टं न तु यत्स्वार्थनाशकम् ।
आभिमुख्योर्ध्वगत्यादिविशेषो यो ऽवगम्यते ॥ ९३ ॥

Digitized by Google

तस्यापि कर्तृधर्मत्वान्न धात्वर्थाङ्गतेष्यते ।
कर्त्रा च सह सम्बन्धो नोपसर्गस्य विद्यते ॥ ९४ ॥
अंशत्रयातिरिक्तत्वान्नापि भावनया सह ।
प्रतिषेधविकल्पादेः सम्बन्धश्च विरुध्यते ॥ ९५ ॥
अन्यद्रूपपरिच्छेदाद्बाह्यवस्त्वर्थवादिनाम् ।
स्वम्रुतेः प्रथमं वस्तु सद्भावेन निरूपितम् ॥ ९६ ॥
कथं नञादिभिः पश्चादभावमुपनीयते ।
विरोधश्च तयोः श्रुत्योरस्ति नास्तीति शब्दवत् ॥ ९७ ॥
विकल्पे पुनरेकस्य शब्दस्यैषा विरोधिता ।
गवादिवच्च नैतेषां स्वतन्त्रार्थावधारणम् ॥ ९८ ॥
येन तत्पूर्वकं सन्तं वाक्यार्थं ययुरात्मना ।
समुदाये ऽप्यसिद्धत्वाद्येन वदत्यत्यहेतुताम् ॥ ९९ ॥
गम्यते चेत्यतो ऽयोवत्प्रत्येकाशक्तिसिद्धये ।
असम्बन्धात्पदार्थानामिति पूर्वोक्तया दिशा ॥ १०० ॥
सन्नप्यप्राप्यमानत्वादसन्नित्यभिधीयते ।
एकैकश्चेत्पदार्थानां वाक्यार्थे व्यभिचारिता ॥ १०१ ॥
प्रागसिद्धेः समस्तानामसाधारणद्रुष्टता ।
पदार्थानेव वाक्यार्थं यः सामस्त्येन मन्यते ॥ १०२ ॥
गौरश्वः पुरुषो हस्तीत्यत्राप्यस्य प्रसज्यते ।
व्यस्तस्य यो ऽर्थः शब्दस्य न सामस्त्ये जहाति तम् ॥ १०३ ॥
तस्योत्पत्ति न विस्रम्भः पदार्थं प्रति लभ्यते ।
तत्र द्विषादिसामान्यविज्ञानं केवलम्भवेत् ॥ १०४ ॥
अनेकशब्दविज्ञानान्न विशेषावधारणम् ।
पदार्थासङ्गते ऽर्थे चेद् वाक्यं साक्षात्प्रवर्तते ॥ १०५ ॥

Digitized by Google

पदार्थसंविदस्तित्वे वाक्यधीमूलसम्भवः ।
तत्र चोक्तं कथावत्तु सङ्घातात्पौरुषेयता ॥ १०६ ॥
न चाप्तपुरुषो ऽत्रास्ति तेन वेदाप्रमाणता ।
अत्राभिधीयते यद्यप्यस्ति मूलान्तरं न नः ॥ १०७ ॥
पदार्थानां तु मूलत्वं दृष्टं तद्भावभावतः ।
सत्यं न चार्वेकं वाक्यं वाक्यार्थस्योपपद्यते ॥ १०८ ॥
अन्यथाप्युपपन्नत्वाच्छक्तिस्तत्राप्रमाणिका ।
पदएव हि वर्णानां शक्तिः क्लेशेन कल्पिता ॥ १०९ ॥
तिरोभावादि हि त्वेषां भवेत्क्लेशान्तरेण सा ।
बहवश्चानुसन्धेया वर्णाश्चिरतिरोहिताः ॥ ११० ॥
पदार्थेषूपयुक्तानां पुनर्व्यापारकल्पना ।
पदार्थानां च सामर्थ्यं गम्यमानमपन्हुतम् ॥ १११ ॥
आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चति ।
एकयैव हि संस्कृत्या कथं कार्यद्वयं भवेत् ॥ ११२ ॥
न चैषां पूर्वसंस्कारादन्यो ऽस्तीति प्रतीयते ।
न चान्त्यवर्णवेलायां तेष्वालोचनसम्भवः ॥ ११३ ॥
पदतद्वाक्यसम्बन्धबुद्धिव्यवधिबाधनात् ।
प्रत्यक्षस्मृतिहृपातो न तेष्वेकास्ति वाक्यधीः ॥ ११४ ॥
तस्माच्च वाक्यनिर्भासा वाक्यं सा धीर्न कल्पते ।
वाक्यमित्यनया बुद्ध्या न चात्मांशः प्रतीयते ॥ ११५ ॥
न च वाक्यार्थबुद्धेदं शून्यवादे निह्नपितम् ।
वाक्यवाक्यार्थयोरैक्ये बाह्याभ्यन्तरवादिनाम् ॥ ११६ ॥
विच्छिन्नभागबुद्धीनां मृषात्वं निष्प्रमाणकम् ।
कल्प्यमाने ऽपि नैवं च वस्तुबुद्धिर्निवर्तते ॥ ११७ ॥

Digitized by Google

तेष्वेव च पदार्थेषु प्रकृप्तस्तोकशक्तिषु ।
आवापोद्वापरचनाभेदाद्वाक्येष्वनन्तता ॥ ११८ ॥
स्तोकशक्त्युपपन्ने च बहुशक्त्यप्रमाणता ।
वाक्यतच्छक्त्यनन्तत्वे नार्थापत्तिस्ततो भवेत् ॥ ११९ ॥
न चावयवबुद्धीनां सादृश्याद्भ्रान्तिकल्पना ।
न प्रसिद्धाः पृथग्भूता मुख्या ह्यवयवाः क्व चित् ॥ १२० ॥
नावयव्यन्तरे यस्मात्सर्वेवाक्येष्वभागता ।
सतामवयवानां हि स्याद्वा सदृशता न वा ॥ १२१ ॥
सादृश्यं नरसिंहादौ युक्तं जात्यन्तरे सति ।
तत्र ह्यवयवाः सिद्धाः प्राक्संयोगविभागिनः ॥ १२२ ॥
पाण्यादयो हि विच्छिन्ना दृश्यन्ते नृशरीरतः ।
देहेषु च पृथग्बुद्धिस्तेषु सर्वेषु जायते ॥ १२३ ॥
तत्र तत्सदृशत्वाद्वा तत्सामान्येन वैकता ।
हस्तादिषूपपन्नेति प्रत्यभिज्ञानसम्भवः ॥ १२४ ॥
तद्वदत्रापि सादृश्यं यदि नामावधार्यते ।
सिद्धे ऽवयवसत्यत्वे मृषा निर्भागकल्पना ॥ १२५ ॥
असता यत्तु सादृश्यमसतः परिकल्प्यते ॥
ध्रुवं शशविषाणेन खरशृङ्गस्य तद्भवेत् ॥ १२६ ॥
अथासत्त्वेन सादृश्यमत्राप्यस्तीति मन्यसे ।
सर्वेनैवं समानत्वात्कश्चिन्नासदृशो भवेत् ॥ १२७ ॥
भागशश्चित्रेपि कृष्णादि दृष्टं एव सदृक्तया ।
एकदेशस्य मेघे ऽपि सम्यक्तित्करसेषु च ॥ १२८ ॥
चित्रबुद्धेस्तु नैवास्ति प्रतीतिर्भागशो मम ।
आकाराभावतो ऽर्थोच चित्रः सावयवः स च ॥ १२९ ॥

तस्मान्न पदवर्णानामसत्त्वात्सदृशी गतिः।
वाक्यस्यापि न सादृश्यं तदवयवदर्शनात्॥ १३०॥
स्याद्वर्णपदनिष्कृष्टिर्न च वाक्यसदृक्तया।
तेन न स्यादपोद्धारस्तेषामालम्बनादृते॥ १३१॥
न च व्यञ्जकभेदोऽपि पदवर्णादृते ऽस्ति ते।
सूक्ष्मत्वादणुकल्पानां ध्वनीनां परिकल्पनात्॥ १३२॥
न च कार्यान्तरारम्भस्तैस्तादृगुपपद्यते।
तेनाणुमात्रशब्दानां गृहीतिः केवला भवेत्॥ १३३॥
सतोरपि च शब्दानां पृथक्क्रमवत्त्वयोः।
व्यङ्ग्याभावेन नैवेषामभिव्यक्तिः प्रसिध्यति॥ १३४॥
कृत्स्नस्य यौगपद्येन भवेद्वावगतिर्न वा।
नैव प्राक्सकलाद्वाक्याद् ग्राह्यं किं चित्तवास्ति हि॥ १३५॥
तदेव सकलं वाक्यं न्यूनमन्यदपेक्ष्य च।
तद्विरुद्धं न चाभिन्ने न्यूनसाकल्यकल्पना॥ १३६॥
पृथक् प्रसिद्धसद्भावं विपदं च चतुष्पदे।
नास्तीति यदि कल्पेत वृक्षो न स्यात्तदा वने॥ १३७॥
पृथक्प्रसिद्धमिथ्यात्वात्स्याद्वाक्यान्तरता यदि।
वाक्याच्छब्दान्तरत्वं स्यात्तथैव पदवर्णयोः॥ १३८॥
तस्माद्यथा महावाक्ये लघूनामनिराक्रिया।
तथैव पदवर्णानां नासत्त्वं वाक्यबुद्धिषु॥ १३९॥
केवलस्याप्रयोगाच्चेन्महदर्थे लघोरपि।
अल्पार्थे तत्प्रयुक्तश्चेत्स्वार्थे तद्वत्पदानि नः॥ १४०॥
यद्यपि व्यवहाराङ्गं न पूर्णपदवर्णयोः।
तथाप्यस्त्येव सद्भावस्तन्मात्रे प्रयुयुक्षिते॥ १४१॥

तदार्थमात्रमेवेष्टा विशेषे ऽवगते क्वचित् ॥
पदं प्रयुञ्जते केचिद्वर्णं वार्थसमन्वितम् ॥ १४२ ॥
ग्रन्थाध्ययनवेलायां स्वरूपस्यावधारणम् ।
प्रधानं पदवर्णानां विच्छिन्नानामुपाश्रितम् ॥ १४३ ॥
तदा प्रसिद्धसत्त्वानां नोत्तरत्रास्ति साधनम् ।
न हि वाक्यार्थबुद्ध्येषां रूपं किंचिद्विरुध्यते ॥ १४४ ॥
यद्यप्येषां न सामर्थ्यं केवलानां तदुद्गमे ।
अविरुद्धस्तु सद्भावः कार्यान्तरथाङ्गवत् ॥ १४५ ॥
केवलस्याप्रयोगित्वं तेनानैकान्तिकीकृतम् ।
कार्यादृते ऽपि तद्बुद्धिः सा शब्दे ऽप्युपपादिता ॥ १४६ ॥
तद्भावे पदवर्णानां भेदो यः परमाणुवत् ।
सर्वाभावस्ततश्चेति सेयम्बालविभीषिका ॥ १४७ ॥
यथा तन्त्वादयः सिद्धाः परमाणुषु सत्स्वपि ।
तथा सत्स्वपि भागेषु न वर्णादि विरोत्स्यते ॥ १४८ ॥
किंचित्सावयवं दृष्ट्वा न च सर्वं प्रसज्यते ।
घटसावयवत्वे ऽपि न भागः परमाणुषु ॥ १४९ ॥
तदत्र पदवर्णानां भेदं प्रत्यक्षसाधितम् ।
वर्णांशानुपपत्त्या कः शक्नुयादपबाधितुम् ॥ १५० ॥
असत्त्वे ये च दृष्टान्ताः प्रकृतिप्रत्ययादयः ।
असिद्धास्ते यतो लोके तद्भावः संप्रतीयते ॥ १५१ ॥
नैव हि प्रक्रियामात्रं शास्त्रतः परिकल्प्यते ।
प्रत्यक्षं ह्येव तद्रूपं वाच्यमप्यन्यवाच्यवत् ॥ १५२ ॥
क्रमेण हि प्रतीयेते प्रकृतिप्रत्ययौ पदे ।
तदागमे तदर्थौ ऽपि स्वसंवेद्यः क्रमेण नः ॥ १५३ ॥

अन्वयव्यतिरेकाभ्यामप्यर्थो गम्यते तयोः ॥
अमो ह्युपजनापाये वृक्षार्थो ह्यनुगम्यते ॥ १५४ ॥
वृक्षं वृक्षेण चेत्यत्र वृक्षत्वं तावदेव हि ॥
कर्मत्वं हीयते पूर्वं करणत्वं च जायते ॥ १५५ ॥
तथा वृक्षं घटं चेति कर्मत्वमनुगम्यते ।
वृक्षत्वं हीयते ऽन्या च घटधीरुपजायते ॥ १५६ ।
तत्र यो ऽन्वेत्ययं शब्दमर्थस्तस्य भवेद्‌सौ ।
अन्यथानुपपत्त्या हि शक्तिस्तत्रावतिष्ठते ॥ १५७ ॥
यत्कूपयूपसूपादौ समाने ऽप्युपबन्धने ।
नास्त्यर्थानुगमः कश्चित्तन्न शब्दो ऽपराध्यति ॥ १५८ ॥
नान्वयव्यतिरेकाभ्यामपूर्वार्थावधारणम् ।
संसृष्टे ऽवगते ऽर्थे हि ताभ्यां शक्तिर्नियम्यते ॥ १५९ ॥
तेनानेकात्मकाच्छब्दादनेकार्थावबोधने ।
सिद्धे यदागमे यो ऽर्थः स तस्यैवावधार्यते ॥ १६० ॥
एवं पिपीलिकापङ्क्तिरेणुचक्रान्वये इति ॥
गवाश्वोपजनापाये ऽप्यतादर्थ्यमशक्तितः ॥ १६१ ॥
अस्त्येव च गजाश्वेषु सामान्यं रेणुकारणम् ।
दृढप्राणिविशेषत्वं समस्तव्यक्तिलक्षितम् ॥ १६२ ॥
दृष्टा पिपीलिकापङ्क्तिः केवला रेणुवर्जिता ।
हस्त्याद्यन्वयिना तेन न हेतुत्वं प्रपद्यते ॥ १६३ ॥
प्रकृतिप्रत्ययादीनां केवलाविनियोगतः ।
यथैवार्था न दृश्यन्ते तथा चानर्थमप्यदः ॥ १६४ ॥
नामाख्यातादिसाकल्यं वैकल्यानुगमे इति ।
तदर्थासंभवो दृष्टः पदवाक्यान्तराश्रयः ॥ १६५ ॥

विप्राश्वः पचते यातं राज हस्तिन्यगादिति ।
तथान्यद्रूपमन्यादृक् राज्ञा दध्यन्नगामिति ॥ १६६ ॥
विप्रशब्दो ह्य विदृष्टा उपसर्गार्थवाचिनो ।
समुदायस्तथान्यश्च ब्राह्मणत्वावबोधकः ॥ १६७ ॥
अश्व इत्यपि नामेदमाख्यातं लुङि चेदृशम् ।
आख्यातं पचतेशब्दः पचते इति वा द्वयम् ॥ १६८ ॥
स्त्रीद्वित्वं पुंबहुत्वं वा ते षष्ठ्यथचतुर्थ्ययो ।
पचते इति सर्वं वा चतुर्थ्यन्तं शतुः पदं ॥ १६९ ॥
यातं लोण्मध्यमद्वित्वमयातं लङि वा भवेत् ।
कर्तृनिष्ठा द्वितीयात्वं प्रथमान्तं नपुंसकम् ॥ १७० ॥
राजहस्ती समासो वा राजलोण्मध्यमो ऽपि वा ।
हस्तिनीत्यथ सप्तम्यामथ स्त्रीप्रत्ययान्तरम् ॥ १७१ ॥
अगादिति लुङन्तं स्याद्गो वा पञ्चमीपरः ।
तानतीत्यथ वाप्येवं क्विबन्तो ऽयं समासभाक् ॥ १७२ ॥
एवमर्थविकल्पेन भेदार्थो नावतिष्ठते ।
निर्भागे वाचके वाक्ये समस्तादस्ति निर्णयः ॥ १७३ ॥
तस्मान्न यो यमन्वेति सर्वदा तेन सो ऽर्थवान् ।
अनर्थकत्वविज्ञानात्तद्रूपे ऽपि पदान्तरे ॥ १७४ ॥
तथा राजार्थवान्दृष्टो राज्ञेत्यत्र च नास्त्यसौ ॥
दधि गोरिति नार्थौमौ विद्धौ दध्यत्र गामिति ॥ १७५ ॥
अन्यस्मिञ्ज्ञातसंबन्धे निषिद्धो न्यश्च वाचकः ।
न च सर्वविकाराणामानन्त्यात्सङ्गतीक्षणम् ॥ १७६ ॥
तस्मादनर्थकैरेव विनाजातिगुणान्वयात् ।
प्रकृतिप्रत्ययाद्यन्तपदभागविवर्जितैः ॥ १७७ ॥

Digitized by Google

वाक्यैरेव विशिष्टो ऽर्थः स्वतन्त्रैः प्रतिपाद्यते।
भागशः कल्पितोपायैरश्वकर्णाजकर्णवत् ॥ १७८ ॥
अथ क्रमः पदात्मा न सर्वेष्वेतेषु भिद्यते।
केन चिद्धर्मभेदेन जरा राजेति च क्रमात् ॥ १७९ ॥
पदावधारणोपायान्बहूनिच्छन्ति सूरयः।
क्रमन्यूनातिरिक्तत्वस्वरवाक्यस्मृतिश्रुतीः ॥ १८० ॥
शेषानर्थान्परिच्छिद्य स्वरूपैर्वाक्यगोचरान्।
तत्संबन्धानुरूपार्थवाचित्वेनान्यनिर्णयः ॥ १८१ ॥
तथावधृतनामार्थैराख्यातापेक्षणेन तत्।
व्याख्याते सति नामत्वं भवेदुभयसंभवे ॥ १८२ ॥
यथा च पुरुषाकारे समाने ऽप्यवगम्यते।
स्मरणाद्ब्राह्मणत्वादि प्रकृतिप्रत्ययान्वयात् ॥ १८३ ॥
तथात्वाख्यानभेदेन प्रकृतिप्रत्ययादिभिः।
नामाख्यातव्यवस्थानं स्मरणेनोपलभ्यते ॥ १८४ ॥
अप्राप्तश्रुत्युपायानां विवेको ऽयं न जायते ॥
अज्ञाते पितृसंबन्धे तुल्यो ऽसौ ब्राह्मणादिषु ॥ १८५ ॥
तथा श्रुत्यैव संदिग्धं किं चिन्निर्णीयते पदम्।
सामानाधिकरण्येन प्रसिद्धाख्यातनामभिः ॥ १८६ ॥
नन्वयं न विभागः स्यात्पदजातिमनिच्छतः।
नानाख्यातमतिग्राह्याः कथं वर्णास्तएव ते ॥ १८७ ॥
केन वा नेष्यते जातिः पदजातचतुष्टये।
सुप्तिङ्कृत्तद्धितास्सन्ति तथा धात्वादिजातयः ॥ १८८ ॥
पदैक्येप्यविरुद्धेयमत्यन्ता नातिरेकिणी।
वर्णा एवेति च यन्थे निषिद्धात्यन्तभिन्नता ॥ १८९ ॥

Digitized by Google

भ्रमणात्वादिवच्चासौ व्यज्यते क्रमवर्त्तिभिः ।
अन्त्यवर्णोऽथ वा व्यक्तिः पूर्वसंस्कृत्यपेक्षिणी ॥ १९० ॥
यद्वा येनैव रूपेण व्यङ्क्तुं जात्यन्तरं क्षमाः ।
वर्णाः स्वरूपसाम्येऽपि तेनाख्यातादिबुद्धिषु ॥ १९१ ॥
वनपङ्क्त्यादिवच्चैषु समुदायेष्वसत्स्वपि ।
भिन्नाख्यातादिसामान्यव्यवहारो भविष्यति ॥ १९२ ॥
धातुप्रत्ययतद्वाच्यसामान्यानामियं गतिः ।
तद्भिन्नाख्यातकृद्रूपं नित्यं हि स्मर्यते जनैः ॥ १९३ ॥
न चान्वाख्यानमात्रेण कल्पितं तत्त्ववादिवत् ।
प्रयुज्यते हि यद्रूपं तद्रूपायेन तिष्ठति ॥ १९४ ॥
अवध्यग्रहणं यत्तु प्रकृतिप्रत्ययौ प्रति ।
अन्वाख्यानविसंवादादित्येतच्च न दुष्यति ॥ १९५ ॥
तच्च ह्याप्तनरोक्तीनां प्रामाण्यमुपपद्यते ।
यद्वा तुल्यबलत्वेन विकल्पेन मतान्तरम् ॥ १९६ ॥
प्रकृतिप्रत्ययांशो वा कश्चित्तावन्न भिद्यते ।
शिष्टे विकरणादौ तु यथेष्टाङ्गाङ्गिकल्पना ॥ १९७ ॥
धूमादावपि वन्ह्यंशे कश्चिदंशोऽनुमापकः ।
अन्यः साधारणो यद्वत्तद्वदत्र भविष्यति ॥ १९८ ॥
यथा च नित्यरूपत्वान्न तथांशान्तरोद्धृतिः ।
तथा चाममकेऽप्यंशो नित्यत्वे च व्यवस्थितः ॥ १९९ ॥
यच्च प्रत्ययलोपेन प्रकृतिः स्यात्क्विबन्तवत् ।
मुहुः प्रकृतिलोपेन प्रत्ययो वाऽधुनादिवत् ॥ २०० ॥
तन्मात्रस्य द्वियत्नित्वं तच्च शब्दस्वभावतः ।
वाक्यार्थे तद्धितान्तादिपदसामर्थ्यभेदवत् ॥ २०१ ॥

Digitized by Google

एकदेशानुमानेन केचिदाहुर्द्व्यर्थताम् ।
अपरे ऽर्थैकदेशेन ब्रुवते ऽन्यार्थलक्षणाम् ॥ २०२ ॥
तत्त्वयुक्तं यतो नास्ति लक्षणारूपता मतेः ।
मुख्यत्वेनेव बुद्धिर्नं क्विबन्तादिषु जायते ॥ २०३ ॥
लक्षणादिप्रवृत्तिश्च न शास्त्रेणानुगम्यते ।
तत्संकरे च तेनैव वाच्यवाचकनिर्णयः ॥ २०४ ॥
न च तेन प्रहेतस्य विज्ञाता सह्ववाचिता ।
लोकप्रयुक्तशब्दार्थौ नोपायत्वाच्च मुच्यते ॥ २०५ ॥
आख्यातप्रत्ययेनापि संज्ञाशावुपलक्षितः ।
कामं तदीयमप्यर्थं गमयेदनुमानतः ॥ २०६ ॥
तावत्यंशेन कल्प्यौ च प्रकृतिप्रत्ययौ पुनः ।
स यथार्थद्विशक्तित्वे वरं क्लेशः समाश्रितः ॥ २०७ ॥
निर्ज्ञातपरिमाणस्य स्मरणानुगमाद्विना ।
नानात्वं कल्पयित्वास्य कः शक्तिं कल्पयिष्यति ॥ २०८ ॥
दध्यश्चेति यदन्यादृक्पदं पूर्वावधारितात् ।
केचिदाहुस्तदेवेदमनानन्त्यर्यदूषितम् ॥ २०९ ॥
प्रत्यभिज्ञायते तद्धि स चार्थः संप्रतीयते ।
ईकारे तु यविज्ञानमकारपरसंहिते ॥ २१० ॥
अथ चात्मीयसिद्धान्तायकारत्वे ऽस्य सत्यपि ।
दधिवाक्यार्थसामर्थ्यं लक्षणादवगम्यते ॥ २११ ॥
तथा ह्यश्रुतदध्यश्चो लक्षणानुगमाद्विना ।
व्युत्पन्नदधिशब्दो ऽपि दध्यश्चेति न बुध्यते ॥ २१२ ॥
विकारानन्त्यतो यस्तु संबन्धाग्रहणसंभवः ।
लक्षणात्तद्विदुक्तोर्वा नातिक्लेशो भविष्यति ॥ २१३ ॥

क्रियत्पदमिति ज्ञानं यत्तु तत्र न जायते ।
स्वरान्तं व्यञ्जनान्तं वा न चाज्ञाते ऽर्थनिर्णयः ॥ २१४ ॥
तदुच्यते पदच्छेदे तदपभ्रंशतां व्रजेत् ।
संहिताविषये चास्य स्मर्यते साधुशब्दता ॥ २१५ ॥
एतस्मिंस्तु प्रतीमो ऽर्थमगृहीतावधावपि ।
तेनावच्छिद्यमाने ऽपि पदे भेदो ऽर्थभेदतः ॥ २१६ ॥
ज्ञायते चावधिस्तत्र व्यञ्जनान्तो न तूच्यते ।
दधिशब्दावबोध्यत्वान्नित्यं नित्यसमासवत् ॥ २१७ ॥
एतेन राजराज्ञादिशब्दानां दत्तमुत्तरम् ।
किं चिदंशसमानं हि तदर्थे तत्पदान्तरम् ॥ २१८ ॥
यत्तु ब्राह्मणवत्सादौ ब्राह्मणार्थो न गम्यते ।
अवध्यन्तरतस्तत्र तत्पदान्तरजृम्भितम् ॥ २१९ ॥
उत्सर्गस्यापवादेन बाधस्तस्य न संमतः ।
तद् ब्राह्मपदमुत्सृष्टं बाध्यते ऽन्यावधौ पदे ॥ २२० ॥
तत्त्वेनावधिमुत्कृष्य यद्युच्येत पदान्तरम् ।
केन स्वार्थो ऽस्य वार्येत देवदत्तादिशब्दवत् ॥ २२१ ॥
एवमेवाश्वकर्णादौ समुदायप्रसिद्धितः ।
वार्यते ऽवयवस्यार्थो वृत्ताद्यर्थावधारणात् ॥ २२२ ॥
अर्थप्रकरणाधीनबाधितस्वार्थयोरपि ।
समस्तव्यस्तयोर्भूयः स स्वार्थः प्रमीयते ॥ २२३ ॥
गोशुक्लादिपदानां तु समस्तव्यस्तभाविनाम् ।
स्वार्थहानिर्न दृष्टेति क्वानर्थक्यं भविष्यति ॥ २२४ ॥
पदार्थानुगतश्चैव शब्दार्थो गम्यते सदा ।
न च शिष्टार्थता तस्माद्वाक्यस्वातन्त्र्यबाधिनी ॥ २२५ ॥

Digitized by Google

न च मुञ्चन्ति सामर्थ्यं वाक्यार्थेषु पदानि नः ।
तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते ॥ २२६ ॥
अशाब्दे चापि शाब्दार्थे न पदार्थेष्वशाब्दता ।
वाक्यार्थस्येव नैतेषां निमित्तान्तरसंभवः ॥ २२७ ॥
संबद्धमेव चैते ऽर्थं गमयन्त्यविनाभुवम् ।
सामान्यं स्वविवेकेन विना न ह्युपपद्यते ॥ २२८ ॥
न चानुमानमेषा धीस्तन्मात्रेण प्रसज्यते ।
प्रतिज्ञार्थैकदेशत्वात्पदार्थानां ह्यलिङ्गता ॥ २२९ ॥
पदार्थैरनुरक्तो ऽसौ वाक्यार्थः संप्रतीयते ।
नात्मना गमयन्त्येनं विना धूमो ऽग्निमत्त्ववत् ॥ २३० ॥
पक्षधर्मत्वमेतेषां वाक्यार्थे न च गम्यते ।
न हि देशादिवत्पूर्वं निष्पन्नः स प्रतीयते ॥ २३१ ॥
असत्त्वभूतमेनं हि प्रतिपद्यामहे ततः ।
क्रियाकारकसंसर्गविशिष्टः प्रागसौ कुतः ॥ २३२ ॥
धर्मिण्यनवबुद्धे च न तद्धर्मावधारणम् ।
न च प्राग्बोधकं किंचिद्वाक्यार्थस्योपपद्यते ॥ २३३ ॥
अवबुद्धे तु वाक्यार्थे यदि तद्धर्मता भवेत् ।
विज्ञाते ऽर्थे ततः किं नु प्रमेयमवशिष्यते ॥ २३४ ॥
अन्वयश्च पदार्थानां न वाक्यार्थैरवेक्ष्यते ।
सर्वस्मिन्न च सुज्ञानो भूतभावितिरोहिते ॥ २३५ ॥
अन्यवाक्यार्थसंबन्धज्ञानाच्चान्यो न गम्यते ।
अन्यत्वाच्च पदार्थानां ते चेन्नान्यार्थधीर्भवेत् ॥ २३६ ॥
सामान्यदृष्टक्लृप्तो वा लभ्यते न विशेषधीः ।
वाक्यार्थावगतिः सर्वा त्वसाधारणगोचरा ॥ २३७ ॥

Digitized by Google

असंबन्धप्रतीतेश्च प्रमाण्यमुपपादितम् ।
सर्वलोकप्रसिद्धा च प्रतिपत्तिरिह स्फुटा ॥ २३८ ॥
यच क्व च न विज्ञातान् पदार्थान्प्रतिपद्य हि ।
दूरदेशादिवार्तासु नाप्तोक्ते धीर्विहन्यते ॥ २३९ ॥
आप्तवादाविसंवादादच चेदनुमानता ।
निर्णयस्तावता सिध्येद्बुद्ध्युत्पत्तिर्न तत्कृता ॥ २४० ॥
अन्यदेव हि सत्यत्वमाप्तवादत्वहेतुकम् ।
वाक्यार्थश्चान्य एवेति ज्ञातः पूर्वतरं ततः ॥ २४१ ॥
तच वेदाप्तवादेन सत्यत्वमनुमीयते ।
वाक्यार्थप्रत्ययस्यास्य कथं स्यादनुमानता ॥ २४२ ॥
जन्म तुल्यं हि बुद्धीनामाप्तानाप्तगिरां श्रुतौ ।
जन्माधिकोपयोगी च नानुमायास्त्रिलक्षणः ॥ २४३ ॥
शब्दप्रामाण्यनिर्णीत्यै पदार्थेभ्यो यथेष्यते ।
अत्यन्तादृष्टवाक्यार्थप्रतिपत्तिस्तथोच्यते ॥ २४४ ॥
भावनावचनस्तावन्न स्मारयति लोकवत् ।
अन्वयव्यतिरेकाभ्यां प्रत्ययार्थस्तु सेष्यते ॥ २४५ ॥
केश्चिदन्यैस्तु धात्वर्थस्तत्सामीप्योपकारतः ।
अपरैः समुदायार्थस्तत एव हि गम्यते ॥ २४६ ॥
पाकादौ यन्न दृष्टासौ भवत्यादौ तथैव च ।
विवेकफलमन्दत्वात्पचत्यादौ यथेष्टता ॥ २४७ ॥
सा साध्यसाधनोपायसामान्यार्थावधारणात् ।
अन्यलभ्यं विशेषांशं सं कं चिदभिकाङ्क्षति ॥ २४८ ॥
कामावगतसाध्यत्वः स्वर्गः काङ्क्षति भावनाम् ।
तच संनिधियोग्यत्वात्संबन्धः कल्प्यते तयोः ॥ २४९ ॥

ततः सा क्रमसंबन्धा साधनांशमपेक्षते ।
धात्वर्थोऽसाधनं किं चिन्नानुष्ठानं हि सिध्यति ॥ २५० ॥
धातुवाच्यश्च यागादिरतृतीयापरोऽपि सन् ।
स्वभावाद्भावनासक्तः साध्यं किं चिदपेक्षते ॥ २५१ ॥
प्रत्यासत्तिनिमित्तोऽयं संबन्धः कल्प्यतेऽनयोः ।
तं च विस्पष्टमाख्यातुं यागेनेति प्रयुज्यते ॥ २५२ ॥
यथोपगवशब्दार्थं तस्यापत्यमितीदृशात् ।
कथयन्ति न चेतस्मिन्षष्ठ्यन्तोपगुसंभवः ॥ २५३ ॥
न केवलं तृतीयैव करणत्वं नियच्छति ।
प्रमाणान्तरगम्ये ऽपि न किं चिद्विरुणद्धि सा ॥ २५४ ॥
प्रधानकरणत्वे वा धातोः सत्यपि नेष्यते ।
अप्रातिपदिकत्वेन तृतीया यागशब्दवत् ॥ २५५ ॥
अतो या शब्दसामर्थ्यलभ्या करणता यजेः ।
केवलस्याप्रयोगित्वात्सा यागेनेति कथ्यते ॥ २५६ ॥
यथोत्पन्नकथंभावा भावनोपायमात्रके ।
उपायो ऽपि च वक्तव्यमाणाकाङ्क्षी नियम्यते ॥ २५७ ॥
योग्यत्वसंनिधानाभ्यामन्यथानुपपत्तितः ।
स च स्ववाक्यलभ्यो वा वाक्यान्तरगतोऽपि वा ॥ २५८ ॥
प्रकृतिप्रत्ययौ यद्वदपेक्षेते परस्परम् ।
पदं पदान्तरं यद्वद्वाक्यं वाक्यान्तरं तथा ॥ २५९ ॥
करणैः साध्यते किं चिन्नोपायरहितैः फलम् ।
प्रयाजादिविधानं च न च स्यान्निष्प्रयोजनम् ॥ २६० ॥
प्रयोजनान्तरात्तच्च प्रत्यासत्तेरपेक्षितम् ।
फलवद्भावनांशश्च करणानुग्रहो वरम् ॥ २६१ ॥

Digitized by Google

एकभावनयोपात्तास्त्रयो ऽप्यंशाः परस्परम् ।
उपकार्योपकारित्वं पश्चादनुभवन्ति ते ॥ २६२ ॥
भावनापेक्षमाणा हि साधनं किं फलस्य मे ।
साधनानुग्रहः को वेत्यनुस्यूतमपेक्षते ॥ २६३ ॥
आकाङ्क्षैवमवच्छेदविद्गुा शुक्लगवादिवत् ।
एकक्रियागृहीतेषु संबन्धश्च परस्परम् ॥ २६४ ॥
द्रव्यद्वारेण चैतेषां विशेषणविशेष्यता ।
इतरोपकृतद्रव्यवर्तित्वात्तच्च कर्मणि ॥ २६५ ॥
द्रव्यान्तरमनिच्छन्त्या क्रियया च परिग्रहात् ।
एकद्रव्याश्रयप्राप्तिरिति नान्योन्यसंश्रयम् ॥ २६६ ॥
परस्परानुरागश्च सुतरामुपकारकः ।
अर्थाच्चान्यव्यवच्छेदसंबन्धो ऽतो न दुष्यति ॥ २६७ ॥
तत्रानेकान्तिकानेकवाक्यार्थोपप्लवे सति ।
अन्योन्यात्मव्यवच्छेदादेकत्र स्थाप्यते मतिः ॥ २६८ ॥
अतो ऽन्वयातिरेकाभ्यामनुमा नेयमिष्यते ।
एकार्थैकान्तिकत्वं तदन्यथैवात्र लभ्यते ॥ २६९ ॥
एवं पदार्थवाक्यार्थसंघातैरुपकल्पितम् ।
विशिष्टां भावनां प्राप्य वृत्तिर्विधिनिषेधयोः ॥ २७० ॥
यद्यप्यन्यैरसंस्पृष्टां विधिः स्पृशति भावनाम् ।
तथाप्यशक्तितो नासौ तन्मात्रे पर्यवस्यति ॥ २७१ ॥
अनुष्ठेये हि विषये विधिः पुंसां प्रवर्तकः ।
अंशत्रयेण चापूर्णां नानुतिष्ठति भावनाम् ॥ २७२ ॥
तस्मात्प्रक्रान्तरूपो ऽसौ विधिस्तावत्प्रतीक्षते ।
यावद्योग्यत्वमापन्ना भावनान्यानपेक्षिणी ॥ २७३ ॥

उपसर्गनिपातानां प्रयोगनियमे सति ।
अर्थस्तद्वागमन्यायात्स्यात्समासपदेष्विव ॥ २७४ ॥
वाचकद्योतकत्वं तु नातीवात्रोपयुज्यते ।
तद्भावाद्वाचकत्वं वा परस्यानुग्रहोऽस्तु वा ॥ २७५ ॥
ईषदर्थादयस्तावत्स्वाभावान्नैव संमतः ।
अप्रयुक्तक्रियाद्वारा विशेषाधानतोऽपरे ॥ २७६ ॥
आपिङ्गः प्रपचाश्चेति द्वयस्यैतन्निदर्शनम् ।
क्वचित्प्रकृष्टतादीनां भावनोपनिपातिनाम् ॥ २७७ ॥
इतिकर्तव्यतात्वेन प्रतिपत्तिपरिग्रहः ।
एकार्थसमवायित्वात्कर्तृधर्मोऽपि भावनाम् ॥ २७८ ॥
गमिष्यति न कर्तृणां स्वरूपे स हि कीर्त्यते ।
ये त्वन्यार्थविरुद्धार्थधातुप्रत्ययलापिनः ॥ २७९ ॥
तेषां तदङ्गतैवेष्टा धातुभागसमाश्रिते ।
प्रयत्नेनोपसृष्टस्य तिष्ठतेर्गतिशक्तता ॥ २८० ॥
न हि प्रयत्नवेलायां गमने जायते मतिः ।
सामान्यतः क्रियाशक्तिः कृत्स्ना धातोः पुरैव तु ॥ २८१ ॥
विशेष एव तत्र स्यादितरस्य द्वये पुनः ।
या च प्रत्ययान्तरोद्भूतिरियमेव विशेष्यता ॥ २८२ ॥
न सामान्यापरित्यागी केवलोऽन्यैर्विशेष्यते ।
उक्तैर्विशेष्यं किं चिदुच्यमानविशेषणम् ॥ २८३ ॥
तेन प्रत्ययपवादोऽयं भवेदर्थापवादवत् ।
यथैव ज्वलनादीनां पाकसंबन्धितेष्यते ॥ २८४ ॥
इतिकर्तव्यतांशित्वात्पाके वा तत्फलेऽपि वा ।
ओदने साध्यमाने हि पाकः करणमिष्यते ॥ २८५ ॥

अकृत: सो ऽपि नास्तीति पुन: करणवाञ्छनम् ।
करणं ज्वलनादीनि ते ऽस्य काष्ठादि वा तथा ॥ २८६ ॥
इतिकर्तव्यताकाङ्क्षा यावत्करणसंश्रया ।
इतिकर्तव्यताप्यन्यदपेक्ष्य करणं भवेत् ॥ २८७ ॥
ज्वलनादिनिमित्तात: काष्ठादे: पाकसंगति: ।
कर्मण: कर्मसाध्यत्वं नास्मत्पक्षे विरुध्यते ॥ २८८ ॥
अनात्मसमवेतस्य निमित्तं कर्म हीष्यते ।
ज्वलनादिस्वरूपं च न काष्ठादिभिरीप्सितम् । २८९ ॥
पाकप्रयोजितानां हि तद्वृत्तिर्नान्तरीयकी ।
कर्तृत्वे ऽपि च तेषां पाके स्यात्करणादिता ॥ २९० ॥
आविर्भूतान्यशक्तित्वादेकत्वे चाप्यपेक्षया ।
ज्वलनादिष्वसर्वेषां स्वातन्त्र्यात्कर्तृतेष्यते ॥ २९१ ॥
तत्स्वातन्त्र्यावगत्यैव प्रयुङ्क्ते हि प्रयोजक: ।
वियुक्तानां तु तेनैषां करणत्वादिवाच्यता ॥ २९२ ॥
उद्भूतदेवदत्तादिव्यापाराभिभवाद्भवेत् ।
तच्च त्वभिभवस्तेषां नैकेनापि विवक्ष्यते ॥ २९३ ॥
काष्ठादीनि पचन्तीति प्रयोगस्तत्र जायते ।
एकवाक्यगृहीते ऽपि गुणप्राधान्यमिष्यते ॥ २९४ ॥
आख्यातप्रत्ययोपात्तभावनाकर्तृसंश्रयात् ।
तस्माद्यस्य विवक्ष्येत प्रधान धातुभि: क्रिया ॥ २९५ ॥
स कर्ता गुणभूतान्यव्यापारे करणादिता ।
अभावमेव नञ् प्राह वर्तमानादिकालकम् ॥ २९६ ॥
इति कर्तव्यतांशेन सर्वेषां तेन सङ्गति: ।
अवान्तरक्रियायोगात्प्रधानक्रियया सह ॥ २९७ ॥

विकल्पप्रतिषेधादेर्विरोधो न च वस्तुना ।
नामधात्वर्थयोगी च निषेधो ऽन्यार्थभाग्भवेत् ॥ २९८ ॥
तच वस्त्वन्तरोन्मुक्तं वस्त्वेवानुगुणं च तत् ।
आख्यातप्रत्ययैर्योगे निवृत्त्यर्थः प्रतीयते ॥ २९९ ॥
तच चाज्ञातसंबन्धविपरीतार्थवारणम् ।
अस्तिनास्तीति संदेहे पाक्षिकास्तित्वबोधनम् ॥ ३०० ॥
निवर्त्यते नञा यद्वा नास्तितेवोच्यते सती ।
अव्युत्पन्नस्य तत्रैव जायते नास्तितामतिः ॥ ३०१ ॥
अस्तित्वमानिनस्त्वेव बाध्यते विपरीतधीः ।
अपूर्वाभावविज्ञानविरोधात्स्वयमेव तु ॥ ३०२ ॥
निवर्तते ऽस्तिताबुद्धिर्मृगतृष्णादिबुद्धिवत् ।
तच्चेतदनिषेधे ऽपि स्याद्वाद्‌वादिनामेव नः ॥ ३०३ ॥
तथाप्यज्ञातसंदिग्धविपरीतार्थबाधनात् ।
अभावस्य च वस्तुत्वे पुरस्तात्प्रतिपादिते ॥ ३०४ ॥
घटादितुल्यतैव स्यात्प्रतिषेधो न चाप्ययम् ।
विधायकैरसंयुक्तो न हि तत्प्रतिषेधकः ॥ ३०५ ॥
अभावकथनं ह्येतन्नावश्यं प्राप्तिपूर्वकम् ।
न च शब्देन सद्भावस्तस्य चार्थस्य बोधितः ॥ ३०६ ॥
अस्तित्वाद्यनपेक्षं हि सामान्यं तेन गम्यते ।
अस्तिशब्दप्रयोगो ऽपि तेनैवाचोपपद्यते ॥ ३०७ ॥
जातेरस्तित्वनास्तित्वे न च कश्चिद्विवक्षति ।
नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे ॥ ३०८ ॥
तेनापि न विरोधित्वं श्रुत्या पूर्वोक्तया नञः ।
यथाप्यस्तीत्युपादाय प्रयुञ्ज्युरन्नञादयः ॥ ३०९ ॥

Digitized by Google

तच तस्यापवादत्वात्पूर्वज्ञानोपमर्दनम् ।
अस्तित्वं वामदेवाच स्मर्यते पूर्वलक्षितम् ॥ ३१० ॥
अभावोत्तरकालं स्याद्विशेषे तद्विवक्षिते ।
विधिना युज्यते यच न हन्यान्न पिबेदिति ॥ ३११ ॥
तचाभावार्थता नैव स्वयं पुंसो हृणाद्धि हि ।
अन्यथैव प्रवर्तन्ते भावाभावधियो ऽपराः ॥ ३१२ ॥
व्यवस्थितबहिर्वस्तुपरिच्छेदफलात्मिकाः ।
अन्यथानागतोत्पाद्या भावप्रेरणवारिका ॥ ३१३ ॥
अन्तः संकल्पमूलात्मा वृत्तिर्विधिनिषेधयोः ॥
विकल्पो ऽप्यनयोरेव विषयेषु प्रवर्तते ॥ ३१४ ॥
प्राप्तेषु प्रतिषेधार्थमप्राप्तेषु विधित्सया ।
युगपच्च विरुद्धार्थप्रतिपत्तेरसंभवः ॥ ३१५ ॥
पर्यायेण कदा चित्तु का चिद्वृत्तिर्भविष्यति ।
प्राप्ताप्राप्तविकल्पस्तु नैवेष्टो लोकवेदयोः ॥ ३१६ ॥
न विकल्पार्थवाची तु वाशब्दो विषयान्तरे ।
स्थाणुर्वा पुरुषेवेति याति निष्ठुतिवेत्ययम् ॥ ३१७ ॥
संदेहकथनार्थः स्यान्न हि वस्तु विकल्पते ।
विषये बाह्य एवैवं प्रतिषेधादिसंभवः ॥ ३१८ ॥
न हि तत्संभवः कश्चित् ज्ञाने स्वरसभङ्गिनि ।
ज्ञानं यत्तावदुत्पन्नं नानुत्पन्नं तदिष्यते ॥ ३१९ ॥
विनाशे ऽपि समानत्वं सत्यमिथ्यावबोधयोः ।
बाह्यार्थवादिनस्त्वर्थे यज्ज्ञानं जायते ऽन्यथा ॥ ३२० ॥
तन्मिथ्यात्वोपसंख्यानात्पूर्वबाधादिसंभवः ।
तथापि तु न तद्रूपं बाध्यते न च बोध्यते ॥ ३२१ ॥

Digitized by Google

अर्थहानादिरूपात्तु फलतो विप्रयुज्यते ।
प्रतिभानेकधा पुंसां यद्यप्यर्थेषु जायते ॥ ३२२ ॥
तथापि बाह्य एवार्थस्तस्य वाक्यस्य चेष्यते ।
वाक्यप्रयोजनत्वेन जन्मत्वेनाथ वा यदि ॥ ३२३ ॥
उच्यते प्रतिभाप्यर्थो न नः किं चिद्विरुध्यते ।
शब्दाद्युत्थापितेर्ज्ञानैरात्मांशग्रहणाक्षमैः ॥ ३२४ ॥
यद्ग्राह्यमाप्यते वस्तु स त्वर्थः पारमार्थिकः ।
प्रत्यक्षव्यतिरिक्तं तु विज्ञानमुपवर्णितम् ॥ ३२५ ॥
त्रिकालविषयं यस्मादसंनिधिरदूषणम् ।
अनेकाकारता या पि शूरभीरुधियं प्रति ॥ ३२६ ॥
वासनानुग्रहात्सोक्ता कुणपादिमतेरिव ।
भावनेव च वाक्यार्थः सर्वत्राख्यातवत्तया ॥ ३२७ ॥
अनेकगुणजात्यादिकारकार्थानुरञ्जिता ।
एकयेव तु बुद्ध्यासो गृह्यते चित्ररूपया ॥ ३२८ ॥
पदार्थाहितसंस्कारचित्रपिण्डप्रसूतया ।
पदार्थपदबुद्धीनां संसर्गस्तदपेक्षिणः ॥ ३२९ ॥
पदव्यवधिना चेषां नासंसर्गो भविष्यति ।
तुल्यकक्षो ह्यसंबन्धी व्यवधा नेति कीर्त्यते ॥ ३३० ॥
अङ्गत्वात्तु पदैर्न स्यादङ्गिव्यवधिकल्पना ।
एकस्मिंश्च गृहीते ऽर्थे सोपायो ऽन्यो ऽप्यपेक्ष्यते ॥ ३३१ ॥
अपेक्षया च सर्वो ऽसौ संबन्धं प्रतिपद्यते ।
पदानामपि संबन्ध एवं वाक्येषु सिध्यति ॥ ३३२ ॥
पदार्थपूर्वकस्तस्माद्वाक्यार्थो ऽयमवस्थितः ।
अर्थरूपमिवापन्नं ज्ञानं वाक्यस्य गोचरः ॥ ३३३ ॥

Digitized by Google

नेष्यते न ह्यभेदेन वृत्तिरस्तीति साधितम् ।
प्रासङ्गिकादि यत्कार्यं पदार्थोपनिबन्धनम् ॥ ३३४ ॥
आकाङ्क्षाविदितप्रश्नो यो च दृष्टो पिकादिषु ।
असत्यं तदपोद्धृत्य न चैवं कल्पयिष्यति ॥ ३३५ ॥
यथाशङ्काद्यपोद्धृत्य वाक्यार्थो न हि दृश्यते ।
असत्येऽगम्यमाने ऽर्थे सत्यता नेत्युदाहृतम् ॥ ३३६ ॥
स्वरूपेणासतो दृष्टं नोपायत्वं हि कस्य चित् ।
अवाचकत्वं वाक्यस्य तद्भूतानामितीरितम् ॥ ३३७ ॥
हेतुः स्यात्तन्निमित्तत्वमूलं वार्थस्य कथ्यते ।
पदार्थपूर्वको ह्येष न भ्रान्तिरिति गम्यताम् ॥ ३३८ ॥
साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम् ।
वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले ॥ ३३९ ॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥ ३४० ॥
प्रयोजनतया चैषामर्थमिच्छन्ति भावनाम् ।
क्रियार्थेनेति तेनाह समाम्नायप्रयोजनम् ॥ ३४१ ॥
शुक्लो गौरिति वाक्यार्थे वाक्ययोर्यदुदाहृतम् ।
संबन्धकथनार्थं तत्र स्वयं पारमार्थिकम् ॥ ३४२ ॥
न हि प्रयोजनापेतं वाक्यमुच्चार्यते क्व चित् ।
प्रयोजनक्षमं नापि पदमाख्यातवर्जितम् ॥ ३४३ ॥
गौरश्व इति वा श्रुत्या यद्गोत्वाद्यवबोधितम् ।
विशेषे यदि तत्र स्यात्तत्र स्याच्छ्रुतिबाधनम् ॥ ३४४ ॥
जातिव्यक्ती गृहीत्वैव वयं तु श्रुतलक्षिते ।
कृत्यादि यदि मुञ्चामः का श्रुतिस्तत्र बाध्यते ॥ ३४५ ॥

लक्षणातोऽपि परतो यस्मिन्देहः प्रवर्त्तते ।
को नाम पीड्यते तत्र शुक्लश्रुत्या निवर्त्तिते ॥ ३४६ ॥
अगृह्णतस्तु शुक्लत्वं श्रुतिस्ते बाध्यतेतराम् ।
यस्य वाक्यमसंबद्धं सर्वमेवाप्रयोजनम् ॥ ३४७ ॥
वाक्यार्थोऽपीतिभाष्येण सोऽस्फुटमभिधीयते ।
न सर्वश्चेत्यनेनापि क्व चित्सा नेत्यबोधत ॥ ३४८ ॥
प्रकृत्यर्थानुरक्ताया बुद्धौ निपतता ध्रुवम् ।
कर्मादीनां विशेष्यत्वमिति का वा श्रुतिर्भवेत् ॥ ३४९ ॥
प्रकृतिप्रत्ययौ नापि प्रयुज्येते च केवलौ ।
येन युष्मदभिप्रेता श्रुतिर्लभ्येत कर्हि चित् ॥ ३५० ॥
यद्यपि नाम दृश्येते केवलावधुनादिवत् ।
तथाप्यन्यार्थसंयुक्ताविति पूर्वं निरूपितम् ॥ ३५१ ॥
अयमेव विशेषश्च कथ्यते पदवाक्ययोः ।
अर्थवद्भावतुल्यत्वे प्रकृतिप्रत्ययार्थतः ॥ ३५२ ॥
दृष्टा यथा हि साकाङ्क्षाः पदार्थाः केवलाः क्व चित् ।
स्वातन्त्र्येण गृहीताश्च विशिष्टार्थावबोधकाः ॥ ३५३ ॥
प्रकृतिप्रत्ययौ नैवं कदा चिदपि लक्षितौ ।
प्रकृत्यर्थानुरक्तो हि प्रत्ययार्थः स चेष्यते ॥ ३५४ ॥
पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः ।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ॥ ३५५ ॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्व चित् ।
मानसादित्यतो नास्य वाक्यग्रहणमुत्तरम् ॥ ३५६ ॥
मानसेनापराधेन पदार्थोऽन्येन गृह्यते ।
ते तद्वाक्यं गृहीत्वापि नार्थं गृह्णन्ति कर्हि चित् ॥ ३५७ ॥

वाक्येन तेन नोच्येत वाक्यार्थो ऽन्यैर्निरूपणात् ।
तच्छ्रुत्वा वाथ * बोधाद्वा पलाशेनेव वृक्षता ॥ ३५८ ॥
वर्णा वा न ब्रुवन्त्येनं तत्संबन्ध्यर्थबोधनात् ।
सत्त्वे ऽप्यगमकत्वाद्वा वृक्षत्वमिव शिंशपा ॥ ३५९ ॥
पदार्था गमयन्त्येतं प्रत्येकं संशये सति ।
सामस्त्ये निर्णयोत्पादात्स्थाणुमूर्द्धस्थकाकवत् ॥ ३६० ॥
तदभावाप्रतीतिर्वा तद्गम्यो ऽयं भविष्यति ।
स्रोत्राभावाप्रतीते हि स्रोत्रं शब्दं प्रचक्षते ॥ ३६१ ॥
संबन्धाकरणन्यायादुक्तव्या वाक्यनित्यता ।
संघातत्वस्य वक्तव्यमीदृशं प्रति साधनम् ॥ ३६२ ॥
वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनवाक्यत्वादधुनाध्ययनं यथा ॥ ३६३ ॥
भारते ऽपि भवेदेवं कर्तृस्मृत्या तु बाध्यते ।
वेदे ऽपि तत्स्मृतिर्यातु सार्थवादनिबन्धना ॥ ३६४ ॥
पारंपर्येण कर्तारं नाध्येतारं स्मरन्ति हि ।
तेषामनेवमात्मत्वाद् भ्रान्तिः सा हि निवर्त्यते ॥ ३६५ ॥
तेषु च ध्रियमाणेषु न मूलान्तरकल्पना ।
तथा ह्यद्यतनस्यापि ते कुर्वन्तीदृशीं मतिम् ॥ ३६६ ॥

इतिवाक्याधिकरणम् ॥

वचनान्तरसाधर्म्यात्कर्तुः सामान्यसंप्लवे ।
समाख्यया विशेषो ऽयं कणादिरवधार्यते ॥ ३६७ ॥
अनपेक्षत्वसूत्रे या क्लृप्तात्कृतकतोदिता ।
वेदे सा दृश्यते स्पष्टा कृतकार्याभिधायिनि ॥ ३६८ ॥
स्मृतिप्रयोजनाभावात्कर्तृमात्रे ऽनपेक्षिता ।
सामान्यसिद्धापेक्ष्यत्वान्न समाख्यानियामिका ॥ ३६९ ॥

* वाक्यबोधाद्वेति पाठान्तरम् ।

अन्यथाप्युपपन्नत्वादियं प्रवचनादिना ।
न शक्ता कर्तृमूलाय प्रोक्ते च स्मरणं स्थितम् ॥ ३७७ ॥
श्रुत्यादेर्दुर्बला चासौ न शक्ता तानि बाधितुम् ।
अल्पभूयांसमेवेमं शब्दराशिं न बाधते ॥ ३७१ ॥
कामं वा निर्निमित्तेयं शाखामेकां वदिष्यति ।
श्रुतिसामान्यमात्रं हि नात्र दण्डेन वार्यते ॥ ३७२ ॥
सति साधारणत्वे वा संभवे च विशेषणम् ।
यथा वै कुषणामेति सत्तयैव प्रतीयते ॥ ३७३ ॥
अव्यासंगि च सर्वेषु प्रवक्तृत्वं कठादिषु ।
तेनैव व्यपदेश्यत्वं लक्ष्यते (क्रिमुमान्ह)वत् ॥ ३७४ ॥
अन्येस्तुल्ये ऽपि संबन्धे यत्तेनै व्यपदिश्यते ।
न ह्येष कर्तृसंस्कारः पाराथ्यें चैक इष्यते ॥ ३७५ ॥
विद्यमाननिमित्तं च कथ्यते नासतः क्रिया ॥
साधारणं च तीर्थादि केन चिद्व्यपदिश्यते ॥ ३७६ ॥
यदि चापौरुषे ऽप्येषां नानित्यप्रतिपादिनी ।
पौरुषेय्यास्तु सत्वं वा कथमध्यवसीयते ॥ ३७७ ॥
नित्यमेव निमित्तं वा कठत्वं जातिरस्ति नः ।
काठकादिप्रवृत्त्यर्थं व्यावृत्तं चरणान्तरात् ॥ ३७८ ॥
अनित्यार्थाभिधायित्वं स्वयमेवैष मुञ्चति ।
नित्यानित्यविकल्पेन वेदस्तादर्थ्यवेदनात् ॥ ३७९ ॥
नित्यस्य नित्य यवार्थः कृते कस्याप्रमाणता ।
उन्मत्तवचनत्वं तु पूर्वमेव निराकृतम् ॥ ३८० ॥

इति प्रमाणत्वमिदं प्रसिद्धं युक्तेह धर्मे यदि चोदनायाः ।
अतः परं तु प्रविभज्य वेदं चेधा ततो वक्ष्यति तस्य योर्थः ॥ ३८१ ॥

इति श्रीभट्टाचार्यकुमारिलस्वामिविरचिते मीमांसाश्लोकवार्तिके प्रथमस्याध्यायस्य प्रथमश्चरणः समाप्तः ॥ शुभम् ॥

Digitized by Google

॥ श्रीगणेशाय नमः ॥

स्वस्वाभिलाषपरिपूर्त्तिकृते यमीशं
कारुण्यसिन्धुमनघं प्रणमन्ति सन्तः ।
प्रारम्भकर्मणि नमामि तमेव सिद्ध्यै
सर्वार्थदं सकलमङ्गलमूलभूतम् ॥ १ ॥

लब्ध्वा निद्रां चिरमतितरां पण्डिताख्यं सुपत्त्रं
जाग्रद्भावं पुनरुपगतं यत्कृपालेशभावात् ।
नित्यं रागादिव भजति यं श्रीः समेषां गुणानां
जीयात् स्वामी स किल सुधियां प्राप्य पूर्णं सुखायुः ॥ २ ॥

निशम्य यत्पण्डितपत्त्रसिद्धिं
प्रमोदमाप्तं परमं दुरापम् ।
चिरं तदेतत् स्थिरतामुपेया-
दितीश्वरं साञ्जलिरर्थयेऽहम् ॥ ३ ॥

ब्रह्मसूत्रतात्पर्यविवरणं मुद्रितमर्धमयासीत्
तत्कथादि निवेदितमेव मया प्रथमं यदभासीत् ।
किं त्ववशिष्टतदर्धविमुद्रणमस्ति मया करणीयं
प्राप्तनिजप्रभुसंमतिरद्य ततः प्रयते रमणीयम् ॥ ४ ॥

एष ग्रन्थः क्वापि नैवाप मुद्रां
नो वा प्रायो लभ्यते यत्नतोऽपि ।
तस्माच्चैतस्याङ्कनेऽहं सयत्नो
दर्शंदर्शं मोदमायान्तु विज्ञाः ॥ ५ ॥

काशीस्थराजकीय-
प्रधानपाठालयीयसंख्यावान् ।
सांख्याध्यापनकारी
बेचनरामोऽस्मि कान्यकुब्जोऽहम् ॥ ६ ॥

Digitized by Google

॥ अथ ब्रह्मसूत्रतात्पर्यविवरणम् ॥

॥ तत्र तृतीयाध्यायस्य प्रथमपादारम्भः ॥

श्रीगणेशाय नमः

द्वितीयाध्याये श्रुतिस्मृतिन्यायविरोधो ब्रह्मदर्शने परपक्षाक्षेपश्च परिहृतः, जीवतत्त्वान्युपकरणानि च ब्रह्मणो जायन्त इत्याद्युक्तम् । इदानीं सोपकरणजीवस्य संसारगतिप्रकारस्तदवस्थान्तरं सतत्त्वं ब्रह्म विद्याभेदाभेदौ गुणोपक्रमोपसंहारयोः सम्यग्दर्शनोपायादि तृतीये चिन्त्यते । प्रथमपादे वैराग्याय पञ्चाग्निविद्यादौ संसारगतिभेदः प्रदर्श्यते । जीवः सेन्द्रियप्राणो विद्याकर्मपूर्वप्रज्ञायुतः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यत इत्यवगम्यते स किं देहबीजैर्भूतसूक्ष्मरसंपरिष्वक्तो गच्छत्युत संपरिष्वक्त इति, अत्र चिन्त्यते, तत्र करणोपादानवद् भूतसूक्ष्मोपादानस्याश्रुतत्वाद्वाक्यशेषे चक्षुरादीनामेव श्रवणात् "स एतास्तेजोमात्राः समभ्याददान" इत्यत्रापि मात्राशब्देन करणोपादानाद् यत्रैव देहारम्भस्तत्रैव भूतानां सुलभत्वात् तेषां नयनं व्यर्थं च । तस्मादसंपरिष्वक्तो यातीति प्राप्ते ब्रूते तदन्तरेति ।

तदन्तरप्रतिपत्तौ रंहति परिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

देहान्तरप्रतिपत्तौ भूतमात्रासंपरिष्वक्तो रंहति गच्छति, कुतः प्रश्ननिरूपणाभ्याम् "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति प्रश्ने द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चाग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीरुक्त्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति निरूपणात् प्रतिवचनात्, तस्मादद्भिः परिवेष्टितो यातीति गम्यते, अद्भिरित्यन्येषां भूतानामुपलक्षणम्, एवं च देहान्तरं त्यक्त्वा शुकादिवदाप्लुत्य वृक्षान्तरमिव देहान्तरं गच्छतीत्यादिकल्पना निरस्ताः श्रुतिविरोधात् ॥ १ ॥

अप्शब्दमात्रश्रवणात् कथं सर्वैर्भूतैरिति शङ्कां वारयति त्र्यात्मकेति ।

त्र्यात्मकत्वात् तु भूयस्त्वात् ॥ २ ॥

त्र्यात्मिका ह्यापः त्रिवृत्करणश्रुतेः, त्र्यात्मकश्च देहः त्रयाणां तेजोऽबन्नानामुपलब्धेः, वातपित्तकफैर्धातुभिश्च त्रिधातुत्वात्, तस्मात् त्रयाणामाक्षेपकोऽप्शब्दः, अपां भूयस्त्वादप्त्वेन व्यवहारः ॥ २ ॥

प्राणगतेश्च ॥ ३ ॥

प्राणानां च देहान्तरे गतिः श्रुता तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीत्यतः प्राणानामाश्रयं विना गत्यसंभवात्, अतोऽपि भूतान्तरोपसृष्टानामपां गतिः, न हि निराश्रया गच्छन्ति तिष्ठन्ति वा जीवतोऽदर्शनादित्याह प्राणेति ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

ननु "तत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण" इत्यादिश्रुतेः कथं सह गच्छन्तीत्याशङ्क्य अग्न्यादौ गमनं गौणम्, "ओषधीर्लोमानि वनस्पतीन् केशा" इत्यादौ तदसंभवात्, अतो वागाद्यधिष्ठात्रीणामग्न्यादिदेवतानामुपकार्योपकारभावनिमित्तमुपेत्य गच्छन्ति न तु स्वरूपलयो भवतीत्युपचर्यत इत्याह· अग्न्यादिगतीति ॥ ४ ॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

ननु कथं पञ्चम्यामाहुतावपां पुरुषवचस्त्वं प्रथमेऽग्नावपामश्रुतत्वात्, द्युलोकप्रभृतिषु पञ्चस्वग्निषु श्रद्धादिपञ्चानां होम्यद्रव्यत्वेन उत्तरेषु च पर्जन्यादिचतुर्षु सोमादिचतुर्णामब्बहुलत्वोपपत्तेर्भवतु नामाऽब्भूयस्त्वादप्त्वं, प्रथमे तु श्रद्धायाः फलावश्यंभावनिश्चयरूपत्वेनाप्त्वाभावादयुक्तः पञ्चम्यामपां पुरुषभाव इत्याशङ्क्य प्रथमेऽग्नौ ता एवापः श्रद्धाशब्देनोच्यन्ते, उपपत्तेः, एवं सत्येकवाक्यत्वमुपपद्येत, अन्यथा प्रश्नप्रतिवचनभावानुपपत्तेः, अतः सोमवृष्ट्यादि स्थूलीभवदब्बहुलं श्रद्धाकार्यं कारणस्यापि श्रद्धाया अप्त्वं गमयति, बह्मत्र पश्वादिभ्यो हृदयादीनीव जीवधर्मो निश्चयविशेषः श्रद्धा ग्रहीतुं शक्या, होमायोपादातुमशक्यत्वात्, अतः उत्तरकार्यानुरोधादाप एवात्र श्रद्धाशब्दार्थः "श्रद्धा वा आप" इति

श्रुतेः, तनुत्वेन श्रद्धेव श्रद्धा इत्युच्यते मञ्चशब्द इव मञ्चस्थेषु श्रद्धाहेतुत्वाच्चापाम् "आपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे" इति श्रुतेरित्याह प्रथमे इति ॥ ५ ॥

ननु आपः श्रद्धादिक्रमेण पञ्चम्यां पुरुषाकारा भवन्तु न तु तत्संपरिष्वक्ता जीवा रंहेयुः, अश्रुतत्वात्, अतोऽयुक्तं रंहति परिष्वक्त इत्याशङ्क्याह अश्रुतत्वादिति ।

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

नैष दोषः, इष्टादिकारिणां प्रतीतेः, "अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति" इत्युपक्रम्य तेषां धूमादिपितृयानेन चन्द्रप्राप्तिं कथयति, "आकाशाच्चन्द्रमसमेष सोमो राजेति" त एवात्रापि प्रतीयन्ते, तस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा, संभवन्तीति श्रुतिसामान्यात्, तेषामिष्टापूर्तयागादिसाधनदधिपयःप्रभृतिद्रव्यमिव भूयस्त्वात् प्रत्यक्षमेवापः सन्ति ता आहवनीये हुताः सूक्ष्मा ऽदृष्टरूपाः सत्यः इष्टापूर्तादिकर्तॄनाश्रयन्ते, तेषां शरीरं पितृमेधविधानेनान्त्येऽग्नावृत्विजो जुह्वति "असौ स्वर्गाय लोकाय स्वाहे"ति, ततस्ताः श्रद्धायुक्तकर्मसमवायिन्य आहुतिमय्य आपोऽदृष्टरूपाः सत्यो भोक्तृपुरुषमावेष्ट्याऽमुं लोकं फलदानाय नयन्ति यत् तदत्र जुहोतिनाभिधीयते श्रद्धां जुह्वतीति, तस्मादाहुतिमयीभिरद्भिः संपरिष्वक्तो रंहति ॥ ६ ॥

कथं पुनरिष्टादिकारिणां स्वर्गफलोपभोगाय रंहणं संभवति यतस्तेषां धूमादिवर्त्मना चन्द्रमसं गतानामन्नभावं दर्शयति, "एष सोमो राजा तद्देवानामन्नं तद्देवा भक्षयन्ति च चन्द्रं प्राप्यान्नं भवन्ति"इति च देवैर्भक्षितत्वात् कथं तेषां फलोपभोगो व्याघ्रादिभक्षितानामिवेति प्राप्ते आह भाक्तं चेति ।

भाक्तं चानात्मवित्त्वात् तथाहि दर्शयति ॥ ७ ॥ १ ॥

चशब्दो व्यावृत्त्यर्थः, न तेषामदनीयत्वादन्नं मुख्यं किं तूपभोगसा-

धनत्वमात्रमन्नं यथा विशो राज्ञामन्नं पशवोऽन्नं विशामितिवद् भाक्तं, स्त्रीपुत्रभृत्यादिभिर्गुणैरिष्टादिकारिभिर्यत् सुखविहारादि तदेवैषां भक्षणं न मोदकादिवच्चर्वणं निगरणं वा, "न ह वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ती" ति देवानां चर्वणादिव्यापारप्रतिषेधादिष्टादिकारिणां देवान् प्रति गुणभावोपगतानामप्युपभोग उपपद्यते राजोपजीविनामिव, अनात्मविदां देवोपभोग्यतां श्रुतिरपि दर्शयति, तस्माद्रंहतिरुपपद्यते ॥ ७ ॥ १ ॥

इष्टादिकारिणां चन्द्रमण्डलं गतानां भोगोत्तरं ततोऽवरोहणं श्रुतम्, "यावत्संपातमुषित्वाथैतमेवाध्वानं पुनरावर्तन्त" इति "यथेतमिति रमणीयचरणा ब्राह्मणादियोनिं कपूयचरणाः पश्वादियोनि"मिति। तत्र भुक्तकृत्स्नकर्माणो निरनुशया अवरोहन्ति उताऽवशिष्टकर्माणः सानुशया इति, यावत्संपातमिति विशेषणात्, संपातः कर्म, तस्मान्निरनुशया इति प्राप्ते आह कृतात्यये इति।

कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

येन कर्मवृन्देन चन्द्रमसमारूढा उपभोगाय तत्कर्मक्षये सति तेषां यच्चन्द्रमस्युपभोगाय प्रारब्धं तदुपभोगक्षयदर्शनशोकाग्निसंपर्कात् प्रविलीयते, अग्निसंपर्काद् घृतमिव, ततः कृतात्यये भोगेनोपक्षये सानुशया एवावरोहन्ति, कुतः, दृष्टस्मृतिभ्याम्, "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वे" त्यादिदर्शनात्, चरणशब्देनानुशयः, स्मृतिरपि "वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते" इति सानुशयानामेवावरोहं दर्शयति, अनुशयो नाम भुक्तफलस्य कर्मणोऽवशेषः कश्चित् स्नेहभाण्डानुषक्तस्नेहवत्, न ह्यवशेषमात्रेण चन्द्रे स्थितिः संभवति शोषितस्य भुक्तसर्वसामग्रीकस्य पादुकामात्रावशेषस्य देशान्तरेऽनवस्थानमिवेति, तथा च पूर्वकृतस्थूलानि नानायुक्तिभिरनुभूय सूक्ष्माणि केन

युक्तोऽवरोहति, यथा समाने सांनिध्येऽपि स्थूलं रूपमभिव्यनक्ति न सूक्ष्मं तद्वत्, तच्चावरोहणं यथा गमनं. तद्विपरीतक्रमेण, अभ्राद्युपसंख्यानात्, रात्र्याद्यश्रवणात् ॥ ८ ॥

चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

नन्वनुशयः सूक्ष्मं कर्मान्तरं नाचरणं "यथा कारी यथा चारी"ति श्रुतौ भेदेनोक्तत्वात्, तस्माच्चरणादेव योन्यापत्तिश्रुतेर्नानुशयाद् योन्यन्तरापत्तिः "रमणीयचरणा रमणीयां योनि" मिति श्रुतेरित्याशङ्क्य अनुशयोपलक्षणार्थैषा चरणश्रुतिरिति कार्ष्णाजिनिर्मन्यत इत्याह चरणादितीति ॥ ९ ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

ननु चरणं शीलमिति प्रसिद्धं त्यक्त्वा कथमनुशयश्चरणमित्याशङ्क्य कर्मजातं हि चरणापेक्षं न ह्याचारहीनः कश्चिदधिकृतः, "आचारहीनं न पुनन्ति वेदा" इति स्मृतेः, तथा च कर्मणा आचरणं शीलं कर्मणो विना न तत्, तस्मात् कर्मोपलक्षितमनुशयभूतं कर्म योन्यापत्तौ कारणमिति न शीलम्, न हि पङ्गुः पलायितुं समर्थो जानुभ्यां रंहितुमर्हति, इत्याह आनर्थक्येति ॥ १० ॥

सुकृतदुष्कृते एवेति बादरिः ॥ ११ ॥ २ ॥

बादरिस्तु सुकृतदुष्कृते एव चरणशब्देनोच्येते इति मन्यते कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायः. रमणीयचरणा रमणीयकर्माण इत्यर्थ इत्याह सुकृतेति ॥ ११ ॥ २ ॥

अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

इष्टादिकारिणां चन्द्रमण्डले गमनमुक्तम्, अनिष्टादिकारिणोऽपि चन्द्रं गच्छन्ति न वेति, तत्र अनिष्टादिकारिणोऽपि गच्छन्ति "ये वै केचिदस्माल्लोकात् प्रयन्ति सर्वे ते चन्द्रमसं गच्छन्ती"ति कौषीतकिश्रुतेरित्याशङ्कते अनिष्टादीति ॥ १२ ॥

समाधत्ते संयमने त्विति।

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

नैतत् सर्वे चन्द्रमसं गच्छन्तीति, यतो भोगायैव तत्रारोहणं न निष्प्रयोजनं प्रत्यवरोहाय वा, न हि पुष्पफलभोगं विना निष्प्रयोजनं पतनाय वा कश्चिद् वृक्षाद्यारोहति, भोगश्चानिष्टकारिणां चन्द्रमसि नास्ति तेषां संयमने यमपुरे भोगोक्तेः, अतो भूमौ तेषामारोहावरोहौ तद्गतिदर्शनात्, नाचिकेतसं प्रति यमवाक्यदर्शनात्,"न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्। "अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे" इति वैवस्वतं संगमनं जनानां यमं राजानं हविषे"त्यादिदर्शनाच्च ॥ १३ ॥

स्मरन्ति च ॥ १४ ॥

किंच मनुव्यासप्रभृतयः संयमने यमायत्तं कूपयकर्मविपाकं स्मरन्ति नाचिकेतोपाख्यानादिष्वित्याह स्मरन्ति चेति ॥ १४ ॥

अपि च सप्त ॥ १५ ॥

रौरवप्रमुखाः सप्त नरका इति पापफलभोगभूमित्वेन पौराणिकाः स्मरन्ति, इति कथं चन्द्रं ते प्राप्नुयुरित्याह अपिचेति ॥ १५ ॥

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

ननु कथं तत्र यमाधीना यातना, तत्र चित्रगुप्तादयोऽधिष्ठातारः स्मर्यन्ते, इति प्राप्ते तत्रापि यमप्रयुक्ता एव तेऽधिष्ठातार इति तत्रापि प्रयोजकत्वेन यमस्यैवाधिष्ठातृत्वमित्याह तत्रापीति ॥ १६ ॥

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

पञ्चाग्निविद्यायां प्रश्नप्रतिवचनावसरे श्रुतम्, "अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न संपूर्यत" इति, तत्रैतयोरिति देवयानपितृयानयोर्ग्रहणं प्रकृतत्वात्, विद्वांसो देवयानेऽधिकृताः कर्मिणो जनाः पितृयाने, तयोरनधिकृतानां क्षुद्रजन्तूनामसकृदावर्ती तृतीयः पन्था भवति, अतोऽप्यनिष्टादिकारिणां न चन्द्रलोक इत्याह विद्येति ॥ १७ ॥

Digitized by Google

ननु कीटादीनां ततोऽवरोहणाभ्युपगमाच्च न संपूर्यत इत्यस्य विरोध इत्याशङ्क्याह अवरोहेति ।

अवरोहाभ्युपगमादसंपूर्णोपपत्तिरिति चेन्नाश्रुतत्वात् ॥ १८ ॥

अश्रुतत्वादिति, तथा सति तृतीयस्थानस्याख्यानर्थक्यप्रसङ्गात् ॥ १८ ॥

ननु तेषामपि चन्द्रमसमारुह्यैव तृतीयस्थानगमनं भवतु देहान्तरलाभाय पञ्चम्यामाहुतावित्याहुतिसंख्यानियमादित्याशङ्क्याह न तृतीये इति ।

न तृतीये तथोपलब्धेः ॥ १९ ॥

न देहलाभाय संख्यानियमः तथोपलब्धेः, विनैव संख्यानियमं पूर्वोक्तप्रकारेण तृतीयस्थानप्राप्तिरुक्ता, जायस्व म्रियस्वेति मनुष्यदेहहेतुत्वेन संख्याश्रवणात्, आरोहावरोहानर्थक्यात्, "असौ लोको न संपूर्यते" इति श्रुतत्वाच्चेति ॥ १९ ॥

सर्वत्र नाहुतिनियम इति निदर्शनेनाह स्मर्यत इति ।

स्मर्यतेऽपि च लोके ॥ २० ॥

लोके धृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनां चायोनिजत्वं द्रोणादीनां योषिदाहुतिरेव नास्ति धृष्टद्युम्नादीनां योषित्पुरुषविषये द्वे अप्याहुती न स्तः, तद्वत्यत्रापि, एवं बलाकापि रेतःसेकं विनेति ॥ २० ॥

दर्शनाच्च ॥ २१ ॥

जरायुजाण्डजस्वेदजोद्भिज्जचतुर्विधभूतग्रामेऽपि स्वेदजोद्भिज्जयोर्ग्राम्यधर्ममन्तरेणैवाहुतिसंख्यादर इत्याह दर्शनादिति ॥ २१ ॥

तृतीयशब्दावरोधः संशोकजस्य ॥ २२ ॥ ३ ॥

ननु भूतानां जीवजमण्डजमुद्भिज्जमिति त्रैविध्यदर्शनात् कथं चतुर्विधत्वमित्याशङ्क्य उद्भिज्जशब्देन स्वेदजस्यापि संग्रहात् स्वेदजोद्भिदर्योर्भूम्युदकोद्भेदप्रभवस्य तुल्यत्वाच्च विरोध इत्याह तृतीयेति ॥ २२ ॥ ३ ॥

सानुशयानामवरोहप्रकारमाह श्रुतिः "यथेतमाकाशमाकाशाद्वायुं ततो धूमं ततोऽभ्रं ततो मेघस्ततो वर्षती"ति तत्राकाशभावस्तत्स्वरूपत्वं तत्साम्यं वेति, स्वरूपमेवेति प्राप्ते आह तत्स्वाभाव्येति ।

तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ २३ ॥ ४ ॥

चन्द्रमण्डलेऽम्मयं शरीरमुपभोगक्षये सति प्रविलीयमानमाकाशसमं सूक्ष्मं भवति, कुतः, उपपत्तेः नान्यस्यान्यभावो मुख्यः, गगनस्वरूपत्वे वाय्वादिनावरोहासंभवः, विभुत्वाच्चाकाशेन नित्यसंबन्धात् सादृश्येनैवोपपत्तेः ॥ २३ ॥ ४ ॥

प्राग्व्रीह्यादिभावापत्तेर्गगनादिसादृश्येन दीर्घकालमवस्थाय वायुभावादि उतात्पमल्पं चेति तत्रानियमे प्राप्ते आह नातीति ।

नातिचिरेण विशेषात् ॥ २४ ॥ ५ ॥

अल्पकालं गगनादिसदृशो भूत्वा वृष्टिधाराभिः सहेमां भूमिमापतन्ति विशेषदर्शनाद् व्रीह्यादिभावोत्तरं श्रुतम् "अतो वै खलु दुर्निष्प्रपतर"मिति, तकार एको लुप्तश्छान्दसत्वात्, प्रपततरं दुःखतरं व्रीह्यादिभावान्निःसरणं भवतीत्यर्थं पूर्वं सुखनिःसरणं लभ्यते, तस्मात् प्रागल्पकालेनावरोहः ॥ २४ ॥ ५ ॥

अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २५ ॥

ननु व्रीह्यादिस्थावरदेहाभिमानिनस्तत्र सुखदुःखभाजो भवन्त्युतान्यजीवाधिष्ठिते व्रीह्यादावनुशयिन इति संशये संसर्गमात्रं न तत्र सुखादिभाजः,यथा वायुधूमादिभावे संसर्गमात्रं तद्वदेवाभिलापात्, यथाकाशादिप्रवर्षणाच्च तेषु किंचित् कर्म व्यापारं परामृशत्येवं व्रीह्यादावपि, तस्माचास्त्यत्र सुखदुःखादिभाक्त्वमित्याह अन्येति ॥ २५ ॥

ननु पशुहिंसादियोगाद्यागादि कर्माशुद्धमनिष्टफलदमिति तस्मान्मुख्यमेव व्रीह्यादिजन्मानुशयिनामस्त्वित्याशङ्क्याहाशुद्धमिति ।

अशुद्धमिति चेन्न शब्दात् ॥ २६ ॥

नेयं हिंसाऽधर्मः धर्माधर्मयोः शास्त्रैकगम्यत्वात्,य एवान्यत्र धर्मः

स एवान्यदेशकालादावधर्मः. शास्त्रादेव च यागीयहिंसाया धर्मत्वं कथमशुद्धं भवेत्. "न हिंस्यात् सर्वा भूतानी"त्युत्सर्गतो निषेधः, तदपवादो "ऽग्नीषोमीयं पशुमालभेते"ति, उत्सर्गापवादयोर्व्यवस्थितविषयत्वम्, तस्माद्विशुद्धं वैदिकं कर्मेति न तस्य फलं व्रातिस्थावरत्वं न च श्वशूकरादिजन्म तत्फलं तस्य कपूयचरणानधिकृत्योक्तत्वात्, अतो ब्रह्मादिसंसर्गमात्रमनुशायिनाम् ॥ २६ ॥

रेतःसिग्योगोऽथ ॥ २७ ॥

किंच यतो ब्रह्मादिभावानन्तरमनुशायिनो रेतःसिग्भाव आम्नातः,"यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवती"ति, अतोऽपि व्रीह्यादिसंसर्गमात्रम्,न चात्र मुख्यो रेतःसिग्भावः संभवति, चिरजातः प्राप्तयौवनो रेतःसिग्भवति, कथमनुपचरितं तद्भावमव्रमानावानुगतोऽनुशयी प्रतिपद्येत, अतो रेतोयोग्यतामात्रं तत्र. तद्वद् व्रीह्यादियोग एवेत्यविरोध इत्याह रेतःसिगिति ॥ २७ ॥

रेतःसिग्भावानन्तरं योनौ विनियुक्ते रेतसि योनेरधिशरीरमनुशायिनामनुशयफलभोगाय जायत इत्याह योनेरिति ।

योनेः शरीरम् ॥ २८ ॥ ६ ॥

इति ब्रह्मसूत्रे तृतीये साधनाध्याये प्रथमः पादः ॥ १ ॥ :: :: ॥

अत्र प्रथमपादेऽधिकरणानि ॥ ६ ॥ * * ॥

"रमणीयचरणा रमणीया"मिति,तस्मादप्यवगम्यते नावरोहे व्रीह्यादिभावावसरे तच्छरीरमेव सुखाद्यर्चितमिति संश्लेषमात्रं तज्जन्मेति सिद्धम् ॥ २८ ॥

इति ब्रह्मसूत्रतात्पर्यविवरणे तृतीयाध्याये साधननिरूपणे प्रथमः पादः ॥ १ ॥ :: :: ॥

Digitized by Google

॥ अथ ब्रह्मसूत्रतात्पर्यविवरणम् ॥

॥ तत्र तृतीयाध्यायस्य द्वितीयपादारम्भः ॥

—◆॥॥◆—

संध्ये सृष्टिराह हि ॥ १ ॥ २९ ॥

जीवस्य संसारगतिभेदप्रदर्शनानन्तरं तस्यैवावस्थाभेदः प्रदर्श्यते "स यत्र स्वपिती"त्युपक्रम्य "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजत" इत्यादि, तत्र प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिरुत मायिकीति प्रबोधसंप्रसादस्थानयोर्द्वयोर्लोकस्थानयोर्वा, संधौ भवतीति संध्यं तस्मिन् संध्ये स्थाने स्वप्ने तथैव सृष्टिः, "अथ रथान्" इत्यादिश्रुतिराह यत इत्याशङ्कते संध्ये इति ॥ १ ॥ २९ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ ३० ॥

अपिच केचिच्छाखिनः संध्ये स्थाने कामनिर्मातारमात्मानमामनन्ति, "य एष स्वप्नेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः" इति, पुत्रादयश्च कामाः, "कामानां त्वा कामभाजं करोमी"ति दर्शनात्, प्राज्ञश्च कर्ता प्रकरणात्, प्राज्ञसृष्टेर्जागरितस्थानायाः सत्यायाः दृष्टत्वात् प्राज्ञकर्तृत्वाविशेषात् स्वप्नेऽपि तथा, "अथो खल्वाहुर्जागरितदेश एवास्यैष" इति, "यान्येव जाग्रत् पश्यति तानि सुप्त" इति च, आशङ्कते निर्मातेति ॥ २ ॥ ३० ॥

समाधत्ते मायामात्रमिति ।

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ ३१ ॥

यदुक्तं संध्ये सृष्टिर्वास्तविकीति तन्न, कार्त्स्न्येनानभिव्यक्तरूपत्वात्, देशकालनिमित्तसंपत्त्यबाधैश्चाभिव्यक्त्यभावात्, न हि परमार्थवस्तुनियतानि देशादीनि स्वप्ने संभाव्यन्ते, न हि संवृते देहदेशे रथादयोऽवकाशं लभन्ते, उचितदेशादिर्वा, न च "बहिः कुलायादमृतश्चरित्वे"ति श्रुतेर्देहाद्बहिरेव स्वप्नं पश्यति, असंभवात्, न हि सुप्तस्य क्षणमात्रेण योजनशतान्तरितं देशं पर्येतुं सामर्थ्यं भवति, क्वचित् प्रत्यागमनरहितः

Digitized by Google

स्वप्नः श्रुतः, कुरुष्वहमद्य शयानो निद्रयाभिप्लुतः स्वयं पाञ्चालानभिगतश्चास्मि प्रबुद्धश्चेति, अन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति च, "स्वे शरीरे यथाकामं परिवर्तते" इति श्रुतिश्च न पारमार्थिकीति, बहिः कुलायश्रुतिर्गौणी, बहिरिव कुलायाद्गिति, एवं कालोऽपि न स्वप्ने वास्तवो रजन्यां सुप्तो भारतवर्षे वासरं मन्यते, मुहूर्तमात्रस्वप्ने बहून् संवत्सरानतिवाहयति, निमित्तानि च न सन्ति सर्वकरणोपसंहारात्, अबाधाभावाच्च, रथोऽयमिति स्वप्ने निर्धारितः क्षणेन मनुष्यः संपद्यते क्षणेन वृक्ष इति च, तस्मान्मायामात्रम् ॥ ३ ॥ ३१ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥ ३२ ॥

ननु न कश्चित् स्वप्ने परमार्थ इति नेत्युच्यते, स्वप्नाध्यायविदः कुञ्जरारोहणादीनि धन्यानि खरयानादीन्यधन्यानीति "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने"॥ "पुरुषं कृष्ण"मित्याद्यचिरजीवित्वे मन्त्रदेवताद्रव्यविशेषनिमित्ताश्च केचित् स्वप्नाः सत्यार्थगन्धिनोऽपि भवन्तीत्याचक्षते, तत्रापि सूच्यमानस्य शुभाशुभस्य सत्यत्वं स्त्रीदर्शनादेरसत्यत्वमेव, तस्मात् स्वप्नस्य मायामात्रत्वम्, एवं वियदादिव्यावहारिकप्रपञ्चस्यापि मायामात्रत्वं प्राग् ब्रह्मज्ञानाद् व्यवस्थितिः, स्वाप्निकस्तु प्रतिदिनं बाध्यते, अतो विशेषत इदं सांध्यस्य मायामात्रत्वमुक्तम्, यदप्युक्तं प्राज्ञ एतस्य निर्मातेति तदसत्, श्रुत्यन्तरे "स्वयं विहृत्य स्वयं निर्माय स्वेन ज्योतिषा स्वपिती"ति जीवव्यापारश्रवणात्, "य एषु सुप्तेषु जागर्ति" इति कामनिर्माता जीवः श्रुत इति, तस्य तु वाक्यशेषेण "तदेव शुक्रं तद्ब्रह्मे"ति ब्रह्मभाव उपदिश्यते तत्त्वमसीतिवत् प्राज्ञव्यापारस्तु न प्रतिषिध्यत इति तात्पर्यमित्याह सूचकश्चेति ॥ ४ ॥ ३२ ॥

ननु जीवोंऽश ईश्वरोंऽशी, अग्निविस्फुलिङ्गवत्, तयोः समाने ज्ञानैश्वर्यशक्ती, एवं च सामर्थ्यात् सांकल्पिकी स्वप्ने रथादिसिद्धिर्वास्तविकी भविष्यतीति प्राप्ते आह परेति।

पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥५॥३३॥

सत्यप्यंशांशिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतधर्मत्वम्, ईश्वरसमानधर्मत्वं त्वविद्यादिव्यवधानात् तिरोहितम्, तत्तदभिध्यायतो यतमानस्य विधूतध्वान्तस्येश्वरप्रासादात् संसिद्धस्य कस्यचिदेवाविर्भवति, न स्वभावतः सर्वस्याविर्भवतीति, कुतः, ईश्वरत्वाद्धेतोः सांल्पिकी वास्तवी सृष्टिः, ततो हीश्वरस्वरूपापरिज्ञानाद्बन्धः, तत्परिज्ञानान्मोक्षो हि ॥५॥३३॥

कुतस्तर्हि ईश्वररूपत्वे तिरस्कृतज्ञानैश्वर्यो भवति तत्राह देहेति ।

देहयोगाद्वा सोऽपि वा ॥ ६ ॥ ३४ ॥ १ ॥

सत्यं तथापि अविद्याकृतनामरूपदेहयोगाद्देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद् भासस्तिरस्कृतत्वं भवति यथाग्नेर्दहनप्रकाशसमर्थस्याप्यरणिगतदहनप्रकाशने तिरोहिते, भस्मच्छन्नस्यापि च, तदविवेककृतस्तिरस्कारः, वाशब्दो व्यावृत्त्यर्थः ॥ ६ ॥ ३४ ॥ १ ॥

स्वप्नावस्थामुक्त्वा सुषुप्तिमाह तदभावेति ।

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ ३५ ॥

"तद्यत्रैतत् सुप्तः स्वयं संप्रसन्नः स्वयं न विजानाति आसु नाडीषु तदा सुप्तो भवति नाडीभिः प्रत्यवसृप्य पुरीतति शेते यदा सुप्तः स्वप्नं न कंचित् पश्यति अथास्मिन् प्राण एवैकधा भवति सता सोम्य तदा संपन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तर"मिति च, तत्रैतानि नाड्यादीनि परस्परनिरपेक्षाणि भिन्नानि सुप्तिस्थानानि उत परस्परापेक्षतयैकमेव सुप्तिस्थानमिति, तत्रैकार्थत्वाद्भिन्नानि न ह्येकार्थानां व्रीहियवादीनां परस्परापेक्षा, नाड्यादीनां चैकार्थता सुप्तौ दृश्यते, "नाडीषु सुप्तो भवति पुरीतति शेते" इत्यादिषु सप्तमीनिर्देशात्, "सति संपद्य न विदु"रिति कदाचित् किंचित् स्थानं कदाचिदन्यत् स्वापायोपसर्पतीति प्राप्ते आह तदभावेति, दर्शनाभावः सुषुप्तम्, नाडीषु आत्मनि च समुच्चयेनैतानि नाड्यादीनि स्वापायोपैति न विकल्पेन तच्छ्रुतेः, सर्वेषामेव सुप्तिस्थानत्वं श्रूयते तत् समुच्चये संभवति, विकल्पे पक्षे बाधः

स्यात्, सप्तमीनिर्देशमात्रे समानेऽपि नैकार्थत्वम्. प्रासादे शेते पर्यङ्के शेते इत्यादिवत् पुरीतति ब्रह्मणि च शेते इति समुच्चयः, प्राण एवैकधा भवतीति प्राणो ब्रह्मनाडीद्वारा ब्रह्मण्येव तिष्ठति, एवं च "एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते," इत्यादीनामप्येकवाक्यता,नाड्यः पुरीतद् ब्रह्म चेति द्वे द्वारमात्रं ब्रह्मैव स्थानम् ॥ ७ ॥ ३५ ॥

अतः प्रबोधोऽस्मात् ॥ ८ ॥ ३६ ॥ २ ॥

यत आत्मैव सुप्तिस्थानमत एवास्मादात्मनः प्रबोधः, कुत एतद्वागादिति प्रश्नप्रतिवचनावसरे "यथाग्नेर्विस्फुलिङ्गा व्युच्चरन्ति एवमेवात्मनः सर्वे प्राणा" इत्यादिना 'सत आगत्य न विदुः सत आगच्छाम" इति च सुषुप्तिस्थानविकल्पे आत्मन एव प्रबोध इति नोपपद्यते इत्याह अत इति ॥ ८ ॥ ३६ ॥ २ ॥

य एव सति संपन्नः स एव प्रतिबुध्यतेऽन्यो वेति नियमे यथा कश्चिज्जलबिन्दुर्जलराशौ प्रक्षिप्तो राशिरूपः पुनरुद्धरणे स एव बिन्दुरिति न नियमस्तथेहापीति प्राप्ते आह स एवेति।

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ ३७ ॥ ३ ॥

कुतः, कर्मानुस्मृतिशब्दविधिभ्यः, पूर्वेद्युरनुष्ठितस्य कर्मणः परेद्युः शेषमनुतिष्ठति, तस्मादेक एव, पूर्वानुभूतस्य प्रबोधोत्तरं स्मरणमेकत्वे संभवति, न ह्यन्योऽनुभवति अन्यः स्मरति, पुनः प्रतिन्यायं प्रतियोन्याद्रवति, "बुद्धान्तायैव सर्वाः प्रजा अहरहर्गच्छन्त्यः" इति शब्दात्, कर्मविद्याविधिभ्यश्चैवम्, अन्यथा विधयोऽनर्थकाः स्युः, अन्योत्थानपक्षे सुप्तमात्रा मुच्येतेत्यापत्तिः, तस्मात् स एवोत्तिष्ठतीति ॥ ९ ॥ ३७ ॥ ३ ॥

तिस्रस्तावदवस्थाः, जाग्रत्स्वप्नसुषुप्तयः, चतुर्थी शरीरादपसृतिः, नातः पञ्चम्यवस्थास्तीति, मुग्धो मूर्छितः किमवस्थ इति चतुर्थ्येव तम् इति प्राप्ते आह मुग्धे इति।

मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥ ३८ ॥ ४ ॥

न जाग्रत्स्थानस्वरूपा मुग्धता इन्द्रियैर्विषयानीक्षणात्, न चेषु-

कारवद् व्यासक्तमना नान्यान् विषयान् मुग्ध ईक्षत इति, इषुकारो हीषुमेवैतावत्कालमुपलभमानोऽभूवं मुग्धस्तु॰ अन्धे तमसि॰ अहमेताव-त्कालं प्रक्षिप्तो न किंचिद्वेदिषमित्यज्ञानमभिनयति धरण्यां च पतति, अतो न व्यासक्तमानसत्वं मुग्धत्वं नापि स्वप्नस्थानं निःसङ्गत्वात्॰ नापि चतुर्थी मरणावस्था तस्यां प्राणोष्मणोऽदर्शनात्॰ नापि सुषुप्तिर्वैलक्षण्यात्, मूर्च्छितः कदाचिदपि नोच्छ्वसिति सवेपथुश्च भयंकरवक्त्रो विस्फारितनेत्रः, नैवं सुषुप्तः, यतः पाणिपेषणमात्रेणोत्तिष्ठति, अतः परिशेषादर्धसंपत्ति-र्मुग्धतेति, न चोपाध्युपरमात् सुषुप्तिवत् सर्वब्रह्मसंपत्॰ न ह्यर्धसंपत्॰ जीव-स्य ब्रह्मणात्र विवक्षिता, किंत्वर्धेन सुषुप्तस्येव मुग्धत्वमर्धेनावस्थान्तरपक्ष-स्येत्यर्धसंपदं ब्रह्मविद इच्छन्ति, एवं चेयं पञ्चम्यवस्था लोके आयुर्वेदे च प्रसिद्धत्वान्नात्र गण्यते ॥ १० ॥ ३८ ॥ ४ ॥

येन ब्रह्मणा सुषुप्तादिषु जीवैक्यमुपाध्युपरमात् प्राप्नोति तस्ये-दानीं स्वरूपं निर्धार्यते, "सर्वकामः सर्वकर्मा सर्वगन्धः सर्वरस" इति सवि-शेषलिङ्गम्, "अस्थूलमनण्वह्रस्वमदीर्घ"मित्यादि निर्विशेषलिङ्गम्, तत्रो-भयलिङ्गमुतान्यतरलिङ्गं ब्रह्म, उभयलिङ्गश्रुत्यनुग्रहादुभयलिङ्गमिति प्राप्ते आह न स्थानेति ।

न स्थानतोऽपि परस्योभयलिङ्गं सर्वच हि ॥ ११ ॥ ३९ ॥

न स्वत उभयमुपपद्यते विरोधात्, नापि स्थानतः पृथिव्याद्युपा-धिनोभयं न ह्युपाधिनाप्यन्यादृशादन्यादृशं भवति, न च स्वच्छः स्फटिकोऽ-लक्तकादिना॰ अस्वच्छः, अतोऽन्यतरपरिग्रहे समस्तविशेषरहितं निर्विक-ल्पमेव ब्रह्म, सर्वत्र ब्रह्मवाक्येषु "अशब्दमस्पर्शमरूपमव्यय"मित्यादिषु निरस्तसर्वविशेषमेवोपदिश्यते॰ अतः ॥ ११ ॥ ३९ ॥

ननु भिन्ना हि प्रतिविद्यं ब्रह्माकारा उपदिश्यन्ते "चतुष्पाद् ब्रह्म षोडशकलं वामनी भामनी वैश्वानरं त्रैलोक्यशरीर"मित्यादौ, तस्मात् सविशेषमेवेत्याशङ्क्याह न भेदेति ।

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ ४० ॥

कुतः, प्रत्येकमतद्वचनात्, प्रत्युपाधिभेदं ह्यभेदमेव ब्रह्मणः श्राव-यति श्रुतिः, "यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायम-ध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मे"त्यादि, अतो न भिन्नाकारः शास्त्रीयः ॥ १२ ॥ ४० ॥

अपि चैवमेके ॥ १३ ॥ ४१ ॥

किंचैके शाखिनो भेददर्शननिन्दापूर्वकमभेददर्शनमामनन्ति "मन-सैवेदमवाप्तव्यं नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति," "भोक्ता भोज्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म चैत"दित्याह॰ अपि चेति ॥ १३ ॥ ४१ ॥

ननु साकारश्रुत्या सविशेषमेव किं न स्यादत आह॰ अरूपेति।

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ ४२ ॥

अरूपमेव कुतः, तत्प्रधानत्वात्, "अस्थूलमनण्व"त्यादिषु बह्वीषु श्रुतिषु निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानीति व्यवस्था-पितं समन्वयसूत्रे, तस्मान्निर्विशेषमेव ब्रह्म ॥ १४ ॥ ४२ ॥

का तर्हि साकारश्रुतीनां गतिस्तत्राह प्रकाशवदिति।

प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥ ४३ ॥

यथा सौरश्चान्द्रो वा प्रकाशो वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपा-धिसंबन्धात् तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यते, एवं ब्रह्मापि पृथिव्याद्युपाधिसंबन्धात् तदाकारतामिव प्रतिपद्यते, तदा-लम्बनो ब्रह्मण आकारोपदेश उपासनार्थः, अतो न व्यर्थत्वम्, एवं सगुणब्रह्मवाक्यानां निर्वाहः ॥ १५ ॥ ४३ ॥

श्रुतिरप्याह चैतन्यमात्रं तदित्याह॰ आह चेति।

आह च तन्मात्रम् ॥ १६ ॥ ४४ ॥

"यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वाऽरेऽय-मात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे"त्यादि ॥ १६ ॥ ४४ ॥

Digitized by Google

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥ ४५ ॥

निर्विशेषत्वादेव परप्रतिषेधेनैव ब्रह्मोक्तम्, बाष्कलिना पृष्टो वाहुः प्रवचनेनैव ब्रह्म प्रोवाच, "स होवाचाधीहि भो इति स ह तूष्णीं बभूव तं ह द्वितीये तृतीये चोवाच ब्रूमः खलु त्वं न विजानास्युपशान्तोऽयमात्मे"ति, स्मृतिरपि ।

ज्ञेयं यत् तत् प्रवक्ष्यामि यद् ज्ञात्वामृतमश्नुते ।
अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते ॥
माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि ॥

इति प्राह दर्शयतीति ॥ १७ ॥ ४५ ॥

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥ ४६ ॥

यत एवात्मा चैतन्यरूपो निर्विशेषोऽत एवास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामादाय जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेषु "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्नुपाधिना क्रियते भिन्नरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" इत्यादिरित्याह॰ अत एवेति ॥ १८ ॥ ४६ ॥

अम्बुवदग्रहणात् तु न तथात्वम् ॥ १९ ॥ ४७ ॥

नन्वयुक्तः सूर्यकादिदृष्टान्तः. सूर्यकादिस्तत्पृथग्भूतं विप्रकृष्टं मूर्तं च जलं प्रत्यक्षमिति युक्तस्तत्प्रतिबिम्बभावः, अत्र तु न चात्मा मूर्तः,न चास्मात् पृथग्भूता विप्रकृष्टा उपाधयः सर्वगत्वात् सर्वानन्यत्वाच्च, इत्याशङ्कते॰ अम्बुवदिति ॥ १९ ॥ ४७ ॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥ ४८ ॥

न हि दृष्टान्तसारूप्यं सर्वांशे दार्ष्टान्तिकस्य बाधात्, किंचिद्विवक्षया त्वत्रापि शास्त्रोक्तस्य त्वस्य वृद्धिह्रासभाक्त्वेन विवक्षितम्,यथा जलसूर्यो जलवृद्धौ वर्धते जलह्रासे ह्रसति चलने चलति जलभेदे भिद्यते इति जलधर्मानुविधायी भवति न तु परमार्थतः सूर्यस्य तथात्वम्, एवं परमार्थ-

तोऽविकृतमेकरूपमपि सद् देहाद्युपाध्यन्तर्भावाद्भजत एवोपाधिधर्मान् वृद्धिह्रासादीनिति समाधत्ते वृद्धीति ॥ २० ॥ ४८ ॥

दर्शनाच्च ॥ २१ ॥ ४९ ॥ ५ ॥

श्रुतिरेवाह ब्रह्मणो देहाद्युपाधिष्वन्तरनुप्रवेशनं "पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्" "अनेन जीवेनात्मनानुप्रविश्ये"ति च, तस्मात् सिद्धमेकलिङ्गमेव ब्रह्म नोभयलिङ्गमित्याह दर्शनादिति ॥ २१ ॥ ४९ ॥ ५ ॥

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥ ५० ॥

"द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चे"त्युपक्रम्य महता प्रपञ्चेन पृथिव्यप्तेजोलक्षणं मूर्तं वाय्वाकाशलक्षणममूर्तं रूपं प्रपञ्च्य अन्ते ब्रह्मोपदेष्टुमिदमुक्तम्, "अथात आदेशो नेति नेतीति नह्येतस्मादिति नेत्यन्यत् परमस्ती"ति, तत्र किं ब्रह्मणो रूपे ब्रह्म च उभयं निषिध्यते॰ उतैकमेव, तत्राप्येकं किं रूपं निषिध्यते॰ उत ब्रह्म वा प्रतिषिध्यते, किं प्राप्तम्॰ तत्र प्रकृतत्वाविशेषादुभयमपि, नञ्द्वयश्रवणाच्च,द्वितीयेन नञा ब्रह्माद्येन रूपं निषिध्यत इति प्राप्ते न तावदुभयं निषिद्धं शून्यवादप्रसङ्गात् किंचित् पारमार्थिकमालम्ब्यापरमार्थः प्रतिषिध्यते,यथा रज्ज्वादिषु सर्पादयः, तथाचात्र न ब्रह्म निषिध्यते, "ब्रह्म ते ब्रवाणी"त्युपक्रमविरोधात्, "असन्नेव स भवति असद्ब्रह्मेति वेद चे"दिति निन्दाविरोधात्, अस्तीत्येवोपलब्धव्य इत्यवधारणाच्च, सर्ववेदान्तकोपप्रसङ्गात्, "यतो वाचो निवर्तन्ते" इति वाङ्मनसातीतमविषयं प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति प्रतिपादनाय ब्रह्मणो रूपद्वयप्रतिषेधो "नेति"॰ इति, ब्रह्म परिशेषार्थः, न च वीप्सा व्यर्था, प्रथमनञा मूर्तामूर्तयोर्द्वितीयेन मूर्ताद्यभावस्य मूलाज्ञानस्य च निषेधः, तयोरनिषेधे तयोरेव ब्रह्मत्वं प्रसज्येत, अतो न ब्रह्मनिषेधः, तत् सत्यस्य सत्यमिति निषेधाविषयत्वात्, यद्वा द्वितीयेन वासना प्रतिषिध्यते, यद्वा यत् किंचिदुत्प्रेक्ष्यते तन्निषेधः, तस्मात् प्रपञ्चमेव कल्पितं प्रतिषेधति, परिशिनष्टि च ब्रह्मेत्याह प्रकृतेति ॥ २२ ॥ ५० ॥

अवशिष्टं ब्रह्म कुतो न दृश्यते तत्राह तदव्यक्तमिति।

तदव्यक्तमाह हि ॥ २३ ॥ ५१

"न चक्षुषा पश्यति कश्चिदेनम्" "अगृह्यो न हि गृह्यते" "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते" इत्यादि श्रुतिराह यतः, स्मृतिरपि "अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते"। इति, श्रुत्या तु दृश्यत एव तदित्यर्थः ॥ २३ ॥ ५१ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥ ५२ ॥

किंच एनमात्मानं संराधनकाले पश्यन्ति च, संराधनं भक्तिध्यान-प्रणिधानाद्यनुष्ठानम्, कुत एतत्, प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम्,

"पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन्।
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं निष्कलं ध्यायमानः"। स्मृतिश्च,

"ये विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्"।

इत्याह० अपि संराधनेति ॥ २४ ॥ ५२ ॥

ननु संराध्यसंराधकभावाभ्युपगमाज्जीवपरयोरन्यत्वं स्यादिति प्राप्ते आह प्रकाशादीति।

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥ ५३ ॥

यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृतिकर्मसूपाधिषु सविशेषा इव भासन्ते न स्वाभाविकीमविशेषात्मतां जहति, एवमौपाधिक एवायमात्मभेदः, स्वतस्त्वैकात्म्यमेव, वेदान्तेष्वभ्यासादसकृज्जीवप्राज्ञयोरभेद उक्तस्तस्मात् ॥ २५ ॥ ५३ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥ ५४ ॥

अतः स्वाभाविकत्वादभेदस्य भेदस्याविद्याकृतत्वाच्च जीवः प्राज्ञे-

नानन्तेनैकतां गच्छति तथा लिङ्गमस्ति, "स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येति" इत्याह० अत इति ॥ २६ ॥ ५४ ॥

उभयव्यपदेशात् त्वहिकुण्डलवत् ॥ २७ ॥ ५५ ॥

संराध्यसंराधकभावे मतान्तरे स्वमतविशुद्धये सूत्रार्थमाह क्वचिद्भेदो व्यपदिश्यते क्वचिदभेदः,उभयमप्यहिकुण्डलवत्त्रापि भवितुमर्हति, अहिरित्यभेदः कुण्डलाभोगप्रांशुत्वादिरिति भेदः ॥ २७ ॥ ५५ ॥

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥ ५६ ॥

यथा प्रकाशः सावित्रश्च तदाश्रयः सविता च नात्यन्तभिन्नौ, उभयोरपि तेजस्त्वात्, अथ च भेदव्यपदेशभाजौ च, तद्वदित्याह प्रकाशेति ॥ २८ ॥ ५६ ॥

पूर्ववद्वा ॥ २९ ॥ ५७ ॥

प्रकाशादिवच्चाविशेष्यमिति पूर्ववदविद्याकृतत्वाद्बन्धस्य विद्यया मोक्ष उपपद्यत इत्याह पूर्ववदिति ॥ २९ ॥ ५७ ॥

प्रतिषेधाच्च ॥ ३० ॥ ५८ ॥ ६ ॥

यतः परस्मादात्मनोऽन्यं चेतनं प्रतिषेधति शास्त्रं "नान्योऽतोऽस्ति द्रष्टे"त्यादि"नेति नेती"ति ब्रह्ममात्रपरिशेषाच्चैवमित्याह प्रतिषेधेति ॥ ३० ॥ ५८ ॥ ६ ॥

कानिचिद्वाक्यानि ब्रह्मणः परमन्यत् तत्त्वमापाततः प्रतिपादयन्तीत्याशङ्क्यते परमत इति ।

परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥ ५९ ॥

परस्मात् तत्त्वानामन्यत्वमेव कुतः सेतून्मानसंबन्धानां व्यपदेशात्, "अथ य आत्मा स सेतुर्विधृति"रत्र सेतुं तीर्त्वान्यद्गम्यमस्मीतिवदात्मानं सेतुं तीर्त्वाऽन्यमात्मानमसेतुं प्राप्नोति एवं "तदेतद्ब्रह्म चतुष्पादष्टाशफं षोडशकल"मित्युन्मितादन्यदस्ति,कार्षापणोन्मितादन्यत् सुवर्णादि यथा तद्वत्, "प्राज्ञेनात्मना संपरिष्वक्त" इति संबन्ध उक्तः, स च भिन्नसंबन्धिनोर्भे-

वति, अतोऽपि भेदः, "आदित्ये पुरुषो दृश्यते चक्षुषि पुरुष" इत्याद्याधाराधेययोर्भेदादपि भेदः, इति शङ्का ॥ ३१ ॥ ५९ ॥

समाधत्ते सामान्यात् त्विति ।

सामान्यात् तु ॥ ३२ ॥ ६० ॥

"एकमेवाद्वितीय"मित्यादिश्रुतिभ्योऽनन्यत्वे निर्धारिते सति सेत्वादिव्यपदेशः सामान्यात् सादृश्याद् गोयासर्वविधारकत्वात्, सेतुरिव सेतुः, एवमग्रेऽपि ॥ ३२ ॥ ६० ॥

उन्मानव्यपदेशः सोऽप्युपासनार्थः, न ह्यनन्तेऽविकारे परस्मिन् मानं संभवतीत्याह बुद्ध्यर्थ इति ।

बुद्ध्यर्थः पादवत् ॥ ३३ ॥ ६१ ॥

पादवत्, यथा कार्षापणे पादादिविभागो व्यवहारार्थस्तद्वत् ॥ ३३ ॥ ६१ ॥

संबन्धव्यपदेशभेदव्यपदेशयोः समाधानमाह स्थानेति ।

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥ ६२ ॥

बुद्ध्याद्युपाधिस्थानयोगादुद्भूतस्य विशेषविज्ञानस्योपाध्युपशमे उपशम एवेत्युपाधिकृत आत्मनां संबन्ध इत्युपचर्यते, यथा प्रकाशस्योपाध्युपशमे भेदोपशमस्तथापि भेदस्तद्वद् भेदव्यपदेशोऽप्यौपाधिक इत्यर्थः ॥ ३४ ॥ ६२ ॥

उपपत्तेश्च ॥ ३५ ॥ ६३ ॥

उपपद्यते चायमेव प्रकारो नान्यादृशः, "स्वयमपीतो भवती" त्यादिश्रुतेरित्याह॰ उपपत्तेरिति ॥ ३५ ॥ ६३ ॥

एवं भेदं निराकृत्य स्वपक्षं हेत्वन्तरेणोपसंहरति तथेति ।

तथान्यप्रतिषेधात् ॥ ३६ ॥ ६४ ॥

"स एवाधस्तात् सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद" "पुरुष एवेदं सर्वं" "नेह नानास्ति किंचन" "यस्मात् परं नापरमस्ति किंचि"

दित्यादिवाक्यशतानि वस्त्वन्तरं वारयन्तीत्यतोऽपि न तत्त्वान्तरमिति ॥ ३६ ॥ ६४ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥ ६५ ॥ ७ ॥

अनेनेति । सेत्वादिव्यपदेशनिराकरणेन अप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति, व्यपदेशस्य मुख्यत्वे आत्मनः परिच्छिन्नत्वं स्यात्, आयामशब्दात् सर्वगतत्वं सिद्धम्, आयामशब्दस्य व्याप्तिवचनत्वात्, "यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः" "ज्यायान् दिवो ज्यायानाकाशात्" "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन" इत्यादिभ्यः ॥ ३७ ॥ ६५ ॥ ७ ॥

तस्य ब्रह्मणो व्यावहारिके ईशित्रीशितव्यविभागे सत्यन्यदपि सिध्यतीत्याह फलमत इति ।

फलमत उपपत्तेः ॥ ३८ ॥ ६६ ॥

यत् इष्टानिष्टमिश्रलक्षणं कर्मफलं तत् किं कर्मणः सकाशादुतेश्वरादिति संदेहे "स्वर्गकामो यजेते"त्यादिना यागादेः फलजनकत्वबोधनात् कर्मणः फलमिति प्राप्ते ईश्वरात् फलं भवति· उपपत्तेः, विचित्राम् सृष्टिस्थितिसंहारान् विदधद् देशकालविशेषाभिज्ञत्वात् कर्मिणां कर्मानुरूपं फलं संपादयति कर्मण आशुविनाशित्वात्, अभावाद्भावानुत्पत्तेः, न चापूर्वं परिकल्प्य तस्मात् फलं तस्य काष्टलोष्टवदचेतनस्य फलदाने प्रवृत्त्यनुपपत्तेः, अर्थापत्तिस्तु नापूर्वे प्रमाणं तस्या ईश्वरसिद्धा परिक्षयात्, लोके राजसेवादिवत् पूजितेश्वरात् फलम्, "एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते" इति श्रुतेश्च ॥ ३८ ॥ ६६ ॥

श्रुतत्वाच्च ॥ ३९ ॥ ६७ ॥

"स वा एष महानज आत्माऽन्नादो वसुदान" इत्यादिषु स्पष्टं फलदातृत्वश्रुतेश्चेश्वरादेव फलमित्याह श्रुतत्वेति ॥ ३९ ॥ ६७ ॥

जैमिनिस्तु धर्माधर्मयोरपूर्वद्वारा फलदातृत्वं युक्तिबलाद्विधिवाक्यबलाच्चाहेत्याह धर्ममिति।

धर्मं जैमिनिरत एव ॥ ४० ॥ ६८ ॥

अत एव, श्रुतेः, उपपत्तेश्च, ईश्वरस्य फलदातृत्वे वैषम्यनैर्घृण्यापाताद् विचित्रकारणाधीनत्वाच्च विचित्रकार्यस्येत्यर्थः ॥ ४० ॥ ६८ ॥

बादरायणस्तु पूर्वोक्तमेवेश्वरस्य फलदातृत्वं मन्यते कुतः धर्माधर्मकारयितृत्वेन फलदातृत्वेन च हेतुव्यपदेशात्, "एष उ एव साधु कर्म कारयती"त्यादिना हेतुत्वप्रतिपादनात्,

"यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान्मयैव विहितान् हितान्"॥

इति स्मृतेश्च, तदेव चेश्वरस्य फलदातृत्वं यत् स्वस्वकर्मानुरूपाः प्रजाः सृजतीति न वैषम्यादिदोषप्रसक्तिरित्याह पूर्वं त्विति।

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥ ६९ ॥ ८ ॥

इति ब्रह्मसूत्रे तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥ :: :: ॥

अत्र पादेऽधिकरणानि ॥ ८ ॥ :: :: ॥

तदेवमधिकरणचतुष्टयेन त्वंपदार्थः शोधितः तत्पदार्थोऽपि प्रथमे ब्रह्मणो नीरूपत्वं द्वितीयेन निषेधाविषयत्वं तृतीयेनाद्वितीयत्वं चतुर्थेन व्यवहारदशायां कर्मफलदातृत्वमुपलक्षणत्वायोक्तमिति तत्त्वंपदार्थौ शोधितौ ॥ ४१ ॥ ६९ ॥ ८ ॥

इति ब्रह्मसूत्रतात्पर्यविवरणे तृतीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ :: :: ॥

॥ शाश्वतधर्मदीपिका ॥

भरद्वाज उवाच।

ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम।
वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदतां वर॥

Digitized by Google

भृगुरुवाच ।

जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः ।
वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः ॥
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः ।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते ॥
सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा ।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः ॥
क्षत्रजं सेवते कर्म वेदाध्ययनसङ्गतः ।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥
वणिज्या पशुरक्षा च कृष्यादानरतिः शुचिः ।
वेदाध्ययनसंपन्नः स वैश्य इति संज्ञितः ॥
सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चेतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥ इति ॥

अत्रेदं बोध्यम् । वेदसंस्कारादिविहीनस्य ब्राह्मणत्वाभावकथनं सत्यादिसंपन्नस्य शूद्रस्यापि ब्राह्मणत्वकथनं च ब्रह्म जानातीति ब्राह्मण इत्यर्थमनुसृत्य ब्रह्मज्ञानोपयोगियोग्यताप्राप्तिपरं मोक्षधर्मोपक्रमाद् ब्राह्मणत्वादेर्जातिरूपतायाः सकललोकतन्त्रप्रसिद्धत्वेन यावद्द्रव्यभावित्वावश्यकत्वाच्च । वनपर्वणि १८० अध्याये सर्पयुधिष्ठिरसंवादेऽपि तथैव वेद्यं यच्चात्र निर्दुःखमसुखं च नार्हधिपेति ब्रह्मविषयकप्रश्नसाहचर्यात् । ब्राह्मणो न हन्तव्यः ब्राह्मणाय दद्यादित्यादौ तु जातेरेव निमित्तत्वं ।

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
प्राधीते दशसाहस्रमनन्तं वेदपारगे ॥

इत्यादिवचनात् जातिमात्रब्राह्मणवधेपि ब्रह्महत्याप्रायश्चित्तोपदेशाच्च । वृत्तस्य तु जातिसामानाधिकरण्येन दाने फलातिशयं प्रति वधे पातकातिशयं प्रति च प्रयोजकत्वमात्रमिति ।

एवं शीलस्य सकलधर्मादिनिदानत्वं शक्रप्रह्लादसंवादमुखेन प्रदर्शितम् । युधिष्ठिरेण शीलस्य सर्वोत्कृष्टतायां कारणं किमिति ।

इमे जना नरश्रेष्ठ प्रशंसन्ति सदा भुवि ।
धर्मस्य शीलमेवादौ ततो मे संशयो महान् ॥
यदि तच्छक्यमस्माभिर्ज्ञातुं धर्मभृतां वर ।
श्रोतुमिच्छामि तत्सर्वं यथैतदुपलभ्यते ॥
कथं तत्प्राप्यते शीलं श्रोतुमिच्छामि भारत ।
किंलक्षणं च तत्प्रोक्तं ब्रूहि मे वदतां वर ॥

इति पृष्टः शान्तनवोऽवदत् । दुर्योधनं तप्यमानं युधिष्ठिरराज्यवृद्ध्या किमिति संतप्यसे तवापि विपुलं वसु वर्तते इति पृच्छन् धृतराष्ट्रस्तेन च मदपेक्षया युधिष्ठिरस्य संपदधिकेति शोचामीत्युक्तः ।

यदीच्छसि श्रियं तात यादृशी सा युधिष्ठिरे ।
विशिष्टां वा नरव्याघ्र शीलवान्भव पुत्रक ॥

इत्यभिधाय ।

शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः ।
न हि किं चिदसाध्यं वै लोके शीलवतां भवेत् ॥
एकरात्रेण मान्धाता त्र्यहेण जनमेजयः ।
सप्तरात्रेण नाभागः पृथिवीं प्रतिपेदिरे ॥
एते हि पार्थिवाः सर्वे शीलवन्तो दयान्विताः ।
अतस्तेषां गुणक्रीता वसुधा स्वयमागता ॥

इति शीलं प्रशस्य ।

कथं तत्प्राप्यते शीलं श्रोतुमिच्छामि भारत ।
येन शीलेन तैः प्राप्ता क्षिप्रमेव वसुंधरा ॥

इति पुनः पृच्छन्तं तमितिहासं वर्णयां बभूव । प्रह्लादेन हृतराज्यः शक्रो बृहस्पतिमुपातिष्ठत । तेन च नैश्रेयसज्ञानवर्णनपुरस्सरमेतावदेव श्रेय इत्युक्तः पुनर्विशेषं पप्रच्छ । तेनापि भार्गवो विशेषं वेत्तीति बोधितो भार्गवमासाद्य ततो ज्ञानमाप्याप्यतोऽपि विशेषः कोऽस्तीति पृष्टवान् । ततश्च तेनातोऽपि विशेषतो ज्ञानं प्रह्लादस्यास्तीत्युक्तो द्विजरूपेण प्रह्लादान्तिकमाजगाम । तं च शिष्यवत् परिचरन् श्रेयःसाधनं किमिति पृष्ट्वा तेन सम्प्रति त्रैलोक्यराज्याधिकृतस्य ममोपदेशावकाशो नास्तीति प्रत्याख्यातोऽपि विविक्तेऽवकाशे समुपचरन् प्रीतेन तेन किं पृच्छसि पृच्छेत्यनुज्ञातस्त्वया त्रैलोक्यराज्यं कथं प्राप्तमित्यप्राक्षीत् । तेन च राजास्मीति गर्वेण विदुषो नासूयामि तेषां च वचांसि शृणोम्यनुतिष्ठामि चेति दत्तोत्तरः शुश्रूषमाणः प्रसीदता तेन वरं याचस्वेति अभिहितस्त्वयि स्थितं शीलं मम भूयादित्ययाचत । तेन च विस्मितेन सत्यपाशबद्धेन दत्ते शीले संतुष्टो द्विजोऽयासीत् । गते चेन्द्रे प्रह्लादशरीरात्तेजोरूपे शीले निर्याते क्रमेण धर्मसत्यवृत्तबलानि निर्जग्मुः । ऊचुश्च वयं शीलाश्रया इत्यशीले न तिष्ठाम इति । ततश्च श्रीरपि निर्यान्ती कुतः प्रयासीति प्रह्लादेन पर्यनुक्ता ।

शीलेन हि त्रयो लोकास्त्वया धर्मज्ञ निर्जिताः ।
तद्विज्ञाय सुरेन्द्रेण तव शीलं हृतं प्रभो ॥
धर्मः सत्यं तथा वृत्तं बलं चैव तथाप्यहम् ।
शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशयः ॥

इत्यवोचदिति । अनेन च सन्दर्भेण सकलधर्मादिसाधनं शीलमेवेति विशदं पर्यवस्यति । तच्च कीदृशं शीलमिति पृष्टवन्तं दुर्योधनं प्रति ।

Digitized by Google

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च शीलमेतत्प्रशस्यते ॥
यदन्येषां हितं न स्यादात्मनः कर्म पौरुषम् ।
अपत्रपेत वा येन न तत्कुर्यात्कथं चन ॥
तत्तु कर्म तथा कुर्याद्येन श्लाघ्येत संसदि ।
शीलं समासेनैतत्ते कथितं कुरुसत्तम ॥ इति ॥

धृतराष्ट्रः शीलस्य संक्षेपतः स्वरूपमभिधाय दुःशीलैः प्राप्तापि श्रीराशु नश्यतीति ।

यद्यप्यशीला नृपते प्राप्नुवन्ति श्रियं क्व चित् ।
न भुञ्जते चिरं तात समूलाश्च न सन्ति ते ॥

इत्युपसंहृतवान् । अत एव युधिष्ठिरलोमशसंवादः युधिष्ठिर उवाच ।

न वै निर्गुणमात्मानं मन्ये देवर्षिसत्तम ।
तथास्मि दुःखसंतप्तो यथा नान्यो महीपतिः ॥ १ ॥
परांश्च निर्गुणान्मन्ये न च धर्मगतानपि ।
ते च लोमश लोकेऽस्मिन् वर्धन्ते केन हेतुना ॥ २ ॥

लोमश उवाच ।

नात्र दुःखं त्वया राजन्कार्यं पार्थ कथं चन ।
यदधर्मेण वर्धेयुरधर्मरुचयो जनाः ॥ ३ ॥
वर्धत्यधर्मेण नरस्ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु विनश्यति ॥ ४ ॥
मया हि दृष्टा दैतेया दानवाश्च महीपते ।
वर्द्धमाना ह्यधर्मेण क्षयं चोपगताः पुनः ॥ ५ ॥

Digitized by Google

पुरा देवयुगे चैव दृष्टं सर्वं मया विभो ।
अरोचयन्सुरा धर्मं धर्मं तत्यजिरे ऽसुराः ॥ ६ ॥
तीर्थानि देवा विविशुर्नाविशन्भारतासुराः ।
तानधर्मकृतो दर्पः पूर्वमेव समाविशत् ॥ ७ ॥
दर्पान्मानः समभवन्मानात्क्रोधो ऽभ्यजायत ।
क्रोधादह्रीस्ततो लज्जा वृत्तं तेषां ततो ऽनशत् ॥ ८ ॥
तानलज्जान् गतह्रीकान् हीनवृत्तान्वृथाव्रतान् ।
क्षमा लक्ष्मीश्च धर्मश्च न चिरात्प्रजहुस्ततः ॥ ६ ॥
लक्ष्मीस्तु देवानगमदलक्ष्मीरसुरान्नृप ।
तानलक्ष्मीसमाविष्टान् दर्पापहतचेतसः ॥ १० ॥
दैतेयान्दानवांश्चैव कलिरप्याविशत्ततः ।
तानलक्ष्मीसमाविष्टान् दानवान् कलिना हतान् ॥ ११ ॥
दर्पाभिभूतान्कौन्तेय क्रियाहीनानचेतसः ।
मानाभिभूतानचिराद्विनाशः समपद्यत ॥ १२ ॥
निर्यशस्कास्तथा दैत्याः कृत्स्नशो विलयं गताः ।
देवाश्च सागराश्चैव सरितश्च सरांसि च ॥ १३ ॥
अभ्यगच्छन्धर्मशीलाः पुण्यान्यायतनानि च ।
तपोभिः क्रतुभिर्दानैराशीर्वादैश्च पाण्डव ॥ १४ ॥
प्रजहुः सर्वपापानि श्रेयश्च प्रतिपेदिरे ।
एवमादानवन्तश्च निरादानाश्च सर्वशः ॥ १५ ॥
तीर्थान्यगच्छन्विबुधास्तेनापुर्भूतिमुत्तमाम् ।
तथा त्वमपि राजेन्द्र स्नात्वा तीर्थेषु सानुजः ॥
पुनर्वेत्स्यसि तां लक्ष्मीमेष पन्थाः सनातनः ॥ इति ।

एतावता प्रबन्धेन सिद्धे शीलस्य धर्मसुखसाधनत्वे तत्स्वरूपे चाद्रोहः सर्वभूतेष्वित्यादिना संक्षेपतो ज्ञाते विशेषतो ज्ञानं शीलस्याव-श्यकम्। इतरथा केन कर्मणा परदुःखोत्पादनं भवति केन वा परहितं विहन्यते केन वा सज्जनसंसदि निन्द्यते श्लाघ्यते वेति दुर्विज्ञानमल्प-मतीनाम्। अतश्च शीलवत्तामात्मनि चिकीर्षुभिः किं कार्यं येन संपदा-यतनता स्यात्किमनुष्ठाय च विनश्येल्लक्ष्मीरिति बोधयितुं शक्रलक्ष्मीसं-वादमुखेनोपदिदेश शान्तनवो युधिष्ठिरम्। पुरा किल लक्ष्मीर्धार्मिकेषु दै-त्येषु वर्तमाना तेषु धर्मं जहत्सु तानपहाय शक्रसमीपमुपसरन्ती कीदृशेषु दैत्येषु पुरा त्वमवात्सीरिदानीं च कीदृग्विधांस्ते यत्तांस्त्यक्त्वात्यसीति महेन्द्रेण पृष्टा।

स्वधर्ममनुतिष्ठत्सु धैर्यादचलितेषु च।
स्वर्गमार्गाभिरामेषु सत्त्वेषु निरता ह्यहम्॥
दानाध्ययनयज्ञेज्यापितृदैवतपूजनम्।
गुरूणामतिथीनां च तेषां सत्यमवर्तत॥
सुसंमृष्टगृहाश्चासन् जितस्त्रीका हुताग्नयः।
गुरुशुश्रूषका दान्ता ब्रह्मण्याः सत्यवादिनः॥
श्रद्दधाना जितक्रोधा दानशीलानसूयवः।
भृतपुत्रा भृतामात्या भृतदारा ह्यनीर्षवः॥
अमर्षेण न चान्योन्यं स्पृहयन्ते कदा चन।
न च जातूपतप्यन्ति धीराः परसमृद्धिभिः॥
दातारः संग्रहीतार आर्याः करुणवेदिनः।
महाप्रसादा ऋजवो दृढभक्ता जितेन्द्रियाः॥
संतुष्टभृत्यसचिवाः कृतज्ञाः प्रियवादिनः।
यथार्हमानार्थकरा ह्रीनिषेवा यतव्रताः॥

नित्यं पर्वसु सुस्नाताः स्वनुलिप्ताः स्वलंकृताः ।
उपवासतपःशीलाः प्रतीता ब्रह्मवादिनः ॥
नैतानभ्युदियात्सूर्यो न चाप्यासन् प्रगेशयाः ।
रात्रौ दधि च सक्तूंश्च नित्यमेव व्यसर्जयन् ॥
कल्यं घृतं चान्ववेक्षन्प्रयता ब्रह्मवादिनः ।
मङ्गल्यान्यपि चापश्यन् ब्राह्मणांश्चाप्यपूजयन् ॥
सदा हि वदतां धर्मं सदा चाप्रतिगृह्णताम् ।
अर्धं च रात्र्याः स्वपतां दिवा चास्वपतां तथा ॥
कृपणानाथवृद्धानां दुर्बलातुरयोषिताम् ।
दयां च संविभागं च नित्यमेवान्वमोदताम् ॥
त्रस्तं विषण्णमुद्विग्नं भयार्तं व्याधितं कृशम् ।
हृतस्वं व्यसनार्तं च नित्यमाश्वासयन्ति ते ॥
धर्ममेवान्ववर्तन्त न हिंसन्ति परस्परम् ।
अनुकूलाश्च कार्येषु गुरुवृद्धोपसेविनः ॥
पितृदेवातिथींश्चैव यथावत्तेष्वपूजयन् ।
अवशेषाणि चाश्नन्ति नित्यं सत्यतपोधृताः ॥
नैकेऽश्नन्ति सुसंपन्नं न गच्छन्ति परस्त्रियः ।
सर्वभूतेष्ववर्तन्त यथात्मनि दयां प्रति ॥
नैवाकाशे न पशुषु वियोनौ न च पर्वसु ।
इन्द्रियस्य विसर्गं ते रोचयन्ति कदा च न ॥
नित्यं दानं तथा दाक्ष्यमार्जवं चैव नित्यदा ।
उत्साहोऽथानहंकारः परमं सौहृदं क्षमा ॥
सत्यं दानं तपः शौचं कारुण्यं वागनिष्ठुरा ।
मित्रेषु चानभिद्रोहः सर्वं तेष्वभवत्प्रभो ॥

Digitized by Google

निद्रा तन्द्री रसं प्रीतिरसूयाथानवेक्षिता ।
अरतिश्च विषादश्च स्पृहा चाप्यविशन्न तान् ॥
इति तेषां सुशीलतां स्वनिवासहेतुमभिधाय ।
ततः कालविपर्यासे तेषां गुणविपर्ययात् ॥
अपश्यन्निर्गतं धर्मं कामक्रोधवशात्मनाम् ।
सभासदानां वृद्धानां सतां कथयतां कथाः ॥
प्राहसन्नभ्यसूयंश्च सर्ववृद्धान् गुणावराः ।
युवानश्च समासीना वृद्धानपि गतान्सतः ॥
नाभ्युत्थानाभिवादाभ्यां यथापूर्वमपूजयन् ।
वर्तयत्येव पितरि पुत्रः प्रभवते तथा ॥
अभृत्या भृत्यतां प्राप्य ख्यापयन्त्यनपत्रपाः ।
तथा धर्मादपेतेन कर्मणा गर्हितेन ये ॥
महतः प्राप्नुवन्त्यर्थांस्तेषां तत्राभवत्स्पृहा ।
उच्चैश्चाभ्यवदन् रात्रौ नीचैस्तत्राग्निरज्वलत् ॥
पुत्राः पितॄनत्यचरन्नार्यश्चात्यचरन् पतीन् ।
मातरं पितरं वृद्धमाचार्यमतिथिं गुरुम् ॥
गुरुत्वान्नाभ्यनन्दन्त कुमारान्नान्वपालयन् ।
भिक्षां बलिमदत्त्वा च स्वयमन्नानि भुञ्जते ॥
अनिष्ट्वा संविभज्याथ पितृदेवातिथीन् गुरून् ।
न शौचमन्वरुध्यन्त तेषां सूदजनास्तथा ॥
मनसा कर्मणा वाचा भक्ष्यमासीदनावृतम् ।
विप्रकीर्णानि धान्यानि काकमूषिकभोजनम् ॥
अपावृतं पयोऽतिष्ठदुच्छिष्टाश्चास्पृशन् घृतम् ।

कुद्दालं दात्रपिटकं प्रक्षीणं कांस्यभाजनम् ॥
द्रव्योपकरणं सर्वं नान्ववैक्षत्कुटुम्बिनी ।
प्राकारागारविध्वंसान्न स्म ते प्रतिकुर्वते ॥
नाद्रियन्ते पशून्बध्वा यवसेनोदकेन च ।
बालानां प्रेक्षमाणानां स्वयं भक्ष्यमभक्षयन् ॥
तथा भृत्यजनं सर्वमसंतर्प्य च दानवाः ।
पायसं कृसरं मांसमपूपानथ शष्कुलीः ॥
अपाचयन्नात्मनोऽर्थे वृथा मांसान्यभक्षयन् ।
उत्सूर्यशायिनश्चासन् सर्वे चासन्प्रगेशयाः ॥
अवर्तन्कलहाश्चात्र दिवारात्रं गृहे गृहे ।
अनार्याश्चार्यमासीनं पर्युपासन्न तत्र ह ॥
आश्रमस्थान् विधर्मस्थाः प्राद्विषन्त परस्परम् ।
संकराश्चाभ्यवर्तन्त न च शौचमवर्तत ॥
ये च वेदविदो विप्रा विस्पष्टमनृचश्च ये ।
निरन्तरविशेषास्ते बहुमानावमानयोः ॥
हारमाभरणं वेषं गतं स्थितमवेक्षितम् ।
असेवन्त भुजिष्या वै दुर्जनाचरितं विधिम् ॥
स्त्रियः पुरुषवेषेण पुंसः स्त्रीवेषधारिणः ।
क्रीडारतिविहारेषु परां मुदमवाप्नुवन् ॥
प्रभवद्भिः पुरा दायानर्हेभ्यः प्रतिपादितान् ।
नाभ्यवर्तन्त नास्तिक्याद्वर्तन्तः संभवेष्वपि ॥
मित्रेणाभ्यर्थितं मित्रमर्थे संशयिते क्व चित् ।
बालकोट्यग्रमात्रेण स्वार्थेनाघ्नत तद्वसु ॥

Digitized by Google

परस्वादायिनो विप्रास्त्यक्तधर्मव्यवहारिण: ।
अदूषयन्ताथवर्णेषु शूद्राश्चापि तपोधना: ॥
अधीयते ऽव्रता: केचिद्वृथाव्रतमथापरे ।
अशुश्रूषुर्गुरो: शिष्य: कश्चिच्छिष्यसखो गुरु: ॥
पिता चैव जनित्री च श्रान्तौ वृत्तोत्सवाविव ।
अप्रभुत्वे स्थितौ वृद्धावन्नं प्रार्थयत: सुतान् ॥
तत्र वेदविद: प्राज्ञा गाम्भीर्ये सागरोपमा: ।
कृष्यादिष्वभवन्सक्ता मूर्खा: श्राद्धान्यभुञ्जत ॥
प्रात: प्रातश्च सुप्रश्नं कल्पनं प्रेष्यक्रिया ।
शिष्या न प्रहितास्तेषामकुर्वन् गुरव: स्वयम् ॥
श्वश्रूश्वशुरयोरग्रे वधू: प्रेष्यानशासत ।
अन्वशासच्च भर्तारं समाहूयाभिजल्पति ।
प्रयत्नेनापि चारक्षच्चित्तं पुत्रस्य वै पिता ।
व्यभजंश्चापि संरम्भाद्दु:खवासं तथावसत् ।
अग्निदाहेन चौरैर्वा राजभिर्वा हृतं धनम् ॥
दृष्ट्वा द्वेषात्प्राहसन्त सुहृत्संभाविता ह्यपि ।
कृतघ्ना नास्तिका: पापा गुरुदाराभिमर्षिण: ॥
अभक्ष्यभक्षणरता निर्मर्यादा हतत्विष: ।
तेष्वेवमादीनाचारानाचरत्सु विपर्यये ॥
नाहं देवेन्द्र वत्स्यामि दानवेष्विति मे मति: ।
तन्मां स्वयमनुप्राप्तामभिनन्द शचीपते ॥

इत्यनेन तेषां स्ववैराग्यहेतुं दुराचारमभिधाय तान् परित्यज्य शक्रान्तिकं प्राप्ता शक्रेण प्रमादपूर्वकं परिगृहीतेति । अतश्च पूर्वप्रकरणपठितानामवश्यमनुष्ठानार्हता अत्र पठितानां सर्वथा त्याज्यता

स्पष्टमेव लभ्यते । अत एवैतादृशशीलवतां दुर्गे ऽपि क्लेशाभावः प्रदर्शितः ।

युधिष्ठिर उवाच ।

क्लिश्यमानेषु भूतेषु तैस्तैर्भावैस्ततस्ततः ।
दुर्गाण्यतितरेद्येन तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

आश्रमेषु यथोक्तेषु यथोक्तं ये द्विजातयः ।
वर्तन्ते संयतात्मानो दुर्गाण्यतितरन्ति ते ॥
प्रत्याहुर्नोच्यमाना ये न हिंसन्ति च हिंसिताः ।
प्रयच्छन्ति न याचन्ते दुर्गाण्यतितरन्ति ते ॥
वासयन्त्यतिथीन्नित्यं नित्यं ये चानसूयकाः ।
नित्यं स्वाध्यायशीलाश्च दुर्गाण्यतितरन्ति ते ॥
मातापित्रोश्च ये वृत्तिं वर्तन्ते धर्मकोविदाः ।
वर्जयन्ति दिवा स्वप्नं दुर्गाण्यतितरन्ति ते ॥
ये वा पापं न कुर्वन्ति कर्मणा मनसा गिरा ।
निक्षिप्तदण्डा भूतेषु दुर्गा० ॥
ये न लोभान्नयन्त्यर्थान् राजानो रजसान्विताः ।
विषयान् परिरक्षन्ति दुर्गा० ॥
स्वेषु दारेषु वर्तन्ते न्यायवृत्तिमृतावृतौ ।
अग्निहोत्रपराः सन्तो दुर्गा० ॥
आहवेषु च ये शूरास्त्यक्त्वा मरणजं भयम् ।
धर्मेण जयमिच्छन्ति दुर्गाण्यतितरन्ति ते ॥
ये वदन्तीह सत्यानि प्राणत्यागेप्युपस्थिते ।
प्रमाणभूता भूतानां दुर्गा० ॥
कर्माण्यकुहकार्थानि येषां वाचश्च सूनृताः ।

येषामर्थाश्च संबद्धा दुर्गा० ॥
अनध्यायेषु ये विप्राः स्वाध्यायं नैव कुर्वते ।
तपोनिष्ठाः सुतपसो दुर्गा० ॥
ये तपश्च तपस्यन्ति कौमारब्रह्मचारिणः ।
विद्यावेदव्रतस्नाता दुर्गा० ॥
ये च संशान्तरजसः संशान्ततमसश्च ये ।
सत्वे स्थिता महात्मानो दुर्गा० ॥
येषां न कश्चित्त्रसति न त्रसन्ति हि कस्य चित् ।
येषामात्मसमो लोको दुर्गा० ॥
परश्रिया न तप्यन्ति ये सन्तः पुरुषर्षभाः ।
ग्राम्यादर्थान्निवृत्ताश्च दुर्गा० ॥
सर्वान्देवान्नमस्यन्ति सर्वधर्मांश्च शृण्वते ।
ये श्रद्दधानाः शान्ताश्च दुर्गा० ॥
ये न मानित्वमिच्छन्ति मानयन्ति च ये परान् ।
मान्यमानान्नमस्यन्ति दुर्गा० ॥
ये च श्राद्धानि कुर्वन्ति तिथ्यां तिथ्यां प्रजार्थिनः ।
सुविशुद्धेन मनसा दुर्गाण्यतितरन्ति ते ॥
ये क्रोधं संनियच्छन्ति क्रुद्धान् संशमयन्ति च ।
न च कुप्यन्ति भूतानां दुर्गाण्यतितरन्ति ते ॥
मधु मांसं च ये नित्यं वर्जयन्तीह मानवाः ।
जन्मप्रभृति मद्यं च दुर्गा० ॥
यात्रार्थं भोजनं येषां सन्तानार्थं च मैथुनम् ।
वाक्सत्यवचनार्थाय दुर्गा० ॥

ईश्वरं सर्वभूतानां जगतः प्रभमव्ययम् ।
भक्त्या नारायणं देवं दुर्गाण्यतितरन्ति ते ॥

इति ग्रन्थेन ।

एवमस्य श्रुत्यादिधर्मैकदम्भस्य शीलपर्यवसायिनो लोकेन नितरां प्रशस्यमानस्य स्वर्गसाधनस्य मोक्षफलकत्वमप्युक्तं गौतमेन । द्वौ लोके धृतव्रतौ राजा ब्राह्मणश्च बहुश्रुत इत्युक्त्वा स एव बहुश्रुतो भवति वाकोवाक्येतिहासपुराणविदष्टचत्वारिंशता संस्कारैः संस्कृत इत्यभिधाय के तेऽष्टचत्वारिंशत्संस्कारा इत्यपेक्षायां गर्भाधानं पुंसवनमित्यादिचत्वारिंशत्संस्कारस्वरूपमभिधायाथाष्टावात्मगुणा दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति मानसाष्टगुणानुक्त्वा यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणा न स ब्रह्मणः सालोक्यं सायुज्यं च गच्छति यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्रह्मणः सालोक्यं सायुज्यं च गच्छति गच्छतीति वदता । तत्र दम्भेन क्रियमाणानामेषां धर्मत्वाभावो भगवता प्रदर्शितः ।

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥

मिथ्यात्वं चाचारे फलासंपादकत्वेनैव । इन्द्रियार्थानित्युपलक्षणम् । यश्च दयादीन्स्वर्गसाधनत्वेन निश्चित्य सेवते तेषां स्वर्गोऽपि सुलभ एवोपदर्शितप्रमाणेभ्यः । यस्तु केवलं धर्मबुद्ध्या तज्जन्यफलमननुसंधायाचरति तस्य गौतमोक्तं मोक्षरूपं फलम् । अस्यैव च बुद्धिमत्त्वं प्रदर्शितं भगवता ।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ इति ।

न चैतावता कर्ममात्रस्य हेयत्वमुक्तमिति भ्रमितव्यम् ।

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ इति ।

तेनैव ज्ञानिनोऽपि कर्मावश्यकत्वाभिधानात् । अन्ते च त्यागस्वरूपनिरूपणावसरे ।

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥

इत्युक्त्वा ।

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः परिकीर्तितः ॥
यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ इति ।

स्वमतोपन्यासपूर्वकं ।

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥

इति कर्मत्यागं विनिन्द्य ।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ इति ।

तत्फलाभिसन्धित्यागस्यैव प्रशंसनात् । कामक्रोधलोभानां च स्पष्टमेव पापहेतुतां भगवानेवाह ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ इति ।

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

इत्यर्जुनप्रश्ने ।

काम एष क्रोध एष रजोगुणसमुद्भवः ।

इति प्रभृति ।

पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥

इत्यनेन च ग्रन्थेन । अत एव च दयादीनां दिव्यसंपत्त्वेन क्रोधादीनामसुरसंपत्त्वेन च परिगणनं स एव चकार ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।

अज्ञानं चाभिजातस्य पार्थ संपदमासुरीमिति ॥

तयोः फलं च तेनैव प्रकाशितम् ।

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ॥ इति ।

बन्धमोक्षजनने क्रमश्च तेनैव दर्शितः ।

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।

सङ्गात्संजायते कामः कामात्क्रोधोभिजायते ॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।

स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।

आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।

प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।

न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ इति ।

ईदृशदिव्यसंपत्संपन्नस्यैव च भगवत्प्रियत्वं भगवतैवोक्तम् ।

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।

निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।

मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।

हर्षामर्षभयक्रोधैर्मुक्तो यः स च मे प्रियः ॥

निरपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।

सर्वारम्भफलत्यागी यो मद्भक्तः स मे प्रियः ॥

Digitized by Google

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥
तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केन चित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ इति ।

एतेषामेव च फलानाकाङ्क्षया क्रियमाणानां सात्त्विकत्रिविधतपस्त्वमपि ।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ इति ।

अहंकारकामक्रोधादित्यागेन च मुक्तिरित्याह ।

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ इति ।

साम्यस्य चाक्षय्यसुखजनकतोक्ता ।

इहैव तैर्जितः स्वर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ इति ।

भगवत्प्रीतिप्रयोजकानामद्वेषादीनामेव मोक्षप्रयोजकत्वमित्याह ।

Digitized by Google

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहंकार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं ज्ञानतत्त्वार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥ इति।

एतादृशस्य ज्ञानस्य भगवद्भक्त्येकलभ्यत्वं भक्तिस्वरूपं चाह स एव।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ इति।

इयं च भक्तिः सा परानुरक्तिरीश्वरे इति शाण्डिल्येनाभिहिता। परानुरक्तिश्च परमेश्वरास्वभेदेनानुसंधानमिति न ज्ञानभक्तिशास्त्रयोर्विरोधः। अत एवोक्तं श्रीमद्भागवते।

भक्तिः परेशानुभवो विरक्तिरन्यत्र चैतत्त्रिक एककालः॥ इति।

ईदृशी च भक्तिः सकलपापनाशे सत्येव भवतीत्याह।

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः॥ इति॥

अनयैव च मोक्षप्रतिबन्धकमायानिवृत्तिः। याऽविद्येति मिथ्यादृष्टिरिति प्रकृतिरिति च विविधैः शब्दैः शास्त्रकारैरुक्ता।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति ।

मूढानां भगवत्स्वरूपस्य यथार्थज्ञानं न भवतीत्याह ।

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् । इति ॥

तेषां च श्रद्धाविरहितानां संसारान्मुक्तिर्नास्तीत्याह ।

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारसागरे ॥ इति ।

श्रद्धालोश्च योग्यापेक्षयाप्युत्कृष्टत्वमित्याह । अ॰ ६

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ इति ॥

दुराचारस्यापि भगवद्भक्तस्याचिरेण साधुत्वसम्पत्तिरित्याह॰ । अ॰ ९

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३० इतिः ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ ३१ ॥
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ ३२ इति ॥

भक्त्या दत्तस्याल्पस्यापि भगवत्प्रियत्वमित्याह । अ॰ ९

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ इति ॥

भगवत्प्राप्तावपुनरावृत्तिरूपो मोक्ष इति चाह । अ॰ ८

Digitized by Google

अनन्यचेता: सततं यो मां स्मरति नित्यश: ।
तस्याहं सुलभ: पार्थ नित्ययुक्तस्य देहिन: ॥ १४ ॥
मामुपेत्य पुनर्जन्म दु:खालयमशाश्वतम् ।
नाप्नुवन्ति महात्मान: संसिद्धिं परमां गता: ॥ १५ ॥
आब्रह्मभुवनाल्लोका: पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते । १६ इति ।

अस्यैव सकलधर्मेभ्य उत्तमत्वं व्यासशुकसंवादेन निश्चीयते ।
मोक्षधर्मे । अ· २४६

शुक उवाच ।

यस्माद्धर्मात्परो धर्मो विद्यते नेह कश्चन ।
यो विशिष्टश्च धर्मेभ्यस्तं भवान् प्रब्रवीतु मे ॥

व्यास उवाच ।

धर्मं ते संप्रवक्ष्यामि पुराणमृषिभि: कृतम् ।
विशिष्टं सर्वधर्मेभ्यस्तमिहैकमना: शृणु ॥
इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य यत्नत: ।
सर्वतो निष्पति[1]ष्णूनि पिता बालानिवात्मजान् ॥
मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं परमं तप: ।
तज्ज्याय: सर्वधर्मेभ्य: स धर्म: पर उच्यते ॥
तानि सर्वाणि संधाय मन:षष्ठानि मेधया ।
आत्मतृप्त इवासीत बहु चिन्त्यमचिन्तयन् ॥
गोचरेभ्यो निवृत्तानि यदा स्थास्यन्ति वेश्मनि[2] ।
तदा त्वमात्मनात्मानं परं द्रक्ष्यसि शाश्वतम् ॥

१ प्रसरणशीलानि । २ अन्तरात्मनि ।

सर्वात्मानं महात्मानं विधूममिव पावकम् ।
तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ॥
यथा पुष्पफलोपेतो बहुशाखो महाद्रुमः ।
आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलम् ॥
एवमात्मा न जानीते क्व गमिष्ये कुतस्त्वहम् ।
अन्यो ह्यात्माऽन्तरात्माऽस्ति यः सर्वमनुपश्यति ॥
ज्ञानदीप्तेन दीप्तेन पश्यत्यात्मानमात्मना ।
दृष्ट्वा त्वमात्मनात्मानं निरात्मा भव सर्ववित् ॥
विमुक्तः सर्वपापेभ्यो मुक्तत्वच इवोरगः ।
परां बुद्धिमवाप्येह विपाप्मा विगतज्वरः ॥
सर्वतःस्रोतसं घोरां नदीं लोकप्रवाहिणीम् ।
पञ्चेन्द्रियग्राहवतीं मनःसंकल्परोधसम् ॥
लोभमोहतृणच्छन्नां कामक्रोधसरीसृपाम् ।
सत्यतीर्थामृतक्षोभां क्रोधपङ्कां सरिद्वराम् ॥
अव्यक्तप्रभवां शीघ्रां दुस्तरामकृतात्मभिः ।
प्रतरस्व नदीं बुद्ध्या कामग्राहसमाकुलाम् ॥
संसारसागरगमां योनिपातालदुस्तराम् ।
आत्मजन्मोद्भवां तात जिह्वावर्तां दुरासदाम् ॥
यां तरन्ति कृतप्रज्ञा धृतिमन्तो मनीषिणः ।
तां तीर्णः सर्वतो मुक्तो विधूतात्मात्मविच्छुचिः ॥
उत्तमां बुद्धिमास्थाय ब्रह्मभूयान् भविष्यसि ।
संतीर्णः सर्वसंसारात् प्रसन्नात्मा विकल्मषः ॥
भूमिष्ठानीव भूतानि पर्वतस्थो निशामय ।

अक्रुध्यन्नप्रहृष्यंश्च न नृशंसमतिस्तथा ॥
ततो दृष्ट्वापि सर्वेषां भूतानां प्रभवाप्ययौ ।
एनं वै सर्वभूतेभ्यो विशिष्टं मेनिरे बुधाः ॥
धर्मं धर्मभृतां श्रेष्ठा मुनयस्तत्त्वदर्शिनः ।
आत्मनो व्यापिनो ज्ञानमिदं पुत्रानुशासनम् ॥
प्रयताय प्रवक्तव्यं हितायानुगताय च ।
आत्मज्ञानमिदं गुह्यं सर्वगुह्यतमं महत् ॥
अब्रुवं यदहं तात आत्मसाक्षिकमञ्जसा ।
नैव स्त्री न पुमानेतन्नैव चेदं नपुंसकम् ।
अदुःखमसुखं ब्रह्म भूतभव्यभवात्मकम् ॥
नैतज्ज्ञात्वा पुमान् स्त्री वा पुनर्भवमवाप्नुते ।
अभवप्रतिपत्त्यर्थमेतद्धर्मं विधीयते । इति ॥

इत्थं च श्रुत्यादिधर्माणां चित्तशुद्ध्येकनिदानभूतानामिह लौकिककीर्त्तिविश्वास्यतादिसाधनतया पारलौकिकस्वर्गादिसाधनतया च भगवत्प्रीतिप्रयोजकतया च सर्वैरेव कृतज्ञतरतदाश्रयणीयं यथायथं स्वर्गप्रभृतिमोक्षावधिफलप्राप्तिस्पृहयालुभिरासादिताभिलषितैर्भूयतइति तदिमे धर्मा अवश्यमाश्रयणीया निरसनीयाश्च कामादयो वैरिणः परपदप्राप्तेराश्रित्य चेमान् धर्मान् क्रमेण त्यक्ततज्जन्यफलाभिलाषैः

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ।

इति भगवद्वचने विश्वस्य स्वस्वयोग्यतानुसारेण श्रुतिस्मृतिपुराणाद्यतमपर्यालोचनसंपादितभगवत्स्वरूपयाथार्थ्यज्ञानैरनित्यमापातरमणीयं विसृज्य संसारसागरमाश्रित्याऽपारकरुणानिधानस्य परमेश्वरस्य चरणौ निरत्ययमानन्दमयं तत्पदं प्राप्तुं सर्वथा यतनीयमिति सिद्धम् ॥

इत्थं मनुप्रभृतिमान्यमुनीन्द्रसूक्तीः
संगृह्य सर्वसुलभं सुकृतं विधातुम् ।
काशीस्थसंस्कृतसमाजसभासहायो
गङ्गाधरोऽकृत सनातनधर्मदीपम् ॥ १ ॥

विलेख्यमन्यच घृतं क्व चिद्यत्तदेकसंदर्भवियोगभीत्या ।
उपेक्षितोऽभूत्पुनरुक्तिदोषो विबोधसौकर्यमपेक्ष्य चात्र ॥ २ ॥

प्रकाशयन्धर्मपथं निगूढं कृता[1]र्थतां यः श्रयतां तनोति ।
उदित्वरो भारतदुग्धसिन्धोः स शीलचिन्तामणिरेष जीयात् ॥ ३ ॥

अपू[2]र्वधर्मोत्सुकमानसैर्मे विनिन्द्यतां नाम खलैः प्रबन्धः ।
शशीव सद्भ्यः कुमु[3]दं विवृण्वन् दिशेदवश्यं शशिकान्तशैलीम् ॥ ४ ॥

पदा[4]दि दूष्या[5]ण्यपि मण्डयन्तो बुधा[6]वृताः प्रौढगुणा[7]स्वभावाः ।
जला[8]शयोत्थानि वचांसि सन्तः पटाः पयांसीव विशोधयन्तु ॥ ५ ॥

इति शाश्वतधर्मदीपिका समाप्ता ।

बालानां भारतकथाबोधार्थं मङ्गलाय च ।
धर्माचारेण कल्याणप्राप्तेर्दृष्टान्तदित्सया ॥
बहुच भारतीयानां विषयाणां निबन्धनात् ।
इह संबन्धबोधार्थं संक्षेपेणोच्यते कथा ॥ २ ॥

पाण्डुर्नामाभवद्राजा कुरुवंशे गुणोज्ज्वलः ।
मुनिशापादसौ त्यक्त्वा राज्यं वनमवाप ह ॥

१ प्राप्तेष्टप्रयोजनतां प्राप्तधनतां च । २ अधर्मोत्सुकैः अपूर्वं किमत्र प्रतिपादितमित्याक्षिपद्भिश्च । ३ कुवलयं भूमण्डलोत्सवं च । ४ सुबन्तानि तिङन्तानि च । स्थानानि च । ५ दूषणार्हाणि । वस्त्रवेश्मानि च । ६ विद्वद्भिर्युक्ताः प्रावृताश्च । ७ तन्तुमयाः । ८ शीलवन्तश्च । सरस उद्धृतानि । जडहृदयोक्तानि च ।

कुन्ती माद्री च पत्न्यौ द्वे तेन सार्द्धं वनं गते ।
पुत्रार्थं तप्यमानस्य तस्य प्रियविधित्सया ॥
कुन्ती मन्त्रैराजुहाव धर्मानिलपुरन्दरान् ।
युधिष्ठिरं भीमसेनमर्जुनं चापि तैः सुतान् ॥
नकुलं सहदेवं च लेभे माद्री तथाऽश्विनोः ।
अप्राप्तयौवनेष्वेषु कदा चित्पाण्डुभूपतिः ॥
माद्रीं कामात्परिष्वज्य ममार मुनिशापतः ।
माद्यामनुमृतायां तु कुन्तीं पञ्चसुतावृताम् ॥
हस्तिनापुरमानैषुस्तदाश्रमनिवासिनः ।
तत्र तेषां पितृव्येण धृतराष्ट्रेण यत्नतः ॥
वर्द्धितानां गुणवतां द्विषोऽभूवन् पितृव्यजाः ।
शतं दुर्योधनमुखा अद्रुह्यंश्च मुहुर्मुहुः ॥
भीष्मः पितामहस्तेषां धनुर्वेदाप्तये कृपम् ।
न्ययुङ्क्त कृतविद्यांस्तान्द्रोणाचार्याय चार्पयत् ॥
पाण्डवान् धार्तराष्ट्रांश्च धनुष्पारं गतान् गुरुः ।
द्रुपदं जयतेत्याह बलाज्जिग्येऽर्जुनेन सः ॥
कर्णो नाम रवेः पुत्रो दुर्योधनसखोऽभवत् ।
शकुनिर्मातुलश्चास्य पाण्डवानभ्यसूयत ॥
दुर्योधनो भीमसेनं कदा चिद्बलिनां वरम् ।
छलाद्धृत्वा विषं सर्पैर्दंशयित्वा जलेऽमुचत् ।
स वासुकिगृहं प्राप्य पीत्वाऽमृतमुपागतः ।
नागायुतसमप्राणोऽधिकं तान् दुःखिनोऽकरोत् ॥
अथ पाण्डवघातार्थं धृतराष्ट्रः स्वसूनुभिः ।

नोनुद्यमानो भ्रातृभ्याम् प्रैषयद्वारणावते ॥
पितृव्यो विदुरस्त्वेषां पुरोचनविनिर्मितम् ।
जातुषागारमस्तीति म्लेच्छाद्युपगिराऽवदत् ॥
जागरूकोऽभवत्तच्च विज्ञायैतद्युधिष्ठिरः ।
भीमस्तु निशि कस्यां चिद्दीपयित्वा तमालयम् ॥
स भ्रातृमातृकोऽयासीद्विदुरोक्तसुरङ्गया ।
वने सुप्तानमून् रक्षन् हिडिम्बाख्येन रक्षसा ॥
युध्वैनं मारयामास तत्स्वसुस्त्वभवत्पतिः ।
घटोत्कचं सुतं चास्यां जनयामास राक्षसम् ॥
ततः पुरीमेकचक्रां ययुस्ते जननीसुताः ।
कं चित्कालं च तत्रोषुर्ब्राह्मणच्छद्मसंवृताः ॥
कदा चित्तत्र शोचन्तं कुन्ती वीक्ष्य द्विजोत्तमम् ।
शोककारणमप्राक्षीदसौ चाकथयत्ततः ॥
पुरोऽस्या निकटे क्रव्याद् बकनामास्ति भीषणः ।
तस्मै नागरिकैर्देयः क्रमेण नरवान् बलिः ॥
स वारोऽद्य मम प्राप्तः सुतश्चैकोऽस्ति मे शिशुः ।
तं मोक्तुं नोत्सहे तेन सीदामि सुतरामिति ॥
कुन्ती तमाह मत्पुत्रो बलिरस्य भवेदिति ।
अस्वीकुर्वति तद्विप्रे पुनः सैनं व्यजिज्ञपत् ॥
मम सन्ति सुताः पञ्च द्वितीयो मन्त्रविद्धिमान् ।
असंशयं बकं हन्यादिदं गोप्यं भवत्विति ॥
प्रतिपद्य प्रहृष्टेऽस्मिन्भीमसेनमुवाच सा ।
याह्यरण्यं बकं हन्तुं पातु ब्राह्मणबालकम् ॥

युधिष्ठिरस्तमवोचत्तां किमिदं विहितं त्वया ।
घातयित्वा सुतं रक्षा परस्याधर्मकारणम् ॥
कुन्त्यब्रवीत्तं मा वादीर्धर्म्यो विप्रस्य रक्षणम् ।
वयं सुखोषितास्तस्य तं हत्वा भीम एष्यति ॥
इति तं बोधयित्वासौ भीमं प्रेरयदुन्मदम् ।
स गत्वा विपिनं रक्षो हतवान् नगरार्तिदम् ॥
अथ तत्र वसन्तस्ते श्रुत्वा द्रुपदमन्दिरे ।
वीर्यशुल्कां सुतोद्वाहं ययुर्धौम्यपुरोहिताः ॥
प्राप्य तन्नगरं गेहे कुलालस्यावसन् क्व चित् ।
आययुस्तत्र राजानो नानादिग्भ्यः सहस्रशः ॥
दुर्योधनाद्याः कृष्णाद्याः स्वयंवरदिदृक्षया ।
स्वयंवरे समेतांस्तानवादीद्द्रुपदात्मजः ॥
सज्यं कृत्वा धनुरिदं बाणैर्लक्ष्यं भिनत्ति यः ।
तस्मै देया स्वसा मेऽद्य तद्यतध्वं नृपोत्तमाः ॥
श्रुत्वैतदुत्थिताः के चिन्न शेकुश्चापकर्षणे ।
के चिदुत्थापने यत्ता जानुभ्यामवनीं गताः ॥
कर्णे तत्कर्तुमनसि धृष्टद्युम्नोऽवदद्वचान् ।
संबन्धार्हो न सूतत्वाच्छ्रुत्वेदं स न्यवर्तत ॥
अथार्जुनो ब्रह्मवृन्दादुत्थाय कृतवान् धनुः ।
सज्यं विध्याथ लक्ष्यं च लेभे च द्रुपदात्मजाम् ॥
युद्धाय संस्थितान् राज्ञो दुर्योधनमुखानसौ ।
सभीमोऽवारयद्दोषान्विवेक इव सागमः ॥
अथानीय द्रुपदजां स्ववेश्म कुरुपुङ्गवाः ।
मात्रेऽर्पयन्नुवाचैषा सर्वं भुङ्क्ष्वमिमामिति ॥

एकस्या बहुपत्नीत्वं कथं स्यादिति संशये ।
व्यासोऽवदद्वराच्छंभोर्नाच दोषो भवेदिति ॥
तच्छ्रुत्वा द्रुपदो वाक्यं सर्वपत्नीं चकार ताम् ।
धृतराष्ट्रोपि तद्राज्यमिन्द्रप्रस्थे व्यवर्णयत् ॥
तच तान्नारदोऽभ्येत्य कथां सुन्दोपसुन्दयोः ।
वर्णयन्नवदत्प्रेम्णा मा वो भूत्स्त्रीकृते कलिः ॥
ते प्रत्यशृण्वन्नेकैकं प्रतिवर्षं सहानया ।
तिष्ठत्स्वस्मासु यः पश्येत्स चरेद्वायनं व्रतम् ॥
श्रुत्वेतन्नारदे हृष्टे याते धामर्जुनो नृपम् ।
कदा चिद्वीक्ष्य सस्त्रीकं वनयानोत्सुकोऽभवत् ॥
युधिष्ठिरः स्नेहपाशैर्बद्धः सत्यमयैश्च तैः ।
न मोक्तुं न निषेद्धुं च पारयन्विह्वलोऽभवत् ॥
कृच्छ्रेण लब्धानुमतिर्वनं गत्वार्जुनोऽप्यथ ।
उलूपीं चोलतनयां चोपयेमे स्मरार्दिताम् ॥
सुभद्रां द्वारकापुर्या जहार भगिनीं हरेः ।
चांर्योव्रतश्चाभिमन्युमलब्धास्यां समं हरेः ॥
युधिष्ठिराद्याः क्रमशो द्रौपद्यां लेभिरे सुतान् ।
स्वसमानसमांल्लोके महाभूतान् गुणा इव ॥
कदा चित्कृष्णसहितो यमुनामर्जुनो ययौ ।
ग्रीष्मे जलविहारार्थं तचाद्राक्षीच्च तापसम् ॥
याचमानेऽशनं तस्मिन्प्रतिश्रुत्य जगाद तम् ।
को भवानिति सोप्याह खाण्डवार्थ्यस्मि पावकः ॥
ततोऽर्जुनो मुदा युक्तो गाण्डीवमिषुधी रथम् ।
प्राप्यास्मात्तं दहेत्यूचे वारयिष्यन्पुरन्दरम् ॥

वनं दहति शक्रोऽस्मिन्नवर्षत्तत्त्वकप्रियः ।
छत्रीकृत्य शरव्रातं तच्चावारयदर्जुनः ॥
सुरैः साकं युध्यमानं विजित्येन्द्रं सबालकाम् ।
तक्षकस्त्रीं प्रचिच्छेद बालस्तस्या व्यमुच्यत ॥
मयं शरणमापन्नमरक्षद्दाहसंकटात् ।
प्रीतो वन्हिश्च दत्ताशीर्ययो तौ चापतुः पुरीम् ॥
मयः सभां मणिमयीं युधिष्ठिरकृतेऽकरोत् ।
तत्र तं राजसूयेन यष्टुं प्रोवाच नारदः ॥
स च संमन्त्र्य कृष्णेन कृष्णं भीमार्जुनौ तथा ।
जरासन्धवधार्थाय मगधान्प्राहिणोन्नृपः ॥
स्नातकच्छद्मना गत्वा ते चाभिचन्त तं रणम् ।
भीमेन स चिरं युद्ध्वा हतोऽभूत्तत्सुतश्च राट् ॥
हृष्टेषु स्वपुरीं प्राप्तेष्वेषु राजा दिशां जये ।
भ्रातॄन् विससृजे ते च निर्जिग्युः सर्वराजकम् ॥
अथ राजा राजसूये सम्यक् सन्तर्प्य देवताः ।
भीष्मानुमत्या तस्यान्ते वासुदेवमपूजयत् ॥
शिशुपालोऽसहन्नेतदश्लीलं व्याहरन्वचः ।
कृष्णचक्रेण चक्रेऽसौ वैवस्वतपुरातिथिः ॥
दुर्योधनो मणिमयीं सभामेतां विलोकयन् ।
पपात स्खलितो भ्रान्त्या ततो द्रुपदजाऽहसत् ॥
तेन मानी दूयमानो मर्तुकामो न्यवार्यत ।
द्यूते धर्मात्मजं निःस्वं पश्येति शकुनेर्गिरा ॥
अथ पित्रा स संमन्त्र्य छलेनानाय्य धर्मजम् ।
द्यूतमारभ्य शकुनिः सर्वादस्याहरद्धनम् ॥

हृतराज्यो दैवबलाद्भ्रातॄन् पत्नीं च स ग्लहम् ।
कुर्वन्व्यजीयतात्मानं तथा कुर्वन् पणात्पुनः ॥
दुःशासनो द्रुपदजामथ स्त्रीधर्मिणीं सदः ।
भ्रातुर्निदेशादानिन्ये नग्नां कर्तुमियेष च ॥
अथ सभ्येषु मूकेषु सा हरिं शरणार्थिनी ।
चुक्रोश प्रादुरासीच्च वस्त्रपङ्क्तिः सहस्रशः ॥
दुःशासने चिरं कृत्वा वासांसि विरते सति ।
भीमोमुष्य रणे रक्तं पातास्मीत्याह रोषितः ॥
सहस्ततालं कर्णेन हसन्तं च सुयोधनम् ।
अथ तिष्ठेति कृष्णां च दर्शयन्तं स्वसक्थिनी ॥
शशाप द्रौपदी मृत्युस्तवाचैव भवेदिति ।
तदूरुभङ्गं च रणे प्रतिजज्ञे वृकोदरः ॥
अर्जुनश्च रणे कर्णं हन्तास्मीत्यवदन्मुहुः ।
धृतराष्ट्रोऽथ राज्यार्द्धं दत्वा साम्ना प्रसाद्य च ॥
व्यसर्जयद्धर्मसुतं शकुनिः पुनराह्वयत् ।
द्वादशाब्दान्वने वासमज्ञातेश्चैकहायनम् ॥
ग्लहं प्रकल्प्य सोऽदीव्यद्विजिग्ये च युधिष्ठिरम् ।
अथ धर्मात्मजः कुन्तीं विन्यस्य विदुरालये ॥
द्वारवत्यां सुतान् न्यस्य भ्रातृपत्नीसमन्वितः ।
वनं ययौ सत्यरतो रिपुघातक्षमोपि सन् ॥
सहस्रशश्चानुगतान्विप्रानापद्गतोऽप्यसौ ।
सूर्यमाराध्य तद्दत्तपात्र्युत्थान्नैरतर्पयत् ॥
भीमसात्यकिसाम्बाद्यैरनुमन्तुं रिपुक्षयम् ।
याच्यमानोऽपि नैच्छत्केवलं धर्ममाश्रितः ॥

Digitized by Google

काम्यकद्वैतवनयोः सेवमानः शुचीन् मुनीन् ।
उवास धर्मभूयिष्ठाः कथाः शृण्वन्नसौ सुखम् ॥
अथ व्यासाज्ञया राज्ञाऽर्जुनो मुक्तो हिमालयम् ।
गत्वा पाशुपतास्त्राप्त्यै चिरमाराधयच्छिवम् ॥
अथ शंभुः समागत्य किरातच्छद्मसंवृतः ।
नियुध्य तोषितस्तेन स्वात्मानं समदर्शयत् ॥
दत्वा पाशुपतं याते पिनाकभृति मातलिः ।
रथेन तं दिवं निन्ये तत्र दिव्यास्त्रमाप सः ॥
उर्वशीमिन्द्रसंदेशात्कामयानां स चागताम् ।
प्रत्याख्याय तया शप्तः षण्ढः स्या इति खिन्नया ॥
समाश्वासयदिन्द्रस्तं शापोयं वत्स ते मुदे ।
अज्ञातवासे वसतः साह्यायैव भवेदिति ॥
निवातकवचान् हत्वा कालकेयांश्च दानवान् ।
इन्द्रात्प्राप्तास्त्रविद्यायाः सोऽकरोद्गुरुदक्षिणाम् ॥
एवमत्यद्भुतं वृत्तं कुर्वन्वत्सरपञ्चकम् ।
वसन् भ्रातृषु वृत्तं स्वं वक्तुं लोमशमैरयत् ॥
लोमशाद्वृत्तमाकर्ण्य तस्य राजा युधिष्ठिरः ।
तीर्थयात्रां सहानेन चक्रे भ्रातृज्ञायुतः ॥
बदर्याश्रममासाद्य राजर्षेर्वृषपर्वणः ।
दर्शनेन परं तुष्यन् जगाम दिशमुत्तराम् ॥
कदा चिद्द्रौपदी पद्ममालोक्यालोकिकं मुदा ।
तदानेतुं बहुविधं भीमसेनमयाचत ॥
भीमसेनस्तथेत्युक्त्वा व्रजन् पथि हनूमता ।
दृष्टः स्वरूपं संदर्श्य विसृष्टोऽयादुदङ्मुखः ॥

ततः पुष्करिणीं वीक्ष्य सौगन्धिकवतीमसौ ।
अवगाह्यालुनात्पद्मान्यरोधि स च रक्षकैः ॥
अवमत्य वचस्तेषां हरन्पद्मान्ययोधि तैः ।
जघान तांश्च गदया मदयावज्ञितेश्वरः ॥
तान् विजित्य तटे तिष्ठन् ददर्श सघटोत्कचान् ।
भ्रातॄन् सजानीन् द्रौपद्यै ददौ सौगन्धिकानि च ॥
कदा चित्संगरे यक्षान् मणिभद्रं च मारयन् ।
सान्त्वपूर्वं कुबेरेण प्रीयमाणेन तुष्टुवे ॥
अथार्जुनं दिवः प्राप्तमभिनन्द्य कुरूत्तमाः ।
साकं तेन वनं द्वैतं प्रापुः प्रतिपिबाहवाः ॥
दुर्योधनः कदा चित्तान् दर्शयिष्यन् स्वसंपदम् ।
घोषयात्राभिषात्प्राप द्वैतं योधानुवेष्टितः ॥
तत्र रन्तुं सरस्तीरं चित्रसेनः समागतः ।
तद्दुष्टैर्वार्यमाणस्तान् जघान विशिखैः शितैः ॥
प्रद्राव्य कर्णं गन्धर्वो बद्ध्वा दुर्योधनं व्रजन् ।
आहूयतेतरस्त्रीशोकात्सदयैरर्जुनादिभिः ॥
चिरं प्रयुध्य तैरेष जितोऽमुञ्चत्सुयोधनम् ।
भीमादयस्तमानिन्युर्ह्रीऽवामयजसन्निधिम् ॥
कृतापराधमप्येनं तादृशं रिपुमात्मनः ।
युधिष्ठिरः सान्त्वयित्वा मृदुवाक्यैर्व्यसर्जयत् ॥
स तादृशापमानेन स्थितः प्रायोपवेशने ।
शकुन्यादित्यपुत्राभ्यां प्रसाद्यानीयतालयम् ॥
नियुज्य दिग्जये कर्णं वशे कृत्वाऽखिलान्नृपान् ।
स पौण्डरीकमाहृत्य स्वं कृतार्थममन्यत ॥

Digitized by Google

कदा चित्सैन्धवो राजा मृगयार्थं गतो वनम् ।
द्रौपदीं वीक्ष्य कामार्तोऽहरदेकाकिनीं बलात् ॥
पाण्डवा मृगयां कृत्वा प्राप्य गेहं निशम्य तत् ।
दुद्रुवुः पृष्ठतस्तस्य जगृहुस्तं खलं बलात् ॥
भार्यापहारिणं हन्तुं तं भीमे प्रार्थयत्यपि ।
परिहर्तुं स्वसुः शोकं प्रमुमोच युधिष्ठिरः ॥
स दुष्टः शिवमाराध्य जेतुं पाण्डुसुतान् युधि ।
प्रीतादस्माद्वरान्प्राप विनार्जुनपराभवम् ॥
कदा चिदिन्द्रो द्विजवत्कर्णं प्राप्यास्य कुण्डले ।
कवचं चार्थयल्लेभे शक्तिं दत्त्वैकघातिनीम् ॥
तृणबिन्द्वाश्रमे तिष्ठन् धर्मजो हरिणाहृताम् ।
अन्विष्यन्नरणीं प्राप वनं सभ्रातृको घनम् ॥
तृषितेष्वनुजेष्वद्भ्यः सरः प्राप्य पिपासुषु ।
यक्षः पप्रच्छ तान् प्रश्नानवक्षातोऽप्यपातयत् ॥
अन्विष्यंस्तान्धर्मसूनुर्दृष्ट्वा सरसि पातितान् ।
जलमेतन्मृतौ हेतुर्निश्चित्येत्यग्रहीज्जलम् ॥
यक्षस्त्वाह मम प्रश्नानुक्त्वापः पातुमर्हसि ।
नो चेद्भ्रातृपथं याया मम शासनलङ्घनात् ॥
इत्युक्तोऽस्य बहून्प्रश्नान्सद्य उत्तरयन्नसौ ।
वृणीष्वैकमित्युक्तोऽवृणोन्नकुलजीवितम् ॥
भीमार्जुनौ रिपुवधे शक्तौ मुक्त्वा विमातृजम् ।
कथं वरयसीत्युक्तोऽवददेनं युधिष्ठिरः ॥
कुन्तीमाद्र्यौ जनन्यौ मे स्यातां पुत्रान्विते यथा ।
आनृशंस्यात्तथा याचे नकुलस्तेन जीवतु ॥

तुष्टः स तस्य वाक्येन सर्वान्भ्रातॄनजीवयत् ।
अवादीद्वत्स धर्मोऽहं परीक्षार्थं तवागतः ॥
आनृशंस्येन तुष्टस्ते वरान् याचस्व काङ्क्षितान् ।
वर्षे त्रयोदशेऽज्ञातः सानुजस्त्वं चरिष्यसि ॥
इत्युक्त्वान्तर्हिते धर्मे राजा स्वाश्रममाससौ ।
ब्राह्मणायारणीं दत्त्वा विसृज्यासौ च सेवकान् ॥
प्राप्ते त्रयोदशे वर्षे भार्याभ्रातृयुतोऽव्रजत् ।
अज्ञातवासे कृतधीर्विराटनगरं गतः ॥
कङ्काभिधो द्विजो भूत्वा विराटेनार्चितोऽभवत् ।
भीमोऽपि बल्लवः सूदोऽर्जुनः षण्ढो बृहन्नटा ॥
अश्ववारश्च नकुलः सहदेवो गवाधिपः ।
सैरन्ध्र्यभूद्द्रौपदी च राजदारोपसेविनी ॥
राष्ट्रियः कीचको नाम चरन्त्वेष्वेवमेकदा ।
राजदाराज्ञया कृष्णां स्वगृहप्राप्तां वचोऽब्रवीत् ॥
रतये मां भजस्वेति चरितश्चाहनद्रुषम् ।
ततो रहसि सा भीमं प्राहैनं मारयेरिति ॥
तदाज्ञया च तं व्याजाद्दाव्हयन्नर्तनालये ।
कीचकं तत्र स प्राप्तं निशि तूष्णीममारयत् ॥
सैरन्ध्र्युच्चैर्विचुक्रोश गन्धर्वैः स हतस्त्विति ।
शतसंख्यास्तदनुजाः प्राप्याथोद्वीक्ष्य तं मृतम् ॥
श्मशानं सह सैरन्ध्र्या नीत्वा चित्यामदीपयन् ।
सैरन्ध्र्या रुदितैस्तत्राहूतो भीमः शतं रिपून् ॥
हत्वा विमोच्य दयितां प्रीतः प्राप पुनर्गृहम् ।
अथ वार्तामिमां श्रुत्वा धार्तराष्ट्रश्चराहृताम् ॥

निश्चित्य भीमकर्मैतत्सुधर्मा यं खलोऽब्रवीत् ।
याहि वैराटनगरं हर गास्तद्विरक्षया ॥
आगतान्पाण्डवान्दृष्ट्वा कुरु भग्नव्रतानिति ।
तथेत्येत्य स गा हृत्वा बद्ध्वा तद्रक्षकं नृपम् ॥
व्रजन् निगृह्य भीमेन धर्मवाचा व्यमुच्यत ।
ससैन्यो धार्तराष्ट्रश्च विराटनगरोत्तरे ॥
गा जहाराथ वैराटिर्गोपै रक्षामयाच्यत ।
स्त्रीसभे श्लाघमानोऽसौ सूतं कृत्वा बृहन्नलाम् ॥
ततः सेनार्णवं वीक्ष्य भीतः प्राद्रुद्रवद्रुदन् ।
बृहन्नला समाश्वास्य निश्चाय्यात्मानमर्जुनम् ॥
श्मशानस्थशमीवृक्षादवातारयदायुधम् ।
तमेव सारथिं कृत्वा धृतधैर्यं निवाश्ययात् ॥
पूर्णाज्ञातस्थितिदिनो धार्तराष्ट्रैरयुध्यत ।
रिपून्व्यस्तान् समस्तांश्च धुन्वन्प्रस्वापनास्त्रतः ॥
सुप्तान्विवाससः कृत्वा लज्जितान्दययाऽमुचत् ।
परेद्युः पाण्डवास्तीर्णप्रतिज्ञा द्रौपदीयुताः ॥
विराटस्य सदः प्रापुर्धर्मोऽतिष्ठन्नृपासने ।
विस्मितो वीक्ष्य तान् राजा श्रुत्वा तद्वृत्तमात्मजात् ॥
सुतामार्जुनये प्रादात्संमान्यैतान्प्रसाद्य च ।
अर्जुनस्तेन तनयां भार्यां कुर्विति याचितः ॥
नोपायंस्त विदञ्छिष्यां तनयार्थं ततोऽवृणोत् ।
ततः कृष्णस्सात्यकिश्च द्रुपदस्ससुतोऽभ्ययात् ॥
ससैन्यो युद्धसाहाय्ये विराटश्च स्थितोऽभवत् ।
युधिष्ठिरस्तु बन्धूनां रिपूणामपि घातने ॥

जुगुप्समानो द्रोणाय प्राहिणोन्मधुसूदनम् ।
पञ्चग्रामान्स देहीति वदन् दुर्योधनादिभिः ॥
अदित्सुभिः किं चिदपि प्रत्याख्यातोऽभवन्मुहुः ।
स बद्धुमीप्सितो दुष्टैर्भीमं स्वं दर्शयन्वपुः ॥
स्तुतो भीष्मादिभिः कृष्णः पाण्डवान्तिकमाययौ ।
युयुत्सया ययुर्वृत्वा सेनापत्ये नदीसुतम् ॥
धृष्टद्युम्नं च कौरव्याः कुरुक्षेत्रं च पाण्डवाः ।
ततोऽर्जुनं बन्धुवधाद्विरमन्तं सहेतुकैः ॥
कृष्णो वाक्यैः समाश्वास्य चक्रे रिपुवधे स्थिरम् ।
ततोऽभवद्रणो घोरः कुरूणां पाण्डवैः सह ॥
युद्ध्वा दशाहं भीष्मोऽभूदर्जुनेन निपातितः ।
द्रोणं कृत्वाथ सेनान्यं कौरव्यो युयुधे पुनः ॥
ततस्तृतीयदिवसेऽर्जुने संसप्तकान् घ्नति ।
भित्त्वारिसेनां सौभद्रे विशत्यन्तस्तु सिन्धुराट् ॥
भीमादीन् रुरुधेऽथाघ्नन् षड्रथाः श्रान्तमार्जुनिम् ।
अर्जुनो निशि तच्छ्रुत्वा प्रतिजज्ञे परेऽहनि ॥
सिन्धुराजं निहन्तास्मि प्रवेष्टा वा शुचाविति ।
तच्छ्रुत्वा कुरवोऽरक्षन् सैन्धवं द्रोणमाश्रिताः ॥
प्रातः पुनर्युयुधिरे कुरुपाण्डवपुङ्गवाः ।
अर्जुनोऽक्षौहिणीः सप्त हत्वा सूर्येऽस्तमेष्यति ॥
प्रवेक्ष्यन्नग्निमालोक्य सैन्धवं न्यवधीच्छरात् ।
ततो दुर्योधनः क्रुद्धो रात्रावारब्ध संगरम् ॥
तदा घटोत्कचो भैमिर्द्रोणादीन् साध्वयोधयत् ।
नाशयन्तं चमूमेनमशक्यं हन्तुमन्यथा ॥

मुक्ता शक्तिं शक्रदत्तां कर्णः प्राणैर्व्ययूयुजत् ।
विराटद्रुपदौ हत्वा द्रोणः प्रापमहद् भयम् ॥
पाण्डवानां यदा चक्रे तदोवाच युधिष्ठिरः ।
कृष्णादिभिः प्रेर्यमाणो द्रोणं हन्तुं छलोक्तये ॥
अश्वत्थामाऽमृतेत्युच्चैर्गज इत्यथ लघ्वसौ ।
तन्निशम्य वचो द्रोणस्तं जानन्सत्यवादिनम् ॥
न्यस्तायुधो हतो वेगाद्धृष्टद्युम्नेन संगरे ।
अश्वत्थामाथ तच्छ्रुत्वा निहन्तुं सर्वपाण्डवान् ॥
नारायणास्त्रं मुमुचे कृष्णेनैतदशाम्यत ।
स निर्विण्णस्ततो व्यासान्नरनारायणावमू ॥
ज्ञात्वाऽनुशयमत्याक्षीत्तद्दूर्व्यथमेन्मृधम् ।
अथ सेनापतिं कर्णं कृत्वा दुर्योधनः पुनः ॥
युयुधे तत्र भीमेन जघ्ने दुःशासनो बलात् ।
अथ कर्णे सुसंरब्धमर्जुनद्वैरथार्थिनम् ॥
शल्यः कर्तुं हतोत्साहमियेष स न चाशकत् ।
योधयन्नर्जुनं कर्णो गुरुशापेन विस्मरन् ॥
भार्गवास्त्रं भुवा चक्रं ग्रसन्त्याऽभूत्प्रपीडितः ।
तदाऽर्जुनोऽवधीदेनमादित्येऽस्तं प्रयास्यति ॥
शल्योऽपरेद्युर्धर्मेण हतः सेनापतीभवन् ।
नकुलः शकुनिं जघ्ने सहदेवश्च तत्सुतम् ॥
तदा दुर्योधनो भीतः प्रविश्यास्तम्भयत्सरः ।
अथ भीमादयो गत्वा निर्भर्त्स्यामुं सरःस्थितम् ॥
बहिर्निर्गमयामासुर्भीमेनास्य रणोऽभवत् ।
भीमोऽस्य गदया भञ्जन्नूरू तं भुव्यपातयत् ॥

Digitized by Google

पदाऽवधीच्छिरस्येनं दुर्वचोभिरभर्त्सयत् ।
तथा तुदन्तं भीमं तु वारयित्वा युधिष्ठिरः ॥
दैवं विनिन्दन् स्वैर्वाक्यैर्दुर्योधनमसान्त्वयत् ।
कृतकृत्याः सुताः पाण्डोः शिबिरं प्राप्य हर्षिताः ॥
निरद्रुरथ हार्दिक्यकृपद्रोणात्मजा ययुः ।
दुर्योधनस्य श्वसतः समीपे तमसान्त्वयन् ॥
प्रतिजज्ञे तदा द्रौणिर्धृष्टद्युम्नादिपातनम् ।
रात्रौ निर्गत्य सुप्तांस्तानुत्थाप्य न्यवधीच्छरैः ॥
धृष्टद्युम्नं पाण्डवजान् सैनिकानप्यमर्षितः ।
नाशकत्पाण्डवान् हन्तुं धर्षितः कृष्णतेजसा ॥
विलपन्त्यास्ततः प्रातः कृष्णाया भ्रातरं सुतान् ।
आश्वासनाय भीमाद्या ययुर्द्रौणिवधेप्सवः ॥
ततोऽश्वत्थाममुक्तस्य शान्तयेऽस्त्रस्य फाल्गुनः ।
ऐषीकस्य ब्रह्मशिरोऽमुचद्भीमः शिरःस्थितम् ॥
मणिं जहार सहजमनुज्ञातेन पार्षती ।
ततो मृतानां सर्वेषां कृत्वा निर्वपणं पृथक् ॥
तत्पर्वीश्च समाश्वास्य लेभे राज्यं युधिष्ठिरः ।
पितामहगुरुभ्रातृघातान्निर्विण्णमानसः ॥
पितामहात्स शुश्राव धर्मान्कृष्णमते स्थितः ।
राजधर्मान्बहुविधानापद्धर्मांश्च पुष्कलान् ॥
मोक्षधर्मान्दानधर्मान्सेतिहासोपपत्तिकान् ।
अश्वाचार्यवशोत्थेनः वालनायाजहार सः ॥
अश्वमेधं द्विषो जित्वा भ्रातृभिः स्वमनुव्रतैः ।
ततः पुत्रघातापत्तिसंतप्ता वनमाश्रयत् ॥

पितृव्यमातृः संद्रष्टुं ययावथ युधिष्ठिरः ।
वनं तान्वीक्ष्य तपस्थो विदुरं दृष्टवान् मृतम् ॥
दवाग्निदग्धमाकर्ण्य धृतराष्ट्रं सह स्त्रिया ।
कुन्तीं श्रुत्वा यथा दग्धामकरोदौर्ध्वदेहिकम् ॥
पुनर्नगरमागत्य याते कतिपये दिने ।
स शुश्रावाऽर्जुनमुखात्प्रभासे यादवक्षयम् ॥
परस्परवधात्तेषामसंभाव्यं कुलक्षयम् ।
श्रुत्वंश्च कृष्णनिर्याणं स्वयं स्वर्गोत्सुकोऽभवत् ॥
विसृज्य राज्यं पौत्राय सानुजो द्रौपदीयुतः ।
आश्वास्य प्रकृतीर्मुख्याः प्रययावुत्तरामुखः ॥
एकः श्वाऽनुययावेनं यान्तं स्वर्गपथं प्रति ।
मध्ये मार्गमपप्तंश्च सहदेवमुखाः क्रमात् ॥
आक्रोशतस्तान्वीक्ष्यैव वदन्फलमधर्मजम् ।
स्वर्गदूतेनाभिदधे त्यक्त्वा श्वानं स्वरेहि[1]रिति ॥
भक्तं नाहं त्यजामीति तमुक्त्वाभिदधे पुनः ।
कर्मवैचित्र्यतो लोका विचित्रा हि शरीरिणाम् ॥
त्वया सह न तेन श्वा प्राप्तुमर्हः शुभां गतिम् ।
अथावोचदमुं राजा त्यक्त्वैनं नार्थये सुखम् ॥
ततः श्वा धर्मरूपेण प्रादुर्भूयाब्रवीदमुम् ।
परीक्षितोऽसि बहुधा पुत्रधर्मे स्थिरो ह्यसि ॥
प्राप्नुहि त्वमतः स्वर्गं दुरवापं परैरिति ।
अथ गत्वेन्द्रलोकं स वीक्ष्येन्द्राधासनस्थितम् ॥

---

[1] स्वः एहि स्वर्गं गच्छेत्यर्थः

दुर्योधनं तथाऽन्यांश्च कर्णादीन्मोदमेदुरान् ।
विषीयमाणः शुश्राव निरयस्थजनारवम् ॥
दयालुस्तान्द्रष्टुमनाः प्रतिषिद्धोप्यसौ सुरैः ।
अयासीत्तत्र चापश्यत्स्वजनं यातनार्दितम् ॥
ते तमूचुस्त्वमत्रास्व क्षणं नः सुखिनः कुरु ।
त्वत्सांनिध्यवशादेव यातना नो न बाधते ॥
त्वयि याते भवेद्दुःखमस्माकं नरकोद्भवम् ।
श्रुत्वेति स दयाविष्टस्तत्र स्थातुं मनो दधे ॥
देवास्तमूचुर्नैवं त्वं कुर्याश्चित्रा नृणां गतिः ।
तान्प्रत्युवाच कौन्तेयो नाहं स्वजनवर्जितम् ॥
इन्द्रत्वमपि वाञ्छामि दुःखितेषु स्वबन्धुषु ।
श्रुत्वेति देवाः संतुष्टास्तां मायां देवनिर्मिताम् ॥
युधिष्ठिरपरीक्षार्थमुक्त्वा तान् स्वर्गमानयन् ।
ततः परिवृतो मित्रैरनुजैरनुजीविभिः ॥
भार्यया सह कौन्तेयो भुङ्क्ते स्म सुखमुत्तमम् ।
आनृशंस्यादिभिर्धर्मैः प्राप्तमाकल्पमक्षयम् ॥ १९८ ॥

इति भारतकथा ॥

KÁTYÁYANA'S S'ULBAPARIS'ISHṬA WITH THE COMMENTARY BY RÁMA, SON OF S'ÚRYADÁSA.

[The above-named short tract is here published as a supplement to Baudháyana's S'ulba-sútra printed in the old series of the Paṇdit. Compared with the latter it presents various features of independent interest as it exhibits the whole body of geometrical knowledge required by the yájnikas in a more systematic form and moreover contains some rules for which no counterpart is to be found in Baudháyana].

॥ ओः ॥

श्रीगणेशाय नमः

श्रीगुरुभ्यो नमः

विष्णुं यज्ञभुजं नत्वा रामो नैमिषमाश्रितः ।
समाचो ऽग्निचितः सूनुः सूर्यदासस्य धीमतः ॥ १ ॥
स्वयंकृतस्य सिद्धान्तं वार्त्तिकस्य समाश्रयन् ।
करोति शुल्बसूत्राणां वृत्तिं बालावबुद्धये ॥ २ ॥

रज्जुसमासं वक्ष्यामः ॥ १ ॥

1. We will explain the employment of the cords (by means of which the sacrificial areas are measured out).

कर्मणां फलवत्त्वं च तत्र चाधिकारी तत्स्वरूपं च भगवता कात्यायनेन वाजसनेयिकपञ्चदशशाखा विलोक्य कल्पसूत्रं निबध्नता प्रतिपादितम् । कर्म्मणः काल इव देशो ऽपि तत्र तत्राङ्गत्वेन सूचितः । स विशेषेण वक्तव्यस्तदर्थमिदं शुल्बपरिशिष्टं भगवतैवोपनिबद्धम् । तच्च कर्काचार्येण यद्यपि व्याख्यातमस्माभिश्चोपपत्तिप्रदर्शनेन वार्त्तिकैः प्रपञ्चितं तथापि सूत्रमात्रार्थो यथा सर्व्वेषां हृदि निविशेत एतदर्थं वृत्तिरियमारभ्यते । शुल्बनं शुल्बः शुल्बमाने ऽस्माद्धातोर्घञन्तः मानकरणमित्यर्थः । इति धन्यनामनिरुक्तिः । शुल्ब्यते ऽनेनेति वा अकर्तरि च कारके संज्ञायामिति घञ् । तत्र प्रतिज्ञासूत्रमेतद्रज्जुसमासं वक्ष्याम इति क्षेत्रपरिच्छेदिकाया रज्ज्वोर्यः समासः सम्यगस्यत इति समासः क्षेत्रपरिच्छेदानुगुणतया धारणं तं वक्ष्यामः । यद्वक्ष्यति शङ्कोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्व्वां दिशं हरन्तीत्यादिना । प्रतिज्ञा चैषा शिष्यबुद्ध्यनुकूलनाय कृता । यथा तदर्थिनो ऽत्र प्रवर्त्तेरन् । अत्राधिकारिविशेषश्च ग्रन्थान्ते, भवन्ति चात्र श्लोका इत्युक्त्वा भगवतैव श्लोकान्पठयतोक्तः । संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः । समभूमौ भवेद्विद्वाञ्छुल्बवित्परिपृच्छक

इति । संख्या संख्याप्रतिपादकं गणितशास्त्रम् । परिमाणं मानविधिः । समेन सूत्रेण निरञ्छकः आकर्षकर्त्ता । परिपृच्छकः शिल्पादीनाम् । यदुक्तम् ।

शास्त्रबुद्धिविभागज्ञः परशास्त्रकुतूहलः ।
शिल्पिभ्यः स्थपतिभ्यश्चाप्याददीत मतीः सदेति ।

तथा ।

तिर्यङ्मान्याश्च सर्वार्थैः पार्श्वमान्याश्च योगवित् ।
करणीनां विभागज्ञो नित्योद्युक्तश्च कर्म्मसु ।

सर्वार्थैः सर्वप्रयोजने तिर्यङ्मान्या योजनं यो वेत्ति तथा पार्श्वमान्याः करणीनां करणीतत्करणादयामां कर्मसु नित्योद्युक्तो ऽनलसस्तिर्यङ्मान्यादयः पञ्चरज्जवो वक्ष्यन्ते ॥

समे शङ्कुं निखाय शङ्कुसम्मितया रज्ज्वा मण्डलं परिलिख्य यत्र रेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कू निहन्ति सा प्राची ॥ २ ॥

2. Having, on a level spot, planted a pole and having described (round it) a circle by means of a cord fastened to the pole (or else "measured by the pole") one fixes a pole on each of the two points where the end of the pole's shadow touches the two halves of the circle; this (the line connecting these two points) is the east-line.

प्राग्वंशादौ प्राचीष्यते सा त्वर्क्कोदयोपलक्षिता अर्कोदयस्थलानि तु अशीतिशतम् । तन्मध्यमं प्राची । तच्च प्रत्यक्षं ज्ञातुमशक्यमिति तद्ज्ञानायेदं सूत्रम् । समत्वं भुवो जलस्याप्रस्रवतः समतया स्थित्या ज्ञेयम् । यदुक्तम् ।

न जलात्सममन्यत्तु नान्यद्वृत्तात्समा भवेत् ।
नान्यद्दूरं भ्रमादूर्ध्वं नान्यत्सूत्राद्दृजु भवेत् ।

यथा जलं समतयैव तिष्ठत्येवमन्यत्र । यथा वृत्तं सूत्रेण भ्रामितं भ्रमितमेवमन्यत्र । यथा च भ्रान्तिमोचरीकृतमाकाशमपि दूरमेवमन्यच्च-

तयोर्जनस्थमध्यभ्रान्तानां न दूरम् । यथा च सूत्रमन्तद्वयाकर्षणात्सम्प्रमा-णमृजु स्यादेवमन्यत्रेखादिकं न । तत्र भूसमत्वकरणप्रकारो ऽन्यो ऽपि वा-र्त्तिकोक्तः ।

कीलेनैकीकृते मूले पृथक् सूक्ष्मसमाश्रयोः ।
दण्डयोरग्रनैकट्ये तिर्यगन्यो ऽन्तराङ्कितः ।
कीलादिना योजनीयो दण्डः समतया द्वयोः ।
मूलप्रोतं लम्बसूत्रं भुवं भायं स्पृशेद्यतः ।
भूस्थे ऽग्रयुग्मे मध्याङ्कात्तिर्यग्दण्डगतात्स्खलेत् ।
तत्स्थलं पूरयेदन्यच्चिन्नयेद्वा यथाविधि ॥
शङ्कुं यावत्सूत्रमेति भूरित्थं वा समा भवेदिति ।
शङ्कुलक्षणं चोक्तम् ।

षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितम् ।
जठरं चाग्रणं चैव शङ्कुं कुर्याद्विशेषतः ।

षडङ्गुलद्वादशाङ्गुलयोर्विकल्पो ऽल्पबहुत्वेनसाधनव्यवस्थितः परि-णाहः अधःशिरोविस्तारो वा । तथा ।

एकतव चतुस्तीक्ष्णः खादिरः सममायतः ।
शङ्कुः कार्यस्तु शुल्बज्ञैस्तस्याद्वं गमयेन्महीम् ।
प्रादेशमात्रो हविर्यज्ञे पूर्व्वलक्षणलक्षितः ।
शङ्कुरामशिराः कार्यस्तस्याग्रद्वं निखानयेत् ।

एकतव एकत एव सूक्ष्मीकरणार्थं तक्षणेन तनूकृतः । खादिर इति खादिरकाष्ठोपलक्षणार्थम् । अर्द्धं भुवि निखनेदित्यर्द्धमिति दृढस्थितियोग्यतो-पलक्षणम् । हविर्यज्ञे पौर्णमासादिहविर्यज्ञसाधनीभूतवेद्यात्रो साध्ये आम-शिरा अशुष्कशिराः शुष्कशिरसो हि मुद्गरेण हनने भङ्गप्रसङ्गः । एतेन यत्र यथोपयुक्तस्तत्र तथा शङ्कुः कार्यः । न तु मानविशेषोपदेशेन दृष्टमदृष्टं वा कं चन विशेषं पश्यामः । अत्र तु सूक्ष्माग्रेण शङ्कुना भाव्यम् । यथा छायायां सूक्ष्मं वृत्ते प्रविश्य निर्गच्छच्च साधु दिगयं परिच्छिन्द्यात् । शङ्कुरो ऽप्युक्तः ।

द्विवितस्तिप्रमाणस्तु खादिरो मुद्गरस्तथा ।
शङ्कुस्तेन निखेयः स्यात्तस्मात्तस्य परिग्रहः ।

यद्वान्तरञ्च ।

चतुरस्रं मुद्गरं कृत्वा षोडशाङ्गुलमायतम् ।
अविद्धं व्रणहीनं च दारुमध्याच्च निर्म्मितम् ।

अविद्धं मुष्टियाह्यकाष्ठान्तरेणाप्रोतम् । व्रणहीनम् । शङ्कुहननक्ष-
मत्वमर्हम् । शङ्कोः साम्येनावस्थितेः प्रकारस्त्वस्मदुक्तः ।

स्यात्स्यच्छङ्कोश्चिपादेन मानेन विततेर्द्धुलम् ।
रचयञ्छङ्कोः समन्तादृत्तमारचयेत्सुधीः ।
तन्मध्ये निहिते शङ्कौ साग्निशङ्कुमितेर्गुणैः ।
शलाकाभिर्व्वापि वृत्तदिग्गताभिः स्पृशेदथ ।
तदन्तेरत्र शङ्क्वयं तुल्यं स्याच्छङ्कुरित्यृजुरिति ।
छायाप्रवेशनिर्गमचिह्नार्थं तु वृत्तान्तरं वक्ष्यते । रज्जुश्चोक्ता ।
अजीर्णा ग्रन्थिनी सूक्ष्मा समा श्लक्ष्णा त्वरोमशा ।
रज्जुर्मानाधिका कार्या अध्वरे योगमिच्छता ।
शाणी वा बाल्वजी चैव वैणवी वा विधीयते ।
रज्जुरुभयतःपाशा त्रिवृता यज्ञकर्म्मणि ।
रज्जुर्मुञ्जमयी कार्या शणैस्तु परिमिश्रिता ।
कात्यायनो वदत्येवमखण्डा कुशबल्वजैरिति ।

या कृष्यमाणा न हीना नाधिका भवति तादृशी दृढा रज्जुः कार्येति तात्पर्यम् । त्रिवृतेत्यादि तु मौञ्जं त्रिवृद्रज्जुयुग्मित्यादिना धर्मोपकरणरज्जुपरतया यदुक्तं तदनुवादरूपं बोध्यम् । एवं समे स्थले उक्तलक्षणं शङ्कुमुदीरितयुक्त्या सुसमं निखाय तस्मिञ्छङ्कौ सम्मितया सम्यक्प्रक्षिप्तया कुमिञ्प्रवेपणरत्युक्तः । उक्तरूपया रज्ज्वा मण्डलमप्रमाणेन पूर्व्वाह्णे शङ्कुच्छायातः किञ्चिन्न्यूनं तत्प्रवेशार्हं परिलिख्य तत्र भ्रममण्डले शङ्कुच्छाया यत्र विशति यतश्चापराह्णे निःसरति तत्र स्थलद्वये मण्डलरेखायां चिह्ने

कुर्याच्छङ्कू वा निखनेत्। तद्द्वयोपरि नीतं सूत्रं प्राची रेखा । शङ्कुस- म्मितया शङ्कुतुल्ययेति न युक्ता व्याख्या । क्वचिद्देशे पौषमाघयोर्म्मध्याह्ने ऽपि शङ्कुतो ऽधिकैव तच्छायेति तदा तत्र वृत्तमध्ये छायाप्रवेशाभावा- पातादव्यापकत्वात् । अत्रातिसूक्ष्मता तु । दिनान्तरे ऽपि तत्रैव वृत्ते तस्यैव शङ्कोश्छायाप्रवेशनिर्गमौ साधयित्वा पूर्व्वदिनापरदिनच्छायानिर्ग- मान्तरालघट्यो भाजिकाः षष्टितः किञ्चिदूना अधिका वा पूर्वापर- दिनयोर्म्मण्डले छायापगमान्तरमङ्गुलयवादिमितं पूर्व्वदिनस्य छायाप्रवेश- निर्गत्यन्तरघटीभिर्गुणितं भाजिकाभिर्घटीभिर्हरेत् । लब्धमानेनाङ्गुला- दिना यद्युदगयनं तदोत्तरतो ऽथ दक्षिणं तदा दक्षिणतः पूर्व्वदिनापग- माच्चिह्नं कुर्यात् । छायाप्रवेशचिह्नं त्वविकृतमेव पूर्व्वदिनस्य । तयोरुपरि नीतं सूत्रं प्राची स्पष्टतरा । यदुक्तं मयैव वार्त्तिके ।

छुतिप्रवेशापगमान्तरालघटीहृतं श्वोऽपगमान्तरालम् ।
छायापगत्यन्तरनाडिकाप्तांशेनायनाशाचलितेन्द्रकाष्ठेति ।

प्रकारान्तरं चोक्तम् ।

कृत्तिकाः श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरम् ।
एतत्प्राच्या दिशो रूपं युगमात्रोदिते पुर इति ।

षडशीत्यङ्गुलमितं युगमात्रं यदोदितं कृत्तिकादिनक्षत्रमाकाशमारो- हति । तदा तदुपलक्षिता प्राची ज्ञेया । यत्प्रोक्तं सूक्ष्मं प्राच्यानयनं न वेद तं प्रत्येतत् । ध्रुववेधादिना दिग्ज्ञानप्रकारान्तराणि वार्त्तिके ऽस्माभिर्दर्शि- तानि । वेद्यादेर्दिङ्गायत्तत्वाद्दिक्साधनमादावुक्तम् ॥

तदन्तरं रज्ज्वाभ्यस्य पाशौ कृत्वा शङ्कोः पाशौ प्रतिमुच्य दक्षिणायम्य मध्यमे श- ङ्कुं निहन्त्येवमुत्तरतः सोदीची ॥ ३ ॥

3. Having by a cord doubled their interval (i. e. having taken a cord whose length is double the interval of the two poles) and having made slings at its two ends and fastened them to the two poles one stretches the cord towards the south and plants a pole at ts middle, the same is done on the north-side, this is the north-line.

Digitized by Google

यो प्राच्यन्तयोः शङ्कू पूर्व्वमुक्तौ तयोरन्तरं रज्ज्वा मित्वा तां रज्जु-मध्यस्थं द्विगुणीकृत्य रज्ज्वन्तयोः पाशौ कृत्वा प्राच्यन्तशङ्क्वोः पाशौ प्रतिमुच्य निधाय रज्जुमध्यं दक्षिणतः आकृष्य तेन मध्यमेन स्पृष्टे भूभागे शङ्कुं निखाय तथैवोत्तरतो रज्जुमध्यमाकृष्य तत्रापि तथैव शङ्कुमन्तरं निहन्ति ताभ्यां शङ्कुभ्यां परिच्छिन्नोदीची दिक् ।

रज्ज्वन्तयोः पाशौ करोति ॥ ४ ॥

4. (In all cases) a sling is to be made at each end of the cord.

परिभाषेयं क्षेत्रमानार्थमुपादीयमानाया रज्जोः स्वरूपमिव-मोर्थी या रज्जुश्चतुरस्रादिक्षेत्रमानार्थमभ्यस्तादिस्वरूपोपदिश्यते तस्या अन्तयोः पाशौ कुर्यात्तौ शङ्क्वोः प्रतिमोक्तव्यौ । वक्ष्यति । गार्हपत्याह-वनीययोरन्तरं षड्धा सप्तधा वागन्तुसमं त्रेधा विभज्यापरवितृतीय-लक्षणेन दक्षिणायम्य तस्मिन्नग्निरिति । तत्रेदमुपतिष्ठते रज्ज्वन्तयोः पाशौ करोतीति । एवमन्यत्रापि । ननु पूर्व्वसूत्रे पाशौ कृत्वेत्युक्तमेव पुनः किमर्थमुच्यते रज्ज्वन्तयोः पाशौ करोतीति । उच्यते । पूर्वसूत्रोक्तं पाशकरणं न सर्व्वार्थम् । उदीचीसाधनत्वेनैव पूर्वमुक्तत्वात् । इदं तु सर्व्वार्थम् । एवं तर्हीदमेवास्तु पूर्व्वं माभूत् । सत्यम् । इदं क्षेत्रपरिच्छे-दिकास्वेव रज्जुषूपतिष्ठते । न च पूर्व्वत्र क्षेत्रपरिच्छेदः क्रियते । किन्तू-दीचीज्ञापनमात्रमतः पुनरुक्तिर्न दोषाय । अथ वा पुनरुक्तया रज्ज्वन्तपा-शकरणस्यानित्यत्वं ज्ञाप्यते । ततश्च तिर्यङ्मान्यादिषु मानमात्रार्थासु सर्व्वरज्जुषु न प्राप्तमन्तयोः* पाशकल्पनम् ॥

श्रोण्यंसनिरञ्छनसंख्यासमासभङ्गेषु लक्षणानि ॥ ५ ॥

5. Marks (are to be made on the cord) at (the spots which are meant to fix the places of) the two śroṇí and the two aṁśa, at the nirañchhana (about which see sútra 12) and at the break (in the cord) which marks the combination of figures (i. e. the place

* प्रान्तयोरिति पाठान्तरम् ।

where the two cords or parts of a cord, viz. the original one and the one added for the purpose of doubling the length join. C. Sútra 12).

करोतीत्यनुवर्त्तते । श्रोणिमाने अंसमाने निरञ्छने आकर्षणमाने संख्यासमासभङ्गे च लक्षणानि करोतीत्युपदिश्यते । तत्तत्स्थानप्रकृप्त्यर्थम् । क्षेत्रायामप्रमिता दण्डरज्जुरेका । तावती द्वितीयाभ्यासरज्जुः । तयोर्या द्विसंख्या तस्याः समासायैकीकरणाय यत्र दण्डरज्ज्वग्रे द्वैगुण्याय भङ्गेन मोटनं क्रियते तावतीमभ्यासरज्जुं मातुं स संख्यासमासभङ्गः तत्र यच्चिह्नं तत् क्षेत्रायामज्ञानार्थमेव तत्कृतपरिच्छेदान्तरस्यादृष्टत्वात् । श्रोण्यादि-पदानि च तत्तत्परिच्छेदकरज्जुपराण्येव ततश्च रज्जुगतान्येव लक्षणानि कार्याणि । निरञ्छनत्वरूपं वक्ष्यति । प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं करोति तन्निरञ्छनमिति ।

प्राच्यन्तयोः शङ्कू निहन्ति ॥ ६ ॥

6. He is to plant poles at both ends of the east-line.

इष्टक्षेत्रे यावती प्राच्युच्यते । यथा महावेद्यां षट्त्रिंशत्प्रक्रमा । तावत्याः पूर्वापरान्तयोः शङ्कू निखेयौ । मानार्थौ चैतावुपदिष्टावाचार्येण । ननु समे शङ्कू निखायेत्यादिसूत्रे तत्र शङ्कू निहन्ति सा प्राचीत्युक्तमेव शङ्कुद्वयनिखननं किमिदं पुनरुच्यते । नैवम् । तद्धि दिङ्मात्रज्ञानार्थमुक्तं त्विष्टक्षेत्रप्राचीपरिच्छेदकमित्यपुनरुक्तिः ।

श्रोण्योरंसयोश्च ॥ ७ ॥

7. And likewise on the two west-corners and the two east-corners.

शङ्कू निहन्तीत्यनुवर्त्तते । क्षेत्रपरिच्छेदिकां वक्ष्यमाणरीत्या रज्जुं वितत्य दक्षिणोत्तरयोः श्रोण्योरंसयोश्च रज्जुगतं यत्र लक्षणं निपतति तत्र चतुरः शङ्कून्निहन्ति । अनेनोत्तरकालं क्षेत्रपरिच्छेदायेत्युपदेशः ।

शङ्क्वोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वा दक्षिणपूर्व्वां दिशं हरन्ति ॥ ८ ॥

8. Having fastened the slings at the two poles (planted on the ends of the east-line) they seize the cord by the nirañchhana mark and stretch it towards the south-east.

क्षेत्रपरिच्छेदाय रज्जुप्रसारणप्रकारो ऽयम् । अंसनिरञ्छनचिह्ने पूर्व्वतः श्रोणिचिह्ने तु रज्जुगते पश्चिमतः कुर्व्वन् प्राच्यन्तगतशङ्क्वोः पाशौ प्रक्षिप्यांससन्निकृष्टनिरञ्छनस्थाने रज्जुमादाय दक्षिणपूर्व्वामाग्नेयीं दिशं प्रत्याकर्षेत्तत्र चांसलक्षणो पूर्व्वमुपदिष्टः शङ्कुर्द्धेयः। दक्षिणपूर्वामिति दिङ्नामान्यन्तराल इति समासः ॥

एवमुत्तरतः ॥ ९ ॥

9. The same is done on the northern side.

शङ्क्वोः पाशौ प्रतिमुच्य निरञ्छनेन गृहीत्वेत्यादिविधिः पूर्व्वोक्त एवमित्यनेनातिदिश्यते । दक्षिणपूर्व्वामित्यत्र तूत्तरपूर्व्वां दिशं हरन्तीति विशेषः। उत्तरांसे च शङ्कुः। हरन्तीति बहुवचनोपदेशो ऽत्र पृथुनि क्षेत्रे एकेन रज्जुप्रसारणं कर्त्तुमशक्यम् । क्रियमाणं वा न क्षेत्रमतिसाम्येन परिच्छिनत्तीति बहुभिरपि सहायैः सूत्रप्रसारणं कार्य्यमिति सूचयितुम् । एवमन्यत्रापि । अंसौ नाम चतुरस्रक्षेत्रे आग्नेयैशानदिग्गतौ कोणौ । श्रोणी तु नैर्ऋतवायव्यदिग्गतौ कोणौ ।

विपर्य्यस्येतरतः ॥ १० ॥

10. After having exchanged (the slings of the cord) the same is to be done on the other i. e. the western side (so as to fix the western corners of the square or oblong).

इतर इति पश्चिमभाग उच्यते । विपर्य्यस्येति च रज्जुपाशौ व्यत्यस्य पूर्व्वपाशं प्रत्यक्शङ्कौ प्रत्यक्पाशं तु प्राचि शङ्कौ न्यस्यत्यर्थः । एवंकृते हि निरञ्छनं प्रत्यक्श्रोणिचिह्नसमीपवर्त्ति स्यात् । तत्र समचतुरस्रे यदंसचिह्नं तदेव श्रोणिचिह्नं दीर्घचतुरस्रे तु तयोर्भेद इत्येव विशेषः। यदि तु श्रोणिचिह्नं तत्सन्निहितनिरञ्छनचिह्नं च अंसचिह्नात्तत्सन्निहितनिरञ्छनचिह्ना-

च्छानुपविष्टमपि रज्जुप्रान्तविभागे पृथक् क्रियते । तदा पाशविपर्यासं विनापि क्षेत्रपरिच्छेदः स्यात् । अत्र दक्षिणपश्चिमां दिशं कृत्वा दक्षिणा श्रोणिः पश्चिमोत्तरां च दिशं कृत्वोत्तरा श्रोणिः संपाद्येति भेदः । श्रोणिचिह्नयोः शङ्कू उक्तावेव ।

स समाधिः सर्व्वत्र ॥ ११ ॥

11. This method of construction is to be used in all cases (for all squares aud oblongs).

समाधिः सम्यगाधानकरणं मानप्रकारः स सर्व्वत्र समदीर्घचतुरस्रेषु क्षेत्रेषु रज्ज्वन्तयोः पाशौ करोतीत्यादिसूत्रैरुपदिष्टो ज्ञेयः ।

(शेषमत्र)

वेदान्तपरिभाषा ।

श्रीपरमात्मने नमः ।

प्रथमः परिच्छेदः ।

यदविद्याविलासेन
भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं
सच्चिदानन्दविग्रहम् ॥

I salute the Paramátmá whose form is existence, intelligence, bliss; by the play* of whose mystic power † the subtile and gross ‡ creations (are produced).

---

* विलास according to the Vedántaśikhámaṇi, a commentary upon the Paribháshá, is the modification (vṛitti) of avidyá, consisting in Íśvara's beholding, resolving and activity. This is creation from the point of view of a creator. Vilása may also be taken as kāryya or product from Máyá.

† अविद्या or nescience is the inexplicable power of Brahma, (the one spiritual reality) regarded from our conditioned (phenomenal) point of view. It is a name for our inability to think the unconditioned and marks the antithesis between Brahma, as the position, and phenomena as the negation of thought.

‡ भूत are the five subtile elements, apañchíkṛitáni bhutáni or nonquintupled; these are not perceptible by the senses, but inferred as necessary for the five gross elements (भौतिक) which proceed from them.

यदन्तेवासिपञ्चास्यै-
निरस्ता भेदिवारणाः ।
तं प्रणौमि नृसिंहाख्यं
यतीन्द्रं परमं गुरुम् ॥
श्रीमद्वेङ्कटनाथाख्यान्
वेलङ्गुडिनिवासिनः
जगद्गुरूनहं वन्दे
सर्व्वतन्त्रप्रवर्त्तकान् ॥
ब्रह्मबोधाय मन्दानां
वेदान्तार्थावलम्बिनी ।
धर्म्मराजाध्वरीन्द्रेण
परिभाषा वितन्यते ॥

इह खलु धर्म्मार्थकाममोक्षाख्येषु चतुर्व्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः न स पुनरावर्त्तते इत्यादिश्रुत्या तस्यैव नित्यत्वावगमात् इतरेषां त्रयाणां प्रत्यक्षेण तद्यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादि-

I salute that chief guru, the best of ascetics called Nṛisinha by whose pupils those are vanquished who maintain a difference * (between souls), just as tigers kill elephants.

I salute his reverence Venkaṭanátha, who lives in Belangudi, the preceptor of the world, the expositor of all science.

This Paribhásha, resting upon the object of the Vedánta (i. e., final deliverance from transmigration), is composed by Dharmarájádhvarindra for the instruction of the dull (in the knowledge) of Brahma.

In this world, among the four kinds of human objects, namely, religious merit, wealth, enjoyment and moksha or final emancipation, the highest end of man is indeed moksha. For the eternalness of that (moksha) is known from the Sruti:—"He does not return again" † and so forth, and because the non-eternalness of the other three is proved by experience and the text:—"Just as, in this world, the sphere of existence which is produced by the works (of a former life) is destroyed, so too in the future, the sphere of existence which results from religious merit is exhausted." ‡ And that (moksha) proceeds from the

* भेदिवारणाः The elephants are those who maintain the separate individual existence of souls and deny the position of Monism, that the personal soul (jíva) is nothing other than Brahma seemingly conditioned by Máyá.

† Chhándogya Upanishad VIII. 15.

‡ Chhándogya Upanishad VIII. 6.

श्रुत्या चानित्यत्वावगमाच्च । स च ब्रह्मज्ञानादिति ब्रह्म तज्ज्ञानं तत्साधनञ्च सप्रपञ्चं निरूप्यन्ते ।

तत्र प्रमायाः करणं प्रमाणम् ।

तत्र स्मृतिव्यावृत्तं प्रमात्वमनधिगताबाधितार्थविषयज्ञानत्वं । स्मृतिसाधारणन्तु अबाधितार्थविषयज्ञानत्वम् ॥

नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्व्वपूर्व्वज्ञानाविषयतत्तत्क्षणविशेषविशिष्टविषयकत्वेन न तत्रा-

knowledge of Brahma: therefore Brahma, the knowledge of Brahma, and the means of obtaining that knowledge are fully described.

To continue, Pramáṇa is defined to be the instrumental cause of right knowledge (Pramá). When the definition of Pramá (pramátvam) excludes recollection, Pramá is defined as consisting in the knowledge of an object, which has not been previously perceived and which (when perceived) is not rejected as false.* But when recollection is included, Pramá consists in the knowledge of an object which is not rejected as false.†

In the definition of Pramá from which recollection is excluded (tatra in the text) there is no fault of non-pervasiveness.‡ For, since it is admitted that time, though destitute of form, can be cognised through the sense-organs, even a persistent state of cognition§ has for its object that

* An instrumental or special cause is thus defined:—असाधारणकारणत्वे सति व्यापारवत्वं करणत्वम्. That (cause) which being a cause not common (to all effects) is operative, is a special or instrumental cause.

† By some, recollection is excluded from the definition of (Pramá) because it is only when an object is presented for the first time that it is necessary to decide whether the object is to be retained as true or rejected as false.

‡ अव्याप्ति or लक्ष्ये लक्षणागमनम्.

§ धारावाहिकबुद्धि may be described as a series of states throughout which the same object is presented in consciousness. Each state of consciousness lasts only for a moment, a kshaṇa or unit of appreciable time, and perishes. A second state then succeeds and is lost, and so on.

Digitized by Google

106

व्याप्तिः । किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः किन्तु यावद्घटस्फुरणं तावद्घटाकारान्तःकरणवृत्तिरेकैव न तु नाना वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्य्यन्तं स्थायित्वाभ्युपगमात् तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशङ्कापि ।

which is particularised (by association with) each separate moment and is not the object of each previous cognition. Moreover, according to (Vedantic) tenet, there is no variation of knowledge in the case of a persistent cognition; but as long as there is a presentation of the jar so long the modification of the internal organ in the form of the jar is one and the same and not various. For the persistence of the modification is admitted until there arises a modification which excludes the former (sva). And thus the knowledge of a jar or like object, consisting in the intelligence which is reflected in the modification of the internal organ (tat) persists there (in the antahkaraṇa) during that time (i. e. while the vṛitti lasts) and is one and the same. Therefore the fault of non-pervasiveness is not to be feared (in our definition).

ननु सिद्धान्ते घटादेर्म्मिथ्यात्वेन बाधितत्वात् कथं तज्ज्ञानं प्रमा ।

A doubt is started:—according to the (Vedantic) doctrine, jars and like objects are unreal because they admit of refutation

---

An objection to the former of the two definitions of Pramá, in its application to this dháráváhikabuddhi, is refused in the text. In the second and succeeding presentations of the object, this object cannot be termed anadhigata (and this the definition requires), for it was adhigata after it had been cognised in the first momentary state. Thus anadhigatva fails to apply (lakshaṇágamana) in the present case (lakshya). This objection the text meets by declaring that the object known in each moment is particularised or determined by that moment and thus differs from the object presented in each previous or succeeding moment.

Digitized by Google

उच्यते । ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः यत्र त्वस्य सर्व्वमात्मैवाभूत् तत् केन कं पश्येत् इति श्रुतेः न तु संसारदशायां बाधः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति श्रुतेः । तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति घटादिप्रमायां नाव्याप्तिः । तदुक्तम् । देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणन्त्वात्मनिश्चयादिति । आ आत्मनिश्चयात् ब्रह्मसाक्षात्कारपर्य्यन्तमित्यर्थः लौकिकमिति घटादिज्ञानमित्यर्थः ।

(as false); * how then can the knowledge of such objects be termed Pramá? We reply:—the rejection of jars, &c. (as unreal) follows only upon intuition of Brahma. For as Śruti has it:—"When all has become Átmá to this one (to him who has attained intuition of Brahma), how in this case should one see aught?" † But in every day life there is no rejection (of jars, &c), for according to scripture:—"Where there is duality, as it were, there one sees another" ‡ Thus, by the word abádhita is intended the state of objects not being rejected as false in the state of practical existence, therefore there is no fault of non-pervasiveness in (the definition of Pramá) as to the correct knowledge of jars and like objects. This has been declared as follows:—"Just as the belief that the body is the Self is (falsely) imagined to be in accordance with evidence, in like manner, the knowledge of practical objects is admitted as true until intuition of the Self arises." §

---

* बाध in the Vedánta, is the sublation by knowledge of that which has been produced from Máyá, (i. e. of the phenomenal).

† Bṛihadáraṇyaka, IV. 4. The passage is thus explained in Śaṅkara's commentary: यत्रवै अस्य ब्रह्मविदः सर्वं नामरूपाद्यात्मन्येव प्रविलापितमात्मैव संवृत्तं यत्रैवमात्मैवाभूत् तत् तत्र केन करणेन कं द्रष्टव्यं कः पश्येत् ।

‡ Bṛihadáraṇyaka IV. 4.

§ Our text explains आत्मनिश्चयात् by आ आत्मनिश्चयात् ब्रह्मसाक्षात्कारपर्य्यन्तमित्यर्थः "until intuition of Brahma is attained." And लौकिकम् by घटादिज्ञानम्.

तानि च प्रमाणानि षट् प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात् । तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम् । प्रत्यक्षप्रमा चात्र चैतन्यमेव यत्साक्षादपरोक्षाद्ब्रह्म इति श्रुतेः । अपरोक्षादित्यस्य अपरोक्षमित्यर्थः ।

ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति । उच्यते । चैतन्यस्यानादित्वे ऽपि तदभिव्यञ्जकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्ति-वि-

The Pramáṇas are six: Pratyaksha (perception and sensation) Anumána (inductive process), Upamána (recognition of similarity), Ágama (Revelation), Arthápatti (supposition) and Anupalabdhi (non-perception).

The instrumental cause of right knowledge of Pratyaksha is termed the Pramáṇa of Pratyaksha. Correct knowledge of Pratyaksha is nothing but intelligence (Brahma), as in Śruti—"The immediately presented, the positively presented Brahma"* The meaning of aparokshát is aparoksham.

A doubt is started:—if intelligence (Brahma) is without beginning, how can we accept, as pramáṇas, the eye and other organs as constituting the instrumental causes of that (right knowledge of pratyaksha)? We reply: though intelligence is without beginning, the modification of the antaḥkaraṇa which manifests that (chaitanya), is produced by means of contact of the sense-organ (with the object) and so on. Therefore

* Bṛihadáraṇyaka V. 4.

Śaṅkara explains साक्षात् by अव्यवहितं केनचिद्द्रष्टुः i. e. Brahma, between which and the seer (cogniser) there is nothing intermediate, the immediate or self-presented reality.

अपरोक्षात् by अगौणम् and adds नश्रोत्रब्रह्मादिवत्. We may think of Brahma as that which hears or as the mind; but only in a figurative or secondary sense (gauṇam). Brahma is the unconditioned reality, in the primary sense (agauṇam). Ánanda Giri expands this: तथाच द्रष्टुर्भिन्नस्याभावात् स्वतो ऽपरोक्षमित्यर्थः । श्रोत्रं ब्रह्म मनो ब्रह्मेत्यादि यथा गौणं न तथा अगौणं द्रष्टुरव्यवहितं ब्रह्माद्वितीयत्वात् । M. Regnaud translates अगौणम् "Sans qualités" Philosophie de L'Inde, Premiere Partie, p. 121.

Digitized by Google

शिष्टं चैतन्यमादिमदित्युच्यते । ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः । तदुक्तं विवरणे अन्तःकरणवृत्तौ ज्ञानत्वोपचारादिति ।

ननु निरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथम् । इत्थं न तावदन्तःकरणं निरवयवं सादिद्र-

the intelligence,* which is associated with the modification (of antahkarana), is said to have a beginning.

By a trope the idea of cognition (cognising an object) is applied to vritti, in that it (vritti) serves to particularize cognition. This is declared in the vivarana:—"For the notion of cognition is tropically applied to the modification of antahkarana."

Again a doubt: how can there be a vritti, whose essence is change, of the antahkarana which is without parts? Such is our reply:—the antahkarana

* Chaitanya, chit, are synonyms of Brahma. Intelligence is one only, चैतन्यमेकमेव, pervading all things सर्वव्यापि; enlightening all, antahkarana, vritti and vishaya alike.

बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥

Panchadasí, Triptidípa, śloka 91.

धिया is बुद्धिवृत्त्या प्रमाणभूतया, i. e. the vritti when it becomes the pramána by leaving the body and taking the form of the object, as will be explained in the text. This vritti is insentient (जड) but intelligence (chaitanya) resides in and enlightens it. But since the vritti is produced (जायते) by contact of the sense-organ with the object, we may regard the chidábhása (or personal soul, consisting in a reflexion of chaitanya), which enlightens the vritti, as itself being produced, that is, having a beginning (ádimat); but only metaphorically. The vritti serves to particularize (avachchhedaka) chaitanya which resides in it. And if we view chaitanya as seemingly conditioned by an upádhi (limiting condition), viz. the vritti, we may regard it also as finite, but again only by a figure of speech. The truth being that in reality (paramárthatah) there is no cogniser nor thing cognised. The dualism of Psychology is unreal from the stand point of Brahma. Intelligence is self-luminous, स्वयं प्रकाश. And self-luminousness means (to quote Pramadá Dása Mittra in the "Theosophist," October, 1879) "incapability of being known, coupled with positive presentation" :—

अवेद्यत्वे सति अपरोक्षत्वं स्वयंप्रकाशत्वम्

व्यत्वेन सावयवत्वात् सादित्वञ्च तन्मनोऽसृजत इति श्रुतेः । वृत्तिरूपज्ञानस्य मनोधर्म्मत्वे च काम सङ्कल्पो विचिकित्सा श्रद्धा ऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्व्वं मन एवेति श्रुतिः प्रमाणम् । धीशब्देन वृत्तिरूपज्ञानाभिधानात् अतएव कामादेरपि मनोधर्म्मत्वम् ।

ननु कामादेरन्तःकरणधर्म्मत्वे अहमिच्छामि अहं बिभेमि अहं जानामीत्याद्यनुभवः आत्मधर्म्मत्वमवगाहमानः कथमुपपद्यते । उच्यते । अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयो दहतीति व्यवहारस्तथा

is not without parts, for these it has because it is a substance with a beginning: and it has a beginning as Śruti proves:—"He created the mind." * And the following text is a proof that knowledge in the form of a vṛitti is an attribute of mind:—"Desire, discrimination, doubt, faith, unbelief, firmness, instability, shame, intellect and fear—all these are mind." † Desire, &c. are declared to be attributes of mind, for by the word "dhí" is meant knowledge in the form of a vṛitti (of antahkaraṇa).

A doubt is started: if desire and the rest are attributes of the internal organ, how does the conciousness arise which is expressed by the words "I desire, I fear, I know;" (a consciousness which) enters into (and thus declares itself to be) an attribute of the Self. We reply: although the power of burning is not present in an iron ball, we speak conventionally of the iron ball burning, because we erroneously identify it with the fire, which is the substrate of the burning-

* ?

† Bṛihadáraṇyaka, III. 5.

सङ्कल्प generally means discrimination, or the power by which the mind decides that an object is this and not that. For other meanings, see Professor Cowell's note, Maitri Upanishad, page 246.

श्रद्धा Śaṅkara explains by अदृष्टार्थेषु कर्म्मसु आस्तिक्यबुद्धिर्देवतादिषु च.

धृतिः by धारणं देहाद्यवसादोत्तम्भनम्, bearing up under bodily pain and the like

धीः by प्रज्ञा.

Digitized by Google

सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासादहं सुखी अहं दुःखीत्यादिव्यवहारः ।

ननु अन्तःकरणस्य इन्द्रियतया अतीन्द्रियत्वात् कथं प्रत्यक्षविषयतेति । उच्यते । न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति ।

मनः षष्ठानीन्द्रियाणीति भगवद्गीतावचनं प्रमाणमितिचेन्न । अनिन्द्रियेणापि मनसा षट्त्वसंख्यापूरणाविरोधात् ।

नहि इन्द्रियगतसंख्यापूरणमिन्द्रियेणैव इति नियमः । यजमानप-

power; so in everyday life we say "I am happy, I am grieved, &c.," because we erroneously identify the internal organ, which undergoes modification in the form of pleasure, &c., (with the Self or Átmá).

Another doubt: inasmuch as the internal organ is imperceptible by the sense-organs, for it is an organ of sense, how can it be an object of perception? Our reply is that there is no proof that the internal organ is an organ of sense.*

If you object that the quotation from the Bhagavadgítá is conclusive:—"the organs of sense with the mind to make up six,"† we reply no; for no contradiction (results) in filling up the number six with mind, though mind be not reckoned as an organ of sense.

There is no positive injunction restricting the completion of the number relating to the organs of

* The Nyáya maintains that the internal organ is an organ of sense, and all systems are agreed that the sense-organ is not an object of perception, its existence being a matter of anumána. The Naiyáyika therefore objects that the internal organ has become an object of perception, since it is declared (by the Vedantin) to be modified in the form of pleasure, pain, &c., of which we are conscious. This objection is met by a simple denial. The Vedantin does not regard the antahkaraṇa as an organ of sense (indriya). In the Nyáya, pleasure and the rest are qualities of Átmá and are perceived by the mind or internal organ of sense.

† Bhagavadgítá xv. 7.

Digitized by Google

ञ्चमा इडां भक्षयन्तीत्यत्र ऋत्विगतपञ्चत्वसंख्याया अनृत्विजापि यजमानेन वेदानध्यापयामास महाभारतपञ्चमानित्यादौ च वेदगतपञ्चत्वसंख्याया अवेदेनापि भारतेन पूरणदर्शनात् ।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इत्यादिश्रुत्या मनसोऽनिन्द्रियत्वावगमाच्च ।

sense to such an organ only: Instance the text:—"the five including the sacrificer eat the Iḍa oblation:" here we notice that the cŏmpletion ŏf the number five, relating to the ṛitvik priests, is effected by means of the sacrificer (himself the fifth) who is not a ṛitvik. And in the quotation "He taught the five, the Vedas and Mahábhárata,"* we observe that the completion of the number five, relating to the Vedas, is effected by the Mahábhárata which is not a Veda.

And that mind is not an organ of sense is proved by the following Sruti:—"Objects are beyond the organs of sense, mind is beyond the sense-organs, &c."†

---

* Compare योऽधीते चतुरो वेदान्सर्वानाख्यानपञ्चमान् ।

Nalopákhyánam. VI. 9.

† Kaṭha Upanishad. iii. 10.

अर्थाः: Ought perhaps to be translated by subtile elements, which are beyond the organs of sense, in that the latter are products of the former. Thus Śaṅkara writes तेभ्य इन्द्रियेभ्यः स्वकार्येभ्यस्ते परा ह्यर्थाः सूक्ष्मा महान्तश्च प्रत्यगात्मभूताश्च ॥ महान्तः as being of greater extent (अधिकदेशवर्त्तिनः) than the sense organs. प्रत्यगात्मभूताः i. e., nearer to the Self in the graduated scale of existences. Manas, though composed of subtile elements (arthás), is beyond these and nearer to the Self, in that it constitutes the higher activities of discrimination and doubting. It is thus greater in extent, more pervasive. मनःशब्दवाच्यं मनस आरम्भकं भूतसूक्ष्मं सङ्कल्पविकल्पाद्यारम्भकत्वात् । Śaṅkara.

ARTHUR VENIS.

॥ श्रीः ॥

॥ सटीकसंक्षेपशारीरकभूमिका ॥

निखिललोकविख्याताऽवदातकीर्त्तिभिः शङ्करमूर्त्तिभिः श्रीशङ्कराऽऽचार्यैः स्वकृतशारीरकाऽऽख्यभाष्यरूपेण प्रकटीकृतमपि सकलपुरुषपरमपुरुषाऽर्थाऽनुत्तमतमसुखैकसाधनश्रीनारायणाऽवतारश्रीव्यासदेवप्रणीतवेदान्तसूत्राणामर्थमतिविस्तृतगूढाऽऽशयगद्योपनिबद्धमसाधारणपुरुषबुद्धिसाधनीयमननाऽऽदिकं मन्यमानाः सुरेश्वराऽऽचार्यशिष्याः श्रीशङ्कराऽऽचार्यप्रशिष्याः सर्वज्ञनामानो मुनयः साधारणपुरुषाणां वेदान्तसमस्तप्रमाणप्रमेयाद्यवबोधक्षमं कतिपयशारीरकभाष्योक्तप्रमेयस्थिरत्वसंपादकाऽऽवश्यवक्तव्यपूर्वमीमांसाप्रसिद्धयुक्तिभिरुपोद्बलितं सङ्क्षिप्तमप्यसङ्क्षिप्तपदार्थसार्थविलसितमतिमञ्जुलच्छन्दोऽलङ्कृतिहृतचेतसं पद्यमयं संक्षेपशारीरकाऽभिधं ग्रन्थं निरमिन्वन् स चाऽयं ग्रन्थोऽतिरमणीयतया वेदान्तप्रमेयाद्यवबुभुत्सुजनाऽत्युपयोगितया च समस्तवेदान्तमान्यग्रन्थविषयपरिशोधनबद्धपरिकरैः श्रीमद्भिर्मधुसूदनसरस्वतीतिविख्यातस्वामिभिर्बहुविधसद्युक्तिप्रदर्शनपूर्वकश्रुतिस्मृतिव्यवस्थापनपुरःसरं स्वकृताऽन्वर्थसारसंग्रहाऽभिधटीकया समलङ्कृतोऽधुना च वेदान्तपठनपाठनव्यसनिभिरपेक्ष्यमाणोऽत्यन्तदपदार्थनिर्वचनचतुरैः संपिपादयिषितोऽप्ययं यावदमुद्रिततया लिखितपुस्तकसंपादनसंशोधनादेरत्यन्तदुःसाध्यतया विरलः क्व चित्क्व चिदेव प्रचरतीत्यस्य ग्रन्थस्य प्रचारो वेदान्तनिखिलविषयानल्पेनैवाऽऽयासेनाऽवजिगमिषूणामभ्यसिसिषूणां व्यवतिष्ठापयिषूणां चाऽनुत्तमाह्लादप्रद इति प्रथममेव एव संशोध्य प्रकाश्यते ।

आशास्यते च भगवानिह यो न्यरूपि
प्रेष्ठो मे स सकलाऽन्तरगस्वरूपः ॥
दृष्ट्वाऽमुमिष्टमनुभूय विशोध्य शिष्टं
शिष्टाः श्रमेण परितुष्यत चेतसेति ॥ १ ॥

काशीस्थराजकीयप्रधानपाठशालयाऽध्यापकेन त्रिवेदहरिनाथशर्म्मणा

॥ श्रीगणेशाय नमः ॥

मू० ॥ अनृतजडविरोधिरूपमन्त-
त्रयमलबन्धनदुःखताविरुद्धम् ॥
अतिनिकटमविक्रियं मुरारेः
परमपदं प्रणयादभिष्टवीमि ॥ १ ॥

॥ श्रीगणेशाय नमः ॥

टी० ॥ सत्यं ज्ञानमनन्तमद्वयसुखं यद्ब्रह्म गत्वा गुरुं
मत्वा लब्धसमाधिभिर्मुनिवरैर्मोक्षाय साक्षात्कृतम् ॥
जातं नन्दतपोवनात्तदखिलानन्दाय वृन्दावने
वेणुं वादयदिन्दुसुन्दरमुखं वन्देऽरविन्देक्षणम् ॥ १ ॥
श्रीरामविश्वेश्वरमाधवानां
प्रणम्य पादाम्बुजपुण्यपांसून् ॥
तेषां प्रभावादहमस्मियोग्यः
शिलाऽपिचैतन्यमलब्ध येभ्यः ॥ २ ॥
पूर्वाचार्यवचो विचार्य निखिलं सत्संप्रदायाऽध्वना
हित्वोच्छृङ्खलमार्गमागमगिरां तात्पर्यपर्याप्तितः ॥
विच्छिद्याऽर्थविभागतः प्रकरणान्युद्ध्रित्य तत्त्वं रहः
कुर्वे संप्रति सारसंग्रहमिमं संक्षेपशारीरके ॥ ३ ॥
हित्वा हेयमुपादेयमुपादाय विचारतः ॥
प्रायेण पूर्वटीकानामिहाऽर्थः प्रकटीकृतः ॥ ४ ॥
विशेषाद्विश्ववेदस्य प्रत्यग्विष्णोश्चबुद्धयोः
व्याख्यानं मद्धियाऽलेखि गुरुणां तौ हि नौ गुरू ॥ ५ ॥

तत्र श्रीमच्छारीरकशास्त्रस्य तात्पर्यविषयीभूते मुमुक्षुजिज्ञास्ये निर्विशेषे ब्रह्मणि बोधनीये प्रासङ्गिकमुमुक्षुजिज्ञास्यसविशेषब्रह्मोपासनावाक्याऽनेकविधविचारविक्षिप्ततया दुरवबोधतामाकलय्य तद्विक्षेपपरित्यागेन मुमुक्षुजिज्ञास्यं निर्विशेषं ब्रह्म शास्त्रतात्पर्यविषयीभूतमनायासेन मुमुक्षुबोधाय संक्षेपशारीरकाख्येन श्लोकग्रन्थेनाविश्चकार करुणया श्रीसर्वज्ञात्माचार्यः ॥ अत एव मुमुक्षुजिज्ञास्यसविशेषब्रह्मप्रासङ्गिकविचारपरित्यागरूपसंक्षेपविशिष्टं निर्विशेषब्रह्मविचारात्मकं शारीरकशास्त्रमेवैतदिति संक्षेपशारीरकमिति समाख्याऽस्य युक्तैव ॥ तत्राऽऽद्यं श्लोकचतुष्टयं श्रीमच्छारीरकशास्त्रस्याऽऽद्यचतुःसूत्रीस्थानीयम् ॥ तत्र हि प्रथमसूत्रे ब्रह्मविद्याऽधिकारी शुद्धस्त्वंपदार्थो जिज्ञास्यब्रह्माऽभेदान्वययोग्यः प्रतिपादितः ॥ तयोर्भेदे हि स्वनिष्ठकर्तृत्वाद्यध्यासरूपबन्धनिवृत्तिकामस्य मुमुक्षोर्ब्रह्मणि जिज्ञासा न स्यात् ॥ अन्यज्ञानादन्यत्राऽध्यासनिवृत्तेरनुपपत्तेः तस्मात्तयोरनन्यत्वमेव ॥ द्वितीये सूत्रे च जगत्कारणत्वप्रदर्शनव्याजेन तत्पदार्थोऽपि शुद्धस्त्वंपदार्थाभेदान्वययोग्यस्तटस्थस्वरूपलक्षणाभ्यां प्रतिपादितः ॥ चतुर्थसूत्रे च तयोरैक्यमैकान्तिकं प्रतिपादितम् ॥ एतावदेव शास्त्रस्य प्रमेयं त्वंपदार्थस्तत्पदार्थोऽखण्डवाक्यार्थश्चेति ॥ एतत्प्रमाणं तु तत्त्वमस्यादिवेदान्तमहावाक्यरूपं शास्त्रं तच्चोक्तम् ॥ शास्त्रयोनित्वादिति तृतीयसूत्रे ॥ अत्राऽर्थक्रमस्य पाठक्रमाद्बलवत्त्वात्तृतीयचतुर्थसूत्रयोर्व्यत्यासो द्रष्टव्यः ॥ प्रमेये हि कथिते किमत्र प्रमाणमिति जिज्ञासायां प्रमाणं कथनीयं नान्यदाऽप्राप्तकालत्वात् ॥ एवमिहोचितक्रमेणैव त्वंपदार्थस्तत्पदार्थस्तदैक्यं चेति प्रमेयप्रतिपादनार्थास्त्रयः श्लोकाः प्रमाणप्रतिपादनार्थस्तु चतुर्थश्लोकः ॥ एतावता हि शास्त्रस्य विषयप्रयोजनसंबन्धाः प्रतिपादिता भवन्ति प्रत्यग्ब्रह्मणोरैकत्वमेव हि विचारपुरःसराद्वेदान्तवाक्यप्रमाणाद्विज्ञातं प्रयोजनं शास्त्रस्य एतदेवोपेयम् ॥ उपायस्तु द्विविधो विषयस्त्वंपदार्थस्तत्पदार्थश्चेति तस्य चाऽज्ञातत्वमात्रेण वेदान्तप्रमाणविषयत्वम् ॥ अज्ञातत्वमिथ्याविज्ञातत्वाभ्यां विचारविषयत्वमिति विवेकः। पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्य पदार्थद्वयरूपविषयकथनपुरः-

सरं वाक्यार्थरूपप्रयोजनकथनं क्रमेण कृतम् ॥ चतुर्थेन तु शास्त्रेण समं तयोः संबन्धः प्रतिपादितः ॥ एतावता हि संक्षेपेण कृत्स्न-शास्त्रार्थसमाप्तिः पराऽपरविद्ययोः पर्यवसानात् ॥ तथा च श्रुतिः ॥ द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवाऽपरा च तत्राऽपरा ऋग्वेदो यजुर्वेद इत्यादिना षडङ्गवेदचतुष्टयात्मकं शब्द-ब्रह्माऽपरविद्याविषयत्वेन व्याख्याय अथ परा यया तदक्षरमधिगम्यते इत्यादिना परं ब्रह्म परविद्याविषयं दर्शयति ॥ स्मृतिश्च ॥ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यदित्यादि ॥ उत्तरग्रन्थस्त्वस्यैव प्रपञ्च इति द्रष्टव्यम् ॥ संग्रहविवरणाभ्यां शिष्यबोधस्योद्देश्यत्वात् तत्र सत्यं ज्ञान-मनन्तं ब्रह्मेत्यादि श्रुत्यनुसारेण नपुंसकलिङ्गशब्दप्रयोगेण प्रथमः श्लोकः । सेयं देवतैक्षतेत्यादिश्रुत्यनुसारेण स्त्रीलिङ्गशब्दप्रयोगेण द्वितीयः श्लोकः ॥ स एष इह प्रविष्ट एष त आत्मान्तर्याम्यमृत इत्यादिश्रुत्यनुसारेण पुल्लि-ङ्गशब्दप्रयोगेण तृतीयः श्लोकः ॥ एतेन सर्वेऽपि ब्रह्मप्रतिपादकाः शब्दा व्याख्याताः ॥ अक्षरार्थस्तु ॥ मुरारेर्जगदुपद्रवकारिमुराऽऽख्यासुरसंहरणाज्जग-त्पालयितुः । श्रीविष्णोर्जगत्कारणमायासत्वांशप्रतिबिम्बचैतन्यात्मनोऽन्त-र्यामिणः परमं मायाकल्पितजगत्कारणत्वाऽऽदिशून्यत्वेन सर्वोत्कृष्टं बिम्ब-भूतं पदं स्वरूपमुपाधेः प्रतिबिम्बपक्षपातित्वेन बिम्बे स्वधर्माऽकल्पकत्वात् ॥ बिम्बेश्वरपक्षेऽज्ञानप्रतिबिम्बितजीवचैतन्यप्रतियोगितया बिम्बत्वेन व्यव-ह्रियमाणस्य विष्णोः परमं पदं बिम्बप्रतिबिम्बकल्पनाशून्यं निरुपाधिस्वरूपं बिम्बे तमोनिपतितप्रतिबिम्बेत्यादिनेश्वरस्य द्वैरूप्यं वक्ष्यति ॥ परमत्वं चा-ऽपरमत्वाऽऽपादकोपाधिराहित्येन ॥ पदत्वं चाऽविद्यातिरोधानापनयाय सर्वपदनीयत्वेन स्वरूपस्य द्रष्टव्यम् ॥ तद्विष्णोः परमं पदमिति श्रुतेः । तदे-तत्पदनीयमस्य सर्वस्य यदयमात्मेति श्रुतेश्च । अत्र षष्ठ्यन्तप्रथमान्ताभ्यां तत्पदस्य वाच्यं लक्ष्यं च त्वंपदलक्ष्याऽभिन्नाऽन्वययोग्यं दर्शितम् ॥ अत्र च हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥ अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावक इति स्मृतेः । सर्वोपद्रवकारिमुराख्यासुरारित्वेन भगव-

तत्त्वरूपं मङ्गलमाचरंस्तत्पदाऽभिष्टवलक्षणं मङ्गलान्तरमाचरति ॥ अभिष्टवीमीति ॥ अभितः स्तौमीत्यर्थः ॥ तुरुस्तुशम्यमः सार्वधातुके इत्यनेन विभाषयेडागमः ॥ अत्र निर्विशेषब्रह्मणि गुणविशिष्टगुण्यभिधानलक्षणायाः स्तुतेरसंभवात् स्तवीमीति निदिध्यासनेनाऽभितः प्रत्यगभिन्नतया आभीक्ष्ण्येन वा तदेकाग्रोऽस्मीत्यर्थ इति केचित् । ततस्स्तुतिरूपं तत्स्वरूपनिरूपणपरं ग्रन्थं करोमीत्यर्थ इत्यन्ये आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा इति टीकोक्तेरकल्पितधर्मस्य ब्रह्मण्यप्यनुपपत्तेः कल्पितसत्यत्वादिधर्मपुरस्कारेण गुणकथनरूपा स्तुतिर्मुख्यैव निर्गुणेऽपि वस्तुनि सम्भवतीति तु तत्त्वम् । अतोऽस्थाने निदिध्यासनप्रतिज्ञा ग्रन्थकरणारम्भप्रतिज्ञा मुख्यवृत्तिसंभवे जघन्यवृत्तिकल्पना च निरस्ता ॥ एतादृशभगवत्स्तुतौ च तद्भक्तिरेवाऽसाधारणं कारणमित्याह । प्रणयादिति । प्रणयः परा प्रीतिर्भक्तिरित्यर्थः । सा हि स्वरसतः परमानन्दरूपे परमात्मनि समुल्लसन्ती धारासन्ततिरूपा मनोवृत्तिर्भगवती भक्तिरित्युच्यते । तया चाऽविघ्नेन सत्त्वशुद्धिज्ञानप्राप्त्यादिद्वारेण परं निःश्रेयसं लभ्यते यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति श्रुतेः ॥ भजतां प्रीतिपूर्वकं । ददामि बुद्धियोगं तमिति स्मृतेः । ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाभावश्चेति योगसूत्राच्च । निर्गुणेऽपि ब्रह्मणि भक्तिरुपपद्यत इति व्याख्यातं भगवद्गीतासु चतुर्विधा भजन्ते मामित्यादिना अभिष्टवे प्रकृष्टनयाऽनपेक्षणाद्वृद्धिभङ्गदोषाच्च न प्रकृष्टो नयः प्रणय इति व्याख्यानमुपादेयम् ॥ तत्र निर्विशेषे वस्तुनि जगत्त्वेन जीवत्वेन परमेश्वरत्वेन च प्राप्तां विक्रियां निषेधत्यविक्रियमिति । जगति जन्माऽऽद्या विक्रियाः जीवे जाग्रदाद्या ईशे सृष्ट्याद्या विक्रिया मायया प्रसक्ता निर्विशेषे वस्तुनि सर्वथा न सम्भवन्तीति तदविक्रियम् ॥ एतेन सर्वविकारशून्यत्वात्सर्वेन्द्रियाऽग्राह्यतारूपा सूक्ष्मता सर्वोपाधिसंबन्धशून्यतारूपा नित्यमुक्तता च दर्शिता एवं सामान्यतः सर्वविक्रियाशून्यतामुक्त्वा विशेषेणाऽप्याह ॥ अनृतेत्यादिना ॥ अत्राऽनृतविरोधि परमार्थसत्यमबाध्यम् ॥ जडविरोधि स्वप्रकाशं ज्ञा-

Digitized by Google

नम् ॥ रूपं सर्वानुस्यूतसन्मात्रम् ॥ अन्तत्रयविरुद्धम् । अन्तानां देशकालवस्तुपरिच्छेदानां यत्त्रयं तद्विरुद्धं देशपरिच्छेदो ह्यत्यन्ताऽभावस्तदप्रतियोगित्वेन विभु कालपरिच्छेदौ च ध्वंसप्रागभावौ तदप्रतियोगित्वेन नित्यम् ॥ वस्तुपरिच्छेदश्चाऽन्योन्याभावः तदप्रतियोगित्वेनाऽद्वितीयम् । एतेन प्रपञ्चधर्माणामनृतत्वजडत्वव्यावृत्तरूपत्वाऽविभुत्वाऽनित्यत्वसद्वितीयत्वानां व्यावृत्तिः सिद्धा । मलबन्धनदुःखताविरुद्धमिति जीवधर्माणां व्यावृत्तिः ॥ मलः कर्तृत्वभोक्तृत्वरागादिलेपोऽशुद्धिस्तद्विरुद्धं कर्तृत्वादिलेपशून्यं शुद्धं बन्धनं धर्माधर्मतत्फलसंबन्धस्तद्विरुद्धं मुक्तं दुःखताविरुद्धं परमानन्दरूपं न तु तदाश्रयः ॥ नाऽपि दुःखरूपस्तदाश्रयो वा जीवो हि रागादिमलैर्धर्माधर्मादिबन्धनेन सुखदुःखाश्रयत्वेन च प्रसिद्धः ॥ अतिनिकटमितीश्वराद्व्यावृत्तिः । वादिभिर्हि परोक्षः पर एवेश्वरः कल्पितः ॥ इदं त्वतिनिकटं साक्षादपरोक्षं प्रत्यगात्मस्वरूपमत्यव्यवहितमित्यर्थः एतेन सत्यं ज्ञानमनन्तं ब्रह्म ॥ तदेतद्ब्रह्माऽपूर्वमनपरमनन्तरमबाह्यम् ॥ सदेवसोम्येदमग्र आसीदेकमेवाऽद्वितीयं नित्यं विभुं सर्वगतं सुसूक्ष्मं विमुक्तश्च विमुच्यते न वर्द्धते कर्मणा नो कनीयान् शुद्धमपापविद्धम् एष एव परम आनन्दः । यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः अयमात्मा ब्रह्म न जायते म्रियते वा विपश्चित् निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनमित्याद्याः श्रुतयोऽसत्यत्वादितद्भ्रमापोहेनाऽखण्डं प्रत्यगभिन्नं ब्रह्म मुमुक्षुजिज्ञास्यं प्रतिपादयन्ति ॥ न तु सत्यत्वादिरूपेण तस्य निर्विशेषत्वेन सर्वधर्मानाधारत्वादिति प्रतिपादितं भवति ॥ सर्वविशेषणानां समुच्चयमेकेन श्लोकेन वक्ष्यति ॥ नित्यः शुद्धो बुद्धमुक्तस्वभाव इत्यादिना ॥ अत्र प्रथमं नगणद्वयवता पुष्पिताग्राख्येन छन्दसाऽर्द्धसमेन कविरीत्याऽपि मङ्गलमाचरितम् ॥ अकारादिपदचतुष्टयोपन्यासश्च श्लोकग्रन्थकरणकौशलप्रदर्शनाय ॥ प्रणवप्रथमाऽवयवोच्चारणेन मङ्गलाऽतिशयाय च ॥ अइति ब्रह्म ॥ अकारो वै सर्वा वागिति च श्रुतेः ॥ १ ॥

मू० ॥ स्वाऽज्ञानकल्पितजगत्परमेश्वरत्व-
जीवत्वभेदकलुषीकृतभूमभावा ।

स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥ २ ॥

टी० ॥ एवं जिज्ञास्यब्रह्मप्रदर्शनेन प्रथमसूत्रार्थो दर्शितोऽतः परं द्वितीयसूत्रार्थः प्रदर्श्यते ॥ पूर्वत्र जगद्धर्माणां जीवधर्माणामीश्वरधर्माणां चाऽपवादो दर्शितः सचाऽध्यारोपमन्तरेण न संभवति ॥ प्रसक्तस्यैव प्रतिषेधाऽर्हत्वादित्यभिप्रेत्याध्यारोपमाह ॥ स्वाऽज्ञानेति । स्वस्य स्वस्मिन्यदज्ञानं स्वाश्रयविषयकमविद्यामायाशब्दितमनादिभावरूपमनिर्वाच्यमावरणविक्षेपशक्तिमदज्ञानन्तेनाऽऽवरणशक्त्याऽऽत्मस्वरूपभानन्तिरोधाय विक्षेपशक्त्या कल्पितान्यध्यस्तानि यानि जगत्परमेश्वरत्वजीवत्वानि तैरनुयोगित्वेन प्रतियोगित्वेन च तन्निमित्तो जीवजगद्भेदो जीवपरमेश्वरभेदो जीवपरस्परभेदो जगत्परस्परभेदो जगत्परमेश्वरभेदश्चेति यः पञ्चविधो भेदस्तेन च कलुषीकृतोऽकलुषोऽपि कलुषः कृतोऽध्यारोपितदोषेणाऽसत्कल्पतामापादितो भूमा बाहुल्यं यस्य स तादृक्कलुषीकृतभूमा भावः सद्भावो यस्याः सा तथा ॥ जगज्जडत्वात्स्वरूपेणैव कल्पितम् ॥ जीवेश्वरौ तु चैतन्यरूपत्वात्स्वरूपेण सन्तौ केवलमेकस्मिन्नेव चैतन्ये बिम्बप्रतिबिम्बादिभावेन जीवत्वमीश्वरत्वं च कल्पितमिति बोधयितुं द्वयोः प्रयोगः ॥ चितेर्भावो न कलुषीकृतः सर्वभासकत्वेन सर्वदा प्रकाशमानत्वात् किन्तु तत्तद्भेदकल्पनया तदपरिच्छिन्नत्वरूपो भूमैव कलुषीकृतः ॥ पूर्णत्वेनाप्रकाशमानत्वात् ॥ तदुक्तं वार्तिके ॥ तन्त्वेकमपि चैतन्यं बहुधा प्रविभज्यते ॥ अङ्गारकितमुत्पातैर्वारिरशेरिवोदकमिति ॥ भूम्ना भाव इति व्याख्यानमनुपादेयं बहोर्भावस्य भूमशब्दवाच्यत्वेन भावशब्दवैयर्थ्यापत्तेः ॥ कलुषीकारणेन किं भूमा नाशितो नेत्याह ॥ स्वाभाविकेति ॥ भूम्नः कलुषीकरणं हि परिच्छिन्नत्वाऽऽरोपमात्रं न तु स्वरूपहानिः ॥ आरोपेण वस्तुसत्ताऽनपायात् ॥ यत्र यदध्यस्तं तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणाऽपि स न सम्बध्यत इति न्यायात् ॥ स्वाभाविकी नित्यसिद्धाऽध्यासहस्रेणाऽप्यपनेतुमशक्या स्वमहिमस्थितिः स्वरूपादप्रच्युतिर्यस्याः सा तथा तथापि सर्वाध्यासकारणस्याऽज्ञानस्याऽनारोपितत्वात्तेनैव द्वितीयेनाऽद्वितीयस्वरूपो भूमा कलुषः कृत इत्यत आह ॥

ध्वस्तमोहेति ॥ ध्वस्तोऽध्यस्तोऽपरमार्थसन्मोहोऽज्ञानाख्यो यस्यां सा तथा ॥ अज्ञानाऽध्यासस्याऽप्यज्ञानमूलत्वादनादित्वाच्च नाऽऽत्माश्रया-दिदोषप्रसङ्गः ॥ तदुक्तं वार्तिके ॥ अविद्यास्तीत्यविद्यायामेवाऽऽसित्वा प्रकल्प्यते ॥ ब्रह्मदृष्ट्या त्वविद्येयं न कथं चन युज्यत इति ॥ ननु अज्ञानाऽध्यासस्य किमधिष्ठानं न जीव ईश्वरो वाऽनयोरध्यासप-रिनिष्पन्नत्वेनाऽन्योन्याश्रयात् ॥ नाऽपरस्तदनिरूपणादित्याशङ्क्याह ॥ प्रत्यक्चितिरिति ॥ प्रतीची जीवेश्वरविभागरहिता चितिः स्वप्र-काशज्ञप्तिः सा भुवनस्याऽज्ञानसहितस्याऽध्यस्तस्याऽऽकाशादिप्रपञ्चस्य विभ्रमस्य योनिरज्ञानद्वारोपादानम् ॥ एकैव योनिर्न द्वितीयसापेक्षाऽसत्य-त्वेनाऽज्ञातत्वेन च तस्या एवाऽधिष्ठानत्वोपपत्तेः ॥ तथा च वक्ष्यति ॥ आ-श्रयत्वविषयत्वभागिनी निर्विभागचितिरेवकेवलेति ॥ वार्तिकं च ॥ आन्-त्यात्कार्यात्तदेव स्यादग्रदाद्यं प्रति कारणमिति । सा च विजयते परमा-र्थसत्यस्वप्रकाशपरमानन्दरूपत्वेन सर्वोत्कृष्टा भवति । अतस्तां प्रत्य-स्मि प्रणत इति ध्वन्यते । तस्मादेवमध्यारोपसम्भवादनृतजडविरोधी-त्यादिना तदपवादो युक्त एव । भुवनैकयोनिरिति तटस्थलक्षणं प्रत्यक्चि-तिरिति स्वरूपलक्षणमिति विवेकः ॥ एतेन मिथ्याप्रपञ्चोपादानत्वेन स-त्यद्वाक्यनिरूपणाज्जन्माद्यस्य यत इति व्याख्यातम् ॥ २ ॥

मू० ॥ प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं ।
प्रक्षीणकारणविकारविभागमेकम् ॥
चैतन्यमात्रपरमार्थनिजस्वभावं ।
प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम् ॥ ३ ॥

टी० ॥ एवं त्वंपदार्थे तत्पदार्थे च विषयमुक्त्वाप्रयोजनकथनाय वाक्यार्थमाह ॥ प्रत्यगिति ॥ प्रत्यञ्चमिति त्वंपदार्थः । अच्युतमिति तत्प-दार्थः । एकमिति तयोरगौणमैक्यं वाक्यार्थः॥ तमहं श्रवणादिपरिपाकवशात् स्थितप्रज्ञः नित्यं सर्वदा प्रणतोऽस्मि देहेन्द्रियादिप्रतिभासाऽवस्थायां प्रह्वीभावेन पूजयामि। ननु कथमेकत्वं मुख्यं सत्यज्ञानाद्यपुनरुक्ताऽनेकशब्द-

प्रतिपाद्यमस्त्वावित्यत आह ॥ चैतन्येति । वाक्यार्थे भेदप्रतिभासेऽपि चैतन्यमात्रस्यैव परमार्थोऽनौपाधिकस्वभावस्य लक्ष्यत्वान्नैकवाक्यविरोध इत्यर्थः । चैतन्यमात्रमेवपरमार्थोऽन्यन्नाऽबाध्यः परमाऽऽनन्दरूपत्वेन परमप्रयोजनरूपो वा निजोऽनुपाधिकः स्वभावः स्वरूपं यस्य तमित्यक्षरार्थः । ननु जीवस्य कार्यकारणाऽऽदिविभागवत्त्वेन सद्वितीयत्वादीश्वरस्य च परोक्षत्वेन पराक्त्वात्कथं तयोरैक्यमिति तत्राह ॥ प्रक्षीणेति । असत्येति च । प्रक्षीणः प्रज्ञानेन बाधितः प्रमातृत्वकर्तृत्वभोक्तृत्वाऽऽदिरूपः कारणविकारविभागो हेतुफलसन्तानो मायाऽऽकाशादिप्रपञ्चो वा यस्मिंस्तं निर्विभागं संसारदशायामपि परमार्थतो द्वैतरहितमित्यर्थः ॥ एवमसत्यःसर्वथा बाधितः परायपेक्षाऽहमिति व्यपदेशाऽनर्हत्वेन प्रत्यगूपाऽद्वैतो यस्मिंस्तं साक्षादपरोक्षमित्यर्थः ॥ प्रक्षीणोऽद्वितीयाऽच्युताऽभेदबोधफलं प्रक्षीणेति । अच्युतस्याऽपरोक्षप्रत्यगभेदबोधफलमसत्येति विवेकः । ननु प्रक्षीणकार्यकारणविभागस्य प्रमातृत्वादिशून्यस्य प्रमाणाभावादसिद्धिः ॥ प्रमाणाऽभ्युपगमे च कार्यकारणविभागाऽऽपत्तिरित्याशङ्क्याह ॥ प्रत्यक्प्रमाणकमिति ॥ प्रत्यक्स्वरूपमेव प्रमाणं यस्मिंस्तं स्वप्रकाशचैतन्यरूपतया स्वभिन्नमानाऽनपेक्षं स्वत एव सिद्धमित्यर्थः ॥ एतेनाऽखण्डवाक्यार्थकथनात्तत्तु समन्वयादिति व्याख्यातं वसन्ततिलकावृत्तम् ॥ ३ ॥

मू० ॥ औत्पत्तिकी शक्तिरशेषवस्तु-
प्रकाशने कार्यवशेन यस्याः ॥
विज्ञायते विश्वविवर्तहेतो-
र्नमामि तां वाचमचिन्त्यशक्तिम् ॥ ४ ॥

टी० ॥ एवं त्वंपदार्थस्तत्पदार्थोऽखण्डवाक्यार्थश्चेति शास्त्रस्य प्रमेयमुक्तम् ॥ अधुना तत्प्रमाणं वेदान्तवाक्यं दर्शयितुं निखिलवेदाभिमानिनीं वाग्देवतां प्रणमति ॥ औत्पत्तिकीति ॥ शास्त्रयोनित्वादिति सूत्रे हि प्रथमेन वर्णकेन ब्रह्मणो वेदोपादानत्वं द्वितीयेन तु वर्णकेन ब्रह्मणि तस्य प्रामाण्यं दर्शितं तदुभयमप्यनेन प्रदर्श्यते ॥ विश्वः सर्वोऽपि प्रपञ्चो विव-

Digitized by Google

तो ऽतत्त्वतो ऽन्यथाभावः ॥ कारणसत्तया सत्तावान् ॥ कारणप्रकाशेन च प्रकाशवान् यस्य स सर्वसत्तास्फूर्तिप्रदः परमात्मा विश्वविवर्तः स एव हेतुरुपादानं यस्याः सर्वप्रकाशशक्तिमत्परमेश्वरोपादानकत्वेन सर्वप्रकाशनफलयोगिन्याः अखिलवस्तूनामिक्षुक्षीरादिमाधुर्यादीनामपि प्रकाशने नानाविधाभिर्वृत्तिभिरौत्पत्तिकी अकृत्रिमा शक्तिः प्रतिपादकतारूपा प्रतिपत्तिरूपका विशेन वृद्धव्यवहारेषु विज्ञायते तर्ककुशलैर्यस्या वेदलक्षणाया वाचस्ताम्। कथमेतस्या ईदृशं सामर्थ्यमिति चिन्तयितुमशक्या शक्तिः प्रभावो यस्यास्तामहं नमामीति सर्वप्रकाशनशक्तिमत्परमेश्वरोपादानत्वं वेदस्य सर्वप्रकाशनसामर्थ्ये हेतुरिति प्रथमवर्णकार्थः । शेषः परार्थः । न शेषो ऽशेषः सर्वपुरुषार्थस्तादृशं सर्वशेषिभूतं वस्तु परमार्थसद्ब्रह्म तत्प्रकाशने तदाकारवृत्त्युत्पादनेन तदज्ञाना ऽऽवरणापनये यस्या वेदलक्षणाया वाचः औत्पत्तिकी शक्तिः कार्यवशेन ब्रह्मसाक्षात्काराख्यकार्यलिङ्गेन विज्ञायते । कीदृश्याः विश्वविवर्तस्य कृत्स्नप्रपञ्चस्य हेतोः कारणभूतायाः एत इति वै प्रजापतिर्देवानसृजत असृग्रमिति मनुष्यानिन्दव इति पितॄंस्तिरःपवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभिसौभगेत्यन्याः प्रजा इति छान्दोग्यब्राह्मणश्रुतेः । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तय इति । नाम रूपञ्च भूतानां कर्मणाञ्च प्रवर्तनम् । वेदशब्देभ्य एवा ऽऽदौ निर्ममे स महेश्वर इति च मनुस्मृतेः । शब्द इति चेन्ना ऽतः प्रभवात्प्रत्यक्षा ऽनुमानाभ्यामिति सूत्रे श्रुतिस्मृती एवैते प्रत्यक्षा ऽनुमानशब्दाभ्यामुक्ते ॥ ननु यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति सर्वप्रमाणागोचरत्वश्रुतेः कथन्तादृशे ब्रह्मणि वाचः शक्तिरिति तत्रा ऽऽह । अचिन्त्यशक्तिमिति । तां नमामीति च पूर्ववत् । यथा च लक्षणया वा मुख्यवृत्त्या वोभयाभावे ऽपि स्वत एव षड्विधतात्पर्यलिङ्गोपेतोपनिषच्चिर्विशेषमपि ब्रह्म बोधयति । तथा विस्तारेण स्पष्टतरमुपरिष्टात्तत्प्रदर्शयिष्यते । तदेवं निर्विशेषे ब्रह्मणि वेदान्तवाक्यमेव प्रमाणमिति द्वितीयवर्णकार्थः । एवं प्रत्यग्ब्रह्मैक्या ऽऽख्यविषयेण समं प्रतिपाद्यप्रतिपादकलक्षणः संबन्धो वेदान्तानां दर्शितः वेदान्त-

चत्वतुर्लक्षणमीमांसाख्यशास्त्रस्य शास्त्रवत्तत्प्रकरणस्याऽस्येति द्रष्टव्यम् ॥ इन्द्रवज्रोपेन्द्रवज्रोपजातिवृत्तम् ॥ चतुःसूत्र्यर्थकथनेन मङ्गलम् ॥ ४ ॥

मू० ॥ आरम्भाः फलिनः प्रसन्नहृदयो यश्चेत्तिरश्चामपि
नो चेद्विश्वसृजोऽप्यलं विफलतामायान्त्युपायोद्यमाः ॥
विश्वैश्वर्यमतोनिरङ्कुशमभूद्यस्यैव विश्वप्रभोः
सोऽयं विश्वहिते रतो विजयते विघ्नेश्वरो विश्वकृत् ॥ ५ ॥

टी० ॥ अथ विघ्नेश्वरं प्रसादयति ॥ आरम्भा इति ॥ यश्चेत्प्रसन्नहृदयोऽनुग्राहकस्तदा तिरश्चामपि सुग्रीवहनुमत्प्रभृतीनामारम्भा अभिमतक्रियोद्यमाः फलिनः फलाऽव्यभिचारिणः साऽतिशयफला वा भवन्ति ॥ नित्ययोगेऽतिशायने वा तद्धितः ॥ नो चेत्प्रसन्नहृदयस्तदा विश्वसृजो ब्रह्मणोऽपि किमुताऽन्येषामलमत्यर्थमपि ये फलोपायविषया उद्यमास्ते विफलतां व्यर्थतां यान्ति ॥ ब्रह्मणोऽप्यभिमतभङ्गो वत्साहरणादौ स्मर्यते ॥ अत एवमन्वयव्यतिरेकाभ्यां विश्वस्मिन्नैश्वर्यं निग्रहाऽनुग्रहसामर्थ्यं विश्वप्रभोः सर्वप्रशासितुर्भीषाऽस्माद्वातः पवत इत्यादिश्रुतिसिद्धस्य यस्यैव निरङ्कुशमप्रतिहतमभूत्सोऽयंविश्वकृद्विघ्नतदभावाऽऽदिकृत्स्नप्रपञ्चकृद्भगवानेव विघ्नेश्वरः श्रीगणेशरूपेणाऽवतीर्णो विजयते सर्वोत्कर्षेण वर्तमानेऽस्माननुगृह्णात्वित्यर्थः ॥ तस्याऽभक्तविघ्नकारिणोऽपि भक्तविघ्ननिवारणायाऽवतारे हेतुर्विश्वहितेरत इति रूपेव तस्याऽवतारे कारणमित्यर्थः ॥ तस्य सर्वात्मत्वैकरूपत्वेऽपि तद्भजनाऽभजनयोरेव विषमफलस्वभावत्वान्न वैषम्यनैर्घृण्य प्रसङ्ग इति भावः ॥ शार्दूलविक्रीडितम् ॥ ५ ॥

मू० ॥ वाग्विस्तरा यस्य बृहत्तरङ्गा
वेलातटं वस्तुनि तत्त्वबोधः ॥
रत्नानि तर्कप्रसरप्रकाराः
पुनात्वसौ व्यासपयोनिधिर्नः ॥ ६ ॥

टी० ॥ अतः परं सूत्रभाष्यकारवार्तिककारान्गुरूपूर्वक्रमेण पूजयति

त्रिभिः ॥ तत्र रत्नाकररूपकेण भगवन्तं व्यासं विष्ण्ववतारं सूत्रकारं प्रथमगुरुं स्तौति ॥ वाग्विस्तरा इति ॥ व्यास एव पयोनिधिः महत्त्वपवित्रत्वगम्भीरत्वस्वच्छत्वादिसाम्यात्तस्य च पयःस्थानीया वेदा एव द्रष्टव्याः ॥ वाचां तरङ्गोक्तिर्व्यासशब्देन वेदव्यसनगुणोपन्यासाच्च ॥ दृष्टमात्राः पुनन्त्येते राजा भितुर्महोदधिरिति स्मृतेः ॥ स नः पुनातु पापमलरहितान्करोत्वित्युक्तम् ॥ यस्य वेदपयसः श्रीव्यासपयोधेर्वाचो वेदलक्षणाया ये विस्तरास्तत्तच्छाखाभेदास्त एव बृहन्तस्तरङ्गाः ॥ विस्तरबृहत्त्वशब्दाभ्यां संक्षिप्ता वाक् सूक्ष्मतरङ्गा इति द्योतितं वेलायास्तीरस्य तटं प्रान्तदेशस्तस्येव तरङ्गवेगाऽवसानभूमित्वाद्वस्तुनि ब्रह्मण्याऽऽत्मैक्ये तत्त्वबोधः ॥ शिष्याणामिति शेषः ॥ सूत्रकारस्य वाक्प्रवृत्तेः शिष्यज्ञानार्थत्वेन तत्सिद्धावेवोपरतिसिद्धेर्युक्तं तस्य तटत्वम् ॥ पदार्थसिद्धौ पदार्थद्वयशोधने वाक्यार्थनिर्णये तदुपयुक्तप्रमेयस्थितिषु च ये तर्काणां प्रसरणप्रकारास्त एव उपादेयत्वस्वप्रकाशत्वादिसाम्याद्रत्नानि । एतेन रत्नानां पद्मरागेन्द्रनीलादिविविधवैलक्षण्यवत्तर्काणामपि विविधवैलक्षण्यं सूचितम् ॥ यच्छब्दस्य तच्छब्दसापेक्षत्वाद्वाचामिति स इत्यर्थः ॥ इन्द्रवज्रोपेन्द्रवज्रोपजातिः ॥ ६ ॥

मू० ॥ वक्तारमासाद्य यमेव नित्या
सरस्वती स्वार्थसमन्विताऽऽसीत् ॥
निरस्तदुस्तर्ककलङ्कपङ्का
नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥ ७ ॥

टी० ॥ सत्संप्रदायेन भाष्यकर्तारं शङ्कराऽवतारं श्रीशङ्कराऽऽचार्यं प्रणमति ॥ वक्तारमिति । यमेव व्याख्यातारमासाद्य नित्या सरस्वती वेदलक्षणा निरस्ता निर्मूलिता दुष्टतर्का एव मालिन्यहेतुत्वात् कलङ्काश्च तन्मग्नानां पुनरुत्थानाऽसंभवात्पङ्काश्च यस्याः सा सर्वदुस्तर्कदोषनिरासेन स्वतात्पर्यविषयीभूताऽर्थसमन्वितत्वेन प्रकटाऽऽसीत्तं शङ्करं सर्वकल्याणभरं भगवदवतारत्वेन सर्वपूजितपादपद्मं नमामीति संबन्धः ॥ जैमिन्यादिभिर्हि कर्मकाण्डमेव स्वाऽर्थसमन्वितं कृतमुपनिषदस्तु स्वाऽर्थात्प्रच्याविताः कैश्चिच्च भेदवि-

नयवादिभिरुपनिषदः स्वार्थसमन्विताः कृताः कर्मकाण्डं तु स्वार्थात्प्रच्यावितम् ॥ भगवता व्यासेन च विविदिषावाक्यं विचारयता यद्यपि कर्मकाण्डब्रह्मकाण्डयोस्तुल्यमेव प्रामाण्यमङ्गीकृतं तथापि तावन्मात्रेण न स्वार्थसमन्वितता कैश्चित्तत्सूत्रं व्याचक्षाणैर्भर्तृप्रपञ्चादिभिर्भेदाभेदवेदार्थस्य वेदार्थत्ववर्णनात्श्रीमद्भगवत्पूज्यपादैस्तु व्यावहारिकत्वेन कर्मकाण्डप्रामाण्यप्रवृत्त्यादि व्यवस्थाप्य वेदान्तानां तात्त्विकशुद्धाऽद्वैतपरत्वं व्यवस्थापितमिति स्वार्थसमन्वितत्वं कृत्स्नवेदस्य संपन्नमिति महिमाऽतिशयं दर्शयितुं यमेवेत्येवकारः प्रयुक्तः ॥ उपजातिः ॥ ७ ॥

मू० ॥ यदीयसंपर्कमवाप्य केवलं
वयं कृतार्था निरवद्यकीर्तयः ॥
जगन्तु ते तारितशिष्यपङ्क्तयो
जयन्ति देवेश्वरपादरेणवः ॥ ८ ॥

टी० ॥ इदानीं स्वगुरुं वार्तिककारं पूजयति ॥ यदीयेति ॥ देवेश्वरस्य सुरेश्वराऽऽचार्यस्य ते पादरेणवो जयन्ति सर्वोत्कर्षेण वर्तन्ते तान्प्रत्यस्मि प्रणत इत्यर्थः ॥ येषां पादरेणवोऽपि सर्वोत्कृष्टास्तेषामुत्कर्षः केन वक्तुं शक्यत इत्यभिप्रायः ॥ सुरपदस्थाने देवपदप्रयोगः साक्षाद्गुरुनामाऽग्रहणाय गुरोर्नाम न गृह्णीयादिति स्मृतेः ॥ कीदृशास्ते तारिताः संसारसमुद्रपारं गमिताः शिष्यपङ्क्तयोऽस्मदादिशिष्यसमूहा यैः पांसुभिस्ते तथा येषां पादरेणवोऽपि शिष्यांस्तारयन्ति ते स्वयं तारयन्तीति किमु वक्तव्यम् ॥ यदीयानां यत्संबन्धिनां पवनादीनामपि संपर्कं संबन्धं केवलमवाप्य साधनान्तरशून्या अपि वयं सर्वेऽपि तच्छिष्याः कृतार्थाः कृतप्रयोजना ब्रह्मसाक्षात्कारेण जीवन्मुक्ताः जगत्सु लोकेषु च सद्ग्रन्थकरणाऽऽध्यापनादिना निरवद्यकीर्तयो निर्मलयशसो वयमिति महाफलावान्तरफलकीर्तनम् ॥ अतः सर्वथा ते नमस्या एवेत्यभिप्रायः ॥ वंशस्थम् ॥ ८ ॥

मू० ॥ गुरुचरणसरोजसन्निधाना-
दपिवयमस्य मुखेकलेशभाजः ॥

Digitized by Google

अपि महति जलार्णवे निमग्नाः
सलिलमुपाददते मितं हि मीनाः ॥ ६ ॥

टी० ॥ गुरुस्तुतिशेषत्वेन ये प्रस्तारिते आत्मनः कृतार्थत्वनिरवद्यकीर्तित्वे ताभ्यां प्राप्तमात्मन औद्धत्यमपाकरोति ॥ गुरुचरणेति अनेककल्याणगुणार्णवस्य गुरोश्चरणसरोजयोर्महासौभाग्यशालिनोः संनिधानादनेकगुणार्पणयोग्यादपि वयं तच्छिष्याः सर्वोऽप्यस्य गुरोर्गुणैकलेशमेव भजामो न तु बहुतरं स्वायोग्यत्वात् ॥ स्तुतावेकवचनमपि प्रयोज्यमित्यस्येति न विरुध्यते स्वायोग्यत्वेन बहुप्राप्त्यसंनिधानेऽप्यल्पग्रहणे दृष्टान्तमाहाऽपि महतीति ॥ चतुःषष्टिलक्षयोजनविस्तृततयाऽतिविपुले शुद्धोदाख्ये सप्तमे समुद्रे निमग्नाः कार्त्स्न्येन तत्संबद्धा अपि मीनाः सलिलं मितमल्पमेवोपाददते गृह्णन्ति ॥ स्वायोग्यत्वेनेति लोकप्रसिद्धमित्यर्थोऽन्तरन्यासः ॥ ६ ॥

मू० ॥ शक्तो गुरोश्चरणयोर्निकटे निवासा-
न्नारायणस्मरणतश्च निरन्तरायः
शारीरकार्थविषयावगतिप्रधानं
संक्षेपतः प्रकरणं करवाणि हृष्यन् ॥ १० ॥

टी० ॥ एवमल्पज्ञत्वेन ग्रन्थकरणाऽशक्तौ प्राप्तायामाह ॥ शक्त इत्यादिना ॥ गुरोश्चन्दनवृक्षस्येवाऽन्यत्र स्वगुणसंचारणसमर्थस्य निकटे निवासाच्छक्तोऽहमिति कारणपौष्कल्यं दर्शयित्वा महत्यारम्भे विघ्नबाहुल्यसंभवात्तदभावमाह ॥ गुरोर्नारायणस्मरणतः तद्रूपादाशीर्वादाच्च निरन्तरायो निर्विघ्नोऽहमतो गुरुचरणसमीपवासात्पादसंवाहनादिसमये तत्तत्प्रश्नैरप्रतिपत्तिविप्रतिपत्तिनिराकरणेन शास्त्रार्थज्ञानरूपसामग्रीसंभवाद्गुरुनारायणस्मरणतश्च निखिलविघ्ननिवृत्तिसंभवाद्ग्रन्थकरणानुकूलसकलोपकरणसंपत्त्या हृष्यन्हर्षंप्राप्नुवन्प्रकरणं शास्त्रैकदेशसंबद्धं शास्त्रप्रयोजनापेक्षया प्रयोजनातिशययुक्तं ग्रन्थविशेषं करवाणि कुर्याम् ॥ शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम् ॥ आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः

इति विष्णुधर्मोत्तरस्मरणात् ॥ शरीरमेव कुत्सितत्वाच्छरीरकं तत्र भवः शारीरको जीवस्तस्य तत्त्वमधिकृत्य कृतो ग्रन्थश्चतुर्लक्षणशारीरकमीमांसालक्षणोऽपि शारीरकः ॥ शारीरं जीवं ब्रह्मतया कायतीति वा तस्याऽर्थः प्रयोजनं विषयश्च यस्य तत्तथा ॥ अवगतिरज्ञाननिवर्तिका निर्गुणब्रह्मविद्या सैव प्रधानं विचार्यत्वेन तात्पर्यविषयीभूतं यस्य तच्च तच्चेति कर्मधारयः ॥ अनेन शास्त्रैकदेशसंबन्धो दर्शितः ॥ संक्षेपत इति सगुणविद्याविचारबाहुल्यपरित्यागरूपेण संक्षेपेणेति शास्त्रात्प्रयोजनान्तरं दर्शितं प्रागेव विवृतमेतत् गुरुप्रशंसापूर्वकं ग्रन्थाऽऽरम्भप्रतिज्ञा ॥ १० ॥

मू० ॥ पदवाक्यमाननिपुणा निपुणं
विमृशन्त्विदं प्रकरणं मनसा ॥
गुणदोषनिर्णयनिमित्ततया
प्रथिता हि पण्डितजना जगति ॥ ११ ॥

टी० ॥ ननु स्वस्यैवाऽन्यस्याऽपि मूलशास्त्रादेव तदवगतिसंभवात्किमनेनेत्याशङ्क्य स्वस्य विद्याशुद्धिरसाधारणं प्रयोजनमित्याह ॥ पदवाक्येति ॥ अथ वा गुरुप्रशंसया गुरुव्यतिरिक्तेषु विद्वत्सु अनादरात्तैरपरिगृहीतोऽयं ग्रन्थो न प्रचरेदित्यभिप्रेत्य तानंम नर्पानयति । पदवाक्येति ॥ पदनिपुणा वैयाकरणा वाक्यनिपुणा मीमांसका माननिपुणास्तार्किकास्तेषां तद्विचारकुशलत्वात् इदं प्रकरणं पदतो वाक्यतो मानतश्च निपुणमवधानेन मनसा स्वबुध्या विमृशन्तु विचारयन्तु निपुणं मनसेति विशेषणाभ्यामनवधानं मत्प्रत्ययं च वारयति ॥ प्रार्थितानां तेषां गुणदोषनिर्णयाय प्रवृत्तौ कारुण्यमेव हेतुरित्याह ॥ गुणदोषेति तथा चोक्तं कविना ॥ आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् । बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत इति ग्रन्थनिर्माणमात्रं मदधीनं विशुद्धिस्तु निर्मत्सरविद्वदधीनेत्यर्थः ॥ ११ ॥

मू० ॥ विद्वांसो यदि मम दोषमुद्धरेयु-
र्यद्वा ते गुणगणमेव कीर्तयेयुः ॥

Digitized by Google

तुल्यं तद्बहु मनुते मनो मदीयं
कष्टं तद्बत मनुते यदाह मन्दः ॥ १२ ॥

टी० ॥ नन्वस्माभिर्नैपुणं विमृशद्भिः दोषकीर्तने क्रियमाणे तव दुःखमेव स्यादित्याशङ्क्याऽऽह ॥ विद्वांस इति ॥ निर्मत्सरा विद्वांसो गुणदोषपरीक्षका यदि मम ग्रन्थे दोषं हानाय कथयेयुर्गुणगणं चोपादानाय कथयेयुः ॥ तद्दोषकथनं गुणकथनं च तुल्यं सममेव बहु मनुते ॥ आदरेणाऽङ्गीकरोति मम मनो न तु वाङ्मात्रम् ॥ दोषकीर्तने हि सति तन्निवारणान्निर्दोषो ग्रन्थः शुद्धः स्यादित्यभिप्रायेण दोषकीर्तनं ग्रन्थशुद्धिरूपगुणपर्यवसानाद्गुण एवेति महाननुग्रह इत्यभिप्रायः यस्तु मन्दो मात्सर्यग्रस्तो दोषगुणविवेचनाऽसमर्थश्च सोऽविचार्यैव यद्ग्रन्थ इव चित्तस्य गुणं दोषं चाऽऽह तदपि तुल्यमेव कष्टं दुःखं मनुते बतेति खेदे बह्विति पाठे बहु कष्टं मनुत इत्यन्वयः मनो ममेति शेषः । तदुभयस्याऽपि ग्रन्थविशुद्ध्यप्रयोजकत्वादित्यर्थः ॥ १२ ॥

मू० ॥ महामहिम्नामपि यश्चिकीर्षति
स्वभावसंशुद्धतरं तिरो यशः ॥
स नूनमाच्छादयितुं प्रवर्तते
विवस्वतो हस्ततलेन मण्डलम् ॥ १३ ॥

टी० ॥ नन्वस्माभिर्निपुणं विचार्य निर्दोषत्वेन निश्चितेऽपि ग्रन्थे कश्चिदतिमत्सरी दोषमुद्भावयतीति चेत्तदाऽस्माकं महदयशो भवेत्तव च ग्रन्थशुद्धिर्न भवेदित्याशङ्क्याह ॥ महामहिम्नामिति ॥ प्रसिद्धयशसां दोषगुणपरीक्षणक्षमाणां विदुषां भवद्विधानां निर्मत्सरत्वेन मानकुशलत्वेन च स्वभावतः संशुद्धतरमतिनिर्मलं परग्रन्थनिर्दोषत्वाऽऽपादनरूपं यश आरोपितदोषोद्भावनेन यस्तिरश्चिकीर्षति तिरोभावयितुमिच्छति स जगन्मण्डलव्यापिप्रकाशस्य विवस्वतो मण्डलं नवयोजनविस्तृतं हस्ततलेनाऽत्यल्पेन तदसंबद्धेनाऽऽच्छादयितुं प्रवर्तते नूनमिति सर्वथैवाऽसंभावितमिदं यथा तद्वदसंभावनीयं कर्तुमिच्छन्सर्वलोकोपहास्य एव भवति ॥

अतो भवता विशुद्धज्ञानानां मम च भवदादृतपन्थस्य न काऽपि क्षतिरित्यर्थः विद्वन्माहात्म्यबलतुच्छते दर्शिते * ॥ १३ ॥

मू० ॥ पुरुषाऽपराधमलिना धिषणा
निरवद्यवस्तुहृदयाऽपि यथा ॥
न फलाय भर्तृविषया भवति
श्रुतिसंभवाऽपि तु तथाऽऽत्मनि धीः ॥ १४ ॥

टी० ॥ ननु शारीरकाऽर्थविषयमवगतिप्रधानं प्रकरणं करणायोत्युक्तं तन्नोपपद्यते ॥ शारीरकमीमांसाया एव प्रयोजकाऽभावेनाऽसंगतत्वात् ॥ शिष्यजिज्ञासितसंदिग्धाऽर्थनिर्णयाय भगवता निरस्तसमस्तैषणेनाऽथातो ब्रह्मजिज्ञासेत्याद्यारब्धत्वम् ॥ शिष्यस्य च ब्रह्मण्यत्यन्ताऽनुपलब्धे जिज्ञासा वा संदेहो वा कथं भवेत् ॥ धर्मज्ञानसाध्यत्वात्तयोः ॥ तच्च निर्विशेषे ब्रह्मणि न प्रत्यक्षाऽऽदिनाऽसंभवति ॥ रूपादिहीनत्वात्तस्य प्रवृत्तौपि तस्मिन्लिङ्गाऽसंभवाच्चाऽद्वयमेव हि ब्रह्म मुमुक्षुं प्रति शारीरकेण विचार्यते ॥ सगुणब्रह्मविचारस्य प्रासङ्गिकत्वात् ॥ नाऽपि वेदान्तात्तज्ज्ञानम् ॥ विचारात्पूर्वं ततस्तदयोगात् ॥ अन्यथा विचारवैयर्थ्यात् ॥ नचाऽऽपातज्ञानं विचारं विनाऽपि भवतीति वाच्यम् ॥ तस्यैवाऽनिरूपणात् ॥ निःसामान्यविशेषे ब्रह्मणि सामान्यविषयस्य तस्याऽसंभवादपरोक्षे ब्रह्मणि परोक्षज्ञानरूपस्य तस्याऽयोगात् ॥ अतः शिष्यस्य जिज्ञासाऽसंभवादजिज्ञासिताऽर्थनिर्णये प्रेक्षावतः प्रवृत्त्ययोगादसङ्गतैव शारीरकमीमांसेति तदर्थविषयमिदं प्रकरणं सुतरामसंगतमित्याशङ्क्य विचारात्प्रागपि वेदान्तादेवाऽधिकारिणो विदितपदतदर्थस्य † निर्विशेषब्रह्मसाक्षात्काररूपं ज्ञानं भवत्येव तच्च श्रोतुरसंभावनाविपरीतभावनाऽऽदिचित्तदोषैः प्रमाणमप्यप्रामाण्यशङ्काकलङ्कितमित्यनभ्यासदशाऽऽपन्नजलज्ञानवत्फलाय न भवतीति ततो विचारप्रयोजिका शिष्यस्य जिज्ञासोपपद्यत इति नोक्ताऽसांगत्यमित्यभिप्रेत्य सदृ-

* क्वचित्पुस्तकेऽयं पाठो नैवाऽस्ति ।

† पदार्थस्येति पाठान्तरम् ।

Digitized by Google

ष्टान्तमाह चतुर्भिः ॥ पुरुषाऽपराधेति ॥ पुरुषस्य प्रमातुरसंभावनादिलक्षणे-नाऽपराधेन मलिना अप्रामाण्यशङ्कया कलङ्किता ॥ न तु प्रमाणस्याऽपराधेन तस्य दृष्टान्तेदार्ष्टान्तिके च निर्दोषत्वात् ॥ ननु निर्दुष्टप्रमाणजन्यं ज्ञान-मप्रामाण्यशङ्कावशादध्यासं न निवर्तयतीति क्क दृष्टमित्याशङ्क्य दृष्टान्तमा-ह ॥ निरवद्येति ॥ भर्तुर्नाम कश्चित्कस्य चिद्राज्ञोत्यन्तं वल्लभो ब्राह्मणो राजोपजीविभिर्मात्सर्याद्द्विष्यमाण आसीत्स कदाचिद्दैवयोगाद्वेत्रे पिधा-याऽरण्ये क्षिप्तश्चिरं तत्र स्थितो दैवयोगेनाऽऽरण्यकैः सह पुरसमीपमा-गतोपि विद्वेषिराजकीयाऽवरुद्धपुरमार्गः पुरं प्रवेष्टुं न शशाक राजा च भर्तुर्मृतः प्रेतो जात इति तैः प्रबोधितः सन्तथैव निश्चयमकरोत् ॥ देवा-त्कदाचिद्बहिर्गतो बाह्योपवने तं दृष्ट्वाऽपि ब्रह्मराक्षसं मेन इति ॥ पुरुषं सौम्यगन्धारेभ्योभिनद्धाक्षमानीय * तं ततोऽतिजने विसृजेदित्यादिश्रुति-मूला ग्रन्थकर्तृदेशप्रसिद्धिर्यथा † भर्तुविषया निर्दोषचक्षुर्जनिता प्रमाणभू-ताऽपि मतिर्मृतो भर्तुर्द्रष्टुमयोग्य एव किन्तु प्रेत एवाऽयं दृश्यत इत्यसं-भावनाविपरीतभावनारूपपुरुषदोषेणाऽभिभूता भर्तुरेवाऽयमिति निश्चय-फलाय पर्याप्ता न भवति तथा निर्दोषवेदान्तमहावाक्यजन्या ‡ प्रमाण-भूताप्यहं ब्रह्माऽस्मीति धीर्वेदान्ता ब्रह्मपरा न भवन्त्येवाऽद्वितीयं ब्रह्म न संभवत्येव संसार्यसंसारिणोरैक्यं न संभवत्येवेत्यसंभावनाविपरीतभाव-नारूपपुरुषदोषाऽभिभूता विचारात्प्रागज्ञानादिनिवृत्तिफलाय न पर्याप्ता भवतीत्यर्थः ॥ १४ ॥ :: ॥

मू० ॥ पुरुषापराधविगमे तु पुनः
प्रतिबन्धकव्युदसनात्सफला ॥
मणिमन्त्रयोरपगमे तु तथा §
सति पावकाद्भवति धूमलता ॥ १५ ॥

---

* ऽपिनद्धाक्षमानीयेति पाठान्तरम् ।

† ग्रन्थकर्तृप्रसिद्धिर्यथेति पा० ।

‡ वेदान्तवाक्येति पा० ।

§ यथेति पा० ।

टी० ॥ मानमेययोरल्पनिबद्धत्वाभ्यां निर्दोषत्वात्परिशेषात्प्रमातृदोष एव फलप्रतिबन्धक इति शास्त्रीयेण विचारेण तस्याऽपगमे सत्यप्रामाण्यशङ्कारूपप्रतिबन्धाऽभावात् पुनस्तस्मादेव निर्दोषवेदवाक्यात्सफला धीरुदेति यथा भर्तुर्दुर्जनैररण्ये प्रक्षिप्रो जीवन्नेव पुनरागत इत्युपपत्त्या भर्तृज्ञानाऽप्रामाण्यशङ्काकारणपुरुषाऽपराधविगमे सति तद्विषया भर्तुरेवाऽयमिति सफला धीरुदेतीत्याह । पुरुषाऽपराधेति । अत्राऽनुरूपं दृष्टान्तान्तरमाह ॥ मणीति ॥ तुशब्दोऽवधारणे । मणिमन्त्रयोर्धूमोत्पत्तिप्रतिबन्धकयोरपगमे सत्येव लताकारो धूम उद्भवति पावकात्सदा धूमजननसमर्थादन्यथा यथा तथेहापीत्यर्थः ॥ १५ ॥

मू० ॥ पुरुषापराधविनिवृत्तफलः

सफलो विचार इति वेदविदः ॥

अनपेक्षतामनुपहत्य गिरः

फलवद्भवेत्प्रकरणं तदतः ॥ १६ ॥

टी० ॥ भवतु पुरुषाऽपराधविगमात्सफला धीस्तावता विचारशास्त्रस्य किमागतमित्यत्राह * ॥ पुरुषेति ॥ सफल इति धर्मविषयो ब्रह्मविषयश्चेत्यर्थः ॥ वेदविदः शबरस्वामिप्रभृतयः प्राहुः धर्मजिज्ञासासूत्रव्याख्यायामर्थादिति शेषः ॥ तेषामेतदभिप्राये प्रमाणमाह ॥ अनपेक्षतामिति ॥ प्रथमतन्त्रे ह्यौत्पत्तिकसूत्रे लोके शब्दस्य प्रमाणान्तरमूलस्यैव प्रामाण्यात्तदभावेऽनाप्तवाक्यवद्वेदाऽप्रामाण्यमाशङ्क्याऽनाप्तवाक्यस्याऽप्रामाण्यं न मूलाभावकृतं किं तु दुष्टपुंमूलतया दुष्टत्वेन स्वभावप्रयुक्तप्रामाण्यप्रतिबन्धाद्वेदे तु पदपदार्थसंबन्धस्य नित्यतया तत एव वाक्यार्थसंबन्धेऽन्याऽनपेक्षणाद्वेदस्वरूपस्याऽपौरुषेयत्वाच्च न पुरुषमूलतेत्यनपेक्षत्वेन स्वतःप्रामाण्यमुक्तम् ॥ तद्यदि विचाराऽऽदिकमपेक्ष्य वेदोऽर्थं प्रतिपादयेत्तर्हि सापेक्षतया तस्याऽनपेक्षत्वं बाधितं स्यादिति सर्वोऽपि विचारः प्रतिबन्धनिवृत्तिमात्रहेतुरिति सर्ववेदवित्संमतमित्यर्थः ॥ गिरो

* अत आहेति पा० ।

वेदस्याऽसमर्पितत्तामर्थेऽनुपलब्धे तत्समर्पणं बादरायणस्याऽनपेक्षत्वादित्यत्र प्रतिपादितामनुपलब्ध्याऽवधारित्वा सकलो विचारः पुरुषाऽपराधविनिवृत्तिफल इति वेदविद आहुरिति संबन्धः ॥ विचारस्य प्रतिबन्धनिवृत्तिसाधनत्वे फलितमाह ॥ फलवदिति ॥ अत इति प्रतिबन्धनिरासित्वाऽभ्युपगमादित्यर्थः ॥ प्रकृष्टं करणं निर्माणं यस्य विचारशास्त्रस्य तदित्यर्थः ॥ येन वा उत्तरोत्तरं शारीरारम्भे* निर्दुष्टे सति तदर्थोऽविचारणाय प्रक्रतप्रकरणं फलवदित्यर्थः ॥ १६ ॥

मू० ॥ पुरुषापराधशतसंकुलता
विनिवर्तते प्रकरणेन गिरः ॥
स्वयमेव वेदशिरसो वचनादथ
बुद्धिरुद्भवति मुक्तिफला ॥ १७ ॥

टी० ॥ प्रतिबन्धनिवृत्तेरहेतुत्वे स्वतोऽपुरुषार्थत्वे च कथं तन्निष्ठं प्रकरणं फलवदित्याशङ्क्य विवक्षितकार्यविरोधिनि तदनुत्पादस्याऽविमसमयसंबन्धप्रयोजके प्रतिबन्धके सति समर्थात्कारणसद्भावादपि कार्याऽनुदयाद्दुर्लिताऽविमसमयसंबन्धाऽभावसंपादकतयाऽन्यथासिद्धोऽपि प्रतिबन्धकाभावः कार्येण स्वोत्पत्तयेऽपेक्ष्यत इति प्रकरणं तन्निष्ठमपि फलवदित्याह ॥ पुरुषाऽपराधशतेनेति ॥ शास्त्रेणैव प्रतिबन्धस्य निरस्तत्वात्किं प्रकरणेनेत्याशङ्क्य पुरुषदोषाणामनन्तत्वादावृत्तिरसकृदुपदेशादिति न्यायेन तत्सार्थक्यमुक्तम् शतेनेति गिरो वेदलक्षणायाः शास्त्रलक्षणायाश्च स्वयमेव इतराऽसहकृतादेव अथ प्रतिबन्धनिवृत्त्यनन्तरं मुक्तिफला विद्या वेदशिरसो वाक्यादुद्भवति । अभ्यासदशायां केवलाच्चक्षुष इव अवलोकनमतो न सापेक्षत्वमित्यर्थः ॥ पुरुषाऽपराधाऽकुलत्वं वाऽप्रामाण्यशङ्केत्युक्तं जिज्ञासापूर्वकविचारहेत्वाघातज्ञानोपपाद्यम् प्रमिताऽवराहतम् ॥ १७ ॥

मू० ॥ स्वाध्यायवत्प्रकरणं घटते विचारो
नाऽप्यङ्गमस्य परमात्मधियः प्रसूतौ ।

* शारीरकेति पा० ।

Digitized by Google

साऽपेक्षताऽऽपतति वेदगिरस्तथात्वे
ब्रह्माऽऽत्मनः प्रमितिजन्मनि तच्च युक्तम् ॥ १८ ॥

टी० ॥ नन्वन्वयव्यतिरेकाभ्यां तात्पर्यज्ञानं वाक्यार्थज्ञानहेतुः शक्तिज्ञानवत्तच्च विचाराऽधीनमिति चेत्तत्राह ॥ स्वाध्यायवदिति ॥ स्वशाखागतवेदवाक्यवदित्यर्थः । घटते युज्यते अस्य स्वाध्यायस्य किं विचारो वेदान्तवाक्यवदर्थज्ञाने करणम् उताङ्गं वा । आद्यः प्रत्यक्षादिवद्विचाराऽऽख्यप्रमाणस्याऽप्रसिद्धत्वात्तर्करूपस्य तस्य प्रमाणाऽनुग्राहकत्वेन स्वतोऽप्रमाणत्वाद्वाक्यकरणकज्ञानस्य करणान्तराऽनपेक्षत्वाज्ज्ञानान्तरस्य चाऽसत्वात् ॥ द्वितीये च न प्रोक्षणाऽऽदिवदाग्नेयाऽऽदेर्वेदस्य विचारः स्वरूपोपकार्यङ्गं तद्वदत्र श्रुत्यादिविनियोजकाऽभावात्स्वाध्यायस्वरूपस्य स्वतःसिद्धत्वेन तत्राऽनुपयोगाच्च ॥ अस्तु तर्हि प्रयाजाऽऽदिवत्परमात्मज्ञानोत्पत्तावाराद्रुपकार्यङ्गम् ॥ तदुक्तम् ॥ इति कर्तव्यताभागं मीमांसा पूरयिष्यतीति प्रमाणानामनुग्राहकस्तर्क इति च तत्र प्रयाजाऽऽदिभिराग्नेयाऽऽदिषु फलाऽनुकूलशक्तिवद्वेदे तत्त्वसाक्षात्कारजननाऽनुकूलशक्तेराधानाऽभावात् । न हि वाक्यस्यौत्पत्तिकाऽर्थप्रकाशनशक्त्याऽऽतिरेकेण विचाराऽऽधेयं किंचिदस्ति तदङ्गत्वावेदकप्रमाणाऽभावस्योक्तत्वाच्च । करणोपकारस्य शक्त्यादिज्ञानेनैव सिद्धेश्च उभयत्र साधारणं प्रागुक्तं दूषणं स्मारयति ॥ साऽपेक्षतेति ॥ आपततीतिच्छेदः ॥ तथात्वे विचारस्य करणत्वेऽङ्गत्वे वा तत्सापेक्षत्वाऽऽपतनं न युक्तं प्रागुक्तन्यायेनेत्यर्थः ॥ १८ ॥

मू० । व्युत्पन्नस्य हि बुद्धिजन्म सहसा वाक्यश्रुतौ दृश्यते
वाक्यार्थे न ततोऽस्ति बुद्धिजनने मीमांसनव्यापृतिः ॥
तेनाऽर्थात्करणाऽऽदिभावभजने मीमांसनस्याऽऽश्रिते
वेदार्थप्रमितौ तु वेदवचसः साऽपेक्षताऽऽयास्यति ॥ १९ ॥

टी० ॥ यत्तु तात्पर्यज्ञानं नियताऽन्वयव्यतिरेकाभ्यां वाक्यार्थज्ञाने कारणं शक्तिज्ञानादिवत्तच्च विचाराधीनमिति विचारस्याङ्गत्वमिति तत्राऽऽह ॥ व्युत्पन्नस्येति । सहसा झटिति विनैव तात्पर्यज्ञानाऽभावाद्विमित-

विलम्बं व्युत्पन्नस्य शक्त्यादिविज्ञानवतो वाक्यस्य श्रुतौ श्रवणे ततः नियताऽन्वयव्यतिरेकाऽभावात् । मीमांसनस्य तात्पर्यज्ञानस्य तदर्थविचारस्य च वाक्याऽर्थबुद्धिजनने न व्यापृतिर्नोपयोग इत्यर्थः । एतदुक्तं भवति न हि तात्पर्यज्ञानं नियमेन वाक्यार्थज्ञानात्पूर्वं संभवति । गवानयनाऽऽदिवाक्यश्राविणां तज्ज्ञाननैयत्याऽभावात् । न हि तदा तात्पर्यव्याप्तलिङ्गज्ञानं तेषामस्ति समभिव्याहारमात्रस्य अहो विमलं जलं नद्याः कच्छे महिषश्चरतीत्यत्राऽनन्वितयोर्नदीकच्छयोरपि दर्शनेन तदलिङ्गात् * । न च यत्रैकवाक्यत्ववत्तस्य † वाक्यस्य विशिष्टाऽर्थे तात्पर्यमिति वाच्यन्तस्याऽपि प्रतारकवाक्याऽऽदौ व्यभिचारात् ॥ एकवाक्यताज्ञानादेव नियताऽर्थज्ञानसंभवेन तात्पर्यज्ञानस्य तत्रोपयोगाभावाच्च अर्थवादादेः प्रतीयमानाऽर्थे तात्पर्याऽभावनिश्चयेऽपि सङ्गतपदशक्त्यादिस्वारस्येन विशिष्टाऽर्थप्रतीतेश्च न तात्पर्यज्ञानं तत्र कारणं नानार्थपदप्रयोगादपि तत्तत्पदार्थोपस्थितियोग्यतानुरोधेन कदाचित्कस्य चिदर्थस्य प्रतीत्युपपत्तेश्च ॥ न हि तत्र सर्वपदाऽर्थस्मरणं नियमेनाऽस्ति । यत्राऽस्ति तत्र योग्यताऽऽदिज्ञानमस्तीति चेत् ‡ । युगपत्तावदर्थज्ञानमस्तु किं तात्पर्यज्ञानेन तत्तत्संसर्गघटिततात्पर्यज्ञानस्य तत्तत्संसर्गाऽऽत्मकवाक्यार्थबोधात्प्रागनुपपत्तेश्च न तात्पर्यज्ञानस्य तत्र हेतुत्वं संभवतीति ॥ नन्वात्मा वाऽरे द्रष्टव्यः श्रोतव्य इत्यादिना ज्ञानोद्देशेन श्रवणादिविधानात्कथं तस्य तदहेतुत्वं तत्राऽऽह । तेनेति । येन कारणेन विचाराङ्गतया करणतया वा न वाक्यार्थज्ञानोपयोगी तेनेत्यर्थः । अर्थादनुपपत्त्या करणादिभावभजने उद्देश्यज्ञानविशेष्यांश इति शेषः । वेदार्थप्रमितौ जनयितव्यायामायास्यतीति पदम् । श्रुतौ द्रष्टव्यपदेन नाऽऽत्मज्ञानमात्रमुद्दिश्यते आपाताऽऽत्मज्ञानस्य प्रागेवोत्पन्नत्वात् । किं त्वप्रतिबद्धमात्मदर्शनमेवं च तदुद्देशेन विहितो विचारो विशेषण एव

---

* तदलिङ्गत्वादिति पा० ।

† तस्यैवेति पा० ।

‡ अस्ति चेदिति पा० ।

पर्यवस्यति ज्ञानमात्रस्य प्राक्सिद्धस्य तत्साध्यत्वाऽनुपपत्तेरिति श्रुतितोऽपि न विचारस्य ज्ञानं प्रति हेतुत्वमिति प्रागुक्तैव गतिरिति भावः ॥ १९ ॥

मू० ॥ आच्छाद्य विक्षिपति संस्फुरदात्मरूपं
जीवेश्वरत्वजगदाकृतिभिर्मृषैव ॥
अज्ञानमावरणविभ्रमशक्तियोगा-
दात्मत्वमात्रविषयाऽऽश्रयताबलेन ॥ २० ॥

टी० ॥ एवं विचारात्पूर्वमापातप्रतिपन्नं ब्रह्म मुमुक्षुभिर्जिज्ञास्यं विचारस्य प्रतिबन्धकनिवृत्तिमात्रेणाऽर्थवानित्युक्तम् । नन्वेवमपि जिज्ञास्यं ब्रह्म दृश्यं चेद्घटवदनात्मत्वान्न मुमुक्षुजिज्ञास्यं स्यात्स्वप्रकाशं चेत्तस्य यथावत्प्रकाशमानतया न जिज्ञास्यत्वम् न हि स्पष्टं प्रकाशमाने जिज्ञासा भवति । न च स्वप्रकाशमप्यज्ञानाऽऽवृतं न यथावत्प्रकाशत इति वाच्यमहमिति ज्ञानस्यैवाऽऽत्मयाथात्म्यविषयत्वात् । ब्रह्मणस्तद-विषयत्वे चाऽऽनात्मताप्रसङ्गः । स्वप्रकाशे आत्मनि ज्ञानसाध्यप्रयोजनस्य विनाऽपि विचारं संभवेन विचाराऽनर्थक्यं च । किं चाऽऽत्मज्ञानमात्रं न विचारप्रयोजनं तस्य सुखदुःखनिवृत्त्यन्यतरत्वाऽभावात् । तत्साध्यं चान्यत्स्वर्गादिवन्न मुमुक्ष्वभिलषितं संसाराऽऽत्मकाऽनर्थश्च संश्चेन्न ज्ञाननिवर्त्यः । असंश्चेत्सुतरामतो विषयप्रयोजनाऽभावान्नेदं प्रकरणमारब्धव्यमिति तत्राऽऽह । आच्छाद्येति । आवृत्येत्यर्थः । अज्ञानमनादिभावरूपं ज्ञानाऽपनोद्यं वक्ष्यमाणं संस्फुरत्स्वप्रकाशतया नि शतया च यथावत्प्रकाशमानमप्यद्वयानन्दब्रह्मस्वरूपमाच्छाद्य विक्षिपति विविधं तत्स्वरूपविपरीतप्रपञ्चभावमापादयति ॥ वैविध्यमेवाऽऽह ॥ जीवेत्यादिना ॥ तृतीयेत्थंभावे । तथा च स्वप्रकाशस्याऽऽप्यात्मस्वरूपब्रह्मणः अविद्यया यथावदप्रकाशमानत्वाज्जिज्ञास्यत्वमुपपद्यते । प्रयोजनं च जीवेश्वरत्वाऽऽदिभेदकल्पनानिवृत्तिरस्तीति काकदन्तसमं न ब्रह्मेत्याशयः । प्रपञ्चस्य ज्ञानाऽपनोद्यत्वमाह ॥ मृषेति ॥ एतेनाऽद्वयानन्दब्रह्मस्वभावस्य कथं तद्विपरीतरूपतेति निरस्तम् ॥ शुक्तिकादेरिवाऽज्ञानाद्रजतादिभाववदात्मनः प्रप-

Digitized by Google

स्वभावस्याऽप्यज्ञानकल्पिततया मृषात्वाच्च कोऽपि दोष इति भावः । मृषात्वं च सदसद्विलक्षणत्वमिति न सदादिपक्षोक्ता दोषाः ॥ सदसदात्मत्वव्यावृत्तय एवेत्युक्तम् ॥ नन्वज्ञानस्य सत्यत्वे कथं तत्कृतविक्षेपस्य मृषात्वं मिथ्यात्वे वा कथं तस्याऽऽच्छादकत्वं लोके सत्यस्यैव तद्दर्शनादित्याशङ्क्य मृषाऽप्यज्ञानमर्थक्रियाकारितयाऽऽच्छादयति विक्षिपति च तत्कारित्वे च सत्यत्वं न प्रयोजकमसंप्रतिपत्तेः । किं त्वाच्छादनाऽऽद्यनुकूलशक्तिमत्त्वं तच्च मृषात्मकेऽपि स्वप्नदृष्टे दृष्टमाच्छादकस्य लोकेऽपि सत्यस्य प्रसंमतमित्याशयेनाऽऽह ॥ आवरणविभ्रमशक्तियोगादिति । आवरणशक्तिविक्षेपशक्तिभ्यां योगादित्यर्थः ॥ आवरणशक्तिर्नास्त्यद्वयं ब्रह्म न प्रकाशत इति व्यवहारयोग्यताऽऽवरणं तत्प्रयोजकशक्तिः । विक्षेपशक्तिस्त्वहं कर्ता भोक्तेत्यादिभ्रमजननशक्तिरित्यर्थः । नन्वज्ञानमपि शक्तिमच्चेत्परकीयप्रधानाच्च विशेषइत्यत आह । आत्मस्थेति ॥ आत्मस्थं सद्रूपमचैतन्यं तन्मात्रमेवाऽऽश्रयो विषयश्च यस्य तस्य भावस्तत्ता तद्बलेनेत्यर्थः । अज्ञानस्य स्वात्माऽऽश्रयविषयत्वमेव परकीयप्रधानाद्भेदं शक्तिद्वयाऽऽश्रयत्वप्रयोजकं न तु स्वत इति प्रधानाद्विलक्षणमित्यर्थः ॥ २० ॥

(शिवमये)

श्रीः

॥ माधवीयधातुवृत्तिभूमिका ॥

इह किल भारतवर्षे सकलदर्शनानां प्रचारे सत्यपि व्याकरणं वेदाङ्गेषु प्रधानमिति व्युत्पित्सुजनानामसाधारणोपकारनिदानमिति च व्याकरणं विद्वद्भिरतीवाद्रियते । तच्च भगवता पाणिनिना सूत्रपाठगणपाठधातुपाठलिङ्गानुशासनैश्चतुर्धा विभक्तमतिसंक्षिप्ततया न्यूनांशपरिपूरणेनात्यावश्यकाक्षेपसमाधिप्रदर्शनेन च मुनिना कात्यायनेन संवर्धितमल्पकेवलमपि विस्तृतेन व्याख्यानेन भगवता भाष्यकारेण पतञ्जलिना सुपरिष्कृतं विजयतेतराम् । क्रमेण संप्रदायस्य विरलीभावेन भाष्यस्य गूढाशयतया तत्तत्स्थानानभ्युपगमवादिनामेकदेशिवादिनां सिद्धान्तवादिनां च

दुरूहतया मन्दमतीनां ततोऽभीष्टसिद्धावन्तरायमालोच्य सरलान् निबन्धान् निर्मिमाणत्प्रमर्षोचां विभिन्नाविभिन्ना शैली लक्ष्यते के चन सूत्रपाठक्रमेण व्याचख्युस्ततः शब्दसिद्धौ भूयांसं विलम्बमवगम्य तत्तच्छब्दसाधुत्वोपयोगिनां भिन्नभिन्नप्रकरणपठितानामपि वचनानामेकत्र संकलनपूर्वकं चापरे तेऽपि धातुपाठे व्यत्यासकरणे विशेषमलभमानास्तं तथैवोददीधरन् । वेदभाष्यकारः सकलविद्वन्माननीयमनीषो माधवाचार्यस्तु शब्दयोनिश्च धातव इत्यभियुक्तोक्तिं सर्वं नाम धातुजमाह शकटस्य च तोकमिति भाष्यकारोक्तिं च मनसिकृत्य सर्वानेव शब्दान् साक्षात्परंपरया वा धातुप्रकृतिकानेव मन्यमानो धातुपाठमेव मुख्यस्थाने प्रकल्प्य तद्व्याख्यानक्रमेण तिङन्तरूपाणि कृदन्तरूपाणि तत एव सुब्विभक्तितद्धितादिप्रत्ययांश्च प्रदिदर्शयिषुः प्रामाणिकभाष्यकारादिवचनोपन्यासपुरःसरं धातुवृत्तिनामिकां नातिविस्तरां वृत्तिं निर्ममे । तामिमां वृत्तिं सौष्ठवातिशयादनल्पजनोपकारिणीं निश्चिन्वता विद्यैकपक्षपातिना काशिकराजकीयप्रधानसंस्कृतपाठशालाध्यक्षेण श्रीयुतग्रिफिथसाहिबमहाशयेनानुमतावनासादितशुद्धपुस्तकावपि खण्डिताखण्डितानि त्रीणि पुस्तकानि समाहृत्य प्रावर्तावहि काशीविद्यासुधानिधिनामकपत्रद्वारा तत्प्रकाशने । सम्प्रत्युपलब्धपुस्तकानामत्यशुद्धतया चिरं विचार्य शोधयन्तावपि यत्र त्रिष्वपि पुस्तकेष्वेकरूपमेव पाठमीक्षावहे तं तथैव निवेशयावहे प्रार्थयावहे च महोदयान् कस्यापि समीपे पवित्रं चेत्पुस्तकं स्यात्तर्हि तत्प्रदानेनानुगृह्णन्तु येन तदुत्तरमपि निर्दूषणं भवेदेतस्माऽमन्ततः शुद्धिपत्रद्वाराऽपि । मुहुरर्थयावहे च भगवन्तं सर्वान्तर्यामिणं जगदीश्वरं दुःसाधमेतत्कार्यं निरन्तरायं परिपूर्यतां तन्वन्तु चावयोः परिश्रमं फलेग्रहिममुष्मिंश्चयनार्पणायासपरिग्रहानुग्रहेण विद्याविनोदरसिका इति ॥

संवत् १९३९ ज्येष्ठकृष्णा १४ भौमे
सन् १८८२ मे १६

काशिकराजकीयप्रधानपाठालये
व्याकरणशास्त्राध्यापको दामोदरशास्त्री
साहित्यशास्त्राध्यापको गङ्गाधरशास्त्री च

॥ श्रीकाशीविश्वेश्वरो जयति ॥

॥ श्री ६ मद्बालशास्त्रिभ्यो गुरुभ्यो नमः ॥

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
जीयाद्धस्तिमुखो यस्य लीलयोर्ध्वाण्डखण्डने ।
कन्दाङ्कुरवदाभाति दन्ताग्रं तद्बहिर्गतम् ॥ २ ॥
चिदानन्दकलां वाणीं वन्दे चन्द्रकलाधराम् ।
नैर्मल्यतारतम्येन बिम्बितां चित्तभित्तिषु ॥ ३ ॥
अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः ।
यत्कीर्तिमौक्तिकादर्शे त्रिलोकी प्रतिबिम्ब्यते ॥ ४ ॥
यशः क्षीराहुतीकृत्य यत्प्रतापहुताशने* ।
परे यान्ति पदं दिव्यं राजानो रणदीक्षिताः ॥ ५ ॥
तूर्णं कर्णान्तिकं प्राप्ते यत्प्रतापधनञ्जये ।
पुरो निधाय गाङ्गेयं स्वात्मा संरक्ष्यते परैः ॥ ६ ॥
कुर्वन् शत्रुयशांसि धूमपटलीं कूलङ्कषाज्यास्पदः
काष्ठासङ्गविवर्द्धितः प्रकटयन् भूतिं नवां भूयसीम् ।
आतन्वन्नितरप्रतापदहनं स्फूर्जत्स्फुलिङ्गाकृतिं
प्रायो यच्छति यत्प्रतापदहनः कस्मै न विस्मेरताम् ॥ ७ ॥
तस्य मन्त्रिशिखारत्नमस्ति मायणसायणः ।
यः ख्यातिं रत्नगर्भेति यथार्थयति पार्थिवीम् ॥ ८ ॥
नित्योन्मीलितदानवारिरधिकं निर्धूतपङ्कोदयो
दूरापास्तहरीशलङ्घनविधिर्भङ्गप्रसङ्गोज्झितः ।

---

* धनञ्जये इति पाठान्तरम् ।

क्ष्माभृन्द्रोमकृतिसमः सविकयन्दोषाकरात्पोषणा-
मानन्दाय चकास्ति यस्त्रिजगतामाश्चर्यरत्नाकरः ॥ ९ ॥
यत्कीर्तौ जाह्नवीस्फूर्तौ कीर्त्या विद्विषतामपि ।
कलिन्दनन्दिनीकान्तिः स्पर्द्धयेव प्रपद्यते ॥ १० ॥
येन निर्मीयते नित्यं धनैरायो * धनैरपि ।
श्रेयसे यशसे दानं विदुषां विद्विषामपि ॥ ११ ॥
न ध्यानं न व्रतं नार्चा न समाधिर्न वा जपः ।
मन्त्रसिद्धा बलं यस्य मतिरेव महीयसी ॥ १२ ॥
तेन मायणपुत्रेण सायणेन मनीषिणा ।
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते ॥ १३ ॥
अस्याः पूर्वनिबन्धेभ्यो गुणवत्ता न कथ्यते ।
सर्वेऽप्येव स्ववाक्येषु यदाहुर्गुणगौरवम् ॥ १४ ॥
सा च संत्यक्तमात्सर्यैर्गुणगृह्यैर्मनीषिभिः ।
सूत्रवार्त्तिकभाष्याणामीक्ष्यतां पारदृश्वभिः ॥ १५ ॥
कल्पयन्तु खला दोषं किं तैर्यदयमुद्यमः ।
मुनित्रयगिरामर्थमतत्त्वविदुषः प्रति ॥ १६ ॥

भू सत्तायाम् ॥ वर्त्ततइति शेषः । सत्तेहात्मभरणम् † ।
यदाह हरिः ।
आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते । इति ।
हेलाराजश्च । अस्ति आत्मानं बिभर्त्ति सत्तां भावयतीति यावदिति । कैयटकारोऽपि । आत्मभरणवचनो भवतिरिति । नैरुक्ताश्च । अस्तीत्युत्पन्नस्यात्मधारणमाचष्टइति ॥ उदात्तः ॥ नानुदात्त इत्यर्थः । तेनैकाच उपदेशेऽनु-

* रात्मावधारणमिति पुस्तकान्तरे ।
† धारणमिति पाठान्तरम् ।

दात्तादितीणिनषेधो न भवति । एवमुत्तरत्रापि ॥ परस्मैभाषा ॥ परस्मैपदीत्यर्थः । उपलक्षणमर्थनिर्देशः । हिमवतो गङ्गा प्रभवति, मल्लो मल्लाय प्रभवति, ग्रामस्य प्रभवति, परान् पराभवति, इदमेवं संभवति, स्थाली तण्डुलान् संभवति, ग्राममनुभवतीत्यादौ प्रकाशनाङ्गनिःसरणप*र्याप्त्यैश्वर्याभिभवोत्पत्त्यन्तर्भावनसंवेदनादीनामवगमात् । न च मन्तव्यं प्रभूप्रभृतयस्समुदाया एवैतेष्वर्थेषु वर्तन्त इति । एवं हीह भुवः क्रियावाचित्वाभावात्समुदायस्य च भूवादावपाठाच्च धातुत्वमिति तन्निबन्धनप्रत्ययाभावात् प्रभवतीत्यादि रूपं न स्यात् । किं चोपसर्गसंबन्धमन्तरेण भूतिकामः पुत्रो भवति बहुर्वै भवतो भ्रातृव्य इत्यादावैश्वर्योत्पत्तिलिप्साद्ययोऽवगम्यन्ते । न चोत्पत्तिः सत्ता, उत्पन्नस्यात्मधारणलक्षणामित्युक्तत्वात् । तथा च नैरुक्ताः । जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति क्रमेण षड् भावविकारानाहुः† । लोकेपि सत्ताजन्मनोर्भिन्नत्वादेव घटः किमुत्पन्नइति पृष्टो न कश्चिदप्यस्तीति प्रतिवक्ति । तथाचार्येणापि तत्र जात'-'स्तत्र भव' इति भेदेन‡ निर्दिश्यते, तस्माद्धातुरेवानेकार्थोभिधायी, प्रादयस्तु प्रकरणादिवद्विशेषस्मृतिहेतवो द्योतकाः । द्योतकापेक्षा च शब्दशक्तिस्वाभाव्यात् क्वचिदेव, यथा हरिशब्दो भेकादावेव । एवमुत्तरत्राप्यर्थनिर्देशोऽतन्त्रम् । यथा बीजसंताने वपिः पठितः केशान्वपतीत्यादौ छेदनेपि वर्त्तते तथा करोतिरभूतप्रादुर्भावे पठितो ऽस्मानभितः कुरु, पादौ कुरु, यः प्रथमः शकलः परापतेत्स स्वरुः कार्यः, चोरंकारमाक्रोशतीत्यादौ स्थापननिर्मलीकरणोपादानोच्चारणादौ वर्त्तते, चोरंकारमित्यत्र चोरशब्दमुच्चार्येति§ ह्यर्थः न त्वचोरश्चोरः क्रियते । अर्थनिर्देशस्योपलक्षणात्वएव कुर्द खुर्द गुर्द गुद क्रीडायामेवेत्यवधारणोपपत्तिः|| ॥ गाधृ

* सामर्थ्येति पाठान्तरम् ।

† क्रमेणेत्यधिकमेकस्मिन्पुस्तके ।

‡ निर्देशः कृत इति पुस्तकान्तरे ।

§ समुच्चार्येति पुस्तकान्तरे ।

|| अवधारणोपपत्तिरिति पाठान्तरम् ।

प्रतिष्ठालिप्सयोरित्यादौ त्वनेकार्थाभिधानं प्रपञ्चार्थम् । तदेवं सत्स्वपि बहुष्वर्थेषु माङ्गलिकत्वात् सुप्रसिद्धत्वात्सर्वपदार्थव्यापित्वाच्च सत्तानिर्देशः कृतः । उक्तं च भाष्ये * 'न सत्तां पदार्थो व्यभिचरती'ति । हरिणाप्युक्तम् ।

संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ।
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ॥ इति ।

माङ्गलिकत्वमपि प्रसङ्गात् सत्ताख्यस्य परब्रह्मणः स्मरणेन । आदौ भुवो निर्देशो भूशब्दस्य महाव्याहृतिस्मरणेन माङ्गलिकत्वात् सर्वधात्वर्थव्याप्यर्थाभिधायित्वात् 'भूवादयो धातव' इति प्रसङ्गात् भूवादिशब्दस्य साधुत्वलाभहेतुत्वाच्च । कृभ्वस्तयो हि क्रियासामान्यवचनाः । सामान्यं च विशेषेषु प्रत्येकं परिसमाप्यते । आत्मभरणं च पाकादिष्वप्यस्तीति कृभ्वस्त्योः क्रियासामान्यवाचित्वम् । उक्तं च कैयटे । तद्यात्मभरणं विरुद्धार्थसमवायैः पाकादिभिरविरुद्धैकार्थसमवायमिति । तेन यथा ब्राह्मणो गार्ग्य इत्यत्र ब्राह्मण्यं सामान्यं गार्ग्यत्वं विशेषस्तद्वदिहाप्यात्मभरणं सामान्यं पाकादिकं तु विशेषः । करोतेरपि क्रियासामान्यमर्थः, ब्राह्मणो गार्ग्य इतिवत् किं करोति पचतीति क्रियासामानाधिकरण्यदर्शनात्, इत्थं च करोत्यर्थः प्रश्नः पचत्यादिभिर्व्याकृतो भवति । अत्यन्तभेदे तु करोत्यर्थो न व्याकृतो भवेत्, यथा किं करोति देवदत्तो घट इति । कथं तर्हि करोत्यर्थविशेषत्वे सर्वधात्वर्थानामासनमपि करणमिति किं करोतीति प्रश्ने न करोत्यास्त इति करोत्यर्थनिषेधेनोत्तरं संगच्छते । उच्यते । नात्र क्रियासामान्यं पृच्छ्यते किं तु लोकप्रसिद्धो गमनागमनादिर्विशेषस्तत्रैव लौकिकानां क्रियात्वाभिमानात्, तेन तन्निषेधपूर्वकमास्त†इत्यत्र युज्यते । यद्वा क्रियासामान्यस्यावश्यं भावात् विशेषविषय एव प्रश्न इति तन्निराकरणेन प्रतिवचनं बोद्धव्यम् । क्रिया च यद्वस्तु सिद्धमसिद्धं वा शब्देन साध्यत्वेनाभिधीयमानमाश्रितक्रमं तदिति वैयाकरणानां मतम् । तदुक्तम् ।

* भाष्यकृतीति पुस्तकान्तरे ।
† इत्युत्तरं युज्यते इति पुस्तकान्तरे ।

Digitized by Google

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात्क्रियेति व्यपदिश्यते ॥ इति ।

नन्वेवं सति विततः बहवः क्षणा धातुवाच्या इत्युक्तं भवति, यथा पचतीत्यत्राधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिः, ततश्चैषां बहुत्वेनैकत्वाभावात् कथमेकक्रियात्वेनैकधातुवाच्यत्वं, न चास्ति समुदायभावः क्षणानां क्षणिकत्वेन युगपदसंनिधानात् । नैष दोषः । क्रमवतामेषां क्षणानामेकफलोद्देशेन प्रवृत्तानां सकलानां बुद्ध्या समापादितैक्यानां क्रियात्वव्यवहारात् । न च यदनन्तरं फलं निष्पद्यते तस्यैव फलसाधनत्वम्, एवं ह्यधिश्रयणादिवैयर्थ्यं स्यादिति तैरपि समीहितफलानुगुणोपयोगैस्तां विशेष आधीयतएवेत्यवश्यं फलसाधनत्वमङ्गीकर्तव्यम्, एवं च काल्पनिकः समुदायो धातुवाच्य इत्युक्तं भवति । तत्रावयवक्षणाः समुदाये गुणभावमापन्ना इति न ते शब्दभेदं प्रयुञ्जते । तदुक्तम् ।

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ इति ।

क्रमजन्मनामेषां क्षणानामभेद एकत्वे बुद्ध्या संकलनात्मिकया प्रकल्पितः स च समूहः स्वभावतो गुणभूतैरवयवैर्युक्त इत्यर्थः । गुणभूतैरवयवैरिति वचनमवयवानां शब्दभेदं प्रति प्रयोजकत्वं नेति प्रतिपादनार्थम् । एवं समूहरूपायाः क्रियाया एकत्वादपूर्वापरीभावादक्रमत्वेऽप्यवयवक्रमाश्रयेण क्रमिकत्वव्यवहारः । उक्तं च ।

स चापूर्वापरीभूत एकत्वाद्यक्रमात्मकः ।
पूर्वापराणां धर्मेण तदर्थेनानुगम्यते ॥ इति ।

कथं तर्ह्येकैकस्मिन् क्षणे धातोः प्रयोगः, पचतीत्यधिश्रयित्तर्यपि वक्तारो भवन्ति । उच्यते । अधिश्रयणारम्भएव फलाभिसन्धेस्तत्रैव समुदायस्यारोपात् । अयं च समाश्रितपूर्वापरीभाव एवारोप्यतइत्येकोऽपि क्षणः क्रमिको भवति । अत एव क्षणान्तरेऽनुष्ठीयमानेऽनुष्ठाप्यमाने चाध्यारोपितविरूपस्य क्षणस्यारोपादतीतत्वादपाक्षीदिति भूतकालता-

तथा तस्य क्षणस्य भावित्वादितरेष्वभाविष्वपि पक्ष्यतीति भविष्यत्का-लता, तथा चैकस्य क्षणस्य वर्तमानत्वादन्येष्ववर्तमानेष्वपि पचतीति वर्तमानकालता चेति कालत्रययोग उपपद्यते । यथोक्तम् ।

समूहः स तथाभूतः प्रतिभेदं समूहिषु ।

समाप्यते ततो भेदे कालभेदस्य संभवः ॥ इति ।

तथाभूतः क्रमिकः सन् प्रतिभेदं प्रत्येकं समूह आरोप्यते । ततो विषयविषयिणोरभेदएकत्वे कालभेदः संभवतीत्यर्थः । तदेवं शब्देन साध्यतया प्रतीयमानः समाश्रितक्रमोऽर्थः क्रियेति स्थिते घटो भवतीत्यात्म-भरवलक्षणा सत्ता तथैवाभिधीयतइति क्रियात्वेन विचिकित्सा । तथा च ।

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका । इति ।

क्रियाभेदहेतुना कालेनाभूदस्ति भविष्यतीति प्रयोगाः ॥ नह्यक्रि-यस्य कालेन विभागोस्ति । उक्तं च ।

कालानुपाति यद्रूपं तदस्तीति प्रतीयते । इति ।

एवं च भूतं भव्यायोपदिश्यतइति न्यायेन देवदत्तः पचतीत्या-दिवत् घटो भवतीति क्रियाकारकभावेन समन्वय उपपद्यते । किं करो-तीति प्रश्ने पचतीत्यादिवदस्तीति प्रतिवचनाभावो निर्ज्ञातसत्तस्यानि-र्ज्ञातो व्यापारभेदः पृच्छ्यते,न तु निर्ज्ञाता सत्तैवेति, तद्विषयस्य प्रश्नस्ये-वानुदयात्* । यदा तु सत्ताविषयः प्रश्नो विनाशाशङ्कया किं करोति देवदत्त इति, तदास्ति तावदिति प्रतिवचनमपि भवत्येव । ननु क्रियायाः क्रमिकत्वमध्यारोपेणेत्युक्तं, गौणता तु प्राप्नोति । अत्र परिहरन्ति ।

व्यवहारस्य सिद्धत्वान्नवेयं गुणकल्पना ।

उपचारो हि मुख्यस्यासंभवादपदिश्यते ॥ इति ।

यथा गोशब्दस्यासंभवात्सास्नादिमदर्थस्य वाहीकादिवृत्तित्वम्, एवं स्थिते सर्वपार्षदत्वाद्व्याकरणस्य तत्तत्तैर्थिकानुरोधेन हरिणा क्रियामत-भेदाः प्रदर्शिताः तेपीह संक्षेपेण प्रदर्श्यन्ते । यथा यदनन्तरं फलं निष्प-

* अनाश्रितत्वादिति पुस्तकान्तरे ।

द्यते सा क्रिया । यथोदनं पचतीत्यत्र विक्लेदनं, तदनन्तरं फलनिष्पादनात् तदेव कारकं. नहि साक्षादजनयत्कारकं नाम । अधिश्रयणादीनां विक्लेदनोपयोगित्वाच्च वैयर्थ्यं, तेषु तु पच्यादिप्रयोगस्तदर्थत्वेन विक्लेदनरूपाध्यारोपात् । पौर्वापर्यं तु पूर्वापरत्वापेक्षया । उक्तं च ॥

अनन्तरं फलं यस्याः कल्प्यते तां क्रियां विदुः ।
प्रधानभूता तादर्थ्यादन्यासां तु तदाख्यता ॥ इति ।

अथ वा चैत्रः पचति, मैत्रः पचति, क्षीरं पचति, ओदनं पचतीत्यादिषु कर्तृकर्मभेदेन भिन्नेषु पाकादिषु पच्यादिप्रत्ययानुवृत्तेर्घटादिषु घटत्वादिवदस्ति पचित्वादिकं नाम जातिः सा क्रिया । ननु युगपदवस्थितैरवयवैरारब्धेषु सत्सु घटादिषु समवायाद्घटत्वादीनामभिव्यक्तिर्युज्यत-इह तु क्रमजन्मभिरयुगपद्भाविभिः अवयवैरवयव्यन्तरमारब्धुं न शक्यते यत्समवायात् पचित्वाद्यभिव्यक्तिः स्यात् । नैष दोषः । क्रमजन्मभिरयुगपद्भाविभिरनारब्धावयविभिरुत्क्षेपणादिवत्तैरुत्क्षेपणत्वादीनामिवाभिव्यक्त्युपपत्तेः । यथैव चोत्क्षेपणाद्यवयवकर्माणि इदमहमुत्क्षिपामीत्यादिबुद्धीनां विशिष्टप्रयत्नजन्यतया मिथः स्वतो भिन्नान्युत्क्षेपणत्वादीनामाधारत्वमपि प्रतिपद्यमानानि दुरवधारत्वाद्विशिष्टजातिविषयां बुद्धिं न प्रकल्पयन्ति, एवमिहाप्येकैकक्षणदर्शनेन पचित्वादीनामप्रत्ययः । अत्र च साधनत्वक्रमिकत्वे व्यञ्जकक्षणद्वारेण । उक्तं च ।

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।
असाध्यव्यक्तिरूपेण सा साध्येवोपकल्प्यते * ॥

एकैकस्मिन्क्षणेपि पचित्वादेर्वस्तुतो विद्यमानत्वात्तत्र शब्दप्रयोग उपपद्यते । अथ वा कारकभेदभिन्नविघटनादिरूपाया यस्याः क्रियाव्यक्तेरनन्तरं फलं निष्पद्यते तत्र समवेता विघटनत्वादिका पच्यादिक्रिया ।

(शेषमग्रे)

* उपलक्ष्यते इति पाठान्तरम् ।

The following short original treatise on Vedânta by *Pandit* Keśava Śâstri is published in the columns of this paper for two reasons, firstly on account of its own intrinsic merit, secondly as furnishing an interesting proof of the Vedânta continuing to be a living philosophy and to stimulate the minds of the *Pandits* to independent exertions.

EDITOR.

॥ श्रीः ॥

॥ आत्मसोपानप्रस्तावना ॥

स्वस्ति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दाश्रमशिष्यपूज्यपादश्रीमद्विठ्ठलत्र्यम्बकपन्तशर्माणः साम्प्रतमवनितले गूढाकृतय इव विराजन्ते । तेषामुपनिषत्प्रमेयभागे परमनिष्णाततां स्वानुभवबोधनाभिनवचातुरीं च पुरा भुवि विराजमानैर्ज्ञानवैराग्यमूर्तिभिः परमगुरुभीराजारामशास्त्रिभिरसकृदभिष्टुतामुपाकर्ण्य संजातपरमभक्तिस्तान्त्सप्रश्रयमहमभ्यगच्छम् । तदुपसत्त्या चाचिरादेवोपजातस्वानुभवः कथमयमुपनिषत्सूपवर्णितः स्यादिति जिज्ञासमानः श्रीपरमगुरुचरणेषु ब्रह्मीभूतेषु श्रीमत्परमपूज्यगुरुवरबालशास्त्रिभ्यः श्रीशंकरभगवतः शारीरकमीमांसां गीताभाष्यमुपनिषद्भाष्यमुपदेशसहस्र्याद्यपरांश्च ग्रन्थानध्यैयि । तत्र सर्वत्रैकरूपमेव स्वानुभवमुपवर्णितमुपलभ्य येन मननक्रमेण स्वनिश्चयपरकाष्ठामुपागच्छं तमेवात्र ग्रन्थसन्दर्भे प्रादर्शयम् । सोयं मननक्रमः सोपानक्रम इव यथार्थं स्वोत्कृष्टपदप्रापकोस्ति नवेत्यत्र गुरुचरणा एव प्रमाणमिति तेभ्य एवामुं समर्प्य तत्प्रसादपरिपूतो निष्कामं स्वोद्दिष्टकार्यकारी सकलजनाभिनन्दनीयश्चस्यादित्यनिशमाशासेऽहम् ॥

केशवशर्मा

अथ आत्मसोपानं नाम वेदान्तप्रकरणम्

श्रीगणेशाय नमः ओम् ॥

नत्वा पादौ सद्गुरोः सत्वमूर्तेर्बोधं वक्ष्ये हृद्गतं तत्प्रसादात् ।
यंचाकर्ण्य श्रीगुरुश्चेत्प्रसीदेन्निर्दोषत्वं को न मन्येत तस्य ॥ १ ॥
कोयं लोके बध्यते मुच्यते वा कर्मव्रातैर्बन्धमोक्षौ च कौस्तः ।
इत्थं प्रश्नाभूरिशः संभवन्तः प्रत्युच्यन्ते स्वानुभूतिक्रमेण ॥ २ ॥
तत्वार्थोयं बध्यते नैव कश्चिद्बन्धाभावात्को नु मुच्येत तस्मात् ।
बन्धादीनां लोकबुद्ध्यैव सिद्धेस्तद्व्याचक्षे लोकबोधानुसारि ॥ ३ ॥
आत्मैवासौ बध्यते कर्मबन्धैः स्वस्याज्ञानान्मुच्यते च स्वबोधात् ।
बन्धो नाम स्वस्य यत्पारतन्त्र्यं तेनेहैवाक्रान्तआत्माविभाति ॥ ४ ॥
तन्नाशक्यं नित्यशुद्धस्वरूपो सङ्गश्चात्माबन्धनार्हः कथं स्यात् ।
नह्येवायं बध्यते त्वात्त्विकेर्थे किंतु भ्रान्त्या बद्धवत्स्वस्यभाति ॥ ५ ॥
बद्धोहन्तास्मीति बुद्ध्यास्मदर्थो योभिप्रेतः स्यान्नुतस्यैव बन्धः ।
सोभिप्रेतो ऽनात्मनात्मैव लोके चेदायाताबद्धतास्वात्मनोपि ॥ ६ ॥
अथाहैकः कोयमात्मास्वदेहाद्भिन्नोभिन्नोवोच्यते बन्धनार्हः ।
देहाद्भिन्नस्यात्मनस्त्वप्रसिद्धेरात्मा देहस्यैव नामान्तरं स्यात् ॥ ७ ॥
मैवं स्वात्मा प्रोच्यते यत्स्वरूपं नित्यं भ्रान्त्या देहिदेहात्मकं सत् ।
मत्वा तस्य स्वस्य जन्मादिभावान्विन्ते चेतश्चेतनत्वाभिमानि ॥ ८ ॥
अथ त्वेके मन्वते बन्धमोक्षौ चित्तस्यैवानात्मनो नात्मनस्तः ।
चित्तस्यैव द्रष्टृतां दृश्यतां च भावाभावौ चेतसो बन्धमोक्षौ ॥ ९ ॥
युक्तं चेतत्स्याद्यदीदं स्वरूपं बद्धं विद्यादेव चेतो यथास्वम् ।
नेवं त्वेतन्मन्यते साचिभिन्नं भूत्वाहित्वाचेतनत्वाभिमानम् ॥ १० ॥

यद्यप्येषा कल्पनाबन्धनादेर्मानस्यैवेत्यस्ति तथैव बन्धः ।
नैवं चेतो मन्यते थापि यस्मात्तत्संघातस्थत्वमेवास्य वेद ॥ ११ ॥
चित्ते चिन्ता नात्मनीत्याद्यवेद्या विद्वल्लभ्याद्दुर्लभाप्राकृतानाम् ।
यावन्नाप्ता तावदात्मैव संघस्तस्यैवोक्तः क्लेशकर्मादिबन्धः ॥ १२ ॥
योहं द्रष्टा सोहमेवोपभोक्ता मन्ता गन्तेत्यादि लोकप्रतीतेः ।
एकस्यैव द्रष्टृतां दृश्यतां च जानन्नेवं बध्यते जीव एषः ॥ १३ ॥
यद्यप्येते द्रष्टृदृश्ये विभिन्ने नैवाभिन्ने रात्रिघस्राविव स्तः ।
मूलाज्ञानाद्भासतस्ते ह्यभिन्ने तत्संघातो जीवनामास्मदर्थः ॥ १४ ॥
आत्मा सोयं चेतनाचेतनात्मा भात्वाऽज्ञानाद्भाति दुःखादिबद्धः ।
मूलाविद्याकल्पितं भानमेतत्तस्याहानावात्मबोधान्न बन्धः ॥ १५ ॥
सोयं स्वात्मा क्लिश्यमानो भवार्त्या लब्ध्वाचार्यं त्रायतां मां ब्रवीति ।
आचार्यस्तं प्राह चिन्मात्रमेवासि त्वं न त्वं चेतनाचेतनात्मा ॥ १६ ॥
चिन्मात्रेपि स्वात्मनि द्रष्टृरूपे तस्याज्ञानाच्चेतनाचेतनत्वं ।
मन्वानस्त्वं नेक्षसे बाधितत्वं तस्यार्थस्य व्योमनीलीनिभस्य ॥ १७ ॥
नित्यानित्यं मन्यसे यच्च नित्यं शुद्धाशुद्धं यच्च शुद्धं सदेव ।
यत्स्वात्मानं नित्यसंवित्स्वरूपं युक्तं कर्तृत्वादिभिर्वेत्स्यनित्यैः ॥ १८ ॥
द्रष्टास्मीति प्रत्यये वर्तमाने दृश्योस्मीति प्रत्ययश्चेदुदेति ।
नूनं तत्र भ्रान्तिरेकत्र सिद्धा नह्येकोऽस्ति द्वौ न चद्वावभिन्नौ ॥ १९ ॥
नैकस्यैव द्रष्टृता दृश्यता च संभाव्येते कर्मकर्त्रोर्विरोधात् ।
देहः स्थूलः सूक्ष्मकः कारणश्च दृश्या ह्येते द्रष्टृरूपाः कथं स्युः ॥ २० ॥
द्रष्टैव त्वं नासि देहाद्यनित्यं तस्याभावात्स्वप्नमूर्छादिभावे ।
नित्यस्तु त्वं जागरूकस्तदापि सर्वं पश्यन्देहगेहादि लीनम् ॥ २१ ॥
यो यद्रूपः सस्वरूपं विनापि स्वस्तीत्येवं न श्रुतं नाप्यतर्कि ।
देहः स्याश्चेत्तल्लयं सुप्तिकाले नैवेथास्त्वं स्वस्वरूपस्य नाशात् ॥ २२ ॥

जाते देहेन्द्रियलये न किंचिदवशिष्यते ।
इति चेन्नैव येनायं ज्ञायते सोवशिष्यते ॥ २३ ॥
देहेन्द्रियलयोनैव ज्ञायते मरणे यथा ।
इति चेन्नाहमस्वाप्सं सुखं यत्स्मर्यतेन्यदा ॥ २४ ॥
अनुभूतं स्मरत्येषो ऽननुभूतं कथं स्मरेत् ।
सुप्तिकालेपि तज्ज्ञानमस्तीत्येव ततो मतम् ॥ २५ ॥
सुप्तिश्चेज्ज्ञायते तस्याज्ज्ञातावश्यं भवेदपि ।
तत्स्वरूपं तु निर्णेयं यथानुभवगोचरम् ॥ २६ ॥
तदा प्रसिद्धतामेव द्रष्टृकृतम इष्यताम् ।
प्रसिद्धेते तदा सुप्तिज्ञाने एव न चेतरत् ॥ २७ ॥
सुप्तेर्ज्ञेयतया ज्ञाने द्रष्टृत्वं पर्यवस्यति ।
सुप्त्या सहैव तज्ज्ञानमुत्पन्नमिति नोच्यताम् ॥ २८ ॥
जागरेर्थान्प्रेक्षमाणः स्वप्नं दृष्ट्वाहमस्वपम् ।
स एव जागमीदानीमिति द्रष्टा न जन्यते ॥ २९ ॥
द्रष्टुस्तत्वं ज्ञानमात्रान्नान्यत्किंचित्प्रसिद्ध्यति ।
सुप्तिकाले यतस्तस्मान्नान्यो द्रष्टा प्रतीयते ॥ ३० ॥
शुद्धं तमेव द्रष्टारं मत्वेन्द्रियगणाश्रितम् ।
जानाति नापि जानाति द्रष्टेत्येवं प्रकल्प्यते ॥ ३१ ॥
वृत्त्येव ज्ञानिता तस्य तदभावेनवेद्यते ।
ज्ञानाज्ञानेत्यमूवार्ते साभासस्य हृदोमते ॥ ३२ ॥
जानातीत्यस्य मुख्योर्थो न वृत्तिं भजते इति ।
जानन् वृत्त्याश्रयं वापि द्रष्टा कां वृत्तिमाप्नुयात् ॥ ३३ ॥
तस्मात् स्फूर्तिः स्फोरणं च जानात्यर्थोवगम्यताम् ।

ते उभे न विभिन्नेस्त एकस्यैव तु नामनी ॥ ३४ ॥
संबन्धिभेदात्कल्प्येते स्वपरेतिसमाश्रितात् ।
तदर्थो न क्रियारूपो न शक्तिर्न गुणो मतः ॥ ३५ ॥
सर्वाधिष्ठानभूतत्वात्स्वाश्रितत्वाच्च सर्वदा ।
तदाश्रिता चान्यचिद्विस्तेन भातं जगद्यतः ॥ ३६ ॥
न बाध्यमेवं तद्रूपं बुद्धिवृत्त्या प्रकाश्यते ।
न भातीत्यभिमानस्यापनोदायैवसेष्यते ॥ ३७ ॥
एवं सन्तमभोक्तारमपि स्वान्तस्थधर्मकम् ।
मत्वा भ्रान्त्या मन्यसे त्वं सुखदुःखादिमानिति ॥ ३८ ॥
चिद्रुपन्मन्यसे यच्च स्वरूपं चिदचिन्मयम् ।
मिथ्यैवेतद्भासमात्रं शुक्तिकारजतं यथा ॥ ३९ ॥

नित्ये शुद्धे चात्मनि चप्तिमात्रे कर्ता भोक्तास्मीति मिथ्याप्रतीतिः ।
कर्तृत्वादेर्बाधितत्वात्स्वरूपे चिन्मात्रस्यैकान्ततःस्वात्मतत्वात् ॥ ४० ॥
ज्ञातृत्वं ते नास्तिचित्तस्य चेत्स्यात्तत्किं वृत्तेः प्रागुताहोपरस्तात् ।
वृत्त्यासाकं वासदावाद्यपक्षौ तत्रोपेत्यौ चिन्त्यतां तावदन्त्यौ ॥ ४१ ॥
वृत्त्यासाकं चेन्न वृत्तेरभावो विज्ञायेत ज्ञायते त्वेष सुप्तौ ।
व्यापारो यश्चेतसो वृत्तिनामापार्थोस्य स्यात्सर्वदा ज्ञातृतायाम् ॥ ४२ ॥
व्यापारस्यादस्य वृत्तिप्रवाहो ज्ञानार्थश्चेज्ज्ञायते न स्वयं सः ।
चेद्रेषोपि ज्ञायते केनकेन व्यापारेणोत्त्यापतेदानवस्थ्यम् ॥ ४३ ॥
व्यापारश्चेदेव वृत्तिप्रवाहः साक्षाज्ज्ञानं ज्ञायते वा न वेतत् ।
आद्येप्यन्येज्ञायतेऽथ स्वतोन्त्येकिं मानं स्यादस्तितायां हि तस्य ॥ ४४ ॥
आद्ये पक्षेप्याद्यपक्षो मतो नोचेतोन्यस्य द्रष्टृता नाभ्युपेता ।
नान्त्योऽपिस्याद्दृश्यतायाः क्रियाया नोचेदन्यासामपि स्वप्रभत्वम् ॥ ४५ ॥

Digitized by Google

ज्ञातृत्वं तेनापि चित्ताद्यधीनं क्लृप्तं तेषां दृश्यसंकल्पकत्त्वम् ।
चित्ताभावाभावयोर्यः स्वतन्त्रं जानंस्तस्यान्याश्रितत्वं कथं स्यात् ॥ ४६ ॥
ज्ञातृत्वं चेद्दृश्यसंकल्पकत्वं दृश्याभावं न स्मरेद्भूतपूर्वम् ।
दृश्याभावं कल्पयंस्तादृशं नोद्दृष्टः कोपि प्राक्स्मृतेस्तर्हि तन्न ॥ ४० ॥
इत्थं द्रष्टा कल्पनं नापि वृत्तिर्नाहंकारः संघरूपो न शून्यम् ।
सर्वानेतान् बाधितानीक्षमाणः साक्षाद्यस्त्वं ह्यप्रमाथः स एव ॥ ४८ ॥
स्वामिन्द्रष्टा हृष्यतीष्टस्य लाभात्कोन्यो हृष्येद्धर्षहेतूनपश्यन् ।
द्रष्टृन्यश्चेत्कोपि हृष्येच्छरीरे हस्तादिः किं न प्रहृष्येत्तथैव ॥ ४९ ॥
अत्यल्पं यत्प्रोच्यते हृष्यतीति द्रष्टर्येवं सर्वकर्माण्यपि स्युः ।
यस्मान्नैकस्यापि कर्मान्तरस्य शारीरस्याशाक्तिकत्वं प्रसिद्ध्येत् ॥ ५० ॥
एवं द्रष्टुर्हस्तपादात्मकत्वमापद्येत स्यात्तथैवेति चेन्न ।
दोषः प्रोक्तः कर्तृकर्मत्वरूपो दृश्यत्वेन द्रष्टृता नैव तेषु ॥ ५१ ॥
कुड्यं पश्यन्भिद्यते कुड्यरूपादृहं पश्यन्भिद्यतेस्मात्तथैव ।
हृष्टं पश्यंश्चेदयं हृष्टरूपाद्भिद्यतेव द्रष्टृरूपोयमात्मा ॥ ५२ ॥
यद्वद्दृष्टेहे कार्श्यदैर्घ्यादिभावा देहस्यैवानात्मनो नात्मनः स्युः ।
दृश्यत्वेन क्लेशहर्षादयोपि स्वान्ते दृष्टा नात्मधर्मा भवेयुः ॥ ५३ ॥
योयत्सत्वे वर्त्तते नान्यदा यस्तस्यैवोक्तो नान्यदीयः स्वभावः ।
हर्षादिर्यद्विद्यमानेऽहमीष्टे नैवाभावे तस्य तस्यैव तर्हि ॥ ५४ ॥
माशङ्किष्ठाज्ज्ञानशून्योहमेषोऽ ज्ञानन्हेतुं किंनु हर्षं भजेत ।
यत्कार्याणां ज्ञातमप्याप्नुवाना मृज्जानीते नैव तत्कार्यहेतून् ॥ ५५ ॥
एवं पश्याद्धस्य हर्षं मनस्थं द्रष्टर्यात्मा हृष्यतीति ब्रवीषि ।
द्रष्टा चात्मा हर्षवृत्तो तथैव द्रष्टास्ते चेद्विकृतो नैव वाच्यः ॥ ५६ ॥
अन्योजानात्यन्यएवप्रहृष्यत्येवं युक्तिं न प्रतीतिं सहेत ।
मैवं युक्तं ह्येतदेव प्रतीयात्स्पष्टं भाते द्रष्टृदृश्यप्रभेदे ॥ ५७ ॥

लोकसिद्धस्तु यो द्रष्टा मायिको ज्ञानहर्षवान् ।
तन्मूलाः कल्पनाः सर्वा यथा स्वप्नमनोरथाः ॥ ५८ ॥
मानसी कल्पनैवैषा द्रष्टा जानाति वेच्छति ।
द्विष्यत्यथापि चादत्ते दत्तेचेत्याद्यनेकधः ॥ ५९ ॥
न चायं वस्तुसन्नर्थो न कथंचित्प्रसिद्ध्यति ।
युक्त्या प्रतीत्या वा शिष्य सुविचारसनाथया ॥ ६० ॥
स्वांप्रतीतिमनुस्मृत्य जानामीत्यादिवस्म्यहं ॥
यथेच्छं वद सञ्चिन्त्य तदर्थं तु निरूपय ॥ ६१ ॥
कस्त्वं किं चास्ति ते ज्ञानं कथमुत्पद्यते च तत् ।
कथं संबद्ध्यते तद्धि तस्य कर्षात्त्वयापुनः ॥ ६२ ॥
स्वतन्त्रोस्मि गुरोस्वस्य करणानां प्रवर्तने ।
ज्ञानेच्छादिसमाधारश्चन्द्रियाणामगोचरः ॥ ६३ ॥
अतीन्द्रियेष्वप्यर्थेषु यथाकार्यात्तदूहनम् ।
ज्ञानेच्छा कृतिमानस्मीत्येवं बुद्ध्या सजह्यते ॥ ६४ ॥
किं चानुमीयते तस्य कार्याद्विज्ञानलक्षणात् ।
अहमस्मीति बुद्धिश्च स्वसत्तायाः प्रमापिका ॥ ६५ ॥
सोहं स्वतन्त्रोस्मिन्देहे व्याप्यतिष्ठामितं सदा ।
प्रवर्तयामि चाक्षाणि समनस्कानि गोचरे ॥ ६६ ॥
यस्यैव विषयं लोके जिघ्नासे प्रेरयाम्यहम् ।
मनस्तत्रत्वनिच्छायामन्यत्र प्रेरयामि तत् ॥ ६७ ॥
अक्षद्वारा मनो गत्वा विषयं तत्र यत्तमः ।
अपाकरोति तेनायं संमुखो मम जायते ॥ ६८ ॥
प्रतिबिम्बति तत्कालं मयि चैवं सदृश्यते ।
प्रतिबिम्बोपलब्धिर्मे ज्ञानमित्यवगम्यताम् ॥ ६९ ॥

Digitized by Google

प्रतिबिम्बविशिष्टत्वं ज्ञातृत्वमिति च स्फुटम् ।
विषयाः प्रतिबिम्बन्तो मयि मेया भवन्ति ते ॥ ७० ॥
एवमिच्छादयोन्येपि संभवन्ति यतो मयि ।
ममैव ज्ञानहर्षादि धर्माः सन्तीति मे मतम् ॥ ७१ ॥
न मृद्दृष्टान्तमापेक्ष्य हर्षादेर्जडधर्मता ।
यथोक्ता स्वामिना सा तु ज्ञातुरेव मता मम ॥ ७२ ॥
द्रष्टा हृष्यति यद्दृष्टे हर्षहेतुं विलोकयन् ।
तदर्थं वद मे येन पश्येयं तस्य युक्तताम् ॥ ७३ ॥
दर्पणेन प्रतीकाशे द्रष्टरि प्रतिबिम्बति ।
दृष्टं वस्तु ततो हर्षविकारस्तस्य चेत्ययम् ॥ ७४ ॥
ननु हर्षस्य दृष्टत्वान्न विकारस्तवास्ति सः ।
यस्य स्यादेष तस्यैव दृष्टत्वं नतु तत्तव ॥ ७५ ॥
अपि हर्षस्य दृष्टत्वे सविकारः कुतो न मे ।
द्रष्टा न किं विक्रियतां हर्षरूपेण सद्गुरो ॥ ७६ ॥
विकारः खलु यो यस्य न तिष्ठति ततः पृथक् ।
पार्थक्येन घटस्येव प्रेक्ष्यमाणस्य पाकता ॥ ७७ ॥
तथापि ते तथा वक्तुर्घटाद्यज्ञत्वमापतेत् ।
तस्माद्धर्षविकारोयं न तेन्यस्यैव [illegible] ॥ ७८ ॥
प्रतिबिम्बतिहर्षोपि मयि चेन्न तथापि किं [illegible]
हर्षज्ञातृत्वमेवस्याद्धर्षवत्वं कथं वद ॥ ७९ ॥
तदेव हर्षवत्त्वं चेद्घटवत्त्वं बलाद्भवेत् ।
प्रतिबिम्बावभासहेतोस्तव तिष्ठतश्च घटः ॥ ८० ॥
एकेन ज्ञानिनाम्येव तद्वतेत्यसंभवः ।
परिणामं भजन्त्वा हर्षाख्यं तस्य दृष्टताम् ॥ ८१ ॥

अनुत्कान्यस्य वक्तुस्ते प्रतिबिम्बादहोमतिः ।
हर्षवत्त्वेपि मनसोऽज्ञानात्तन्न प्रहृष्यति ॥ ८२ ॥
जानन्नात्मा हर्षलाभे हृष्यतीत्यथ कांक्षति ।
अज्ञातुरेव मनसो हर्षवत्त्वं तवास्ति चेत् ॥ ८३ ॥
विषं न हृष्येत्तदिति व्याहतं किं न वेत्सिभोः ।
हर्षवत्त्वं हर्षलाभो हर्षज्ञानमिति त्रयम् ॥ ८४ ॥
पार्थक्येन विवक्तुस्त्वं तन्मे निर्वक्तुमर्हसि ।
हृष्यतो हर्षणं किं तद्धर्षोऽपिवा क्रियान्तरम् ॥ ८५ ॥
आद्ये तु मनसा साम्यमुत्तरं न प्रसिद्ध्यति ।
साम्येपि मनसा नैतत्तस्यावस्थानमिच्छति ॥ ८६ ॥
जानन्नात्मा स्वहर्षस्यानुवृत्तिमभिकांक्षति ।
हर्षःस्थेयाद्द्वितीयं धीरिच्छा दृष्टैव सा खलु ॥ ८७ ॥
न तस्या आत्मधर्मत्वं यस्य तस्यैव सा भवेत् ।
इतीच्छापि मनस्येव वक्तुं युक्ता न चात्मनि ॥ ८८ ॥
प्रतिबिम्बाद्द्रष्टुरपि स्याच्चेत्सेत्यपि चिन्त्यताम् ।
दर्पणप्रतिभत्वेस्य प्रतिबिम्बस्य संभवः ॥ ८९ ॥
तदेव न :प्रसिद्धं चेद्दूरे तत्प्रतिबिम्बनम् ।
प्रतिबिम्बोपलब्धिश्चेज्ज्ञानमात्मनि ते मतम् ॥ ९० ॥
प्रतिबिम्बोपलब्धेः प्राग्ज्ञानं नास्तीति ते भवेत् ।
यत्किंचित्प्रतिबिम्बस्य सत्त्वाज्ज्ञानासंभवः ॥ ९१ ॥
इति चेद्वृत्तिशून्यत्वं कथं तेनानुभूयताम् ।
वृत्तिशून्यस्य चित्तस्य द्रष्टरि प्रतिबिम्बनात् ॥ ९२ ॥
तज्ज्ञानं सुलभं मन्ये घटज्ञानं यथा गुरो ।
बिम्बिता इव विषया भान्ते नेतरेष्विति ॥ ९३ ॥

Digitized by Google

कथंनु ज्ञायते भिन्नत्वयाह्यादर्शरूपिणा ।
कथं च ज्ञातताकस्याज्ञातता चापरस्यतु ॥ ९४ ॥
ज्ञायेयातां त्वदादर्शे तयोरप्रतिबिम्बनात् ।
आत्मस्थप्रतिबिम्बत्वं ज्ञातत्वं विषयस्य यत् ॥ ९५ ॥
विषयप्रतिबिम्बेपि तद्विशिष्टं न बिम्बति ।
तदर्थमन्यादर्शश्चेद्द्रष्टृनानात्वमापतेत् ॥ ९६ ॥
एकएवास्मि द्रष्टेति प्रतीतेस्तन्न युज्यते ।
तस्माद्दर्पणरूपत्वं द्रष्टुस्ते न प्रसिद्ध्यति ॥ ९७ ॥
द्रष्टृत्वं च ततो नास्य प्रतिबिम्बव्यपाश्रयम् ।
माभूद्दर्पणरूपत्वं मनोङ्गः खल्वहं मुने ॥ ९८ ॥
अदृश्यत्वेन तस्यापि युज्यते मे तदङ्गता ।
उपपद्येत येनाहं दृष्यामीत्यादि का मतिः ॥ ९९ ॥
मदंशत्वाद्धिमनसस्तदीयं यन्ममेव तत् ।
विकारोङ्गगतो लोके लक्ष्यते बहुधाङ्गिनि ॥ १०० ॥
काणे चक्षुषि चेष्टस्य काणत्वमिव सद्गुरो ।
प्रेरकप्रेर्यभावश्चेच्छिष्यात्ममनसोर्यदि ॥ १०१ ॥
कथमंशांशितां ब्रूषे विजातीयस्वभावयोः ।
न ह्यश्वरथयोः कश्चिद्दशांशित्वं प्रभाषते ॥ १०२ ॥
तथापि तत्कल्पयत उपेक्षेत न कोविदः ।
दृश्यत्वाच्चापि मनसो द्रष्टृंशत्वं न संभवेत् ॥ १०३ ॥
दृश्यत्वं खलु तस्यैवमुपपत्त्यापि सिध्यति ।
अयौगपद्याज्ज्ञानानां मनो यदनुमीयते ॥ १०४ ॥
विषयोपस्थितेः स्वप्ने स्मृतौ च परिणामिता ।
विषयाकाररूपेण तस्य चेवानुमीयते ॥ १०५ ॥

मनसो परिणामित्वे विषयाकाररूपतः ।
कथमाकारभानंस्याद्विषयस्यानुपस्थितौ ॥ १०६ ॥
तस्मान्मेयसमाकारो मानसः सोनुजायते ।
सएव दृश्यते साक्षान्न बाह्यो विषयः स्वयम् ॥ १०७ ॥
संस्कारस्तस्य चोद्बुद्धः स्मृतौ स्वप्ने च भासते ।
तथैवेच्छादि भावानामुपादानं मतं मनः ॥ १०८ ॥
इदं मेस्यादितीच्छायाः स्वरूपं यद्विभासते ।
इदं माभूदिति द्वेषः साध्वसाध्विति हर्षधीः ॥ १०९ ॥
अहमस्मीत्यहंकारो नजान इति मोहधीः ।
संकल्पानाममीषां यदुपादानतया स्थितम् ॥ ११० ॥
मनः कथंनु दृश्यस्य तस्य स्वार्थगता भवेत् ।
तदभावे च द्रष्टुःस्यान्न तद्धर्मोपसंक्रमः ॥ १११ ॥
वृत्तिनामेव दृश्यत्वं मनसो नेति नोच्यताम् ।
मनोवस्था विशेषत्वात्तासां तन्मात्रतेष्यताम् ॥ ११२ ॥
कुड्ये दृष्टे मृन्नदृष्टेत्ययुक्तं तद्वद्वृत्तेर्दर्शने बुद्ध्यदृष्टिः ।
इत्थं बुद्धेर्दृश्यतायाः कथं स्युस्तस्याधर्मा द्रष्टरि ज्ञानमात्रे॥११३॥
स्वामिन्यथा सैन्यगता वारोप्येते जयाजयौ ।
तथैव हर्षोदयस्तद्वन्मानसाः प्रेरकेमयि ॥ ११४ ॥
जयाजयाभिमानित्वाद्राज्ञः स्यातां जयाजयौ ।
न ते निरभिमानत्वाद्धर्षादिस्वपि युज्यते ॥ ११५ ॥
हर्षेच्छादेर्यथा चेतःपरिणामत्वमुच्यते ।
तथाहमोपिनमनःपरिणामत्वमस्ति किम् ॥ ११६ ॥
द्रष्टुर्निरभिमानत्वे तस्यार्थस्याप्यसंभवात् ।
कथंनुप्रेरयेच्चेतः क्रिययेच्छा विहीनया ॥ ११७ ॥

Digitized by Google

न कुलालो मृदमिव परिणामयतीतरैः ।
साधनैर्मानसं द्रष्टानवस्थानुपतेद्यतः ॥ ११८ ॥
चेन्मनःपरिणामाय द्रष्टा साधनमाददेत् ।
साधनादानकर्मापि साधनान्तरमर्हति ॥ ११९ ॥
तस्य तस्यापि करणेनवस्था दुर्वेहा भवेत् ।
स्वरूपेणैव तद्युक्तमात्मनो मनईरणम् ॥ १२० ॥
आत्मसत्तैव मनसः प्रेरिकेत्यवगम्यताम् ।
तस्याः सदासमत्वेपि मनसि व्यग्रता कुतः ॥ १२१ ॥
इति चेदात्मनो द्रष्टुर्द्वारैव प्रेरणामता ।
विषमत्वाददृष्टस्य वैचित्र्यमुपपद्यताम् ॥ १२२ ॥
एवं दर्शनमप्यस्य करणं न ह्यपेक्षते ।
यद्यपेक्षेतकरणमनवस्थापतेत्पुनः ॥ १२३ ॥
करणस्यापि दृष्टत्वात्तदर्थं करणाश्रयात् ।
स्वरूपेणैव तद् द्रष्टा पश्यतीत्यवधार्यताम् ॥ १२४ ॥
एवं स्थिते न द्रष्टुस्ते हर्षशोकादिसंभवः ।
मिथ्यैव मनसा ध्यातस्तद्रूपमविजानता ॥ १२५ ॥
विषयाकारभवनं चेतसो ज्ञानमेव तत् ।
तदुपादानभूतस्य ज्ञातृता च मयेष्यते ॥ १२६ ॥
तत्प्रवृत्तेस्तु वैचित्र्यमदृष्टकृतमुच्यते ।
तस्य प्रवर्तकत्वं तु जगदीशसमर्पितम् ॥ १२७ ॥
सएवात्मास्मि द्रष्टाहं भोक्ता च सुखदुःखयोः ।
इति चेदुक्तमेवैतदृश्यत्वाच्चेतसो न तत् ॥ १२८ ॥
न सच द्रष्टृतापिस्यात्कर्तृकर्मविरोधतः ।
कथं तदेव दृश्यंस्याद्द्रष्टृ दर्शनमित्यपि ॥ १२९ ॥

दृश्यस्यापि च द्रष्टृत्वे सर्वदृश्येषु संभवेत् ।
द्रष्टृत्वमिति द्रष्टारो यावद्दृश्यं समाप्नुयुः ॥ १३० ॥
तस्माद्द्रष्टाज्ञानमात्रं न वृत्तिर्नापि वृत्तिमान् ।
कथं वृत्तिवृत्तिमतोर्दृश्ययोर्द्रष्टृता भवेत् ॥ १३१ ॥
यथैकस्यैव द्रष्टृत्वं दृश्यत्वं च न युज्यते ।
तथैकस्यैव द्रष्टृत्वज्ञानत्वे भवतः कथम् ॥ १३२ ॥
द्रष्टृदृश्ये यथा शिष्य वैरूप्येण प्रसिद्ध्यतः ।
द्रष्टृज्ञाने तु नैवेवमिति युक्ता तदेकता ॥ १३३ ॥
करणव्यापृतेरन्ते ज्ञानं द्रष्टरि जायते ।
तेन ज्ञानी त्युच्यतेसो कथमैक्यं तयोर्भवेत् ॥ १३४ ॥
करणव्यापृतेरादिं मध्यं चान्ते प्रकाशयत् ।
यत्तदेव तदन्तं च भासयन्नवतिष्ठते ॥ १३५ ॥
सर्वज्ञानित्वमेवेवं ज्ञानैक्यं मे तथापि नो ।
तर्हि वृत्त्याश्रयस्यैव ज्ञानित्वं मन्यते बत ॥ १३६ ॥
यदिवृत्तिर्मतं ज्ञानमाधारो ज्ञानवांस्ततः ।
कृतं ज्ञानान्तरस्यात्र कल्पनेनातिबुद्धिना ॥ १३७ ॥
स्मर पूर्वं वृत्तिरेव ज्ञेयत्वेन निरूपिता ।
तस्या ज्ञापकमप्येतज्ज्ञानं काल्पनिकं कथम् ॥ १३८ ॥
ज्ञातेवापेद्यतेवृत्तेःकुतोज्ञानान्तरंगुरो ।
जानामिवृत्तीर्भगवन्घटाद्याकारशालिनीः ॥ १३९ ॥
मनस्यैव च दृश्यत्वं ज्ञान एव च द्रष्टृता ।
सुप्तिमूर्छादिभावे तु प्राकृतैरपि मन्यते ॥ १४० ॥
यथा लोके सुषुप्तादेर्ज्ञातास्मीत्युच्यते ततः ।
सुषुप्तादेर्ज्ञान एव ज्ञातृता पर्यवस्यति १४१ ॥

न लोकास्तदभिप्रेत्य ज्ञातृशब्दं प्रयुञ्जते ।
सत्यं तथापि रहितस्तेन द्रष्टा न मन्यते ॥ १४२ ॥
ज्ञानातिरिक्त एवास्मि द्रष्टेत्येव तु मे मतिः ।
ज्ञानं तु कार्यमेतस्याधिष्ठातुर्देहसंस्थितेः ॥ १४३ ॥
क्रियेव ज्ञानमेतस्य कार्यं वास्यात्फलान्तरम् ।
अन्त्यैका स्यात्क्रिया तस्य करणप्रेरणा यदि ॥ १४४ ॥
करणप्रेरणा तर्हि किंक्रियायाः फलं वद ।
करणप्रेरणा द्रष्टुः स्वरूपमिति चेन्मतम् ॥ १४५ ॥
करणानां तु न ज्ञानमस्तीत्येव तवापतेत् ।
स्वयमेव प्रकाशन्ते करणानीति मे मतिः ॥ १४६ ॥
द्रष्टा तानि न जानातीत्येव तर्हि भवेत्तव ।
क्रियेव ज्ञानमेतस्य स्वाश्रिता तर्हि मे मतम् ॥ १४७ ॥
एवं चेत्किं फलं तस्याः क्रियायाः संमतं तव ।
अभिव्यक्तिः पदार्थानां सात्वाणामिदमेव चेत् ॥ १४८ ॥
तर्हि सा भिद्यते ज्ञानादित्येवापतितं तव ।
किमिदं युक्तमुक्तं ते लोकानामपि संमतम् ॥ १४९ ॥
न क्रिया न फलं ज्ञानमात्मनो गुण इष्यते ।
येनायं योजयेज्ज्ञानं तस्य ज्ञानं भवेद्गुरो ॥ १५० ॥
क्रियेव योजनावश्यं करणं सात्वपेक्षते ।
येनायं योजयेज्ज्ञानं विषयैः कथमन्यथा ॥ १५१ ॥
अस्तिद्रष्टरि सा शक्तिर्यथा ज्ञानं प्रयोजयेत् ।
विषयास्तेन व्यज्यन्ते द्रष्टाहं व्यञ्जको मतः ॥ १५२ ॥
ज्ञातृत्वं ज्ञापकस्यैवमुक्तं तर्हि सुखीभव ।
ज्ञापकत्वेप्यस्य मुने ज्ञानात्मत्वं तु नागतम् ॥ १५३ ॥

Digitized by Google

यथा द्रष्टा ज्ञानयुक्तो घटोपि स्यात्तथैव ते ।
को विशेषस्तयोस्तर्हि मतस्ते द्रष्टृ दृश्ययोः ॥ १५४ ॥
ज्ञानेन नित्ययुक्तोयं घटस्तु न तथा मुने ।
इति चेन्न कुतो द्रष्टा दृश्यते घटवद्वद ॥ १५५ ॥
यथा न दृश्यते ज्ञानं तथा द्रष्टापि नेक्ष्यते ।
स्वयं प्रकाशं ज्ञानं चेद्द्रष्टाप्यास्ते तथैव नः ॥ १५६ ॥
ज्ञायते यन्न चान्येन प्रथते स्वयमेव यत् ।
स्वप्रकाशं तदेवेष्टमेवं ज्ञानं तु सिद्ध्यति ॥ १५७ ॥
द्रष्टाप्येवं कुतो न स्यात्स्याच्चेन्न प्रथते कुतः ।
प्रथते तु गुरो द्रष्टा हर्षामर्षविकारवान् ॥ १५८ ॥
ज्ञातृत्वं वृत्तिमत्त्वाख्यमद्यापित्वं न मुञ्चसि ।
ज्ञाता न वृत्तिमान्स्वान्तं दृश्यमेव तु वृत्तिमत् ॥ १५९ ॥
स्रक्चन्दनाद्यनुभवो धीवृत्तिश्चित्प्रकाशिता ।
तां भजद्धृदयं दृश्यं कथं तज्ज्ञातृ मन्यसे ॥ १६० ॥
तादृशस्यैव द्रष्टृत्वमास्तां लोकप्रसिद्धितः ।
कर्तृकर्मविरोधोपि नैव वस्तुस्थितिं तुदेत् ॥ १६१ ॥
न स्वयं काशते वृत्तिर्भास्यतेसौ यतश्चिता ।
तर्हि साभासमेवार्यस्वान्तं द्रष्टृमतं मम ॥ १६२ ॥
ततो भिन्नश्चिदात्माचेदस्त्यसौ काशतां चिरम् ।
अहं साभासहृदयं भजे ज्ञानसुखादिकम् ॥ १६३ ॥
आभासस्तु प्रकाशात्मा हृदयं विपरीतकम् ।
तयोरैक्यं कया युक्त्या निश्चिनोष्यति दुर्घटम् ॥ १६४ ॥
घटं जानाम्यहमिति प्रतीतेरेव चेद्गुरो ।
विभिन्नयोरपि सतोः सावृत्तिः केन वार्यताम् ॥ १६५ ॥

Digitized by Google

भिन्नयोरैक्यबुद्धिस्तु भ्रान्त्यैवेति पुरेरितम् ।
तथाच लोकसिद्धोयं द्रष्टा नास्त्येव वस्तुतः ॥ १६६ ॥
द्रष्टैव चेन्न वस्तुत्वे कथं हर्षादिसंभवः ।
हर्ष हेतोर्ज्ञातुरेव हर्षवत्त्वं तु युज्यते ॥ १६७ ॥
स्रक्चन्दनादिवृत्तीनामनुहर्षादि वृत्तयः ।
जायन्ते कुत एवैतद्विपरीतं कुतो नहि ॥ १६८ ॥
कुतो वृत्तयएवैताश्चन्दनादि कुता हृदि ।
जायन्ते कारणेभ्यश्चेत्समं वृत्त्यन्तरेपि तत् ॥ १६९ ॥
यथात्मविषयाणां हि संसर्गो वृत्तिकारकः ।
तथा ता वृत्तयो हर्षविकारादिप्रवर्त्तिकाः ॥ १७० ॥
अदृष्टनियता एव वृत्तयः संभवन्त्युत ।
तयैव नार्याभावानां विचित्राणां यतो जनिः ॥ १७१ ॥
अदृष्टं कथमस्यस्यादस्वतन्त्रस्य चेतसः ।
उभे अदृष्टमनसी कल्पिते यदनादिनी ॥ १७२ ॥
अजानतोपि मनसः सुखदुःखे यथा मते ।
अजानतां घटादीनामपि ते स्तः कुतो नहि ॥ १७३ ॥
स्वभाव एव शरणं तत्तद्वस्तुगतो यथा ।
वन्हिरुष्णोजलं शीतं कठिनोश्मा घृतं मृदु ॥ १७४ ॥
तस्माद्धर्षविकारादि भजतो नैव द्रष्टृता ।
सा स्यात्सुप्त्यादिसिद्धस्य चिन्मात्रस्याविकारिणः ॥ १७५ ॥
चेत्तेप्रतीतिसामर्थ्याद्वृत्तिमत्तैव द्रष्टृता ।
स्थूलदेहस्यापि कुतो नतां त्वं स्वीकरिष्यसि ॥ १७६ ॥
जानन्नत्रवसामीति प्रतीतिरपि दृश्यते ।
सा तु भ्रान्तैव दृश्यत्वाद्देहस्य घटवन्मुने ॥ १७७ ॥

स्यां चेदहं देहरूपो द्रष्टृबाहुल्यमापतेत् ।
इन्द्रियाणामनेकत्वादपर्याप्तेश्च तावता ॥ १७८ ॥
मान्द्यमान्द्यादिधर्माणि स्वास्थ्यास्वास्थ्यादिमन्ति च ।
पश्यन्नक्ष्यान्तराणि तद्रूपो न भवाम्यहम् ॥ १७९ ॥
एवं चेद्वृत्तिमन्त्वाख्यं द्रष्टृत्वमपि ते मृषा ।
यत्त्वं पश्यन् वृत्तिमन्तं कथं तद्रूपता तव ॥ १८० ॥
वृत्तिमांस्त्वं तु नैवासि यतस्त्वं वेत्सि तं सखे ।
दृश्यस्य द्रष्टृभिन्नत्वं पूर्वमेव निरूपितम् ॥ १८१ ॥
न केवलं वृत्तिमन्तं जाने रूपरसाद्यपि ।
आद्यं त्वसाधनं ज्ञानमुत्तरं तु ससाधनम् ॥ १८२ ॥
श्रवणादीन्युपादाय जाने शब्दादिकं यतः ।
उपादानं तु कर्णादेर्मनसो योजनं मतम् ॥ १८३ ॥
योजनं करणाधीनमपि चेतन्मदाश्रितम् ।
मम स्वरूपसत्तैव मनो नेत्रादियोजिका ॥ १८४ ॥
अक्रियोऽस्मि भवांस्तर्हि नोपादत्ते स्वयं यतः ।
करणानि ततो नैव भिदा त्वज्ज्ञानगोचरा ॥ १८५ ॥
किं न पश्यामि भगवन् शब्दादिविषयानहम् ।
ध्रुवं पश्यसि शब्दादिविषयान्वृत्तिमद्यथा ॥ १८६ ॥
विनैव साधनं प्रेक्षे वृत्तिमच्चेत्तथेतरत् ।
पश्यन्नपि न जानामि पश्यामीति कथं नु तत् ॥ १८७ ॥
यथा स्वरूपसत्तैव मनआदिप्रयोजिका ।
तथा ते दर्शनमपि स्वरूपेणैव किं नहि ॥ १८८ ॥
निर्विशेषं दर्शनं मे विशेषोऽपीष्यते मया ।
रूपं जाने रसं जाने शब्दं जानामीति चेत् ॥ १८९ ॥

विशेषोयं दृश्यमतस्त्वद्रूपे दर्शने न सः ।
प्रकाश्यरूपभेदेन नालोकोपि विकार्यते ॥ १६० ॥
अग्निमात्रं तु ते रूपं पुरैव प्रतिपादितम् ।
प्रकाशनं दर्शनं ते स्वरूपेणैव निश्चिनु ॥ १६१ ॥
त्वयि प्रकाशमानेदः सर्वं विश्वं प्रकाशते ।
द्रष्टृ दृश्यं दर्शनं चेत्यादिभेदशतान्वितम् ॥ १६२ ॥
वृत्तिं वृत्त्याश्रयं चैव तदभावं च यो निशम् ।
भासयन्न विशेषेण स्वरूपेण दृशिर्भवान् ॥ १६३ ॥
अनादिसिद्धं ते रूपं न च तेऽन्तोपि लक्ष्यते ।
प्रकाशेन विना कस्याप्यादिरन्तो न लक्ष्यते ॥ १६४ ॥
प्रकाशश्चेत्स्वतःसिद्धो युगपद्भान्ति नो कथम् ।
विषयाः सर्वे एवार्य विनैव करणक्रियाः ॥ १६५ ॥
भान्ति नो चेन्न भायुस्ते पराधीनप्रकाशनाः ।
आपयत्तदभातत्वं चेज्ज्ञानं सुस्थिरं तव ॥ १६६ ॥
त्वय्यध्यस्तोपि विषयोऽविद्यया तमसा वृतः ।
कल्पितो यो न चाभाति यावन्नाभासभासितः ॥ १६७ ॥
स्वयं त्वभासमानानां परभासेन भासिनाम् ।
यथा घटेन तद्भानमाद्यशक्त्या प्रयत्यते ॥ १६८ ॥
अग्निबिम्बयुताबुद्धिर्य समाकारमञ्चति ।
प्रतिबिम्बं तदाकारं भाति वन्हिर्यथायसि ॥ १६९ ॥
वन्हेर्दीर्घादिरूपत्वमयःसंबन्धकल्पितम् ।
ज्ञानेपि घटरूपत्वं बुद्धिसंबन्धकल्पितम् ॥ २०० ॥
अग्न्याभासो घटाकारो भाति अग्निस्तु न स्वयम् ।
अग्नेस्तु खल्वसङ्गत्वात्सरूपत्वं न युज्यते ॥ २०१ ॥

Digitized by Google

अज्ञाननाशने ज्ञप्तिः स्वयं यद्यक्षमा मुने ।
प्रतिबिम्बं कथं तस्यास्तन्नाशे प्रभवेन्ननु ॥ २०२ ॥
ज्ञप्ति मात्रे सति यथा जगज्जातं विनिर्ममे ।
तथैवाज्ञानपिहितमेवा कारि तदिष्यताम् ॥ २०३ ॥
स्वप्रकाशा यथा ज्ञप्तिर्न तथा संभवेज्जगत् ।
तस्मिन्प्रकाशमाधातुं धीगता कल्प्यते चितिः ॥ २०४ ॥
न केवलधिया तत्स्यादप्रकाशात्मिका यतः ।
ज्ञानेनापि न शुद्धेन तस्य निःसङ्गता यतः ॥ २०५ ॥
आभासस्य न केवल्यं नात्मनश्च ससङ्गता ।
विषयाभावयोः स्फूर्त्योरिति युक्तं प्रतीयताम् ॥ २०६ ॥
घटकुड्यादिभावानां सुप्त्यादौ लय ईक्ष्यते ।
येन तत्केवलं ज्ञानं विषयाभावतस्तदा ॥ २०७ ॥
विशेषितमभावेन तदपीति न चोद्यताम् ।
नहि तुच्छैर्नृशृङ्गाद्यैर्मेलितः कोपि मन्यते ॥ २०८ ॥
तस्मिन्सत्यपि नो भाति जगदाभासतः पुरा ।
इत्याभासस्य जगतो भासकत्वं विचार्यताम् ॥ २०९ ॥
लोकसिद्धोयमेवास्ति द्रष्टा चिज्जडसङ्गतः ।
चिद्रूपः स्फूर्तिरूपत्वाज्जडो यदभिमन्यते ॥ २१० ॥
यद्यपि स्फूर्तिमनसी विजातीये तथापि ते ।
एकात्मनी इवाभातो लोहवन्ही यथा तथा ॥ २११ ॥
अप्रकाशस्वभावस्याचितोभानं न युज्यते ।
अथापि तद्भासते चेन्मिथ्यास्वाप्निकवत्स्मर ॥ २१२ ॥
अविद्यमानं तादात्म्यं तयोर्नाप्युपपद्यते ।
तथापि भासमानं चेत्तन्नटीप्रत्ययो यथा ॥ २१३ ॥

Digitized by Google

प्रमाणान्तरनिर्णीतपुंस्त्विका नटिका यथा ।
नारीत्वेनोपलब्धापि तत्त्वतो गृह्यते नहि ॥ २१४ ॥
नानाधर्मो तथा द्रष्टा भासमानोऽपि मन्यताम् ।
मिथ्यैव व्यवहारेऽपि विवेकादचिदात्मनोः ॥ २१५ ॥
विजातीयस्वभावानां चिज्जडानां किमेकता ।
संभवेन्नैव सा शिष्य तमोभास्करयोरिव ॥ २१६ ॥
अहंबुद्धेस्तु विषयाश्चिच्चिदाभासदेहकाः ।
अज्ञानादेव भासन्ते सदाऽभिन्ना इव स्थिताः ॥ २१७ ॥
अभेदोऽन्यतमेनैषां नापि सर्वैः कृतो ह्ययम् ।
अस्वातन्त्र्यादकर्तृत्वान्माययैव प्रकल्पितः ॥ २१८ ॥
दर्शितोऽयं न चेद्वृत्तो वेषात्यान्नटराजवत् ।
स्वस्वस्वभावसंत्यागस्तेन तेन न यत् कृतः ॥ २१९ ॥
स्वप्रकाशाचिदत्रापि तथैवास्ते यथान्यदा ।
परिणामि जडं चापि परेणैव प्रकाश्यते ॥ २२० ॥
भासकज्ञानरहितं जडं नैवानुभूयते ।
इति तादात्म्यमेव स्यात्तयोर्नैवेति मन्यताम् ॥ २२१ ॥
व्योमालोकाविनाभूतो घटो नैवानुभूयते ।
घटतत्त्वं तयोः किं स्यान्नचेज्ज्ञानं घटो नहि ॥ २२२ ॥
परिणामादहंकर्तुस्तत्तद्विषयरूपतः ।
द्रष्टृत्वं कथमस्य स्याद्दृश्यस्यैव यथा मृदः ॥ २२३ ॥
अहं चेदं चेति वृत्ती एकस्यैव हृदो मते ।
अहं वृत्तिमदाभातं कर्षिदं वृत्तिमन् मनः ॥ २२४ ॥
अहं वृत्तिमदेतत्तु चिच्चिदाभासदेहकान् ।
आत्मत्वेनाभिमत्याहं जानामीत्यादि मन्यते ॥ २२५ ॥

अयं घट इयं वृत्तिश्चिदाभासेन भासिता ।
अस्यां तु ज्ञातमात्रायां जानामीत्यभिमन्यते ॥ २२६ ॥
गृहीतो विषयो बुद्ध्या भासितो ह्यभिमानुना ।
उपलब्धो मयैवेति मनुतेऽहंक्रियावान् ॥ २२७ ॥
स्वीयज्ञानेन विषयं व्याप्नोमीत्येव इष्यताम् ।
जाने विषयमित्यस्य सर्वैक्यमुपपद्यताम् ॥ २२८ ॥
चिदाभासेन चाभेदं कृत्यन्तरवताकृता ।
गत्वेवस्वस्य मनुते तत्कार्यं व्यापनं त्वहम् ॥ २२९ ॥
अप्यहंकारशून्येन चैतन्येन प्रकाशिते ।
स्वेनाप्रकाशितेप्येवं कथं तदभिमन्यताम् ॥ २३० ॥
अनिर्वाच्यैव मायेयं कारकं दुर्घटक्रिया ।
यया ऽचेतनमप्येतच्चेतनाभेदमाश्रितम् ॥ २३१ ॥
ज्ञानस्य नित्यसिद्धस्य साध्यत्वमिव दर्शितम् ।
द्रष्टृता स्वाश्रयेणास्य सती बुद्धमयी कृता ॥ २३२ ॥
येनैव हृद्वृत्त्युदये जानामीत्यभिमन्यते ।
प्रकाशकत्वमेवास्य ज्ञातृत्वं च तिरोहितम् ॥ २३३ ॥
इदं ज्ञातमिदं नेति जानामीत्यभिमन्यते ।
अहंकर्त्रा मतेनैकं कूटस्थेन कृता स्वयम् ॥ २३४ ॥
इन्द्रियेषु प्रसन्नेषु स्वार्थैर्हृष्यत्यहं पुनः ।
इन्द्रियाभेदमारोप्य स्वस्मिंस्तल्लाभलाभवान् ॥ २३५ ॥
पुनस्तेषु विषण्णेषु विषयालाभतः स्वयम् ।
विषीदति स्वविषयालाभाद्विषमुपैव तत् ॥ २३६ ॥
इत्थं स्थूलादिभिर्देहैरात्मनाभेदमाप्य हृत् ।
संसारमभिमन्वानमपिभ्रान्त्येति चिन्त्यताम् ॥ २३७ ॥

Digitized by Google

तदेवं चिच्चिदाभासदेहतादात्म्यमूलकाः ।
व्यवहाराः प्रवर्तन्ते भासमाना न वस्तुतः ॥ २३८ ॥
असन्नपि चिज्जडात्मा भासते चेत्तथाऽनिशम् ।
व्यवहर्ता यथा पूर्वं मिथ्यास कथमुच्यताम् ॥ २३९ ॥
अलातं भ्रमणेनेव वर्तुलं भाति यद्यपि ।
न तथा मन्यते यद्वद्व्यवहर्ता तथेष्यताम् ॥ २४० ॥
तथेक्षितेनापि मुने को लाभ इति चेद्गुत ।
वास्तवी भोक्तृता नश्येत्कोन्योतो लाभइष्यते ॥ २४१ ॥
प्रवर्तेरन् यथा पूर्वं सुखदुःखानि चेद्धृदि ।
सुखी दुःखी न वस्तुत्व इति बुध्वापि किं मुने ॥ २४२ ॥
अभिमन्ता यथा पूर्वमभिमन्येत चेत्पुनः ।
सुखदुःखे स मिथ्येति ज्ञपमात्रेण किं भवेत् ॥ २४३ ॥
हन्तात्वमभिमन्तारं पश्यन्नपि पृथक् स्थितम् ।
सुखदुःखादिभिस्तस्य पीड्यसे किं यथा पुरा ॥ २४४ ॥
मिथ्यात्वज्ञानमात्रेण न प्रतीतिर्निवर्तते ।
ज्ञान्तोपि बलाद्भाति भ्रमेरालातवृत्तता ॥ २४५ ॥
दुर्घटो मन्यमानोपि नाभासोपि तिरोभवेत् ।
आमायिकादृष्टशान्तेर्मिथ्याभूतस्तु भासताम् ॥ २४६ ॥
मायाच्चेद्भातुनामेव मायाकार्यैर्मृषात्मभिः ।
चिदाभासोपि नेवैतैः स्पृश्यते किमुचित्स्वयम् ॥ २४७ ॥
वन्हिस्थतप्तलोहस्य ताडनापीडयेन्नहि ।
तत्रस्थमनलं चेत्किमयआधारपावकम् ॥ २४८ ॥
एवं तत्त्वं त्वविज्ञाय सामीप्याच्चित्तदन्ययोः ।
अन्योन्यधर्मधर्मित्वमन्योन्यस्यानुमन्यते ॥ २४९ ॥

इत्थं लौकिक द्रष्टृत्वं मिथ्या ऽध्यासस्वरूपतः ।
तत्कार्यभूतज्ञानस्य मिथ्या त्वमथदृश्यताम् ॥ २५० ॥
यदेतद्दर्शनं नाम तच्च देहेन साध्यते ।
कियत्कियच्च द्रष्टेति पार्थक्येन समीक्ष्यताम् ॥ २५१ ॥
घटादिदर्शनं भाति यद्यपीन्द्रियसाधितम् ।
तद्दर्शने भानमात्रं नैव केनापि साधितम् ॥ २५२ ॥
रूपं भाति भाति शब्दो भान्ति गन्धरसादयः ।
एवं भानस्यानुगमाद्विषयेभ्योऽतिरिच्यते ॥ २५३ ॥
भानं चेज्ज्ञेयरूपस्यात्तथाभायान्निरन्तरम् ।
निरन्तरं घटो नैव भाति कुड्याद्यपि क्वचित् ॥ २५४ ॥
ज्ञेयाकारमनो वृत्त्या सह ज्ञानं तु जन्यते ।
इति चेन्नैव सामग्र्या ज्ञानोत्पत्तेरदर्शनात् ॥ २५५ ॥
ज्ञेयाकारमनोवृत्तिरेव तज्जनिकारणम् ।
इति चेत्किमुपादानं निमित्तं वा तदुच्यताम् ॥ २५६ ॥
नोपादानं निमित्तं चेत्किमुपादानकंवद ।
अतीतवृत्तिज्ञानं चेत्केवलं वा सवृत्तिकम् ॥ २५७ ॥
सवृत्त्यैव सवृत्तीनामुपादानं मतं मम ।
वृत्तिज्ञानं च ते तर्हि भवेतां नैककारणात् ॥ २५८ ॥
तथैव ते संभवेतां को वा दोषस्तथासति ।
ज्ञानज्ञेये विजातीये भिन्नकारणके अपि ॥ २५९ ॥
न शालतालो भवत एकबीजात्कथं च न ।
वृत्तिरेव ततो ज्ञानमास्तां भेदेन किं मुने ॥ २६० ॥
ज्ञाताचेद्वृत्तिरज्ञेषा ज्ञानरूपा कथं भवेत् ।
न घटो ज्ञायमानःसन् ज्ञानमित्युच्यते बुधैः ॥ २६१ ॥

घटादिविषयाणां चेज्ज्ञानत्वं नहि ते मतम् ।
वृत्तेर्विषयरूपायाश्चापि तत्त्वं न युज्यते ॥ २६२ ॥
आस्तां भेदो ज्ञानवृत्त्योस्तथाप्यस्ति किमागतम् ।
वृत्तेर्भिन्नस्य ज्ञानस्य कार्यत्वे कारणं वद ॥ २६३ ॥
अतीतवृत्तेर्ज्ञानं चेज्ज्ञानानित्यत्वमागतम् ।
तदेव वृत्त्यन्तरे चेज्ज्ञानोपादानमास्थितम् ॥ २६४ ॥
वृत्त्या विशेषितस्यास्य नैकतेति ब्रवीषि चेत् ।
ज्ञाने को वा विशेषोऽस्या जायते तं वदाशु मे ॥ २६५ ॥
घटज्ञानं पटज्ञानं कुड्यज्ञानमितीति चेत् ।
ज्ञानभेदो न चैवायं वृत्तिभेदो मनोगतः ॥ २६६ ॥
न वृत्तिभेदमात्रेण ज्ञानभेदो निरूप्यताम् ।
ज्ञानमात्राश्रितो भेदो न चेत्ते हृदयं गतः ॥ २६७ ॥
ज्ञानं स्याद्वृत्तितो भिन्नं समं ज्ञानान्तरेण चेत् ।
अलं ज्ञानानन्त्यसिद्ध्या प्रमाणन्यायहीनया ॥ २६८ ॥
घटज्ञानं घटज्ञानमिति भेदो विशेषणे ।
तस्यां तु तदुपेक्षायां ज्ञानभेदो न लक्ष्यते ॥ २६९ ॥
विषयव्यतिरेके तु ज्ञानमेव न चास्ति चेत् ।
विषयव्यतिरेकं त्वं जानन् ब्रूये कथं न तत् ॥ २७० ॥
बुभुत्साया घटस्यार्वाग्ज्ञानं नास्ति ततो भवेत् ।
नैवं घटाकारवृत्तेरेवाभावो न वेचितः ॥ २७१ ॥
भास्यस्य विषयस्यैवाभावो ज्ञानस्य किं भवेत् ।
जनत्वाद्घटवृत्तेस्ते ज्ञानोत्पत्तिर्न सेत्स्यति ॥ २७२ ॥
ज्ञेयाकारमनोवृत्तेर्निर्माणं ज्ञानमिष्यते ।
तदेव वेदनं चास्मादन्यज्ज्ञानं न सिद्ध्यति ॥ २७३ ॥

अस्ति चेद्वेदनज्ञानं कथमैक्यं तयोर्भवेत् ।
वेदनस्य ज्ञानमिति राहोः शिर इवेति चेत् ॥ २७४ ॥
चेतसो भिद्यते ज्ञानं नानाकारात्तु चेत्कथम् ।
वेदना परपर्याय तद्व्यापारान्न भिद्यताम् ॥ २७५ ॥
तस्मादनादिसिद्धस्य भानस्य नहि कार्यता ।
भानं कदापि नास्तीति प्रतीतिर्यन्नसंभवः ॥ २७६ ॥
घटं जिज्ञासमानोपि मानेन नविना कृतः ।
तदेच्छाभानसंसिद्धेरिति भानं न जन्यते ॥ २७७ ॥
लौकिक्यविज्ञतेवेषा वृत्तिज्ञानैकता बहुः ।
वृत्तेः सावविनाशित्वाद्भानस्याबाधितः सदा ॥ २७८ ॥
भासकज्ञानरहिता वृत्तिर्नैवानुभूयते ।
इति तादात्म्यमेवस्यात्तयोर्नैवेतिमन्यताम् ॥ २७९ ॥
व्योमालोको विना नैव घटः क्वाप्यनुभूयते ।
घटत्वं न तयोर्यद्वत्तथा ज्ञानं न वृत्तयः ॥ २८० ॥
भानं चेद्विषयाद्भिन्नं स्वतःसिद्धं मतं तव ।
अस्तु नाम तथा तस्य मेयैः सङ्गो विकल्पितः ॥ २८१ ॥
नित्यसिद्धमपि ज्ञानं गृहीत्वा वृत्तिरूपतः ।
ज्ञानं नास्ति न चाप्यासीत्क्रियते तद्विलीयते ॥ २८२ ॥
ननु पूर्वं वृत्तिरेव ज्ञेयेति प्रतिपादितम् ।
तत्रस्थप्रतिबिम्बस्य कार्यतैव तयासह ॥ २८३ ॥
न चेद्वृत्त्यात्मता तस्य वृत्त्यभेदस्तु कल्पितः ।
स्वाश्रिता नित्यतैवास्य कार्यता वृत्तिसङ्गतः ॥ २८४ ॥
शुद्धवैकाचितिर्भ्रान्त्या वृत्तिस्था च प्रतीयते ।
यथा ग्रीवास्थितं वक्त्रं दर्पणस्थं च भासते ॥ २८५ ॥

वक्रं न जन्यते यद्वत्तथाज्ञानं न जन्यते ।
तथापि वृत्तितादात्म्यविभ्रमादिव जन्यते ॥ २८६ ॥
ज्ञानं विशेष्यते वृत्त्येत्यपि भ्रान्त्यैव मन्यते ।
पार्थक्येनागृहीत्वैव ज्ञानवृत्ती तथोच्यते ॥ २८७ ॥
एवमेवापि मेयार्था मिथ्या भ्रान्ति समुत्थिताः ।
सन्मानरूपतैवेषां सिद्ध्येद्दन्ते विचारिते ॥ २८८ ॥
घटस्तुनो मृत्स्वरूपं या न नश्यति नश्यता ।
मृदो विभिन्नो नाप्येव यन्न सिद्ध्यति तां विना ॥ २८९ ॥
एवं सर्वं कार्यजातं न निर्वचनमर्हति ।
मिथ्यैव भासमानं तु शुक्तिका रजतादिवत् ॥ २९० ॥
तदेवं चिच्चिदाभासदेहतादात्म्यविभ्रमात् ।
द्रष्टृदर्शनदृश्यादिव्यवहाराः प्रवर्तिताः ॥ २९१ ॥
त्वय्यधिष्ठानजलधौ भासन्ते वृत्तिवीचयः ।
अचिन्त्यशक्तिमहता ऽविकार्येव चिदम्बुधिम् ॥ २९२ ॥
न सत्यो लौकिको द्रष्टा न सत्यं दर्शनं पुनः ।
न सत्यं लौकिकं दृश्यमेवं तत्त्रितयं नहि ॥ २९३ ॥
एकैव परमार्थोस्ति चन्निस्तत्त्रितय प्रभूः ।
यामेवैकां त्वयित्वैतत्त्रितयं हि विवर्तते ॥ २९४ ॥
एवं तत्त्वमविज्ञाय सामीप्याच्चिज्जडार्थयोः ।
अन्योन्यधर्मधर्मित्वं यथार्थमनुमन्यते ॥ २९५ ॥
येनायं स्वस्य बद्धत्वं नित्यमुक्तस्य देहिनः ।
मत्वानर्थव्रातघोरं संसारं प्रतिपद्यते ॥ २९६ ॥
निर्विद्य शरणं गत्वा गुरुमाप्नोति निर्भयम् ।
येनायं सर्वसंसाराज्जीवन्नेव विमुच्यते ॥ २९७ ॥

स्वामिन् कर्तृत्वभोक्तृत्वे दृश्येते जीवतः खलु ।
तथा चेज्जीवतः कस्य कथं मुक्तत्वमुच्यताम् ॥ २९८ ॥
लोकदृष्टिमनुसृत्य जीवन्नयमितीर्यते ।
प्राणादिरहितस्यास्य जीवत्वं नैव विद्यते ॥ २९९ ॥
अविद्या कल्पितो जीवश्चिदचिद्ग्रुपरादितः ।
आत्मनो मनुते बन्धं मोक्षं चापि विवेकतः ॥ ३०० ॥
यत्स्वरूपं बुभुत्सायां मनुते तावदेव न ।
मनुते बोधतः पश्चात्तद्दसंभवएव यत् ॥ ३०१ ॥
विजातीयांशकैर्युक्तं स्वरूपमिव यन्मतम् ।
तच चिन्माचमेवास्मि दृष्टा चैकालिको यतः ॥ ३०२ ॥
इत्थं चैकालिकीं सत्तां स्वस्य चिन्माचरूपिणः ।
निश्चित्य तत्स्थितिं देहे मनुते न स्वरूपताम् ॥ ३०३ ॥
स कथं मनुतां स्वस्य नित्यत्वमपि सङ्गवान् ।
सङ्गित्वं कल्पितं विद्वांस्तथाविद्यात्कृतो न सः ॥ ३०४ ॥
अन्येन मन्यतेन्यस्य बद्धता मुक्ततेति चेत् ।
येनैव मन्यते यस्य तस्येशाद्या तथेतरा ॥ ३०५ ॥
जीवेन भ्रान्तिरूपेन स्वस्याचित्सङ्गिनश्चितः ।
बन्धमुत्प्रेक्ष्य स्वस्यैवासङ्गिनो मुक्ततेष्यते ॥ ३०६ ॥
स्वस्य तत्त्वं चिदात्मैव नित्यो मुक्तः स केवलः ।
ततोन्यद्द्रष्टृदृश्यादि मिथ्यैवेति विनिश्चयात् ॥ ३०७ ॥
कदा कुच कथं स्वस्यासङ्गत्वमिति चेत्सदा ।
सर्वच स्वयमेवास्य साक्षिणो ऽसङ्गतेव ते ॥ ३०८ ॥
जाग्रत्स्वप्नसुषुप्तानां साक्षीनेव विभिद्यते ।
यः सदैवैकरूपेण समं सर्वं प्रकाशयन् ॥ ३०९ ॥

साक्षित्वं वृत्तिमत्त्वाख्यं मत्वा मुह्यत्यहो जनः ।
वेद्यं तदपि येन स्यात्साक्ष्यसौ नो विशेषवान् ॥ ३१० ॥
चेत्तेन स्वगतासुप्ति ज्ञायते नेतरेण तु ।
सविशेषत्वमेव स्यात्साक्षिणां नाविशेषता ॥ ३११ ॥
चेदस्तु चिज्जडग्रन्थिर्दृश्यो लोककल्पितः ।
जागृत्स्वप्नसुषुप्त्यादिवृत्तिमान्दृश्य एव सः ॥ ३१२ ॥
स्वबलाद्भासते ह्येष स्वबलादेव चापरः ।
तत्तत्संघविभेदेन स्वेषां भेदोऽपि संभवी ॥ ३१३ ॥
अपि भास्यस्य भेदेऽपि भासकाद्युक्तितो मते ।
चिन्मात्रभास्यं लक्ष्यते नेत्यसौ नैवाविशेषितः ॥ ३१४ ॥
भासकं चेत्स्वप्रकाशं कथमन्यैर्विशेषितम् ।
स्वयं प्रकाशता तस्य यत्र न्यूना न चाधिका ॥ ३१५ ॥
भास्यते यन्न चान्येन प्रथते स्वयमेव यत् ।
स्वप्रकाशं तदेवेष्टमेवं दृशिः प्रसिद्ध्यति ॥ ३१६ ॥
प्रतिबिम्बात्मिकैवैषा भासते न तु चित्स्वयम् ।
नैवं वृत्तिप्रकाशेन प्रतिबिम्बकृतार्थता ॥ ३१७ ॥
प्रतिबिम्बित आत्मा तु तास्ता वृत्तीः प्रकाशयेत् ।
तासां ज्ञातत्वान्तरालभावानां भासको दृशिः ॥ ३१८ ॥
वृत्तिशून्यं तु यच्चित्तमज्ञातमिति कथ्यते ।
दृशिस्तु भिन्नेन तेन तथैवैतत्प्रकाश्यते ॥ ३१९ ॥
यदा घटस्य ज्ञातत्वमज्ञातत्वं घटस्य चेत् ।
उभयं भास्यते येन युगपत्केवलो दृशिः ॥ ३२० ॥
निर्विशेषस्त्वसावात्मा सर्वत्रैव समवर्तनः ।
प्रतिबिम्बादिरूपेण स्वरूपेण च भासते ॥ ३२१ ॥

धीभावभावितत्वेनाभासाभावो विना तया ।
ज्ञायते येन शुद्धः संज्ञाताज्ञातत्वकाशनः ॥ ३२२ ॥
उपाधीनां विशेषेण निर्विशेषोपि ज्ञायते ।
सविशेषइवालोको यथादर्शघटादिषु ॥ ३२३ ॥
स्वाभिन्नस्यैव तज्ज्ञानं निर्विशेषमनादि च ।
निर्विशेषं तदस्तीति बुद्धिवृत्तेर्यदुद्भवः ॥ ३२४ ॥
यथा बुध्येव कुड्यादिस्तथाभानं च बुद्ध्यते ।
को विशेषस्तयोर्नाथ कृपयाख्यातुमर्हसि ॥ ३२५ ॥
बुद्धिस्थस्तु घटो यद्वद्भानेनैव प्रकाश्यते ।
भानं तु बुद्धिगमपि स्वयमेव प्रकाशते ॥ ३२६ ॥
तयोर्हि वेदनायैव बुद्धिवृत्तिरपेक्ष्यते ।
तमोपनोदनं तत्तु सममावरणं तयोः ॥ ३२७ ॥
स्वयं भादपियद्भानं नास्ति नो भाति मन्यते ।
स्वयमेवमतिः प्रोक्ता भानस्यावरणं बुधैः ॥ ३२८ ॥
बुद्धिवृत्त्यापनीतेऽस्मिन्नस्ति भातीति मन्यते ।
चिदाभासस्तु नैवापेक्ष्यते विषयैरिव ॥ ३२९ ॥
आलोकचक्षुषी यद्वत्कांक्ष्येते घटबोधने ।
केवलालोकबोधाय चक्षुरेव हि केवलम् ॥ ३३० ॥
स्वयं प्रकाशमानोपि चिदात्मा ज्ञायते धिया ।
तयाऽऽभासेन च घटो दृश्यतामिदमन्तरम् ॥ ३३१ ॥
आस्तां निरञ्जनं ज्ञानं सर्वसाक्षि च निष्क्रियम् ।
तदेव चाहमस्मीति कुतो नाश्रयते मतिम् ॥ ३३२ ॥
भानमेकमहं चैकइति मत्वा त्वमीहसे ।
तयोरैक्यं साधयितुं नैव तज्जातु सेत्स्यति ॥ ३३३ ॥

भानमात्रमहं नान्योऽद्रष्टेत्यैक्यं तयोर्मतम् ।
दोष्ये त्वबाधिते युक्त्या घटेतैक्यं तयोः कथम् ॥ ३३४ ॥
नान्योऽहमिति जानीयां कथं सन्नेव सद्गुरो ।
कथं त्वनेवंभूतस्य घटेतां श्रोतृवक्तृते ॥ ३३५ ॥
अहंताश्रोतृतेत्यादि मिथ्याध्यस्तं जडात्मकम् ।
मयि चेत्प्रश्नभानं स्याच्छ्रोतृता मे कुतो नहि ॥ ३३६ ॥
प्रश्नस्य भानमस्यार्थो भानं प्रश्नात्मकं नहि ।
प्रश्नावभासकं तच्चेत्तत्किमन्यन्न भासयेत् ॥ ३३७ ॥
एकमेव तु भानं स्याद्भानभेदो न सिद्ध्यति ।
तस्मिन्प्रकाशमाने धीर्भासते विविधाकृतिः ॥ ३३८ ॥
रूपात्मिका कदाचित्सा शब्दस्पर्शात्मिका क्वचित् ।
तत्तदिन्द्रियमासाद्यान्विकार्यैव स्वभासकम् ॥ ३३९ ॥
भासते त्वमहंरूपाऽपि खे मेघावलिर्यथा ।
तस्मात्सर्वं भान एवाऽहमिभानं न तिष्ठति ॥ ३४० ॥
येन यद्भास्यते तस्य तत्रस्थत्वं तु युज्यते ।
सौरालोकावभास्यानां सौरालोकस्थता यथा ॥ ३४१ ॥
श्रोतृत्वं शब्दवेतृत्वमपि ते न प्रसिद्ध्यति ।
वेदनं नामधीचेष्टा धियां सा स्यान्न तु त्वयि ॥ ३४२ ॥
अर्थाश्चुम्बकसंकाशा आयसप्रतिभंमनः ।
यदाकृष्टं भवेदेतत्तद्रूपं जायते ध्रुवम् ॥ ३४३ ॥
पुरैवोक्ता ऽस्योपपत्तिः स्मृतिस्वप्नादिदर्शनम् ।
मानसाकारताभावे विषयाणां न संभवेत् ॥ ३४४ ॥
शब्दस्य वेदनं तर्हि शब्दवृत्त्युत्तरक्रिया ।
धीरेवाभासिता तस्यै वृत्तये परि चेष्टते ॥ ३४५ ॥

तां चेष्टमानां पश्यं स्त्वं स्वरूपेणैव चेत्कथम् ।
चक्षुषा अपि पश्येर्वा जिघ्रेरास्वादयेः स्वयम् ॥ ३४६ ॥
जडा तु धीस्तथाकारान्भजमानापि नेक्षते ।
उपजीव्योभयं चेत्स्याद्द्रष्टृत्वादि मृषैव तत् ॥ ३४७ ॥
नैव प्रतीतिसामर्थ्यात्तथा धर्म्यैवधार्यताम् ।
तस्यासिद्धेर्भ्रमेणैव ज्ञातृत्वाध्याससम्भवः ॥ ३४८ ॥
वृत्तौ ज्ञानत्वमारोप्य तद्वतो ज्ञानिता भवेत् ।
हृद्यहं भावमारोप्याहं जान इदमित्यपि ॥ ३४९ ॥
योहं मन्ये स यथार्थजानामीति प्रतीयते ।
यतो ज्ञात्वाहमुक्तं वो प्रयच्छामि तदुत्तरम् ॥ ३५० ॥
ज्ञातृत्वं वृत्तिमत्त्वाख्यमस्त्येवाहंक्रियावतः ।
वृत्तिं भजत इत्येव जानात्यर्थां भ्रमान्मतः ॥ ३५१ ॥
अयमेव भवेत्तस्य मुख्योर्थे इति नोच्यताम् ।
जानन् वृत्त्याश्रयं नैव भजते कापि विक्रियाम् ॥ ३५२ ॥
त्रयः समुदिता ह्यर्थाः प्रथावृत्तिर्धियः क्रिया ।
घटाकारा तु धीवृत्तिस्तदुत्पत्तिस्तु धीक्रिया ॥ ३५३ ॥
प्रथेते ते ततश्चास्ति प्रकाशाख्या तयोः प्रथा ।
एते त्रयोऽविवेकेन गृहीता ज्ञानमुच्यते ॥ ३५४ ॥
मानसीचेत्क्रिया ज्ञानं साभिव्यक्तिफला मता ।
तद्वत्तिस्यान्मनस्येव द्रष्टृत्वं लोकसंमतम् ॥ ३५५ ॥
प्रकाश्यते यदेतेन स्वस्याभासप्रवर्तनात् ।
ज्ञानित्वमपि चास्यैव तत्तद्वृत्तिसमाश्रयात् ॥ ३५६ ॥
सर्वोयं संकरेणैव चिच्चिच्छायाजडात्मनाम् ।
व्यवहारोस्ति लोकानां नटानामिव नाटकम् ॥ ३५७ ॥

Digitized by Google

तस्माद्भ्रान्तिकृतं सर्वं द्रष्टा दृश्यं च दर्शनम् ।
उपेक्ष्य तद्भाति यच्च स्वयं बोधि सदाशिवः ॥ ३५८ ॥
एवमेव तु सर्वेस्युः सन्त्येव परमार्थतः ।
गुरुशास्त्रप्रवृत्तिस्तु भ्रमनाशाय केवलम् ॥ ३५९ ॥
कस्मिन्कारुण्यमेतेषां जीवो नास्त्येव तन्नये ।
एवं चेन्न दयन्तोपि कस्मिन्कोपि न वेत्सि किम् ॥ ३६० ॥
भ्रमोस्ति चेद्बाधकोपि मायिकोस्तीति बुद्ध्यताम् ।
वस्तुस्थितौ तु न भ्रान्तिर्भ्रान्तौ नाप्युपदेशनम् ॥ ३६१ ॥
कथं भात्यपि सर्वस्मिन्नास्तीति प्रतिपाद्यते ।
भानेनैवास्तितायां किं शुक्तौ रौप्यं न सद्भवेत् ॥ ३६२ ॥
वस्तुस्थितिं तु निर्णीय भ्रान्तत्वमितरस्य च ।
पश्चात्स्वैव चेद्भाति भातु नाम क्षतिर्न हि ॥ ३६३ ॥
वस्तुस्थितिं त्वविज्ञाय बद्धोस्मीत्यभिमन्यते ।
स एव बोधमापन्नो मुक्तोहमिति मन्यताम् ॥ ३६४ ॥
नित्यमुक्तश्चिदात्मैव नामरूपविलक्षणः ।
कथं मुक्तास्तु कथ्यन्ते याज्ञवल्क्यशुकादयः ॥ ३६५ ॥
अथवात्मानात्मनोर्ग्रन्थिर्बद्धोऽज्ञानेन भासते ।
ज्ञानेन मुक्तिमापन्नः सग्रन्थिर्मुक्त उच्यते ॥ ३६६ ॥
रज्जुखण्डे यथा मुक्ते ग्रन्थिमुक्तया प्रसिद्धतः ।
तथैवात्मानात्मसंघस्तन्मुक्तया व्यपदिश्यते ॥ ३६७ ॥
आत्मा नात्माभेदबुद्धिर्ग्रन्थिर्नाम न चापरः ।
तयोर्विवेकावगतिर्ग्रन्थिभेदः स उच्यते ॥ ३६८ ॥

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 5, 6, 7 and 8.] [Vol. IV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1882.

Price Rs. 9-0 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

आत्मसोपानं नाम वेदान्तप्रकरणम्

श्रीगणेशाय नमः ओम् ॥

याज्ञवल्क्यादिमुनयो निर्ग्रन्था यद्विवेकिनः ।
यथा मुक्तास्तथैवान्ये लभेरंश्चेद्विवेचनाम् ॥ २६९ ॥
मुक्तेः पश्चाद्यथा रज्जुखण्डे नो ग्रन्थिनामके ।
आत्मानात्मग्रन्थिभेदे नरो नारायणो भवेत् ॥ २७० ॥
बाधादनात्मनः शिष्टो यत आत्मैव केवलः ।
अनात्मनस्तु मिथ्यात्वाद्धानेप्येष न गण्यते ॥ २७१ ॥
एवं बुद्ध्वापि भगवन् मच्चित्तं किं न शाम्यति ।
किं निरुन्ध्यामिदं येन शश्वच्छान्तिर्भवेन्मम ॥ २७२ ॥
तन्निरोधानिरोधाभ्यां हानिलाभस्य किं तव ।
महातपप्रवर्षाभ्यामाकाशोऽपि विकार्यते ॥ २७३ ॥
न ते तुष्यति चेच्चेतो मातोषीत्तेन न क्षतिः ।
तोषातोषवशादस्माद्भिन्नस्य स्वस्य निश्चये ॥ २७४ ॥
न स्मर्यते स्वरूपं मे व्यवहारस्य संभ्रमे ।
तावतापि न ते हानिर्विपर्यासो न चेद्धृदि ॥ २७५ ॥
अवगच्छसि चेद्वस्तु तत्त्वं विस्मरणेन किम् ।
अनुवेलं बाधितेन स्मृत्या नैव विपर्ययः ॥ २७६ ॥
स्वरूपस्य विपर्यासो विपरीतो हि निश्चयः ।
विस्मृतिर्भावनात्मा चेत्साधुनिश्चय एव सः ॥ २७७ ॥
अत्यन्ताविस्मृतिः स्वस्य विपर्यासः स एव चेत् ।
नैव सा संभवेद्बुद्ध सकृज्ज्ञाते परात्मनि ॥ २७८ ॥

Digitized by Google

इयं ज्ञानकला राम सकृज्जातापि वर्धते ।
इत्यादि भगवानाह वसिष्ठो राघवं प्रति ॥ ३७६ ॥
विपर्यासेपि बाधेन गुरो किं वस्तुन: स्थितिम् ।
नैव त्वेवं परिज्ञाने जीवस्य कृतकृत्यता ॥ ३८० ॥
विपर्यासे तु नैवास्ति तादृशज्ञानसंभव: ।
मन्वीतेव विपर्यस्त: स्वस्य बद्धत्वमात्मन: ॥ ३८१ ॥
अतएव त्वमुक्तोपि विपर्यासो न चेदिति ।
स्वस्वनिश्चयतो बद्धो मुक्तोवास्ते यतो नर: ॥ ३८२ ॥
अहं ब्रह्मैव नान्योऽस्मीत्येवं निश्चयवान् कथं ।
व्यवहारान्यथापूर्वं प्रकुर्वीत मुनीश्वर ॥ ३८३ ॥
ब्रह्मैव चेत्कथं ह्येष ब्रह्मनिश्चयवान्भवेत् ।
न ब्रह्मभजते स्वस्य निश्चयं निष्क्रियं यत: ॥ ३८४ ॥
गृहीता ब्रह्मता यस्य स्वस्य सच्चित्स्वरूपिणा: ।
नैव तत्कुरुते किं चिदपि व्यापारमर्भक ॥ ३८५ ॥
ब्रह्माहं च मनुष्योहमिति वृती विरोधत: ।
एकचैव कथं स्यातां चिकीर्षैव कथं न चेत् ॥ ३८६ ॥
अस्मदर्थविभेदेन बाधिताबाधितात्मना ।
स्यातां ते न विरोधोस्ति यथा कुम्भघटात्मनो: ॥ ३८७ ॥
भूमिपालोस्म्यहं ब्रूते दासोस्मीति च वस्तुत: ।
यथा नटस्तथैवेते आत्मज्ञो न कुतो वहेत् ॥ ३८८ ॥
मनुष्योस्मीति धीवृत्तिर्बाधितत्वग्रहेपि चेत् ।
उदेति पूर्वसंस्काराद्दुदियान्नहि ते क्षति: ॥ ३८६ ॥
सत्यां स्वभावनायां किं बाधितै: प्रत्ययैर्भवेत् ।
जक्षन् क्रीडन् रतिं विन्दन्नत एव श्रुतेर्वच: ॥ ३६० ॥

Digitized by Google

मृगतोयं परिज्ञाय पातुं तत्र प्रवर्तते ।
मिथ्याजानन्नपि जगत्तस्मिन्सज्जेत किं पुनः ॥ ३९१ ॥
सज्जेतैवेति नावाच्यं जातु सक्त इवाप्ययम् ।
भासमानोऽपि संस्कारान्न स्वसक्तिमवेत्ययम् ॥ ३९२ ॥
परमार्थे न कोऽप्यस्ति हृष्यन्सीदन्निनीषते ।
न भोक्ता नापि वा भोग्यं सर्वं मायेति निश्चयात् ॥ ३९३ ॥
तत्तत्प्रवृत्तिकाले तु स्वस्मृतिर्नैव जायते ।
तर्हि स्वस्मरणाभ्यासं कुरु चेन्मन्यसे क्षतिम् ॥ ३९४ ॥
विस्मृत्यापि न चेद्धानिः फलं स्मृत्यापि नेक्ष्यताम् ।
प्रत्युतज्ञानसाफल्यमपि चिन्त्यं भवेद्गुरो ॥ ३९५ ॥
सत्यं ब्रवीषि मुक्तस्य सफलं न किमप्युत ।
यदस्य मुक्ततानैव केनाप्यन्येन साधिता ॥ ३९६ ॥
आत्मनो नित्यमुक्तस्य विपरीतो ग्रहो ऽभवत् ।
तं तिरोधाय तु ज्ञानं स्वयं छेयत्त्वमश्नुते ॥ ३९७ ॥
गृहीते तस्य शुद्धत्वे ज्ञानाद्यैर्न प्रयोजनम् ।
नहि शुद्धाम्ब्वपेक्षेत बीजं कतकशाखिनः ॥ ३९८ ॥
माया ह्येषापि यद्ब्रह्मज्ञानं नाम प्रसिद्ध्यति ।
तेनापि मिथ्याभूतेन मिथ्यादृष्टिर्निवर्तते ॥ ३९९ ॥
एवं ब्रह्मापि मिथ्यैव भवेदिति न चोद्यताम् ।
ज्ञायते येन मिथ्यात्वं तन्मिथ्या केन हेतुना ॥ ४०० ॥
स्वयं त्वप्रथमानानां ब्रह्मणैव प्रसिद्ध्यताम् ।
ईशादिस्थावरान्तानां मिथ्याभावस्तु युज्यते ॥ ४०१ ॥
सत्यत्वज्ञानमिथ्यात्वे सत्यं तन्मन्यतां कथम् ।
ज्ञानमिथ्यात्व संसिद्धा सत्यत्वं हीयते कुतः ॥ ४०२ ॥

Digitized by Google

ज्ञानेन मिथ्याभूतेन बोधितस्यास्ति सत्यता ।
बाधितायस्य केनापि ज्ञानेनेति स्थिरैव सा ॥ ४०३ ॥
मिथ्यात्मना बोधितस्य सत्यत्वं नैव गृह्यते ।
स्वप्नस्थराज्यभिक्षादेरेवं सत्यत्वमात्मनः ॥ ४०४ ॥
नैवं बाध्यग्रहादस्ति स्वाप्निकस्य मृषात्मता ।
मिथ्यावृत्त्या बोधितोपि नात्मा केनापि बाध्यते ॥ ४०५ ॥
स्वप्नस्थस्यापि दासस्य हरिश्चन्द्रस्य सत्यता ।
अबाधादेव मपरे दृष्टान्तास्सन्तिभूरिशः ॥ ४०६ ॥
ज्ञातापगतया वृत्त्या नात्मनो बाधईक्ष्यते ।
तदेवात्मभावनायाः सत्वाद्बाधानिरूपणात् ॥ ४०७ ॥
भावना ज्ञानसंस्कार आत्मनो बुद्धिगोचरः ।
आत्माकारा निर्विषया धीवृत्तिर्ज्ञानमात्मनः ॥ ४०८ ॥
गुरुशास्त्रोपदेशाभ्यां ज्ञानमादरपूर्वकम् ।
आवर्तितं पुनः सूते स्थिरं स्वात्मविनिश्चयम् ॥ ४०९ ॥
द्रष्टा नास्मि न दृश्योस्मि दर्शनं चापि नास्म्यहम् ।
त्रितयस्यापि दृश्यस्य सिद्धिदा भाश्चिदात्मनः ॥ ४१० ॥
शिष्टः प्रकाशकस्तेषां परोहं बाधवर्जितः ।
तथापि मे निजं रूपं युगपद्वास्तीति भासते ॥ ४११ ॥
प्रकाशमन्तरा नैव प्रकाश्यं भासते यतः ।
इति चेन्न प्रकाशोपि साक्षान्नैव तु युक्तितः ॥ ४१२ ॥
लोकसिद्धस्य ते द्रष्टुः स्वरूपं चिदचिन्मयम् ।
निर्धारितं पुरैवैतदपरोक्षं न वोच्यताम् ॥ ४१३ ॥
विशेषितं तु मे स्वामिन्नु रूपं भात्यपरोक्षतः ।
चिन्मात्रेणापरोक्षोस्मि प्रष्टा वन्हिरनिन्धनः ॥ ४१४ ॥

स्वभानमपरोक्षं चेच्चिन्मात्रं भोस्तदेव तु ।
तस्यैवोपाधिसंपर्कः कल्पितो न तु वस्तुतः ॥ ४१५ ॥
जीवोपाधिं च भानं च गृहीत्वा त्वविवेकतः ।
जीवोभाति न चिन्मात्रमिति ब्रूषे ऽविचारयन् ॥ ४१६ ॥
सज्जाद्यभावतां नीतं भानमुत्प्रेक्षसे किमु ।
अलुप्तचित्प्रकाशोसि भावाभावान्प्रकाशयन् ॥ ४१७ ॥
दृष्टि श्रुति मतीनां चेत्स्वयमेवापरोक्षता ।
तदन्तः पाति चिन्मात्र मपरोक्षं कुतो नहि ॥ ४१८ ॥
चिन्मात्रत्वं न दृष्ट्यादेरन्तः करणधर्मतः ।
सत्यं तत्र चिदंशो यः सो ऽपरोक्षं प्रकाशते ॥ ४१९ ॥
दृष्ट्यादि क्षणिकं नाथ चिदंशस्तु सदैव तथा ।
यतः क्षणिकतां तेषां बोधयन्नवतिष्ठते ॥ ४२० ॥
चिन्मात्रमनयोस्तस्य रूपभेदो निषिद्ध्यते ।
कल्पितानेकरूपैस्तु न बाधो वस्तुनः स्थितेः ॥ ४२१ ॥
शश्वत्प्रकाशमानेनाध्यस्तं चापि प्रकाशते ।
अपरोक्षं प्रकाशात्मा सपरोक्षो भवेत्कथम् ॥ ४२२ ॥
सदा प्रकाशमानोपि शुद्धो भायात्कथं तथा ।
अन्यत्वापादकोपाधिविलयेन विना गुरो ॥ ४२३ ॥
निवृत्तायां प्रक्रियायां कस्याशुद्धिपरोक्षते ।
उत्प्रेक्षितुं शक्नुयास्त्वं स्वस्य वान्यस्य वा वद ॥ ४२४ ॥
उक्तरीत्या तु नैवास्ति स्वस्याशुद्धिपरोक्षते ।
इति चेतस्य भानाय नोपाधिविलयो ध्रुवः ॥ ४२५ ॥
दशमस्त्वमसीत्यादि शब्दादेवापरोक्षता ।
यथा तथैव ब्रह्मत्वमित्यतः सविचारतः ॥ ४२६ ॥

Digitized by Google

विलये एव चेद्बुद्धेर्ब्रह्मत्वं कथमुच्चरेत् ।
गुरुस्त्वमेव ब्रह्मेति बुद्ध्यादेर्लयमन्तरा ॥ ४२७ ॥
जाग्रत्स्वप्नसुषुप्त्यादौ प्रथमाने स्वयं प्रभे ।
समाधिमारभन्तेऽस्मै च्छायालोकतमोलयम् ॥ ४२८ ॥
उदेति संशयश्चेत्ते विचारय पुनः पुनः ।
तस्मिन् स्थिरे स्वप्रकाशे नित्यात्मत्वं स्थिरं भवेत् ॥ ४२९ ॥
एवं बुध्येव बुध्वा स्वमात्मानं शुद्धचिद्घनम् ।
मुक्तग्रन्थिः शरीरस्थैः शोकमोहैर्न मुह्यति ॥ ४३० ॥
मुक्तग्रन्थिः कथं लक्ष्य इति चेन्नैव लक्ष्यते ।
सकलैः किं तु विरलैस्तादृशैरेव लक्ष्यते ॥ ४३१ ॥
विद्वानपि न यो वेत्ति भुञ्जानोपि भुनक्ति नो ।
कुर्वाणो नैव कुरुते मुक्तग्रन्थिः स उच्यते ॥ ४३२ ॥
आगतेष्वपि भोगेषु दैवाद्विहृषये न तैः ।
आत्मानं विकृतं वेत्ति स मुक्तग्रन्थिरुच्यते ॥ ४३३ ॥
वैदिकान्यपि कर्माणि लोकदृष्ट्याचरन्नपि ।
नाहंकरोमीतिमतिर्मुक्तग्रन्थिः स उच्यते ॥ ४३४ ॥
यद्यथा वर्तते दैवात्तत्तथैवानुमोदते ।
हृदा यस्त्यक्तसर्वास्थो मुक्तग्रन्थिर्भवेत्तु सः ॥ ४३५ ॥
प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ ४३६ ॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
इत्यादि भगवानाह गीतायामर्जुनंप्रति ॥ ४३७ ॥
मुक्तग्रन्थेर्यथापूर्वं कामाद्या यदि सुस्थिराः ।
मुक्तग्रन्थिः कथं स स्यान्मन्तव्यश्च तथा कथम् ॥ ४३८ ॥

Digitized by Google

विवेके जाग्रति सदा नस्युः काममदादयः ।
कदाचिद्यदि वर्तेरन्संस्कारान्नहि तैः क्षतिः ॥ ४३९ ॥
प्रारब्धस्याग्रहो भोगे बोधस्तत्र मृषात्मताम् ।
बोधयेन्न विरोधोऽस्ति नटे राजेतरत्वयोः ॥ ४४० ॥
कामक्रोधादयो भावा हृदयस्था न चात्मनः ।
यदि स्युर्हृद्विक्रियेत न चात्मा केवलस्तु तैः ॥ ४४१ ॥
अध्यासादेव जन्यन्ते कामाद्या हृदये यदि ।
पुरेव वर्तमानाश्चेन्मुक्तग्रन्थिः कथं भवेत् ॥ ४४२ ॥
देहश्चेद्वर्तते ऽध्यासात्सूक्ष्मोऽपि स्यात्तथा न किम् ।
विज्ञाते ऽध्यासमिथ्यात्वे तथा भातेऽपि का क्षतिः ॥ ४४३ ॥
कामी काम्यं कामना च वितथं मायिकं खलु ।
प्रवर्ततां यथापूर्वं न वा मुक्तस्य का क्षतिः ॥ ४४४ ॥
एवं चेत्स्वर्गनरकावपि स्यातां यथा पुरा ।
मैवं ज्ञानाद्धि कैवल्यमिति वेदेषु गीयते ॥ ४४५ ॥
इयमेव परा काष्ठा ज्ञानस्यात्मविनिश्चयः ।
तस्यासङ्गस्वरूपत्वान्न युक्ते स्वर्गदुर्गती ॥ ४४६ ॥
यं यं भावं चिन्तयन्प्रेतिमर्त्यस्तं तं भावं प्राप्नुयान्निश्चितं सः ।
आत्मज्ञश्चेत्कामकामो म्रियेत भूयोऽप्येतं प्राप्नुयान्नैव मुक्तिम् ॥ ४४७ ॥
मैवं कामा भर्जितास्तस्य बोधाद्धिष्टस्यान्तायैव ते संभवेयुः ।
अज्ञस्त्वेतान्मन्यते स्वस्य यायात्तेनैवेतान्बीजगर्भान्न तु ज्ञः ॥ ४४८ ॥
विज्ञायात्मस्वरूपं ये नित्यासङ्गमनश्वरम् ।
अनुशोचन्ति शोचन्तं शोच्या एव भवन्ति ते ॥ ४४९ ॥
ईहन्ते ते घटयितुं पटं पण्डितमानिनः ।
ये निनीषन्त्यनात्मानमात्मत्वं बाधमन्तरा ॥ ४५० ॥

Digitized by Google

तन्निवृत्तिं विनानैव कामादेर्ज्ञान संभवः ।
सत्यं ज्ञानस्वरूपं तु निवृत्तिर्नेति मे मतम् ॥ ४५१ ॥
निवृत्तिनाशे ज्ञानस्य विनाशोऽपि न शंक्यताम् ।
न कुलालविनाशेन घटनाशोऽपि संभवी ॥ ४५२ ॥
विवेकात्स्वस्वनिर्धारे जाते नापि विवेकिता ।
किंपुनः कामिता तस्य गगनस्येव नीलता ॥ ४५३ ॥
अध्यासतत्त्यताबोधे प्यात्मा न चकमे खलु ।
किंपुनस्तस्य मिथ्यात्व व्युत्पत्तौ स्यात्सकामुकः ॥ ४५४ ॥
बोधोत्तरं कृतार्थत्वधीरुदेति न वा मुने ।
प्रयतेत न चेदाद्ये न द्वितीये कृतार्थता ॥ ४५५ ॥
नित्याप्त इति ज्ञाते स्वेष्टानिष्टादि किं भवेत् ।
न पुना रज्जुविज्ञाने सर्पभीरनुवर्तते ॥ ४५६ ॥
नैव किंचित्करोमीति जातबोधस्य निश्चयः ।
प्रारब्धनियते देहे कुर्वत्यपि यथा तथा ॥ ४५७ ॥
बोधोदयस्वभावोऽयं यत्कृतार्थत्वधीजनिः ।
संपद्यते न यावत्सा ऽऽवर्तयेत्सुविवेचनाम् ॥ ४५८ ॥
संपन्नायामथ त्वस्यां देहादृष्टवशात्क्वचित् ।
जातोऽपि हर्षामर्षादिर्न कृतार्थत्वमर्दयेत् ॥ ४५९ ॥
अत एवात्मनिष्ठानां सनकादिमहात्मनाम् ।
शापानुग्रहसामर्थ्यं वैकुण्ठेऽपि सतां प्रभो ॥ ४६० ॥
अयमेव विशेषोऽस्ति ज्ञानिनः कृतकृत्यता ।
अभिमन्येत तां शश्वज्ज्ञानी नान्यः कदा च न ॥ ४६१ ॥
किमत्र बहुनोक्तेन नित्यमुक्तोऽसि पुत्रक ।
कूटस्थासङ्गचिन्मात्रस्वरूपोऽसि सदाशिवः ॥ ४६२ ॥

Digitized by Google

इत्येवं बोधितः शिष्यः करुणाघन मूर्तिना ।
गुरुणा छिन्नसंदेहः स एवास्मी त्युवाचसोम् ॥ ४६३ ॥
तरङ्ग बुद्बुदावर्त्तैर्यथा वार्द्धिर्न हीयते ।
मानसैर्वृत्तिकल्लोलैस्तथैवाहं न विक्रिये ॥ ४६४ ॥
स्वयं प्रकाशमानोहं वर्ते सर्वेत्र सर्वदा ।
न किंचिन्नामरूपादि मां विना विद्यते क्वचित् ॥ ४६५ ॥
नामरूपोद्भवेनाहं नोद्भवामि न तैर्म्रिये ।
तदुद्भवप्रागभावप्रध्वंसानवभासयन् ॥ ४६६ ॥
जागृत्स्वप्नसुषुप्त्यादिवृत्तयो येन भासिताः ।
सोहमात्मास्मि कूटस्थः स्वप्रभो द्वैतवर्जितः ॥ ४६७ ॥
नामरूपादि नैवास्ति पृथङ्मद्रूपतः क्वचित् ।
नाप्यहं नामरूपात्मा सच्चिन्मात्रः सदाशिवः ॥ ४६८ ॥
धन्योऽस्मि कृतकृत्यो ऽस्मि भगवन् करुणाकर ।
यज्जरा शोकमरणान्मोचितोस्मि दयालुना ॥ ४६९ ॥
हर्ष शोकादयो भावा न मे सन्ति न चाभवन् ।
न भविष्यन्ति भूयोपि ममासङ्गस्वरूपतः ॥ ४७० ॥
विपरीतं मत्स्वरूपं संकल्प्य मनसा मयि ।
आरोप्यन्तानेकधर्मा वृथा व्योम्नीव ताडनम् ॥ ४७१ ॥
साक्ष्येव मत्स्वरूपं नाहं दृश्यः परेण केनापि ।
द्रष्टा दृश्यं दर्शनमेभ्योभिन्नः प्रकाशात्मा ॥ ४७२ ॥
परिणाम एव बुद्धेर्बोधः प्रोक्तोहमेव सोस्मीति ।
भजमाना तं बोधं नाहं बुद्धिः स्वभावदृश्यत्वात् ॥ ४७३ ॥
संघो द्रष्टेत्येव बुद्ध्या गृहीतं बोधादर्वाग्चापिरेवेति पश्चात् ।
बुद्धेर्वृत्ती बन्धिकाबन्धिके स्तो वार्तस्तस्माद्बन्धमोक्षप्रवादः ॥ ४७४ ॥

मयि सच्चित्प्रियरूपे भ्रान्त्यैवा भान्ति नामरूपाणि ।
न च तानि सन्ति सत्यं नैव सहन्ते विकल्पं यत् ॥ ४०५ ॥

इत्थं बुद्धः शिष्य आह स्वबोधं सच्चिन्मात्रं मन्यमानः स्वरूपम् ।
मुक्तोस्मीति प्रत्ययं यो न वेद स्वीयत्वेन स्वान्तगत्वाद्धि तस्य ॥ ४०६ ॥

इत्येव मात्मदेव प्रापकसोपानमिष्यतेन्यस्तुम् ।
पदि चेद्गुरुप्रसादोत्तम्भितमारोढुकामानाम् ॥ ४०७ ॥

श्रीमद्राजारामशास्त्रिप्रसादादेवं श्रीमद्बालशास्त्रिप्रसादात् ।
एवं विठ्ठलक्ष्मणार्यप्रसादाद्यद्यद्बुद्धं भाषितं तन्मयात्र ॥ ४०८ ॥

क्व देशिकविशालधीः क्व च ममेयमल्पा मतिः
वहेत्कथमशेषतस्तदुपनीतमर्थं पुनः ।

अदोषमिति वीक्ष्य ते सदयमत्र मे न्यूनतां
पुनन्तु च सदोषतामिति कृताञ्जलिः प्रार्थये ॥ ४०९ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दाश्रमशिष्यपूज्यपादलक्ष्मणाचार्योपदेशप्रवर्तितेन मराठोपनामककेशवशास्त्रिणा विरचितमात्मसोपानं नाम वेदान्तप्रकरणं संपूर्णम् ॥ ओम् तत्सद्ब्रह्मार्पणमस्तु ॥

Digitized by Google

॥ श्रीः ॥

॥ आत्मसोपानस्यानुक्रमणिका ॥

		श्लोकाङ्काः
१	मङ्गलाचरणपूर्वको विषयनिर्देशः	१–२
२	वस्तुतो न कोऽपि बद्धो मुक्तो वा	३–०
३	लोकसिद्धयोर्बन्धमोक्षयोर्बद्धमुक्तयोश्च स्वरूपनिर्देशः	४–६
४	लोकसिद्धात्मस्वरूपवर्णनम्	७–१५
५	उपसन्नाय शिष्यायाचार्योपदेशः	१६–२२
६	द्रष्टृतत्त्वनिरूपणम्	२३–४०
७	चित्तादेर्ज्ञातृत्वखण्डनम्	४१–४८
८	ज्ञातुर्हर्षादिमत्त्वखण्डनम्	४९–५२
९	अन्तःकरणस्यैव हर्षादिमत्त्वम्	५३–५६
१०	ज्ञानदृश्यतोरभेदखण्डनम्	५७–६०
११	शिष्यप्रतीतितस्तयोरभेदवर्णनम्	६१–७२
१२	शिष्यानुसारतो ज्ञातुर्दर्पणसादृश्यम् ...	७३–७४
१३	तत्खण्डनम्	७५–९७
१४	ज्ञातुर्मनोङ्गकत्वापत्तिः	९८–१००
१५	तत्खण्डनम्	१०१–११३
१६	राजदृष्टान्तेनात्मनि हर्षाद्यापत्तेः खण्डनम् ...	११४–११६
१७	आत्ममनसोः प्रेरकप्रेर्यभावोपपादनम् ...	११७–१२२
१८	साधननिरपेक्षमात्मनो दर्शनम्	१२३–१२४
१९	ज्ञानज्ञात्रोरन्यथोपवर्णनखण्डनम्	१२६–१३१
२०	द्रष्टृज्ञानयोरैक्यम्	१३१–१३३
२१	द्रष्टृज्ञानयोर्भेदनिरसनम्	१३४–१४२
२२	ज्ञानातिरिक्तद्रष्टुराक्षेपः	१४३–
२३	तत्कार्यभूतं ज्ञानं क्रियात्मकं तदितरात्मकं वा	१४४–

Digitized by Google

		श्लोकाङ्काः
२४	नान्यः	१४५–४७
२५	नाप्यावां	१४८–१४९
२६	ज्ञानं नात्मगुणः	१५०–१६६
२७	वस्तुतो लौकिकद्रष्टृभावे कथं हर्षादेः संभवः	१६७–१७४
२८	चिन्मात्रस्यैवाव्यभिचारि द्रष्टृत्वम् ...	१७५–
२९	लौकिक प्रतीत्या स्थूलदेहस्यापि द्रष्टृत्वापत्तिः	१७६–१७७
३०	तन्निरासः	१७८–१७९
३१	अन्तःकरणस्यापि द्रष्टृत्वनिरासः	१८०–१८१
३२	आत्मनः स्वरूपमेव ज्ञानं न तु साध्यम् ...	१८२–१९१
३३	पारमार्थिकद्रष्टुर्लौकिकद्रष्ट्रादीनामधिष्ठानत्वम्	१९२–
३४	नित्यालुप्ताविशेषप्रकाशत्वम्	१९३–
३५	अनाद्यनन्तसिद्धत्वम्	१९४–
३६	विषयाः कुतो न सदा प्रकाशन्ते	१९५–२०१
३७	उपाधिस्थस्यैव चितो जगत्प्रकाशकत्वम् ...	२०२–२०९
३८	बिम्बभूतस्य तु तस्य निर्विशेषत्वम्	२०८–
३९	चिदाभासस्यैव लोकसिद्धद्रष्टृत्वम्	२१०–
४०	तत्स्वरूपे प्रवर्णनम्	२११–
४१	तन्मिथ्यात्वम्	२१२–२२३
४२	एकस्यैवान्तःकरणस्य वृत्तिभेदेन कर्तृत्वमनस्त्वे ...	२२४–
४३	तयोरभेदाध्यवसायेन व्यवहाराः	२२५–२२९
४४	तेषां मायिकत्वान्मिथ्यात्वम्	२३०–२४०
४५	तन्मिथ्यात्वज्ञानफलम्	२४१–२४४
४६	मिथ्यात्वज्ञानेप्याभासप्रतीत्यनिवृत्तिः ...	२४५–२४६
४७	मिथ्यात्वज्ञानोत्तरं तत्प्रतीतावप्यक्षतिः ...	२४७–४८
४८	लौकिकद्रष्टृत्वमिथ्यात्वोपसंहारः	२४९–
४९	कार्यभूतस्य ज्ञानस्य मिथ्यात्वम्	२५०–८९

Digitized by Google

		श्लोकाङ्काः
५०	ज्ञेयविषयाणां मिथ्यात्वम्	२९०
५१	सर्वलौकिकव्यवहारमिथ्यात्वोपसंहारः ...	२९१–९७
५२	जीवन्मुक्तत्वोपपत्तिः	२९८–३०७
५३	कथं स्वरूपभूतस्यात्मनोऽसङ्गत्त्वम्	३०८–३२३
५४	आत्मानात्मनोर्बुद्धिवेद्यत्वेपि विशेषः ...	३२४–३३१
५५	वस्तुतश्चिदाभासस्य ब्रह्मात्मकत्वम् ...	३३२–३५८
५६	वस्तुतः सर्वजीवानां मुक्तत्वे गुरुशास्त्रप्रवृत्तेः फलम्	३५९–६४
५७	शुकादीनामुक्तत्वस्य कथने बीजम् ...	३६५–३७१
५८	आत्मबोधोत्तरं जगद्भानेपि न क्षतिः ...	३७२–
५९	स्वरूपनिश्चये कदाचिच्चित्ताप्रसादेन व्यवहारप्रवृत्त्या स्वरूपविस्मरणादिनापि न क्षतिः	३७३–३८३
६०	आत्मज्ञानोत्तरमपि व्यवहारप्रवृत्तिसम्भवः ...	३८४–९५
६१	जीवन्मुक्तस्यात्मज्ञानस्यापि हेयत्वम् ...	३९६–९९
६२	ब्रह्मज्ञानस्य मिथ्यात्वेपि मिथ्यावृष्टिनिवर्त्तकत्वम्	४००–४०९
६३	चित्प्रकाशस्य साक्षात्त्वम्	४१०–२२
६४	आत्मसाक्षात्काराय नोपाधिविलयो ध्रुवः ...	४२३–२८
६५	आसंशयनिवृत्तेर्विचारावश्यकता	४२९–३०
६६	मुक्तानित्यत्वम्	४३१–३५
६७	कामादिसद्भावेपि छिद्यनित्यत्वसंभवः ...	४३६–६२
६८	मुमुक्षुशिष्योद्गारः	४६३–७६
६९	एतद्ग्रन्थोपसंहारः	४७७–
७०	श्रीगुरुप्रार्थना	४७८–७९

इति शम् ।

॥ अथ ब्रह्मसूत्रतात्पर्यविवरणम् ॥

॥ तत्र तृतीयाध्यायस्य तृतीयपादारम्भः ॥

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ ७० ॥

एतावता ब्रह्मतत्त्वं प्रतिपादितम्, इदानीं प्रतिवेदान्तं विज्ञानानि भिद्यन्ते न वेति विचारः । ननु ब्रह्मण एकत्वेऽवधारिते कुत्र भेदाभेदचिन्तावसर इति न, सगुणब्रह्मविषया प्राणादिविषया च चिन्ता, अत्र कर्मभेदवदुपासनानां भेदाभेदौ संभवतः, तद्वदेवोपासनानि दृष्टादृष्टफलान्यपि, सम्यग्ज्ञानद्वारा क्रममुक्तिफलान्यपि, तत्र पूर्वपक्षः, शब्दान्तराभ्याससंख्यादीनि भेदकप्रमाणान्यत्रापि सन्ति, तैत्तिरीयं वाजसनेयं कौषीतकमिति पञ्चाग्निविद्यायां क्वचित् षष्ठमामनन्तीत्यादिरूपभेदः, एवं धर्मभेदोऽपि शिरोव्रतादि, एवं पुनरुक्तादिभेदाद्विज्ञानस्योपासनस्य भेद इति प्राप्ते सर्वशाखामतानि विज्ञानान्यभिन्नानि, कुतः, चोदनाद्यविशेषात्, आदिना शाखान्तराधिकरणसिद्धान्तोक्ता अभेदहेतवो गृह्यन्ते,येऽपि नामरूपादयो भेदहेत्वाभासास्ते न नाम्ना स्यादिति प्रथमकाण्ड एव निराकृताः, इहापि निराकरिष्यन्ते, तस्मान्नोपासनाभेद इत्याह सर्वेति ॥ १ ॥ ७० ॥

ननु गुणभेदान्नैक्यं यथा पञ्चाग्निविद्यायां वाजसनेयिनः षष्ठमग्निं पठन्ति "तस्याग्निरेवाग्निर्भवति" इति, छन्दोगास्तनामनन्तीति, नचात्र गुणोपसंहारः पञ्चसंख्याविरोधात्, तथा प्राणसंवादे श्रेष्ठादन्यांश्चतुरो वाक्चक्षुःश्रोत्रमनांसि प्राणांश्छन्दोगा आमनन्ति, वाजसनेयिनः पञ्चमं प्राणं "रेतो वै प्रजापति"रित्यामनन्तीति विद्याभेद इति प्राप्ते नेत्याह भेदान्नेतीति ।

भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥ ७१ ॥

न भेदः, एकस्यामपि विद्यायां षोडशो ग्रहणाग्रहणवद् गुणभेद उपपद्यते तत्तच्छाखिनाम्, तस्मादेकमेव वेद्यम् ॥ २ ॥ ७१ ॥

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः॥ ३॥ ७२॥

यदप्युक्तं शिरोव्रतादिधर्मभेदः सोऽप्यध्ययनार्थ एव न विद्यार्थम्, यतस्तथात्वेन स्वाध्यायार्थत्वेन समाचारे वेदव्रतपरे ग्रन्थे॰ आथर्वणिका अधीयन्ते "नैतदचीर्णव्रतोऽधीत" इति, यथा सौर्यादयः शतौदनान्ताः सप्त सवा वेदान्तरोक्ताः प्रेताग्न्यसंबद्धा आथर्वणिकानामेव नियम्यन्ते तद्वत्, तस्माद्विद्यैक्यमित्याह स्वाध्यायेति॥ ३॥ ७२॥

दर्शयति च॥ ४॥ ७३॥ १॥

वेदोऽपि विद्यैकत्वं दर्शयति, "सर्वे वेदा यत् पदमामनन्ति एतमेव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यव एतन्महाव्रते छन्दोगा" इति, "एतस्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवती"त्यादि, इत्याह दर्शयतीति॥ ४॥ ७३॥ १॥

विद्यैक्ये सति प्रयोजनमाह॰ उपसंहारेति।

उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च॥ ५॥ ७४॥ २॥

एवं सति विधिशेषवत्॰ अग्निहोत्रादिधर्माणामिव. उपासनागुणानां समानविज्ञाने सति तत्तच्छाखिकर्तृकप्रयोगे उपसंहारो भविष्यति॰ अर्थाभेदात्, नान्यथेत्यर्थः॥ ५॥ ७४॥ २॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥ ६॥ ७५॥

वाजसनेयके वागादीन् प्राणानसुरपाप्मविद्धत्वेन निन्दित्वा मुख्यप्राणः परिपठितः, "अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गाये"ति, छान्दोग्येऽपि, इतरान् निन्दित्वा मुख्यप्राणः परिगृह्यते "अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे" इति, उभयत्रापि प्राणोपासना प्रतीयते, तच्च किं विद्याभेदोऽभेदो वा, उद्गीथस्य कर्तृत्वेन प्राणमामनन्ति 'त्वं न उद्गाये"ति वाजसनेय्युपक्रमात्, छान्दोग्ये उद्गीथत्वेनोपक्रमः, "तमुद्गीथमुपासांचक्रिरे"इत्युपक्रमभेदात्, अन्यथात्वं शब्दाद् विद्याभेद इति प्राप्ते न ह्येतावता विशेषेण विद्याभेदो भवितुमर्हति, एतादृशस्यान्यत्रापि

Digitized by Google

दर्शनाच्छान्दोग्येऽपि कर्तृत्वं लक्षयित्वैकमेव विज्ञानं सर्वशाखाप्रत्ययमेकं कर्मेतिवदित्याहान्यथेति ॥ ६ ॥ ७५ ॥

छान्दोग्ये "ओमित्येतदक्षरमुद्गीथमुपासीते"त्युद्गीथावयवस्योपास्यत्वमुक्त्वा पुनरपि सात्त्विकेन्द्रियवृत्तिरूपाणां देवानां तामसेन्द्रियवृत्तिरूपाणामसुराणां च संग्राममुक्त्वा "तं प्राणमुद्गीथमुपासांचक्रिरे" इत्युद्गीथावयवे प्राणदृष्टिरित्युक्तम्, बृहदारण्यके तूद्गीथशब्दमात्रश्रवणात् तत्राप्युद्गीथोपासनमिति, तत्रोद्गीथविद्येति समाख्याया एकत्वाच्छाखाद्वयेऽप्येकमेवोपासनमिति प्राप्ते आह न वेति ।

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥ ७६ ॥

नैक्यं किंतु विद्याभेदः, प्रकरणभेदात् प्रक्रमभेदात्, यतश्छान्दोग्ये अवयवस्योपास्यत्वं प्रक्रान्तं, बृहदारण्यके उद्गीथशब्दमात्रेणोपक्रमात् सकल एवोद्गीथभाग उपक्रान्त इति वेद्यभेदाद्विद्याभेदः, यथा "आकाशः परायणं स एष परो वरीयानुद्गीथः स एषोऽनन्त" इति परोवरीयस्त्वगुणविशिष्टमुद्गीथोपासनमक्ष्यादित्यगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भिन्नं तथा, न चेतरेतरगुणोपसंहार एकस्यां शाखायाम्, एवमेवंजातीयकेष्वपि ॥ ७ ॥ ७६ ॥

संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥ ७७ ॥ ३ ॥

ननु संज्ञायाः समाख्याया एकत्वादैक्यमिति, तत्र तूक्तं परोवरीयस्त्वादिवदिति,तत्र यथा संज्ञैक्येऽपि वेद्यभेदस्य सत्त्वाद्भेदस्तद्वदत्रापि, संज्ञैक्यं तु युक्त्यन्तरासत्त्वे ऐक्यमूलम्, तद् युक्त्यन्तरमप्यस्तीत्याह संज्ञेति ॥ ८ ॥ ७७ ॥ ३ ॥

व्याप्तेश्च समञ्जसम् ॥ ९ ॥ ७८ ॥ ४ ॥

"ओमित्येतदक्षरमुद्गीथमुपासीते"त्यादावक्षरोद्गीथशब्दयोरुद्देश्यसमर्पकयोः सामानाधिकरण्यं श्रुतम्, तत्र किं नाम ब्रह्मेतिवदध्यासात् तत् किं वा बाधात्, यश्चोरः स स्थाणुरितिवत्॰ उत यो जीवस्तद् ब्रह्मेत्येकत्वात्॰ उत नीलोत्पलमिति विशेषणविशेष्यभावाद्वेति संशये निया-

मकाभावादनियम इति प्राप्ते सर्वपक्षेषु लक्षणासत्त्वेऽपि विशेषणपक्षे उद्गीथशब्दस्य तदवयवे लक्षणा संनिकृष्टेति सैव ग्राह्या व्यवहितलक्षणायां गौरवात्, अतश्च व्याप्तेर्हेतोर्विशेषणमिति समञ्जसं पटग्रामादिशब्दा इवावयवेषु ॥ ९ ॥ ७८ ॥ ४ ॥

बृहदारण्यकादौ प्राणोपासनायां वासिष्ठत्वादिगुणा उक्ताः, ऐतरेयकौषीतक्यादौ प्राणोपासनेनोक्ता उपसंहर्तव्या वा नेति, 'एवं वेदे'ति स्वशाखोक्तानामेव ग्रहणाचोपसंहर्तव्या इति प्राप्ते आह सर्वाभेदेति ।

सर्वाभेदादन्यत्रेमे ॥ १० ॥ ७९ ॥ ५ ॥

अन्यत्रेतरेयिणामप्युपसंहर्तव्याः कुतः सर्वत्र प्राणस्यैकत्वात्, तद्द्वारा गुणानां बुद्धिस्थत्वात्, देवदत्तो मथुरायामध्यापयन् दृष्टः पुनर्माहिष्मत्यां दृष्ट इत्यत्रानध्यापयन्नप्यध्यापकत्वेनैव प्रत्यभिज्ञायते तद्वत्, तस्मादेकप्रधानसंबद्धा धर्मा एकत्राप्युच्यमानाः सर्वत्रोपसंहर्तव्याः ॥ १० ॥ ॥ ७९ ॥ ५ ॥

"आनन्दो ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादयस्तैत्तिरीयकादौ पठितास्ते "प्रज्ञानं ब्रह्मे" त्याद्यैतरेयके उपसंहर्तव्या न वेति,"वामनी भामनी "त्यादिवच्चोपसंहर्तव्या इति प्राप्ते उपसंहर्तव्या इत्याहानन्दादय इति ।

आनन्दादयः प्रधानस्य ॥ ११ ॥ ८० ॥

सर्वत्र तत् प्रधानं ब्रह्म· अभिन्नम्, अत उपसंहर्तव्याः, "वामनी"त्यादयस्तु ध्येयत्वेन विधीयमानत्वाद्व्यवस्था आनन्दादयस्तु प्रतिपत्तिफला इति भेदः ॥ ११ ॥ ८० ॥

नन्वानन्दप्रक्रमोक्ताः प्रियशिरस्त्वादयोऽपि सर्वे सर्वत्र गच्छेयुरिति प्राप्ते आह प्रियशिरस्त्वेति ।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥ ८१ ॥

नोपसंहार्याः, यतः प्रियं मोदः प्रमोद आनन्द इत्येते परस्परापेक्षया भोक्त्रन्तरापेक्षया चोपचितापचितरूपा उपलभ्यन्ते, तौ च सति भेदे संभवतः,

ब्रह्म त्वभिन्नम्, नचैते ब्रह्मधर्माः कोशधर्मा ह्येत इत्युक्तम्, तस्मान्नोपसंहारः ॥ १२ ॥ ८१ ॥

इतरे त्वर्थसामान्यात् ॥ १३ ॥ ८२ ॥ ६ ॥

इतरे आनन्दादयोऽर्थस्य सामान्यात्· ऐक्यात् सर्वत्र ज्ञेयाः प्रतिपत्तिमात्रप्रयोजना हि ते इत्याहेतरे त्विति ॥ १३ ॥ ८२ ॥ ६ ॥

आध्यानाय प्रयोजनाभावात् ॥ १४ ॥ ८३ ॥

"इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मन" इत्यारभ्य "पुरुषान्न परं किंचित् सा काष्ठा सा परा गति" रित्यादौ किं सर्वे पदार्था उत्तरोत्तरं परत्वेन विवक्षिता उत एभ्यः सर्वेभ्यः पुरुषस्यैव परत्वम्, तत्र, इदमस्मात् परमिदमस्मात् परमित्यादिवचनानावाक्यैरेकैकस्मात् परमेकैकमिति प्राप्ते पुरुष एवैभ्यः सर्वेभ्यः परत्वेन प्रतिपिपादयिषितः, न प्रत्येकमेषां परत्वप्रतिपादनं प्रयोजनाभावात्, न हीतरेषु परत्वेन प्रतिपन्नेषु किंचित् प्रयोजनं दृश्यते श्रूयते वा, पुरुषे परत्वेन ज्ञाते सर्वानर्थव्रातातीते दृश्यते मोक्षः प्रयोजनम्, "निचाय्य तं मृत्युमुखात् प्रमुच्यते" इति श्रुतेः, काष्ठाशब्देन च पुरुषे आदरं दर्शयन् पुरुषप्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिरिति दर्शयति आध्यानायेति ॥ १४ ॥ ८३ ॥

आत्मशब्दात् ॥ १५ ॥ ८४ ॥ ७ ॥

यतः ।

"एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" ॥

इति पुरुषमात्मशब्देनोक्तवान्, अतोऽपीन्द्रियादिवृत्तिप्रवाहोक्तिरित्याह· आत्मेति ॥ १५ ॥ ८४ ॥ ७ ॥

"आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किंचन मिषत्" इत्यादावात्मशब्देन किं पर एवोतान्य ईश्वरादिः, तत्र महाभूतकार्याणामम्भःप्रभृतिलोकानां सृष्टिश्रवणादीश्वर एव, लोकसृष्टिः परमेश्वरादेव श्रूयते,

"आत्मैवेदमग्र आसीत् पुरुष" इति, "आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तते"ति, "अथातो रेतसः सृष्टि"रिति प्रजापतिकर्तृकत्वं श्रुतम् तस्मादीश्वर इति प्राप्ते आह॰ आत्मेति।

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ ८५ ॥

पर एवात्रात्मा इतरवत्, यथेतरसृष्टिवाक्ये "आत्मन आकाश" इत्यादौ पर एव तथात्रापि लोकसृष्टिर्भूतसृष्टेरुपलक्षणम्, तस्मात् परस्यैव ग्रहणम् ॥ १६ ॥ ८५ ॥

वाक्यान्वयाच्च परग्रहणमित्युक्तं दूषयति।

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥ ८६ ॥ ८ ॥

परग्रहणमेव स्यात्, कुतः, अवधारणात्, परग्रहणे हि प्रागुत्पत्तेरात्मैकत्वावधारणमाञ्जस्येनावकल्पते, लोकसृष्टिवचनं महाभूतसृष्ट्यनन्तरं योज्यम्, "एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्श्य" मितीत्युपरिष्टात्॰ "एष ब्रह्मैष इन्द्र" इत्यादि "प्रज्ञानं ब्रह्मे"त्युपसंहारात्, व्याख्यानान्तरं भाष्ये द्रष्टव्यम् ॥ १७ ॥ ८६ ॥ ८ ॥

छान्दोग्ये वाजसनेयके च "आ श्वभ्य आ कीटपतङ्गेभ्यस्तत् तेऽन्न"मित्यादिना प्राणस्यान्नमाम्नाय तस्यैव वाससः स्थाने आप आमनन्ति, श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्त्येवमेव तदन्नमनग्नं कुर्वन्ति, एवं"तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधती"ति, तत्राऽऽचमनमुत प्राप्ताचमनेन प्राणस्याऽनग्नताध्यानं विधीयते॰ उतोभयम्, तत्रोभयावगमादुभयमपि, "आचामे"दिति विधिविभक्तेराचमनमेवेति प्राप्ते आह कार्येति।

कार्याख्यानादपूर्वम् ॥ १८ ॥ ८७ ॥ ९ ॥

नाचमनं विधेयम्, प्रायत्यार्थं कार्यत्वेन स्मृतिसिद्धस्यैवात्र प्राणविद्यायामाख्यानात्, अत एव नोभयविधानं वाक्यभेदात् तस्मात् प्राप्तमेवाऽशनस्योभयत आचमनमनूद्य प्राणस्यानग्नताकरणसंकल्पोऽनेन वाक्ये-

नापूर्वः प्राणविद्यासंबन्धित्वेनोपदिश्यते न त्वाचमनविधिः, "आचामन्ती"ति वर्तमानोपदेशात् ॥ १८ ॥ ८७ ॥ ९ ॥

वाजसनेयशाण्डिल्यविद्यायां गुणाः श्रूयन्ते "स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूप"मित्येवमादयः, पुनस्तच्छाखायामेव "मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये स एष सर्वेशानः सर्वमिदं प्रशास्ति यदिदं किंचे"ति, तत्र किमुभयत्रैका विद्या गुणोपसंहारश्च॰ उत द्वे विद्ये गुणानुपसंहारश्चेति संदेहे पौनरुक्त्यापत्त्या विद्याभेदो गुणाव्यवस्था च, एकशाखायामेकजातीयगुणानामध्येतृवेदितृभेदाभावात् पौनरुक्त्ये दुर्वारे विद्याभेदः, एवं च न गुणोपसंहार इति प्राप्ते आह समानेति ।

समान एवं चाभेदात् ॥ १९ ॥ ८८ ॥ १० ॥

यथा भिन्नशाखास्वेकैव तथात्राप्येकशाखायामेकैव विद्योपास्याभेदात्, न च पौनरुक्त्यम्, एकं विद्यां विधत्तेऽपरं वाक्यं गुणं विधत्त इति, तस्माद्विद्यैक्यम् ॥ १९ ॥ ८८ ॥ १० ॥

संबन्धादेवमन्यत्रापि ॥ २० ॥ ८९ ॥

बृहदारण्यके "तत् सत्यं ब्रह्म"त्युपक्रम्य सत्यविद्यायामाधिदैविकस्य पुरुषस्यादित्यस्याहरित्येतन्नाम ध्यानायोपदिष्टम्, आध्यात्मिकस्य त्वक्षिपुरुषस्याहमिति नामोपदिष्टम्, तत्र विद्यैकत्वे द्वयोर्नाम्नोः पुरुषे उपसंहार इत्याशङ्कते संबन्धेति ॥ २० ॥ ८९ ॥

न वा विशेषात् ॥ २१ ॥ ९० ॥

"य एष एतस्मिन् मण्डले पुरुष" इत्युपक्रम्य "तस्योपनिषदह"रिति तच्छब्देन मण्डलस्थमेव परामृश्य तस्यैव नामविशेष उपदिष्टः, एवं "योऽयं दक्षिणेऽक्षन् पुरुष" इत्युपक्रम्य "तस्योपनिषदह"मिति तच्छब्देनाक्षिपुरुषमेव परामृश्याहमिति नामविशेषः, ततो विद्यैकत्वेन वेद्यस्य ब्रह्मण एकत्वेऽपि स्थानविशेषेण नामविधानादध्यात्माधिदैविकयोर्व्यवस्थिते नाम्नी न तु तयोरुपसंहारोऽस्ति, यथा लोके गुरोरुपास्य-

स्यैकत्वेऽपि तिष्ठतो गुरोर्य उपचारः प्रत्युत्थानादिः स नासीनस्य युज्यते, आसीनस्य य उपचारः पादाभ्यङ्गादिः स न तिष्ठतो भवति, तद्वत्, तस्माद्यम्नोर्व्यवस्थेत्याह नवेति ॥ २१ ॥ ९० ॥

किंचैवंविधधर्माणां व्यवस्थेति लिङ्गदर्शनं चास्तीत्याह दर्शयतीति ।

दर्शयति च ॥ २२ ॥ ९१ ॥ ११ ॥

"तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामे"ति कथं लिङ्गत्वम्, अत्यादित्यस्थानभिन्नान् धर्मानन्योन्यस्मिन्ननुपसंहार्यान् पश्यन्निहातिदेशेनादित्यपुरुषगतान् रूपादीनक्षिपुरुषे उपसंहरति "तस्यैतस्ये"त्यादिना, तस्माद् व्यवस्थिते उपनिषदौ ॥ २२ ॥ ९१ ॥ ११ ॥

राणायणीयखिलेषु "ब्रह्म ज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान"ति,यानि लोके हरिहरब्रह्मादिदेहेषु प्रसिद्धानि वीर्याणि तानि ब्रह्मपुरःसराण्येव स्वीकृतानि भवन्ति नहि सशक्तिकं ब्रह्मानपेक्ष्य वीर्याणि संभवन्ति तच्च ज्येष्ठं ब्रह्म पूर्वं दिवं व्याप्यावस्थितम्, अत्राधिदैविकस्य ब्रह्मणः संभृतिद्युव्याप्त्यादयो गुणा उपास्यत्वेनावगम्यन्ते, शाण्डिल्यदहरादिविद्यास्वाध्यात्मिकं हृदयान्तर्वर्ति ब्रह्मोपास्यत्वेन श्रुतम्, तत्र ब्रह्मणा एकत्वात् संभृत्यादयो गुणाः शाण्डिल्यविद्यासूपसंहर्तव्या इति प्राप्ते आह संभृतीति ।

संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥ ९२ ॥ १२ ॥

न तावत् संभृत्यादिगुणानामन्यतमोऽपि शाण्डिल्यादिविद्यासूपलभ्यते, अतो विद्यैकत्वाभावाच्चोपसंहारः, ब्रह्मैकत्वमात्रेणोपसंहारे क्वाप्यनुपसंहारो न स्यात्, अतः संभृत्यादेर्नोपसंहारः ॥ २३ ॥ ९२ ॥ १२ ॥

तैत्तिरीयके पुरुषविद्या "तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी"त्यादि, ताण्डिनोऽपि "पुरुषो वाव यज्ञ" इति, सेयमेकैव विद्या उभयत्र समानधर्मश्रवणादुपसंहार इति प्राप्ते आह पुरुषेति ।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥ ९३ ॥ १३ ॥

नोपसंहर्तव्याः, कुतः, तद्रूपानाम्नानात् पुरुषविद्यायां ताण्डिनाम्, पैङ्गिनां च यथाम्नातं नैवमत्रास्ति. इतरविलक्षणमेव यज्ञसंपादनं दृश्यते, पत्नी-यजमानादिषु "विदुषो यज्ञ" इति व्यधिकरणषष्ठी तैत्तिरीयके, ताण्डिनां तु "विद्वानेव यज्ञः स एव यजमान" इति सामानाधिकरण्यम्, इत्यादि-रूपभेदाद्विद्ययोर्भेद एवोचितो वेध्याद्यर्थभेदात् ॥ २४ ॥ ९३ ॥ १३ ॥

आथर्वणिके उपनिषदारम्भे "सर्वं प्रविध्य हृदयं प्रविध्ये"त्यभि-चारमन्त्रः पठितः, कण्वानामादौ प्रवर्ग्यपाठः, ताण्डिनां "देव सवितः प्रसुव" इत्यादि, कठतैत्तिरीयाणां "शं नो मित्र" इत्यादि, वाजसनेयिनां "देवा ह वै सत्रं निषेदु"रित्यादीनि, तेषां वेधमन्त्रप्रवर्ग्यकर्मादीनां सर्वे-षामेव विद्यासूपसंहारो न वा, उपसंहार एव समीपे पाठादिति प्राप्ते आह वेधेति ।

वेधाद्यर्थभेदात् ॥ २५ ॥ ९४ ॥ १४ ॥

वेधादिमन्त्राणामभिचारकर्मणि लिङ्गाद्विनियोगः, प्रवर्ग्यस्य तु "पुरस्तादुपसदां प्रवृणक्ती"त्यग्निष्टोमे, एवमुत्तरत्रापि लिङ्गादीनां च संनिधेर्बलीयस्त्वं पूर्वकाण्डे उक्तमेव, तस्माच विद्याङ्गत्वं मन्त्रकर्मणोः ॥ २५ ॥ ९४ ॥ १४ ॥

शाट्यायनिनः पठन्ति "तस्य पुत्रा दायमुपयन्ति सुहृदः साधु-कृत्याम्", अयमर्थः, यस्य ज्ञानिनः पुत्राः पुत्रस्थानीयाः सर्वे प्राणिनस्त-दीयं वित्तं कर्म यथायोग्यं गृह्णन्ति, ताण्डिनस्तु "अश्व इव रोमाणि विधू-य पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीर"मिति, आथर्वणिकाः "तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति", निरञ्जनो भाविजन्मकारणकर्मरहितः, ज्ञानिपरित्यक्तपुण्यपापयोरितरपुरुषैः स्वीकारो नोपसंहर्तव्यः, श्रुतिष्वन्यैः स्वीकारस्याश्रुतत्वात्, पूर्वोक्तं स्वीकारवाक्यं तु सगुणविद्यायां पठितम्, त्यागवाक्यं तु निर्गुणविद्यायाम्, अतः केवलहानौ श्रूयमाणायामुपायनं नोपसंहर्तव्यमिति प्राप्ते आह हानौ त्विति ।

Digitized by Google

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम् ॥ २६ ॥ ९५ ॥ १५ ॥

सत्यं विद्याभेदः, अत एव न वयमुपायनमनुष्ठेयतयोपसंहरामः किंत्वर्थवादत्वेन, यथा कर्मत्यागेन ब्रह्मविद्या स्तूयते तथा स्वीकारेणापि स्तुतिरेव भूतार्थवादत्वात्,यत्तु हानवाक्ये उपायनं न श्रुतमिति तदसत्,"तत् सुकृतदुष्कृते विधुनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतमिति कौषीतकिदर्शनात्, तत्र ब्रह्मलोकप्राप्तिवेलायाम्, तस्मादुपायनस्योपसंहारः सर्वत्रार्थवादत्वेन,कौषीतक्यां हानशेषत्वादुपायनशब्दस्य, यथा भाल्लविनां "कुशाः स्तोमसंख्याकरणार्थं प्रादेशपरिमितशङ्कूनां वानस्पत्याः स्थ ता मा पाते"ति वनस्पतियोनित्वमात्रश्रवणेऽपि शाट्यायनिनामौदुम्बर्य इति विशेषादौदुम्बर्यः कुशा गृह्यन्ते,यथा च क्वचिद्देवासुरच्छन्दसामविशेषेण पौर्वापर्ये "देवच्छन्दांसि पूर्वाणि" इति पैङ्ग्यदर्शनात् सर्वत्र तत्, यथा वा षोडशिस्तोत्रे केषांचित् कालानुक्तावपि "समयाध्युषिते सूर्ये" इति श्रुतेः सर्वत्र स एव कालः, यथा वाऽविशेषेणोपगानं क्वचिच्छ्रुतमपि भाल्लव्युक्तविशेषोपगानं सर्वैरेव ग्राह्यं तथेत्यर्थः, भामतीकारास्तु सूत्रे कुशशब्दं तृणे प्रसिद्धमकारान्तमेव गृहीत्वा आच्छन्द इति प्रश्लेषं कृतवन्तः,तत्तु श्रुतावाकारान्तस्य स्त्रीलिङ्गशब्दस्य श्रवणात् "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्ये"ति पाणिनिश्रवणाच्च विचारणीयमेव ॥ २६ ॥ ९५ ॥ १५ ॥

पूर्वाधिकरणे सुकृतदुष्कृतपरित्याग उक्तः स किं मरणात् प्रागेव वा ब्रह्मलोकमार्गमध्ये विरजा या नदी तदुत्तरणानन्तरमेवेति, तत्र यथा श्रवणात् "स आगच्छति विरजां नदीं तां मनसैवात्येति तत् सुकृतदुष्कृते विधुनुते" इति प्राप्ते आह सांपराय इति ।

सांपराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥ ९६ ॥

ब्रह्ममार्गे ब्रह्मप्राप्तिव्यतिरिक्तस्य सुकृतदुष्कृतप्राप्यफलस्याभावात् तयोर्नदीपर्यन्तं नयनं व्यर्थम्, किंच मरणात् प्राक् परित्यक्तयोस्तयोर्मार्गमध्य

परित्यागस्य साधनं न संभवति विदेहदशायां साधनस्यानुष्ठातुमशक्यत्वात्, अन्योक्तस्य "अश्व इव रोमाणी"ति कौषीतकिसिद्धस्य नदीमुत्तीर्य परित्यागस्य बाधितत्वात्, तस्मान्मरणात् प्रागेवोपास्ये साक्षात्कृते तयोः परित्यागः ॥ २७ ॥ ९६ ॥

छन्दत उभयाविरोधात् ॥ २८ ॥ ९७ ॥ १६ ॥

छन्दत इति, यदि मध्ये तयोः क्षयोऽभ्युपगम्येत तदा पतिते देहे यमनियमोपासनाभ्यासादिरूपस्य सुकृतादिक्षयहेतोः कर्मण इच्छातोऽनुष्ठानानुपपत्तेरनुपपत्तिरेव तयोः क्षयस्यापद्येत, तस्मात् पूर्वमेव साधकावस्थायां छन्दतोऽनुष्ठानं तस्य संभवत्येव, तत्पूर्वकं च सुकृतादिहानम्, एवं च निमित्तनैमित्तिकयोरप्युपपत्तिस्ताण्ड्यादिश्रुतिसंगतिश्च ॥ २८ ॥ ९७ ॥ १६ ॥

चतुर्थाध्याये वक्ष्यमाणस्यार्चिरादिमार्गस्य सगुणोपासकस्येव निर्गुणब्रह्मतत्त्वज्ञानिनोऽपि लाभः समान एव भवितुमर्हति सुकृतादिपरिहानवदिति प्राप्ते आह गतेरर्थवत्त्वमिति ।

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥ ९८ ॥

गतेरर्थवत्त्वं क्वचित् सार्थक्यं क्वचिन्नेत्युभयथा विभागेन भवति, अन्यथाऽविशेषेण गत्यङ्गीकारे विरोधः स्यात्, "निरञ्जनः परमं साम्यमुपैति" इति श्रुतौ देशान्तरप्रापणी गतिर्विरुध्येत, निरञ्जनः कथं देशान्तरं गच्छेत्, अत आनर्थक्यमेव ज्ञानिनो गतिमार्गस्य ॥ २९ ॥ ९८ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ ९९ ॥ १७ ॥

गतिः क्वचिदर्थवती क्वचिन्नेत्युभयभाव उपपद्यते च, यतस्तल्लक्षणार्थोपलब्धेः, गतिकारणीभूतस्यार्थस्य पर्यङ्कविद्यायां "पर्यङ्कारोहणं पर्यङ्कस्थब्रह्मणा सह संवदनविशिष्टगन्धादिप्राप्तिश्चे"त्यादेः श्रवणात्, नहि तत्त्वज्ञस्य प्रारब्धक्षयातिरिक्तं किंचिदपेक्षितम्, तस्मादनर्थिका तत्र गतिः, यथा लोके देशान्तरप्राप्तौ पन्था अपेक्ष्यते न रोगनिवृत्तौ, एवमिहापीत्याह॰ उपपन्न इति ॥ ३० ॥ ९९ ॥ १७ ॥

सगुणासु विद्यासु गतिरर्थवतीत्युक्तम्, तत्रापि सर्वासु देवयानगति-रुत यत्र मधुविद्याशाण्डिल्यविद्यासु गतिः श्रुता तत्रैव, यासु विद्यासु न श्रुता न तासु गमनमिति संशये यत्र श्रुतं तत्रैव गतिः प्रकरणात्, अन्यथा सर्वस्य सर्वार्थत्वप्रसङ्गात्, इति प्राप्ते आहानियम इति।

अनियमः सर्वासामविरोधः

शब्दानुमानाभ्याम् ॥ ३१ ॥ १०० ॥ १८ ॥

सर्वासामेवाभ्युदयप्राप्तिफलानां सगुणविद्यानामविशेषेण देवयानाख्या गतिर्भवति, कुतः, शब्दानुमानाभ्यां श्रुतिस्मृतिभ्याम्, "तद्य इत्थं विदु"रिति पञ्चाग्निविद्यावतां देवयानं प्रतिपादयन्ती श्रुतिः "ये चेमेऽरण्ये श्रद्धातप इत्युपासत" इति विद्यान्तरशालिनामपि पूर्वैः सह समानमार्गतां गमयति, श्रद्धातपोभ्यां विद्यान्तराणामुपलक्षणात्, "अथ य एतौ पन्थानौ न विदुस्ते कीटा दन्दशूका" इति मार्गद्वयभ्रष्टानां कष्टामधोगतिं गमयतीति सर्वोपासकानां देवयानपितृयानान्यतरेण नियमः, स्मृतिरपि।

"शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः"॥

इति, तस्मादनियमः ॥ ३१ ॥ १०० ॥ १८ ॥

विदुषः प्रकृतदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति संदेहे पुराणेषु "तत्त्ववेत्ता अपान्तरतमा नाम वेदप्रवर्तक आचार्यो विष्णोराज्ञया द्वापरान्ते कृष्णद्वैपायनरूपेण शरीरान्तरं जग्राहे"ति स्मर्यते, तथा सनत्कुमारः स्कन्दरूपेणोमामहेश्वराभ्यामजायत, एवमन्येऽपि वसिष्ठादयस्तत्त्वविद एव सन्तस्तत्र तत्र शापवरादिना स्वेच्छया शरीरान्तरं जगृहु" रिति स्मरणान्मुक्तिस्तत्त्वविदां पाक्षिकीति प्राप्ते आह यावदिति।

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥ १०१ ॥ १९ ॥

य एते उदाहृतास्तत्त्वविदो जगन्निर्वाहकाः पूर्वकल्पे महता तपसेश्वरमुपास्यास्मिन् कल्पे नानादेहभोग्यमधिकारिपदं भेजिरे क्षीणे प्रारब्धे

कर्मणि मोक्ष्यन्ते तथानारब्धकर्मणां तत्त्वज्ञानेन दाहस्य निवारयितुमशक्यतया तत्त्वविदामन्ते मुक्तिर्नियतैव ॥ ३२ ॥ १०१ ॥ १९ ॥

तत्तच्छाखासु "अस्थूलमनण्वह्रस्व"मित्यादिप्रतिषेधा ब्रह्मावबोधनायोक्ताः, एव "मशब्दमस्पर्शमरूप"मिति, "यत् तदद्रेश्यमग्राह्यम्" एवमन्येऽपि, ते किं सर्वे सर्वत्रोपास्यतया प्राप्यन्त उत यथाशाखं व्यवस्थिता इति, श्रुतिभेदात् तुल्यव्यवस्थेति प्राप्ते आह॰ अक्षरेति ।

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम् ॥ ३३ ॥ १०२ ॥ २० ॥

अक्षरविषयाणां विशेषप्रतिषेधबुद्धीनां सर्वत्रावरोध उपसंहारः कुतः सामान्यतद्भावाभ्याम्, समानो हि सर्वविशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारः, तदेव च सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते, तत्र किमित्यन्यत्र कृता बुद्धयोऽन्यत्र न स्युः, तत्र विधिरूपविशेषणानि पूर्वमुक्तानि प्रतिषेधरूपाणीहेति, तस्मान्निषेधा उपसंहर्तव्याः, यथाऽहीने पुरोडाशिनीषूपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणाम् "अग्नेर्वेहोत्रं वेरध्वरम्" इत्यादीनां सामवेदोत्पन्नानामप्यध्वर्युभिः संबन्धो यथा भवति, अध्वर्युकर्तृकत्वात् पुरोडाशप्रदानस्य, प्रधानतन्त्रत्वाच्चाङ्गानाम्, एवमिहाप्यक्षरतन्त्रत्वात् तद्विशेषणानां सर्वत्र संबन्धः, तदुक्तं पूर्वकाण्डे "मुख्यगुणव्यतिक्रमे तदर्थत्वान्मुख्येन संयोग" इत्यत्र ॥ ३३ ॥ १०२ ॥ २० ॥

"ऋतं पिबन्तौ सुकृतस्य लोके" इत्यत्र द्वयोर्भोक्तृत्वं प्रतीयते "द्वा सुपर्णा"ति मन्त्रे तयोरन्य इत्यादिनैकस्यैव भोक्तृत्वमितरस्याभोक्तृत्वम्, अतो वेद्यभेदाद् विद्याभेद इति प्राप्ते आह॰ इयदामननेति ।

इयदामननात् ॥ ३४ ॥ १०३ ॥ २१ ॥

इयता परिच्छिन्नं द्वित्वोपेतं भोक्त्रभोक्तृद्वयं जीवब्रह्मपरत्वेनाभिन्नरूपमशनायाद्यतीतं छत्रिन्यायेन विवक्षितं वेद्यमेकमिति, द्वित्वस्योभयत्रापि प्रत्यभिज्ञानात्, अत एकविद्या ॥ ३४ ॥ १०३ ॥ २१ ॥

Digitized by Google

"यत् साक्षादपरोक्षाद् ब्रह्म," "य आत्मा सर्वान्तर" इत्येकशाखायां कहोले पठितम्, अपरोक्षादित्यत्र विभक्तिव्यत्ययेनापरोक्षमित्यर्थः, तयोरन्यूनानतिरिक्ततया पठितयोरपौनरुक्त्यपरिहाराय विद्याभेद इति प्राप्ते आह॰ अन्तरेति ।

अन्तराभूतग्रामवत् स्वात्मनः ॥ ३५ ॥ १०४ ॥

सर्वान्तराभूतवत् स्वात्मन आम्नानाविशेषात्, तच्चैकस्मिन् वस्तुनि संभवति द्वयोस्तथात्वे एकस्य बहिर्भाव आवश्यकः, तस्मात् सर्वान्तरस्य वेद्यस्यैकत्वाच्च विद्याभेदः ॥ ३५ ॥ १०४ ॥

भेदानभ्युपगमे आम्नानभेदानर्थक्यमिति तत् परिह्रियते अन्यथेति ।

अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥ १०५ ॥ २२ ॥

नायं दोषः, उपदेशान्तरवत्, "स आत्मा" "तत् त्वमसि श्वेतकेतो" इत्यादौ नवकृत्वोऽभ्यासेऽपि न वेद्यभेदाद्विद्याभेदः, एवमिहापि ॥ ३६ ॥ १०५ ॥ २२ ॥

"तद्योऽहं सोऽसौ योऽसौ सोऽहं" मित्यैतरेयिणः, "अहं वै त्वमसी" तीति च, तत्र किं व्यतिहारेण परस्परमुभयरूपा मतिः कार्या॰ उतैकरूपैव, तत्रात्मन ईश्वरेणैकत्वार्थं व्यतिहारो बुद्धेरेकधात्वमेवेश्वरे, सांसारित्वात्मत्वे निकृष्टः स्यादिति प्राप्ते आह व्यतिहारेति ॥

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥ १०६ ॥ २३ ॥

नहीदं तत्त्वावबोधप्रकरणं किंतु विद्याप्रकरणं तच्चाध्यानाय परस्परं व्यतिहारेणोभयरूपा मतिः कार्या, इतरवत्,यथेतरे सर्वात्मत्वप्रभृतयो गुणा आध्यानायाम्नायन्ते तथा विशिंषन्त्युपासकाः परस्पराभेदं "तत् त्वमसी"त्यादौ ॥ ३७ ॥ १०६ ॥ २३ ॥

"स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म" वाजसनेयके उक्त्वा "तद्यत् तत् सत्यमसौ स आदित्यो य एष मण्डले" इत्यादि, तत्र

द्वे एते सत्यविद्ये, भेदेन फलसंयोगात्, "जयतीमाल्लोकान्" इत्याद्यस्य "हन्ति पाप्मानम्" इत्युत्तरस्येति प्राप्ते आह सैवेति ।

सैव हि सत्यादयः ॥ ३८ ॥ १०७ ॥ २४ ॥

एकैवेयं सत्यविद्या "तद्यत् तत् सत्य"मिति प्रकृताकर्षणात्, फलस्य पापघातस्य "तस्योपनिषदहरह"मिति चोक्ताऽङ्गोपास्तिफलत्वेनार्थवादत्वात्, विशिष्टस्य वा फलत्वम्, तस्मादेकैवेयं विद्या ॥ ३८ ॥ १०७ ॥ २४ ॥

छान्दोग्ये "दहरोऽस्मिन्नन्तर आकाश" इति हृदयान्तर्गतत्वेन श्रुतस्य दहराकाशस्य सत्यकामत्वादयो गुणा उक्ताः, बृहदारण्यके तु "य एषोऽन्तर्हृदय आकाश" इति हार्दाकाशस्य सर्ववशित्वादयो गुणाः, तत्र न परस्परोपसंहारः, दहरस्योपास्यत्वेन हार्दाकाशज्ञेयत्वेन विद्याऽभेदादिति प्राप्ते आह कामादीति ।

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥ १०८ ॥ २५ ॥

सत्यकामत्वादित्यर्थः सत्यभामा भामेतिवत् तत्र वशित्वादीनां दहराकाशे उपसंहार उपास्त्यै भविष्यति, सत्यकामत्वादीनां हार्दाकाशे उपसंहारस्तु विभूतिप्रदर्शनेनैक्यस्तुत्यर्थः, विद्याभेदेऽप्युभयत्राकाशपदवाच्यस्यात्मन एकत्वाद्दहरस्यात्मत्वं पूर्वमुक्तम्, हार्दस्यापि "महानज आत्मे"त्युपक्रमादात्मत्वम्,तस्मादुभयत्रोपसंहार इति भिन्ना विद्या ॥ ३९ ॥ १०८ ॥ २५ ॥

आदरादलोपः ॥ ४० ॥ १०९ ॥

वैश्वानरविद्याशेषे "यां प्रथमामाहुतिं जुहुयात्" "तां जुहुयात् प्राणाय स्वाहेति" इत्यादिप्राणाहुतयः पठ्यन्ते, तत्र कथंचिद् भोजनलोपेऽप्युपासकस्य प्राणाहुतिर्न लुप्यते, "पूर्वमतिथिभ्योऽश्नीया"दित्यतिथिभोजनात् पूर्वमप्युपासकस्य यजमानस्य भोजनं प्रापयन्त्याः श्रुतेः प्राणाहुतावावश्यकत्वदर्शनादतिथेः प्राथम्यं निन्दति, यथा वै स्वयमहुत्वा-

म्निहोत्रं परस्य जुहुयात् तादृक् स्यात्, तस्मात् प्राणाहुतेरलोप इत्याशङ्क्य आदरेति ॥ ४० ॥ १०९ ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥ ११० ॥ २६ ॥

"तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीय"मिति भोजनार्थोपस्थस्य होमद्रव्यत्वश्रवणाद्भोजनलोपे भोजनीयद्रव्याभावादाहुतिर्लुप्यते,आदरस्तु सति भोजने प्राथम्यविधानाय भविष्यति, तस्माद्भोजनलोपे प्राणाहुतिलोप इति समाधत्ते उपस्थितेऽत इति ॥ ४१ ॥ ११० ॥ २६ ॥

उद्गीथादिषु कर्माङ्गेषु प्रतिमादिवत् प्रतीकभूतेषु विधीयमाना देवतोपासना अङ्गावबद्धास्ताश्च कर्मस्वनुष्ठीयमानेषु कर्माङ्गत्वनियमेनानुष्ठेयाः, कर्मप्रकरणमारभ्याध्ययनाभावेऽपि वाक्यात् क्रतुसंबन्धोपपत्तेः, यथा "यस्य पर्णमयी जुहूर्भवती"त्यनारभ्याधीतस्याव्यभिचारिजुहूद्वारा वाक्यात् क्रतुसंबन्धस्तथा "य एवं विद्वानुद्गायति" "य एवं विद्वान् साम गायती"त्याद्यव्यभिचरितक्रतुसंबन्धिसामोद्गीथादिद्वारा तदुपासनानां क्रतुसंबन्धः प्रतीयते, तस्मात् कर्मसु नियता उपास्तय इति प्राप्ते आह तन्निर्धारणादिति।

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ १११ ॥ २७ ॥

यथा "चमसेनापः प्रणयेद् गोदोहनेन पशुकामस्य"ति विधीयमानमपि गोदोहनमक्रत्वर्थत्वादैच्छिकं न तु प्रणयनादिवन्नियतं तथा कर्माङ्गान्याश्रित्य विधीयमाना उपास्तयो न क्रत्वर्थाः किंतु पुरुषार्थाः कर्मफलात् पृथक् फलश्रवणात्, "वर्षति हास्मै कामान्" इति पञ्चविधे सामनि वृष्टिदेवतामुपासीनस्य कामवृष्टिः क्रतुफलात् पृथक् प्रतिबध्यत इति प्रतिबन्धः फलं फलत्वेन श्रूयते, किंच "तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदे"त्यस्मिन्नङ्गावबद्धोपास्तिवाक्यशेषे उपासकानुपासकयोरुपास्त्याधारभूतेन तेनाङ्गेन कर्मानुष्ठानं विस्पष्टमाम्नायते, तस्मात् कर्मस्वनियता उपास्तयः ॥ ४२ ॥ १११ ॥ २७ ॥

"वायुर्वाव संवर्ग" इति संवर्गविद्यायामधिदैवं वायुरुपास्यत्वेन श्रुतः, अध्यात्मं च प्राणः, तत्र प्राणस्य वायुकार्यत्वेन तत्त्वभेदाभावादुभयोरेकीकरणेनोपासनं न पृथगिति प्राप्ते आह प्रदानवदिति ।

प्रदानवदेतदुक्तम् ॥ ४३ ॥ ११२ ॥ २८ ॥

तत्त्वभेदाभावेऽपि कार्यत्वेन कारणत्वेन चावस्थाभेदसत्त्वादित्यधिदैवमथाध्यात्ममिति विविच्य पृथगनुचिन्तनाय श्रुतिर्विविनक्ति, यथा "इन्द्राय राज्ञे पुरोडाशमेकादशकपाल""मिन्द्रायाधिराजाये""न्द्राय स्वाराज" इति त्रिपुरोडाशानां यागानामिन्द्रस्यैकत्वेऽपि गुणभेदात् पृथक् पुरोडाशप्रदानं कृतं तथैकस्यापि वायुतत्त्वस्य स्थानभेदात् पृथक् चिन्तनम् ॥ ४३ ॥ ११२ ॥ २८ ॥

अग्निरहस्यब्राह्मणे श्रुतं"षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनो मयात्मनश्चित" इति, अस्यार्थः शतसंवत्सरपरिमिते पुरुषायुषि षट्त्रिंशत्सहस्रं दिनानि भवन्ति तत्रैकैकस्मिन् दिने या मनोवृत्तिस्तस्या एकैकाग्नित्वेन ध्याने सत्यग्नयः षट्त्रिंशत्सहस्राणि संपद्यन्ते ते च प्रत्यगात्मरूपत्वेन ध्येया एत एवार्चनीयाः, मनसा चीयन्त इति मनश्चितः, एवं "वाक्चितः प्राणचितश्चक्षुश्चित" इति, ते चाग्नयश्चयनप्रकरणस्थत्वात् कर्मशेषा न स्वतन्त्रा इति प्राप्ते आह लिङ्गभूयस्त्वादिति ।

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥ ११३ ॥

स्वतन्त्रा विद्यात्मका भवन्ति स्वातन्त्र्ये लिङ्गानां भूयस्त्वात्, यथा "तान् हैतानेवं विदे सर्वदा सर्वाणि भूतानि चिन्वन्ति अपि स्वपते" इत्युपासकस्य स्वपतोऽप्यग्नयो नोच्छिन्ना मनोवागादिवृत्त्युपरमेऽपि प्रतिबुद्धान्यपुरुषवृत्तीनां वर्तमानत्वात्, अशेषपुरुषमनोवृत्तीनामग्नित्वेन वर्णनात्, तस्मादेवंविदे यावज्जीवमग्नीनामविच्छेदेन नैरन्तर्यं प्रतीयत इति स्वातन्त्र्ये लिङ्गं कर्मणो यावज्जीवं नैरन्तर्याभावात्, तच्छेषत्वे कथं तस्य नैरन्तर्यम्, लिङ्गं हि प्रकरणाद्बलीय इत्युक्तं पूर्वकाण्डे, तस्मात् स्वतन्त्रविद्यात्मका, मनश्चिदादयः ॥ ४४ ॥ ११३ ॥

Digitized by Google

यदुक्तं स्वतन्त्रा मनश्चिदादय इति तत्राशङ्कते पूर्वविकल्प इति।

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥ ११४ ॥

न स्वतन्त्रा एवैते क्रियामयस्याग्नेः प्रकरणात्, नच लिङ्गात् प्रकरणं दुर्बलं सांपादिकाग्निप्रशंसारूपस्यान्यार्थदर्शनरूपलिङ्गस्य प्रत्युत दुर्बलत्वात्, असत्यामन्यस्यां प्राप्तौ गुणवादेनाप्युपपद्यमानं लिङ्गं न प्रकरणं बाधितुमुत्सहते, तस्मात् प्रकरणात् क्रियाङ्गान्येवैते मानसवत्; यथा दशरात्रदशमेऽहन्यादिवाक्ये पृथिव्या पात्रेण समुद्रस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादनहवनाहरणोपादानभक्षणानि मानसान्येवाम्नायन्ते,“ मनसा प्रस्तौति मनसोद्गायती”त्यादिना, स च मानसोऽपि ध्येये ग्रहकल्पः क्रियाप्रकरणात् क्रियाशेष एव भवति,एवमयमप्यग्निः ॥ ४५ ॥ ११४ ॥

युक्त्यन्तरेणाशङ्कते॰ अतिदेशादिति।

अतिदेशाच्च ॥ ४६ ॥ ११५ ॥

अतिदेशश्चोपोद्बलकः, “षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान् यावानसौ पूर्व” इति सति सामान्येऽतिदेशः, अतः पूर्वेणेष्टकाचितेन क्रियानुप्रवेशिनाग्निना सांपादिकानग्नीनातिदिशन् क्रियाङ्गत्वं द्योतयति ॥ ४६ ॥ ११५ ॥

आशङ्कां वारयति विद्यैव त्विति।

विद्यैव तु निर्धारणात् ॥ ४७ ॥ ११६ ॥

त्वर्थो व्यावर्तनम्, विद्यात्मका एवैते स्वतन्त्रास्तथा निर्धारणात्,“ते हैते विद्याचित एव” इति, “विद्यया हैवैत एवंविदश्चिता भवन्ती”ति च ॥ ४७ ॥ ११६ ॥

दर्शनाच्च ॥ ४८ ॥ ११७ ॥

दर्शनाच्चेति पूर्वदर्शितलिङ्गात् ॥ ४८ ॥ ११७ ॥

असत्यामन्यप्राप्तौ लिङ्गं न साधकमित्यत्रोत्तरमाह श्रुत्यादीति।

Digitized by Google

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥ ११८ ॥

नात्र प्रकरणादस्माभिर्लिङ्गं बाध्यते किंतु श्रुत्या, तथाहि "ते हैते विद्याचित एवे"ति सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपत इति च सावधारणा श्रुतिः क्रियाङ्गत्वे पीडिता स्यात्, तस्मात् स्वातन्त्र्यपक्ष एव ज्यायान् ॥ ४९ ॥ ११८ ॥

स्वातन्त्र्ये युक्त्यन्तरमाह· अनुबन्धेति ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ५० ॥ ११९ ॥

यतः क्रियावयवान्मनआदिव्यापारेष्वनुबन्धं करोति "ते मनसैवाधीयन्ते मनसा चीयन्ते मनसैव ग्रहा गृह्यन्त"इत्यादिना, संपत्फलो ह्ययमनुबन्धः, नच क्रियावयवाः सन्तः संपदा लिप्सितव्याः पुरुषयज्ञादिवत्, संख्या चेयं पुरुषायुषस्याहःसु दृष्टा सती तत्संबन्धिनीषु मनोवृत्तिष्वारोप्यते, आदिशब्दादतिदेशाद्यपि यथासंभवं योज्यम्, अग्निसामान्यात्, नामातिदेशवत्, प्रज्ञान्तरपृथक्त्ववत्, यथा प्रज्ञान्तराणि शाण्डिल्यविद्याप्रभृतीनि स्वस्वानुबन्धेनानुबध्यमानानि कर्मभ्यः प्रज्ञान्तरेभ्यश्च पृथक् स्वतन्त्राणि तथा, दृष्टश्चावेष्टे राजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षः, तदुक्तं पूर्वकाण्डे, "क्रत्वर्थायामिति चेन्न वर्णत्रयसंयोगा"दिति ॥ ५० ॥ ११९ ॥

यदुक्तं मानसवदिति तत्रोच्यते न सामान्येति ।

न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः ॥ ५१ ॥ १२० ॥

नात्र मानसग्रहसामान्यादपि क्रियाशेषत्वं किंतु पूर्वोक्तश्रुत्यादिहेतुभ्यः केवलपुरुषार्थत्वोपलब्धेः, मृत्युवत्, यथा "स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुष"इति, "अग्निर्वै मृत्यु"रिति चाग्न्यादित्यपुरुषयोः सामान्येऽपि मृत्युशब्दप्रयोगे नात्यन्तसामान्यापत्तिः, यथा चा"सौ वै लोकोऽग्निर्गौतम तस्यादित्य एव समि"दित्यत्र न समिदादित्यसामान्याल्लोकस्याग्निभावापत्तिस्तद्वदित्यर्थः ॥ ५१ ॥ १२० ॥

Digitized by Google

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनु-बन्धः ॥ ५२ ॥ १२१ ॥ २९ ॥

परेण च "एषोऽग्निश्चित" इत्यनन्तरेण ब्राह्मणेन शब्दस्य ताद्विध्यं केवलविद्याविधित्वं प्रयोजनं लक्ष्यते,

"विद्यया तदारोहन्ति यत्र कामाः परागताः ।
न तत्र दक्षिणा यान्ति नाविद्वांसस्तपस्विनः" ॥

इति श्लोके केवलं कर्म निन्दन् विद्यां च प्रशंसन्नेतद्दर्शयति, "यदेतन्मण्डलं तपती"ति ब्राह्मणमपि विद्याप्रधानं लक्ष्यते "सोऽमृतो भवती"ति विद्याफलेनैवोपसंहारात्, न कर्मप्रधानत्वं तत्सामान्यादितरस्य तथात्वात्, तस्मान्मनश्चिदादीनां विद्यात्मकत्वमित्याह परेण चेति ॥ ५२ ॥ १२१ ॥ २९ ॥

मनश्चिदादीनां पुरुषार्थत्वमुक्तं तत्र कः पुरुष इति प्रसङ्गादाह एकेति ।

एक आत्मनः शरीरे भावात् ॥ ५३ ॥ १२२ ॥

एतदधिकरणं पूर्वोत्तरमीमांसयोरुपयोगि, देहातिरिक्तस्य स्वर्गमोक्षभागिनः प्रतिपादकत्वात्, तत्र लोकायतिका देह एवात्मेति वदन्ति, अन्वयव्यतिरेकाभ्यां देह एव चैतन्योपलम्भात्, क्रमुकनागवल्लीचूर्णानां संयोगान्मदशक्तिरिव देहाकारपरिणतेभ्यो भूतेभ्यो जायमानं चैतन्यं कथं नाम जात्यन्तरं स्यात्, तस्माच्चेतनो देह एवात्मेत्याशङ्कत एकेति, यद्यपि शास्त्रादावेव शास्त्रफलोपभोगयोग्यस्य देहातिरिक्तस्यात्मनोऽस्तित्वं भाष्ये उक्तं तथाप्यत्र स्वयं सूत्रकृता देहातिरिक्तस्यात्मन आवेपपुरःसरमतिरिक्तत्वं प्रतिष्ठापितम् ॥ ५३ ॥ १२२ ॥

व्यतिरेकस्तद्भावाभावित्वान्नतूपलब्धि-वत् ॥ ५४ ॥ १२३ ॥ ३० ॥

पृथिव्यादिभूतोपलब्धिर्भूतेभ्यो भिन्ना विषयित्वात्, यद्विषयि, तद्विषयातिरिक्तं यथा रूपाच्चक्षुः, एवं च तादृशचैतन्यस्यात्मत्वं वदन्तं प्रति

कथं भौतिकरूपत्वमापद्येत, व्यतिरेकव्यभिचारश्च असत्यपि देहे परलोकगामिनश्चिदात्मनः शास्त्रेणोपलम्भात्, अतस्तद्भावाभावित्वाद् भौतिकाद्भिन्नोऽहमिदमद्राक्षमिदं पश्यामीत्युपलब्धिस्वरूपो देहातिरिक्तो नित्यश्चात्मा, किंच प्रदीपाद्युपकरणे सत्युपलब्धिर्भवति नतु प्रदीप एवोपलब्धिः, तथा देहे सत्युपलब्धिर्नतु देह एव सेति, तस्माद्देहातिरिक्त आत्मेत्याह व्यतिरेकेति ॥ ५४ ॥ १२३ ॥ ३० ॥

"ओमित्येतदक्षरमुपासीत पञ्चविधं सामोपासीत उक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवी" इत्येवमाद्या उद्गीथादिकर्माङ्गावबद्धाः प्रत्ययाः प्रतिवेदं शाखाभेदेषु विहितास्ते तत्तच्छाखागतेष्वेवोद्गीथादिषु भवेयुरिति व्यवस्थेति प्राप्ते ब्रूते अङ्गावबद्धेति ।

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥ १२४ ॥

तुर्व्यावृत्त्यर्थः, न व्यवस्थिताः किंतु सर्वशाखास्वनुवर्तेरन्नुद्गीथादिश्रुतेः सर्वत्राविशेषात्, संनिधानाच्छ्रुतिर्बलीयसी, तस्मात् सर्वे सर्वत्र ॥ ५५ ॥ १२४ ॥

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥ १२५ ॥ ३१ ॥

अथवा नैवात्र विरोधः, मन्त्रादिवत्, मन्त्राणां कर्मणां गुणानां शाखान्तरोपसंहारो दृश्यते, "ऋतवो वै प्रयाजाः समानत्र होतव्याः", तथा क्वचिदग्नीषोमीयपशौ नाजादिपदं, तत्रापि शाखान्तरीयमन्त्रवर्णाच्छाग एकवेदान्तरोत्पन्नानाम् "अग्नेर्वै हौत्रं वेरध्वर"मित्यादीनां वेदान्तरे परिग्रहः, ऋग्वेदस्य "यो जात एवे"त्यादीना "मध्वर्यवे सजनीयं शस्य"मिति परिग्रहः,तस्मादाश्रयाणामङ्गानामिवाश्रितानां प्रत्ययानामपीत्यविरोधः ॥ ५६ ॥ १२५ ॥ ३१ ॥

वैश्वानरविद्यायां प्राचीनशालाख्यायां व्यस्तस्य समस्तस्य चोपासनं श्रूयते, व्यस्तोपासनं "कं त्वमात्मानमुपास्से" इति, "दिवमेव भगवो राजन्निति होवाचैष सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से" इत्यादि, "समस्तस्य वैश्वानरस्य मूर्धैव सुतेजा" इत्यादि "पृथिव्येव

Digitized by Google

पादा”वित्यन्तेन, तत्र किमुभयमप्युपास्यमुत समस्तमेवेति,अविशेषादुभयमिति प्राप्ते आह भूम्न इति ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥ १२६ ॥ ३२ ॥

भूम्नः समस्तस्यैव ज्यायस्त्वं मुख्यतयोपास्यत्वं न प्रत्येकं यतः श्रुतिस्तथा भूम्नो ज्यायस्त्वमेकवाक्यत्वाद् दर्शयति ॥ ५७ ॥ १२६ ॥ ३२ ॥

छान्दोग्ये दहरविद्याशाण्डिल्यविद्यामधुविद्यादयः पठिताः, तथा शाखान्तरेष्वपि, तत्र पूर्वाधिकरणन्यायेन समस्तोपासनस्य श्रेष्ठत्वाद्वेद्यस्य ब्रह्मण एकत्वाच्च सर्वासामेव स्वपरशाखागतमेकवेद्यव्यपाश्रयं गुणजातमुपसंहार्यमिति सर्वासामेकविद्यात्वमिति प्राप्ते आह नानेति ।

नाना शब्दादिभेदात् ॥ ५८ ॥ १२७ ॥ ३३ ॥

अनन्तासु विद्यास्वेकीकरणेनानुष्ठानं तावदशक्यमिति विद्याभेदोऽभ्युपगन्तव्यः, नच वेद्यैकत्वाच्च भेदः, गुणभेदेन भेदोपपत्तेः, “उपासीत क्रतुं कुर्वीते”त्येवमादिशब्दभेदात्, आदिशब्दाद् गुणादिभेदः, तस्माद्विद्यानां नानात्वम् ॥ ५८ ॥ १२७ ॥ ३३ ॥

स्थिते विद्याभेदे विचार्यते, द्विविधान्युपासनानि· अहंग्रहाणि प्रतीकानि चेत्यात्मनः सगुणोपासनेष्वहंग्रहस्य चतुर्थे वक्ष्यमाणत्वात् तान्यहंग्रहाणि,अनात्मवस्तूनि देवतादृष्ट्या संस्कृत्योपास्यमानानि प्रतीकानि, तत्राहंग्रहेषु शाण्डिल्याद्युपासनेषु, एकं द्वे बहूनि वा यथाकाममनुष्ठेयानि न समुच्चयनियमो नापि विकल्प इति प्राप्ते आह विकल्पेति ।

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ १२८ ॥ ३४ ॥

विकल्प एवासां भवितुमर्हति,ईश्वरसाक्षात्कार उपासनाफलं तच्चैकेन सिध्यति· ततोऽन्यवैयर्थ्यम्, किंचोपासनेषु न प्रमाणजन्यः साक्षात्कारः किंतु निरन्तरभावनया ध्येयतादात्म्याभिमानः, एवं चैकमुपासनमनुष्ठाय तत् परित्यज्यान्यत्र वर्तमानस्य पुरुषस्य चित्तविक्षेपे कथं नाम दृढो भवेत्, तस्मादानर्थक्यविक्षेपयोर्नियामकत्वाद्विकल्पो नियम्यते ॥ ५९ ॥ १२८ ॥ ३४ ॥

Digitized by Google

यासु पुनः काम्यासु विद्यास्वात्मीयं फलं साधयन्तीषु साक्षात्कारापेक्षा नास्ति यथा "य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति स यो नाम ब्रह्मेोपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति" इत्यादिषु पूर्वाधिकरणन्याय इत्याशङ्क्य समाधत्ते काम्यास्त्विति ।

काम्यास्तु यथाकामं समुच्चीयेरन् नवा पूर्वहेत्वभावात् ॥ ६० ॥ १२९ ॥ ३५ ॥

यथाहंग्रहेषु "देवो भूत्वा देवानप्येति" इति जीवन्नेव भावनाप्रकर्षादेव साक्षात्कारं प्राप्य मृतो देवत्वमुपैति न तथा प्रतीकेषु साक्षात्कारफलत्वं तत्र तत्र भोग्यवस्तुप्राप्तयः फलं तथाच भिन्नभिन्नफलत्वाच्चानर्थक्यं विक्षेपशङ्का तु दूरापेता, तस्माद्विकल्पेनैकं वा बहूनि वा समुच्चित्य वा यथाकाममुपासितव्यम् ॥ ६० ॥ १२९ ॥ ३५ ॥

द्विविधानि प्रतीकानि लौकिकानि कर्माङ्गानि चेति, लौकिकान्युक्तानि, कर्माङ्गेषु समुच्चयो विकल्पो वेति चिन्ता, तत्र कर्मण्यङ्गानां समुच्चयादङ्गावबद्धान्यपि समुच्चीयन्ते. इति प्राप्ते आहाङ्गेष्विति ।

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ १३० ॥

"ग्रहं वा गृहीत्वा चमसं वोद्यम्ये" त्यादिवचनात्र नियतपौर्वापर्यभावः श्रुतः, तस्माद्विकल्पसमुच्चययोर्याथाकाम्यम् ॥ ६१ ॥ १३० ॥

शिष्टेश्च ॥ ६२ ॥ १३१ ॥

शिष्टेश्चेति यथाऽऽश्रयाः स्तोत्रादयस्त्रिषु वेदेषु शिष्यन्ते नैवमाश्रिताः प्रत्ययाश्च, नोपदेशकृतोऽपि कश्चिद्विशेषस्तदाश्रयप्रत्ययानाम् ॥ ६२ ॥ १३१ ॥

समाहारात् ॥ ६३ ॥ १३२ ॥

समाहारेति "होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरती" ति 'प्रा-

योऽग्नीयैकत्वविज्ञानादुद्गाता कर्मंहतं होत्रात् कर्मणः प्रतिसमादधाती''ति ब्रुवन् सर्ववेदोदितप्रत्ययोपसंहारं सूचयति ॥ ६३ ॥ १३२ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥ १३३ ॥

विद्यागुणस्य॰ ओङ्कारस्य साधारण्यं सर्वसाधारण्यमप्येवमुपपद्यते॰ ओमिति,"तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयती''त्यादि, एवं चाश्रयसाधारण्यादाश्रयिसाधारण्यं लिङ्गदर्शनम् ॥ ६४ ॥ १३३ ॥

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥ १३४ ॥

नवेति पक्षान्तरव्यावर्तनम्, न यथाश्रयभाव उपासनानां भवितुं युक्तस्तत्सहभावाश्रुतेः, वेदत्रयविहिताङ्गानां सहभावः श्रूयते, "ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति स्तुतमनुशंसति'' इतिवच्चात्रोपासनानां सहभावः श्रुतः, तस्माद्यथाकाममेवोपासनान्यनुष्ठीयेरन् ॥ ६५ ॥१३४ ॥

युक्त्यन्तरमाह दर्शनाच्चेति ।

दर्शनाच्च ॥ ६६ ॥ १३५ ॥ ३६ ॥

इति ब्रह्मसूत्रे तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ :::: ॥

अत्र पादेऽधिकरणानि ॥ ३६ ॥ * * ॥

श्रुतिरप्यसहभावं प्रत्ययानामाह "एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्च ऋत्विजोऽभिरक्षती''ति, सर्वप्रत्ययोपसंहारे तु "सर्वं सर्वविद'' इति न विदुषा ब्रह्मणा परिपाल्यत्वमितरेषामुक्तं संभवति,तस्माद् यथाकाममुपासनानां समुच्चयो विकल्पो वेति ॥ ६६ ॥ १३५ ॥ ३६ ॥

इति ब्रह्मसूत्रतात्पर्यविवरणे तृतीयाध्यायस्य तृतीयो गुणोपसंहारः पादः ॥ ३ ॥ * * ॥

Digitized by Google

अथेदानीमात्मनो देहातिरिक्तत्वविज्ञानं विना परलोकगामित्वानिश्चयाज्ज्योतिष्टोमादिप्रवृत्तिरेव न स्यादिति क्रतुषु प्रवृत्तिकरत्वेनैवौपनिषदमात्मतत्त्वज्ञानं कर्माङ्गमिति प्राप्ते आह पुरुषार्थोऽत इति ।

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥ १३६ ॥

अतो वेदान्तविहितादद्वितीयात्मतत्त्वज्ञानात् स्वतन्त्रात् पुरुषार्थः सिध्यति, केवलदेहातिरिक्तात्मतत्त्वज्ञानस्यास्तु नाम क्रत्वर्थत्वम्, औपनिषदं तु प्रत्युत क्रियाकारकफलप्रतिषेधकमेव ।

ननु तत्त्वविदां जनकादीनां कर्मप्रवृत्तिलक्षण आचारो दृश्यते, बाढम्, लोकसंग्रहार्थमेवायं तेषामाचारः, तेषामपि यदि मुक्तये कर्मानुष्ठानम्, कथं तर्हि प्रजादिश्रुतिवैयर्थ्यमुपपद्यते"तत् किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक" इति,

तस्मादौपनिषदमात्मतत्त्वज्ञानं स्वतन्त्रपुरुषार्थं न क्रत्वर्थम् ॥ १ ॥ १३६ ॥

अथात्र प्रत्यवतिष्ठन्ते षड्भिः सूत्रैः शेषत्वादिति ।

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥ १३७ ॥

कर्तृत्वेनात्मनः कर्मशेषत्वाद्ब्रह्मविज्ञानमपि व्रीहिप्रोक्षणादिवद्विषयद्वारेण कर्मसंबन्ध्येवेति तस्मिन्नवगते प्रयोजनेऽन्या फलश्रुतिरर्थवाद इति जैमिनिराचार्यो मन्यते,"यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती"तिवत् ॥ २ ॥ १३७ ॥

युक्त्यन्तरमाहाचारेति ।

आचारदर्शनात् ॥ ३ ॥ १३८ ॥

"जनको ह वैदेहो बहुदक्षिणेन यज्ञेन" "यक्ष्यमाणो वै भगवन्तोऽहमस्मी"त्येवमादीनि कर्मसंबन्धवचनानि भवन्ति, केवलज्ञानाच्चेत् पुरुषार्थसिद्धिः स्यात् किमर्थं बह्वायाससमन्वितानि कर्माणि न कुर्युः, "अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजे"दिति न्यायात् ॥ ३ ॥ १३८ ॥

युक्त्यन्तरमाह तच्छ्रुतेरिति ॥

Digitized by Google

तच्छ्रुतेः ॥ ४ ॥ १३९ ॥

"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं हि भवती"ति कर्मशेषश्रवणात् केवलविद्याया न पुरुषार्थहेतुत्वम् ॥ ४ ॥ १३९ ॥

युक्त्यन्तरमाह समन्वारम्भणेति ।

समन्वारम्भणात् ॥ ५ ॥ १४० ॥

"तं विद्याकर्मणी समन्वारभेते" इति कर्मशेषत्वश्रवणाद्विद्यायाः कर्मसाहित्यावगमाच्च स्वातन्त्र्यम् ॥ ५ ॥ १४० ॥

तद्वतो विधानात् ॥ ६ ॥ १४१ ॥

किंच "आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयान" इत्यादिश्रुतिः समस्तवेदार्थविज्ञानवतः कर्माधिकारं दर्शयति, अतोऽपि न स्वातन्त्र्येण फलहेतुत्वमित्याह तद्वत इति ॥ ६ ॥ १४१ ॥

नियमाच्च ॥ ७ ॥ १४२ ॥ १ ॥

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे" ॥ "एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया ह्येवास्मान्मुच्यते मृत्युना चे"त्येवमादिनियमादपि कर्मशेषत्वं विद्याया इत्याह नियमाच्चेति ॥ ७ ॥ १४२ ॥ १ ॥

समाधत्ते अधिकेति ।

अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥ १४३ ॥

तुशब्दात् कर्मशेषनिरासः, कुतः, अधिकोपदेशात्, यदि संसार्येवात्मा वेदान्तेषूपदिष्टः स्यात् तदोक्तफलश्रुतेरर्थवादत्वम्, अत्राधिकस्तु शारीरादात्मनोऽसंसारीश्वरः कर्तृत्वादिधर्मरहितोऽपहतपाप्मत्वादिविशेषणः परमात्मा वेद्यत्वेनोपदिश्यते वेदान्तेषु, नच तद्विज्ञानं कर्मप्रवर्तकं किंतु कर्माण्युच्छिनत्तीति वक्ष्यते, तस्मात् पुरुषार्थोऽतः शब्दादिति यदुक्तं तत् तथैव ॥ ८ ॥ १४३ ॥

यदुक्तमाचारदर्शनादिति तत्राह तुल्यं दर्शनमिति ।

Digitized by Google

तुल्यं दर्शनम् ॥ ९ ॥ १४४ ॥

"ह स्म वै तत् पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे तद्धैतदात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ती"त्यादिरूपा, याज्ञवल्क्यादीनामकर्मनिष्ठत्वं दृश्यते ॥ ९ ॥ १४४ ॥

तच्छ्रुतेरित्यत्राह असार्वत्रिकी ।

असार्वत्रिकी ॥ १० ॥ १४५ ॥

"यदेव विद्यये"ति श्रुतिर्न सर्वविद्याविषया, किंतु प्रकृतोद्गीथविद्याविषयेत्यर्थः ॥ १० ॥ १४५ ॥

यदुक्तं विद्याकर्मणी समन्वारभेते इति तत्राह विभाग इति ।

विभागः शतवत् ॥ ११ ॥ १४६ ॥

विद्यान्यं पुरुषमारभते कर्मान्यं पुरुषमिति, यथा शतमाभ्यां दीयतामित्युक्ते विभज्य पञ्चाशदेकस्मै पञ्चाशदन्यस्मायिति ॥ ११ ॥ १४६ ॥

तद्वतो विधानादित्यत्राहाध्ययनेति ।

अध्ययनमात्रवतः ॥ १२ ॥ १४७ ॥

'वेदमधीत्ये'त्यत्राध्ययनमात्रवत एव कर्मविधिरित्यध्यवस्यामः ॥ १२ ॥ १४७ ॥

यदुक्तं नियमाच्चेत्यत्राप्याह नाविशेषादिति ।

नाविशेषात् ॥ १३ ॥ १४८ ॥

'कुर्वन्नेवेहे'त्यत्र नियमश्रवणेषु न विदुष इति विशेषोऽस्ति, अविशेषेण नियमविधानात् ॥ १३ ॥ १४८ ॥

'कुर्व'न्नित्यत्रापरो विशेष इत्याह स्तुतये इति ।

स्तुतयेऽनुमतिर्वा ॥ १४ ॥ १४९ ॥

एतदुक्तं भवति, यावज्जीवं कर्म कुर्वत्यपि पुरुषविदुषि न कर्म लेपाय भवति विद्यासामर्थ्यादिति, तदेवं विद्यास्तुतये ॥ १४ ॥ १४९ ॥

Digitized by Google

अपि चैके विद्वांसः प्रत्यक्षीकृतविद्याफलाः सन्तस्तदवष्टम्भात् फलान्तरसाधनप्रजाधनेषु प्रयोजनाभावं परामृशन्ति कामकारेणेति ।

कामकारेण चैके ॥ १५ ॥ १५० ॥

श्रुतिरस्ति "पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक" इति, अतो न विद्या कर्माङ्गम् ॥ १५ ॥ १५० ॥

उपमर्द्दं च ॥ १६ ॥ १५१ ॥

किंच कर्माधिकारहेतोः क्रियाकारकफलादेः प्रपञ्चविद्यासामर्थ्यात् स्वरूपोपमर्दं चामनन्ति, "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् केन कं जिघ्रे"दित्यादिना विद्योदितात्मज्ञानपूर्विकां कर्माधिकारसिद्धिं प्रत्याशासानस्य कर्माधिकारोक्तिरेव प्रसज्येत तस्मादपि स्वातन्त्र्यम् ॥ १६ ॥ १५१ ॥

ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥ १५२ ॥ २ ॥

किंचोर्ध्वरेतःसु चाश्रमेषु विद्या श्रूयते "ये चेमेऽरण्ये श्रद्धातप इत्युपासते एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ब्रह्मचर्यादेव प्रव्रजे"दित्यादि, नच तत्र कर्माङ्गत्वं विद्यायाः कर्माभावात्, तस्मादपि स्वातन्त्र्यं विद्यायाः ॥ १७ ॥ १५२ ॥ २ ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥ १५३ ॥

पूर्वं स्वतन्त्रमात्मज्ञानमित्युक्तम्, तस्य चोर्ध्वरेतःस्वाश्रमेषु सुलभत्वात् तदाश्रमत्रयातिरिक्ताश्रमसद्भावश्चिन्त्यते, तत्र नास्त्यूर्ध्वरेता इति जैमिनिः, यतः सर्वत्र त्रयाणामेवाचाराणां परामर्शमाह,कुतः, विध्यभावात्, "त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानं प्रथमस्तप एव द्वितीयो ब्रह्मचर्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एवैते पुण्यलोका भवन्ति" इतिपरामर्शपूर्वकमाश्रमाणामनात्यन्तिकफलत्वं संकीर्त्यात्यन्तिकफलतया ब्रह्मसंस्थता स्तूयते "ब्रह्मसंस्थोऽमृतत्वमेति," तस्मात् स्तुत्यर्थमेवायं परामर्शो न चोदनार्थः, किंचापवदति हि श्रुतिराश्रमान्तरम्,"वीरहा वा एष देवानां योऽग्निमुद्वासयते आचार्याय प्रियं धन-

माहृत्य प्रजातन्तुं मा व्यवच्छेत्सीर्नापुत्रस्य लोकोऽस्ती”ति, “तद् सर्वे पशवो विदु” रिति, तथा “ये चेमेऽरण्ये श्रद्धातप इत्युपासते” इत्यादि देवयानस्तुत्यर्थं नाश्रमान्तरसद्भावायेति शङ्कासूत्रमाह परामर्शमिति ॥ १८ ॥ १५३ ॥

अनुष्ठेयमाश्रमान्तरं बादरायणो मन्यत इत्याहानुष्ठेयमिति ।

अनुष्ठेयं तु बादरिः साम्यश्रुतेः ॥ १९ ॥ १५४ ॥

गार्हस्थ्यवद्देवाश्रमान्तरमप्यनिच्छता प्रतिपत्तव्यमिति, कुतः, साम्यश्रुतेः, गार्हस्थ्येनाश्रमान्तरपरामर्शश्रुतिः समाना हि, ‘त्रयो धर्मस्कन्धा’ इत्यादिषु यथा श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृष्टमेवमाश्रमान्तरमपि प्रतिपत्तव्यम्, तस्मात् तुल्यमनुष्ठेयत्वं गार्हस्थ्येनाश्रमान्तरस्य, एव“मेतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती”त्यपि, तस्मात् परामर्शे ऽप्यनुष्ठेयमाश्रमान्तरम् ॥ १९ ॥ १५४ ॥

विधिर्वा धारणवत् ॥ २० ॥ १५५ ॥ ३ ॥

यद्वा विधिरेवायं “ब्रह्मसंस्थोऽमृतत्वमेती”त्याश्रमान्तरस्य न परामर्शमात्रं धारणवत्, “अधस्तात् समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयती”त्यत्र सत्यामप्यधोधारणेनैकवाक्यताप्रतीतौ विधीयत एवोपरि धारणाऽपूर्वत्वात्, तस्मादमृतत्वाय संन्यासूर्ध्वरेतसो विधीयन्ते, श्रुतिरपि “त्रय एते पुण्यलोकभाज एकोऽमृतत्वभा”गिति पृथक्त्वेन व्यपदेशवती, युक्तं च त्रयाणां स्वस्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात्, परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न संभवतीति, शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया ब्रह्मण्यनन्यव्यापरतारूपाया उपोद्बलको न विरोधी, तस्मात् पूर्वे त्रय आश्रमिणः पुण्यलोकभाजः, अवशिष्टः परिव्राडमृतत्वभागित्यायाता एवोर्ध्वरेतस आश्रमाः, सिद्धं चोर्ध्वरेतःसु विधानाद्विद्यायाः स्वातन्त्र्यमित्याह विधिर्वेति ॥ २० ॥ १५५ ॥ ३ ॥

प्रकृतमाह स्तुतिमात्रमिति ।

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥ १५६ ॥

उद्गीथावयवस्योङ्कारस्य रसतमत्वादयो गुणाः श्रूयन्ते "स एष रसानां रसतम" इति, तत्र रसतमत्वादिकमोङ्कारस्य स्तुतिर्नतु ध्यातव्यम्, यथे "यमेव जुहूरादित्यः कूर्मः स्वर्गो लोक" इत्यादौ कर्माङ्गभूताया जुह्वा आदित्यादिरूपेण स्तुतिस्तथा रसतमत्वादिगुणैरोङ्कारस्तुतिरित्याशङ्क्याह स्तुतिमात्रमिति, विषमो दृष्टान्तः, जुहूर्विधिप्रकरणे पठितत्वात् स्तुतिरस्तु रसतमत्वादिकं तूपनिषत्पठितत्वेन कर्मप्रकरणपठितोद्गीथवाक्येनैकवाक्यत्वाभावाच्च स्तावकं किंत्वोमित्येतदक्षरमुद्गीथमुपासीतेत्यनेनैकवाक्यत्वाद्रसतमत्वादिकं ध्यातव्यम् ॥ २१ ॥ १५६ ॥

युक्त्यन्तरमाह भावेति ।

भावशब्दाच्च ॥ २२ ॥ १५७ ॥ ४ ॥

"उद्गीथमुपासीत सामोपासीताहमुक्थमस्मी"ति विद्यादिशब्दा विस्पष्टं विधित्वेन निर्णीताः,

"कुर्यात् क्रियेत कर्तव्यं भवेत् स्यादिति पञ्चमम् ।
एतत् स्यात् सर्ववेदेषु नियतं विधिलक्षणम्" ॥

इति स्मरणात्, भावशब्दत्वात्, ते च स्तुतिमात्रप्रयोजनतायां व्याहन्येरन्, प्रतिकरणं च फलानि श्रूयन्ते "आपयिता ह वै कामानां भवति एष ह्येव कामागानस्येष्टे कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्चे"ति, तस्मादुपासनविधानार्था उद्गीथादिश्रुतयः ॥ २२ ॥ १५७ ॥ ४ ॥

'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च' 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम' 'जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी'त्यादिवेदान्तीयाख्यानेषु किमिमानि पारिप्लवप्रयोगाङ्गान्युत संनिहितविद्याप्रतिपत्त्यर्थानि, तत्राश्वमेधे यत् त्रिषु राजानं सकुटुम्बमुपवेश्य तस्याग्रे वैदिकान्युपाख्यानान्यध्वर्युणा वक्तव्यानि, तदिदं कर्म पारिप्लवमाचक्षीतेति विहितं तदर्थत्वे सत्योपनिषदाख्यानान्यनुष्ठानायोपयुज्येरन् ज्यायोऽनुष्ठानं स्तुतेः, तस्मात् पारिप्लवार्था इति प्राप्ते ब्रूमः पारिप्लवेति ।

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥ १५८ ॥

विद्यास्तावकत्वमेव तेषां विद्यावाक्यैरेकवाक्यत्वात्, 'पारिप्लवमाचक्षीते'ति प्रकृत्य 'प्रथमेऽहनि मनुर्वैवस्वतो राजा द्वितीयेऽहनि यमो वैवस्वतो राजे' त्याद्याख्यानानां पारिप्लवार्थानां विशेषितत्वात्, औपनिषदीनामाख्यायिकानां न तच्छेषत्वं संभवतीति विद्यास्तावकत्वमेव ॥ २३ ॥ १५८ ॥

असति पारिप्लवार्थत्वे आख्यानानां संनिहितविद्याप्रतिपादकत्वमेव युक्तमेकवाक्यतोपपत्त्यादित्याह तथा चेति ।

तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥ १५९ ॥ ५ ॥

तत्र तत्रैकवाक्यता दृश्यते प्ररोचनोपयोगात् प्रतिपत्तिसौकर्योपयोगात्, मैत्रेयीब्राह्मणे ताव'दात्मा वा अरे द्रष्टव्य' इत्यनेनैकवाक्यता, प्रातर्दनेऽपि 'प्राणोऽस्मि प्रज्ञात्मे'त्याद्यया, 'जानश्रुति'रित्यत्रापि 'वायुर्वाव संवर्ग'इत्यनया, तस्माच्च पारिप्लवार्थत्वमाख्यानानाम् ॥ २४ ॥ १५९ ॥ ५ ॥

अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥ १६० ॥ ६ ॥

यतो विद्यायाः पुरुषार्थत्वं 'पुरुषार्थोऽतः शब्दा'दित्युक्तमत एवाग्नीन्धनादीन्याश्रमकर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्षितव्यानि, यद्यपि प्रथमाधिकरणे विद्यायाः स्वतन्त्रपुरुषार्थत्वप्रतिपादनेन कर्माङ्गत्वं निवारितमर्माङ्गत्वं न निवारितं तद्वरणार्थं पूर्वाधिकरणफलस्यैवोपसंहारः, तस्मादुत्पन्ना विद्या स्वफलदाने कर्माणि नापेक्षत इत्याहात एवेति ॥ २५ ॥ १६० ॥ ६ ॥

ब्रह्मविद्या स्वफलैः कर्माणि नापेक्षते तथा स्वोत्पत्तावपि नापेक्षते· अन्यथा क्वचिदपेक्षा क्वचिन्नेत्यर्धजरतीयत्वापत्तिरिति प्राप्ते आह सर्वेति ।

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥ १६१ ॥

नार्धजरतीयन्यायो योग्यतावशादेकस्यैव कार्यविशेषेष्वपेक्षानपेक्षयोरुपपत्तेः, यथा लाङ्गलवहनेऽनपेक्षितोऽश्वो रथवहनेऽपेक्ष्यते तद्वत्

स्वोत्पत्तौ तु विद्या कर्मापेक्षते, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति "शान्तो दान्तस्तितिक्षुरुपरतः श्रद्धावित्तः समाहितो भूत्वात्मन्येवात्मानं पश्ये'दिति, तस्माद्यज्ञादीनि च विद्या स्वोत्पत्तावपेक्षते ॥ २६ ॥ १६१ ॥

यदि कश्चिन्मन्येत यज्ञादीनां विद्यासाधनभावो न न्याय्यो विध्यभावात्, "विविदिषन्ती"त्यादि तु विद्यास्तुत्यर्थं न विधिस्तं प्रत्याह शमदमाद्युपेतेति ।

शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गत्वात् तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥ १६२ ॥ ७ ॥

"यज्ञेने"त्यादिश्रुतिर्नानुवादेनाभिष्टवनपरा, इत्थं महाभागा विद्या यद् यज्ञादिभिरेतामवाप्तुमिच्छन्ति, एवं शमाद्युपेतः स्याद् विद्यार्थी "शान्तो दान्त" इत्यादिष्वा'त्मानं पश्यती'ति शमादीनां साधनत्वेन विधानात्, विहितानां चावश्यानुष्ठेयत्वम्, 'पश्ये'दिति माध्यंदिना विस्पष्टमेव विधिं पठन्ति ॥ २७ ॥ १६२ ॥ ७ ॥

प्राणविद्यायां श्रुतं "न ह वा एवंविदि किंचनानन्नं भवती"ति "न ह वा एवमस्यानन्नं जग्धं भवति" सर्वमस्यादनीयमेवेत्यर्थः, किमिदं सर्वान्नानुज्ञानं विद्याङ्गमुत स्तुत्यर्थं कीर्तनम्, विधिरेव उपदेशस्य प्रवृत्तिविशेषकरत्वात्, अनेन सर्वभक्षणवचनेन भक्ष्याभक्ष्यविभागशास्त्रं बाध्यत इति प्राप्ते आह सर्वेति ।

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥ १६३ ॥

नेदं सर्वान्नानुज्ञानं विधीयते विधायकशब्दाभावात्, अनन्नं भवतीति वर्तमानोपदेशात्, नच श्वादिमर्यादमन्नं मानुषेण देहेनोपभोक्तुं शक्यते, तस्मादापदि यावता प्राणरक्षणं भवति तावन्मात्रं जिघित्सुमप्यन्नमभ्यनुज्ञायते, अत एव चाक्रायणो मुनिः प्राणात्यये इभ्येन स्वामिखादितान् कुल्माषान् भक्षयित्वा शूद्रभाण्डमुदकं न पपौ तत्रोभयकारणं च

"प्रटचीहते"ष्वित्यत्रावोचत्, तस्मादापदि सर्वान्नाभ्यनुज्ञानं "न ह वै"-त्यादिरर्थवादः ॥ २८ ॥ १६३ ॥

अबाधाच्च ॥ २९ ॥ १६४ ॥

एवं च सत्याहारशुद्धौ सत्त्वशुद्धिरित्येवमादि भक्ष्याभक्ष्यशास्त्रम-बाधितं भविष्यतीत्याहाबाधादिति ॥ २९ ॥ १६४ ॥

अपि च स्मर्यते ॥ ३० ॥ १६५ ॥

किंचापदि सर्वान्नभक्षणं स्मर्यते विदुषोऽविदुषश्च,

"जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
न लिप्यते स पापेन पद्मपत्रमिवाम्भसा ॥

इति, तथा "नित्यं मद्यं ब्राह्मणो वर्जये"दिति वर्जनमप्यनन्नस्ये-त्याह-अपिचेति ॥ ३० ॥ १६५ ॥

शब्दश्चातोऽकामकारे ॥ ३१ ॥ १६६ ॥ ८ ॥

शब्दश्चानन्नस्य प्रतिषेधकः कामकारनिवृत्तिप्रयोजनः कठेषु "त-स्माद्ब्राह्मणः सुरां न पिबेत्," सोऽपि "न ह वा एवंविदी"त्यस्यार्थवाद-त्वादुपपन्नतरो भवति, तस्मादेतेऽर्थवादा न विधय इत्याह शब्दश्चात इति ॥ ३१ ॥ १६६ ॥ ८ ॥

'सर्वापेक्षा चे'त्यत्राश्रमकर्मणां विद्यासाधनत्वमवधारितम्, इदा-नीममुमुक्षोराश्रममात्रनिष्ठस्य विद्यामकामयमानस्याग्निहोत्रादीन्यनुष्ठे-यानि न वेति, तत्र विद्यामनिच्छतः फलान्तरकामस्य नित्यान्यननुष्ठेया-नीति प्राप्ते आह विहितत्वेति ।

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥ १६७ ॥

आश्रममात्रनिष्ठस्यापि कर्तव्यान्येव नित्यानि कर्माणि यावज्जीव-विहितत्वात् ॥ ३२ ॥ १६७ ॥

यदुक्तं नैवं सति विद्यासाधनत्वं स्यादेषां तत्रोत्तरं सहकारीति ।

सहकारित्वेन च ॥ ३३ ॥ १६८ ॥

Digitized by Google

एतानि विद्यासहकारीणि च, एतदुक्तं 'सर्वापेक्षे'ति सूत्रे, तस्मादुत्पत्तिसाधनत्व एवैषां सहकारित्वोक्तिः, यथा खादिरस्य नित्यसंयोगेन क्रत्वर्थताऽनित्येन संयोगेन पुरुषार्थत्वं तद्वत् ॥ ३३ ॥ १६८ ॥

सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥ १६९ ॥

सर्वथाश्रमधर्मत्वपक्षे विद्यासहकारित्वपक्षे ते एवाग्निहोत्रादयो धर्मा अनुष्ठेयाः, त एवेति कर्मभेदाशङ्कां निवर्तयन्त्यवधारणं नैव भेदः कर्मणां 'तमेतं वेदानुवचनेने'ति "अनाश्रितः कर्मफल"मिति श्रुतिस्मृत्युभयलिङ्गात् ॥ ३४ ॥ १६९ ॥

अनभिभवं च दर्शयति ॥ ३५ ॥ १७० ॥ ९ ॥

अनभिभवं चेति, सहकारित्वस्यैवैतदुपोद्बलकं लिङ्गदर्शनम्, अनभिभवं दर्शयति श्रुतिब्रह्मचर्यादिसाधनसंपन्नस्य रागादिक्लेशैः "एष आत्मा नाभिभवति यं ब्रह्मचर्येणानुविन्दते" इत्यादिना, तथा यज्ञादीन्याश्रमकर्माणि विद्यासहकारीणि च ॥ ३५ ॥ १७० ॥ ९ ॥

विधुरादीनां द्रव्यादिरहितानामान्तरालिकानां विद्याधिकारोऽस्ति न वेति, नास्तीति प्राप्तमाश्रमकर्मणां हि हेतुत्वं न त्वनाश्रमकर्मणामित्यत्राह॰ अन्तरेति ।

अन्तरा चापि तु तद्दृष्टेः ३६ ॥ १७१ ॥

अन्तरापि॰ अनाश्रमित्वेन वर्तमानोऽपि विद्याधिकारी तद्दृष्टेः, रैक्ववाचक्नवीप्रभृतीनाम्,एवं विद्यानामपि ब्रह्मविस्त्वश्रुत्युपलब्धेः ॥ ३६ ॥ १७१ ॥

अपिच स्मर्यते ॥ ३७ ॥ १७२ ॥

अपिचेति संवर्तप्रभृतीनां नग्नचर्यादियोगानपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यते॰ इतिहासेषु ॥ ३७ ॥ १७२ ॥

ननु लिङ्गमिदमेतावतोक्तम्, प्राप्तिस्त्वभिधीयते विशेषेति ।

विशेषानुग्रहश्च ॥ ३८ ॥ १७३ ॥

जपोपवासदेवताराधनादिभिरनुग्रहः, तथा च स्मृतिः,

"जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते" ॥

इत्यसंभवादाश्रमकर्मणोऽपि जप्येऽधिकारं दर्शयति,

"अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" ।

तस्माद्विधुरादीनामप्यधिकारः ॥ ३८ ॥ १७३ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥ १७४ ॥ १० ॥

अत इति, अतः॰ अन्तरालवर्तित्वादितराश्रमवर्तित्वं ज्यायो विद्यासाधनम्, श्रुतिलिङ्गात् "तेनैति ब्रह्मवित् पुण्यकृच्च तैजसश्च,"

"अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ।
संवत्सरमनाश्रमी स्थित्वा कृच्छ्रमेकं चरेत्" ॥

इति स्मृतिलिङ्गात् ॥ ३९ ॥ १७४ ॥ १० ॥

सन्त्यूर्ध्वरेतस आश्रमा इत्युक्तम्, तान् प्राप्तस्य कथंचित् ततः प्रच्युतिरस्ति न वेति संशये "ब्रह्मचर्यं समाप्य गृही भवेद् गृही भूत्वा वनी भवेद् वनी भूत्वा प्रव्रजे"दित्याश्रमारोहणवत् परिव्राज्यादुनस्य इत्यवरोहोऽपि क्वचिद्रागवशात् क्वचित् पूर्वाश्रमकर्मश्रद्धावशाद्युक्त इति प्राप्ते आह तद्भूतस्येति ।

तद्भूतस्य नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः ॥ ४० ॥ १७५ ॥ ११ ॥

रागस्तावन्मिथ्याज्ञानमूलत्वान्निषिद्धः, नच पूर्वाश्रमधर्मे श्रद्धा युज्यते, उत्तराश्रमिणां प्रत्यविहितत्वेन धर्मबुद्ध्यभावात्, नचारोहवदवरोहे वचांसि शिष्टाचारो वा दृश्यते, तस्मान्नास्त्यवरोहः ॥ ४० ॥ १७५ ॥ ११ ॥

नैष्ठिकब्रह्मचर्यादूर्ध्वरेतस्त्वं प्राप्य पुनः स्त्रीसंयोगेन भ्रष्टस्य प्रायश्चित्तं न भवति,

"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" ॥

इति,

प्रायश्चित्तादर्शनवचनात्, 'अथ यो ब्रह्मचारी स्त्रियमुपेयात् स गर्दभं पशुमालभेते''त्यस्ति प्रायश्चित्तम्, न, तस्य प्रतीकविषयत्वात्, उपकुर्वाणाख्यो यो वेदाध्ययनाङ्गत्वेन ब्रह्मचर्यमनुतिष्ठति तद्विषयं प्रायश्चित्तम्, तस्मादूर्ध्वरेतसो नष्टस्य प्रायश्चित्तं नेति प्राप्ते आह नचेति ।

नचाधिकारिकमपि पतनानुमानात्
तद्योगात् ॥ ४१ ॥ १७६ ॥

यथोपकुर्वाणस्य मधुमांसभक्षणे उपपातकत्वात् प्रायश्चित्तपुनःसंस्कारौ विद्येते तथोर्ध्वरेतसो गुरुदारादिभ्योऽन्यत्र प्रच्युतिरुपपातकमेव नतु महापातकं ततः प्रायश्चित्तपुनःसंस्काराभ्यां शुद्धिर्भवतीति तादृक्पतनस्मरणाभावादुपपद्यते, प्रायश्चित्तं तु गर्दभपशुरेव ब्रह्मचारित्वसाम्यात्, एवं वनस्थपरिव्राजकयोरपि प्रायश्चित्तं वानप्रस्थो दीक्षाभेदे एककृच्छ्रं द्वादशरात्रं चरित्वा महीकक्षं वर्जयेत्, भिक्षुर्वनस्थवत् सोमवृद्धिवर्जं कक्षवृद्धिर्वनावापः सोमवृद्धिरपि स एव ॥ ४१ ॥ १७६ ॥

अप्येके आचार्या उपपातकमेवेदमिति मन्यन्ते तदाह उपपूर्वमपीति ।

उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम् ॥ ४२ ॥ १७७ ॥ १२ ॥

यन्नैष्ठिकस्य गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यं विशीर्यते न तन्महापातकं पञ्चस्वगणनात्, तस्मादुपकुर्वाणवन्नैष्ठिकस्यापि प्रायश्चित्तस्य भावं सत्यमिच्छन्ति ब्रह्मचारित्वाविशेषात् अवकीर्णत्वाविशेषात् अशनवत्, यथा मधुमांसाशने व्रतलोपः पुनःसंस्कारश्च, एवमत्रापि, तस्माद्भावो युक्ततरः ॥ ४२ ॥ १७७ ॥ १२ ॥ ॥

ऊर्ध्वरेतसां प्रच्यवने महापातकमुपपातकं वोभयथापि शिष्टैस्ते बहिः कार्या इत्याह बहिस्त्विति ।

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥ १७८ ॥ १३ ॥

'प्रायश्चित्तं न पश्यामी'त्युक्तत्वात्,

Digitized by Google

"आरूढपतितं विप्रं मण्डलाच्च विनिःसृतम् ।
उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत्" ॥

इत्यादिनिन्दाप्रायस्मृतेः शिष्टाचाराच्च नहि तैः सह यज्ञाध्ययनविवाहादीन्याचरन्ति शिष्टाः ॥ ४३ ॥ १७८ ॥ १३ ॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥ १७९ ॥

अङ्गावबद्धोपासनेषु किं यजमानः कर्ता उताध्वर्य्वादय इति संशये आत्रेय आचार्यः स्वामिनो यजमानस्य कर्माणि फलश्रुतेः, "वर्षति हास्मै वर्षयति ह एतदेवं विद्वान् वृष्टौ पञ्चविधं सामोपास्ते" इति, नन्वा"त्मने यजमानाय वे"ति ऋत्विजामपि फलम्, न, तस्य वाचनिकत्वात्, तस्मात् स्वामिन एव फलवत्सूपासनेषु कर्तृत्वमित्याह स्वामिन इति ॥ ४४ ॥ १७९ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४५ ॥ १८० ॥

नैतत् संभवति स्वामिकर्माणीति किंतु ऋत्विक्कर्माणि तानि स्युरित्यौडुलोमिराचार्यो मन्यते, कुतः, तस्मै साङ्गाय कर्मणे ऋत्विक् परिक्रीयते तत्प्रयोगान्तःपातीनि चोद्गीथाद्युपासनान्यधिकृताधिकारित्वात्, तस्माद्गोदोहनादिवदेतदृत्विजः कुर्युः, "तं ह बको दाल्भ्यो विदांचकार स ह नैमिषीयाणामुद्गाता बभूवे"त्युद्गातृकर्तृतां विज्ञानस्य दर्शयतीत्याहार्त्विज्यमिति ॥ ४५ ॥ १८० ॥

श्रुतेश्च ॥ ४६ ॥ १८१ ॥ १४ ॥

श्रुतेश्चेति, "यां वै कांचन यज्ञे ऋत्विज आशिषमाशासते यजमानायैव तामाशासते इति तस्मादु हैवंविदुद्गाता ब्रूयात् कं ते काममागायानी"ति च श्रुतेरङ्गोपासनानामृत्विक्कर्मत्वम् ॥ ४६ ॥ १८१ ॥ १४ ॥

सहकार्यन्तरेति, "तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं मौनं च निर्विद्याथ ब्राह्मण" इति यतो ब्रह्मभावः परमपुरुषार्थस्तस्माद् ब्रह्म बुभुत्सुरुपनि-

Digitized by Google

यत्तात्पर्यनिर्णयरूपं पाण्डित्यं सम्यक्संपाद्य बालवद्वीरागत्वेन युक्तो युक्तीरनुचिन्तयन्नवस्थातुमिच्छेत् ततः पाण्डित्यबाल्ये निःशेषेण संपाद्याथ मुनिरिति तत्र विध्यश्रवणान्मुनित्वं न विधेयम्, नच कल्पनीयो विधिः, पाण्डित्यशब्देन प्राप्तस्य मौनस्यापूर्वत्वाभावात्, मुनिशब्दोऽपि 'मन ज्ञाने' इत्यस्माद्धातोरुत्पन्नः, तस्मात् प्राप्तत्वान्न मौनस्य विधिरिति प्राप्ते आह सहकार्यन्तरेति ।

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥ १८२ ॥

पूर्वोक्तपाण्डित्यमुनिशब्दार्थत्वे प्रयोजनाभावान्निरन्तरज्ञाननिष्ठापूर्वोऽर्थो मुनिशब्देन विवक्षितः, तत'स्तिष्ठासे'दिति पदानुवृत्त्या विधिर्लभ्यते, अस्ति च ज्ञाननैरन्तर्येण प्रयोजनं प्रबलभेदवासनावासितस्य तन्निवृत्त्यर्थत्वात्, तस्मान्निदिध्यासनात्मकं मौनं विधेयं सहकार्यन्तरं बाल्यपाण्डित्यापेक्षया तृतीयं विधीयते तद्वतो विद्यावतः संन्यासिनः, यथा "स्वर्गकामो यजेते"ति विध्यादौ सहकारित्वेनान्वाधानाद्यङ्गं विधीयते तद्वत् ॥ ४७ ॥ ८२ ॥

कृत्स्नभावात् तु गृहिणोपसंहारः ॥ ४८ ॥ ८३ ॥

कृत्स्नभावादिति, कृत्स्नभावोऽस्य विशेष्यते, बहून्याश्रमकर्माणि बह्वायासानि गृहस्थं प्रति कर्तव्यतयोपदिष्टानि· आश्रमान्तरकर्माणि चाहिंसेन्द्रियसंयमादीनि, तस्माद् गृहस्थेनोपसंहारो नेतरेषाम् ॥ ४८ ॥ १८३ ॥

मौनवदितरेषामप्युपदेशात् ॥ ४९ ॥ ८४ ॥ १५ ॥

मौनवदिति, यथा मौनं गार्हस्थ्यं च तद्वद्वानप्रस्थगुरुकुलवासौ श्रुतिसिद्धौ, तस्माच्चतुर्णामप्याश्रमाणामुपदेशाविशेषात् तुल्यवद्विकल्पसमुच्चयाभ्यां प्रतिपत्तिः, इतरेषामिति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षया वेति ॥ ४९ ॥ १८४ ॥ १५ ॥

Digitized by Google

अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥ १८५ ॥ १६ ॥

अनाविष्कुर्वन्निति, "बाल्येन तिष्ठासे"दित्यत्र बालस्य भावो बाल्यमिति वयोविशेषो वा बालस्य कर्म बाल्यं कामचारवादादिवेति प्राप्त आह, पाण्डित्यमौनाख्ययोः श्रवणनिदिध्यासनयोर्मध्ये मननं विधेयत्वेन श्रुत्या विवक्षितम्, तस्य च भावशुद्धिरुपयुक्ता, रागद्वेषमानावमानादिदोषवस्तेन बहिःप्रवृत्तिं परिव्रज्य गन्तुमशक्यत्वात्, बालस्य कर्म इति तु यथेच्छाचारे भावशुद्धौ च समानौ, तौ तु मननस्यात्यन्तमनुपयुक्तौ प्रत्युत विरोधिनौ मूढस्य बहिःप्रवृत्तमनसो मननविरोधित्वात्, तस्माद्भावशुद्धिरेव बाल्यं नेतरत् ॥ ५० ॥ १८५ ॥ १६ ॥

ऐहिकमप्यपीति, श्रवणमनननिदिध्यासनेष्वनुष्ठीयमानेष्वस्मिन्नेव जन्मनि ज्ञानं जायत इति नियम्यते उतेह वा जन्मान्तरे वेति कालविकल्पः, तत्रैहैवेति, कुतः, श्रवणादिपूर्विका हि विद्या, नहि कश्चिदमुत्र मे विद्या जायतामित्यभिसंधाय श्रवणादिषु प्रवर्तते, एकजन्मनि तु फलविद्याजन्माभिसंधाय प्रवर्तमानो दृश्यते, युक्त्यादीन्यपि श्रवणादिद्वारेणैव विद्यां जनयन्ति, तस्मादैहिकमेव विद्याजन्मेति प्राप्ते आह ऐहिकमिति।

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥ १८६ ॥ ७ ॥

विद्याजन्म भवत्यसति प्रतिबन्धे, अयमर्थः, प्रक्रान्तविद्यासाधनस्य च कश्चित् प्रतिबन्धस्तदैहैव कर्मविपाकेन विपच्यते विद्यया, यदा तु प्रतिबन्धः कश्चित् तदामुत्रेति, सामग्र्यधीनत्वात् कार्यस्य, श्रवणादिद्वारेणापि विद्योत्पद्यमाना प्रतिबन्धक्षतयापेक्षयैवोत्पद्यते, गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदन्ती श्रुतिर्जन्मान्तरसंचितात् साधनाज्जन्मान्तरे विद्योत्पत्तिं दर्शयति,तस्मादैहिकमामुष्मिकं वा विद्याजन्म प्रतिबन्धक्षयापेक्षयेति स्थितम् ॥ ५१ ॥ १८६ ॥ १७ ॥

यथा विद्यासाधनावलम्बिनः साधनवीर्यविशेषतद्विद्यायामैहिकामुष्मिकफलत्वकृतो विशेषप्रतिनियमः, एवं मुक्तावप्युत्कर्षापकर्षकृतः कश्चिद्विशेषप्रतिनियमः स्यादित्याशङ्क्याह· एवं मुक्तिफलेति ।

एवं मुक्तिफलानियमस्तदवस्थावधृते-
स्तदवस्थावधृतेः ॥ ५२ ॥ १८७ ॥ १८ ॥

इति ब्रह्मसूत्रे तृतीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥ :: :: ॥

अत्र पादेऽधिकरणानि ॥ १८ ॥ * * ॥

न खलु मुक्तिफले कश्चिदेवंभूतो विशेष आशङ्कितव्यः, कुतः, तदवस्थावधृतेः, मुक्त्यवस्था हि सर्ववेदान्तेष्वेकरूपैवावधार्यते, ब्रह्मैव हि मुक्त्यवस्था, नैव ब्रह्मणोऽनेकाकारयोगोऽस्ति, एकलिङ्गत्वावधारणात्, "अस्थूलमनण्विति" "नेति नेती"ति "नान्यत् पश्यति" "ब्रह्मैवेदममृतं पुरस्ता" दित्यादिश्रुतिभ्यः, किंच विद्यासाधनं स्ववीर्यविशेषात् स्वफले एव विद्यायां कश्चिदतिशयमासादयेत्, न विद्याफले मुक्तावतिशयः, पदाभ्यासोऽध्यायसमाप्तिं द्योतयितुम् ॥ ५२ ॥ १८७ ॥ १८ ॥

इति ब्रह्मसूत्रतात्पर्यविवरणे तृतीयाध्यायस्य चतुर्थः पादः ॥ ४ ॥ :: :: ॥ समाप्तश्च साधनाध्यायः ॥ ३ ॥ * * ॥

तृतीयेऽध्याये विद्यासु साधनाश्रयो विचारः प्रायेणात्यगात्, चतुर्थेऽध्याये फलाश्रयविचार आरभ्यते प्रासङ्गिकं च चिन्तयिष्यते. "आत्मा वा अरे द्रष्टव्यः श्रोतव्य" इत्यादौ "सोऽन्वेष्टव्य" इत्यादौ च सकृत् प्रत्ययः कार्य उत आवृत्येति, तत्र सकृत् स्यात् प्रयाजादिवत् तावतापि शास्त्रस्य कृतार्थत्वात्, अश्रूयमाणा ह्यावृत्तिरशास्त्रार्थः स्यात्, तस्मात् सकृदिति प्राप्ते आहावृत्तिरिति ।

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

"श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिना असकृदुपदेशात् प्रत्ययावृत्तिं सूचयति यावत्सम्यग्दर्शनम्, पूर्वत्र प्रयाजादेरदृष्टफलविषयत्वात्, अत्र तु ब्रह्मसाक्षात्कारलक्षणस्य दृष्टफलस्य संभवात्, दृष्टे संभवत्यदृष्टकल्पनाया अन्याय्यत्वात्, व्रीह्यवघातवद् यावत्फलं श्रवणमावर्तनीयम् ॥ १ ॥

लिङ्गादप्यावृत्तिर्गम्यते इत्याह लिङ्गाच्चेति ।

लिङ्गाच्च ॥ २ ॥ १ ॥

उद्गीथं प्रस्तुत्या"दित्य उद्गीथ" इत्येतदेकपुत्रतादोषेणापोद्य "र-श्मींस्त्वं पर्यावर्तया"दिति रश्मिबहुत्वविज्ञानं बहुपुत्रताये विदधत् सिद्धवत् प्रत्ययावृत्तिं दर्शयति, तत्सामान्यात् सर्वप्रत्ययेष्वावृत्तिः ॥ २ ॥ १ ॥

यः शास्त्रप्रतिपाद्य आत्मा स जीवेन ज्ञात्रा व्यतिरिक्ततया मदन्य इति ग्राह्य उत स्वाभिन्नत्वेनेति, तत्र दुःख्यदुःखिनोर्जीवब्रह्मणोरैकत्र विरोधाद् भिन्नत्वेनेति प्राप्ते आहात्मेति ।

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ २ ॥

वस्तुतो ब्रह्मस्वरूपस्यैव सतो जीवस्यान्तःकरणोपाधिकृतो दुःखित्वादिसंसारिधर्म इति पूर्वं प्रपञ्चितम्, अतो वास्तवविरोधाभावादिति स्वेनैव ब्रह्म गृह्यताम्, अत एवा"हं ब्रह्मास्मि" "अयमात्मा ब्रह्मे"ति वाक्यैस्तत्त्वविद आत्मत्वेनैव ब्रह्म गृहीतं गृह्यतामिति स्वशिष्यान् ग्राहयन्ति, तस्मादात्मत्वेनैव ब्रह्म ग्रहीतव्यम् ॥ ३ ॥ २ ॥

"मनो ब्रह्मेत्युपासीत," "आदित्यो ब्रह्मेत्यादेशः," इत्यादिषु ब्रह्मदृष्टिसंस्कृतं मनआदित्यादि प्रतीकमुपास्यम्, तत् प्रतीकमुपासकेन स्वात्माभिन्नत्वेन प्रतिपत्तव्यं प्रतीकस्य ब्रह्मकार्यत्वेन ब्रह्मणा भेदाभावात्, जीवस्य ब्रह्माभिन्नत्वात्, ब्रह्मद्वारोपास्यप्रतीकस्योपासकस्य जीवस्य च भेदाभावेनैकत्वसंभवादिति प्राप्ते ब्रूते न प्रतीकेनेति ।

न प्रतीके न हि सः ॥ ४ ॥ ३ ॥

यदि ब्रह्मकार्यस्य प्रतीकस्य ब्रह्मैक्यमवलोक्येत तदा प्रतीकरूपमेव विलीयते, घटस्य मृद्रूपेणैक्ये विलयदर्शनात्, यदि च जीवस्य ब्रह्मैक्यमेवावलोक्येत तदा जीवत्वापाये सत्युपासकत्वं हीयेत, तत्र ह्युपास्योपासकस्वरूपलोभेन कार्यकारणयोर्जीवब्रह्मणोश्चैक्यं न पर्यालोच्येत, गोमहिषवदत्यन्तभिन्नयोः प्रतीकोपासनया नास्त्येकत्वयोग्यता, तस्माच्च प्रतीकेऽहंदृष्टिरस्ति ॥ ४ ॥ ३ ॥

Digitized by Google

तत्रैव प्रतीके 'मनो ब्रह्मे'त्यादौ मनआदित्यादिदृष्टिर्ब्रह्मणि कर्तव्या० उतादित्यादिषु ब्रह्मदृष्टिः, तत्र मनोदृष्टिं ब्रह्मणि कृत्वोपासनीयं ब्रह्मणः फलप्रदत्वेनोपासनार्हत्वात्, इति प्राप्ते आह ब्रह्मदृष्टीति।

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥ ४ ॥

ब्रह्मण उत्कृष्टत्वात् तद्दृष्टिर्निकृष्टे मनआदित्यादौ कार्या, लोके निकृष्टे भृत्ये राजदृष्टिं कृत्वा राजवत् पूजयन्ति,

किंच 'मनो ब्रह्मेत्युपासीते'त्यत्र ब्रह्मशब्द इतिशब्दपरत्वेन दृष्टिलक्षको भविष्यति मनःशब्दश्चानितिपरत्वान्मुख्यार्थवाची, यथा स्थाणुं चोर इति प्रत्येतीत्यत्र स्थाणुशब्दो मुख्यार्थवाची चोरशब्दो दृष्टिलक्षकस्तद्वत्;

नचाब्रह्मरूपस्य मनस उपास्यत्वे ब्रह्मणः फलप्रदत्वानुपपत्तिः, तथ्वाब्रह्मस्वरूपस्याप्यतिथ्यादेरुपास्यत्वेन कर्माध्यक्षत्वेन यथा फलं प्रयच्छति तद्वदत्रापि संभवात्, तस्माद् ब्रह्मप्रतीके ब्रह्मदृष्टिः कार्येति ॥ ५ ॥ ४ ॥

"य एवासौ तपति तमुद्गीथमुपासीते"त्यादित्यं देवतां प्रतीकं कृत्वा कर्माङ्गभूतोद्गीथदृष्टिः कार्या० उत विपर्ययेण, तत्रोद्गीथादित्ययोर्ब्रह्मकार्यत्वेन पूर्वोक्तन्यायानवतारेण नियामकाभावादनियम इति प्राप्ते आहादित्येति।

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥ ५ ॥

आदित्यदृष्ट्या कर्माङ्गं संस्कर्तव्यं तथा सति दृष्टिसंस्कृतकर्मणः फलातिशयसंभवात्, विपर्यये तु कर्माङ्गैर्देवतायां संस्कृतायां किं तव फलं भवेत्, नहि स्वक्रियाङ्गं देवताफलसाधनं भवति, अन्यथा देवतायाः साधारणत्वेन यजमानायजमानयोः साधारणफलत्वप्रसङ्गात्, तस्मादङ्गेष्वादित्यादिदृष्टिः कार्या ॥ ६ ॥ ५ ॥

अत्र कर्माङ्गावबद्धोपासनानां कर्मतन्त्रत्वाच्च तत्र चिन्ता, नापि सम्यग्दर्शना० वस्तुतन्त्रत्वाज्ज्ञानस्य,अतोऽतिरिक्तोपासनेषु विचारः, किं

तिष्ठन्नासीनः शयानो वाऽनियमेन प्रवर्त्ततोत नियमेनेति विचारे उपासनस्य मानसत्वादनियमः शरीरस्थितेरिति प्राप्ते आहासीन इति ।

आसीनः संभवात् ॥ ७ ॥

आसीन एवोपासीत, कुतः, संभवात्, समानप्रत्ययप्रवाहकरणं ह्युपासनम्, नच तद् गच्छतो धावतो वा संभवति गत्यादीनां चित्तविक्षेपकरत्वात्, तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति,शयानस्यापि निद्रयाभिभूयेत, आसीनस्य तु न भूयात् दोष इति तस्यैवोपासनम् ॥ ७ ॥

ध्यानाच्च ॥ ८ ॥

अपिच, उपासनापर्यायध्यायत्यर्थ एषः, यत् समानप्रत्ययप्रवाहकरणम्, ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते, ध्यायति बको ध्यायति प्रोषितबन्धुरिति, आसीनश्चानायासो भवति, तस्मादप्यासीनकर्मोपासनम् ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥

किंच, "ध्यायतीव पृथिवी"त्यत्र पृथिव्यादिष्वचलत्वमपेक्ष्य ध्यायतिवादो भवति, तच्चोपासनस्यासीनकर्मत्वे लिङ्गमित्याहाचलत्वं चेति ॥९॥

स्मरन्ति च ॥ १० ॥ ६ ॥

शिष्टा उपासनाङ्गत्वे चासनं स्मरन्ति "शुचौ देशे प्रतिष्ठाप्ये"-त्यादिना, अत एव पद्मकासनादीनामुपदेशो योगशास्त्र इत्याह स्मरन्ति चेति ॥ १० ॥ ६ ॥

दिग्देशकालेषु संशयः, अस्ति कश्चिन्नियमो नास्ति वेति, प्रायेण वैदिकेष्वारम्भेषु प्राच्यादिदिगादिनियमदर्शनादिहापि स्यादिति प्राप्ते आह यत्रेति ।

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥ ७ ॥

दिग्देशकालेष्वर्थलक्षण एव नियमः, यत्र यथा मनसः सौकर्येणैकाग्रता

भवति तथैवोपासीत प्राच्यादिविशेषाश्रवणात्, "समे शुचौ जलाशये" इत्यादि तु सुहृद् भूत्वा मनोऽनुकूलत्वस्यैव बोधनम्, तस्माद्यत्रैकाग्रता तत्रैवेत्यर्थः ॥ ११ ॥ ७ ॥

आवृत्तिः सम्यग्दर्शनफलेषु सर्वोपासनेष्विति स्थिते तान्यवघातादिवत् कार्यपर्यवसानानीत्यपि ज्ञातम्, यान्यभ्युदयफलान्युपासनानि तेषु चिन्ता, किंचित्कालमावर्त्योपरमेदुत यावज्जीवमिति, तत्र किंचित्कालं प्रत्ययमभ्यस्योत्सृजेत् तावताऽऽवर्त्योपासनस्य सिद्धत्वात्, इति प्राप्ते आहाप्रायणेति ।

आप्रायणात् तत्रापि हि दृष्टम् ॥ १२ ॥ ८ ॥

आ प्रायणादेवावर्तयेत् प्रत्ययम्, अन्त्यप्रत्ययवशाददृष्टफलप्राप्तेः, कर्माण्यपि जन्मान्तरोपभोग्यं फलमारभमाणानि तदनुरूपं विज्ञानं प्रयाणकाले आक्षिपन्ति, "सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयती"ति श्रुतिभ्यः, तृणजलायूकानिदर्शनाच्च, तस्माद्ये प्रतिपत्तव्यफलभावनाः प्रत्ययास्तेऽप्याप्रायणादावर्तनीयाः, अत एव "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवर"मित्यादिस्मृतिरपि ॥ १२ ॥ ८ ॥

गतस्तृतीयाध्यायशेषविचारः, अथेदानीं ब्रह्मविद्याफलं चिन्त्यते, ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते नवेति संशये फलार्थत्वात् कर्मणः फलमदत्त्वा न क्षीयते, न च प्रायश्चित्तानर्थक्यं तेषां नैमित्तिकत्वेनोपपत्तेर्गृहदाहेष्ट्यादिवत्, तस्माद् ब्रह्मज्ञानिनोऽप्यस्ति पापलेप इति प्राप्ते आह तदधिगम इति ।

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् १३ ॥ ९ ॥

ब्रह्माधिगमे उत्तरपूर्वयोरघयोरुत्तरस्याऽश्लेषः पूर्वस्य विनाशः, कुतः, तद्व्यपदेशात्, "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते", तथा पूर्वोपचितस्य नाशमप्याह श्रुतिः "तद्यथे-

षीकातूलमग्नौ प्रोतं प्रदूयेतैवं ह्यास्य सर्वे पाप्मानः प्रदूयन्ते."भिद्यते हृदयग्रन्थि"रित्यादि, "नाभुक्तं क्षीयते कर्मेति" तु सगुणब्रह्मज्ञानविषयम्, तस्मान्नास्ति ज्ञानिनः पापलेपः ॥ १३ ॥ ९ ॥

मास्तु ज्ञानिनः पापलेपः, धर्मस्य तु शास्त्रीयत्वात् पुण्यलेपस्त्वसत्येवेति प्राप्त आहेतरस्यापीति ।

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥ १० ॥

अकर्त्रात्मवस्तुसामर्थ्यात् पापवत् पुण्येनापि न लिप्यते. सगुणज्ञानिनस्तूपासनभिन्नं काम्यपुण्यं पापवद्बन्धहेतुत्वात् पापसममेवेति वाक्यशेषे श्रुतिः परामृशति "सुकृतं दुष्कृतं वा सर्वं पाप्मानोऽतो निवर्तन्त" इति, तस्मात् पापवत् पुण्येनापि न लिप्यते ॥ १४ ॥ १० ॥

ज्ञानात् पूर्वं संचिते पुण्यपापे द्विधा-आरब्धे अनारब्धे च तयोर्द्वयोरप्यकर्तृत्वमात्मनः समानमिति ज्ञानोदये प्रारब्धाप्रारब्धयोरुभयोरपि तत्काले नाश इति प्राप्ते आहानारब्धेति ।

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥ ११ ॥

श्रुत्यनुभवयुक्तिभ्य आरब्धयोरविनाशो गम्यते,"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये"तत्त्वविदो मुक्तिर्नात्यन्तं विलम्बते किंतु कृतायुषः क्षयाभावेन यावद् देहः प्राणैर्न विमोक्ष्यते तावदेव विलम्बः, प्राणदेहवियोगे सति ब्रह्म संपद्यत इति श्रुत्या तत्त्वविदोऽप्यादेहपातं संसारोऽङ्गीकृतः, एवं विद्वदनुभवोऽपि स्फुट एव, युक्तिश्च यथा लोके वृक्षादिनिहिते बाणे धानुष्कस्य स्वीकारपरित्यागयोः स्वातन्त्र्येऽपि मुक्ते बाणे स्वातन्त्र्यं नास्ति बाणवेगक्षये स्वयमेव पतति, एवं चक्रभ्रमणादिकमुदाहार्यम्, तथा ब्रह्मज्ञानस्याप्यनारब्धकर्मक्षये स्वातन्त्र्येऽपि नारब्धकर्मणि स्वातन्त्र्यं तस्य प्रवृत्तफलत्वात्, यद्याग्रहेणेदं नाङ्गीकरोषि तदा विद्यासंप्रदायोच्छेदापत्तिः, तस्मान्नारब्धयोर्नाशः किंत्वनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्गलितार्थः ॥ १५ ॥ ११ ॥

Digitized by Google

पुण्यपापाश्लेषविनाशयोरघन्यायोऽतिदिष्टः, इदानीं ज्ञानात् पूर्वमिह जन्मनि जन्मान्तरे वानुष्ठितं यदग्निहोत्रादि नित्यं कर्म तस्यापि काम्यकर्मवदकर्त्रात्मबोधमहिम्ना नाशो भवतीति प्राप्ते आहाग्निहोत्रादि त्विति।

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

द्विविधं नित्यं कर्म, एकं प्राधान्येन चित्तशुद्धिप्रदम्, अपरमनुषङ्गेण स्वर्गादिफलप्रदं च, द्वितीयस्य तु नाशोऽस्तु नाम, चित्तशोधकस्य विद्यायामुपयुक्तत्वाच्च नाशो वर्णयितुं शक्यः, किंतु ज्ञानस्य यत् कार्यं तदेवैतस्यापि कार्यम्, "तमेतं वेदानुवचनेने"ति श्रुतेः,

नच ज्ञानकर्मणोर्विलक्षणत्वात् कथं कार्यैकत्वं ज्वरमरणकार्यकयोरपि दधिविषयोर्गुडमन्त्रसंयुक्तयोस्तृप्तिपुष्टिकार्यदर्शनात्, तद्वत् कर्मणोऽपि ज्ञानयुक्तस्य मोक्षकार्यत्वोपपत्तेः,

नन्वनारभ्यो मोक्षः कथमस्य कर्मणः कार्यं इति तु न, आरादुपकारकत्वात् कर्मणः, ज्ञानस्यैव प्रापकं सत् कर्म प्रणाल्या मोक्षकारणमित्युपचर्यते,

यत् तु ज्ञानादूर्ध्वं नित्यं कर्म तस्य काम्यवदश्लेषः ॥ १६ ॥

किंविषयं पुनरिदमश्लेषविनाशवचनं किंविषयं वा विनियोगवचनम् "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या"मित्याशङ्कायामुत्तरयति अतोऽन्येति।

अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥ १२ ॥

अतोऽग्निहोत्रादेर्नित्यात् कर्मणोऽन्याप्यस्ति साधुकृत्या या फलेच्छया क्रियते तस्या एष विनियोग उक्त एकेषां शाखिनां "सुहृदः साधुकृत्यामुपयन्ती"ति,तस्या एवेदमघवदश्लेषविनाशनिरूपणम्, तथा चैवंजातीयकस्य काम्यकर्मणो विद्यां प्रत्यनुपकारकत्वे उभयोरपि जैमिनिबादरायणयोः संप्रतिपत्तिः ॥ १७ ॥ १२ ॥

नित्यमग्निहोत्रादि दुरितक्षयद्वारेण मनःशुद्धिकारणं सद् विद्यया सहैककार्यं भवति, तच्चाग्निहोत्रादि·अङ्गव्यपाश्रयविद्यासंयुक्तं केवलं वा,"य एवंविद्वानग्निहोत्रं जुहोती"त्यादि,तत्राङ्गविद्यासंयुक्तमेव तत् कर्म ब्रह्मज्ञानोपयोगि नतूपास्तिरहितम्,

बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ।
दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ॥

इत्यादिस्मृतेः,इति प्राप्ते आह यदेव विद्ययेति हीति ।

यदेव विद्ययेति हि ॥ १८ ॥ १३ ॥

सत्यमेतद् विद्यया वीर्यवत्तरमिति,तथापि तद्रहितं नात्यन्तमनपेक्ष्यम्,"तमेतमात्मानं यज्ञेन विविदिषन्ती"त्यादावविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात्,'वीर्यवत्तरं ही'तितरपा निरुपासनस्य कर्मणो वीर्यमात्रमभ्यनुजानाति, तस्मात् सोपासननिरुपासनयोरुभयोरपि तारतम्येन विद्यासाधनत्वम् ॥ १८ ॥ १३ ॥

अधिकारिपुरुषाणां मुक्तिरस्ति न वेति संशये नास्तीत्याशङ्कते, कुतः, प्रारब्धकर्मणो भोगाय बहुषु जन्मसु स्वीकृतेषु पूर्वार्जितविद्यायां लुप्तायां यत् कर्म क्रियते तस्य फलप्रदत्वे सत्युत्तरोत्तरं जन्मपरंपराया आवश्यकत्वादिति प्राप्ते आह भोगेन त्विति ।

भोगेन त्वितरे क्षपयित्वा संपद्यन्ते ॥ १९ ॥ १४ ॥

इति ब्रह्मसूत्रे चतुर्थाध्यायस्य प्रथमः पादः ॥ १ ॥ :: :: ॥

अथ पादेऽधिकरणानि ॥ १४ ॥ * * ॥

आरब्धं कर्म स्वफले सुखदुःखे भोजयेत्, तदर्थमेव प्रवृत्तत्वात्, नहि विलोपाय नियमेन किंचिदनुष्ठितं येन विद्या विलुप्येत, नच मरणेन विद्यालोपः,सुषुप्तिव्यवधाने तल्लोपादर्शनात्, अतो विद्यावतां बहुभिरपि क्रियमाणैः कर्मभिरसंश्लेषादधिकारिणां मुक्तिः, यद्यपीदं गुणोपसंहारे निरूपितं तथापि तस्यैवात्र स्मरणम् ॥ १९ ॥ १४ ॥

इति ब्रह्मसूत्रतात्पर्यविवरणे चतुर्थाध्यायस्य प्रथमः पादः ॥१॥ ** ॥

Digitized by Google

माधवीयधातुवृत्तिः ।

अस्याश्च साध्यत्वादिकमाश्रयद्वारकम् । यदाह ।

अन्ते या वा क्रिया भावो जातिः सैव क्रिया स्मृता ।
सा व्यक्तेरनुनिष्पादे जायमानेव गम्यते ॥ इति ।

अत्रापि मते व्यक्तिदर्शनवत्तादर्थ्यादन्यत्र पच्यादिप्रयोगः । अथ वाधिश्रयणादिव्यापारविशिष्टेषु कारकेष्वधिश्रयणादिव्यापारेष्वन्त्यएव व्यापारे समवेतोपहितभेदा सत्ता क्रिया । तदुक्तम् ।

स्वव्यापारविशिष्टानां सत्ता वा कर्तृकर्मणाम् ।
क्रिया व्यापारभेदेषु सत्ता वा समवायिनी ॥
अन्ते वात्मनि या सत्ता सा क्रिया केश्चिदिष्यते ।
भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः ॥ इति ।

भाव एव हीत्यादिना षड्भावविकारा इति ह स्माह भगवान् वार्ष्यायणिरिति भाष्यकारानुमतं निरुक्तकारवाक्यमस्य संवादकत्वेन दर्शयति । जातिसमुद्देशेप्युक्तम् ।

प्राप्तक्रमविशेषा तु क्रिया सैवाभिधीयते ।
क्रमरूपस्य संहारे तत्सत्त्वमिति कथ्यते ॥

व्यापारविशेषाणां साध्यत्वात्क्रमिकत्वाच्च तदुपहितायाश्च ते भवतः । अथ वा शब्दोच्चारणसमनन्तरं योर्थः प्रतिभासते बुद्ध्याकारत्वेन स शब्दार्थः ॥ तदुक्तं,बुद्धिप्रतिभासः शब्दार्थ इति । यदि हि बहिःसत्तासमाविष्टोर्थः स्यात् तदा पटोस्ति नास्तीत्यादौ पौनरुक्त्यविरोधौ स्यातां, तथा ऽसतो जन्मयोगात् पटो जायत इत्यादिप्रयोगोनुपपन्नः स्यात् । किं च बहिरत्यन्तासत्सु शशविषाणादिषु तत्तच्छब्दप्रयोगो न स्यात्, बुद्ध्युपारूढे तु शब्दार्थत्वे दोषा नावतरन्ति । बुद्धिसत्तासमाविष्टस्य बहिस्सत्ताऽसत्ताजननप्रतिपादनायास्ति नास्ति जायतइति प्रयोगस्योपपन्नत्वात् । अर्थक्रियाकारित्वं तु दृश्यविकल्पयोरभेदाध्यवसायादुपपद्यते शशविषा-

Digitized by Google

णादिष्वप्यस्तिप्रयोगो नास्तिप्रयोगश्च बुद्धिसत्तयैवास्ति न तु बाह्यसत्तयेत्येवं प्रतिपादनाय, तस्माद्धातूनामपि बुद्धिसिद्धाः क्षणास्तद्गता जातिः सत्ता वार्थः सैव क्रिया । साध्यतादिकं वा भेदेनाध्यवसितं दृश्यक्षणाद्धा-दैग । उक्तं हि ।

बुद्धिं तज्जातिमन्ये तु बुद्धिसत्तामथापरे ।

प्रत्यस्तद्रूपं भावेषु क्रियेति प्रतिजानते ॥ इति ।

बुद्धिशब्देन बुद्धिप्रतिभास्याकारोऽत्र विवक्षितः ॥ तदेवं भुवः क्रियार्थवित्वात्पाठाच्च भूवादयो धातव इति धातुत्वे वर्त्तमाने लडिति वर्त्तमानत्वोपाधिकार्थे द्धातोर्लट् 'प्रत्ययः' 'परश्चे'ति प्रत्ययसंज्ञकः परस्तात् ॥

ननु बहवः क्षणा धातुवाच्यास्तत्र केचन भूता भविष्यन्त इति तेषामविद्यमानत्वात् कथं वर्त्तमानत्वं धात्वर्थविशेषणम्, उच्यते । नेह विद्यमानत्वं वर्त्तमानत्वं किं तर्हि प्रारब्धापरिसमाप्तत्वं तच्च यावतः क्षणसमूहस्य फलावधिप्रवृत्तिः तावतः प्राक् फलजननादभेदेनाध्यवसितस्यास्त्येव । एवं च काल्पनिकसमूहाकारेण विद्यमानत्वं वर्तमानत्वमित्युक्तं भवति ।

कार्योत्पत्तौ समर्थं वा स्वेन धर्मेण तत्तया ।

आत्मतत्त्वेन गृह्येत सा चास्मिन्वर्त्तमानता । इति ॥

अस्यार्थः, वाशब्दो वक्ष्यमाणपक्षापेक्षः एकैकक्षणानन्तरं फलनिष्पत्तेरदर्शनादितरक्षणवैयर्थ्यप्रसङ्गात्सर्वक्षणानन्तरदर्शनाच्चैकफलसाधनत्वेन क्षणानां कल्पितमेकं समुदायरूपं कार्योत्पत्तौ समर्थमित्युच्यते, तत्स्वेन धर्मेण क्रमवत्त्वेन तथा युक्तमात्मतत्त्वेनात्मीयेन विद्यमानत्वेन गृह्यते सेयमस्मिन्समुदाये वर्त्तमानतेति । वाशब्दसूचितः पक्ष उच्यते, विप्रसृतावयवः क्रियाकलापः प्रयोक्तुः संकलनाबुद्ध्युपारूढः प्रतिपत्तृबुद्धौ संक्रान्तस्तस्या एकत्वाद्वर्त्तमानत्वाच्च तदभेदेनैको वर्त्तमानश्च व्यपदिश्यतइति । उक्तं च ।

क्रियाप्रबन्धरूपं यत् बुद्ध्यात्मा विनिगृह्यते ।

संक्रान्तबिम्बमेकत्व तामाहुर्वर्तमानताम् । इति ॥

अयमर्थः । प्रयोक्तुः संकलनाद्बुद्ध्यात्मा क्रियाप्रबन्धरूपं वस्तु एकत्र प्रतिपत्तृज्ञाने संक्रान्तबिम्बं संक्रान्तस्वरूपं यद्विनिगृह्यते ऽवधार्यते तस्मात्तस्य ज्ञानस्य वर्त्तमानतामेव तदभेदात् क्रियाया वर्त्तमानतामाहुरिति । ननु यथोपलब्धिः स्मरणमुपलब्धिश्च क्रमेणेति प्रयोक्तुः कथं संकलनात्मिकैका बुद्धिर्यदुपारोहेणासौ प्रतिपत्तुः क्रियाकलापं शब्देन युगपदवगमयेत्, ततश्चैकबुद्ध्युपारोहाभावात्कथमेकत्ववर्त्तमानत्वे स्याताम्, नैष दोषः । अनुभववासनायाः प्रत्यासन्नत्वात्क्रमेणानुभवतामपि संकलनायोगात् । अनुभवपूर्वत्वं हि स्मरणस्य नियतं न तु क्रमिकत्वमपि, अन्यथा समुच्चयशतादिप्रत्ययाभावप्रसङ्गात् । नन्वेवमस्त्वस्यैव बौद्धस्य * वर्त्तमानत्वं कथं बाह्यस्येति चेत् । दृश्यविकल्पयोरभेदाध्यवसायात् । अन्ये तु काल एव क्रियाया उत्पन्नप्रध्वस्तत्वेन साधनसंपत्त्या संभाव्यमानोदयत्वेन प्रारब्धापरिसमाप्तत्वेन चोपहितः सन् क्रमेण भूतादिभेदं प्रतिपद्यते, तत्कालयोगात्क्रियाया अपि तत्तद्व्यपदेश इति । उक्तं च ।

क्रियोपाधिश्च सन् भूतभविष्यद्वर्त्तमानता ।
एकादशभिराकारैर्विभक्ता प्रतिपद्यते ॥ इति ।

काल इति शेषः । एकादशत्वमप्युक्तम् ।

भूतः पञ्चविधस्तत्र भविष्यञ्च चतुर्विधः ।
वर्त्तमानो द्विधा ख्यात इत्येकादशकल्पना ॥ इति ।

तत्र तावदद्यतनानद्यतनव्यामिश्रसामान्यरूपाश्चत्वारो मुख्यभूतभेदाः । सामान्यमपि विशेषेभ्यो व्यावृत्तेर्भेदः । उक्तं च । 'अनेकमन्यपदार्थ' इत्यत्र सामान्यमपि यथा विशेषस्तद्वदिति । परोक्षस्त्वनद्यतनभूतभेदो न तु भूतभेद इति न पृथग्गण्यते । 'आशंसायां भूतवच्चे'त्यतिदिष्टभूतकार्यो भविष्यत्यैको गौणो भूत इति भूतः पञ्चविधः । भविष्यत्तु गौणाभावादद्यतनादिभेदेन चतुर्विधः । 'वर्तमानसमीप'इत्यतिदिष्टवर्त्त-

* अस्त्वेवं बौद्धस्येति पा० ।

मानकार्यौ भूतभविष्यन्तो, गौणौ. तदेवमेकादशभेदाः कालस्य, यद्यप्यन्ये ऽप्यौपाधिका भेदाः सन्ति तथापि शास्त्रप्रक्रियायामियन्त एवोपयुज्यन्तइत्येवमुक्तं गतमदः । लटोकारटकारयो'रुपदेशेजनुनासिक इत्' 'हलन्त्यमि'तीत्संज्ञा । उपदेशो धातुसूत्रप्रातिपदिकप्रत्ययागमादेशलक्षणः । प्रतिज्ञानुनासिक्याःपाणिनीयाः । 'तस्यलोप' इति लोपः ॥ 'अदर्शनं लोपः' ॥ अदर्शनं चेह प्रसक्तस्य शब्दस्य लोपः प्रयोजनं लडित्यनुवादष्टिद्व्यपदेशश्चैषामन्येषामप्यनुबन्धानाम् । ननु 'शषसर्' 'हल्' इत्यत्र लकारस्येत्त्वे तेना'दिरन्त्येन सहेते'ति प्रत्याहारः, सति च तस्मिन् 'लणि'त्यत्र लकारस्य हल्त्वात्तस्यैव'शषसर्' 'हल्'इत्यत्रान्ते निर्देशादित्संज्ञा तदाश्रयश्च हलिति प्रत्याहार इतीतरेतराश्रयत्वादयमेव तावत् प्रत्याहारो ऽनुपपन्नस्ततः सर्वेषामेव णकारादीनामित्त्वं न स्यादिति सर्वप्रत्याहारव्यवहारो ऽनुपपन्न इति कथमत्राच्त्वेन हल्त्वेन चाकारटकारयोरित्त्वे, एवं चादिरन्त्येनेति ग्राहकसूत्रमपि व्यर्थं स्यादिति चेत् । नैष दोषः । हलितिसूत्रे * हकारात्पर लकारः, लपरत्वं तु तस्यैकादेशलक्षणकृतम् । तेन तस्याऽच्त्वादित्त्वं भविष्यति स एव च 'हलन्त्य'मित्यत्राप्येकादेशेन लपरेण निर्दिष्ट इति । एवमपीतरेतराश्रयमेव लकारस्य सत्यामित्संज्ञायां हलितिप्रत्याहारः, सत्यस्मिंश्चैओजिति चकारस्येत्त्वं, तस्मिंश्च सत्यजितिप्रत्याहारः, अस्मिंश्च प्रत्याहारे सति लकारस्येत्संज्ञया भाव्यमिति । एवं तर्हि हल् ल् चेति समाहारद्वन्द्वेन द्वितीयस्यापि लकारस्य निर्देशात् प्रत्याहारमन्तरेण तस्येत्संज्ञासिद्धिः अश्रवणन्तु संयोगान्तलोपेन । अथ वा श्वेतो धावतीत्यादाविव द्वितीयमप्यत्र हल्ग्रहणं तन्त्रेणोपादीयते तत्रैकेन हस्य लिति हकारसमीपस्य लकारस्य विनैव प्रत्याहारादित्संज्ञा भविष्यति । यद्वा हस्य ल् हलिति तत्पुरुषस्य प्रत्याहारस्य च हल्शब्दस्यैकशेषे ऽर्थद्वयं लप्स्यतइति न संकटं किं चित् । तत्पुरुषः पुल्लिङ्गः प्रत्याहारस्तूभयलिङ्गोप्यन्त्यमित्यनेन साहचर्य्यादिह नपुंसकलिङ्ग इति नपुंसकमनपुंसकेनेति तस्यैकशेष एकत्वं च ॥ लः कर्मणि च भावे चाकर्मकेभ्यः ॥ उत्सष्टानु-

* हलिति सूत्रं लकारान्तम् । इति पाठान्तरम् ।

बन्धश्चायं लकारः, लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कर्त्तरि च भवन्ति अकर्मकेभ्यस्तु भावे कर्त्तरि चेति यथायोगं कर्त्रादौ भवन्ति । स्वतन्त्रः कर्त्ता । क्रियाप्रसिद्धौ यत्कारकं प्रधानभूतं विवक्षितं तत् कर्तृसंज्ञं भवति । ननु च सामग्रीसाध्यायां क्रियायां स्वस्वव्यापारे सर्वेषां स्वातन्त्र्यात् कथमेकस्य तत् । उच्यते । करणादिप्रवृत्तेः प्रागेव परस्मादर्थितादेरेव निमित्तात्कर्तुः प्रवृत्तिः करणादि तु तदधीनप्रवृत्तिनिवृत्ति । तथा हि । अर्थी हि कर्त्ता तत्प्रयुङ्क्ते न तदेनम् । किं च तस्य प्रतिनिधिर्दृश्यते । व्रीह्यपचारे नीवारैरिज्यते, कर्तुः स नास्ति तद्भेदे क्रियान्तरमेवेति प्रसिद्धिः । किं च कारकान्तरानुपादानेप्यसौ दृश्यते भवत्यादिषु तस्माद्युक्तं स्वातन्त्र्यम् । तथा चोक्तम् ।

प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात् ॥
अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वात्स्वातन्त्र्यं कर्तुरुच्यते । इति ॥

प्रागन्यतः शक्तिलाभादीनां शब्देन प्रतीतिमात्रस्य विवक्षणादचेतनेष्वपि तदनपायात् कर्तृतोपपत्तिः । उक्तं च ।

सर्वैरभ्युदितैः शब्दैर्नियमो न तु वस्तुनि ।
कर्तृधर्मविवक्षायां शब्दात् कर्त्ता प्रतीयते । इति ॥

वृत्तौ तु स्वातन्त्र्येणागुणभावो विवक्ष्यत इति तस्य च सार्वत्रिकत्वात्सर्वत्र कर्तृतोपपत्तिः ।

कर्त्ता च त्रिविधो ज्ञेयः कारकाणां प्रवर्त्तकः ।
केवलो, हेतुकर्त्ता च कर्मकर्त्ता तथापरः ॥ इति ।

कर्तुरीप्सिततमं कर्म ॥ कर्त्रा क्रियया यदाप्तुमिष्टतमं तत्कर्म ॥ तथा युक्तं चानीप्सितम् ॥ येनैव प्रकारेणेप्सिततमं क्रियया युज्यते तेनैव प्रकारेण तथा युज्यमानमनीप्सितमपि कर्म ॥ अकथितं च ॥ अपादानादिवि-

शेषकथारहितं दुह्यादिकारकं गवादि च कर्म ॥ दिवः कर्म च ॥ दिवः साधकतमं करणं तत्कर्मेत्यादि चतुर्विधं कर्मेप्सिततमानीप्सिततमाकथितसंज्ञान्तरपूर्वभेदेन । तत्राद्यं त्रिधा, निर्वर्त्यं विकार्यं प्राप्यमिति । द्वितीयमपि द्वेधा द्वेष्यमितरदिति ॥ तदुक्तम् ।

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम् ॥
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥ इति ।

तत्र निर्वर्त्यं यस्योपादानकारणं नास्ति सदपि वा तत्परिणामित्वेन नाश्रीयते, यथा संयोगं करोति, पटं करोति, मृदा घटं करोतीति । विकार्यमपि द्वेधा । प्रकृत्युच्छेदसंभूतमेकं, प्रकृत्यनुवृत्तौ गुणान्तरोत्पत्त्योपलक्षितमपरम्, यथा काष्ठानि भस्म करोति, हिरण्यं कुण्डलं करोतीति । व्रीहीन्प्रोक्षतीत्यादौ प्रोक्षणादिजन्यादृष्टरूपेण विक्रियमाणा व्रीह्यादयोऽपि विकार्यं कर्म । प्राप्यं पुनरेकमेव, यत्र क्रियाकृतो विशेषो न गम्यते यथा वेदमधीत इत्यादौ वेदादि । तथा चोक्तम् ।

सती या ऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥
तन्निर्वर्त्यं विकार्यं तु द्विधा कर्म व्यवस्थितम् ।
प्रकृत्युच्छेदसंभूतं किं चित् काष्ठादिभस्मवत् ॥
किं चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ॥
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥ इति ।

भावस्तु केवलो धात्वर्थः ॥ लस्य ॥ तिप्तस् झि सिप् थस थ मिब्वस्मस्तातांझ थासाथांध्वमिड्वहि महिङ् ॥ तिबादयो ऽष्टादश षष्ठी स्थानेयोगेति लस्य स्थाने स्युः ॥ स्थानं प्रसङ्गो योगः संबन्धः ॥ इह शास्त्रेऽनियतसंबन्धविशेषा

षष्ठी स्थानेयोगेत्यर्थः। तत्र तिबादिष्वविशेषेण प्राप्तेषु शेषात्कर्त्तरि परस्मैपदमिति आत्मनेपदविषयादन्यत्वेन शेषादन्यस्मात्परस्मैपदमेव तच्च कर्त्तर्येव ॥ आत्मनेपदविषयश्च स येषामनुदात्तङित इत्यादिनात्मनेपदं विहितम् । लः परस्मैपदम् ॥ तङानावात्मनेपदम् ॥ तङिति तिबादिसूत्रेणोपात्तास्तादयो नव प्रत्याहारेणोच्यन्ते । आनइति शानच्कानचौ, अत्र यद्यपि लः परस्मैपदमिति लादेशानां सामान्येन परस्मैपदसंज्ञोच्यते तथाप्याकडारादेका संज्ञेत्यतः परेषां कडाराः कर्मधारयइत्यतः प्राचामेकस्यैकैव संज्ञेति नियमात् तङानयोरात्मनेपदसंज्ञया ऽनवकाशया बाधिता सा तद्व्यतिरिक्तविषया ऽवतिष्ठते ॥ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ युष्मदि समानाधिकरणे व्यवहिते वाव्यवहिते वा प्रयुज्यमाने स्थानिन्यप्रयुज्यमाने वा लान्तार्थस्य युष्मदर्थविशेष्यत्वे एव मध्यमः ॥ अस्मद्युत्तमः ॥ पूर्ववद्व्याख्या । शेषे प्रथमः ॥ यत्र युष्मदस्मदी समानाधिकरणे न स शेषस्तत्रैव प्रथमः ॥ तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः ॥ तिङः परस्मैपदान्यात्मनेपदानि च प्रत्येकं त्रीणित्रीणि पदानि भूत्वा यथासंख्यं प्रथमादिसंज्ञानि ॥ यथासंख्यमनुदेशः समानाम् ॥ संख्या क्रमः, अनुदेशःपश्चादुच्चार्यमाणो विधीयमानः, अनुदेशशब्दस्य संबन्धिशब्दत्वादाक्षिप्ता उद्देशिनः,तेषामनुदेशिनां च संख्यातः पाठतश्च समानानां यो यः क्रमस्तेन तेन क्रमेण संबन्ध इत्यर्थः। तत्राप्येवं व्यवस्था । बहुषु बहुवचनम् ॥ द्व्येकयोर्द्विवचनैकवचने ॥ बहुत्वादिषु यथासंख्यं बहुवचनादीनि ॥ तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ तानि लब्धप्रथमादिव्यपदेशानि त्रीणित्रीणि प्रत्येकं यथासंख्यमेकवचनादिसंज्ञानि । एवं तिबादिषु ॥ कर्त्तरि शप् ॥ कर्तृवाचिनि सार्वधातुके धातोः शप् स्यात् ॥ तिङ्शित्सार्वधातुकम् ॥ प्रत्यय इति शेषः। शकारस्य ॥ लशक्वतद्धिते ॥ लशकवर्गास्तद्धितवर्जप्रत्ययाद्या इत इतीत्वाल्लोपः ॥ सार्वधातुकार्द्धधातुकयोः ॥ अनयोरिगन्ताङ्गस्याने गुणः ॥ आर्द्धधातुकं शेषः ॥ तिङ्शिद्भ्यान्यो धातुसंशब्दनेन विहितः प्रत्यय आर्द्धधातुकम् ॥ अदेङ् गुणः ॥ अदेङौ मात्रिकद्विमात्रिकौ तद्भाविनावतद्भाविनौ च तौ च गुणौ ॥ अणुदित्सवर्णस्य चाप्रत्ययः ॥ अण् उदिच्च गृह्यमाणः सवर्णग्राहको भवति विधीयमानमणं वर्जयित्वा

उदिच्छब्देन क्वादयः पञ्चोच्यन्ते ॥ तुल्यास्यप्रयत्नं सवर्णम् ॥ आस्यं तात्वादि, तत्स्थः प्रयत्नो यस्य वर्णस्य येन तुल्यः स तं प्रति सवर्णः । अकुहविसर्जनीयानां कण्ठः ॥ स्पृष्टं * करणं स्पर्शानामिति स्थानप्रयत्नसाम्यम् । कादयो मावसानाः स्पर्शाः ॥ तपरस्तत्कालस्य ॥ तः परो यस्मात्स च तात्परश्च तपरः, स उदात्तादिभिन्नं सवर्णमात्मना तुल्यकालं स्वं च ग्राहयतीति भिन्नकालाग्रहः। गुणविधौ चेको गुणवृद्धी इत्यनेन गुणवृद्ध्योः स्वसंज्ञया विधाने इक इत्युपस्थाप्यते। अङ्गस्येति चाधिकृतम् ॥ यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥ यस्मात्प्रत्ययविधिस्तदादि तच्च तस्मिन्नेव प्रत्ययेऽङ्गं तत्रानयोः सामानाधिकरण्येनान्वयस्य न्याय्यत्वादिकोऽङ्गस्य विशेषणता । येन विधिस्तदन्तस्य ॥ यद्विशेषणमुपादाय किं चिद्विधीयते तदात्मान्तस्य स्वस्य च ग्राहकमिति तदन्तत्वलाभः ॥ अलोन्त्यस्य ॥ आदेशः षष्ठीनिर्दिष्टस्यान्त्यस्य भवति । अन्त्यस्यैवेति स्थानषष्ठी स्थानित्वं प्रतिपादयतीत्यन्त्यस्य स्थानित्वादिगन्ताङ्गान्त्यस्येत्युक्तार्थलाभः । स चेह गुणः । स्थानेऽन्तरतमः ॥ अनेकादेशप्रसङ्गे सदृशतमः स्यात् स सदृशः गुणादिसदृशात् स्थानसदृश इति नियमादुकारस्योपध्मानीयानामोष्ठादित्योष्ठस्यौदेतोः कण्ठोष्ठमिति ओष्ठ ओकारः । तस्येचोऽयवायाव इति यथासंख्येनावादेशे सिद्धं भवतीति ॥ अस्य च सुप्तिङन्तं पदमिति पदत्वे युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावाविति पदात्परयोरपादादौ वर्तमानयोः समानवाक्यस्थयोः श्रूयमाणषष्ठ्यादिद्विवचनान्तयोरनयोर्यथासंख्यं वान्नावादेशौ भवतः । बहुवचनस्य वस्नसौ ॥ तेमयावेकवचनस्य ॥ इमावादेशौ न द्वितीयैकवचनान्तयोः,त्वामौ द्वितीयाया इति त्वामौविधानात्। एषामपि पूर्ववद्व्याख्या भवति वाम् भवति नौ, भवति वः, भवति नः, भवति ते, भवति मे, भवति त्वा,भवति मा, यथायोगं स्वं,देयं,प्राप्तमिति शेषः । एते चानेकाल्त्वादनेकाल्शित्सर्वस्येति सर्वादेशाः । एषां च स्थानिवदादेशोनल्विधाविति स्थान्यलाश्रयकार्यं वर्जयित्वा स्थानिकार्यविधानात् पदत्वे तन्निबन्धनानि रुत्वादीनि यथायोगं ज्ञेयानि । भवतः । अत्र तसः सकारस्य प्रयोजनाभावादित्त्वाभावः ॥ न च लोप एव प्रयोजनम्, एवं हि

* प्रयत्नमिति पाठान्तरम् ।

नोपदिश्येत सति चेति पदत्वं यकाराजाद्यसर्वनामस्थानविषयमिति न प्रयोजनम् । यद्वा विभक्तिश्चेति सुपः तिङश्चैकवचनादिसंज्ञाः सान्ता विभक्तय इति न विभक्तौ तुस्मा इतीत्वाभावेन । ससजुषो रुः ॥ सान्तस्य पदस्य सजुषश्च रुरिति रुत्वे खरवसानयोर्विसर्जनीय इति विसर्जनीयः ॥ विरामो ऽवसानम् ॥ विरतिर्विरामः वर्णस्याभावो ऽनुच्चारणं,तत्र वर्णेष्वप्युच्चरित-प्रध्वंसिषु बुद्धिकृतं पौर्वापर्यमित्यभावरूपेवसानेपि तत्संभवात् परसप्तमी-त्वोपपत्तिर्भवति । भवन्ति । झोन्तः ॥ प्रत्ययादेरिति शेषः अन्त्योकार उच्चार-णार्थः । न तु तकारस्यानन्त्यत्वेनेत्वनिवृत्तये । तस्य प्रयोजनाभावादेव सिद्धेः । न च तिन्स्वरितमिति स्वरितत्वं प्रयोजनं,तितः प्रत्ययस्येति तत्र स्थितेः । न च स्थानिवत्त्वात्प्रत्ययः । तदेकदेशत्वादस्य । अत्र अवन्त्यकारयोरतो गुणइत्यपदान्ताकाराद्गुणे परे तयोः पूर्वपरयोः पररूप-मेकादेशइत्येकादेशं वर्णमात्राश्रयत्वेनान्तरङ्गं प्रकृतिप्रत्ययापेक्षत्वाद्बहिर-ङ्गोपि गुणो वार्णादाङ्गं बलीय इति बाधते, अस्ति च समानाश्रयत्व-मनयोरुभयोर्विकरणापेक्षत्वात् पूर्वं त्वेकादेशेऽन्तादिवच्चेत्येकादेश आश्रीय-माणे पूर्वं प्रत्यन्तवत्परं प्रत्यादिवदिति सार्वधातुकमपिदित्यत्राश्रीयमा-णस्य पितो ऽस्य सार्वधातुकस्यैकादेशस्यादिवद्भावाच्छपोपित्सार्वधातुक-ग्रहणात् ङित्त्वात् क्ङिति चेति क्ङिन्निमित्तयोरिग्लक्षणयोर्गुणवृद्ध्योर्निषेधात् गुणो न स्यात् । भवतु वा पूर्वमेकादेशस्तदाप्यदोषः । अचः परस्मिन् पूर्वविधाविति परनिमित्तोजादेशोऽचः पूर्वसंबन्धिनि कार्यमात्रे कर्तव्ये स्थानिना तुल्यः स्यादिति स्थानिवद्भावा व्यवधानेन निषेधस्याप्रसङ्गात् । किं च । तत्रापिदित्यस्य प्रसज्यप्रतिषेधत्वेन सिद्धान्तितत्वात् पित्सार्व-धातुकं ङिद्वेत्याश्रीयमाणं पित्तं प्रत्येकादेशस्यान्तवत्त्वात् ङित्त्वस्याप्रसङ्गात्, अस्तु गुणैकादेशयोः प्रवृत्तौ कामचारः । भवसि । भवथः । भवथ । भवामि । भवावः । भवामः । 'अतो दीर्घो यञी'ति यञादौ सार्व-धातुके ऽकारान्ताङ्गान्त्यस्य दीर्घः स च स्थानितुल्य इति तादृश आकारः । यस्मिन्विधिस्तदादावल्ग्रहणइति यञादीति लाभः । ऊकालोज्झ्रस्व-दीर्घप्लुत इत्यचो मात्रिकद्विमात्रिकत्रिमात्राः क्रमेण ह्रस्वादिसंज्ञाः ॥

Digitized by Google

परोक्षे लिट् ॥ भूतानद्यतनपरोक्षतोपाधिकार्थवृत्तेर्धातोर्लिट् । धातुवाच्यायाः क्रियाया इन्द्रियेणासंनिकर्षात्परोक्षत्वे सिद्धे परोक्षग्रहणं साधनपरोक्षतार्थम् ॥ पूर्ववत्तिबादयः । ते च लिट् चेति लिडादेशत्वादार्धधातुकाः । अत्र च लङः शाकटायनस्यैवेत्यत एवकारानुवृत्त्या न सार्वधातुका इति विकरणाभावः । एषां च लिडादेशानां नवानां तिबादीनां 'परस्मैपदानां णलतुसुस्थलथुसणल्वमा' इति यथासंख्यं णलादयः स्युः । ते च स्थानिवत्त्वेनार्धधातुकाः प्रत्ययाश्च । णलो णकारस्य प्रत्ययादित्वाच्च इत्संज्ञायां लोपः, प्रयोजनं वृद्ध्यादि, नन्वत्र णकारो लुप्यत इत्यनेकाल्त्वाभावादनेकाल्शित्सर्वस्येति सर्वादेशत्वं न स्यात् । नैतत् । आदेशोत्तरकालं प्रत्ययत्वतदादित्वेन णकारस्येत्त्वे लोप इत्यादेशदशायामनेकाल्त्वात्, एवं भू अ इति स्थिते अचो ञ्णितीति ञित्णित्प्रत्ययपरस्याजन्तस्याङ्गस्य वृद्धिः प्राप्नोति । वृद्धिरित्यादैचां तद्भावितानामतद्भावितानां वृद्धिरादैजितिसंज्ञा, तपरकरणादैचौ द्विमात्रिकौ गृह्येते । तादपि परस्तपर इति ॥ 'भुवो वुग्लुङ्लिटो'रित्यजादौ लुङि लिटि च विधीयमानो वुक् कृताकृतप्रसङ्गित्वेन नित्यो वृद्धिं बाधते ॥ अत्र वृद्धौ कृतायामौकारान्तस्य प्राप्नोत्यन्यत्र ऊकारान्तस्येति शब्दान्तरप्राप्त्या वुगनित्य इति चेत्, न । एकदेशविकृतस्यानन्यत्वाच्च शब्दान्तरप्राप्तिरिति ॥ आद्यन्तौ टकितौ ॥ यथासंख्यं षष्ठीनिर्दिष्टस्येति वुगयं भुवोन्त्यः । लिटि धातोरनभ्यासस्य ॥ धातोरवयवस्य प्रथमस्यैकाचो द्विर्वचनमजादेस्तु द्वितीयस्येति भुव आदिर्द्विरुच्यते । पूर्वोभ्यासः ॥ अत्र प्रकरणे द्विरुक्तस्येति शेषः ॥ हलादिः शेषः ॥ अभ्यासस्यादिर्हल् शिष्यते अनादिस्तु निवर्त्तत इत्यर्थः ॥ ह्रस्व इति अभ्यासस्याचो ह्रस्वः । भवतेर इति लिटि परेऽभ्यासान्तस्याकारादेशः । अभ्यासे चर्चेति अभ्यासझलचरो जशश्च । तत्र वर्गाणां प्रथमद्वितीयाः शषसा विसर्जनीयजिह्वामूलीयोपध्मानीया अघोषा विवृतकण्ठाः श्वासानुप्रदानाः । तृतीयचतुर्थपञ्चमहकारा घोषवन्तः संवृतकण्ठा नादानुप्रदाना इत्येवमस्य घोषवतः संवृतकण्ठस्य नादानुप्रदानस्य भकारस्य तादृशो बकारः । बभूव । नन्वपि इनुधातुभुवां य्वोरियङुवङा-

'क्वित्यजादौ प्रत्यये श्नुभ्रुवोरन्त्यस्य धात्वन्तयोरिवर्णोवर्णयोरियङुवङाविधानात् । अत्रोवङि कर्तव्ये 'ऽसिद्धवदत्राभात्' समानाश्रयमाभीयशास्त्रमाभीयेसिद्धमिति वुकोसिद्धत्वादुवङ् स्यात् । अस्तु पुनर्वुग् भविष्यति । ततश्च 'उपधायां च' । धातोरुपधाभूतौ हल्परौ यौ रेफवकारौ ताभ्यां पूर्वस्येकोदीर्घः स्यादिति दीर्घत्वं 'लोपोव्योर्वली'ति पूर्वयकारवकारयोर्वलि परे लोप इति पूर्वस्य वकारस्य लोपे सेत्स्यति, बभूवेति न सिद्ध्यति । 'पूर्वत्रासिद्धम्' । अस्माद्योगात् परे पूर्वत्रासिद्धाः परे च मिथः पूर्वत्र पूर्वत्रासिद्धा इत्युपधायां चेत्यस्य वलि लोपं प्रत्यसिद्धत्वात्पूर्वलोपे हल्पर उपधावकारो नेति दीर्घाप्रसङ्गात् । अथ वा दीर्घवलोपयोरन्तरङ्गयोः कर्तव्ययोरसिद्धं बहिरङ्गमन्तरङ्ग इति बहिरङ्गस्य वुको सिद्धत्वाचैव दीर्घत्वं स्यात् नापि वलोपः एवं तर्हि वुग्युटावुवङ्यणोः सिद्धौ वक्तव्याविति वुकः सिद्धत्वादुवङ् न भविष्यति । श्नसोरल्लोप इतितपरकरणाल्लिङ्गादाभीयस्याऽसिद्धत्वस्याऽनित्यत्वाद्वात्र वुकः सिद्धत्वं भवति । बभूवतुः । बभूवुः । बभूविथ । आर्द्धधातुकस्येड्वलादेरितीट्, टित्वात्तदादिः । बभूविथेत्यत्र वृद्धिवद्गुणो वुका बाध्यते । बभूवथुः ॥ स्थानिवत्त्वेन विभक्तित्वाच सकारस्येत्वम् । यूयं बभूव । नन्वत्राकारो ऽलोन्त्यस्येति थशब्दाकारस्यादेशः प्राप्नोति फलं च यथासंख्यं स्यात् । मैवम् । अत्र धातोरित्यनुवर्तते । तस्मात्परस्य विधीयमानोऽकार आदेः परस्येति थकारस्य । ततो द्वयोरकारयोः पररूपम् । अहं बभूव । बभूविव । बभूविम । उत्तमविषये चित्तव्याक्षेपात् परोक्षतासंभवः । अत्र 'संयोगाल्लिट् कित्' ॥ असंयोगान्ताद्धातोः परोऽपिल्लिट् किदिति वमयोःकित्वे ग्क्ङ्कः क्ङितीति श्निअउगन्ताच्च धातोः परस्य क्ङितो नेडिति प्राप्तस्य निषेधस्य कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ क्रादय एव लिट्यनिटः ततोन्ये लिटि सेट इति नियमात्सेट्त्वम् । अत्र के चिदेवमाहुः । वुग्विधावोरित्यनुवृत्तेर्वृद्धिगुणयोः कृतयोरुवर्णान्तत्वाभावात्तल्लक्षणस्य वुकोप्राप्तेस्तस्याप्यनित्यत्वात्परत्वात्प्राप्तयोर्गुणवृद्ध्यो 'रिन्धिभवतिभ्यां च' ताभ्यां परो लिट् किदिति कित्वेन बाधस्ततो वुक् । अत्र ङिद्ग्रहणानुवर्तेर्ङित्वमप्यतिदिश्यते इत्युभयातिदेशसामर्थ्यादनिमित्तणाया अपि वृद्धे-

निषेधः । तेन यङ्लुकि भवतीति निर्देशात्कित्त्वाभावात् वृद्धिगुणयोः कृतयोरनुवर्णान्तत्वाद्वुगभावाद्बोभाव । बोभविथ । बोभवेति सिद्धमिति । सर्वमेतद्वार्त्तिकविरुद्धं यदाह 'इन्धेश्छन्दोविषयत्वात् भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति । अनद्यतने लुट् ॥ अहरुभयतोऽर्द्धरात्रमद्यतनः कालः, अविद्यमानानद्यतनभविष्यत्युपाधिकार्थाद्धातोर्लुट् स्यात्, लस्य तिबादिषु 'स्यतासी ललुटोः' ॥ ल इति लृङ्लृटोरुत्सृष्टानुबन्धयोः सामान्येन ग्रहणम्, ललुटोरादेशेषु परेषु धातोर्यथासंख्यं स्यतासी स्याताम् । अत्र के चित्तासेरिकारमुच्चारणार्थमाहुः । परमते त्वनुनासिकं सलोपप्रतिषेधार्थम् । इह तु प्रयोजनाभावान्न प्रपञ्च्यते । लुटः प्रथमस्य डारौरसः ॥ लुडादेशस्यात्मनेपदप्रथमस्य परस्मैपदप्रथमस्य च यथासंख्यं डारौरसः स्युः, 'टे'रिति भस्याङ्गस्य टेर्हिति विधीयमानो लोपोऽत्राभत्वेपि डित्त्वसामर्थ्याद्भवति । अचोन्त्यादि टि ॥ एकत्र सन्निविष्टानामचामन्त्याजादिष्टिः ॥ इडगुणावादेशाः । भविता । अत्रेटः । पुगन्तलघूपधस्य च ॥ पुगन्तस्याङ्गस्य लघूपधस्य चेको गुण इति प्राप्तो गुणो 'दीधीवेवीटा'मिति निषिध्यते । ह्रस्वं लघु ॥ अलोन्त्यात्पूर्व उपधा ॥ धात्वादौ वर्णसमुदायेऽन्त्यादलः पूर्व उपधा । भवितारौ । भवितारः । 'रि चे'ति रेफादौ प्रत्यये तासस्त्योः सकारस्य लोपः । भवितासि । तासस्त्योर्लोपः ॥ सकारस्य सकारादौ प्रत्ययइति शेषः । अत्र 'नाज्झला'वित्यऽलोर्मिथः सावर्ण्यनिषेधे ऽपवादे प्रवृत्ते पश्चात्तद्विषयपरिहारेण सवर्णसंज्ञाप्रवृत्तौ तदुपजीव्यप्रवर्त्तमानस्य ग्रहणकशास्त्रस्य नाज्झलावित्यत्रानिष्पन्नत्वादज्ग्रहणेन पठितानामेवाचां ग्रहणादन्येषां हल्भिः सवर्णसंज्ञाया अनिषेधादाकारस्य सवर्णेन हकारेण ग्रहणादिण्त्वा'दादेशप्रत्यययो'रितीणकोश्च परस्यादेशरूपस्य प्रत्ययावयवस्य च सकारस्य विधीयमानं षत्वं कस्मान्नेति चेत् न हकारो विवृतः । आकारो विवृततरः, एवं हि पठन्ति । ए ओ विवृततरौ ताभ्यामप्याकार इति ॥ वयस्यासु मूर्ध्न इत्यादिनिर्देशात् । यद्वा विवृतमूष्मणां स्वराणां चेत्यत्र ईषत्स्पृष्टमन्तस्थानामित्यतः ईषदित्यनुवर्त्तते तच्च पृथग्विभक्तिनिर्दिष्टैः प्राथमिकैरूष्मभिरेव संबध्यते न स्वरैरिति नैव सावर्ण्यप्रसङ्गः । अत एव भाष्यवार्त्ति-

Digitized by Google

क्रयोः सूत्रं प्रत्याख्यातम् । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ॥ लृट् शेषे च ॥ क्रियार्थक्रियोपपदादन्यो भविष्यत्कालः शेषस्तत्र शेषे चात्क्रियार्थक्रियोपपदे भविष्यति च धातोर्लृट् स्यात् ॥ चतुर्विधो भविष्यदित्युक्तं. तत्रानद्यतने लुड्विधानादन्यत्रायं विधिः । अनद्यतनइति बहुव्रीहिनिर्देशाद्व्यामिश्रेप्ययमेव ॥ लस्य तिबादिषु स्यतासी इति स्यः । इडागमः । भविष्यति । भविष्यसि । भविष्यामि । क्रियायां क्रियार्थायामुपपदे । धनी भविष्यामीति राजानं सेवते । आदेशप्रत्यययोरिति सर्वत्र षः । लोट् च ॥ विध्यादिष्वर्थेषु धातोर्लोट् स्यात् । ते च वक्ष्यन्ते । लस्य तिबादिषु एरुरिति लोडादेशेकारस्योकारः । भवतु, भवताम् । अत्र लोटो लङ्वदिति लङ्वत्कार्यातिदेशात् 'तस्थस्थमिपां तान्तन्तामः' इतिलङस्तसादीनां विधीयमानास्तामादय आदेशा लोट्यपि भवन्तीति तसस्ताम् । भवन्तु । भव । सेर्ह्यपिच्चेति लोटः सेर्हिरादेशः । अपिदिति वचनात् स्थानिवत्त्वेन पिच्च भवति । अस्य प्रयोजनं तत्रतत्र दर्शयिष्यते । अतो हेरित्यकारान्तात् परस्येन लुक् । प्रत्ययस्य लुक्श्लुलुप इति प्रत्ययादर्शनस्यैताः संज्ञाः अनेकसंज्ञाविधानेन तद्भावितग्रहणविज्ञानात् तत्तच्छब्दभावितस्य प्रत्ययादर्शनस्य सा संज्ञेति संज्ञानामसङ्करो भवति । विधिप्रदेशेषु भाविसंज्ञाविज्ञानाचेतरेतराश्रयत्वम् । यथास्य सूत्रस्य शाटकं वयेति । अत्र यदि शाटको न वातव्यः, अथ वातव्यो न शाटक इति विप्रतिषेधात् स वातव्यो यस्योतस्य शाटक इति व्यपदेशो भवतीत्यर्थः । भवतम् । भवत । लङ्वद्भावात्तंतौ । तांतमोर्मकारस्य न विभक्तौ तुस्मा इतीत्वनिषेधः । भवानि । मेर्निरिति लोडादेशस्य मेर्निरादेशः अयं चापवादत्वाल्लङ्वद्भावप्राप्तमादेशं बाधते मेर्नुरित्यवचनादेत्वं भवति । भवाव । भवाम । लङ्वद्भावान्नित्यं ङित इति ङित्त्वाल्लादेशोत्तमसकारस्य विधीयमानो लोपोत्रापि भवति । आडुत्तमस्य पिच्चेति लोडादेशोत्तमस्याडागमः टित्त्वादादिः ॥ तस्य सवर्णदीर्घः । पिच्चेत्युत्तमस्य पित्त्वातिदेशप्रयोजनं तत्रतत्र भविष्यति । आडागममन्तरेणातो दीर्घो यञीति दीर्घत्वापि रूपे सिद्धे तत्प्रवृत्तिः पर्जन्यवल्लक्षणप्रवृत्त्या । ननु तामादयो ङित्त्वा-

देशामामुच्यन्ते न त्वाहत्य लङादेशानामिति कथं ते लङ्वद्भावेन प्राप्यन्ते । उच्यते । विशेषातिदेशे सामान्यस्याप्यतिदेशात् । तथा हि वसिष्ठवदय-मित्युक्ते वसिष्ठत्वप्रयुक्तं ब्राह्मणत्वप्रयुक्तमप्यतिदिश्यते । कथं तर्हि लुङ्ल-ङ्लृङ्क्ष्वडुदात्त इत्याहत्य विधीयमानोऽडागमो न भवति । अत्र वृत्तिकारः परिहारमाह । विदो लटो वेति वाग्रहणमनुवर्त्तते सा च व्यवस्थितवि-भाषा भविष्यतीति । अत एव तामादयः सलोपश्चेति तेन परिगणितं यद्वा लोट इत्युपमेये षष्ठीदर्शनादुपमानं षष्ठ्यन्तं विज्ञायते, लङ इव कार्यं तल्लोटो भविष्यतीति न तु लङि यत्कार्यं तल्लोटीति अडाटौ न भवतः । यदायं लोडाशिषि लिङ्लोटावित्याशिषि विधीयते । आशीरिष्टस्य प्राप्तिस्तदा ‘तुह्योस्तातङाशिष्यन्यतरस्या’मिति तुह्योर्वा तातङादेशः भवतात्सः । भवतात्त्वं, ननु तातङयमनेकाल्शित्सर्वस्येत्यस्यापवादेन ङिच्चेत्यनेनान्त्यस्य कस्मान्न भवति । उच्यते । किमिदं ङित्त्वं सू-तादित्यादौ गुणवृद्धिप्रतिषेधार्थमुतान्त्यादेशार्थमिति संदिग्धप्रयोजनम्, न चान्त्यादेशार्थत्वे गुणवृद्धिप्रतिषेधार्थत्वसंभवोऽप्रत्ययत्वात्, अनेकाल्त्वं तु निश्चितं ङिच्चेत्येतच्चानङादिष्वनन्यप्रयोजनेषु ङित्त्वेषु सावकाशमितीहासंदिग्धपरमनेकाल्शित्सर्वस्येत्येतत्प्रवर्त्तते । भवतात्त्वमित्यत्र तातङा परेण पूर्वं बाधितस्य हेर्लुकः स्थानिवद्भावेन पुनः प्रवृत्तिः सकृत्परिभाषया न भवति । यद्वा हुझल्भ्यो हेर्धिरित्यतो हेरित्यनुवर्त्यातो हेरित्यत्र हिग्रहणमन्तरेण लुकि विधातव्ये पुनर्हिग्रहणस्य हेरिति विशेषणेन मुख्य-हिपरिग्रहार्थत्वात्, इदमपि तातङः सर्वादेशत्वे प्रमाणम् । अनद्यतने लङ् ॥ अविद्यमानाद्यतनभूतोपाध्यर्थाद्धातोर्लङ् स्यात् । लस्य तिबादिषु इतश्चेतीकारलोपः । ‘लुङ्लङ्लृङ्क्ष्वडुदात्त’इत्यङ्गस्याड्विधिः टित्त्वादा-दिः उदात्तश्च । अभवत् । अभवद् । झलां जशोन्ते । पदान्ते झलां जश इत्यत्रान्तरतम्यात्तकारस्य दकारे ऽवसाने झलां वा चरित्यान्तरतम्यात्त-कारः । अभवताम् । ‘तस्थस्थमिपां तान्तन्ताम’इति तसस्ताम् । अभवन् । अन्तादेशे इकारलोपे ‘संयोगान्तस्य लोपः’ । संयोगान्तस्य पदान्तस्य लोप इति तल्लोपः । हलोनन्तराः संयोगः ॥ अज्भिरव्यवहित एव श्लिष्टोच्चारितः

हलसमुदायः संयोगः । अभवः । इकारलोपे हल्विसर्जनीयौ । अभव-तम् । अभवत । अभवम् । अभवाव । अभवाम । 'तस्थस्थमिपां तान्तन्तामः' 'नित्यं ङित' इति तामादयः सलोपश्च । विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् ॥ विधिः प्रेरणं भृत्यादेः कस्यां चित् क्रियायां नियोजनम् । निमन्त्रणं नित्यनैमित्तिककर्मविषया प्रवर्त्तना । आमन्त्रणं काम्यकर्मविषया सा । अधीष्टः सत्कारपूर्विका सर्वकर्मविषया । एषु चतुर्ष्वपि प्रवर्त्तना नाम वर्त्तते सैव लिङर्थः । भेदेन तूपादानं प्रपञ्चार्थं, प्रवर्त्तना च प्रवृत्तिहेतुर्धर्मः, ।

प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनाम् ।

इत्याचार्याः संप्रश्नः संप्रधारणं, तद्वेदं वा कर्त्तव्यमिति । प्रार्थनं याचनम् । एषु प्रत्ययार्थविशेषणेषु धातोर्लिङ् स्यात् ॥ यासुट् परस्मैपदेषूदात्तो ङिच्च ॥ लिङः परस्मैपदेषु तेषामेव यासुट् टित्वादादिः उदात्तश्च । सीयुटोपवादः इदमेव ङिद्वचनं ज्ञापकं ङित्वादेशानां स्थानिवत्त्वेन ङित्वाभावस्य, यदि हि स्यात् अचिनवममार्जमित्यादौ गुणवृद्धी न स्याताम् । इयं च ज्ञापकापेक्षा सार्वधातुकमपिदित्यस्य पर्युदासत्वपक्षे, प्रसज्यप्रतिषेधत्वे तु पिन्नेति निषेधेन स्थानिवत्त्वेन सार्वधातुकमपिदित्यतिदेशेन प्राप्तस्य निवारणात्, चिनुयादित्यादिसिद्ध्यर्थन्तु वक्तव्यम् । भव यास् ति इति स्थिते ॥ सुट्तिथोः ॥ लिङ्संबन्धिनोस्तकारथकारयोः सुट् स्यादिति सुट् टित्वादादिः । अयं तकारथकारभक्तः, यासुट् तु लिङ्भक्त इति विषयभेदादनयोर्न बाध्यबाधकभावः ॥ लिङः सलोपोऽनन्त्यस्य ॥ सार्वधातुकलिङः संबन्धिनोऽनन्त्यस्य सस्य लोप इति यासुट्सुट्सकारयोर्लोपः, सुट् पर्जन्यवल्लक्षणप्रवृत्त्या तु कृतः न त्वस्मिन् कृते वा ऽकृते वा विशेषोऽस्ति लोपनात् । श्रवणं त्वाशीर्लिङात्मनेपदे । 'अतो येय' इत्यदन्तादङ्गात्परस्य याइत्यस्येयादेशः । 'आद्गुण' इत्यवर्णान्तादचि पूर्वपरयोरेको गुणो भवन् कण्ठस्याकारस्येचुयशानां तालव्विति तालव्यस्येकारस्य चेदेतोः कण्ठतालव्विति कण्ठतालव्य एकारः । यकारस्य वलि लोपः । भवेत् । भवेतां । भवेयुः । झेर्जुसिति लिङादेशझुसादेशजकारो जुसि चेति विशेष-

णार्थः ॥ उस्यपदान्तात् ॥ अपदान्तादवर्णादुसि परे पूर्वपरयोः पररूपमि-त्येतद्बाधित्वा 'ऽतो येयः परत्वाच्चित्यत्वाच्च प्रवर्त्तते । यद्यप्यन्तरङ्गत्वात् पररूपं न्याय्यं तथापि यास् इत्येतस्य इय् भवतीति विप्रतिषेधसूत्रे भाष्यकारैर्व्याख्यातत्वात् लिङः सलोप इत्यस्यापवाद इय् अतोयेय इत्यत्र त्वाद्गुणे कर्तव्ये यलोपस्य सिद्धत्वमाषं, यात्य इति वा पठनीय-मिति बोध्यम् । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम । 'आशिषि लिङ्लोटा'विति लिङ् । लिङाशिषीत्यार्द्धधातुकत्वाच लिङः सलोपः । किदाशिषीति कित्वाच गुणः । 'स्कोः संयोगाद्योरन्ते च' । झलि परे यः संयोगः पदान्ते च यः संयोगस्तदाद्योः स्कोर्लोप इति झल्परसंयोगादित्वेन यासुटः सस्य लोपः, पदान्ते तु संयोगे तदादित्वेन सुटोपि सकारो लुप्यते । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूया-स्तम् । भूयास्त । भूयासं । भूयास्व । भूयास्म । सलोपस्य पूर्वत्रासिद्ध-त्वेन तिस्योः संयोगान्तलोपो न भवति पदान्तसंयोगादिलोपस्यानवकाश-त्वात् । ननु 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तंहलि'ति हलन्ताद् दीर्घाद् ङ्याबन्ताच्च परस्य सुतिस्यपृक्तस्य लोपविधाने स्कोरिति सलोपस्य पूर्व-वदसिद्धत्वाद्धलन्तात्परो ऽपृक्तत्वेन लोपः कस्मान्न भवति । सुतिस्यपृक्त-मिति प्रत्ययनिर्देशेन प्रकृतेराक्षेपात्ततः परस्यापृक्तस्य लोपविधानात् । न चेह सकारान्तस्य प्रकृतित्वं, यद्वा ऽसिद्धत्वे भूयादित्यत्र यासुट् तस्य लोपोप्यसिद्ध इति तस्य तकारभक्तत्वादपृक्तस्यैवाभावः । अपृक्त एकाल् प्रत्ययः ॥ (शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

मू० ॥ प्रत्यक्त्वमात्रविषयाऽऽश्रयताबलेन
प्रत्यक्स्वरूपमपिधाय पराग्विवर्त्तैः ॥
प्रत्यञ्चमद्वयमशेषविशेषहीनं
विक्षिप्य तिष्ठति तदग्रहणं मृषैव ॥ २१ ॥

टी० ॥ नन्वात्मनोऽज्ञानाऽऽवृतत्वे प्रकाशाऽयोगात्कथं ततोऽज्ञानान्तःकरणाऽऽद्यभिमानं नह्यप्रकाशमानज्ञानाद्विषयप्रकाशो भवति तत्राऽऽह ॥ प्रत्यक्त्वेति ॥ विषयपदमत्राऽविवक्षितं चैतन्यमात्रं यो विषयः तदाश्रयतावलंनेनेत्यर्थः ॥ अथ वा वक्ष्यमाणरीत्या अधिष्ठानाऽऽवरणस्य विक्षेपहेतुत्वम् । एवं चोभयमपि हेतुरिति तदुपादानं प्रत्यक्स्वरूपं प्रत्यगात्मनोऽज्ञानादिसाधकचैतन्यांशमपिधायाऽनाच्छाद्य प्रत्यञ्चं पराग्विवर्तैः जीवत्वाऽऽदिविवर्तैः विक्षिप्य तिष्ठतीति संबन्धः । अज्ञानं हि स्वाऽऽश्रयाऽवभास्यं न जानामीति तदनुभवात् । अवभासकं च प्रकाशमानमेवेति तदाश्रयचैतन्यमनावृतम् ॥ एवं चाऽज्ञानं तदाश्रयत्वादेव तदाच्छादकं न भवतीत्यभिप्रेत्यैवमुक्तं तदा चाऽज्ञानादिभानमविरुद्धं चैतन्यं नाऽस्तीति व्यवहाराऽदर्शनेन तद्योग्यताक्रपमावरणं नास्तीति भावः ॥ तर्ह्यज्ञानं ब्रह्मततोऽन्यः स्यादिति नेत्याह ॥ अद्वयमिति ॥ तर्हि कथं प्रकाशमानस्याऽप्रकाशमानत्वमित्याशङ्क्य उक्तं तावत्प्रकाशमानत्वे प्रमाणम् ॥ एवं जीवेश्वरत्वाऽऽद्यध्यासाऽधिष्ठानतया तत्राऽप्रकाशमानत्वं च वाच्यम् ॥ विशेषाऽऽवरणं विनाऽध्यासाऽयोगादित्यभिप्रेत्य प्रत्यञ्चं जीवत्वाऽऽदिभिर्विक्षिपतीत्युक्तम् ॥ यद्यपि चैतन्यमात्रमेव ब्रह्म तथापि तदावृतमनुभूयते ॥ तच्च वक्ष्यमाणविधया अविरुद्धमिति ॥ मास्तु तर्हि जीवत्वाऽऽदेस्तत्राऽध्यासस्तत्राऽऽह ॥ अशेषेति ॥ तथा च निर्विशेषे जीवत्वाऽऽद्यवभासोऽध्यासं विना न संभवतीति तस्य तत्राऽऽरोपो वक्तव्य इत्यर्थः ॥ २१ ॥ २१ ॥ :: ॥

मू० ॥ प्रत्यक्षलिङ्गवचनानि हि दर्शयन्ति
निर्दुःखनित्यसुखविग्रहतां प्रतीचः ॥
निर्दुःखनित्यसुखविग्रहभूम्नि नाऽस्मिन्
संभाव्यते दृशि पुरोदितमल्पक्रूपम् ॥ २२ ॥

टी० ॥ ननु यथा साङ्ख्यमते प्रकृतिः पुरुषाऽऽश्रयत्वविषयत्वमन्तरेण जगदुत्पादयति ॥ एवमज्ञानमप्यस्तु किं तस्य प्रत्यगाश्रयत्वविषयत्वकल्पनया । न चाऽध्यस्तमज्ञानं तत्कार्यं चेति ततोऽस्य वैलक्षण्यमिति वाच्यम् ।

तदध्यासस्यैवाऽप्राप्यसिद्धेरित्याशङ्क्याऽऽत्मनि प्रपञ्चस्याऽध्यासं दर्शयिष्यं-स्तदर्थं प्रथमं तस्य तत्र वस्तुतोऽसंभवं तदर्थं च प्रमाणसिद्धमात्मस्वरूपं दर्शयति ॥ प्रत्यक्षेति । एतानि वक्ष्यमाणानि द्रष्टव्यानि । निर्दुःखनि-त्यसुखविग्रहतामिति भूम्नश्चैतन्यस्योपलक्षणम् । अन्यथाऽनुवादे तत्की-र्तनाऽयोगात् । ततः किं तत्राऽऽह । निर्दुःखेति । निर्दुःखाऽऽदिस्वरू-पेऽस्मिन्चैतन्याऽद्वयाऽऽत्मनि अनृतजडेत्यादिनोक्तमल्पं रूपं न संभा-व्यते । वस्तुतः कथमपि न संभवतीत्यर्थः । अहङ्कारप्रमुखो जडप्रपञ्चो न तावदात्मनोऽन्यत्र सिध्यति आत्मन एव तदुपादानतया वक्ष्यमाण-त्वात् । कार्यस्योपादानादन्यत्राऽवस्थित्यनुपपत्तेः तत्सत्तास्फूर्त्ययोगाच्च न ह्यात्माऽतिरिक्तमपि किञ्चित्संभवति नाऽप्यात्मनि संबन्धान्तरेण तस्य वृत्तिः संभवति निरवयवेऽसङ्गे संबन्धान्तराऽसंभवात् ॥ तादात्म्यं च वास्तवं विरुद्धयोर्न संभवति तद्विरुद्धरूपं चाऽऽत्मनः प्रत्यक्षाऽऽदिसिद्ध-मिति न कथमप्यात्मनि प्रपञ्चस्य वस्तुतः संभव इति भावः २२ ॥ :: ॥

मू० ॥ प्राज्ञे सुखं समनुभूय समुत्थितः सन्
सर्वप्रकारविषयप्रतिपत्तिशून्ये ॥
सुप्तोऽहमत्र सुखमित्यनुसन्दधानः
सर्वोऽपि जन्तुरवगच्छति तस्य सौख्यम् ॥ २३ ॥

टी० ॥ प्रतिज्ञातमर्थमुपपादयन्प्रथमं प्रत्यक्षेणाऽऽत्मनो निर्दुःखनि-त्यसुखतां दर्शयति । प्राज्ञ इति । यद्यपि सुखप्रत्यक्षमात्रमात्मस्वरूपसुखमेव विषयीकरोति तथाप्यन्यथासिद्धिशङ्काशून्यतया निर्दुःखत्वाऽऽदिसिध्यर्थं च सौषुप्तिकं प्रत्यक्षमुदाहृतं यस्मिन्नेकीभूतः सुषुप्तावस्थायां जीव उपाधि-कालुष्याऽभावात्प्रकृष्टप्रज्ञो भवति तस्मिन्प्राज्ञाऽभेददशायामित्यर्थः । सम-नुभूय स्पष्टमनुभूयाऽन्यथा सुषुप्त्यर्थं कस्याऽपि प्रवृत्तिर्न स्यात् । ननु तदपि सुखं जन्यमेव किं न स्यात्तत्राऽऽह । सर्वप्रकारेति । स्मृतिरूपा अनुभव-रूपा वा या विषयप्रतिपत्तिः तच्छून्ये सुषुप्तेः सर्वविशेषज्ञानोपरमरूप-त्वाद्विषयज्ञानं विना सुखजन्माऽसंभवात् न तदाऽऽत्मन्यत्सुखम्-

Digitized by Google

स्तीत्यर्थः । अत्र देशे काले वा सुखमिति क्रियाविशेषणम् ॥ अनुसन्दधानः स्मरन्नर्थात्तदेव सुखमित्याशयः तस्याऽनुसंधानात्स्वरूपचैतन्यस्य सौख्यं निर्दुःखनित्यसुखाऽऽत्मत्वं यद्यपि सुखमहमस्वाप्समिति स्मृतिर्न निर्दुःखत्वं न वा नित्यत्वं तस्य विषयीकरोतीति तद्बलात्प्राज्ञसुखस्य निर्दुःखत्वाऽऽदि न सिध्यति तथापि सुषुप्त्यवस्थायामनुभूयमानसुखबलान्निर्दुःखताऽऽत्मनः सिध्यति अतएवोत्थितस्य निर्दुःखमस्वाप्समिति व्यवहारः सुषुप्तिकालीनसुखसामर्थ्यादेव तस्य नित्यत्वमपि सिध्यतीति प्राज्ञसुखप्रत्यक्षसामर्थ्यादात्मा निर्दुःखनित्यसुखमिति ॥ २३ ॥ :: ॥

मू० ॥ सर्वं यदर्थमिह वस्तु यदस्ति किञ्चित्
पारार्थ्यमुज्झति च यन्निजसत्तयैव ॥
तद्वर्णयन्ति हि सुखं सुखलक्षणाज्ञा-
स्तत्प्रत्यगात्मनि समं सुखताऽस्य तस्मात् ॥ २४ ॥

टी० ॥ एवमनुमानेनाऽप्यात्मनः सुखाऽऽत्मत्वसिद्धौ तस्य निर्दुःखनित्यताऽपि सिध्यतीत्यभिप्रेत्याऽऽत्मा सुखाऽभिन्नः सुखलक्षणवत्त्वाद्वैषयिकसुखवद्यद्यल्लक्षणवत्तत्तदात्मकं यथा गवादीत्यनुमानमाह । सर्वमिति । प्राचुर्याऽभिप्रायमेतत् यदर्थं यत्संबन्धितया प्रीतिविषयः न तु तद्धेतुरित्यर्थः आत्मसुखस्याऽजन्यत्वात् । इह जगति वस्तु यदस्ति किञ्चित् एतदपि प्राचुर्याऽभिप्रायं पारार्थ्यमन्यप्रयुक्तप्रीतिविषयत्वं यदिष्यमाणमिति शेषः । निजसत्तया स्वस्वरूपेण सुखमिति * वर्णयन्तीति संबन्धः । व्याप्तस्य हेतोः पक्षधर्मतामाह । तत्प्रत्यगात्मनीति । समं वैषयिकसुखतुल्यमस्तीति वाऽर्थः । निगमयति । सुखतेति । तस्मादुक्तहेतोः अत्र यदिष्यमाणं पारार्थ्यमुज्झति निजसत्तया यदिष्यमाणं तद्वा सुखमितिलक्षणं विवक्षितम् ॥ एतदुपपादनाय सर्वमित्याद्युक्तं दुःखाऽऽदौ सुखसाधने चाऽतिव्याप्तिवारणाय दलद्वयम् ॥ ननु पुत्राऽऽदिवत्सुखमपि मम सुखं भूयादित्यात्माऽर्थमेव काम्यत इति कथं पारार्थ्यमुज्झतीति तन्न । न हि

* सुखं सुखमिति । पा० २

पुत्रादिनेवाऽऽत्मनः सुखेनाऽपीष्टं किञ्चिज्जायते येन सुखं तदर्थं भवेत् न च सुखमात्मसंबन्धितयैवाऽभिलाषाऽऽस्पदमात्मसंबन्धित्वस्य दुःखादिसाधारणस्य सुखप्रीत्यप्रयोजकत्वात् न चाऽऽत्मसुखत्वं तत्र प्रीतिनिमित्तमितिवाच्यं लाघवेन सुखत्वमात्रस्यैव तथात्वात्सुखं चैकमेवेति नाऽतिप्रसङ्गः न च कथं तर्हि मम सुखं भूयात् इत्यभिलाष इति वाच्यं मम प्रत्यक्सुखं भूयादिति हि तथा काम्यते सुखव्यक्तेरेकत्वेन व्यावर्त्याऽभावात् प्रत्यक्त्वं स्वज्ञातब्रह्मसुखाऽऽदिव्यवच्छेदकमिति तदेव ममेति विशिष्यत इति नोक्तदोषः अहंकारशबलात् ममताऽधिकरणात्केवलं सुखमन्यदिति मदीयत्वमपि प्रतीयमानमस्त्येव परं तु तत्कामनाप्रयोजकं न भवतीति भावः ॥ २४ ॥

मू० ॥ प्रेमाऽनुपाधिरसुखात्मनि नोपलब्धः
स प्रत्यगात्मनि कृमेरपि नित्यसिद्धः
प्रेयः श्रुतेरपि ततः सुखताऽनुमानं
नैयायिकोऽपि न दृगात्मनि निह्नुवीत ॥ २५ ॥

टी० ॥ किं च आत्मा सुखमनौपाधिकप्रेमगोचरत्वात् यन्नैवं तन्नैवं यथा दुःखाऽऽदीत्यनुमानान्तरमाह। प्रेमेति। अनुपाधिरिति। अन्याऽप्रयुक्त इत्यर्थः। असुखात्मनि सुखव्यतिरिक्ते प्रत्यगात्मनि निष्कृष्टाऽहङ्कारतत्साक्षिचैतन्ये कृमेरपीति बहुलदुःखप्राणिनामप्यात्मनि प्रेमा दृश्यते किमु वक्तव्यं विशिष्टाऽऽत्मनामिति द्योतितम्। कृमीणामपि स्वदुःखपरिहाराय धावनाऽऽदिदर्शनेनाऽस्त्येव स्वदुःखे द्वेषः स च तदात्मनि तेषां प्रेमाऽभावे नोपपद्यते उदासीननरदुःखद्वेषाऽदर्शनादिति भावः। ननु कृमीणामन्येषां वाऽऽत्मनि कथं स भवेत्सिद्धे तद्योगादित्याशङ्क्य सर्वाऽनुभवसिद्धः कथं स निराकार्य इत्याह। नित्यसिद्ध इति। सदाऽनुभवसिद्ध इत्यर्थः। दृश्यते हि धनपुत्राऽऽदौ सिद्धेऽपि पित्रादेस्तत्साध्योपकारमप्रतिसन्दधतोऽपि प्रेमा एवमात्मन्यपि निरतिशयसुखरूपे स न विरुध्यते इत्यर्थः। किं च तदेतत्प्रेयः पुत्रात्प्रेयो वित्तादित्यादि श्रुतितोऽप्यात्मनि नित्य-

सिद्धे स सिद्ध इत्याह । प्रेयःश्रुतेरिति । तत इति व्याप्तस्य हेतोः पक्षधर्मत्वादित्यर्थः । नैयायिकोऽपीति । अपिशब्दान्मीमांसकाऽऽदिरपि नैयायिको ह्यनुमानस्य द्वे अङ्गे व्याप्तिः पक्षधर्मता चेत्याहेति स्वाऽभिमताऽङ्गयुक्तम् आत्मनः सुखताऽनुमानं न निह्नवीत न निराकुर्यात् किमु वक्तव्यं श्रुतिप्रधानो मीमांसका ऽऽदिरितिभावः । न चाऽऽत्मनि दुःखित्वग्राहकप्रत्यक्षबाधः दुःखित्वाऽऽदेरुपाधिधर्मतया दृगात्मनि सुखताऽनुमानस्य ततो भिन्नविषयत्वादित्याह ॥ दृगात्मनीति ॥ २५ ॥

मू० ॥ आनन्दविग्रहमपास्तसमस्तदुःखं
वस्तुस्वभावपरिवर्जितसर्वभेदम् ॥
आत्मानमध्ययनविध्यनुसारिणस्तं
प्रत्यक्षतः श्रुतिशिरःसु समामनन्ति ॥ २६ ॥

टी० ॥ प्रत्यक्षलिङ्गवचनानीति श्लोकोक्तं प्रत्यक्षमनुमानं च दर्शितम् इदानीं वचनशब्दितां श्रुतिमपि तत्राऽऽह ॥ आनन्दविग्रहमिति आनन्दस्वरूपमित्यर्थः । अपास्तसमस्तदुःखमिति । तस्य प्रेक्षावन्मुमुक्षूपाऽऽदेयत्वं द्योतितम् । ननु सद्वितीये जीवे नाऽल्पे सुखमस्तीति सुखनिषेधात्कथं तस्याऽऽनन्दरूपत्वमिति तत्राऽऽह । वस्तुस्वभावेति । यद्यपि जीवस्वरूपं सप्रपञ्चं प्रतीयते तथापि यत्र नान्यत्पश्यति नान्यच्छृणोतीत्यादिश्रुतिसिद्धमद्वयं ब्रह्मैव तस्य वास्तवं स्वरूपमिति नाऽऽसावल्पः तथा च न सुखनिषेधश्रुतेरयं विषय इति भावः ॥ ननु स्वर्गकामाऽऽदिवाक्यात्सुखवत्त्वमेवाऽऽत्मनो गम्यते न सुखरूपत्वमिति तत्राऽऽह । अध्ययनेति । अध्ययनविधिर्हि स्वाध्यायशब्दोपस्थितकृत्स्नस्वशाखाया अध्ययनं विधत्ते न तु कर्मकाण्डमात्रस्य । एवं चाऽधीतोपनिषत्काः साधनचतुष्टयसंपन्नास्तद्गतानि न लिप्यते लोकदुःखेन बाह्यः योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति । विज्ञानमानन्दं ब्रह्म एषोऽस्य परम आनन्दः । यो वै भूमा तत्सुखमित्यादीनि प्रत्यक्षवाक्यानि आनन्दाऽऽत्मप्रतिपादकानि आमनन्ति पठन्ति । पठ्यमानवेदान्तवाक्याविर्दुःखमित्यसुखविग्रहं द्रूपं

भूमानमात्मानमवगच्छन्तीत्यर्थः । अथ वा वेदोपरावेदान्ता इति मते।
तेषामर्थशून्यत्वात्तत आनन्दाऽऽद्यसिद्धिमाशङ्क्याऽध्ययनविधेर्दृष्टाऽर्थत्वा-
त्कर्मवाक्यवत्तेषामप्यर्थवत्त्वं दुरपह्नवमित्याह । अध्ययनेति । यः प्रत्यक्षाऽनु-
मानाभ्यां सिद्ध*स्तमात्मानमानन्दविग्रहमितिसंबन्धः । एतदुक्तं भवति ।
उक्तं तावदनृतजडविरोधीत्यत्राऽऽत्मा जडाऽहङ्कारविलक्षणश्चिद्रूप इति ।
ननु सत्यमुक्तं तदेवाऽनुपपन्नं ज्ञानस्याऽनित्यत्वादिचेच ज्ञानपदवाच्यवृत्ते-
रनित्यत्वेऽपि तदाश्रयसाक्षिचैतन्यस्य तदभावात् तथाहि । अस्ति तावद्दे-
वदत्ताऽऽदेः सुखदुःखाऽऽदिसाक्षात्कारः स च घटाऽऽदिसाक्षात्कार इवचक्षु-
रादिना केन चित्करणेन न साध्यते तत्र प्रमाणाऽभावात् न च सुखाऽऽ-
द्युपलब्धिः सकरणिका क्रियात्वादिति तत्कारणं मनः सिध्यतीति वाच्यं
तत्क्रियात्वस्याऽसिद्धेः न च साक्षात्कारत्वात्तत्सिद्धिः । तस्य नित्यत्वे-
ऽप्युपपत्तेः । किं च सुखाऽऽद्युत्पत्तिसमयभाविनः तज्ज्ञानस्य तदा विषया-
ऽऽसक्तमनोजन्यत्वमनुपपन्नं न च द्वितीयक्षण एव सुखाऽऽदिज्ञानमिति
वाच्यं प्रमाणाऽभावात् प्रथमक्षणेऽज्ञातसुखसत्त्वे प्रमाणप्रयोजनयोरभावा
च्च द्वितीयक्षणे ऽपि सुखाऽऽद्युत्पादकमनःसंयोगस्याऽन्यथाऽसिद्धतया तत-
स्तज्ज्ञानाऽसंभवाच्च । न वा विषयाऽसमवायिकारणस्य ज्ञानाऽसमवायि-
कारणत्वं क्व चिद्दृष्टं संयोगान्तरकल्पने चाऽसमवायिकारणनाशेन नष्टसु-
खाऽऽदेरनुभवाऽसंभवाच्च कथं तर्हि सुखज्ञानमुत्पन्नं विनष्टमित्यनुभव इति
चेन्न तावत्सुखाऽऽदिस्थितिसमये तज्ज्ञानस्योत्पत्तिविनाशाऽनुभवोऽस्ति
येन ज्ञाने पृथगुत्पत्त्यादि सिध्येत् । सुखाऽऽद्युत्पत्त्यादिदशायां तदनुभवस्य
तदुत्पत्त्यादिविषयतयाऽन्यथा सिद्धत्वेन तदसाधकत्वात्तस्मात्सु†खाऽऽद्यु-
पलक्षिततदनुभवस्य दुःखाऽऽदिसमयेऽपिस्थितेः तदुत्पादककरणाऽनिरूप-
णात्सुखाऽऽदिविशिष्टतदुत्पत्त्यादेरन्यथा सिद्धत्वाच्चाऽस्त्येव सुखाऽनुभवो-
त्पत्त्यादिरेवं तद्भेदाऽनुभवस्याऽपीत्यबाधितलाघवात् । सुखदुःखाऽदिवि-

* ऽनुमानसिद्ध । पा० २

† तस्मात्तत्सु । पा० २

Digitized by Google

यथाऽनुभव एक एव स एव पु*रुषान्तरस्याऽपि सुखाऽऽदिसाधक इति जगन्मात्रसाधकं चैतन्यमेकं तस्यैव घटाऽऽदेरपि प्रकाशकत्वात्स चाऽऽत्मेति † श्रुतिसिद्धः । तदभेदस्य बाधकाऽभावादिति चिद्रूप एव आत्मा एवमुक्ताऽनुमानेन तस्याऽऽनन्दत्वसिद्धावानन्दस्य दुःखविरोधित्वेन निर्दुःखत्वमात्मनोऽनित्यत्वाऽयोगेन नित्यत्वं च सिद्धमिति निर्दुःखनित्यचित्सुखविग्रह आत्मा एवं सर्वस्य प्रपञ्चस्य दृश्यतया वक्ष्यमाणन्यायाच्चाऽनिर्वचनीयत्वसिद्धौ सजातीयाऽऽदिभेदशून्योऽपीत्युक्ताऽऽत्मसिद्धिः । एतच्च वेदान्तवेद्यसमस्तस्वरूपोपलक्षणतयोक्तं तत्र कथं जडप्रपञ्चस्य वस्तुतः संभव इति कथं तर्हि एतदनुभवः अध्यासात् । असंभावितस्याऽनुभवसिद्धस्याऽध्यासनियमात् ॥ २६ ॥ :: ॥ :: ॥

मू० ॥ अध्यस्तमल्पवपुरस्य न वास्तवं त-
त्प्रत्यक्परागुद्वयमिदं हि परस्परस्मिन् ॥
अध्यस्ततां प्रति समर्थमबोधमात्र-
मन्योऽन्यरूपमिथुनीकरणे निमित्तम् ॥ २७ ॥

टी० ॥ ननु प्रपञ्चो नाऽध्यस्तो बाधकाऽभावाच्च शुक्तौ रजताऽऽदिवद्बाधोऽस्तीत्याशङ्क्य तदध्यस्ततायाहअं प्रमाणमेव तद्बाधकमित्याह ॥ अध्यस्तमिति ॥ आरोपितमित्यर्थः । बाह्याऽऽध्यात्मिकप्रपञ्चोऽध्यस्तो न वास्तव इति वा परिच्छिन्नत्वाच्छुक्तिरजताऽऽदिवदित्यभिप्रेत्याऽऽह ॥ अल्पवपुरिति । अस्याऽऽत्मनोऽल्पं वपुरिव वपुर्यथा प्रसिद्धं वपुः स्वाऽतिरिक्तमात्मानं स्वस्वरूपेण निरूपयदवच्छिनत्त्येवमहङ्काराऽऽदिरपि सच्चिद्रूपमात्मानं स्वेन रूपेण भासयतीति वपुः । एतच्चाऽध्यस्तत्वोपोद्बलनायोक्तम् । ननु सन्घट इत्यादिप्रतीतिविरोधाच्चेदमनुमानं साध्वित्याशङ्क्य निरधिष्ठानाऽध्यासाऽयोगात्सच्चिद्रूपाऽऽत्मन एव तदधिष्ठानत्वं वाच्यम् । ततश्च सत्याऽनृताऽऽत्मत्वात्प्रपञ्चस्य तत्र सद्बुद्धिरन्यथा सिध्यतीत्याशये-

* एक एवपु । पा० २

† चाऽऽत्मैव । पा० २

नाऽऽह । तत्प्रत्यक्परागद्वयमिति । तत् अल्पवपुः प्रत्यक्पराग्द्वयसमुदाया-
ऽऽत्मकमित्यर्थः न चाऽप्रयोजकत्वं प्रपञ्चविलक्षण आत्मनि प्रपञ्चाऽऽत्म-
ताया असंभवस्योक्तत्वात् । नन्वध्यस्तमपि शुक्तिरजताऽऽदि सत्यमेवेत्यत्रा-
ऽऽह । न वास्तवमिति । उक्तरीत्या तस्याऽनिर्वचनीयत्वसाधनादित्यर्थः ।
अथ वा नन्वधिष्ठानाऽध्यस्यमानांऽशद्वयोल्लेखित्वं भ्रमस्य दृष्टमहमिति
प्रत्ययस्त्वेकरूपो दृष्टमात्रविषयः कथमध्यास इत्याशङ्क्याऽऽह । तत्प्रत्यक्-
परागिति ॥ अनुभवेऽपि निपुणं निरूप्यमाणे दृग्दृश्याऽऽत्मना प्रत्यगंशः
परागंशश्च भासते तस्य चेदमनिदंरूपस्य तप्ताऽयःपिण्डवद्विरूपोभयरूप-
त्वादध्यासं विनैकत्वबोधाऽसंभवादेतदुभयं परस्परस्मिन्परस्पराऽऽत्मत्वे-
नाऽध्यस्ततां प्रति योग्यमित्यर्थः ॥ ननु प्रत्यक्पराचोः सादृश्याऽभावाद्विशुद्धे
चाऽऽत्मनि दोषस्याऽप्यसंभवादारोप्यस्य च पूर्वमननुभवेन संस्काराऽभावात्
कथं परस्पराऽध्यास इत्यत आह । अबोधमात्रमिति । स्फुरतोऽपि
तस्याऽनवबोधः सर्वत्राऽध्यासपुष्कलकारणं स चाऽऽत्मन्यनुभवसिद्धश्चे-
त्काऽत्र विसामग्रीत्यर्थः । अन्योऽन्येति ॥ अन्योऽन्यार्थोऽध्यासे मिथुनीकरणे
चेत्यर्थः । प्रत्यक्पराग्रूपं ह्यन्योऽन्याऽऽत्मकमन्योऽन्यधर्मवच्चाऽऽध्यस्तं तस्य
मिथुनीकरणं नाम ज्ञानाऽध्यासस्तदुभयाऽवच्छिन्नमेकं ज्ञानमिति यावत् ।
असंसर्गाऽग्रहनिबन्धनत्वाऽनभ्युपगमादित्युभयत्राऽज्ञानमेव निमित्तमिति-
भावः । ततश्च प्रत्यगज्ञानमेव बुद्ध्याद्यात्मना तदुभयोपरक्तज्ञानाऽऽत्मना
च परिणममानमहमिति साक्षिविषयः तदुक्तं अविद्यैव बाह्यदोषाऽपेक्षया
रजताऽऽद्याकारेण साक्षिचैतन्यस्य रजताऽवच्छेदकज्ञानाऽऽभासाऽऽकारेण
च परिणममाना स्वकार्येण सह साक्षिविषयत्वमापद्यत इति अयमर्थः
दुष्टेन्द्रियस्य शुक्तिसन्निकर्षादिदमिति प्रमाणवृत्तिर्भवति तत्प्रतिफलितवृ-
त्त्यवच्छिन्नचैतन्यनिष्ठशुक्त्याऽज्ञानं रागसंस्काराऽऽदिसचिवं शुक्त्या सह
मिथ्यातादात्म्याऽऽपन्नरजताऽऽत्मना परिणमते इदमाकारवृत्त्यवच्छिन्नचि-
न्निष्ठशुक्तिविषयत्वाऽऽज्ञानं तु ज्ञानसंस्कारसहकृतं साक्षिरजतसंबन्धाऽऽ-
पादकरजतज्ञानाऽऽत्मना तच्च जडत्वान्न स्वविषयसाधकमिति सविलासा-
ऽज्ञानं साक्षिविषय इति । अत्र केचित् । किं रजतज्ञानाऽऽत्मकाऽवि-

Digitized by Google

व्यावृत्त्या तया विनाऽपीदमाकारवृत्त्यभिव्यक्तसाक्षिणैव रजतप्रतिभासो-
पपत्तेः । अध्यस्तरजताऽऽदेःप्रमाणाऽगम्यत्वेनाऽऽवरणरहितत्वाद्दावरणाऽ-
भिभवाऽर्थं चिदुपरागाऽर्थं वा वृत्तेरन्यत्र स्वीकारात् अत एव ज्ञानसुखाऽऽदौ
न वृत्त्यन्तरमुपेयते तेषामनावृतचैतन्याऽध्यस्तत्वादेव भानसंभवादन्यथा
वृत्तावपि वृत्त्यन्तराऽपेक्षायामनवस्थाऽपत्तेः । नाऽपि संस्काराऽर्थावृत्तिः
रजतविशिष्टचित्राशेनैव सुखाऽऽदाविव तज्जननात् न चाऽर्थनाशजसंस्का-
रस्य स्मृत्यहेतुत्वाद्वृत्तिसिद्धिः सुखाऽऽदावेव तत्कल्पनाद्वृत्त्यन्तराऽपेक्षया
धर्मकल्पनामात्रत्वेन लघुत्वाच्च । न च ज्ञानसंस्कारस्याऽर्थाऽहेतुत्वमन्व-
यव्यतिरेकाभ्यामिहैव तत्कल्पनादत एव प्रातीतिकं रजतं दोषाऽऽदेरप्याव-
श्यकरजतोत्पादेनैवाऽर्थवत्त्वमिति वदन्ति । अत्रोच्यते । अनावृतचैत-
न्याऽध्यस्ततामात्रस्य जडभानप्रयोजकत्वे अनुमेयवह्न्यादेरभानाऽऽपत्तिस्तत्र-
विषयगताऽऽवरणभङ्गाऽनङ्गीकारात् । कथं तर्हि तत्र वह्निभानमनुमानरूपवृ-
त्त्याऽन्तःकरणाऽवच्छेदेन वह्निविषयकाऽज्ञानाऽपसरणात् । वह्निमहं न
जानामीत्यनुभवेन वह्नावात्मनि चाऽज्ञानसाधनात्तदन्यतराऽऽवरणभङ्गस्य *
च वह्निव्यवहारहेतुत्वमिति वक्ष्यते ततश्च तदाकारवृत्तिविषयत्वमेवाऽ-
स्वच्छतामसेषु भानप्रयोजकमास्थेयं स्वच्छाऽन्तःकरणसुखाऽऽदिभाने च वृत्तिं
विनाऽपि तदाकारत्वसंभवाच्चित्प्रतिबिम्बाऽऽश्रयत्वमपीति जडप्रतिभासे
द्वय्येव गतिः । चैतन्यं हि यदाकारवृत्तौ प्रतिबिम्बते † तद्भासयति प्रति-
बिम्बाऽऽश्रयं च वृत्त्यादिकं तथा दर्शनात् । न च क्व चिद्वृत्तिः क्व चित्प्रति-
बिम्बाऽऽश्रयत्वं तन्त्रमित्यननुगमः सर्वजडप्रतिभासाऽनुगतं हि चैतन्याऽऽ-
कारत्वमेव प्रयोजकं ब्रूमः । चैतन्यं यदाकारं भवति तत्प्रतिभासत
इत्यर्थः । चैतन्यस्य तदाकारत्वं न स्वतोऽसङ्गत्वात् । किं तु क्व चित्प्रति-
बिम्बात्क्व चित्तदाकारवृत्तिसंबन्धादित्यन्यदेतत् । तत्र सात्त्विकाऽन्तःकर-
णतद्धर्मेषु प्रतिबिम्बात् तामसेषु तदाकारवृत्तिसंबन्धादेवेति कुतो रजता-
ऽऽकारवृत्तिं विना तद्भानम् । न चाऽध्यस्तरजतस्य अस्वच्छतामसस्य

* राऽपसारणस्य पा० २ ।

† प्रतिबिम्बितं पा० २ ।

Digitized by Google

चित्प्रतिबिम्बाऽऽश्रयत्वमभ्युपगन्तुं युक्तमस्वच्छरजतसंस्कारसंस्कृताऽविद्याऽऽरब्धत्वेनाऽस्वच्छत्वादिति सिद्धाऽविद्यावृत्तिः। ननु परोक्षे तदाकारवृत्तिरपरोक्षे त्वनावृतचिदध्यस्तत्वं तन्त्रमस्तु मैवम्। सामान्यसामग्रीं विना विशेषसामग्र्या अहेतुत्वेन तत्राऽपि अस्वच्छतामसमाचभानहेतुवृत्तिविषयत्वस्याऽपरिहार्यत्वात्। किं च रजतस्य विषयाऽवच्छिन्नसाक्षिभास्यत्वे अहं रजतवानिति प्रतीतिः स्याच त्वहं रजतज्ञानवानिति किं च त्वन्मतेऽर्थसंस्कारस्य स्मृतिहेतुत्वं ज्ञानसामग्र्या अर्थहेतुत्वं चाऽक्लृप्तं कल्प्यमिति गौरवं प्रातीतिकत्वं च प्रतीतिकालाऽन्यकालाऽसत्त्वं न तु प्रतीतिजन्यत्वं संस्काराऽऽदेरपि प्रातीतिकत्वाऽऽपत्तेः। न च साक्षिकालाऽन्यकालः संभवतीत्यविद्यावृत्तिरेव तत्प्रतीतिः। ननु तवाऽप्यविद्यावृत्ते रजतविषयत्वाद्धीवृत्तेश्चेदंमात्रविषयत्वादिष्टपुरोवर्तिविशिष्टविषयं वृत्त्यन्तरप्रवर्तनं कल्प्यमिति गौरवमिति चेन्न। एकाऽवच्छिन्नजलदर्पणयोरेकमुखप्रतिबिम्बवदेकताऽऽपन्नसत्यमिथ्यावस्तुद्वयेऽप्येकप्रतिभासाऽभ्युपगमेन शुक्त्यभेदाऽऽपन्नरजतस्फुरणस्य फलस्यैकत्वात् प्रवृत्त्युपपत्तेरिति संक्षेपः॥ २७॥

मू०॥ सादृश्यधीप्रभृति न त्रितयं निमित्त-
मध्यासभूमिषु जगत्यनुगच्छतीदम्॥
ब्राह्मण्यजातिपरिकल्पनमात्मनीष्टं
जात्या न साम्यमुपलब्धमिहाऽस्ति किं चित्॥ २८॥

टी०॥ सादृश्यज्ञानाऽऽदेरध्यासहेतुत्वं व्यभिचारेण निरस्यति। सादृश्यधीरिति॥ सर्वाऽध्यासाऽननुगतत्वाच्च हेतुत्वाऽभिमतमेतत्त्रितयं सादृश्यधीदोषसंस्काराऽऽत्मकमध्यासनिमित्तमित्यर्थः। सादृश्यधियो व्यभिचारस्थानमाह॥ ब्राह्मण्येति ब्राह्मणोऽहमिति जात्यध्यास आत्मनि सर्वैरिष्यते अन्यथा ब्राह्मणो यजेत ब्राह्मणो न हन्तव्य इति विधिनिषेधव्यवस्थाऽनुपपत्तेः। तत्र च न सादृश्यमस्तीत्यर्थः। ननु सोऽपि त्रितयनिमित्तोऽध्यासत्वादिति नेत्याह॥ जात्येति। आत्मनि हि जात्या सादृश्यमनुपलब्धिबाधितं द्वयोरपि गुणक्रियाऽवयवशून्यत्वाच्च तस्य प्रतिमेति-

श्रुतेश्चेत्यर्थः ॥ ततश्च रजताऽऽद्यध्यासेष्वार्थिकं तद्वयं न त्वध्यासमात्राऽ-
ङ्गमिति भावः ॥ २८ ॥

मू० ॥ भूयस्त्ववतनुगुणाऽवयवक्रियाणां
सामान्यपूगवपुरुक्तमिहाऽभियुक्तैः ।
सादृश्यवस्तु न चिदात्मनि किं चिदत्र
जात्यादिभिः सह निरीक्षितमस्ति तादृक् ॥ २६ ॥

टी० ॥ नन्वत्राऽपि प्रमेयत्वाऽऽदिना सादृश्यमस्तीत्याशङ्क्य न ता-
दृक्सादृश्यमध्यासप्रयोजकमतिप्रसङ्गात् ॥ किन्तु भूयोऽवयवगुणाऽऽदिसाम्यं
न चैतयोस्तदस्तीत्याह ॥ भूयस्त्ववदिति ॥ एतच्च सामान्यपूगवपुषो विशे-
षणं गुणाऽवयवाऽऽदीनां बहूनामनेकसामान्याऽऽत्मकमित्यर्थः ॥ अथ वा
इह गोगवयाऽऽदौ अभियुक्तैर्जैमिन्यादिभिः सामान्यपूगाऽऽत्मकं सादृ-
श्यवस्तूक्तमित्यन्वयः ॥ कासां व्यक्तीनामित्यत्राऽऽह ॥ भूयस्त्ववतीनां
गवादितनुगतगुणाऽवयवक्रियाणामिति गुणानां शुक्लत्वदीर्घत्वाऽऽदीनि
सामान्यान्यवयवानां पादपृष्ठत्वाऽऽदीनि क्रियाणां गमनभक्षणचर्वणत्वाऽऽ-
दीनि तेषां पूगः समूह एव वपुर्यस्य ॥ नन्वितिपाठे गुणाऽऽदीनां भूयस्त्वं
सादृश्यं वस्तूक्तमिति स्वाग्रे वतिर्व्याख्येयः नन्वाकाशवत्सर्वगतश्च नित्य
इति वैदिकप्रयोगादध्यासाऽनुपपत्त्या चाऽऽत्मन्यपि किं चित्सादृश्यं
कल्प्यमित्याशङ्क्याऽऽह ॥ नेति ॥ अत्र चिन्मात्राऽऽत्मनि न तादृगपि
सादृश्यं किं चिदस्तीत्यर्थः ॥ न च नित्यत्वसर्वगतत्वाऽऽद्यपि जातिसा-
दृश्यमनुवृत्तकारणाऽऽत्मिकाया जातेरनित्यत्वाज्जाताववृत्तेरसर्वगतत्वा-
च्चेति भावः ॥ २९ ॥

मू० ॥ विषयकरणदोषान्न भ्रमः संविदि स्या-
दपि तु भवति मोहात्केवलादेवमेव ॥
भगवति परमात्मन्यद्वितीये विविधा
द्वयमतिरियमस्तुभ्रान्तिरज्ञानहेतुः ॥ ३० ॥

टी० ॥ दोषस्य व्यभिचारस्थलमाह ॥ विषयेति ॥ विषयदोषः सादृश्याऽऽदिः ॥ करणदोषः काचाऽऽदिः ॥ तत्र संविदि प्रमाणफले घटाऽऽदिज्ञाने यः परेषां वेद्यत्वाऽऽदिभ्रमः स तावद्विषयदोषात्करणदोषाद्वा न संभवति संविदः स्वप्रकाशत्वेनाऽविषयत्वात्करणाऽगोचरत्वाच्च ॥ अस्तु प्रमातृदोषादेवेति चेत्तर्हि दोषाऽन्तराऽसंभवात् प्रमात्रभिव्यक्तान्मोहादेवेति वक्तव्यं तच्चाऽस्मदिष्टमेवेत्याह ॥ अपित्विति ॥ तत्र मोहमात्रजत्वसिद्धौ तद्वत्प्रकृतेऽपि मोहैकनिमित्तता साधनीयेत्याह ॥ एवमिति ॥ यथा संविदि वेद्यत्वाऽऽदिधीर्भ्रमस्तथा परमाऽऽत्मनि द्वैतबुद्धिरपि यतो भ्रान्तिरतोऽज्ञानहेतुरस्त्वित्यन्वयः अज्ञानजत्वं संभावयति ॥ विचित्रेति ॥ भिन्नाऽभिन्नत्वसदसत्त्वाऽऽदिविचाराऽसहत्वेनाऽनिर्वचनीयेत्यर्थः भ्रान्तित्वसाधकमाह ॥ अद्वितीये द्वयमतिरतस्मिंस्तद्बुद्धिरित्यर्थः ॥ इयमिति साक्षिसिद्धत्वमाह ॥ भगवतीत्यनेन महामहिमत्वात्प्रपञ्चरचनासामर्थ्यं सूचितम् ॥ अस्त्विति समर्थने लोट् । अज्ञानजत्वं शक्यसमर्थनमित्यर्थः ॥ एवं सादृश्यधीदोषयोः व्यभिचार उक्तः संस्कारोऽपि व्यभिचारी शुक्तिरजताऽऽदिवैशिष्ट्यस्य प्रागननुभूतस्याऽपि भ्रमविषयत्वादिति स्पष्टत्वान्नोक्तम् ॥ ३० ॥

मू० ॥ संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगी-
र्नाऽऽधारेऽध्यसनस्य वस्तुनि ततोऽस्थानेमहान्संभ्रमः ॥
केषां चिन्महतामनूनतमसां निर्बन्धमाषाऽऽश्रया-
दन्योऽन्याऽध्यसने निरास्पदमिदं शून्यं जगत्स्यादिति ॥ ३१ ॥

टी० ॥ इदानीं परस्पराऽध्यासे सत्यात्मनोऽप्यनात्मन्यध्यस्तत्वेन बाध्यत्वान्निरधिष्ठानं सच्छून्यं जगत्स्यादित्याशङ्क्याऽज्ञानस्य बाधाऽवधेरनध्यस्तस्य च शिष्यमाणत्वान्नोक्तदोष इत्यभिप्रेत्याऽऽह ॥ संसिद्धेति ॥ विलसति व्यक्तीभवति मोहोऽनेनेति विलासो मिथ्यारजतादिः ॥ ततश्च यतः सविलासाऽज्ञानाऽऽवृते वस्तुनि शुक्त्यादावधिष्ठानसंज्ञा प्रसिद्धा अधितिष्ठति ह्येतं सकार्यो मोह इति स च नाऽध्यस्तोऽतोऽयमस्थानेऽविषये शून्यत्वाऽऽपादनसंभ्रम इत्यर्थः ॥ ननु यदाधारमारोप्यं भासते

तदधिष्ठानं तच्चाऽऽरोप्येऽध्यस्तमेवाऽन्यथा परस्पराऽध्यासो न स्यादित्यत आह ॥ नाऽऽधार इति ॥ अध्यस्तस्याऽऽधारत्वेन भासमाने शुक्तीदमंशे नाऽधिष्ठानगीरित्यर्थः । किं च शबले संसृष्टतयाऽध्यस्तोऽधिष्ठानांऽश आधारः ॥ तदुक्तम् ॥ अतद्रूपोऽपि तद्रूपेणाऽऽरोप्यबुद्धौ स्फुरत्राधार इति ॥ न चाऽसावधिष्ठानं भवितुमर्हति ॥ परस्पराऽऽश्रयादधिष्ठाने सत्यध्यासः अध्यासे सत्यधिष्ठानमितीतिभावः । यद्वा अन्योऽन्याऽध्यासे निरास्पदं सच्छून्यं जगत्स्यादिति तर्केण केषां चिद्वादिनं जेतुं महानयं संभ्रम उत्साहोऽस्थाने न युक्तमित्यर्थः । संभ्रमे हेतुमाह ॥ महतामिति । अनूनं तमः अज्ञानं येषां तेषां मध्ये महतां शून्यवादिनां निर्बन्धः परमतखण्डने श्रद्धाऽतिशयः ॥ यद्वा निरास्पदमिदं चोद्यं निर्विषयमित्यर्थः ॥ ३१ ॥

मू० ॥ अधिष्ठानमाधारमात्रं यदि स्या-
त्प्रसज्येत सत्यं तदा चोद्यमेतत् ॥
न चेतत्सकार्यस्य मोहस्य वस्तु-
न्यधिष्ठानगीर्गोचरे लोकसिद्धा ॥ ३२ ॥

टी० ॥ नन्वधिष्ठानमेवाऽऽधारस्तदाश्रयविषयाऽज्ञानकार्यस्याऽध्यस्तस्याऽन्याऽऽधारत्वाऽयोगादतः कथमुक्तरीत्या शून्यतोद्धार इत्याशङ्क्याऽऽह ॥ अधिष्ठानमिति ॥ यन्निष्ठतया मिथ्यारजताऽऽदि भासते सोऽधिष्ठानसामान्यांऽश आधार इत्युक्तं तन्मात्रमेव चेदधिष्ठानं स्यात्सत्यं शून्यता प्रसज्येत न तु तथेत्यर्थः । यतः सकार्यमोहविषये विशेषांऽश एवाऽधिष्ठानगीर्लोकसिद्धा तद्बोधादेव हि भ्रमो निवर्तते तेन य एव लौकिका इति न्यायेन तथैव शास्त्रेऽपीति नोक्तदोष इत्यर्थः । अत्र के चिदध्यस्तमेव हीति न्यायाद्भ्रमविषय इदमंशः सत्येदमंशाद्भिन्नः स चाऽविद्याग्रत्तिगोचरो बाध्यः । शुक्तीदमंशस्तु प्रमाणवृत्तिगोचरो न बाध्यः न चेदंताद्वयविवेकाऽऽपत्तिः ॥ विवेचकस्य शुक्तित्वाऽऽदेराग्रतत्वात्तद्विवेकाऽग्रहस्याऽध्यासहेतुत्वाच्च न चाऽविद्यावृत्त्या शुक्तीदंताभेदेनैव रजतं बोध्यतां किं मिथ्ये-

दंतयेति वाच्यम् । प्रमाणवृत्त्यविद्यावृत्त्योर्विरुद्धयोरेकत्र कार्येऽप्रवृत्तेः । न चाऽविद्यावृत्तेर्नेदंत्वं विषयः रजतप्रतीतिरिदमि प्रथत इत्यादिविरोधादितिवदन्ति तत्र उक्तरीत्या शुक्तीदंतासंसर्गाऽध्यासेनैवेदं रजतमित्यध्यासोपपत्तौ मिथ्येदंत्वकल्पने मानाऽभावाद्गौरवात्किं चेत्युत्तरश्लोकविरोधाच्च । अध्यस्तमेव हीति स्वरूपेण संसृष्टतया वाऽध्यस्तमेव भ्रमविषयइत्यर्थः । प्रमाणवृत्त्यविद्यावृत्त्योरेकस्फुरणेनैककार्यत्वस्योपपादितत्वात् । चित्सुखाऽऽचार्यैरपीदंतासंसर्गोऽप्यनिर्वचनीय इत्युक्तं नेदंत्वमिति दिक् ॥ ३२ ॥

मू० ॥ किं चाऽनृतद्वयमिहाऽध्यसितव्यमिष्टं
स्याच्चेत्तदा भवति चोद्यमिदं त्वदीयम् ॥
सत्याऽनृतात्मकमिदं मिथुनं मिथश्चे-
दध्यस्यते किमिति शून्यकथाप्रसङ्गः ॥ ३३ ॥

टी० ॥ इदानीमाधाराऽवष्टम्भेनाऽपि सत्याऽनृतमिथुनीकरणतया संसर्गबाधेऽप्याधारस्वरूपाऽबाधाच्छून्यताऽऽपत्तिमपहस्तयति ॥ किं चेति ॥ इहाऽन्योऽन्याऽध्यासे यद्यनृतद्वयमेव परस्पराऽऽत्मतयाऽध्यसितव्यमिष्टं स्यात्तदा शून्यता प्रसज्येत द्वयोरपि बाध्यत्वात् । न चैवं किं तु सत्यं प्रत्यगनृतं परागर्थः । स्वरूपतोऽप्यध्यस्तत्वात्तयोर्मिथोऽध्यासश्चेत्प्रतीचः पराक्संसृष्टत्वाऽऽकारेण बाध्यत्वेऽपि स्वरूपेण सत्यत्वान्न शून्यप्रसङ्ग इत्यर्थः ॥ ३३ ॥

मू० ॥ इदमर्थवस्त्वपि भवेद्रजते
परिकल्पितं रजतवस्त्विदमि ॥
रजतभ्रमेऽस्य च परिस्फुरणा-
न्न यदि स्फुरेन्न खलु शुक्तिरिव ॥ ३४ ॥

टी० ॥ नन्वन्योऽन्याऽध्यास एव किं प्रमाणमित्याशङ्क्याऽहङ्काराऽध्यासस्याऽस्फुटत्वात्प्रसिद्ध एव रजताऽध्यासे तं प्रथमं साधयति । इदमर्थेति । रजतं तावदिदमि शुक्त्यादावध्यस्तमिति संप्रतिपन्नमेवमिदमंशोऽपि

रजतेऽध्यस्त इति साध्यम् । हेतुमाह । रजतभ्रम इति । भ्रान्तौ भासमानत्वा-द्रजतवदित्यर्थः । व्यतिरेके शुक्तिविशेषांऽशवदित्यर्थः । यद्वा यदीदंत्वमनध्यस्तं स्यात्र भ्रमे स्फुरेच्छुक्तिवदिति तर्के उक्तरजते पुरोवर्तित्वलक्षणेदंत्वाऽस्फुरणे तदर्थिप्रवृत्तिरपि न स्यादिति निगर्वः ॥ ३४ ॥

मू० ॥ रजतप्रतीतिरिदमि प्रथते
ननु यद्वदेवमिदमित्यपि धीः ॥
रजते तथा सति कथं न भवे-
दितरेतराऽध्यसननिर्णयधीः ॥ ३५ ॥

टी० ॥ एवमर्थाऽध्यासेऽनुमानमुक्त्वा ज्ञानाऽध्यासेऽध्यक्षं प्रमाणयति रजतेति । एकैवेदं रजतमिति धीस्तत्र यथा रजतस्येदमा तादात्म्यं भासते एवमिदमोऽपि रजततादात्म्यमित्यनुभव एवाऽत्रेतरेतराऽध्यासे मानमित्यर्थः ॥ ३५ ॥

मू० ॥ अध्यस्तमेव हि परिस्फुरति भ्रमेषु
नान्यत्कथं चन परिस्फुरति भ्रमेषु ॥
रज्जुत्वशुक्तिशकलत्वमरुस्थितित्व-
चन्द्रैकताप्रभृतिकाऽनुपलम्भनेन ॥ ३६ ॥

टी० ॥ उक्ताऽनुमानमूलभूतां व्याप्तिं प्रकटयति ॥ अध्यस्तमेव हीति ॥ अध्यस्तस्यैव भ्रमे स्फुरणादिदमंशोऽप्यध्यस्त इति साधितमित्यर्थः ननु सर्वं ज्ञानं धर्मिण्यभ्रान्तमिति न्यायादनध्यस्तोपीदमंशः प्रथतामिति नेत्याह । नाऽन्यदिति । अन्यत्स्वरूपेण संसृष्टतया वा अनध्यस्तमित्यर्थः । धर्मिण्यभ्रान्तमिति च धर्मिस्वरूपे अभ्रान्तं न तु संसर्गेऽपीत्यर्थः । कथं न स्फुरतीति चेदनुभवबाधादेवेत्याह ॥ भ्रमेष्विति । सर्परजतमरीचिद्विचन्द्राऽऽदिभ्रमेष्वनध्यस्तानां रज्जुत्वाऽऽदीनां स्फुरणाऽनुपलम्भनादित्यर्थः ॥ ३६ ॥

मू० ॥ इतरेतराऽध्यसनमेव तत-
श्चितिचेत्ययोरपि भवेदुचितम् ॥

रजतभ्रमाऽऽदिषु तथाऽवगमा-

न्न हि कल्पना गुरुतरा घटते ॥ ३७ ॥

टी० ॥ ननु रजताऽऽदिभ्रमे द्वैरूप्याऽवभासादस्तु परस्पराऽध्यासो न त्वहमध्यासे तत्र द्वैरूप्याऽनवभासादित्याशङ्क्य तद्दृष्टान्तेनाऽत्राऽपि साधनीयमित्याह । इतरेति । चितिचेत्ययोर्योऽयमहमित्यध्यासः सोऽपि ततोऽध्यासत्वादेव हेतोरितरेतराऽध्यासः स्याद्रजताऽध्यासवदन्यथाऽध्यासद्वैरूप्यकल्पनाऽनुचिता स्यादित्यर्थः । अत एवाऽहमुपलभे इत्यहमि चैतन्याऽनुभवः ख्यातिं स्मारयति । रजतेति । प्रकाराऽन्तरेण कल्पनागौरवमाह । न हीति । द्वैरूप्याऽवभासश्चाऽत्राऽपि विवेकिनामस्त्येवेति भावः । चित्राऽऽदिशब्दवच्चाऽहं शब्दस्य शबलवाचित्वाच्च शब्दद्वयप्रयोगः ॥ ३७ ॥

मू० ॥ अनुभूतियुक्त्यनुमितित्रितया-

दितरेतराऽध्यसनसिद्धिरतः ॥

चितिचेत्यवस्तुयुगलस्य न चे-

त्रितयस्य बाधनमिहाऽऽपतति ॥ ३८ ॥

टी० ॥ उपपादितमितरेतराऽध्यासं सोपपत्तिकमुपसंहरति ॥ अनुभूतीति ॥ अस्मात्पूर्वोक्ताऽनुभवयुक्त्यनुमानरूपात्त्रितयाच्चितिचेत्ययुगलेतरेतराऽध्याससिद्धिरन्यथा त्रितयस्याऽपि बाधाऽऽपत्तेरित्यर्थः ॥ ३८ ॥

मू० ॥ सदृशांऽशपराग्विषयेषु चे-

द्भवति दोषवशाज्जगति भ्रमः ॥

भवतु तत्सकलं वदितुं वयं

तदुपचारवशाद् दृषि शक्नुमः ॥ ३९ ॥

टी० ॥ नन्वज्ञातत्वे सादृश्याऽऽदिरहितस्य निरंशस्य प्रतीचो विषयिणः कथमध्यासाऽधिष्ठानत्वं लोके सदृशसाऽवयवपराग्विषयाणामेव शुक्त्यादीनामधिष्ठानत्वदर्शनादिति शङ्कते ॥ सदृशेति ॥ कथं चित्सादृश्याऽऽदिसंपादनेन प्रौढ्या परिहरति ॥ भवत्विति ॥ उपचारो व्यवहारः तत्साम-

Digitized by Google

र्थोच्चिद्रूपेऽप्यात्मनि तत्सर्वं सुवचमित्यर्थः ॥ तथाह्यन्तःकरणस्य देहे-न्द्रियाऽपेक्षया प्रत्यक्त्वं स्वच्छत्वं चाऽस्ति चैतन्यसान्निध्यम् ॥ सांऽशत्वम-पि चैतन्यस्याऽविद्यावशादखण्डस्याऽपि जीवत्वब्रह्मत्वाऽऽद्यात्मकमस्ति-परात्त्वमपि साऽऽभासान्तःकरणे तदविविक्तत्वेन स्पष्टीभावाद्विषयता-मिवाऽऽपन्नस्य शक्यमुत्प्रेक्षितुमनादित्वाच्च पूर्वपूर्वाऽपेक्षया सर्वमिदमुत्त-रोत्तराऽध्यासे शक्यसमर्थनमितिभावः ॥ ३९ ॥

मू० ॥ अपि च भाष्यकृदेव तदब्रवी-
द्विषयताऽऽद्युपचारसमाश्रयात् ॥
स्ववचसैव न तावदिति ब्रुव-
न्सकलमात्मनि विभ्रमसिद्धये ॥ ४० ॥

टी० ॥ उक्तपरिहारस्याऽपसिद्धाऽन्तत्वशङ्कामपनयति ॥ अपि चेति ॥ न तावदस्मत्कल्पितोऽयंपरिहारः किं तु भाष्यकृदेवोपचारमाश्रित्य सर्वमिदं विषयत्वाऽऽदिकमात्मनि विभ्रमसिध्यर्थमब्रवीदित्यर्थः ॥ न च भाष्यकृदु-क्तिरनुपलब्धिबाधितेत्याह ॥ स्ववचसेति ॥ कण्ठरवेणैव न त्वभिप्रायग-त्येत्यर्थः ॥ भाष्योक्तिमाह ॥ न तावदिति ॥ अध्यासभाष्ये कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणामित्याक्षिप्य न तावदयमेका-न्तेनाऽविषयोऽस्मत्प्रत्ययविषयत्वादिति ब्रुवन्नित्यर्थः ॥ अस्मत्प्रत्ययोऽन्तः-करणं तत्राऽभिव्यक्तः सन्विषय इव भवति स ह्यविद्यायामाभासाऽविवेकेन सूक्ष्मप्रतिबिम्बाऽऽत्मना प्रविष्टोऽस्पष्टोऽपि प्रत्युपाधौ साऽऽभासान्तःकरणे स्थूलप्रतिबिम्बाऽऽत्मना प्रविष्टः सञ्छीतभानौ स्वर्भानुवदभिव्यक्तः स्वप्र-काशोऽपि स्पष्टीभावमात्रेणोपचारादस्मत्प्रत्ययविषय इत्युच्यते ॥ ४० ॥

मू० ॥ अपरोक्षरूपविषयभ्रमधी-
रपरोक्षमास्पदमपेक्ष्य भवेत् ॥
मनसः स्वतो नयनतो यदि वा
स्वपनभ्रमाऽऽदिषु तथा प्रथितेः * ॥ ४१ ॥

* प्रथते ॥ पा० २

टी० ॥ एतच्चाऽभ्युपेत्योक्तं वस्तुतस्त्वपरोक्षाऽध्यासेऽधिष्ठानाऽऽ-परोक्ष्यं तन्त्रं न तु सादृश्याऽऽदिधीरित्याऽऽह ॥ अपरोक्षेति ॥ अपरोक्षरूपा-ऽपरोक्षविषया च भ्रमधीरपरोक्षाऽधिष्ठानमात्रमपेक्षते नत्वारोप्याऽधिष्ठा-नयोरैकेन्द्रियग्राह्यत्वसादृश्याऽऽदिकमपि व्यभिचारादित्यर्थः ॥ नन्विन्द्रि-याऽगोचरस्याऽऽत्मनोऽपरोक्षत्वमपि दुर्घटमित्याशङ्क्याऽऽह ॥ मनसइति ॥ यदि वेति व्यवस्थाऽर्थं क्व चिन्मनसः क्व चित्स्वतः क्व चिच्चक्षुरादित इत्यर्थः ॥ क्वेदमवधारितमित्यत्राऽऽह ॥ स्वपनेति ॥ ४१ ॥

मू० ॥ स्वतोऽपरोक्षा चितिरत्र विभ्रम-

स्तथापि रूपाऽऽकृतिरेव जायते ॥

यतो निमित्तं स्वपने मुहुर्मुहु-

र्विनाऽपि चक्षुर्विषयं स्वमास्पदम् ॥ ४२ ॥

टी० ॥ नन्वात्मभिन्नस्य स्वतोऽपरोक्षत्वाऽभावात्तादृशेऽध्यासः क्व संप्रतिपन्न इत्याशङ्क्याऽऽत्मनि चैवं विचित्राश्च हीति न्यायसिद्धत्वात्स्वप्न-भ्रम इत्याह ॥ स्वत इति ॥ चितिस्तावद्ग्राहकाऽन्तराऽभावात्स्वसत्तायां संश-याऽऽदिराहित्यात्स्वयं ज्योतिष्ट्वश्रुतेश्च स्वतोऽपरोक्षा रूपाऽऽदिहीनतया सादृश्याऽऽदिशून्या स्वप्नभ्रमाऽधिष्ठानम् ॥ तथाऽप्यत्र चितौ स्वप्ने निद्रा-दोषाद्रूपाऽऽकाकार एव भ्रमः चक्षुर्विषयं मनोनिमित्तं वा रूपवदधिष्ठानं विनाऽपि पुनः पुनर्जायते ॥ स हि स्वप्नो भूत्वेति श्रुतेः ॥ यद्वा चक्षुरादि-व्यापारोपरमात्कथं रूपाऽऽकृतिरित्यत्राऽऽह ॥ मनोनिमित्तमिति ॥ मनो-गतरूपाऽऽदिवासनानिमित्तमित्यर्थः ॥ स्वप्ने तैजसजीवभोग्यत्वेन वासना-पुञ्जशेषस्य मनसोऽवस्थानात् ॥ अत्रेदं विचारणीयं किं ब्रह्मचैतन्यं स्वप्नभ्रमाऽधिष्ठानम् उत जीवचैतन्यमिति ॥ आद्ये व्यावहारिकः सब्रह्मा-नसत्ताकः स्वप्नप्रपञ्चः स्यात् ॥ अन्त्येऽपि किं जागरे तस्य बाधः किं वा लय इति ॥ अत्र वदन्ति ॥ अवस्थात्रयाऽऽविष्टं ह्यात्मचैतन्यं भवति स्थूला-ऽन्तःकरणोपहितं जागरे वासनाविशिष्टाऽन्तःकरणोपहितं स्वप्ने सुषुप्तौ च सूक्ष्मतदुपहितम् इति तत्र जाग्रदवस्थोचितं चैतन्यं स्वप्नभ्रमाधिष्ठानं

जागराऽऽदौ चाऽहं चैत्र इति तादृगधिष्ठानबोधात्तद्बाधः ॥ एवं च स्वप्नस्य जाग्रत्प्रपञ्चवैलक्षण्यं सति प्रमातरि बाध्यत्वं वक्ष्यमाणमुपपत्स्यते स्वप्नाऽन्ते सुषुप्तिश्चेत् स्वप्नसृष्टेर्लय एव तदभिप्रायेण च वक्ष्यति क्षीणे तु तत्र लयमेतीत्यादीति न पूर्वोत्तरविरोधः ॥ बुद्ध्याऽऽद्युपहितजीवरूपं हि तत्सृष्ट्वा तदेवाऽनुप्राऽविशदित्यादिश्रुतेरीशकल्पितत्वेन व्यावहारिकत्वा-च्छुक्त्यादिवदधिष्ठानत्वयोग्यं तन्निष्ठाश्च जीवकल्पिताऽज्ञानाऽवस्थाः स्वप्नभ्रमोपादानभूता अहं चैत्र इत्यादिजाग्रद्बोधेन बाध्यन्ते ॥ शुक्तिज्ञानेनेव रजतोपादानाऽज्ञानाऽवस्था इति ॥ न चैवं सत्यहं गजोऽहं नील इति स्वप्नाऽऽकाराऽपत्तिरिति वाच्यम् ॥ न हि स्वप्नः सर्वोऽपि तादात्म्याऽ-ध्यासः किं तु जाग्रत्संस्काराऽनुसारात्क्व चित्तथा कश्चित्तु संसर्गाऽध्यासो-ऽयं राजाऽयं गजो मम क्षेत्रमिति तदाकारदर्शनादिति ॥ तदिदमापात-रमणीयम् ॥ तथा हि ॥ न तावदीशकल्पितस्थूलाऽन्तःकरणोपहितं चैतन्यं स्वप्नकालेऽस्ति यत्तदधिष्ठानं स्याच्चाऽपि तज्ज्ञानं जागराऽऽदिजन्यं स्वप्न-भ्रमबाधकं भवितुमर्हति तद्धि किं साक्षिज्ञानमविद्यावृत्तिरन्तःकरणवृ-त्तिर्वा ॥ नाऽऽद्यौ तयोरज्ञानाऽनिवर्तकत्वेनाऽबाधकत्वात् । नाऽन्त्यः अन्तःकरणवृत्तेरज्ञातबोधत्वादन्तःकरणस्य चाऽज्ञातसत्ताऽनभ्युपगमेन प्र-माणाऽवेद्यत्वात् स्वस्मिंश्च स्ववृत्तेरसंभवादित्यलमसङ्ग्रहेण ॥ के चिद-वच्छिन्नाऽनवच्छिन्नसाधारणं चिन्मात्रं स्वप्नाऽधिष्ठानमाहुः तच्च साधारण-चिन्मात्रस्य परस्परविरोधेहीत्यादिन्यायेन दुर्निरूपत्वादेव नोपपद्यत इति किं प्रपञ्चेन शरीराऽवच्छिन्नं चैतन्यं तदधिष्ठानमित्यपरे तदतिस्थवीयः ॥ न हि जागराऽऽदौ शरीरबोधं विना स्वप्नाऽनिवृत्तिः ॥ घटज्ञानादपि तन्निवृत्तेः ॥ अन्ये त्वाहुः ॥ अन्तःकरणोपलक्षितं चैतन्यमधिष्ठानमिति तन्मते शुद्धचित्त एवाऽधिष्ठानत्वाज्जागरे स्वप्नस्य न बाधः स्यात्तथा च सति प्रमातरि बाध्यत्वं नोपपद्यते तस्मादनुपहितचैतन्यं जाग्रत्प्रपञ्चाऽ-धिष्ठानं तदुपहितं तु स्वप्नप्रपञ्चाऽधिष्ठानमिति वृद्धाः ॥ एवं च जागरा-ऽऽदाववश्यकजाग्रद्वस्तूपहितचिद्गोचरप्रमाणवृत्त्या सति प्रमातरि स्वप्नबाध उपपद्यते तत्र चाऽधिष्ठानताऽवच्छेदकं घटत्वाऽऽद्येवजाग्रद्वस्तूपहितत्व-

मुपलक्षणं सर्वनामशक्तो बुद्धिस्थत्ववत् ॥ तथा च जाग्रदनुभूतवस्तूपहि-
तमेव ब्रह्मचैतन्यमिन्द्रियोपरमात्तथात्वेनाऽप्रथमानमुपाधेस्तटस्थत्वात्स्वच्छ-
पमात्रेण प्रथमानचिद्रादिदोषजाग्रत्संस्काराऽदृष्टसहकृताऽज्ञानेन सूक्ष्मप्र-
पञ्चाऽऽत्मना निवर्तमानं स्वेनैव भासते अस्य लोकस्य सर्वावतो मात्रा-
मुपादायेति श्रुतेः ॥ अत्र तिरोहितजाग्रदुपाधिविशेषस्य चैतन्यमात्रस्य
स्वतोऽपरोक्षस्फुरणयैवाऽधिष्ठानसामान्यज्ञानमज्ञातोपाधेश्चोपहिताऽनव-
भासादधिष्ठानताऽवच्छेदकजाग्रद्घटाऽऽद्याकारधिया बाधः ॥ मूलाऽज्ञा-
नाऽकार्यत्वादविद्याऽतिरिक्तदोषजन्यत्वाच्च स्वप्नस्य न व्यावहारिकतेति
दिक् ॥ ४२ ॥

मू० ॥ मनोऽवगम्येऽप्यपरोक्षताबला-
तथाम्बरे रूपमुपोल्लिखभ्रमः ॥
सिताऽऽदिभेदैर्बहुधा समीक्ष्यते
यथाऽक्षिगम्ये रजताऽऽदिविभ्रमः ॥ ४३ ॥

टी० ॥ आरोप्याऽधिष्ठानयोरेकेन्द्रियग्राह्यत्वस्य व्यभिचारं वक्तुं
मनःप्रमाणत्वाऽभ्युपेत्यवादेन मानसे नभसि चाक्षुषाऽध्यासं दर्शयति ॥
मनोऽवगम्येऽपीति मानसाऽपरोक्षेऽप्यम्बरेऽधिष्ठानेऽपरोक्षतामात्रसामर्थ्या-
च्चाक्षुषं नभो नीलं नभ इति नानारूपोल्लेखी भ्रमो दृश्यतेऽतोनोक्तनियम-
इत्यर्थः ॥ एवं स्वतोऽपरोक्षे मनोऽपरोक्षे च स्वप्नभ्रमनभोनैल्यभ्रमानुदा-
हृत्य नयनज इत्यस्योदाहरणमाह ॥ यथाऽक्षिगम्य इति व्याख्यातम् ॥
ननु नाऽऽकाशो मानसः बाह्यत्वान्मनसो बहिरस्वातन्त्र्यादपि तु साक्षि-
वेद्य एवेति चेन्न बाह्यस्य प्रमाणेनैव ज्ञाततया साक्षिवेद्यत्वान्नभसश्च
बहिरिन्द्रियाऽगोचरस्य मानसत्वमन्तरेणाऽज्ञाततयैव भानप्रसङ्गात्तदुक्तम् ॥
ज्ञाततया विषयः प्रमाणव्यवधानमपेक्षत इति ॥ कथं तर्हि सुखाऽऽदेः
कल्पितरजताऽऽदेश्च ज्ञातत्वेनाऽनुभव इति चेत्तेषामान्तरत्वेनाऽनावृतत्वा-
द्बाह्यस्य तु नभसो घटाऽऽदिवदावृतत्वेनाऽऽवरणभङ्गाय प्रमाणाऽपेक्षणा-
न्मनोवेद्यत्वमगत्याऽभ्युपेयम् ॥ न च तस्य बहिरस्वातन्त्र्यं मनसा ह्येव

पश्यतीत्यादिश्रुत्या बाह्यानामपि मनोवेद्यताया दर्शितत्वाद्बहिरस्वातः-न्त्र्योक्तिश्च केवलमनोविषया । न चाऽनर्पिताऽऽकारं मनः साक्षात्कार-समर्थमिति चक्षुरेव तत्राऽऽकाराऽर्पकमुपेयम् ॥ ननु कथं नीरूपे नभसि चक्षुषः प्रवृत्तिस्तस्य रूपपुरस्कारेणैव द्रव्येषु प्रवृत्तेरिति चेत् सत्यमेतच्च स्वीयरूपपुरस्कारेणेत्यत्र किं चिन्नियामकमस्ति । पीतः शङ्खो रक्तः स्फटिक इत्यन्यरूपद्वाराऽपि चक्षुःप्रवृत्तिदर्शनात् । न च तत्र रूपवृत्तेः शौक्ल्यस्ये-वाऽभिभवो न रूपस्येति वाच्यम् । तथाप्युद्भूताऽभिभूतरूपस्पर्शस्य सुवर्ण-स्याऽचाक्षुषत्वप्रसङ्गात्ततश्चाऽऽलोकाऽऽदिरूपोपहिते नभसि तद्द्वाराऽपि चक्षुःप्रवृत्त्यविरोधः । अप्रत्यक्षेऽपि ह्याकाश इति भाष्यं तु रूपाऽनुपधान-कालाऽभिप्रायं परमतेन वा ॥ न चाऽन्यरूपद्वाराऽपि रूपवत्स्वेव चक्षुःप्रवृत्ति-र्गौरवादुद्भूतरूपं गृह्णदेव चक्षुः प्रवर्तते न तूद्भूतरूपवत्स्वेवेति । अस्तु तर्हि चाक्षुषमेव नभ इति चेन्न । अरूपिद्रव्यत्वान्महत्त्वे सत्युद्भूतरूपवत्त्वस्य द्रव्यचाक्षुषत्वे तन्त्रत्वात् । ततश्चाऽत्र रूपद्वारकचक्षुरर्पिताऽऽकाशाऽऽकार-मनोवृत्तिविषयत्वे नीलत्वाऽऽद्यारोप इति भावः ॥ एवं तमोऽपि मान-समालोकं विना रूपिग्रहे चक्षुषोऽसामर्थ्यादिति संक्षेपः ॥ ४३ ॥

मू० ॥ ज्ञातेऽपि तावति ततोऽनतिरिक्तरूपेऽ-
प्यज्ञानतः स्फुरणमस्फुरणं च दृष्टम् ॥
दूरस्थयोर्ननु वनस्पतिवस्तुनोस्त-
द्भेदो न दृष्टिविषयोऽवगते च ते नः ॥ ४४ ॥

टी० ॥ तथापि ज्ञातसामान्यांऽशमज्ञातविशेषांऽशमधिष्ठानं न चा-ऽऽत्मनो निरंशस्य तत्संभव इत्याशङ्क्याऽभेदेऽपि ज्ञाताऽज्ञातत्वसंभवमुप-पादयति ॥ ज्ञातेऽपीति ॥ तावति तन्मात्रे तदभिन्न इत्यर्थः ॥ ईदृशे वस्तुनि ज्ञातेऽप्यज्ञानवशात्तस्यैव स्फुरणमस्फुरणं च दृष्टमित्यर्थः ॥ कुत्र दृष्टमित्य-त्राऽऽह ॥ दूरस्थयोरिति ॥ दूरस्थे वनस्पतिद्वये एकोऽयं वनस्पतिरिति भ्रमो भवति तत्र चाऽनवस्थाभयादन्योऽन्याऽभावप्रतियोगिप्रमाणयोरनिरूप-णाच्च भेदस्य वनस्पतिरूपाऽनतिरेकात्तत्स्फुरणेऽपि भेदाऽस्फुरणं दृष्ट-

Digitized by Google

मित्यर्थः ॥ ते वनस्पतिवस्तुनी मेोऽस्माकमवगते तयोर्भेदस्तु तदभिन्नोऽपि न दृष्टिविषय इत्यर्थः ॥ ननु तत्राऽपि वनस्पतित्वेन स्फुरणं भेदत्वेनाऽस्फुरणं तच्च भिन्नमेवेत्याशङ्क्याऽऽह ॥ तत इति । शब्दान्तराऽभिलप्यत्वेन भेदेऽपि स्वरूपेणाऽभिन्नमेव भेदरूपं वनस्पतिरूपादित्यर्थः ॥ इतश्च ज्ञातस्याऽज्ञातत्वं न विरुद्धं त्वदुक्तमर्थं न जानामीत्यर्थे भासमान एव तदज्ञानाऽनुभवात् ज्ञानवदज्ञानस्याऽपि विषयनिरूप्यत्वात्सविषयके च विषयस्यैव विशेषणत्वात् ज्ञानस्य च विशेषणत्वात् ॥ न च तत्र ज्ञातसामान्यांऽश एवाऽज्ञाननिरूपकस्तस्य प्रमाणाऽवगतस्याऽज्ञानाऽविषयत्वात् परबुद्धिस्थविशेषस्याऽशक्यज्ञानत्वात्कथं विशेषणत्वमिति चेन्न ॥ अज्ञाततया साक्षिवेद्यत्वाऽविरोधात् ॥ आवृतचितेरज्ञानाऽविरोधस्याऽनुभवसिद्धत्वाच्च परैरप्यनभ्यासदशायां ज्ञातेऽपि जलाऽऽदौ संशयाऽभ्युपगमादिति दिक् ॥ ४४ ॥

मू० ॥ यत्राऽपि दैवगतितोऽस्त्यतिरिक्तभावो
रूपात्प्रतीतिविषयादितरश्च रूपे ॥
तत्राऽप्यबोधघटनां प्रति नाऽङ्गभाव-
स्तस्याऽतिरिक्तवपुषोऽपुनरुक्तरूपात् ॥ ४५ ॥

टी० ॥ ननु शुक्त्यादौ ज्ञाताऽज्ञातांऽशयोरियं शुक्तिरिति शब्दद्वयवाच्यत्वेन भेददर्शनान्नैकस्य ज्ञाताऽज्ञातत्वमित्याशङ्क्य तत्र सत्यप्यंशभेदस्त्वप्रयोजक इत्याह ॥ यत्राऽपीति ॥ यत्राऽपि शुक्त्यादौ प्रतीतादिदंरूपादितरत्राऽप्रतीते विशेषांऽशे दैवाद्भेदो विद्यते तत्राऽपि तस्य भेदस्याऽपुनरुक्तशब्दवाच्यादिदंरूपादतिरिक्तवपुषः शुक्त्यादेरज्ञाततां प्रति नाऽङ्गत्वमित्यर्थः ॥ ४५ ॥

मू० ॥ शुक्तीदमंशात्पृथगप्रतीता
त्रिकोणतास्यान्ननु वस्तुवृत्त्या ॥
तथापि तत्स्थं न पृथक्त्वमिष्टं
तदप्रबुद्धत्वनिमित्तभूतम् ॥ ४६ ॥

टी० ॥ इदंत्वशुक्तित्वधर्मभेद एव ज्ञाताऽज्ञातत्वाऽवच्छेदक इति चेवेत्याह ॥ शुक्तीदमंशादिति ॥ अप्रतीता त्रिकोणता शुक्तित्वं यद्यपि प्रतीताच्छुक्तीदंत्वाद्वस्तुतः पृथक् तथापि तत्स्थं पृथक्त्वं तस्याः शुक्तिताया अप्रबुद्धत्वे निमित्तं नेष्टमिति संबन्धः ॥ ४६ ॥

मू० ॥ यतः प्रपश्यन्नपि भेदिनः स्वं
वनस्पते रूपमभिन्नमस्मात् ॥
न भेदमस्य प्रतिपद्यतेऽद्धा
वनस्पतेः पार्श्वगतात्परस्मात् ॥ ४७ ॥

टी० ॥ कथं नेष्टमिति चेदुक्तव्यभिचारादेवेत्याह ॥ यत इति ॥ यस्माद्भेदवतो वनस्पतेः स्वं रूपं प्रपश्यन्नप्यस्माद्वनस्पतेः सकाशादभिन्नं पार्श्वस्थाद्वनस्पतेः सकाशादस्य भेदमद्धा न प्रतिपद्यते स्वतो धर्मधर्म्य-भेदेऽपि ज्ञाताऽज्ञातत्वऽदर्शनात्तद्भेदोऽप्रबुद्धत्वाऽनङ्गमित्यर्थः ॥ ४७ ॥

मू० ॥ सप्रत्यभिज्ञनयनोत्थधियो घटाऽऽदेः
स्वाभाविकात्स्ववपुषोऽनतिरिक्तरूपः ॥
स्थेमाऽप्रबोधविषयो विषयत्वमेती-
त्यङ्गीकृतं ननु मितेऽपि घटाऽऽदिकेऽर्थे ॥ ४८ ॥

टी० ॥ स्वभिन्नभेदवादिमतेऽपि ज्ञातस्याऽज्ञातत्वमविरुद्धमित्या-ह ॥ सप्रत्यभिज्ञेति ॥ मितेऽपि प्रमाणाविश्चितेऽपि घटाऽऽद्यर्थे तस्यैव घटाऽऽदेः स्वाभाविकात्स्ववपुषः स्वरूपादनतिरिक्तः स्थेमा स्थिरत्वमभेदः पूर्वमप्रबुद्धोऽपि सप्रत्यभिज्ञस्य पुंसो नयनोत्था या धीः सोऽयं घट इति प्रत्यभिज्ञाऽऽत्मिका तस्याः पश्चाद्विषयो भवतीति सर्वैरप्यङ्गीकृतमित्यर्थः । अथवा प्रत्यभिज्ञा संस्कारः तत्सहितनयनोत्थधिय इत्यर्थः ॥ न हि स्थैर्यं नाम कश्चिद्गुणः क्रिया धर्मान्तरं वा अपि तु वस्तुस्वरूपमेव पूर्वाऽपर-कालसंबन्धं निमित्तीकृत्य स्थेमोच्यते ॥ एवं च क्षणिकवादिनां प्रत्यक्षेऽपि घटाऽऽदौ तदभिन्नस्थैर्याऽज्ञानं चेत् ज्ञानसाम्राज्यसीमनि प्रतीचि ज्ञाते-ऽज्ञानाऽविरोध इति किमु वक्तव्यमिति भावः ॥ ४८ ॥

मू० ॥ एवं स्फुरत्यपि दृगात्मनि तत्स्वरूपे-

णाऽस्फूर्तिभाजि परिकल्पिततोपपन्ना ॥

स्वाऽज्ञानतो जगदिदं परमेश्वरोऽसौ

जीवोऽहमित्यपि विभागवतोऽल्पकस्य ॥ ४६ ॥

टी० ॥ एवं च निरंशस्याऽपि सिद्धमात्मनोऽधिष्ठानत्वमित्युपसं. हरति ॥ एवमिति ॥ प्रत्यगनिदंरूपेण स्फुरत्यपि चिदात्मनि नित्यमुक्ताऽद्वयाऽऽनन्दरूपेणाऽस्फूर्तिभाजि अधिष्ठाने स्वाऽज्ञानमात्रदोषादल्पकस्याऽहङ्कारादेरध्यस्तता प्रागुक्तयुक्तिभिरुपपन्नेत्यर्थः ॥ अल्पकं रूपं विशिनष्टि॥ जगदिति ॥ इदमिति साक्षिसिद्धत्वादसाविति परोक्षत्वाद्विभागो नानात्वं तद्वत इत्यर्थः ॥ यद्यपि स्फुरति चिदात्मनि नाऽस्ति न भातीति व्यवहारयोग्यतालक्षणमावरणं नाऽस्ति विरोधात् ॥ तथापि तदत्यन्ताऽभिन्नेऽप्यद्वयाऽऽनन्दरूपेऽननुभूयमानत्वादेव तदङ्गीक्रियते न ह्यज्ञानाऽऽवृतत्वं तद्वेष्टितत्वं येन विरोधः स्यात्किं तूक्तव्यवहारयोग्यत्वमेवेति भावः ॥ ४९॥

मू० ॥ अल्पं रूपं बन्धनं प्रत्यगात्मा

बद्धोऽनेन स्वच्छचैतन्यमूर्तिः ॥

स्वाऽऽत्माऽज्ञानं कारणं बन्धनेऽस्य

स्वाऽऽत्मज्ञानात्तन्निवृत्तिश्च मुक्तिः ॥ ५० ॥

टी० ॥ एवमल्परूपस्याऽध्यस्तत्वे साधिते बन्धतदनर्थत्वतत्कारणमुक्तितदर्थत्वतत्कारणाऽऽत्मकं षट्कं सिद्धमित्याह ॥ अल्पं रूपमिति ॥ अल्पं परिच्छिन्नं कर्तृत्वाऽऽदि रूप्यत इति रूपं यच्चामरूपकर्माऽऽत्मकं तदस्य भूम्नो बन्धनमिवबन्धनमित्यर्थः । ननु कुतोऽस्याऽल्परूपस्याऽनर्थत्वमित्याह ॥ बद्ध इति ॥ अनेन ह्यल्परूपेण धर्मधर्म्यध्यासाऽऽत्मकेनाऽऽत्मा बद्धो नियन्त्रितः ॥ स्वच्छोऽप्यस्वच्छ इव विज्ञोऽप्यज्ञ इवाऽऽनन्दोऽप्यशनयाऽऽदिविविधदुःखदावदहनप्रदीप्तशिरा इवाऽनिशं बम्भ्रमीति ॥ ननु कूटस्थाऽसङ्गचिदेकरसः सन् कथमयमीदृशीं दशामापन्न इत्यत्राऽऽह ॥ स्वाऽऽत्मा-

Digitized by Google

ऽज्ञानमिति ॥ स्वाऽऽश्रयविषयाऽज्ञानमेवाऽस्याऽऽत्मनो बन्धकारणं नाऽन्यदित्यर्थः ॥ नन्वीदृशस्य सहजमोहाऽन्धकूपमग्नस्य विवशस्य कुतो बन्धविच्छित्तिः स्यादित्यत्राऽऽह ॥ स्वाऽऽत्मेति ॥ स्वाऽऽत्मनोऽद्वयाऽऽनन्दब्रह्माऽभेदेन यज्ज्ञानं तत एवाऽस्य समूलबन्धनिवृत्तिरित्यर्थः ॥ तस्या उपाऽऽदेयत्वमाह ॥ मुक्तिरिति ॥ सा हि मुक्तिरखिलाऽनर्थनिर्मुक्तपूर्णाऽऽनन्दाऽवाऽऽप्तिरूपत्वात्परमपुरुषाऽर्थ इत्यर्थः ॥ ५० ॥

मू० ॥ अज्ञानमप्यविदुषोऽस्य न तु स्वतोऽस्ति
चैतन्यनिर्विकृतिताऽद्वयताविरोधात् ॥
अज्ञाततोऽप्यनवबोधनिबन्धनैव
नाऽऽत्माऽऽश्रयत्वमपि चोदयितव्यमत्र ॥ ५१ ॥

टी० ॥ नन्वनादिभावरूपस्याऽज्ञानस्य ब्रह्मवदेव निवृत्त्यसंभवात्कुतः तन्निवृत्तिरूपा मुक्तिः फलमित्याशङ्क्य तस्य मिथ्यात्वेन ज्ञाननिवर्त्यत्वं साधयति ॥ अज्ञानमपीति ॥ तथाहि । अज्ञस्य स्वाऽऽत्मन्यज्ञानमाऽन्वयः किं स्वाभाविकः कल्पितो वा नाऽऽद्य इत्याह ॥ नत्विति ॥ कुत इत्यत्राऽऽह ॥ चैतन्येति ॥ स्वभावत आत्मन्यज्ञानमस्ति चेद्वस्तुभूतं स्याच्च स्वप्रकाशचिदात्मके वस्तुतोऽज्ञानं वर्तितुमर्हति ॥ प्रकाशतमसोर्विरोधात् ॥ तथाऽज्ञानमात्मधर्मश्चेत्स्वयं विनश्यदात्मानं विकुर्यात् ॥ उपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायात्तथाऽज्ञानस्य वस्तुत्वे द्वैताऽऽपत्तिरिति चित्त्वनिर्विकारत्वाऽद्वयत्वश्रुतिविरोध इत्यर्थः ॥ द्वितीयमङ्गीकरोति ॥ अज्ञाततोऽपीति ॥ अपिस्त्वर्थः ॥ तथात्वे हि मध्यन्दिनाऽऽलोकमण्डलेकौशिकाऽऽदिकल्पिताऽन्धकारवदविरोधः स्यादिति भावः । नन्वेवमज्ञानेनैवाऽज्ञानकल्पनायामात्माऽऽश्रयत्वमिति नेत्याह ॥ नाऽऽत्मेति ॥ अनादि ह्यज्ञानमज्ञानतत्त्वमज्ञातत्वमप्यनादीतिनाऽऽत्माश्रय इति भावः ॥ यद्वा अत्राऽनिर्वचनीयवादे नाऽनुपपत्तिर्दूषणमिति भावः । के चित्तु सत्कार्याऽसत्कार्यवादिनोरभिव्यक्तावुत्पत्तौ च नाऽऽत्माऽऽश्रयः सत्त्वेऽस्मिन् मायावादिन इत्यर्थमाहुः ॥ ५१ ॥

Digitized by Google

मू० ॥ द्वारं तमोऽन्वयमपेत्य दृशा हि दृश्यं
संगच्छते सकलमत्र न नो विवादः ॥
मोहोऽपि दृश्यवपुरत्र च संवदध्वे
तस्मात्तदन्वयनिमित्तमपीह मोहः ॥ ५२ ॥

टी० ॥ अज्ञानादेवाऽज्ञानकल्पने प्रमाणमाह ॥ द्वारमिति ॥ आत्मन्यज्ञानसंबन्धोऽज्ञानकृतो दृग्दृश्यसंबन्धत्वाद्घटज्ञानसंबन्धवत् प्रमाध्याहृकत्वाद्व्याप्तिसूचनार्थो हि शब्दः ॥ अयमर्थः । यस्मादसङ्गया दृशा सकलमेव दृश्यं घटाऽऽदि संबध्यमानज्ञानसंबन्धं द्वारीकृत्याऽऽध्यासिकेन तादात्म्येनैव संबध्यते । अन्यस्य संयोगसमवायाऽऽदेरशक्यनिरूपणत्वादिति वक्ष्यति न संकरो नाऽपि च संयुतिस्तयोरित्यादि । आत्मनोऽनात्मना योगो वास्तवो नोपपद्यत इति च वार्तिकं तस्मादत्र व्याप्तौ विवदितव्यमित्यर्थः । हेत्वसिद्धिमुद्धरति । मोहोऽपीति । अहमज्ञ इत्यनुभवादित्यर्थः । अत्र चेति । व्याप्तौ विवादो न तु हेतोः पक्षधर्मत्वे इत्यर्थः । ततश्चाऽत्राऽपि मोहनिमित्तत्वमिति निगमयति । तस्मादिति ॥ ५२ ॥

मू० ॥ संविद्धुरं वहति तद्विषयोपयुक्तां
स्वाऽऽत्मन्यपि स्वरसतः स्वकरूपसिद्धेः ॥
कार्यप्रपञ्चपरिकल्पनमात्ममोहा-
न्मोहप्रकल्पनमपीति तथोपपन्नम् ॥ ५३ ॥

टी० ॥ ननु कथं प्रपञ्चकल्पनोपपत्तीवास्याऽज्ञानस्य स्वकल्पकत्वमपीत्याशङ्क्य स्वपरनिर्वाहकस्वभावत्वादित्याह ॥ संविदिति । यथा हि प्रमाणफलभूता संवित्स्वविषयघटाऽऽदिसिद्धौ स्वसिद्धौ चोपयुक्तां धुरं तद्विषयाऽज्ञानसंशयादिनिवृत्तिभावं वहत्युभयमपि साधयतीत्यर्थः । एवमज्ञानादेव प्रपञ्चकल्पनमज्ञानकल्पनं चोपपन्नमित्यर्थः । ननु संवित्संविदन्तरवेद्यैव स्वस्य स्वविषयत्वाऽसंभवादित्याशङ्क्याऽऽह । स्वरसत

इति । संविदन्तरवेद्यत्वेऽनवस्थानात्स्वसत्तायां संशयाऽऽदिराहित्यात्स्वव्यवहारे पराऽनपेक्षैव संविदित्याद्युक्तप्रायम् ॥ ५३ ॥

मू० ॥ आत्मा प्रसाधयति वेद्यपदार्थजातं

स्वाऽऽत्मानमप्यवगतिक्षमशक्तियोगात् ॥

स्वाऽज्ञानमेवमिदमात्मपरप्रक्लृप्तौ

शक्तं भवेदिति न किं च न दोस्थ्यमस्ति ॥ ५४ ॥

टी० ॥ संवित्स्वप्रकाशत्वे विप्रतिपन्नं प्रति निदर्शनाऽन्तरमाह ॥ आत्मेति ॥ यथा वेद्यं घटाऽऽदिकं स्वं चाऽवगतिसमर्थज्ञानाऽऽख्यगुणयोगात्साधयति । आत्मकार्यव्यवहारसहकारित्वात् । ज्ञानं शक्तिरित्युक्तम् । एवमज्ञानमपि शक्तिवशात्स्वपरकल्पकं स्यादित्यर्थः ॥ ५४ ॥

मू० ॥ भेदं च भेद्यं च भिनत्ति भेदो

यथैव भेदाऽन्तरमन्तरेण ॥

मोहं च कार्यं च बिभर्ति मोह-

स्तथैव मोहाऽन्तरमन्तरेण ॥ ५५ ॥

टी० ॥ नन्वात्मनोऽज्ञानाऽऽख्यशक्तिमत्त्वादस्तु स्वपरसाधकत्वमज्ञानस्य तु परशक्तिभूतस्य शक्त्यन्तराऽभावादज्ञानाऽन्तरमेवाऽज्ञानसाधकमुपेयमेवञ्चाऽनवस्थेत्याशङ्क्य परदृष्ट्यैव दृष्टाऽन्ताऽन्तरमाह ॥ भेदं चेति । यथैव हि भेदोऽन्योन्याऽऽभावो भेद्यं घटपटद्वयं मिथो भिन्नं बोधयति । आत्मानमपि भेदं घटाऽऽदेर्भेद्यात्सकाशाद्भिनत्ति न तु स्वप्रतियोगिकं भेदाऽन्तरमपेक्षते । अनवस्थानात्तथा मोहोऽपि मोहाऽन्तरं विना मोहं तत्कार्यं कल्पयतीत्यर्थः ॥ ५५ ॥

मू० ॥ ब्रह्मज्ञानं सूचयन्सूत्रकारो

बन्धोत्पत्तेर्हेतुविध्वंसनाय ॥

एतत्सर्वं सूचयामास तस्मा-

देतत्सर्वं भाषते भाष्यकारः ॥ ५६ ॥

Digitized by Google

टी० ॥ एवं भाष्योक्ते बन्धमिथ्यात्वे साधिते यदि शास्त्राऽऽरम्भोपोद्घात आदावध्यासः किमिति सूत्रकृतोपेक्षित इत्याशङ्क्य सूत्रेष्वेव हि तत्सर्वमिति न्यायादसौ तस्य भाष्यविषयत्वाऽयोगादर्थगत्या सूचित एवेत्याह ॥ ब्रह्मज्ञानमिति । अथाऽतो ब्रह्मजिज्ञासेति मुमुक्षोर्ब्रह्मजिज्ञासोपदेशादधिकारिविशेषणस्य मोक्षस्य बन्धहेत्वज्ञानध्वंसाऽऽत्मकस्य ब्रह्मज्ञानसाधकमिति सूत्रयन्बन्धस्य सत्यत्वे ज्ञाननिवर्त्यत्वाऽनुपपत्तेः । एतत्सर्वं पूर्वोक्ताऽध्याससाधनप्रबन्धं मुनिः सूचयामासेत्यर्थः । तेन नाऽसूत्रिताऽर्थवर्णनं भाष्यकृत इत्याह । तस्मादिति । ननु ज्ञानमध्यस्तस्यैव निवर्तकमिति नाऽयं नियमः । पूर्वज्ञानस्योत्तरज्ञानेनेच्छायाः स्वविषयज्ञानेन शोकस्य सुहृद्दर्शनेन पापस्य सेतुदर्शनेन विषस्य गरुडध्यानेन प्रवृत्तिप्रागभावस्य प्रवर्तकज्ञानेन निवृत्तिदर्शनादिति चेन्न ॥ तत्त्वज्ञानत्वेन निवर्तकत्वस्य विवक्षितत्वादुत्तरज्ञानाऽऽदेस्तु विरोधिगुणत्वेन सिद्धत्वेन सुहृदज्ञानत्वेन विहितक्रियात्वेन प्रवृत्तिसामग्रीत्वेन यथायथं निवर्तकत्वात् । प्रकृतेऽप्यात्मज्ञानत्वेनैव निवर्तकत्वमिति चेन्नाऽऽहमिति ज्ञानादपि बन्धनिवृत्त्यापत्तेः । अहं ब्रह्माऽस्मीति ज्ञानमेव निवर्तकमिति चेत्तदेव हि तत्त्वज्ञानमात्मानं चेद्विजानीयादयमस्मीति पूरुष इत्यादिश्रुतेः । तत्त्वज्ञानत्वेन निवर्तकत्वं च न निवर्त्यस्य मिथ्यात्वं विना निर्वहति ॥ तथा हि । न तावद्बुद्ध्यादिप्रपञ्चोपहितब्रह्मज्ञानं तत्त्वज्ञानं भवति । ब्रह्मणो वस्तुतस्तथात्वाऽभावात् । किन्तु विशुद्धब्रह्मज्ञानं विशुद्धिश्च प्रपञ्चराहित्यं न च सत्यप्रपञ्चाऽऽश्रये तदानीमेव तद्राहित्यं वर्तते ॥ न चाऽवर्तमानस्य साक्षात्कारविषयत्वसंभवः । येनाऽसौ भाविनीं निष्प्रपञ्चतामवगाहेत । अस्तु प्रपञ्चोपादानत्वेन ज्ञानमेव तत्त्वज्ञानमिति चेन्न । मृदादेस्तथात्वेन ज्ञातेऽपि घटाऽऽद्यनिवृत्तेः दृष्टविपरीतस्य चाऽकल्पनात् ॥ तस्मात्प्रपञ्चसत्त्वकालेऽपि ब्रह्मणि निष्प्रपञ्चत्वप्रमा वाच्या ॥ सा च न प्रपञ्चमिथ्यात्वं विनेति ॥ तथाऽपि कथं सप्रपञ्चे प्रपञ्चराहित्यं तद्वति तदत्यन्ताऽभावाऽसत्त्वादिति चेन्न ॥ तत्समसत्ताकस्यैव तदत्यन्ताऽभावस्य तद्वत्प्रवृत्तेर्व्यावहारिकस्य च प्रपञ्चस्य स्वकालेऽपि ब्रह्मणि पारमार्थिका-

ऽत्यन्ताऽभावाऽविरोधादत एव त्रैकालिकनिषेधस्य परमाऽर्थदृष्टरजताऽभावविषयत्वमुक्तं विवरणे ॥ शुक्तौ परमार्थत्वेन दृष्टं यन्मिथ्यारजतं तत्प्रतियोगिकाऽभावाऽऽत्मकाऽधिष्ठानविषयत्वं हि तदर्थो न तु लौकिकाऽऽपणस्थरजताऽभावविषयत्वम् ॥ लौकिकस्याऽत्र निषेध्यत्वे मिथ्यात्वाऽपत्तेर्नेह नानेति श्रुत्या दृश्यमानप्रपञ्चस्य ब्रह्मणीव शुक्तौ प्रतीयमानरजतस्यैव तत्र त्रैकालिकाऽभावप्रतीतेश्च ॥ घटस्य तदभावाऽभावत्ववच्चाऽधिष्ठानस्य भावस्याऽप्यध्यस्तनिरूपिताऽभावत्वं न विरुध्यते ॥ केचित्तु रजतस्य परमाऽर्थत्वाऽऽकारेण प्रतियोगिमति यस्त्रैकालिकाऽभावस्तत्परोऽयं ग्रन्थः ॥ परमाऽर्थत्वस्य व्यधिकरणत्वे च प्रतियोगिनो मिथ्यात्वमपि सिध्यतीति व्याचक्षते सर्वथाऽप्युपपन्नः प्रपञ्चकालेऽपि ब्रह्मणि प्रपञ्चाऽभाव इति संक्षेपः ॥ ५६ ॥

मू० । तस्मादध्यस्तमेतत्सकलमपि दृशौ भूमरूपाऽतिरिक्तं
रूपं स्वाऽज्ञानमात्रादिति भवति परब्रह्मधीबाध्यमेतत् ॥
ईशित्रादिप्रभेदप्रतिहतिफलकज्ञानदोषस्याऽपनुत्त्यै
श्रीमच्छारीरकाऽर्थप्रकटनपटुताशालि शास्त्रं विदध्मः ॥ ५७ ॥

टी ॥ अध्यासवर्णकमुपसंहरन्संभावितविषयप्रयोजनत्वाच्छास्त्रारम्भं निगमयति ॥ तस्मादिति ॥ एतत्प्रत्यक्षं सकलमपि कर्तृत्वभोक्तृत्वाऽऽदि स्वाऽज्ञानमात्रादेव दोषात् ॥ दृशौ चिदात्मन्यध्यस्तं कुत इत्याह ॥ भूमेति ॥ भूमरूपे हि ब्रह्मणि अल्परूपं परत्र पराऽवभासत्वादध्यस्तमेव संभवतीत्यर्थः ॥ ततः किमित्यत आह ॥ इतीति ॥ अध्यस्ततासिद्धौ च परब्रह्मधीबाध्यत्वं सूचितं सिद्धं भवतीत्यर्थः । तेन विषयाऽऽदिसंभवात् श्रीमच्छारीरकाऽर्थब्रह्माऽऽत्मैक्यस्य यत्प्रकटनमपराधाऽपनयनेन स्फुटीकरणं तत्र यत्पटुत्वमुपपत्तिबाहुल्यं तद्युक्तं शास्त्रं समासव्यासाभ्यां चतुर्लक्षणीमयसंग्रहाच्छास्त्रकल्पं प्रकरणं कुर्म इत्यर्थः ॥ तन्निर्माणफलमाह ॥ ईशित्रादीति ॥ जीवेशाऽऽदिभेदाऽध्यासप्रतिहतिफलकवाक्योत्थज्ञानस्य यद्दौस्थ्यं प्रतिबन्धात्फलपर्यन्ततारहित्यं तन्निराकर्तुमित्यर्थः ॥ ५७ ॥ :: ॥

मू० ॥ मीमांसितव्यमनयैव सदद्वितीयं
मीमांस्यमेव च सदात्मतयाऽनयैतत् ॥
ज्ञातं प्रयोजनमनेन यथेदमस्या-
स्तन्नान्तरीयकतया च तमोनिवृत्तिः ॥ ५८ ॥

टी० ॥ आगताऽर्थवर्णकमवतारयिष्यन्नु यदि ब्रह्माऽन्यतः सिद्धं किं तद्विचारेण । अथाऽसिद्धं न शक्यं विचारयितुं वेदान्तादापातप्रतिपन्नं विचार्यमिति चेत् । केयमापातप्रतिपत्तिः । न पदजन्या ब्रह्मपदे व्युत्पत्त्यभावादत एव न तत्समभिव्याहृतवाक्यजन्या किं चिद्ब्रह्माऽस्तीति प्रतिपत्तिः सेति चेन्न । तस्या बुभुत्सामात्रहेतुत्वेन विचाराऽहेतुत्वादतो न ब्रह्म विचार्यम् । न वा बन्धनिवृत्तिस्तत्फलमित्यादावाक्षिप्य समाधत्ते मीमांसितव्यमिति । न तावदन्यतः सिद्धमेव ब्रह्मेह विचार्यं तस्योपनिषदन्यमानाऽगोचरत्वादतोऽद्वितीयं सदविचारितान्महावाक्यात्संमुग्धोपस्थितमनयैव मीमांसया मीमांसितव्यम् अखण्डाऽऽनन्दाऽऽत्मना ज्ञातव्यम् । ब्रह्मणो औपनिषदत्वेन तद्विचारस्यैव तन्निश्चायकत्वौचित्यात् ॥ ब्रह्मपदस्य बृहत्पदार्थाऽनुगमेन सर्वाऽनुवृत्तसत्तास्फुरणाऽऽत्मनि व्युत्पन्नत्वादात्मशब्दस्य च यच्चाऽऽप्नोति यदादत्त इति प्रत्यगर्थ एव प्रसिद्धेः तयोरैक्यस्य विचार्यत्वसंभवात्तद्दर्शयति ॥ मीमांस्यमेवेति । सत आत्मत्वेनाऽज्ञानादनया मीमांसया तदेवाऽऽत्माऽभेदेन मीमांस्यं नाऽन्यन्नियोगाऽऽदीत्यर्थः ॥ नन्वस्तु ब्रह्माऽऽत्मैक्यं विचार्यत्वाद्विषयः फलाऽसिद्धिस्तु तदवस्थैवेत्याशङ्क्याऽऽह । ज्ञातमिति । अनेन प्रागुक्तेन यथाऽस्या मीमांसाया इदमेव प्रत्यगभिन्नमद्वयाऽऽनन्दं ब्रह्म ज्ञातं सत्प्रयोजनं भवतीत्यर्थः । नन्वेवं बन्धनिवृत्तिर्न फलं स्यात्ततः प्रागुक्तविरोध इत्यत आह । तन्नाऽन्तरीयेति । ब्रह्माऽऽत्मबोधे सति तमोनिवृत्तेरर्थसिद्धत्वेन पृथग्व्यापाराऽनपेक्षत्वात्तुलावनमनवत्सा ऽपि पृथगुद्देश्यतया फलमित्यर्थः । ननु तमोनिवृत्तेरधिष्ठानमात्रत्वेन आत्माऽभिन्नायाः प्रागपि सत्त्वात्कथं ज्ञानसाध्यत्वमिति चेन्न ॥ यस्मिन्सत्यग्रिमक्षणे यत्सत्त्वं यदभावे चाऽभाव-

स्तस्यैव तत्साध्यत्वादस्ति च ज्ञाने सत्यपि मलक्षणोऽज्ञाननिवृत्तिरूपाऽऽत्मसत्त्वं तदभावे चाऽज्ञाननिवृत्त्यभावोऽज्ञानम् । आत्मनोऽज्ञानाऽभावत्वेऽज्ञानस्याऽपि तदभावरूपत्वादिति । अस्तु तमोऽन्यन्ताऽभावस्तमोनिवृत्तिस्तस्याऽनादित्वेन ब्रह्माऽभेदयोग्यत्वात् । न तमोध्वंसस्तस्य प्रतियोगिसमानकालत्वादिति चेन्न । प्रतियोगिसमसत्ताकस्यैव तस्य तदसमानकालत्वमित्युक्तत्वादिति दिक् । अथ वा ननु कथं निरतिशयं सुखमेव पुरुषाऽर्थः । अविद्यानिवृत्तेरपि तथात्वादित्याशङ्क्याऽद्वैताऽऽनन्दब्रह्माऽवाप्त्यर्थं ब्रह्मणि प्रतिपाद्यमाने तदविद्यानिवृत्तिस्ततोऽनुद्देश्याऽपि ज्ञानसामर्थ्याद्भवतीति न तत्परमप्रयोजनमिति भावेनाऽऽह । तच्चाऽन्तरीयकतयेति ॥ नन्वद्वितीयं सद्ब्रह्माऽविचारितान्महावाक्यादापातप्रतिपन्नमनयैव मीमांसितव्यमखण्डाऽऽनन्दाऽऽत्मना ज्ञातव्यमित्ययुक्तं जैमिन्यादिना कृत्स्नस्य वेदस्य किं केन कथमित्यंशत्रयविशिष्टाऽर्थभावनाऽऽख्यपुंप्रवृत्तिरूपक्रियापरत्वाऽवगमेनाऽक्रियार्थानां धर्मप्रमितिजननरूपप्रयोजनशून्यत्वेन लौकिकवाक्यत्वमाशङ्क्य शिष्टैरध्ययनविधिपरिगृहीतत्वेन विधिनैकवाक्यत्वैर्नासिद्धाऽर्थानामपि प्रयोजनवत्त्वेन लक्षणयाऽपि क्रियाऽपेक्षितस्तुत्यादिबोधित्वेन प्रामाण्यवद्वेदान्तानामपि विध्यपेक्षितकर्तृस्तावकत्वेन ज्ञानविधिशेषत्वेन वा आत्मब्रह्मप्रतिपादकत्वेन विचार्यत्वस्याऽभिप्रेतत्वादितिचेत् न जैमिन्यादेरक्रियाऽर्थानां क्रियाप्रतिपादकत्वेन प्रामाण्यवर्णनं कर्मकाण्डप्रकरणस्थसिद्धबोधिवाक्याऽभिप्रायेण न भिन्नप्रकरणस्थवेदान्ताऽभिप्रायेण तेषामकर्त्रात्मबोधकत्वेन कर्माऽपेक्षितकर्तृस्तावकत्वाऽसम्भवात् कथंतन्त्वे ज्ञानेविध्यसंभवेन तच्छेषतया ब्रह्मप्रतिपादकत्वाऽसम्भवाच्च ॥ ५८ ॥

मू० ॥ न च गतार्थमिदं प्रतिभाति नो
न हि विधेः पदमात्मसमीक्षणम् ॥
न खलु यागददातिजुहोतिव-
त्पुरुषतन्त्रमिहाऽऽत्मनिदर्शनम् ॥ ५९ ॥

टी० ॥ ननु जैमिन्यादेरित्थमाशयवर्णनमयुक्तम् । तेन सर्ववेदाऽर्थविचारस्य कृतत्वात् । अन्यथा धर्मजिज्ञासासूत्रस्याऽथातःशब्दविरोधात् अथ शब्देन हि कृत्स्नशाखाऽध्ययनाऽऽनन्तर्यं स्वविचारस्य दर्शयति । वेदान्तानामविचार्यत्वे च तदध्ययनाऽऽनन्तर्यस्य स्वविचारे किं प्रयोजनमेवमतःशब्देन कृत्स्नवेदस्य स्वाऽर्थे प्रामाण्यं दर्शयति । तदप्येवं सत्यनुपपन्नं स्यात्ततो वेदान्तानां जैमिन्यादिभिरेव विचारितत्वाद्बादरायणाऽऽदिभिस्तद्विचारणीयमिति तत्राऽऽह । न च गतार्थमिति । गतोविचारपूर्वकं ज्ञातोऽर्थो यस्य वेदान्तविचारशास्त्रस्य तत् । किंवेदान्तगम्यमद्वयं ब्रह्म तच्च जैमिन्यादिभिर्निरूपितमित्युच्यते । किं वा कार्यमेववेदान्तानामप्यर्थः । तच्च जैमिनिना निरवशेषं निरूपितमितीदं शास्त्रं गताऽर्थमिति । न तावदाद्यः । तत्र तदप्रतीतेः साध्यरूपधर्मन्यायेन सिद्धब्रह्मणो निर्णयाऽसंभवात् । धर्मजिज्ञासासूत्रे धर्मस्यैव विचार्यत्वेन प्रतिज्ञातत्वाच्च न चाऽथातःशब्दाऽनुरोधेन धर्मशब्देन वेदाऽर्थमात्रं लक्ष्यतामितिवाच्यम् । अन्यथासिद्धाऽथातःशब्दाऽनुरोधेन विचार्यमाणतया अनन्यथासिद्धप्रधानाऽभिधायिधर्मशब्दस्य लक्षणाऽयोगात् । अध्ययनविधिर्हि कृत्स्नशाखाऽध्ययनं विधत्ते न त्वेकदेशाऽध्ययनमात्रमतोऽध्ययनविधिप्रयुक्तया न कर्मकाण्डमात्राऽध्ययनं संभवति । एवं च वेदान्ताऽध्ययनं यद्यपि न कर्मविचारोपयोगि तथाप्येकविधिप्रयुक्ततया तस्याऽऽवश्यकत्वेन तदध्ययनवत एव कर्मविचार इति तदन्यथासिद्धम् । एवमतःशब्दसूचिताऽध्ययनदृष्टाऽर्थत्वस्याऽपि वेदान्ताऽध्ययने समत्वादेव तदर्थवत्त्वसिद्धेर्न तद्बलादपि धर्मशब्दे लक्षणेति नाऽद्वयब्रह्मविचारो गताऽर्थ इति भावः । नाऽपि द्वितीयः । अग्निहोत्राऽऽदिकार्यस्य उपासनाकार्यस्य वा भिन्नप्रकरणस्थत्वाद्ब्रह्मनिष्ठवेदान्तेभ्यस्तदप्रतीतेश्च । नन्वात्मा वा अरे द्रष्टव्य इत्यादिना ज्ञानं विधीयत इति कार्यमेव वेदान्ताऽर्थ इति चेत्तत्राऽऽह । न हीति । विधेः पदं विषयः विधेयमिति यावत् । यद्धि वाक्याऽर्थप्रतीति * जन्यचिकीर्षाप्रयत्नाभ्यां निष्पाद्यं तद्विधेयं यथाऽग्निहोत्राऽऽदि । उपासना वा न चाऽऽ-

* प्रमिति पा० द्वि०

त्मज्ञानं लौकिकं वा तत्तथाऽनिच्छतोऽप्रयतमानस्याऽपि शब्देन प्रत्यक्षाऽऽदिना वा तद्दर्शनात् एतदेव कर्तृतन्त्वं विधेयं ज्ञानं च न तथेत्युच्यत इति ज्ञानं न विधेयमित्याशयेनाऽऽह ॥ न खल्विति ॥ देवतोद्देशेन द्रव्यत्यागो यागः तस्य परस्वत्वाऽऽपादनव्यापारो दानं याग एवाऽऽसेचनाऽधिको होम इति विभागः ॥ ५९ ॥

मू० ॥ अपि च रूपितगोचरताविधे-
र्ने परमाऽऽत्मधियोऽस्ति च रूपणम् ॥
अविदिते परमाऽऽत्मनि तद्धियो
न खलु रूपितता घटनाऽन्विता ॥ ६० ॥

टी० ॥ किंच विधेयपदार्थज्ञानं विधिवाक्याऽर्थप्रतीतेः प्राग् वक्तव्यं न च परमाऽऽत्मज्ञाने तत्संभवतीत्याह । अपि चेति । रूपितो ज्ञातो गोचरो विषयो यस्य तस्य भावस्तत्ता ज्ञाधात्वर्थगोचरता वक्तव्येति शेषः । ततः किं तत्राऽऽह । न परमाऽऽत्मेति । रूपणं ज्ञानं प्रागिति शेषः । तथा च परमाऽऽत्मज्ञानं कर्तव्यमिति वाक्याऽर्थधीनं संभवतीति भावः । कुतस्तदनिरूपणमिति चेत् किमज्ञाते परमाऽऽत्मनि तज्ज्ञानं ज्ञायते विदिते वा नाऽऽद्य इत्याह अविदित इति । घटनाऽन्विता युक्ता न हि विशेषणीभूतं परमाऽऽत्मानमज्ञात्वा परमाऽऽत्मज्ञानमिति ज्ञातुं शक्यमित्यर्थः ॥ ६० ॥

मू० ॥ विदितता परमाऽऽत्मन इष्यते
यदि वृथा विधिरस्य धियो भवेत् ॥
निखिलभेदनिदाननिवृत्तितो
भवति तद्विषयाऽऽदि च दुर्लभम् ॥ ६१ ॥

टी० ॥ द्वितीय आह ॥ विदिततेति । ज्ञानविधिवाक्याऽर्थज्ञानात्प्रागिति शेषः । तर्हि ज्ञानविधिर्व्यर्थः पुरुषाऽर्थसाधनाऽऽत्मज्ञानस्य प्रागेव सिद्धत्वादित्याह । वृथेति । किं चाऽऽत्मज्ञाने सति अविद्यातत्का-

र्थसकलनियोज्यविषयाऽऽदिभेदनिवृत्तेस्तत्साऽपेक्षो न ज्ञानविधिः। न वा तदनुष्ठानं संभवतीत्याह। निखिलेति॥ निदानस्य कारणस्याऽज्ञानस्य निवृत्तित इत्यर्थः॥ ६१॥

मू०॥ इति न धर्मविशेषसमर्पणं
श्रुतिशिरोवचनैः क्रियते ततः॥
भवति धर्मविचारगताऽर्थताऽ-
नवसरः परमाऽऽत्मविचारणे॥ ६२॥

टी०॥ नन्वात्मनि परोक्षज्ञाने प्रथमं जातेऽपि तद्विशिष्टज्ञानं विधेयमिति चेत् किं विशिष्टज्ञानं परोक्षमपरोक्षं वा। नाऽऽद्यः॥ प्रथमज्ञानेनैव तत्कृत्यसिद्धेस्तद्वैयर्थ्यात्। विदितस्वाऽर्थसंबन्धशब्दाऽऽदिभ्य एव प्रथमज्ञानवत् द्वितीयज्ञानस्याऽपि विना पुंव्यापारमुत्पत्तिसंभवेन विधिवैयर्थ्याच्च। नाऽपि द्वितीयः। किं कर्तव्यतयाऽवगतं शाब्दं ज्ञानमेव विधिबलादपरोक्षं भवति। किं वा ततस्तदुत्पद्यते। नाऽऽद्यस्तस्य शब्दादुत्पन्नत्वेन तव मते तदयोगात्। अन्यथा प्रथममेवाऽपरोक्षज्ञानं किं न स्यात्। न द्वितीयस्तत्कारणस्याऽसम्भवात् न ह्यपरोक्षज्ञानकरणमिन्द्रियमात्मन्यस्तीति न ज्ञानविधिसंभव इत्युपसंहरति। इतीति। धर्मविशेषसमर्पणं विधेयज्ञानमेवाऽवान्तरो धर्मस्तस्य च निर्विषयस्याऽनुपपत्तेस्तदाकाङ्क्षयाऽऽत्मानं व्युत्पादयद्भिर्वेदान्तवचनैर्विध्येकवाक्यतया धर्मविशेषसमर्पणं क्रियत इति यन्मतं तन्न। ततोऽपि परमाऽऽत्मविचारे धर्मविचारगतार्थताया अनवसरो भवतीत्यर्थः। तथाच जैमिन्यादेः प्रागस्मदुक्त एवाऽऽशय इति भावः॥ ६२॥

मू०॥ अर्हाऽऽद्यर्थे च कृत्यस्मरणमभिमतं पाणिनेः प्राऽर्थनाऽऽदौ
लिङ्लोडाऽऽदेश्च वृत्तिः प्रचुरमभिमता पाणिनेर्जैमिनेश्च॥
तस्माद्वेदान्तवाक्ये पठितमपि लिङाद्यन्यथा योजनीयं
विध्यर्थाऽसंभवेन स्फुटमुदितनयादेतदन्याऽगतार्थम्॥ ६३॥

टी० ॥ कथं तर्ह्यात्मा वा अरे द्रष्टव्य आत्मन्येवाऽऽत्मानं पश्येदित्यादिविधिव्यक्तीनां गतिरिति तत्राऽऽह । अर्हेति । अर्हे कृत्यतृचश्च । विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु लिङ् लोट्चेत्यादिपाणिनिस्मरणात् । विष्णुरुपांशु यष्टव्य इत्यादौ जैमिनीयन्यायाच्च । तव्यप्रत्ययाऽऽदेर्विध्यतिरिक्ताऽर्थत्वं सिद्धं यस्मात्तस्मादुक्तवेदान्तवाक्ये पठितमपि लिङादि अन्यथा विधिमन्तरेण अर्हाऽर्थतया योजनीयं कुतः स्फुटमुदितनयात् विध्यर्थाऽसंभवेन । अत एतद्वेदान्तविचारशास्त्रं धर्मविचारशास्त्रेणाऽगतार्थमतस्तद्भगवताऽथाऽतो ब्रह्मजिज्ञासेत्यारभ्य विचारितं भाष्यकाराऽऽदिभिरपि तदाशयाऽनुरोधेन तदर्थो वर्णित इति मयाऽपि तदर्थाऽऽविष्करणाय यत्नः क्रियत इति ॥ ६३ ॥

मू० ॥ एकाऽहाऽहीनसत्रद्वयविधिविहिताऽनेककर्माऽनुभाव-
ध्वस्तस्वान्तोपरोधाः कथमपि पुरुषाश्चित्तशुद्धिं लभन्ते ॥
यज्ञेनेत्यादिवाक्यं शतपथविहितं कर्मवृन्दं गृहीत्वा
स्वोत्पत्त्याम्नानसिद्धं पुरुषविविदिषामात्रसाध्ये युनक्ति ॥ ६४ ॥

टी० ॥ नन्वेवमप्यधिकार्यभावादिदं शास्त्रं नाऽऽरम्भणीयं न तावत्स्वर्गाऽऽदिकाममुद्दिश्यैतदारम्भः । अग्निहोत्राऽऽदिभिरेव तत्सिद्धेर्नाऽपि निरतिशयविषयभोगाऽर्थिनमुद्दिश्य तस्याऽप्युपासनातः सिद्धेः । न च मुमुक्षुरत्राऽधिकारी सकलवैषयिकाऽऽनन्दविलक्षणे मोक्षे कस्याऽपि कामनाऽदर्शनात् । अत एव ब्रह्मजिज्ञासुरत्राऽधिकारीति निरस्तम् । ब्रह्मज्ञानस्याऽऽपुरुषाऽर्थस्य कामनाऽयोगान्निरतिशयाऽभिलषितस्वर्गाऽऽदिविरोधित्वाच्च न चाऽविरक्तस्य स्वर्गाऽऽद्यभिलाषेऽपि विरक्तस्य तदभावान्मुमुक्षा संभवतीति तदर्थं ब्रह्म जिज्ञासमानोऽत्राऽधिकारीति वाच्यम् । स्वर्गाऽऽदौ निरतिशयप्रीत्याऽऽस्पदे कस्याऽपि वैराग्याऽसंभवाद्दुःखमिश्रितत्वात्ततोऽपि वैराग्यं युक्तमिति चेन्न तादृशेऽपि तदधिकसुखे प्रवृत्तिदर्शनात् । दुःखपरिहारे च यतितव्यं न तु सुखमपि परित्याज्यं न चाऽन्यः कश्चिदधिकारी संभवतीत्यधिकार्यभावान्नेदमारम्भणीयमिति तत्राऽऽह । एकाऽहाऽहीनेति । अय-

Digitized by Google

मिह चिद्विदृक्षाप्रतिलम्भप्रकारः । अनादिप्राग्भवेषु संसरञ्जीवः । कदाचि-
त्तत्र तत्र विशिष्टवर्णाऽऽश्रमो भूत्वा यावज्जीवश्रुतिचोदितानि नित्याऽग्नि-
होत्राऽऽदीनि सम्यगनुतिष्ठति ततः कदाचिदीषदासादितपरमेश्वरप्रसा-
दादग्निहोत्राऽऽदिषु दृढश्रद्धो भवति तत ईश्वरप्रसादादेवं चिन्तयति ।
मदीयं मनः स्वर्गाऽऽदिसुखतत्साधनान्येवाऽभिलषति न तु मोक्षं तत्साधनं
वा ज्ञानं तत्र चाऽदृष्टमेव केवलं निमित्तमिति तदर्थं यतितव्यमिति वि-
विदिषोद्देशेन तान्येव कर्माण्यनुतिष्ठति ततोऽतिविमलमानसस्तद्यथेह-
त्याऽऽदिश्रुतिं यत्कृतकमित्याऽऽदिन्यायं चाऽनुसंधाय ब्रह्मलोकपर्यन्तं क-
र्मसाध्यं फलमनित्यमिति निश्चिनोति । आत्मा च श्रुतिन्यायाभ्यां नित्याऽऽ-
नन्द इति च सोऽयं नित्याऽनित्यवस्तुविवेकः । ततस्तदर्थं सकलवैषयिकसु-
खभोगजिहासा पुनःपुनरस्योपाऽऽवर्तते । नित्ये संभवत्यनित्ये कस्तुष्येदिति
तदिदं कर्मफलवैराग्यम् । पश्चाच्छान्तिदान्त्यादिसंपन्नो दृढतरमोक्षेच्छां
करोति सेयं साधनचतुष्टयसंपत्तिः । तत इष्यमाणमोक्षसाधनं चिदानन्द-
स्वरूपाऽऽत्मज्ञानमिच्छतीति नाऽत्राऽधिकारी दुर्लभः । तदिदमनेन श्लोकेन
सूचितम् । एकाहः । एकसुत्याकः क्रतुः । अहीनः । द्व्यहप्रभृतिद्वादशसु-
त्याऽन्तः । सत्त्रं द्विविधम् एकमहःसमुदायसाध्यं यथाद्वादशाहं द्वादशाहस्य
चाऽहीनसत्त्राऽऽत्मत्वं यजेत उपयन्तीत्युभयश्रुतिबलादवगतं किं चित्संव-
त्सरगणसाध्यम् उपलक्षणमेतदग्निहोत्राऽऽदेः । एतेषां ये विधयस्तद्विहि-
तानि यान्यनेकानि अग्निहोत्रप्रभृतीनि सहस्रसंवत्सरपर्यन्तानि कर्माणि
तेषामनुभावो दुरितनिबर्हणसामर्थ्यं तेन ध्वस्तः स्वाऽन्तस्याऽन्तःकरणस्यो-
परोधः विविदिषाप्रतिबन्धो येषां ते तथा कथमपि अनेकजन्मव्यवधा-
नेऽपि पुरुषाः साधनचतुष्टयसंपन्ना अधिकारिणः चिद्विदृक्षामखण्डचै-
तन्याऽऽत्मकप्रत्यग्ब्रह्मसाक्षात्कारेच्छामित्यर्थः ॥ नन्वग्निहोत्राऽऽदेः पुं-
विदृक्षाप्रतिबन्धकदुरितनिवर्तकत्वं कुतोऽवगतं येन तदर्थमनुतिष्ठेयुः । न
तावत्प्रत्यक्षाऽऽदिना तदवगन्तुं शक्यं नाऽप्यग्निहोत्राऽऽदिवाक्येन तत्र
तद्वाचकपदाऽभावात्तत्राऽऽह । यज्ञेनेति । तमेतं वेदाऽनुवचनेन ब्राह्मणा
विविदिषन्ति यज्ञेनेत्याऽऽदिवाक्यं शतपथविहितमिति । शतपथग्रहणं वि-

Digitized by Google

नियोजकवाक्येन विनियोज्यकर्मणः प्रत्यासत्तिज्ञापनार्थम् । नन्वग्निहोत्राऽऽदेः स्वर्गकामयावज्जीवाऽऽदिवाक्येन तत्र तत्र विनियुक्तस्य कथं विविदिषायां विनियोगः विनियुक्तविनियोगविरोधात्तत्राऽऽह । स्वोत्पत्तीति । स्वस्याऽग्निहोत्राऽऽदेर्यदुत्पत्त्याम्नानं कर्मस्वरूपमात्रबोधकं वाक्यं तत्सिद्धमित्यर्थः । अग्निहोत्राऽऽदिकं हि प्रथममग्निहोत्रं जुहोतीत्याऽऽदिवाक्यैः फलविशेषशून्यमेव विधीयते पश्चाद्वाक्याऽन्तरेण तदपेक्षितफलविशेषे तस्य संबन्धः प्रतिपाद्यते । एवं च तद्वदेव विविदिषायामपि तस्य संबन्धो न विरुध्यते विनियोजकवाक्यानां तुल्यकल्पत्वादेवं च विषयसौन्दर्यज्ञानलक्षणायामिच्छायां कर्मणः साक्षात्साधनत्वाऽसम्भवेन सामर्थ्यात्प्रतिबन्धकनिवृत्तावेव साधनत्वं कल्प्यत इति । पुरुषः परमाऽऽत्मा । मात्रशब्देन तस्य ज्ञानाऽऽदिपर्यन्तव्यापारं वारयति । एवं च नाऽधिकार्यभाव इति भावः ॥ ६४ ॥

मू० ॥ उपससाद चतुष्टयसाधनो
निशितबुद्धिरशुद्धिपरिक्षयात् ॥
विविदिषुर्विहितैर्विविधाऽध्वरै-
र्विदितवेद्यतमं विधिवद्गुरुम् ॥ ६५ ॥

टी० ॥ एवं विषयप्रयोजनसंभवादगतार्थत्वाद्विशिष्टाऽधिकारिलाभाच्च ब्रह्मविचारशास्त्रमारम्भणीयमित्युक्तमिदानीं गुरुशिष्यसंवादमुखेन शास्त्रं प्रवर्त्तयितुं जिज्ञासासूत्रगताऽथशब्दोपात्तविशिष्टाऽधिकारिणस्तद्विज्ञानाऽर्थं स गुरुमेवाऽभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिदर्शितं गुरूपसदनमाह । उपससादेति । प्राप्तवानित्यर्थः । विवेकाऽऽदिचतुष्टयं ब्रह्मज्ञानसाधनं यस्य स चतुष्टयसाधनः । निशिताऽतिसूक्ष्मा ब्रह्मैकाऽऽकारतायोग्या बुद्धिरन्तःकरणं यस्य स तथा । विहितैः सम्यगनुष्ठितैः विविधाऽध्वरैरशुद्धिपरिक्षयाच्चिशितबुद्धिः चतुष्टयसाधनो विविदिषुरिति संबन्धः । श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिदर्शितं गुरुविशेषणमाह ।

विदितवेद्यतममिति । अवगतब्रह्मतत्त्वमित्यर्थः । समित्पाणिरिति श्रुतिदर्शितमुपसदनप्रकारमाह । विधिवदिति ॥ ६५ ॥

मू० ॥ इह जगति हि सर्व एव जन्तु-
निरतिशयं सुखमुत्तमं ममाऽस्तु ॥
उपरमतु तथोपघातरूपं
विषयजदुःखमिति स्पृहां करोति ॥ ६६ ॥

टी० ॥ ननु मुमुक्षुर्गुरुमुपससादेत्युक्तमयुक्तमननुभूतसुखविजातीये मोक्षे कामनाऽयोगादत एव निखिलाऽनर्थनिवृत्तिकामो मुमुक्षुरित्यपि न संभवति अनर्थनिवृत्तेः स्वतः पुरुषाऽर्थशेषतयैव काम्यमानतया तदभावे अयोगादित्याशङ्क्य कैमुतिकन्यायेन प्रस्तुताऽधिकारिणो मुमुक्षां दर्शयितुं लोके तदतिसुलभतामाह । इहेति । सर्व एवेति । जन्तुमात्रे निरतिशयसुखाऽऽदिकामनायां मानाऽभावेन योग्यनराऽभिप्रायम् । उपरमतु मा भवतु । उपघातरूपं पुरुषाऽर्थविरोधिरूपम् ॥ ६६ ॥

मू० ॥ निरतिशयसुखं च दुःखजातं
व्युपरमणं च वदन्ति मोक्षतत्त्वम् ॥
उभयमपि जनोऽभिवाञ्छतीति
स्फुटतरमस्य सदाऽस्ति मोक्षवाञ्छा ॥ ६७ ॥

टी० ॥ नन्वेवमपि मुमुक्षायां किमागतमिति तत्राऽऽह । निरतिशयेति । लौकिकैरभिलष्यमाणनिरतिशयसुखाऽऽदेर्मोक्षत्वे फलितमाह । उभयमपीति । अस्य जनस्य एवं प्राणिमात्रस्य मुमुक्षासद्भावे किमु वक्तव्यं निरस्तनिखिलचित्तमलस्य तीव्रवैराग्याऽऽदिसंपन्नस्य तत्सद्भावे मोक्षरूपसुखस्यैव तत्तद्विषयसंबन्धेन लौकिकैरिष्यमाणत्वाच्च तल्लौकिकसुखविलक्षणमितिभावः ॥ ६७ ॥

(शेषमग्रे)

Digitized by Google

श्रीः

श्रीविश्वेश्वरो विजयते ।

श्रीदबालशास्त्रिजीवनवृत्तान्तः ।

अस्ति स्वस्तटिनीसमीपवसतिः सङ्केतभूः श्रेयसां
काशी नाम पुरी श्रुतिस्तुतगुणा विश्वेश्वराधिष्ठिता ।
दुष्प्रापं विजितेन्द्रियैरपि पदं तद् ब्रह्मणः शम्भुना
यस्यामेव सदा विनश्वरतनूमूल्येन विक्रीयते[1] ॥ १ ॥

आसीन्निःसीमधीमज्जनविनुतयशा वेदविद्यानदीष्णः
श्रीमद्गोविन्दशर्मा शिवपदनिरतो दाक्षिणात्यो ऽत्र विप्रः ।
तिष्य[2]भ्रष्टार्यधर्मोद्धरणकृतमतिं कल्पसूत्रप्रणायं
सत्याषाढं मुनीन्द्रं भुवि सकलबुधा मेनिरे भूसुरं यम् ॥ २ ॥

असौ विधिवदधीतनिजवेदो व्रतस्नातः प्रसाद्योपाध्यायमध्यापयदन्तेवासिनोऽङ्गीकृत्य गार्हस्थ्यं धिन्वन् देवर्षिपितृगणान् पितृणामानृण्यकामो बहुषु निजाहितेषु गर्भेष्वपूर्णेषु विशीर्णेषु दूयमानमानसो विचार्य कीना[3]शबलनाशनं गरलाशनं सरभसं शरभरूपमुपास्य भगवन्तं शङ्करं समवाप तनयमेकमेव ॥

जन्मोत्सवे ऽस्य मुदितः कृतजातकर्मा
श्रीविश्वनाथ इति नाम विधाय तस्य ।
चूडाविधिं च विरचय्य समीहमानो
मौञ्जीविधिं विधिसमीपमवाप दैवात् ॥ ३ ॥

तदनु यथावविर्वस्यामुष्यौर्ध्वदेहिकीं क्रियामसावचिरादासादितसकललिपिप्रवीणभावो मनीषाविशेषपरितोषितेन गुरुणा पञ्चमएव वत्सरे विधिवदुपनिन्ये । ततः प्रभृत्येव चाध्याप्यतायं याजुषीं शाखामवेदाधिगमोचितेषु दिवसेषु वेदाङ्गानि च ॥

---

१ अनेन प्रदर्शितमूल्येतरप्रतिबन्धकराहित्यं व्यज्यते । २ कलिः । ३ यमः ।

Digitized by Google

गुरुवरमुखनिर्यद्वेदवागेकवार-
ग्रहणजनितदार्ढ्याशेषशाखो ऽप्यमेषः ।
कृतगुरुवरिवस्यो ऽशेषवेदाकूपारं
परिचितमिव पूर्वं तूर्णमापैष धीमान् ॥ ४ ॥

अनन्तरं च श्रौतस्मार्तकर्मकाण्डपाण्डित्यमण्डिताधिषणो धिषणोपमः सप्तमएव वत्सरे ऽमत्सरेण चेतसा नानाविधदिगन्तरागतपरःसहस्रविद्वद्वरपरीक्षणविचक्षणं प्रतिपक्षक्षोणिपतिशिक्षणदक्षकौक्षेयकं चित्रकूटगिरिमधिवसन्तं श्रीविनायकरावनृपपुङ्गवं वार्षिक्यां परीक्षायामवलोक्य वितरति स्म तत्राभूतपूर्वां परीक्षामसौ मध्यमलोकचतुराननः ॥

यद्वा[1]दशान्विकतया ऽपि न पारयन्ति
शस्त्रं बुधा निगदितुं किल बालखिल्यम् ।
ऐका[2]न्यिको ऽपि न बभूव यतो ऽथ तेन
प्रापापदा[3]नमिह बालसरस्वतीति ॥ ५ ॥

पदक्रमजटाघनाद्यखिलवेदचर्चार्चितः
सदर्पबुधमण्डलीवचनखण्डने पण्डितः ।
ततः प्रभृति सो ऽभवत्सकलभूतलख्यातिमान्
नृपार्चितपदद्वयः सकलवैदिकेष्वद्वयः ॥ ६ ॥

मानसं मदमशेषवैदिका यज्जहुः पठति तत्र सुस्वरम् ।
मानसंमदमवाप भूपते राङ्कवांशुकधनोन्नतं स तत् ॥ ७ ॥

अनवमो नवमे किल हायने ऽखिलपदक्रमपाठविशारदः ।
मनसि कस्य न विस्मयमार्पयज्जनयति स्म ततो गुरुसंमदम् ॥ ८ ॥

ततः परं प्रशस्यमानो निरुपमानस्तत्रत्याशेषधनिकजनोपढौकितवसुधनो गुणातिरेकरक्तराजपुङ्गवार्चितपरिपुष्टवृत्तिको ब्रह्मावर्तदेशं प्रयाय

१ यस्य परीक्षाकाले द्वादशाऽपपाठा भवन्ति स द्वादशान्यिकः । २ यस्यैको ऽपपाठो भवति स ऐकान्यिकः । ३ अपदानं कर्मवृत्तम् ।

तत्रत्यसकलाढ्यचरमहाराजबहुमानितो गालवक्षेत्रमुपेत्य द्वादशवर्षनीपारीणा-मखिलभूतलभूषणं श्रीकुप्पाशास्त्रिणं परितोष्य निजमनीषया तदाविष्ट-गालवक्षेत्रभूपकल्पितवार्षिकविपुलवृत्तिको विनयावनतपूर्वकायो ऽवाप्या-नुमतिं दाक्षिणात्यपरिवृढस्य समासाद्य काशिकां यतते स्म श्राव्याणि काव्यानि सपरिकराणि च दर्शनानि करतलामलकीकर्तुं स भारती-पुरुषावतारः ॥

अनेकविबु[1]धार्चितो गुरु[2]र्विशालवाग्भूषितः
सु[3]खास्पदतया श्रुतो भृशविराजदुच्चैः श्र[4]वाः ।
त्रिविष्टपसमोऽप्यभून्न स सुधीः सुरा[5]णां प्रियो
न चापि शतमन्यु[6]मानिति मनो भृशं विस्मितम् ॥ ९ ॥

मोचा[7] चूतसुधामदैकदमनं स्वाभाविकं यद्वचः
प्रागल्भ्यप्रतिभानुभावभरितं चेतश्चमत्कारदम् ।
इत्थ्यात्पावेशपूर्णोशीतकिरणान्यक्कारिकीर्त्याश्रयो
नूनं रीतिमलौकिकीमनुसरन् कोऽप्येष देवोत्तमः ॥ १० ॥

अथासावल्पेन कालेन सम्पादितप्रौढव्युत्पत्तिको व्रजन् द्वित्रान् वत्सरांश्चित्रकूटगिरिं नन्दनारामविहाररसिके तत्र राजरत्ने तर्ककार्कश्यं सम्पिपादयिषुः समालोच्य निजधीविभवानुरूपमभिरूपद्विजोत्तमचक्रवर्ति-नं श्रीकुप्पाशास्त्रिणं निजदैशिकं सम्प्राप्य गालवक्षेत्रं प्राकाशयत् पुरस्कृत्य प्रश्रयममुं प्रति निजाशयमभिदधे च सादरममुना ॥

त्वं बाल[8]द्विजराजतां किल वहन् चित्रं न दोषाकरः[9]
सम्पूज्योऽसि महेश्व[10]रेण शिरसा सन्मार्गनित्या [11]श्रितः ।

---

१ देवैः पण्डितैश्च । २ बृहस्पतेरध्यापकस्य च । ३ सुखस्य स्वर्गकतया उत्तमा-कामाधारतया च । ४ अश्वविशेषो महती कीर्तिश्च । ५ देवानां मद्यानां च । ६ शत-मन्युरिन्द्रः क्रतौ कोपाश्च । ७ कदली । ८ बाल एव विप्रश्रेष्ठतां बालचन्द्रतां च । ९ दूषणाश्रयश्चन्द्रश्च । १० महाराजेन शिवेन च । ११ सज्जनमार्गे नक्षत्रमार्गे च

कस्त्वां पाठयितुं किमत्र बहुना वक्तुं त्वया च क्षमो
भाग्यैर्मे ऽद्य निमित्ततां विरचयन् सानुग्रहो मय्यसि ॥ ११ ॥
नानातर्कवितर्ककर्कशतरा नैसर्गिकी ते मतिः
स्वल्पैरेव दिनैः पुरातनबुधानूनं स्वयं जेष्यति ।
तस्माद्वैदिकमार्गरक्षणकृते मत्वा ऽवतारं निजं
मीमांसासु गुरूकुरु त्वमधुना मामित्यहं प्रार्थये ॥ १२ ॥
कण्ठे यस्य लुठन्ति वैदिकगिरः साङ्गाः किमुत्कण्ठिताः
कुण्ठीभावमुपैति यस्य पुरतो जीवो[1]ऽपि युक्त्युक्तिषु ।
मीमांसास्ववशिष्यते किमपरं यत्नेन लभ्यं नवं
मन्ये मान्यममुं विभाव्य वचनं तस्यैष धन्यो ऽतनोत् ॥ १३ ॥
किं मां वञ्चयसि स्वयं शतधृ[2]ते त्वं जीवकोट्याश्रितं
श्रीमद्बालसरस्वतीमिषममुं धृत्वा ऽवतारं नवम् ।
नाहं पाठयितुं क्षमो ऽस्मि कथमप्येनं किमेवं विधिं
वक्तुं भूतलमत्यजद्गुरुरसौ तस्योक्तिभिर्विस्मितः ॥ १४ ॥

अथैष वैशेषिकाशेषविषयविशेषज्ञतामभिलष्यन् निशम्य न चिरा-द्वागमिष्यन्तं पुण्यग्रामप्रतिष्ठितसाम्प्रतिकसम्राट्समुत्तेजितसंस्कृतसरस्व-तीसदनसमस्तप्रशस्तदर्शनपारतारितपरःसहस्रशिष्यं तं श्रीमोरशास्त्रिणं गालवक्षेत्रप्राड्विवाकपरिवृढपदमलङ्करिष्यन्तमाजानजनितविपश्चिज्जनस-मागमकुतूहलो विधाय वसतिं तत्रैव समागते ऽमुष्मिन् सूरै[3]कसूर्ये सादरं परिसमाप्य तत एव द्वादशलक्षणीशेषं तनयनिर्विशेषमुपलालितो ऽमुना गुणैर्धुनानो विप्रतिपन्नान् प्रसन्नान् विरचयन् पौरजनानुपसन्नान् सम्भा-वयन् समुचितोपचारेणासन्नषोडशानि जन्मतो हायनानि तत्रैवानुभवन् वर्मिनां धुर्ये हर्यैकतानचेतसि तस्मिन्नाचार्यवर्ये पर्येष[4]णेव दिव्यसुखानां

---

१ बृहस्पतिः। २ ब्रह्मन्। ३ सूरिषु पण्डितेष्वेकोऽद्वितीयः सूर्यस्तस्मिन्।
४ इच्छया।

समारूढे परं पदं नितान्तदूनो ऽनूनो ऽपि निखिलवसुमतीवास्तव्यविबुधेभ्यो ऽसौ तत्रत्यनिखिलविबुधेभ्यो[1]ऽपयाचितावासो निवासो निखिलविद्यानां निरीक्ष्य तत्रैव समागतं पाणिनीयतन्त्रोज्जीवनायेव पुनरवतीर्णं भगवन्तं पतञ्जलिं विवादधीर[2]सिकतासमेतधीरसिक[3]ताचतुर्दिशप्रवेपथप्रचण्डवातं निखिलगुणगणरत्नाकरं निशाकरं सहृदयकुमुदवनानां नानाविधप्राज्ञसम्भृतशोभासु गालवपुराधीश्वरसभासु सर्वदैव जयिनं नितान्तदयिनं कृत्स्नभारतभूतलप्रसिद्धमहिमानं श्रीराजारामशास्त्रिणं स्पृहयन्नमुष्य परिचर्यायै सविनयमुपसद्य सद्य एव निगद्य निजाशयं निश्चितमना मनागपि वसतिं तत्र नगरे विहातुं समनुज्ञाप्य कानि चिदेव दिनानि तत्रत्यपार्थिवानुरोधेन निवस्तुकामं गुरुवरश्रीराजारामशास्त्रिणं सत्वरं समवाप काशिकाम् ॥

येषां द्वादशदर्शनीनिपुणता लोकेषु विख्याप्यते
यद्वाग्वज्रविशीर्णवादिगिरिभिः प्राप्ता दिगन्ता द्रुतम् ।
सम्राडादिकदुर्विधावधिजनैर्नोल्लङ्घितं यद्वचो
यच्छात्रैरधुना ऽपि सर्वविषये विद्याः प्रतिष्ठापिताः ॥ १५ ॥

प्रकटनिजविहारैः काशिकां पूतमार्गां
रचयितुमिव काशीनाथमप्यावतीर्णम् ।
तदवधि गुरुकाशीनाथशास्त्र्याख्यमेनं
स भृशमुपविशेषेवे नाप यावद्गुरुः सः ॥ १६ ॥

वर्षीयांसमुपाश्रिता ऽद्य खलु मां विद्याभिधा वल्लरी
नोपघ्नं[4] लभते नवं यदि ततो भङ्गं द्रुतं यास्यति ।
स्यादेषा सफला कथं न्विति चिरं सञ्चिन्तयंश्चेतसा
पार्श्वं प्राप्य तमुत्तमं स मुमुदे निश्चिन्ततामाप च ॥ १७ ॥

१ इभ्या धनिनः । २ विवादबुद्धौ रसिकता स्पृहा । ३ धीराः पण्डिता एव सिकता वालुका असारत्वादिति भावः । ४ उपघ्न आश्रयः ।

Digitized by Google

आहूतः कर्तुमायः सपदि कुविषवोद्गाहयज्ञाग्रमाधिं
प्रोद्गामाशेषवादिद्विरदविदलनाकुण्ठकण्ठीरवेन्द्रः ।
सम्प्राप्तोऽथ स्वगेहं विपुलबहुमतिं प्राप्य भूपात्सपर्यां
श्रीराजारामशास्त्री विनयनतगुरुस्तेन सामोदमूचे ॥ १८ ॥

शिष्याभ्रा[1]न्तिकपूर्णदर्शनरसैः कीर्[2]तिं महीव्यापिनीं
कुर्वन्सं नयसागरं प्रतिपदा[3]रूढो ऽनिशं जृम्भयन् ।
यः स्वीयां द्विज[4]राजतां प्रकटयेत् पुष्यान् समस्ताः कला[5]
नव्यो बालशशी स सम्प्रति भवत्सूर्याग्र[6]याद्वर्धताम् ॥ १९ ॥

इत्थं गिरं गुरुवरात्स निशम्य धीर-
स्तं पाणिनीयनयसागरकर्णधारः ।
पारीणमारचयति स्म पदे[7]ऽचिरेण
तुष्टः प्रकृष्टतमया किल तस्य बुद्ध्या ॥ २० ॥

तर्कव्याकृतिसाहितीसुहितवाग्वेदान्तशान्ताशयो
मीमांसास्वतिमांसलः कपिलगीर्व्युत्पादने कोविदः ।
स्वल्पैरेव दिनैः पुराणनिपुणस्तन्त्रस्वतन्त्रः सुधी-
र्योगे गौतममतिः स तेन विदधे भूपण्डिताखण्डलः ॥ २१ ॥

मोचा नीचतरा सिता विहसिता धिक्कारयोग्या सुधा
माकन्दो ऽपि च निन्दनीयविभवो द्राक्षा न वीक्षोचिता ।
वर्षारम्भविजृम्भमाणसलिलाऽमर्त्यापगाशोदरे
वाग्गुम्फे ऽस्य समस्तशास्त्रविषयान् सम्यक् परिष्कुर्वति ॥ २२ ॥

---

१ शिष्येष्वभ्रान्तिकं भ्रमरहितं पूर्णाः शिष्या एवाभ्राणि मेघास्तदन्तिके पूर्णाश्च । २ यशः पङ्कं च । ३ प्रतिपत्तियावारूढः प्रतिपदमारूढः प्रवृद्धश्च । ४ विप्रश्रेष्ठतां चन्द्रतां च । ५ षोडशभागान् चतुःषष्टिकलाश्च । ६ रवेः सूरेः पण्डितस्य च । ७ व्याकृतौ ।

काशीस्थराजवरनिर्मितपाठशाला-
मुख्याधिकार्यथ तमादरमानपूर्वम् ।
व्युत्पादनाय विनियोजयति स्म साङ्ग्ले
कूणाग्रणीः प्रभुवरग्रिफिथाभिधानः ॥ २३ ॥

अथासौ पञ्चविंशतितमएव हायने समवाप्यादेशं प्रभुवरस्य पञ्चविंशकव्युत्पादनकृतोत्साहः सोपपत्तिकानि सर्वाण्येव शास्त्राणि सङ्क्रमयति स्म शिष्यशुक्तिकाहृदयेषु सुकृतिजनोपभोगयोग्यानि सलिलानीव स्वातीघनाघनो वसुमतीवाचस्पतिः ॥

सा व्युत्पादनचातुरी निरुपमा सा कल्पनाकल्पता
ग्रन्थग्रन्थिविभेदियुक्तिकथने सा भास्वरा च त्वरा ।
नानादेशसमेतशिष्यनिवहे ऽकम्पा ऽनुकम्पा च सा
प्रारम्भन्त तदाद्यहम्प्रथमिकां शिष्यौघजीवातवे ॥ २४ ॥
वादे सादरपूजितान् बुधजनैर्जल्पेष्वनल्पक्रमान्
शिष्यान् खण्डनपण्डितान् स विदधद् वैतण्डिकानां गिराम् ।
आशीताचलसेतुभूतलभृतां कीर्तिं शशिस्पर्द्धिनी-
मातेने चिरकालशोभिविभवां शास्त्रौघमध्यापयन् ॥ २५ ॥
नूनं को ऽपि स वेदशास्त्रजलधिः शीलैकरत्नाकरो
यच्छिष्याम्बुदवृन्दसङ्क्रमितवाक्तोयैर्मही प्लावयन् ।
विद्याकल्पलताः प्रतिक्षणमभवत्प्रौढोक्तिभिः पुष्पिता-
श्चक्रे राजसभासु भासुरफलाः सद्भावतां मानवैः ॥ २६ ॥

अथ क्रमेण निर्वाहयन्निजं कार्यं प्रकाशनेन काशीविद्यासुधानिधिपत्रे परिभाषेन्दुशेखरप्रत्यभिज्ञादर्शनादिदुरूहग्रन्थवास्तवार्थानां मुद्राक्षरैः सापत्नपाणि तन्त्रचपार्श्वपाठनकदर्थितविद्यार्थिसार्थानि दुर्वादिहृदयानि प्रमोदमेदुराणि च सम्पादयन् दर्शनरसिकमानसानि समूलकाषं कषंश्च

कलिकालप्रबलीभवद्बालविधवापुनर्विवाहवैधताप्रख्यापनदुराग्रहग्रहाविष्टान् मोहमयीनामकनगरवास्तव्यान् बोधलेशदुर्विधानपि निबन्धकरणो-द्यतान् दुराशयान् निर्माय दोषाभासनिरासनामकं स्वकीयगुरुवरप्रणीत-विधवोद्वाहशङ्कासमाधिनामकनिबन्धरत्नतिलकं गाढयुक्तिपरिपूरितं चिर-मन्वभवदसावखण्डपाण्डित्यसाम्राज्यम् ॥

भूम्यां नास्ति पुरं तदस्य सुयशो नो यत्र चन्द्रायते
राजा साम्प्रतिको न को ऽपि स पदं मूर्ध्ना ऽस्य यो नार्चति ।
ईदृक् को ऽद्य बुधो न योस्य सशिरःकम्पं गुणान् श्लाघते
का विद्वत्परिषच्च सा ऽस्य वचसा या चित्रतां नर्च्छति ॥ २८ ॥

वृद्धानां समुपासने रघुपतिर्नीतौ च वाचस्पतिः
सद्धर्माचरणे च धर्मतनयः श्रीहर्ष एवोक्तिषु ।
त्यागे कर्णविवर्णतावहगुणो लक्ष्म्यां कुबेराधिको
नास्माभिः सदृशो ऽस्य को ऽपि विबुधो दृष्टः श्रुतो वा ऽधुना ॥ २९ ॥

इत्थमेष परिपूतचरित्रो
निर्वहन् भुवि निजागमकार्यम् ।
अत्यवाहयत कालमनल्पं
कल्पनानमितवादिसमाजः ॥ ३० ॥

शुश्राव तं तुहिनशैलतटान्तशोभि-
मण्डीपुरीपरिवृढः समितौ कदा चित् ।
सार्थाभिधो विजयसेनमहीमहेन्द्र
आचार्यकार्यकरणोचितवृत्तपूतम् ॥ ३१ ॥

प्रागागतो हरपुरे निजकारितायां
वीक्ष्यैनमर्दितविवादिगणं सभायाम् ।
हर्षप्रकर्षपरतन्त्रमनाः स नित्यं
भट्टारकः स्पृहयति स्म तदर्चनाय ॥ ३२ ॥

सम्प्रेष्य शीलनिलयं स्वपुरोहितं स
सप्रश्रयं स्वगुरुभिः सहितं बुधं तम् ।
आनाययन्निजपुरं पुरुहूतवीर्यः
शिष्यैर्द्विजैश्च सह वेदविशेषविज्ञैः ॥ ३३ ॥

तादृक् च पर्यचरदेनमसीमभक्तिः
शीलेन तत्परतया विनयेन वित्तैः ।
दुद्राव चन्द्रकिरणैरिव चन्द्रकान्तः
स्वान्तं नितान्तमृदु तस्य सदा यथान्तः ॥ ३४ ॥

उन्मस्तकैश्च कनकैर्जनकैः सुखानां
सन्तोष्य तद्गुरुमसौ यनक्षैर्जगाद ।
मन्त्रोपदेशविषये मयि सानुकम्पः
स्याद्येन भूमिधिषणो ऽयमिदं यतेथाः ॥ ३५ ॥

श्रद्धातिरेकमवधार्य सगद्गदेन
वाक्येन तस्य करुणावरुणालयः सः ।
श्रीमद्गणेशमनुदानविधौ न्ययुङ्क्त
तं वेदवागधिकमानितनैजवाक्यम् ॥ ३६ ॥

कृत्वोपदेशविधिना स नृपं कृतार्थं
शुश्रूषितश्चिरतरं विनतेन तेन ।
सम्प्राप्तराङ्कववरांशुकभूरिवित्तै-
र्हृष्टैर्द्विजैः सह महेशपुरीमवाप ॥ ३७ ॥

अष्टाविंशसमासमाश्रितवयाः पूतं विधायेदृशं
वृत्तं शारदशीतदीधितियशा वित्तैर्द्विजान् मोदयन् ।
आतेने स विनायकाख्यमखिना सम्प्रार्थितः प्रश्रया-
दोद्गावं रचितेष्टकाग्निचयने ऽप्तोर्यामनाम्नि क्रतौ ॥ ३८ ॥

तेषां कायनिकायमुज्झति चिरान्नाद्यापि रोमाञ्चिता
तेषामक्षिपथे प्रमोदसलिलासारो न विश्राम्यति ।
चेतः किन्नु चमत्कृतेः परवशं कार्यान्तरं नेहते
येयैर्वै ऽस्य सुधासमानमधुरं तत्सामगानं श्रुतम् ॥ ३९ ॥

अग्निष्टोममखे जनार्दनकृते चाध्वर्यवं निर्वहन्
प्राचीनाधुनिकान् बुधान् स विदधे विचीयमाणांश्चिरम् ।
अन्यस्मिंश्च मखे स होत्रमतुला याज्याः पठन् सोतनोत्
तेनासीत् प्रकटा त्रयीनिपुणता तस्याखिले भूतले ॥ ४० ॥

गत्वा ऽथ दक्षिणदिशं गुरुभिः सहैव
संसेव्य तीर्थनिवहान् परिपूज्य देवान् ।
संतोष्य भूसुरवरान् विपुलैः स वित्तै-
स्त्रिंशत्तमामनुबभूव समां समानः ॥ ४१ ॥

कुर्वन्नसावितरमानुषदुष्कराणि
कार्याणि नित्यमिति भूतलभारतीशः ।
काश्चित्समाः सततपाठितसर्वशास्त्रो
निर्णीतधर्मविषयो गमयाम्बभूव ॥ ४२ ॥

मण्डीपुरेन्द्रगुणसंहतिभिर्बलेन
सन्दान्यमानहृदयः स दयापयोधिः ।
वारान् बहून्नगरमस्य जगाम राज्ञ-
स्तेनापि शिष्यसहितो बहुशोऽर्चितोऽभूत् ॥ ४३ ॥

एवमयमतिवाहयन्ननेहसं कतिपयं पञ्चत्रिंशत्तमे हायने परित्यक्त-निखिलविषयवासनेषु सदाचारतुलितसलिलसम्भवासनेषु विहितपरःसह-स्रशिष्यमतिविकासनेषु निजगुरुवरश्रीराजारामशास्त्रिषु ब्रह्मभूयमनुभव-त्स्वनवशेषिताधिगन्तव्यविषयो ऽपि चिराभ्यस्तसन्तताचार्यपरिचर्याऽऽकस्मि-कविच्छेदविरसाशयस्ततः प्रभृत्येव विहातुकामः पाठशालाऽध्यापनादिकार्यं

निवार्यमाणो निजजननीमुखनिखिलबन्धुवर्गेण सादरं सम्भावितो निजगुर्निर्वाहितमनितरसुकरं धर्मशास्त्राध्यापनाधिकारं समर्प्य काशिकराजकीयप्रधानपाठशालाप्रभुवरेण तदनुरोधाद्दूरीकृतप्रशस्ततदादेशो दिशन् दुरूहधर्मसङ्कटेषु सोपपत्तिकं लेखचातुरीसमवधीरितगीर्वाणगुरुर्व्यवस्थापत्राणि निबन्धन्ननेकविधान् निबन्धान् परिशोधयन् काश्मीरमण्डलाखण्डलप्रार्थनया तदीयसभास्तारपण्डितनिर्मितं धर्मशास्त्रनवीनप्रबन्धरत्नं निरन्तरं नानादिगागतासङ्ख्यधर्मविषयविशयपत्रोत्तरविलेखनव्यग्रतया विस्मृताहारविहारविश्रमोऽप्यश्रमः प्रख्यापयन् निजमात्रविश्रान्तां पण्डितैकशेषतामवधार्य पाठशालीयनिजकार्यनिर्वहणक्षमान् निजान्तेवासिनो विज्ञाप्य तत्रत्यं प्रभुवरं पञ्चदशहायनमात्राधिकारसम्पादितपरःसहस्रवत्सरानश्वरविविधविद्योऽनिच्छत्येव वियोगखेदजनितनयनाम्बुपूरपूरितमहीतले तत्र प्रभुवरे स्वीकृत्य तत्रत्यवार्षिकपरीक्षाव्यवस्थापनं विहायाऽऽसचचत्वारिंशे वत्सरे निजाधिकारं यतते स्म सुरनिकरं तर्पयितुं नव्यनव्यैर्हव्यैरसौ वसुमतीवसिष्ठः ॥

एकः सोऽत्र पवित्रचित्रचरितः साङ्गत्रयीपारगः
श्रौतस्मार्तपथप्रवीणधिषणः षड्दर्शनीमार्मिकः ।
दृप्यद्दुष्टकलिद्विपाहतिदलद्व्यालतेकाम्बुदः
पूज्यश्रीगुरुबालशास्त्रिचरणः पुंरूपवाग्देवता ॥ ४४ ॥

शुश्रूषापरितोषिताद् गुरुकुलाद्येनाधिगत्य श्रुतीर्बाल्ये बालसरस्वतीपदभृता सर्वेऽपि विस्मापिताः ।
यः कृत्स्नद्रविणापेक्षादपि गुरून् व्युत्पत्तिसंतोषितान्
सेवंसेवममन्यताद्भुतगुणो नानृण्यमप्यात्मनि ॥ ४५ ॥

यः स्वा[1]त्युज्ज्वलसर्वतोमुखभृतान्तेवासिशुक्त्यावलीनिर्यन्निस्तु[2]लसूक्तिमौक्तिकसिते सार[3]स्वते स्रोतसि ।

१ स्वस्यात्युज्ज्वलेन सर्वतो मुखेन भृता अध्यापिता इति यावत् । तादृशा अन्तेवासिनः शिष्या एव स्वात्यां नक्षत्रविशेषेऽत्युज्ज्वलेन सर्वतोमुखेन जलेन भृताः पूरिता इति श्लेषमूलकं समस्तवस्तुविषयं रूपकम् । २ वर्तुलमुपमाशून्यं च । ३ सरस्वतीसंबन्धिनि सागरसंबन्धिनि च ।

सद्यो रञ्जितरा[1]जहंसनिवहाहंपूर्विकाऽभ्यर्चित-
श्रियं कोपि विशा[2]रदो विजयते किं शा[3]रदो वारिदः ॥ ४६ ॥
अग्निष्टोममुखान्मखानविकलं निर्वाहुमात्तव्रते
यस्मिन् होतरि हर्षमापुरमरा मोहं मुहुः सामगे ।
मु[4]ख्याध्वर्यवभाजि विस्मृतवरान् भागान् भृशं लेभिरे
मन्ये यज्वनि तुन्दिलाः किमधुना मुञ्चन्ति नो यद्गृहम् ॥ ४७ ॥
ह्र[5]स्वामप्यनुयाति यस्य विजयः सेनां समित्संश्रयो-
र्लिम्पन् शीतगिरिं सितेन यशसा पिष्टं पिनष्टीव यः ।
सो ऽयं खण्डितवैरिमण्डलधनुर्मण्डो[6]धराऽऽखण्डलो
धत्ते मूर्ध्नि सु[7]वर्णरत्नघटितां कोटीरवद् यद्गिरम् ॥ ४८ ॥
आचारव्यवहारसंशयभवत्कोलाहलव्याकुला
आसम्राजमकिञ्चनादि मनुजाः श्रद्धाय वेदेष्विव ।
विश्वस्य प्रियपथ्यकारिवचने विश्व[8]स्य यस्याद्दरा-
द्धर्माध्वन्यपराधलेशविधुरा निर्वर्तयन्ति क्रियाः ॥ ४९ ॥
वादे जल्पवितण्डयोः प्रतिसभं सोत्साहमागच्छतो
वादिन्यङ्कुगणान् स्वयुक्तिनखरैर्विद्रावितान् पश्यता ।
त्रेताग्निनिषेवणैकमतिना वेदान्तशान्तात्मना
येनार्मोष्वधुना समापितमभूच्छार्दूलविक्रीडितम्[9] ॥ ५० ॥

---

१ राजानो हंसाश्च त एव राजहंसाः । २ प्रवीणः शारदाविहीनोऽपीति विरोधाभासध्वनिः । ३ शरदि भवः सरस्वतीसंबन्धी च । अत्रोक्तरूपकमूलकोत्प्रेक्षाश्लेषयोरेकवाचकानुप्रवेशसंकरः । विरोधाभासस्तु व्यङ्ग्यः । वृत्त्यनुप्रासेन सह संसृष्टिरिति बोध्यम् । ४ प्रतिप्रस्थातृव्यावृत्त्यर्थम् । ५ अल्पीयसीमपि पृतनां युद्धे विजयोऽनुगच्छति । यत्सेनायाः सदा जय एवेत्यर्थः । संज्ञायां नामनि ह्रस्वां सेनां विजयः शब्दः अनुगच्छति । यन्नाम विजयसेन इति भावः । ६ धनुर्मण्डयति भूषयतीति सः । धनुरिति पृथक् पदं वा । ७ शोभनैर्वर्णरूपै रत्नैः । कनके रत्नैर्हीरकादिभिर्घटितां वा । ८ विश्वासं कृत्वा । ९ शार्दूलस्येव विक्रीडितं पराक्रमः । एतदाख्यं वृत्तमुपक्रान्तं समापितमिति मुद्रालंकारश्च ।

अथ श्रौतानग्नीन् विधिवदयमाधाय सदने
हविर्भिः सन्तर्प्य त्रिदशनिवहं पर्वणि सदा ।
पिपासां सोमस्य प्रशमयितुमस्य व्यवसितो
बभूवाग्निष्टोमक्रतुवरविधानोत्सुकमनाः ॥ ५१ ॥

ततो ऽयमधिगत्य श्रौतविधिषु देवयजनभूमिं राजयाचनीयां श्रीमतो बन्दीकृतारातिवृन्दाद् बुन्दीपुरपुरन्दरादासादितानुमतिरदसीयामात्मसात्कृत्य भुवं परिहृत्य प्रतिनिधिभावभाञ्जि यज्ञोपकरणवस्तूनि सम्पादिताशेषयज्ञसम्भारो ऽवधार्य माघ्यां पौर्णमास्यामग्नीषोमीययागकर्तव्यतामामन्त्रितविविधदेशवास्तव्यसत्यगुणभासुरभूसुरगणः प्रागेव दशभ्यो वासरेभ्यो ऽपूपुजद्भुवम् ॥

तदानुभूतभूयिष्ठमखापि मखभूरियम् ।
सत्वरा चत्वरोत्सेधाद्दुर्षाच्छू[1]नत्वमाप किम् ॥ ५२ ॥

गणनायकभूवराहकूर्मानथ शेषं सुरशिल्पिनं समर्च्य ।
गणनाय विहारमाशु कर्तुं न्यदिशच्छिल्पविशारदान् स यज्वन् ॥ ५३ ॥

ततः पश्चात्प्रा[2]ग्वंशं ततः पुरस्तात्स[3]दोहवि[4]र्धाने पार्श्वयोश्च मा[5]र्जालीयाग्नीध्री[6]ये पुरश्चोत्तरवे[7]दिं चात्वा[8]लोत्करौ[9] सदसि होत्रकधि[10]ष्ण्यान्यौदुम्बर्यंव[11]टं हविर्धाने चोपर[12]वान्यथावन्निर्माप्य परिकल्प्य चानल्पसौन्दर्याणि तत्रतत्र द्वाराणि संसाध्य च शुभं मण्डपमभितो विधापितोचितोपवेशनस्थानः प्रतीक्षते स्म यज्ञारम्भमहोत्सवं स यज्वनामग्रणीः ॥

त्रयोदश्यां माघ्यामथ कृतगणाधीशनमनो
मनोभीष्टैः शिष्टैः सह विहितनान्दीमखविधिः ।

---

१ चत्वरएव हर्षहेतुकपुष्टत्वोत्प्रेक्षा । २ प्राकृतिकाग्निस्थानम् । ३ होत्राद्युपवेशनस्थानम् । ४ सौत्यदिनीयसोमाभिषवस्थानम् । ५ चमसशोधनस्थानम् । ६ आग्नीध्रस्थानम् । ७ प्रधानहोमस्थानम् । ८ यज्ञियमृदाहरणगर्तः । ९ अपवृत्तपदार्थप्रक्षेपणार्थं गर्तः । १० होत्राद्यग्रस्थस्थण्डिलानि । ११ उद्गातृच्छायाभूतौदुम्बरशाखानिखननार्थं गर्तः । १२ गर्तचतुष्कमन्तर्मिथम् ।

Digitized by Google

कुशासीनः पत्न्या सह सकुशपाणिः कुशलधी-
रसावन्त्वेष्टिर्मखकरणसङ्कल्पमतनोत् ॥ ५४ ॥
लसद्रम्भास्तम्भा किसलयचलत्तोरणवृता
कृतानल्पाकल्पा श्रुतिशतकजल्पाकभरिता ।
यजुःसामर्ग्जन्यध्वनिभिरभिभूतान्यनिनदा
तदा तोषं केषामतुलमकरोन्नाध्वरमही ॥ ५५ ॥
ब्रह्मचर्यसम्पूर्णा कीर्णा पुष्पफलैः कुशैः ।
यजुःसामर्ग्ध्वनिभृता चित्र[1]र्णा भूस्त्रिधा बभौ ॥ ५६ ॥
द्वादशशतगवदक्षिणा ऐन्द्राग्नाश्विनसमानतन्त्रपशुः ।
द्वादशशस्त्रस्तोत्रः प्रवर्ग्ययुक्तो रथन्तरेण युतः ॥ ५७ ॥
ज्योतिष्टोमः सोमो ऽग्निष्टोममखस्तदा ऽमुना ऽऽरब्धः ।
श्रीयज्ञपुरुषहर्षप्रकर्षमात्रं मनसिकृत्य ॥ ५८ ॥
अथ पायसौदननिवेदनपूर्वं कृतसोमराजनमनः स सुधीः ।
त्वरते स्म विस्मितजनैर्वृतया द्विजपूजयर्त्विज इमान्वरितुम् ॥५९॥
सोमप्रवाकेण पुरा वृतानां होत्रादिकानामथ ऋत्विजां सः ।
समन्त्रकं प्रारभताध्वरीन्द्रो विद्वद्वराणां वरणं सुतूर्णम् ॥ ६० ॥
विद्वद्वन्दितबालदीक्षितसुतः सङ्ख्यावतां सम्मत-
स्तत्र द्वादशवार्षिकोपि वयसा तुल्यः सुराणां गुरोः ।
होता ऽऽहूतमहेन्द्रमुख्यदिविषत्सानन्दसंवीक्षितो
यज्ञे तत्र गदाधराभिधसुधीवर्यो वृतोभून्मुदा ॥ ६१ ॥

ततो जयरामशास्त्रिसदाशिवदीक्षितराजारामदीक्षिता मैत्रावरुणाच्छावाकग्रावस्तुद्भावेनाव्रियन्तामुना दीक्षिष्यमाणेन ॥

१ द्विजाः रूपाणि अक्षराणि च ।

बाल्ये येऽनुपनीय वेदमखिलं श्रौतं तथाध्यापितो
यस्मात् प्राप वसिष्ठतुल्यचरितादाधानकाले ऽरणी ।
तान्नानाविधयज्ञधूर्वहतया विख्यातकीर्तीनसौ
मुख्याध्वर्यवमापयद् गुरुवरश्रीरामकृष्णाभिधान् ॥ ६२ ॥

ततस्तैत्तिरीयशाखाध्यापनधुरन्धरं श्रौतार्णवमन्थनैकमन्दरं सुत्वा-त्मजवेणीमाधवदीक्षितं प्रतिप्रस्थातृभावे नियुज्य पुरस्कृत्य च काशीनाथ-शर्माणं नेष्ट्रीये विहितसोमयागं सत्याषाढमतपारदृश्वानं जनार्दनशर्माण-मुन्नेतृभावे प्रोत्साहयामास ॥

धृताप्तोर्यामादिक्रतुसकलनिर्वाहणधुरान्
जगन्मान्यान् धन्यान् विदितनिखिलन्यायविषयान् ।
सखारामाभिख्यान्निजगुरुवरज्येष्ठसहजान्
स वव्रे ब्रह्मत्वे विशदधिषणाह्रीणधिषणान् ॥ ६३ ॥

ततो नानाविधनिगमश्रौतस्मार्तशास्त्रप्रवीणं धुरीणमध्यापकानां राजारामशास्त्रिणमङ्गीकार्य ब्राह्मणाच्छंसित्वं त्रिविधश्रौतपथपारीणं काशीनाथशास्त्रिणं ग्राहयित्वाग्नीध्रीयं भट्टवंशावतंसं गोपालशर्माणं वि-दधे पोतारमसौ मध्यमलोकचतुराननः ॥

वाणीकरक्वणदनल्पगुणाढ्यवीणा-
संमूर्च्छनाविजयिसुन्दरसामगानम् ।
गोपालकृष्णविबुधं स्तुतिकार्यधुर्य-
मुद्गातृतामनयदेष विशेषवेदी ॥ ६४ ॥

प्रस्तोतृत्वे च प्रख्यातसामगानं बालदीक्षितं परिकल्प्य सम्भाव्य च यज्ववररघुनाथदीक्षितं प्रातिहर्त्रे वरित्वा बापूशर्माणं सुब्रह्मण्यं पुर-स्कृत्य यज्ञकर्मसु बापूभट्टाभिधसदस्यं वुवूर्षुरसौ सौम्यमूर्तिः ॥

अथोपविष्टान् कुशविष्टरेषु शिष्टानधीष्टान् परमप्रहृष्टान् ।
पाद्यार्घ्यतोयाचमनीयपूर्वं समर्च्य यज्वा मधुपर्कदायी ॥ ६५ ॥

Digitized by Google

विशालकौशेयभवान्तरीयैर्महाधने राङ्कवसत्करवैः ।
रत्नाङ्गुलीयैरपि रौप्यपात्रैरमोदयद्वेदविदां वरिष्ठः ॥ ६६ ॥

घ्राणैर्निपीतं रसनाग्रगीतं नीतं त्वचा चन्दनतां यशो ऽस्य ।
मालीभवद् घ्राणसुखं किमस्योमुदे ऽवहद्राजतपात्रशैलीम् ॥ ६७ ॥

दृशेदृशौ मे हविषामलाभात्प्रतिक्रिया ऽस्या भवतां करस्था ।
ऋत्विग्वरान् वक्तुमितीव रक्तरत्नाङ्गुलीयत्वमवाप वन्हिः ॥ ६८ ॥

तदनु चमसाध्वर्यून् रश्मीनिवात्मन उद्गतान्
विदितयशसो धातारं च प्रसर्पकपुङ्गवान् ।
सुरभिसुमनोवस्त्रैः पात्रैर्गवार्पणपूर्वकं
मुदितमनसो यज्ञारम्भे व्यधात्स बुधाधिपः ॥ ६९ ॥

तदनु प्राग्वंशपश्चिमद्वारउपस्थाय देवता देवयजनं गत्वा सम्पाद्य विधिना प्राग्वंशेग्नीचिर्दिदेश द्रव्याणि प्रतिपत्तये ॥

आज्यं पशुपुरोडाश्यौ यावता स्यान्मखो मम ।
तावद्यज्ञार्थमन्यत्तु भुञ्जीरन् ब्राह्मणा इति ॥ ७० ॥

प्रससार तदारभ्य तत्र खादतमोदता ।
द्विजानां कर्मठानां तु जज्ञे पचतभृज्जता ॥ ७१ ॥

अथारब्धे ऽध्वरवरे विधायाहवनीये कूश्माण्डहोममध्वर्युः सम्पादयिष्यन् प्रवर्ग्यसामयोमग्रेसरीकृत्य कृत्यविदामयणीरश्वमनुगतो ब्रह्मयजमानाभ्यामाहृत्य मृद्वराहविहतादीनि तान्यभिमन्त्र्य निष्पाद्य तैर्यथावन्महावीरान्प्रताप्य चामून् परिद्रढय्य हुत्वा सम्भारयजुर्भिः प्राक्रमत दीक्षणीयामिष्टिम् ॥

पूज्याः सर्वे कथमिव सुरा एकदादौ मखेस्मिन्
आलोच्येत्थं कृतपरिचयो बह्वृचब्राह्मणेषु[१] ।

---

१ अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा देवता इति तत्र श्रुतत्वादिति भावः ।

प्रत्याहाराकलनचतुरो दीक्षणीयेष्टिमध्ये
सो ऽग्नाविष्णू प्रथमचरमो किं तदानीमयष्ट ॥ ७२ ॥

अथो विहितवापनस्त्रिपथगाजले निर्मले
यथाविधि कृताप्लवोप्यहतवाससा वेष्टितः ।
शचीसदृशशीलया सपदि तत्र पत्न्या युतो
मनोभिलषितान्थया निजजनैरमोद्याद्वृतैः ॥ ७३ ॥

ततस्त्रिककुदञ्जनं नयनयोरसौ धारयन्
मृगाविकलचर्मणा वृततनुः शिरस्त्राणवान् ।
उदुम्बरभवं वहन् पृथुलदण्डमास्योन्मितं
तनुं मृगविषाणया स विलिखन्नभूद्दीक्षितः ॥ ७४ ॥

कलेस्त्रातुं वेदान् कमलभवलोकादुपगतो
वसिष्ठो ऽरुन्धत्या सह किमिति नातर्कि किल कैः ।
तदोपेतं पत्न्या शिरसि मृदुबालोल्लसितया
सदःस्थं पश्यद्भिर्व्रतकृतमतिं दीक्षितममुम् ॥ ७५ ॥

तस्मिन्नह्नि वनीपकामरतरोर्बुन्दीपुराधीशितुः
प्राप्याज्ञां नवनन्दशर्मविबुधा आचार्यलक्ष्माभिधाः ।
वर्षन्ति स्म तथाविधं वसु सनीहा[1]रा विहाराद्बहि-
र्वैयग्र्यं व्यपदिश्य येन गमने ऽज्ञायन्त लालाटिकाः[2] ॥ ७६ ॥

इति प्रथमवासरे परिसमाप्य सर्वं विधिं
विसृज्य सकलर्त्विजो रजनिविश्रमायादरात् ।
वितीर्णवसुरप्यसावनिशबद्धमु[3]ष्टिस्तदा
निशामनयदर्चयन् मनसि यज्ञनारायणम् ॥ ७७ ॥

---

१ यज्ञसंपादनोपयोगिधनाहरणार्थं नियुक्ताः । २ प्रभोर्भालदर्शनमात्रका ाः द्रव्यस्य प्रभूतस्य प्राप्तत्वादिति भावः । ३ कदर्यः विधिबलान्मुष्टिबन्धनक्वादिति विरोधपरिहारः ।

तदनु परेद्युः प्रभातएव विहितनित्यक्रिये वैतानाग्नीन् ज्योतिष्म-तः कर्तुमादिशत्यध्वर्यौ त्वरमाणे च याजकगणे प्रवृत्तिवार्चिर्मिषेण पूर्व-दिनहविरास्वादनसंजातहविरौत्सुक्ये प्रसार्य रसना याचमानइव हवींषि हुतवहे पूर्यमाणे च तेजोतिरस्कनिष्पादितापरकृशानुशङ्कैरखिलागमपारगै-र्द्विजोत्तमैर्यज्ञमण्डपे सज्जीक्रियमाणे च परिकर्मिभिस्तत्तत्प्रदेशेषु कुशस-मिदादिसंभारे निजमातृवरिवस्यावलोकनायेव त्वरयति सारथिं कमलि-नीनाथे ॥

म[1]न्दाक्रान्तामथ रविकरैर्यज्ञशालां विशालां
संप्रेत्यासावदितिमयजत्प्रायणीयाभिधेष्ट्या ।
यस्यां धूम्याविश[2]यमदिशत्केवलच्छान्दसा[3]नां
द्रागायान्त्याः सुरमु[4]निपथात्केशपाशः श्लथो ऽस्याः ॥ ७८ ॥

सोमक्रयण्यामथ कल्पितायामेकाब्दशोणाकृतिपिङ्गलाक्ष्याम् ।
प्राप्यैष यज्वोत्तरवेदिदेशं प्रावर्तत क्रेतुमशेषसोमम् ॥ ७९ ॥

परिश्रितेन च्छदिषोपरिष्टाद्
वृतेन सार्द्धं शकटेन गच्छन् ।
सोमाभिमुख्यं विदधच्च तस्य
स्थिते तदा ब्रह्मणि दक्षिणस्याम् ॥ ८० ॥

आस्तीर्य च क्षौमवरं मृगाजिने सहेमहस्तेन ममे स सोमम् ।
यथाविधि स्वाचितमङ्गुलीभिस्ततो न्यबद्ध्नाद्वसनेन तेन ॥ ८१ ॥

गोहेमाजाधेनुवत्सवृषैरनडुहा ऽतनोत् ।
गोयुगेन च वस्त्रेण सोमक्रयमसौ कृती ॥ ८२ ॥

१ किं चिदाक्रान्ताम् । वृत्तनामोच्चाटनान्मुद्रालंकारश्च । २ धूमसमूहसंशयं । ३ न तु चतुरसाणां तेषां स्वर्दितिकेशपाशनिश्चय एवाभूदिति भावः । ४ तत्र कश्यप-सन्निधावदितेः सत्त्वादिति भावः ।

निर्दिश्य सोमक्रयणानयासौ भृत्युक्तगन्धर्वमहत्तरेभ्यः ।
निष्कास्य सोमक्रयिणीं स लोष्ठैर्न्यवेशयत्तं शकटे च सोमम् ॥ ८३ ॥

युक्ते वृषाभ्यां शकटे प्रयाति
सुब्रह्मण्यीयाभृति सामगे च ।
स्तुवत्यमुं होतरि मन्द्रमृग्भिः
शोभा गिरां पारमगात्तदानीम् ॥ ८४ ॥

अथाग्नीषोमीये ऽसितधवलवर्णे पशुवरे
प्रक्लृप्ते तं कर्णे दधदधृतदण्डो व्रतिवरः ।
प्रतीच्यासौ सोमं कृतवृषवरोन्मोचनविधि-
स्तदानीमातिथ्यां व्यधित विमलामिष्टिमचिरात् ॥ ८५ ॥

अग्नीषोमातिथ्यमस्यां विधाय प्रोन्मुच्याथो धूर्वहं चोत्तरस्थम् ।
चारुण्यर्चा गन्धपुष्पोपहारैः सोमस्यार्चामेष यज्वा व्यधत्त ॥ ८६ ॥

आप्यायनं निन्हवनं तदानीं राज्ञो विधायाखिलऋत्विजोऽथ ।
मुदा बभुर्ब्रह्मपुरोगमास्ते ब्रह्मर्षयः शक्रमिवार्चयित्वा ॥ ८७ ॥

अथ प्रवर्ग्यं विधिना विधातुं प्राग्वंशजद्वारगणं पिधाय ।
आच्छाद्य पत्नीं वसनेन तत्र प्रचक्रमे याजकवर्यसंघः ॥ ८८ ॥

पश्चाद्धोता ऽध्वर्युरासीत्पुरस्ता-
त्प्रस्तोताऽभूद्धोतृयाम्ये तदानीम् ।
आग्नीध्रोपाध्वर्युवर्यावुदीच्यां
ब्रह्मा यष्टा गार्हपत्यस्य याम्ये ॥ ८९ ॥

खरे महावीरममी विधाय जलं मदन्तीस्थमुपस्पृशन्तः ॥
प्रपठ्य शान्तिं मधुरस्वरेण प्रवर्ग्यमारब्धुमथायतन्त ॥ ९० ॥

आग्नीध्रि रौहिणहविःकरणैकताने
प्रस्तोतरि प्रथितसुस्वरसामगाने ।

Digitized by Google

होतर्यभिष्टुवति घर्ममनेककार्य-
वीक्षाऽऽकुलाः सदसि विप्रवरा बभूवुः ॥ ६१ ॥

सामाकर्णननिश्चलाः कतिपये चित्रार्पितानां दशां
होतृस्तोत्रसुपूर्णकर्णविवरा अन्ये शिरोधूननम् ।
एणीचर्मधृत्रिवृद्धुसितशुचीनध्वर्युमुख्यान् परे
दृष्ट्वा पूतमनस्कतामुपगता यज्वानमस्ताविषुः ॥ ६२ ॥

प्राग्[1]वंशे विशदे स्थितिं विदधतां शुद्धाशयानां तदा
प्राग्वंशे विशदे स्थितिर्बुधजनैर्निश्चीयते स्माद्भुतम् ।
प्रत्यक्षापि तदाऽनुमामजनयत्सा येन तस्मिन् क्षणे
जिग्युस्तेन परान् विवादरसिकान् वैशेषिकाः[2] सामहम् ॥ ६३ ॥

अथोपयमनीं स्रुचं विदधता करेऽध्वर्युणा
हुते हविषि तत्त्वणं सरसितार्चिषा वन्हिना ।
स्वतृप्तिरुदिता ऽथ वा पुनरमुष्य याज्ञा कृते
त्यभून्न विदुषामपि प्रशमितो विवादस्तदा ॥ ६४ ॥

अथ विधाय समापनमस्य ते पठितशान्तिकृतेतरवाग्गणाः ।
उपसदिष्टिमनिष्टनिवारिणीं त्वरितकृत्यविधिं प्रवितेनिरे ॥ ६५ ॥

अध्वर्युहोतृक्रियमाणकार्यधारावगाहि श्रुतिनेत्रजातम् ।
एकक्षणे स्थानयुगं तदानीं निर्दिश्य सांख्या अजयन् विपक्षान् ॥ ६६ ॥

व्याचष्टाऽग्नीदृत्विपत्नीः समस्ताः सुब्रह्मण्यश्चाह्वयामास शक्रम् ।
पौर्वाह्णिक्यो ते समाप्यैवमिष्टी सद्यश्चक्रुस्ते दिनान्तोक्तरूपे ॥ ६७ ॥

प्रवर्ग्ये साधु विहिते तदा मखशिरश्चिरात् ।
अयुज्यत समर्थोभून्मखो येन फलार्पणे ॥ ६८ ॥

१ प्राक् वंशे इति पदद्वयम् । २ प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्तो तर्करसिका इति वदन्त इति भावः ।

श्रीमद्धरिश्चन्द्रमुखा दिने ऽस्मिन्महार्हवस्त्रादिबहूपहारैः ।
यज्ञेशशुश्रूषणकारिणः स्वमपावयन्नागरिका महेच्छाः ॥ ९९ ॥

द्वितीयदिवसे ऽखिलं परिसमाप्य चैवं विधिं
विसृज्य सकलर्त्विजो रजनिविश्रमायादरात् ।
वितीर्णविभवो ऽप्यसावनिशबद्धमुष्टिस्तदा
निशामनयदर्चयन् मनसि यज्ञनारायणम् ॥ १०० ॥

अथ तृतीयदिने स बुधाग्रणीः प्रमुदिताखिलकर्त्विगुपक्रमम् ।
समतनोद्विधिबोधितकर्मणां कृतसमस्तविलोककशर्मणाम् ॥ १०१ ॥

तदनु यथाविधि विहितयोः पौर्वाह्णिकयोः प्रवर्ग्योपसदोर्यज्ञधूर्वहाग्रयाय्यध्वर्युरग्रेण प्राग्वंशं यथोपदिष्टान् प्रक्रम्य प्रक्रमान् समपादयन् महावेदिमभ्यमन्त्रयच्चामूं यजमानः ॥ तदन्वापराह्णिकयो प्रवर्ग्योपसदो समापयामासुरध्वर्युपुरोगमा ऋत्विजः सह यजमानेन ॥

तस्मिन्नन्हि कृताभिनन्द्यविनयो ऽमेठीपुराधीश्वरः
साष्टाङ्गं प्रणिपत्य यज्ञपुरुषं दत्वा ऽतुलां दक्षिणाम् ।
भक्त्युद्रेकभवत्प्रभूतपुलकः सानन्दबाष्पो मुहुः
चक्रे विस्मितमानसान् बुधजनान् श्रद्धाभृतेनात्मना ॥ १०२ ॥

तृतीयदिवसे ऽखिलं परिसमाप्य चैवं विधिं
विसृज्य सकलर्त्विजो रजनिविश्रमायादरात् ।
वितीर्णविभवो ऽप्यसावनिशबद्धमुष्टिस्तदा
निशामनयदर्चयन् मनसि यज्ञनारायणम् ॥ १०३ ॥

अथ चतुर्थदिनारम्भे ससंरम्भमम्भसा विमलेन परिशोधिताखिलशरीरेष्वपि यज्ञवाटप्रवेशयोग्यतायां संदिहानेष्विव साशङ्कमितस्ततो ऽवलोकयत्सु प्रविशत्सु यज्ञमण्डपं परःसहस्रेषु प्रेक्षकेषु प्रभातप्रभृत्येव कथं चिदासादितप्रवेशनिर्गममार्गेषु त्वरमाणेषु याजकवरेषु संनिवेशयत्सु

च तत्तदवकाशेषु यज्ञपात्रबर्हिःसमिदादीनि परिकर्मिषु प्रावर्तन्त पौर्वाह्णिकप्रवर्ग्योपसदौ सद्य एव चापराह्णिक्यौ ते विधातुमध्वर्युमुखा मखधुरन्धराः ॥

उद्वासयिष्यन्नथ स प्रवर्ग्यमग्नीन्मुखानुत्तमदक्षिणाभिः ।
अजादिभिस्तोषयति स्म यज्वा स्वोत्साहसंधुक्षणदक्षिणाभिः ॥१०४॥

मुहुः प्रस्तोत्रोक्ते मधुरमधुरे सामनि मुदा
तदा वार्षाहारे विधुतशिरसस्ते दिविषदः ।
श्रुतेष्टाहोत्रीया यदजहुरथ स्वं स्वरविदं
तदा हाहाकारादनुगतपदार्थो ऽयमभवत् ॥ १०५ ॥

प्रवर्ग्यमुद्वास्य स विप्रवर्ग्यो गतास्तदैवोत्तरवेदिदेशे ।
त्वरायुतो ऽथोपसदा प्रचर्य कुशैर्महावेदिविधानकारी ॥ १०६ ॥

कृत्वा हविर्धानविशेषकार्यं ज्ञात्वा तथैवोपरवानमुष्मिन् ।
आग्नीध्रधिष्ण्यादि विधाय तूर्णमौदुम्बरीगर्तमुखं ततान ॥ १०७ ॥

प्रणीय चैवोत्तरवेदिकाग्निं तथा हविर्धानमपि प्रणीय ।
सदोहविर्धानसमस्तमार्जालीयेषु निर्माप्य च शुद्धमण्डपान् ॥ १०८ ॥

सदसि होत्रकधिष्ण्यविधेः परं विरचितोत्करयोग्यविधिस्तदा ।
घृतपशुप्रययागविधित्वरो न हि तदा ऽऽलभत क्षणविभ्रमम् ॥१०९॥

ऐन्द्राग्नमश्विनपशुयुगसमानतन्त्रे तदारब्धे ।
अग्नीषोमीयपशौ तिलमात्रः सदसि नावकाशोऽभूत् ॥ ११० ॥

तदनु यथाविधि निर्वृत्ते वैसर्जनहोमे ऽग्नीषोमप्रणयनोत्तरं विसष्टायां चावान्तरदीक्षायां सत्वरं विधाय यूपसंमानादिपाशुकं कृत्यं व्यधास्याशुकं मन्थनममन्थरमाविर्भावयिष्यनृत्विजां गणः आशुशुक्षणिम् ॥

तदा किल पुरतो निरुद्धदृष्टिपथावकाशानागाञ्जलान् प्रेक्षकानपसारयतां कियच्चिरमवलोकयन्त दूराद्वागतानामस्माकमपि नयनयोर्महो.

त्सवं संपादयितुं विधातुं चास्मानं पूततमं चणमन्तरदानाय प्रसीदतेति पार्श्वास्थानां कथं वयममीभिरलसशिरोमणिभिर्बाध्यामहे चिरादागत्य सप्रार्थनमासादितावकाशाः पश्चादागतैर्यदमीषामीदृशी यागावलोकनश्रद्धा कथमिमे प्रागेव नोपयाता इति पुरःस्थितानां किं वृथा कलकलं तनुथ वाक्कलहकारिणां संमर्दन भवतां वयमपि कदर्थिता न पारयामो द्रष्टुमिति पार्श्वस्थानां जोषमाध्वं किं न पश्यथ राज्ञोपि निर्दयसंमर्दितानलब्धावकाशान्विप्रकृष्टदेशावस्थितान् वाक्कलहेन भवतां विरच्यमानयज्ञक्रियान्तराया: प्रेक्षन्ते सभ्रूभङ्गममी किलाध्वर्युमुखा इति व्यवस्थापकानां किमेवं भाषध्वे न कुप्येयुर्दयामयनिजाशयाः स्वतन्त्रप्रज्ञा न स्खलेयुरस्मत्सांराविणेन महाशयाः पश्यन्ति सकरुणमेव भवद्भिरभिभूयमानानस्मानिति दम्यमानानां च व्याप्नुवति रोदसीरन्ध्रं महति कोलाहले ॥

कृत्वोपाकरणाज्यसंस्कृतिमुखान् सर्वान् विधीनध्वरे
यन्मेधावहणाय मन्द्रनिनदैरध्वर्युरादिष्टवान् ।
तेनैतत्क्षणएव मूर्च्छित इवालेख्यार्पितश्रीरिव
प्रायः सो ऽध्वरमण्डपोभवदलं क्षुब्धार्णवाभो ऽपि सन् ॥ १११ ॥

गभीरमधुरस्वरामथ पुरोनुवाक्यां मुदा
प्रशास्तरि पठत्यलं त्वरितवाहनान्वेषिणाम् ।
मखो हरिसभासदां कलकलेन वा पूरितः
प्रशास्तृनिनदेन वेत्युदभवन्नृणां संशयः ॥ ११२ ॥

किं मेधावहणेन मन्द्रमधुरव्याहारिणा ऽऽकर्षितः
किं होतुस्तमयाज्यया निजबलाद् वृन्दारकाणां गणः ।
किं वाध्वर्युवषट्क्रियाश्रुतिभवत्सरम्भपूर्णस्तदेत्येवं भूरिविवादसान्द्रसदसा नानन्दि कस्को जनः ॥ ११३ ॥

Digitized by Google

वपा अथ नृपार्चितो हुतवहे हुता मन्त्रविन्
निरीक्ष्य न ममौ मुदा वपुषि यज्वनामग्रणीः ।
प्रमोदनयनाम्बुभिर्निबिडपूरितोरस्थलः
सुतृप्तविबुधार्पितां दधदिवैष पुष्पाञ्जलिम् ॥ ११४ ॥

सामोदं करतालिकाः कतिपये तस्मिन्क्षणे ऽवादयन्
नृत्यन्ति स्म मुदा विसंष्ठुलपदं के चित्तदा संसदि ।
इन्द्राग्न्यश्विमुखान्मखे ऽत्र सुहितानस्ताविषुश्चापरे
नानाभावविभाविता इति जना उच्चावचं चक्रिरे ॥ ११५ ॥

तूर्याडम्बरडम्बराम्बरचलद्वीणावृन्दाकुलः
काष्ठातीतनिनादकारिनलिकाध्वानैर्निरुन्धन् श्रुतीः ।
संप्राप्तातुलदक्षिणाद्विजवराशीर्वादसंनादितो
ऽजेषीद्यज्ञवरः स धर्मजकृतं तं राजसूयाध्वरम् ॥ ११६ ॥

गाम्भीर्येण पयोनिधिं सुरतरून् दानेन मत्या गुरुं
नीत्या शुक्रमनुत्तमेन यशसा शीतद्युतिं शारदम् ।
यो धर्मेण युधिष्ठिरं विजयते यस्य प्रसादादभूद्
विद्वद्वृन्दनिकेतनेषु सततं सा चञ्चला ऽचञ्चला ॥ ११७ ॥

भूमीमण्डलमण्डनायितयशा मण्डीपुराखण्डलः
सर्वस्वार्पणतुष्टसद्गुरुकृपापीयूषधाराधरः ।
सो ऽयं शोभननामकं द्विजवरं संप्रेष्य तस्मिन्दिने
सर्वानभ्यभवन्निजैर्वितरणैर्यज्ञेश्वरप्रीतिकृत् ॥ ११८ ॥

पितापुत्रीयायामथ मधुरकण्ठं गिरि तदा
स सुब्रह्मण्यायां सविधि विहितायां मखिवरः ।

श्रुतेषु च्छागेषु प्रतिपशु पुरोडाशहवनं
विधातुं प्रारब्ध त्रिदशगणसंतोषफलकम् ॥ ११९ ॥
तदेव वसतीवरीरप उपाहरन् सत्वरा
द्विजाः सुरनदीतटात् स्फुटतरातपच्छायतः ।
समन्त्रकमसादयन् द्रुतममूश्च शालामुखा-
लनापरदिशि क्षमाः परदिनीयसुत्याविधौ ॥ १२० ॥
अस्तशैलशिखरं गते रवावङ्ग्यागविधिहृतमो ऽभवत् ।
स्विष्टकृच्चरमकृत्यसंभृतो मोददः सकलनाकिसन्ततेः ॥ १२१ ॥
विधाप्य वसतीवरीपरिहृतिं चतुर्थे दिने
विभूष्य सकलर्त्विजो ऽध्युषितसोमनाग्नीध्रकान् ।
प्रजागरकृते वधूं विधिबलादमूं बोधयन्
अघाववसदाद्रात्सततसोमगोपायिता ॥ १२२ ॥

अथ पञ्चमेऽह्नि स्तोकविश्रान्तेषु श्रान्तेष्वपि सौत्यदिनसंप्राप्ति-जप्रहर्षपरिपूर्णस्वान्तेषु चिरविश्रान्तेष्विव त्वरमाणेषु याजकेषु रात्रितृतीयभागारम्भएव निर्मलं गाङ्गमम्भोवगाह्य संनद्धेषु बद्धपरिकरेणाशीतिवार्षिकेणापि यूनो ऽपि वैलक्ष्यलक्ष्मीकृतान्विदधता ऽध्वर्युणा हुतास्वाग्नीध्रीये यज्ञतनुषु प्राक्रामयत् सवनीयस्य पशोस्तन्त्रं सर्वतन्त्रस्वतन्त्रो ऽसौ मन्त्रविदामग्रणीः ॥

उपांशुपात्रप्रमुखानि तत्र प्रयुज्य पात्राणि खरे ऽखिलानि ।
यथावकाशं चमसान् परिप्लवां न्यवेशयच्चाधवनीयपात्रम् ॥ १२३ ॥
पुरोधुरं पूतभृतं निवेश्य स्थालीस्ततस्त्वेकधनाः स्रुचो ऽथ ।
कृत्वोपरे ग्राववरांश्च संमुखान् राजानमासादयदेषु यज्वा ॥ १२४ ॥
सविश्वरूपाभिधसामगानउपाकृते प्रातरथानुवाके ।
मुदा तदा निर्वपति स्म सम्यगध्वर्युवर्य्यः सवनीयमाशु ॥ १२५ ॥

धानाः करम्भान् यवजान् विधाय व्रीहीनगृह्णात्परिवापहेतोः ।
ततः पुरोडाशनिमित्तमेतानामिक्ष्यमेकीकृतवान् पयो ऽथ ॥ १२६ ॥

अथैकधनाद्याहरणे जाते प्रचारे च दधिग्रहस्यांश्वदाभ्ययोश्चांशुप्रचारे च निष्पन्ने सोमस्य राज्ञो महाभिषवे ऽन्तर्यामप्रचारोत्तरं गृहीतेषु विधिना ग्रहेषु गीते च सुस्वरमास्तावे बहिष्पवमानउद्गात्रा व्याघारितेषु धिष्ण्येष्वभूदाश्विनग्रहणम् ॥

ग्रहेषु सज्जेषु ततो ऽखिलेषु प्रावर्तताग्नेयपशोः स यागः ।
अध्वर्युमैत्रावरुणावथाग्नीद्धोता च चक्रुः किल यच्च कार्यम् ॥ १२७ ॥

अथ हुतायामाग्नेयपशुवपायां निर्वर्तिते च ग्रहावकाशोपस्थाने सवनीयप्रचारद्विदेवत्यप्रचारशुक्रामन्थिप्रचारेषु निष्पादिते च भक्षे विरचितसकलसामाजिकसाधुवादे चाच्छावाकवादे ऋतुग्रहप्रचारोत्तरमैन्द्राग्नग्रहणे कृतउदीरिते च मन्द्रमाज्यशस्त्रे होत्रा वैश्वदेवग्रहणसमनन्तरं मधुरतरं गीते चोद्गात्रा ऽऽज्यस्तोत्रे होत्रा च प्रउगशस्त्रे निगदितेषु मैत्रावरुणप्रभृतिभिरुक्थ्यपर्यायेषु निष्ठामटीकत सवनाहुत्यन्तशेषकर्मपरिशोभितं प्रातःसवनम् ॥

शस्त्रस्तोत्रप्रचुरनिनदो देवतामोदहेतु-
स्तत्र प्रातःसवनविहितः सो ऽभवत्सोमहोमः ।
यस्मिन्नब्दां शतकदशकं बिभ्रदेको महेन्द्र-
श्चित्रं नानाविधविधिभवाश्चर्यसाक्षी बभूव ॥ १२८ ॥

औदुम्बरीतलनिषण्णकुशाग्रसारि-
प्रस्तोतृसाममधुरस्वरजाततोषाः ।
उद्गातृगीतिकृतकर्णसुखाः सभास्था
नैव प्रयातमविदन् सवनाह्निकं तत् ॥ १२९ ॥

होतुः शस्त्रं प्रथममभवत्स्तोत्रपूर्वं प्रयास्तु-
स्तस्मादग्रे प्रथमसवने ब्राह्मणाच्छंसिनो ऽथ ।

अच्छावाकस्य च परमतः शस्त्रमाश्चर्यरूपं
चैवं माध्यंदिनसवनगा स्तोत्रशस्त्रालिरासीत् ॥ १३० ॥

समाप्यासौ प्रातःसवनमिति शक्रादिविबुधान्
हविःसोमैस्तृप्तान् पुनरपि हविर्भिर्मदयितुम् ।
अथारेभे माध्यंदिनसवनमाश्चर्यचरितो
विदित्वा सौवोशान् कृतपशुपुरोडाशमनसः ॥ १३१ ॥

अथ प्रस्तूयमाने ऽभिप्लवादिमाध्यंदिनसवने स्तूयमाने सुस्वरं साव-सुता राजनि कृते महामहसो महावकाशोपस्थानात् परं सदसि गीयमाने च माध्यंदिनपवमाने धिष्ण्ययव्यापारयो विहिते संपादिते च दधिघर्मे सवनीययागशुक्रामन्थिष्वनुष्ठितेषु ॥

चतुष्पद्गवीर्मखे प्रददुरेव याज्याः पुरा
कथं रजतधेनवः कुशवृते प्रदेया इह ।
इति श्रुतिविचक्षणाः समवधार्य तस्मिन् मखे
ददौ सुरतरूपमः सदसि गास्तदा ऽऽष्टापदीः ॥ १३२ ॥

मदीयतातं ज्वलनं हविर्भिः पुष्णाति रस्यद्य कृतोपकारम् ।
इत्थं विचिन्त्येव सुवर्णमृत्विक्करेषु गोरूपधरं तदा ऽभात्॥१३३॥

तदेव चमसाध्वर्युप्रसर्पकमुखान् द्विजान् ।
विपुलाभिर्दक्षिणाभिः स यष्टा समतोषयत् ॥ १३४ ॥

तदा स्वयमुपागतः किमु शतक्रतुः सादरं
दिदृक्षुरमुमध्वरं जनमितीव विस्मापयन् ।
समेत्य युवकाशिकापुरवरेश्वरः श्रद्धया
समर्प्य विपुलं वसु व्यधित भूषितं तत्सदः ॥ १३५ ॥

सोमेनापहृतानि किं सुतधिया चेतांसि तद्वीक्षिणां
किं वा मोदसुधासमुद्रलहरीमग्नानि निर्यान्ति नो ।
किं सामश्रुतिमूर्च्छितानि यदमी प्राज्ञाः कृतोमेयरूपं
निश्चेष्टा निरगुः समस्तदिवसं नेतः सभायां स्थिताः ॥ १३६ ॥

तदनु कृते सरस्वतीयप्रचारे तृतीयसरस्वयीयग्रहणे च सरस्वती-यशस्समुद्गिरति होतरि माहेन्द्रग्रहणे च नन्दयति महेन्द्रं पृष्ठस्तोत्रेषु प्रगीयमाने चोद्गात्रा परितोषितसकलसभास्तारान्तरे रथन्तरे निगदति निष्केवल्यशस्त्रं होतरि विरचिते माहेन्द्रेण सहातिग्राह्यप्रचारे वामदेव्य-स्तोत्रपूर्वकमुक्थ्यपर्यायेषु प्रशास्त्रोदीरिते शस्त्रे नौधसस्तुतिपूर्वके ब्राह्म-णाच्छंसिना कालेयस्तोत्रपूर्वकमच्छावाकेन समाप्यत माध्यंदिनं सवना-हुत्यन्तशेषकर्मालंकृतं सवनम् ॥

माध्यंदिनं सवनमित्थमसौ समाप्य
सद्यस्तृतीयसवनोत्सुकमानसो ऽभूत् ।
श्रद्धावतां सततवेधविधौ रतानां
किं श्रान्तिराश्रयति चित्तशरीरवाचः ॥ १३० ॥

अथ तृतीयसवनारम्भे ससंरम्भमनुष्ठितेष्वादित्यग्रहग्रहणयागम-हाभिषवेषु गृहीतेषु ग्रहेषु जाते चाशिरावनयने ग्रहावकाशोपस्थानादुत्तरं सदसि गीयमानआर्भवपवमाने ऽङ्गयागसवनीयप्रचारप्रस्थितप्रचारेषु कृतेषु विधीयमाने पिण्डदाने सावित्रग्रहणप्रचारयोरुत्तरं वैश्वदेवग्रहे गृहीते तारमुदीरयति वैश्वदेवशस्त्रं होतरि सघृतसौम्ययागमनुध्याघारितेषु धि-ष्ण्येषु पात्नीवतग्रहणप्रचारयोः परस्तादुद्गात्रा गीयमाने यज्ञायज्ञियाख्ये ऽग्निष्टोमसामनि होतर्यानन्दयत्याग्निमारुतशस्त्रेण विरचितसितोष्णी-षानृत्विजः प्रतिधिष्ण्यं प्रज्वलितानग्नीन् सामाजिकांश्च ध्रुवावनयने कृते चमसप्रचारसमनन्तरमनुष्ठितेष्वनूयाजादिषु हारियोजनग्रहणप्रचारशोभित-मवासासीदग्नपुच्छादिसवनाहुत्यन्तशेषकर्मसमलंकृतं तृतीयसवनम् ॥

तुष्यद्ब्राह्मणकप्रकोक्तविलसत्प्रस्थानयाज्याभृतं
माद्यच्छक्रमुखाखिलादितिसुतस्तोमाज्यशस्त्रावृतम् ।
दीप्यज्ज्वालहुताशभासितदिशं तं पश्यतां मण्डपं
सभ्यानां विधिसंसदीव परमो मोदस्तदानीमभूत् ॥ १३८ ॥

ऐकाग्न्यिकत्वमपि यत्र बभूव होतुः
शस्त्रं तदा निगदतो निशि वैश्वदेवम् ।
तेनास्य चित्रचरितस्य जनातियायि
शीलं बभूव भृशनन्दितविश्वदेवम् ॥ १३९ ॥

आग्निमारुतमथान्तिमशस्त्रं वर्जितस्खलितमेष उदीर्य ।
साधुवादविवशाद्यजमानात् प्राप कण्ठगतमौक्तिकहारम् ॥ १४० ॥

अस्माकमस्त्यग्निरसौ पुरस्तान्मरुत्किमायास्यति वा न वाऽद्य ।
परीक्षितुं किं विति शुक्रवस्त्रैः शिरः प्यधाद्याजकयाज्यवर्गः ॥ १४१ ॥

पश्वङ्गयागरुचिरं कृतसोमयागं
धानाकरम्भसुरसाज्यहविःप्रपूर्णम् ।
जग्मे तृतीयसवनं सुरभूसुराणां
सौहित्यकारि विधिदूषणलेशशून्यम् ॥ १४२ ॥

यो यज्ञान्तरदुर्लभैर्निजगुणैस्त्यागैश्च भक्त्या कृतै-
र्युक्तो दूषणलेशशून्यनिखिलानुष्ठानशस्त्रस्तुतिः ।
प्रायश्चित्तविशोधनाय विदधे तस्मिन् स सुत्वा मखे
प्रायश्चित्तघृताहुतीः प्रमुदितः शेषं च कृत्यं निजम् ॥ १४३ ॥

स पञ्चमदिनेऽखिलं परिसमाप्य चैवं विधिं
विसृज्य सकलर्त्विजो विधिविसृष्टसंख्यान्मुदा ।
कृताखिलविधिक्रमः प्रमुदितैर्बुधैर्वन्दितो
मखाम्बुनिधिपारगः प्रणमति स्म यज्ञेश्वरम् ॥ १४४ ॥

Digitized by Google

अथ चिरातीतेऽपि यागे प्रतिक्षणतत्स्मरणसमुद्भूतप्रभूतरोमाञ्चकञ्चुकितैरासादितामन्दानन्दैरपि कण्टकावृतैरिव निरन्तरनिर्यदघनाम्बुपूरतया संपादयिष्यद्भिरिव चिरपरिश्रान्तस्य तस्य यज्वनो निकटएवावभृथोचितं तोयपूरमध्वरवरावलोकनोत्सुक्यानिर्निमेषेक्षणतया हविःसुहितसोमरसास्वादनजनितमदाक्रान्तनिद्रालुनिर्जरन्यासीकृतामिवास्वप्नतां वहद्भिरवभृथावगाहनोत्कैर्मानसारधनैर्महाजनैः परिवृतो निष्पीडनसंजातम्लानितया स्यन्दितुमक्षममिव नीरसविधदेशप्राप्तयइव स्वयमपि नीरसविधतां दधानमुपवेश्य सम्राडासन्द्यां राजानं गायद्भिः सुस्वरं सामानि सामगैः स्तोष्यद्भिः स्तुवद्भिः स्तुतवद्भिश्च होत्रकैर्विविधयज्ञायुधधरैरध्वर्युपुरोगमैश्च संगृहीतावभृथीयेष्ट्युपकरणैः प्रयताचरणैः परिशुद्धान्तःकरणैः सर्वतो निरुध्यमानगमनमार्गः परिकर्मिभिः सोमपानमत्तप्रसुप्तगीर्वाणगणबोधनायेव तच्चिनीष्वौपवाह्यनिवहाव्हानायेव दिवमाक्रामता भेरीनिस्साणतूर्यप्रमुखवादित्रनिनदेन विदार्यैव रसातलं संपिपादयिषुर्यज्ञशरणधारणवेतनं शेषप्रभृतिभुजङ्गपुङ्गवानां विनिर्गत्य प्रदक्षिणक्रमेण क्रतुस्थानादविरलपौरकरयुगलपतत्पुष्पवृष्टिरचितमृदुलास्तरसंचरणेन तिरोभावयन् भूगमनक्लेशमानुयात्रिकाणामन्तरान्तरा सामगानकृतसमस्तजनसंवननो ध्रियमाणातपत्रतया पवित्रतममात्मानं पादैरस्प्रष्टकामेनेव दिनकरेण परिहृतावकाशो यशोनिशाकरप्रकाशशमिततापातिरेकतया निमित्तमात्रतामातन्वन् हेमन्तस्य रविमन्दीकृतौ प्रतिपदं प्रणमद्भिर्बिभ्रद्भिश्चरणाङ्कितमहीपरागं सानुरागं शिरस्सु भक्तिभरितैः सुचरितैरनुगम्यमानः संप्राप्य त्रिलोकीतीर्थमौलिललामभूतां सकलसुरासुरमुनिनिषेवितसलिलां भगवत्या भागीरथ्या विभूषितां मणिकर्णिकामारभतावभृथीयामिष्टिम् ॥

श्रद्धाऽनुद्धतबुद्धिभिः परिवृतः पौरैर्विशुद्धाशयैः
संरुद्धप्रसरः स यज्ववृषभः संघीभवद्भिश्च तैः ।
इष्टिं शिष्टवरिष्ठदृष्टचरितो हृष्टैः सुरैर्नन्दितां
तस्मिन् तीर्थवरे पुरारिमतनोत्संप्रीणयिष्यंश्चिरम् ॥ १४५ ॥

धृतावतारः किमु कार्त्तिकापतिः किमेष यज्ञेश्वर एव साक्षात् ।
जनैरिति स्वीकृतवितर्कैर्मुहुः प्रहर्षादभिवीक्ष्यमाणः ॥ १४६ ॥

निवारिताशेषनृपालवेषस्तारिं समारुह्य मयूरचिन्हाम् ।
भक्तिप्रकर्षानतकाय ईश्वरीप्रसादनारायणसिंहभूपतिः ॥ १४७ ॥

सिष्णासुरेत्यावभृथे तदानीं प्रणम्य यज्वानममुं सहर्षम् ।
जनान् समेतान् मणिकर्णिकायां श्रद्धाम्बुधौ मज्जयति स्म चित्रम् ॥१४८॥

विहितावभृथेष्टिना ऽमुना नृपपौरौघनिरन्तरे तदा ।
जनिताखिलदोषशोधनं शुचि सस्ने मणिकर्णिकाजले ॥ १४९ ॥

प्रागेवाखिलतीर्थमौलिमणितां प्राप्ता शिवानुग्रहा-
दद्यासौ मणिकर्णिका ऽवभृथजामासाद्य शुद्धिं पराम् ।
दोषान् मानसकायिकोक्तिजनितान्निर्मूलयेत्सत्यमि-
त्यस्मात्सोद्भूतनिश्चयो ऽखिलजनो जज्ञे च शुद्धः क्षणात् ॥ १५० ॥

उद्धृता जलबिन्दवो ऽस्य शिरसा यैः सादरं धारिता-
स्तेभ्यः स्वाधिककालजं शुभफलं दातुं दरिद्रो विधिः ।
किं वा दास्यति यज्वने ऽधिकफलं श्रुत्वेति गीर्या वचो
नूनं मुक्तिमवेत्य सर्वसुलभामीशो ऽपि मूको ऽभवत् ॥ १५१ ॥

अथासौ चिरमवगाह्य सप्रमोदं जान्हवीजलमापाद्य च कृतकृत्यतां कृत्स्नजनस्य तूर्णमुत्तीर्णो ऽहते वाससी परिधाय पुरोधायाध्वर्युमुखाननुगम्यमानः पथ्या प्रतिपदं प्रणमद्भिः संजिघृक्षद्भिश्च चरणोदकं बहुभिरास्तिकजनैः क्रियमाणविलम्बो ऽपि जनयन् शुभाशीर्वादकुशलप्रश्नादिना तेषामुन्मस्तकं प्रमोदमासाद्य यज्ञवाटं प्रविश्य प्राग्वंशं संतर्प्य चोदयनीयायामिष्टौ देवताः परितर्प्य मित्रावरुणावामिक्षया समालभ्य भृशपरिश्रान्तानृत्विजो विधाय पूर्णाहुतिमुदवसानीयेष्टिस्थाने प्रदक्षिणीकृत्य प्रदक्षिणार्चिषो हुतवहानासादितस्वनिकेतन आधाय विधिना ऽग्नीन् हुत्वा च सायं होममभूत्सर्वतः कृतकृत्यः ॥

धन्या सा जननी शचीव जलधेर्यस्या अभूत्प्रागसौ
श्रौतस्मार्तसमस्तदर्शनविदा या वन्दिता चामुना ।
धन्येयं नगरी वसिष्ठमिव यं देधे ऽधुनैषा ऽऽत्मना
धन्याश्चापि वयं यदङ्घ्रियुगले मूर्ध्ना नमामो मुहुः ॥ १५२ ॥

कृत्वा शक्रमुखान् सुरान् स सुहितान् दत्वा ऽतुला दक्षिणा-
श्चक्रे ब्राह्मणतर्पणं चिरतरं नानाविधेनान्धसा ।
यस्मिन् षड्रसशालिभक्तरुचिरापूपादिसंतर्पिता
मन्यन्ते स्म महीसुरा दिविषदः किं चिद्दिविवेशितान् ॥ १५३ ॥

कस्को नाशनि भूसुरो ऽत्र सुहितः को नाप वा दक्षिणाः
का वीथी जनिता सिता न यशसा के श्रोत्रिया नार्चिताः ।
के ऽन्तर्वाणिवराः सभासु महतीं नापुः सपर्यां ततः
को वा विस्मयपूरमग्नहृदयो नास्मिन्मखे ऽजायत ॥ १५४ ॥

इष्टं विधायेत्थमसौ प्रहृष्टः पूर्तैरलंकर्तुममुष्य भूमिम् ।
तूर्णं समाज्ञापयति स्म कारीन् निर्मातुमाराममिहाभिरामम् ॥ १५५ ॥

घनं कदलिकावनं तदनु तत्र जज्ञे ऽचिरात्
प्रफुल्लनवमल्लिकाप्रमुखवृक्षषण्डान्वितम् ।
यदीयसुमपूरितं स्थलमवेत्य नूनं जनाः
पुरा सुरकरोज्झिते सुमगणे न संशेरते ॥ १५६ ॥

अथाशु मल्लीकरवीरबिल्वधात्रीमुखानोकहशोभमानम् ।
स्थलं ससंरम्भविजृम्भमाणारम्भाशतस्तम्भभृतं बभौ तत् ॥ १५७ ॥

संप्राप्तमानन्दवनेक्षणार्थं मन्दादरं नाकगतौ पुनः किम् ।
भूनन्दनं स्थानमिदं यतो ऽत्र संदृश्यते भूसुरवृन्दमेव ॥ १५८ ॥

किं वर्णितं विष्णुपदाभिधानादानन्दनं नन्दनमीक्षणानाम् ।
यत्रास्य विष्णोः पदमेतदाप्य प्रतिष्ठितं वीक्ष्य जहर्ष लोकः ॥ १५६ ॥

ततो दृढं कारयति स्म तत्रोपलैर्विशालैः कृतबन्धमन्धुम् ।
माधुर्यनैर्मल्यतुषारताभिर्यदम्बु गङ्गाम्बुवतिसंदधाति ॥ १६० ॥

अत्रान्तरे हिमगिरेः समुपागतेन
मण्डीपुरेश्वरनिदेशवशंवदेन ।
दूतेन तन्नगरयात्रकृते ऽर्थ्यमानो
यातुं स निश्चितमनाः सुधियां वरिष्ठः ॥ १६१ ॥

गोष्ठीनचालवनपत्तनपार्थिवश्री-
गोविन्दरावनृपसोमपुरोहितेन ।
सप्रश्रयं प्रणमता वदता निजाङ्घ्रि-
पूजोत्सुकं नृपममुं परिचर्यमाणः ॥ १६२ ॥

प्राप्य प्रयागमवगाह्य सिताऽसितान्तः
संतर्प्य देवपितृपूर्वमनेकविप्रान् ।
भूपेन नम्रशिरसा विनतेन तेन
निन्ये निजं गृहमनेकविधोपचारैः ॥ १६३ ॥

भूपो ऽथ तं विदधतं स्वगृहं सुपूतं
शीलेन शीतकरशीतलकोमलेन ।
चक्रे पयोनिधिगभीरमपि क्षणेन
मोदाऽमृतामलचलल्लहरीपरीतम् ॥ १६४ ॥

स्वीकृत्य तस्य स नमस्यगुणः सपर्यां
पर्यायभाषिबुधमण्डलमण्डितायाम् ।

Digitized by Google

भूपस्य संसदि मनांसि नृणां समस्त-
शास्त्राविरोधमुपपाद्य चिरादतार्प्सीत् ॥ १६५ ॥

हुंकारमात्रपरिभूतविवादिवर्गः
संप्रार्थितो नृपवरेण पदानतेन ।
शैवीं विधाय दुरितक्षयदक्षदीक्षां
तस्मै स पार्थिवशिवार्चनमादिदेश ॥ १६६ ॥

मुक्तः कथं चिदमुना विरहासहेन
मण्डीपुरेन्द्रमवलोक्य नितान्तभक्तम् ।
प्रासादनिर्मितिभृशोत्सुकमानसो ऽथ
तूर्णं व्यभूषयदसौ निजयज्ञशालाम् ॥ १६७ ॥

उत्सृज्य तत्रान्धुमशेषभूतनृप्ये स श्रुत्वा सुरसद्म कर्तुम् ।
जातत्वरः प्रेरयति स्म शिल्पपारीणबुद्धीनथ तत्र कारीन् ॥ १६८ ॥

अथ निरूप्य शुभे मुहूर्ते निर्वर्तिते शिलान्यासे स्थूलस्थूलोपलश-कलचक्रवालभिद्यमानरसातलविवरनिःसरत्फणाभृत्फूत्कारमनुकुर्वति पर्व-ताहृतप्रचुरप्रस्तरसमीकरणचटत्कारे विवदमानेषु स्वस्वशिल्पनैपुण्यवर्णन-पुरःसरं विविधवास्तुनिर्माणविषये कारिवरेषु सम्भाव्येव चिरमात्मानं प्रतार्य मलयेन पर्वतवर्ती दिशमाश्रितं भगवन्तं कुम्भसंभवं दिदृक्षुतया पुनः काशि-कां समागतं सहैव धर्मपत्न्या लोपामुद्रया याचकमम् प्रसादयितुमिव संनिदधतं विन्ध्यपर्वतं संशाययत्यतिशयितोदयावराशौ मसृणीकरणगुण-प्रतिबिम्बिता इवोद्यानमध्योद्यत्फलपल्लवतल्लजवेल्लिता वल्लीः समु-त्कीर्णाः प्रकाशयद्भिराकल्पमनल्पां जल्पाकजनजेगीयमानामसमानाममुष्य कीर्तिमम्बरपथातिथीभवन्तीमुत्तम्भयितुमिव धृतविग्रहैः स्तम्भैः शिवप-रिचर्यागतरजताचलविमलाभिन्यक्काविशयसंपादनालंकर्मीणैः कुड्यैश्च स-मलंकृतं विस्तृतवितर्दिकासनाथसर्वतोभागतया ऽभितो मिथःसोपानजन-

वर्ण्यमानरामणीयकं यज्ञमिव विततप्र[1]स्तरवेदिकं प्रतिपन्नक्षोणीपतिस-मागममिव संभ्रम[2]दयोधरावरणं राजभवनमिव विचित्रमत्त[3]वारणं वैशे-षिकनयमिव द्रव्यगुण[4]स्थिरीकरणप्रवीणं वणिगापणमिव धृतपृथु[5]लतुलं सरइव बहुकीला[6]लं क्षतं विशा[7]लमपि चन्द्रशा[8]लाशोभितशिरःप्रदेशं मानोच्च[9]तमपि विमाना[10]धिकश्रीकं टङ्कपरिष्कृ[11]तमपि विट[12]ङ्कशोभाश्रय-माकल्पस्थायिनं दृढं पुरतः सभामण्डपमण्डितमभिनवं निरमीमपत्प्रासा-दम् ॥

मन्ये यत्र सुरापगातटचलद्वीचीभृशान्दोलन-
प्राप्तोत्कर्षतुषारमन्दपवने वासाय बद्धस्पृहः ।
कैलासाचलनित्यवासविरसो मन्दादरो मन्दरे
सान्निध्यं बहुमन्यते स्म सगणः श्रीपर्वतीवल्लभः ॥ १६९

तस्मिन्सुन्दरमन्दिरे दृढतरे संपूर्णकल्याकृतौ
पत्नी तस्य बताष्यदेवनिवहानाह्वातुकामा किमु ।
शेवं प्राप पदं प्रसूय तनयामल्पायुषं हा यतः
श्रेयांसि प्रबलान्तरायसहितान्याप्रागमे शुश्रुम ॥ १७० ॥

पुत्रीकृत्य विधानतो द्विजसुतं पञ्चाब्ददेश्यं मृतां
वेतानाग्निसमस्तपात्रसहितां संस्कृत्य च प्रेयसीम् ।
तादृग्दारवियोगशङ्कुमनिशं चित्ते वहन् दुःसहं
धैर्येणैव यथापुरं कतिपयं कालं बुधोऽयापयत् ॥ १७१ ॥

---

१ दर्भमुष्टिः वेदिश्च पाषाणानां वितर्दिका च । २ संभ्रमदौ त्वराजनको योधानां रावणौ यत्र । सम्यक् भ्रमदयःकीलं धरत्यावरणं यत्र । ३ मदयुक्ता गजा यत्र । विचित्रो मत्तवारणो निर्यूहो यत्र । ४ द्रव्यादिसाधकत्वात् । धनानश्वरतासं-पादकत्वाच्च । ५ स्तम्भाधारप्रस्तरा मानदण्डाश्च । ६ बहुजलं क्षतं कीलैरलंकृतं च । ७ विस्तृतं शालारचितं च । ८ शिरोगृहेण । ९ प्रमाणेन । १० प्रमाण-शोभारचितं व्योमयानापेक्षया रम्यं च । ११ शस्त्रविशेषैर्निर्मितम् । १२ टङ्कजन्य-शोभारचितं कपोतपालिकाभूषितं च ।

Digitized by Google

शमीतरुरिवोद्वहन् हृदयदाहिदुःखानलं
ज्वरेण महता बत प्रतिदिनं प्रशुष्यत्तनुः ।
विचार्य चपलाचलं भवमसौ निसर्गारसं
त्वरामतनुतादराद्धरिहरप्रतिष्ठाविधौ ॥ १०२ ॥

सज्जीकृत्य समस्तवस्तुनिचयं देवप्रतिष्ठोचितं
मूर्तीः श्वेतदृषद्भिरुत्तमतमाः संपाद्य च द्योसदाम् ।
वृत्वा ऽऽचार्यमशेषतद्विधिविदं संभाव्य चर्त्विग्गणं
प्रारब्धुं निदिदेश तीव्ररुजयाक्रान्तो ऽपि वैधं विधिम् ॥ १०३ ॥

नन्दाग्न्यङ्कधरामिताब्दगसिताषाढे दशम्यां विधा-
वास्थाप्यन्त यथाविधानममुना तत्पञ्चसूचीमितम् ।
रुद्रैकादशकं फणीन्द्रशयनः सूर्यो गणेशः शिवा
गङ्गाभैरवतार्क्ष्यमारुतिवृषश्रीदक्षिणामूर्तयः ॥ १०४ ॥

आहूता विबुधास्तदावनिगुरुं नालोक्य संस्थापने
निर्धार्यातिरुजार्दितं तमगमन् यां दुर्दशां दुःखिताः ।
स्मर्तुं वक्तुमिमां विलेखितुमपि स्याम क्षमाः स्यान्न चे-
च्चेतो दूनतमं सगद्गदजडा वाणी तनुः स्तम्भिता ॥ १०५ ॥

श्रद्धोद्रेकमनीदृशे ऽपि समये दृष्ट्वा प्रमोदेन वा
नायातो नियतं रुजार्दित इति प्राप्तेन शोकेन वा ।
निर्यद्बाष्पजलाकुलाक्षियुगलाः सभ्याः शिलानिश्चला
नाविन्दन्त विशेषदर्शनविधौ दार्ढ्यं स्वधैर्या अपि ॥ १०६ ॥

पूर्वेह्न्यधिवासितान्सुरवरान् संस्थाप्य तस्मिन्दिने
संप्राप्तं सहर्त्विजं गुरुवरं संपूज्य धेन्वादिभिः ।

सम्यक् पर्यवसायिताखिलविधिः कृत्यावशेषोऽझितो
ब्रह्मण्येव निवेश्य चित्तमनिशं रागं भवे ऽसौ जहौ ॥ १७७ ॥
श्रोतुं वक्तुमपाटवं यदभवद्द्रष्टुं मनाक्स्पन्दितुं
तच्चित्तभ्रमसंनिपातजमिति भ्राम्यन्ति के चिन्मुधा ।
संध्योपास्तिशिवार्चनश्रुतिशिरःपाठावधानैरयं
संपन्नः प्रणवैकतानहृदसावित्येव मन्यामहे ॥ १७८ ॥
आरोग्यार्थिभिरर्पितं बहु हसन् यद्भेषजं सो ऽपिबत्
संपत्तित्वरितः कृताखिलविधिर्मत्वा जनान् बालिशान् ।
आशिख्वासिषया हृजा घृणित इत्यूचुः सवावेवका
ब्रह्मात्मैक्यविभावनादिति वयं नित्येवका मन्महे ॥ १७९ ॥

इत्थमतिवाह्य स्तोकमनेहसमालोचयन्नेकदिनावशिष्टमुत्तरायणं वसुमतीं विहातुकामो व्यावर्तितनिखिलविषयवासनः प्रणवार्थैकतानमना वितीर्य विप्रनिवहेभ्यो भूरिशो दानानि चिरकालसकलविद्याभारवहनश्रान्तइव बहुमन्यमानो दीर्घनिद्रां त्रयश्चत्वारिंशत्तमे वर्षे यशसेव भूमण्डलममण्डयन्मन्ये च नियतमवापदखण्डब्रह्मरूपताम् ॥

नातथ्यां किमपीह वाचमवदं नावर्णयं बन्दिव-
न्नात्युक्तिं क्व चिदाश्रयं न कविताप्रागल्भ्यमीषद् व्यधाम् ।
नूनं विस्तरभीरुबालसमतीन् दृष्ट्वा जनान् संकुच-
द्वाक्यः किं तु गुणैकदेशकथनेनापावयं स्वं वचः ॥ १८० ॥
श्रीमत्तातनृसिंहशास्त्रिचरणास्वर्वृक्षसंसेविनः
पूज्यश्रीगुरुबालशास्त्रिकरुणापीयूषपूतात्मनः ।
नन्दाग्न्यङ्कमहीमिते विरचिता संवत्सरे वैक्रमे
स्याद् गङ्गाधरशास्त्रिणः कृतिरियं विद्वज्जनानां मुदे ॥ १८१ ॥ इति ॥

इति श्री ६ बालशास्त्रिजीवनवृत्तान्तः ॥

श्रीगुरुभ्यो नमः

—◆—

प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं करोति तन्निरञ्छनम् ॥ १२ ॥

12. Having doubled the measure (i. e. the cord whose length is equal to that of the desired square or oblong) one makes a mark at the fourth part of the increase; this is the so-called nirañchhana-mark.

निरञ्छनस्य पूर्व्वे विनियोग उक्त आकर्षणे न तु स्वरूपं तदिदमुच्यते । इष्टक्षेत्रायामः प्रमाणं तावन्मितां रज्जुमभ्यस्य द्विगुणीकृत्य । अभ्यासो हि द्वैगुण्ये प्रसिद्धः । पूर्व्वो ऽभ्यास इति पाणिन्युक्तेः । तत्राभ्यस्तरज्जोः संख्यासमासभङ्गादेर्दीयसि चतुर्थे ऽंशे निरञ्छनचिह्नं करोति । यथा निरञ्छनाद् दण्डरज्ज्वाभ्यासरज्जावेकीकृतान्मानमेकतस्त्रयोंऽशाः अपरतश्च पञ्चांशा भवेयुः । न त्वभ्यासरज्ज्वन्तादेर्दीयसि तुर्ये ऽंशे निरञ्छनोपदेशः । निरञ्छनमित्याकर्षस्य संज्ञा व्यवहारार्था । अन्वर्था च सा, निरञ्छनमाकृष्यते ऽनेनेति ।

अक्ष्णाया तिर्यङ्मानीशेषः ॥ १३ ॥

13. The diagonal cord is the remainder of the transverse cord. (After the cord has been stretched towards one side by means of the nirañchhana it divides itself into two parts, forming the shorter side and the hypotenuse of a rectangular triangle).

पार्श्वद्वयवती साभ्यासरज्जुरष्टभागा तस्यां निरञ्छनपर्यन्तं त्रयो भागास्तिर्यङ्मानी । तया हि तिर्यक् प्रमाणं मीयते श्रोण्यंसपरिच्छेदाय । तच्छेषस्तु पञ्चभागा रज्जुरक्ष्णाया भवति कर्णरूपेण स्थिता भवति । पार्श्वमानी त्वत्र पूर्व्वापरशङ्क्वन्तरमेव चतुर्भागात्मकम् । एवं त्र्यश्रिक्षेत्रमेतत्तिर्यङ्मानीपार्श्वमान्यक्ष्णयाभिरुक्तम् । तत्रायं नियमः । यत्र तिर्यङ्मानी त्रयो भागाः । पार्श्वमानी च चत्वारस्तत्राक्ष्णया पञ्चैव भागाः । यतस्तिर्यङ्मानीवर्गपार्श्वमानीवर्गैक्यमूलमेवाक्ष्णयामानम् । तत्र तिर्यङ्मान्यास्त्रिरूपाया वर्गो नव पार्श्वमान्याश्चतूरूपाया वर्गः षोडश तदैक्यं पञ्चविंशतिस्तन्मूलं पञ्चेति । त्रिचतुष्पञ्चांशरूपाभिस्तिर्यङ्मानीपार्श्वमान्यक्ष्णयाभिस्त्र्यश्रिक्षेत्रं सर्व्वत्र बोद्धव्यम् । तिर्यङ्मान्यक्ष्णयाभ्यां रज्जुप्रसारणमिति पार्श्वमानी द्विगुणैव रज्जुः स्यात् । अथ वा अत्रेयं शङ्का । आयाममुक्तविस्तारार्द्धमितयैव रज्ज्वा षड्भागरूपया क्षेत्रं परिच्छिद्येत किमधिकभागद्वयव-

र्धेन । तत्रोत्तरम् । शेषभागद्वयं यदधिकं रज्जोरायामतो विस्तारार्द्धाच्च तदर्द्धार्द्धभागेनैकैकमंशमक्ष्णयायां तिर्यङ्मान्यां च योज्य क्षेत्रं परिच्छेत्तुमलं नान्यथा । तेनांशत्रयं तिर्यङ्मान्यंशपञ्चकञ्चाक्ष्णया भवतीति व्याख्यान्तरम् । अथ वा त्र्यश्रिक्षेत्रप्रदर्शनमेवैतत् । निरञ्छनादुपरि पञ्चभागात्मिका रज्जुरक्ष्णया । निरञ्छनादधश्च त्र्यंशात्मिका रज्जुस्तिर्यङ्मानी रज्जुप्रसारणहीनस्य क्षेत्रायामस्य पार्श्वमानीरूपस्य शेषव्यपदेशः स चेत्येव त्र्यश्रिक्षेत्रं ज्ञेयमितिप्रदर्शनमन्यत्रापि दैर्घ्यङ्मानक्षेत्रग्रहणाय ।

प्रमाणार्द्धं वाभ्यस्याभ्यासषष्ठे लक्षणं करोति
तन्निरञ्छनम् ॥ १४ ॥

14. Or else one adds half the measure and makes a mark at the sixth part of the increase; this is the nirañchhana.

दीर्घचतुरस्रे महावेदिशालासदआदौ प्रकारान्तरमेतत् । प्रमाणमायाममानम् । षट्त्रिंशत्प्रक्रमा महावेद्याम् । विंशत्यरत्नयः शालायाम् । अष्टादश सदसि । तदर्द्धं क्रमश अष्टादश प्रक्रमा दशारत्नयश्च नवारत्नयश्चाभ्यस्यन्ते वर्द्धन्ते तत्र संख्यासमासभङ्गादुपर्यभ्यस्तरज्जौ षोढा विभक्तायां संख्यासमासभङ्गसचिह्निते षष्ठेऽंशे लक्षणं करोति । तन्निरञ्छनम् । तन्महावेद्यामूनचत्वारिंशदंशेषु भवति । शेषे पञ्चदशांशाः । निरञ्छनं च श्रोणिमानञ्चैकमेव । त्रिंशत्प्रक्रमश्रोणिपक्षे चैतत् । न त्रयस्त्रिंशत्प्रक्रमश्रोणिपक्षे । अंसचिह्नं तु तदुपरि त्रिषु प्रक्रमेषु द्वादशशेषणात् । अत्र हि तिर्यङ्मानी भागत्रयं त्रयमेकभागीकृत्य पञ्चभागरूपा तद्वर्गः पञ्चविंशतिः पार्श्वमानी च तथैव द्वादशभागात्मिका तद्वर्गः सचतुश्चत्वारिंशच्छतं तदैक्यमेकोनसप्तत्यधिकशतं तन्मूलं त्रयोदश भागास्त्रित्रिभागात्मकैकभागरूपाः । अक्ष्णयैकोनचत्वारिंशद्भागाः । तिर्यङ्मान्यक्ष्णयायोगे सार्द्धायामरूपा रज्जुरिति ज्ञेयम् । शालायाञ्च त्रिंशदरत्नी रज्जुः । अभ्यासस्य दशारत्निरूपस्य षष्ठेऽंशे सषोडशाङ्गुलारत्निमिते निरञ्छनम् । तत्राष्टावरत्नयोऽष्टौ चाङ्गुलानि तिर्यङ्मानी चत्वारिंशच्चत्वारिंशदङ्गुलात्मकपञ्चभागा । एकविंशत्यरत्नयः षोडश चाङ्गुलानि अक्ष्णया चत्वारिंशच्चत्वारिंशदङ्गुलात्मकत्रयोदशभागा । विंशत्यरत्नयस्तु पार्श्वमानी तावत्प्रमाणद्वादशभागा । अत्र श्रोण्यंसचिह्नं निरञ्छनोपरि त्रीनरत्नीनष्टौ चाङ्गुलानि हित्वा पञ्चारत्नीरुत्कर्षयित्वा कार्यम् । सदसि च सप्तविंशत्यरत्नी रज्जुः ।

अभ्यासो नवारत्नयः । तस्य षष्ठे सार्द्धारत्नौ निरञ्छनम् । सार्द्धसप्तारत्नी तिर्यङ्मानी शेषगुणेन । निरञ्छनोपरि च त्र्यरत्निषु श्रोण्यंसचिह्नं सार्द्धचतुररत्निशेषगुणेन । सार्द्धानविंशत्यरत्निरत्नगुणया । अत्र सार्द्धारत्निमितैकैकभागेन द्वादश भागाः पार्श्वमानी त्रयोदशात्नगुणया पञ्च तिर्यङ्मानी द्रष्टव्या । एवमन्येष्वपि दीर्घचतुरस्रेषु आयामार्द्धमायामार्द्धषष्ठांशोनं ततो ऽधिकोनं वा येषु विस्तारार्द्धं तेष्वेव दीर्घचतुरस्रेष्वेषा विधा नान्येषु ।

अक्ष्णया तिर्यङ्मानीशेषः ॥ १५ ॥

15. The diagonal cord is the remainder of the transverse cord (see S. 13).

व्याख्यात्रयेणाप्युक्तार्थमेतत्सूत्रम् । अत्र त्रयस्त्रिंशत्प्रतीचीपक्षे ऽपि रज्ज्वन्तरं वार्त्तिके तूक्तं यथा ।

दैर्घ्यद्विघ्ना रज्जुरूना दैर्घ्यत्र्यंशेन कर्षणम् ।
तस्यां दैर्घ्यार्द्धं स्वतिथ्यंशाढ्ये कोणस्ततेद्धले ॥
आयामार्द्धं स्वतिथ्यंशाढ्यमतो वानितं भवेत् ।
विस्तारार्द्धं चतुःस्रक्तौ यत्र तत्साधयेदियम् ॥

महावेद्यां दैर्घ्याद् द्विगुणा द्वासप्ततिप्रक्रमा दैर्घ्यत्र्यंशोना षष्टिप्रक्रमा रज्जुः । तस्यां दैर्घ्यार्द्धं स्वपञ्चदशांशाढ्ये एकोनविंशतिप्रक्रमेषु प्रक्रमपञ्चमांशयुक्तेषु कर्षचिन्हं कार्यम् । द्विघ्नविस्तारार्द्धेषु पञ्चदशप्रक्रमेषु सार्द्धषोडशसु वा कोणस्य श्रोणिश्चिह्नं द्वादशसु त्वंसचिह्नम् । समचतुरस्रमनया साध्यते ।

प्रमाणार्द्धे समचतुरस्रस्य शङ्कुः ॥ १६ ॥

16. For (fixing the corners of) a square the pole has to be fixed at half the measure.

यस्यायामविस्तारौ तुल्यौ तत्समचतुरस्रम् । तस्य प्रमाणस्यायामस्यार्द्धं श्रोण्यंसपरिच्छेदकः शङ्कुः । सोऽभ्यासरज्जौ ज्ञेयः । निरञ्छनं त्वभ्यासचतुर्थउक्तमेव । यदुक्तम् ।

यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत् ।
आगमार्द्धं तु शङ्कुः स्यादन्तरार्द्धं निरञ्छनम् ॥

आगमो ऽऽभ्यासभागः । आगमार्द्धं शङ्कुः श्रोण्यंसार्थः । अन्तरार्द्धं संख्यासमासभङ्ग्यागमार्द्धचिह्नयोरन्तराले निरञ्छनचिह्नम् ।

शास्त्रवदर्द्धे दीर्घचतुरस्रस्य ॥ १७ ॥

17. For oblongs (the pole has to be fixed) at half the (measure) prescribed by the holy text.

दीर्घचतुरस्रक्षेत्रस्य तिर्यङ्मानचिह्नं रज्जुपाशाच्छास्त्रवतः शास्त्रोक्तविस्तारस्यार्द्धं भवति । यथा महावेद्यां त्रिंशत्प्रक्रमश्रोणिपक्षे पञ्चदशसु । चतुस्त्रिंशत्पक्षे सार्द्धषोडशसु प्रक्रमेषु तु विशेष उक्तः ।

आधाने पदिकं कुर्यात्सोमे तु द्विपदो भवेत् ।
अग्नौ च त्रिपदं कुर्यात्प्रक्रमं याज्ञिको बुध इति ॥

आहुश्च ।

पञ्चदशमेकविंशं त्रिकमपरञ्च परतस्त्रिकञ्चापि ।
द्वादशसु पाश उत्तम इति सोमे रज्जुमानमिति ॥

पञ्चदशसु श्रोणिनिरञ्छनार्थं चिह्नम् । ततश्चिह्नादेकविंशतिप्रक्रमेष्वायाममानार्थं संख्यासमासभङ्गचिह्नम् । ततस्त्रिप्रक्रमेषु निरञ्छनचिह्नम् । ततोऽपि त्रिष्वंसमानार्थं चिह्नम् । चतुर्विंशतिप्रक्रमा हि प्राची । ततो द्वादशसु पाश एवेति चतुष्पञ्चाशत्प्रक्रमा रज्जुः प्रमाणार्द्धं वाभ्यस्येति कथिता । तथा सदसि नव तिर्यगिति शास्त्रोक्तविस्तारार्द्धं सार्द्धचतुररत्निषु श्रोण्यंसचिह्नम् । प्रकारान्तरेणापि । अष्टादशारत्नयो दैर्घ्यमिति पक्षमाश्रित्योक्तम् ।

नवके लक्षणं कुर्याच्छ्रोणिं कुर्यात्त्रिषु त्रिषु ।
उत्तमो नवकः पाशः सदसो मानमुच्यत इति ॥

प्रथमं नवारत्निषु चिह्नं श्रोणिमानार्थम् । ततस्त्र्यरत्निषु श्रोणिभागे निरञ्छनार्थम् । पुनस्ततस्त्र्यरत्निष्वंसनिरञ्छनार्थम् । ततोऽपि त्र्यरत्निष्वंसार्थम् । ततो नवसु पाश एव । अत्र पश्चिमप्रागन्तयोः शङ्कू निहत्य पाशविमोकः । श्रोण्यर्थञ्च न रज्ज्वभ्यासः । तदर्थं पृथङ् निरञ्छनोक्तेः । आयामस्तूदङ्केव । अत्र त्र्यरत्निरेकैको भागः । तत्र त्रिभागा पार्श्वमानी चतुर्भागा तिर्यङ्मानी पञ्चभागाक्ष्णया । तिर्यङ्मान्यक्ष्णयैक्यं रज्जुः निरूढपशुवेद्याञ्च चतुररत्निश्रोणित्र्यरत्न्यंसषडरत्निप्राचीरूपरथपक्षे प्रोक्तम् ।

नवारत्निमिता रज्जुर्लक्षिता षट्स्वतः परैः ।
अर्द्धेऽर्द्धे त्रिषु पाशः स्यात्पशुवेदिप्रसाधनीति ॥

नवारत्निमितेति प्रमाणार्द्धं वाभ्यस्येति । एतस्यैवायं प्रपञ्चः सूचितः । षडरत्निषु लक्षणमायामपरिच्छित्त्यै संख्यासमासभङ्गरूपम् । ततोऽर्द्धारत्नौ निरञ्छनचिह्नम् । ततोऽप्यर्द्धारत्नौ श्रोणिचिह्नम् । ततोऽप्यर्द्धा-

रत्नावंसचिह्नम् । त्रिषु स्थानेष्वर्द्धेऽर्द्धे लक्षणमित्यन्वयः । तत्रावृत्तिन्यायेन तु त्रिष्वित्यस्य पुनः संयोजनं त्रिषु पाशः स्यात्ततस्त्रिष्वर्द्धेषु पाशः स्यादित्यर्थः । अत्रांसार्थं रज्जुव्यत्यासो निरञ्छनैक्याद्बोध्यः । के चिच्चिह्नपशो पौर्णमासिकीमेव वेदिमूचुः । वेदिं करोतीति कर्क्षेण सूत्रं विभज्य व्याख्यातत्वाद्वरुणप्रघासवत्स्फ्याद्याग्निनिधानादिति पृथग्योगकरणात् । तच्च । स्फ्याद्याग्निनिधानान्ताः पदार्थाः सोत्तरवेदिके वरुणप्रघासएवोक्तास्ते वरुणप्रघासवदित्यतिदेशं विनापि लभ्येरंस्ततो वरुणप्रघासवदित्यधिकं सूत्रे तत् ज्ञापयति स्फ्याद्यादौ यन्मानं तदपि वरुणप्रघासवद्भवतीत्यपरः प्रपञ्चो वार्त्तिके दर्शितः । पौर्णमासिकी वेदिश्च व्याममात्रीं पश्चात्त्र्यरत्निप्राचीमिति पक्षमाश्रित्योक्ता ।

षड्भरत्निर्द्विपाशा च मध्ये पञ्चसु लक्षिता ।
द्विहस्ते ऽङ्गुलषट्के च त्रिष्वष्टादशकेषु च ॥
सार्द्धहस्ते च पाशः स्याद्वेदिः स्यात्पौर्णमासिकीति ।

षड्भरत्निरिति प्रमाणमभ्यस्येत्यादेः सूत्रस्यायं प्रपञ्च इत्युक्तम् । पाशद्वयं रज्ज्वन्तयोः पाशौ करोतीति सूत्रस्मारणमेतत् । पञ्चस्विति प्रदेशेषु तामेवाह द्विहस्तइत्यादि । द्विहस्ते लक्षणं श्रोण्यर्थम् । ततो ऽङ्गुलषट्के श्रोणिनिरञ्छनार्थम् । ततो ऽष्टादशाङ्गुलेषु तु आयामार्थम् । तत्संख्यासमासभङ्गलक्षणम् । ततो ऽप्यष्टादशाङ्गुलेष्वंसनिरञ्छनार्थं ततो ऽप्यष्टादशाङ्गुलेष्वंसचिह्नार्थम् । ततः सार्द्धहस्ते पाशः । त्रिषु स्थानेष्वष्टादशाङ्गुलेष्वित्यर्थः । अत्रांसार्थं न रज्जुव्यत्यासो निरञ्छनभेदात् । अरत्निहस्तयोरत्र शास्त्रे एकविधत्वमत एव द्विहस्त इत्युक्तम् । पञ्चारत्निर्दशवितस्तिर्विंशतिशताङ्गुलः पुरुष इति पारिभाषिकाङ्गुलवितस्त्यरत्निग्रहणस्य वक्ष्यमाणत्वात् । व्यामश्च षण्णवत्यङ्गुलश्चतुररत्निरेवेति । व्याममात्रीमिति सूत्रेण द्विहस्तइत्येतस्यैकवाक्यता । यदुक्तम् ।

तन्तुःपुष्करनालस्य षड्गुणः परिवेष्टितः ।
वत्सतर्यास्त्रिहायण्या बालेन सदृशो भवेत् ॥
त्र्यस्त्रिहायणीबालाः सर्षपार्द्धं विधीयते ।
द्विगुणं सर्षपं विद्याद्यवः पञ्च तु सर्षपाः ॥
अङ्गुलस्य प्रमाणं तु षड्यवाः पार्श्वसम्मिताः ।
चतुर्व्विंशाङ्गुलो ऽरत्निर्वितस्तिर्द्वादशाङ्गुला ॥

Digitized by Google

व्यामस्य च प्रमाणं तु चतुर्न्यूनं शताङ्गुलम् ।
पुरुषस्य प्रमाणं तु विंशतिस्तु शताधिकेति ॥

यजमानेनोर्ध्वबाहुप्रपदोत्थितेन समस्थितेन वेति पुरुषमानं सूत्रितम् । तस्य पञ्चमों ऽशो ऽरत्निः चतुररत्निर्व्यामः अरत्निचतुर्विंशो भागोऽङ्गुलम् । अरत्न्यर्द्धं वितस्तिः अङ्गुलस्य षष्ठो ऽशो यवोदरविस्तारः । यवोदरविस्तारस्य पञ्चमों ऽशः सर्षपः । तस्यार्द्धं सर्षपार्द्धं सर्षपार्द्धस्य तृतीयों ऽशस्त्रिहायणीबालः त्रिहायणीबालस्य षष्ठो ऽशः पुष्करतन्तुरिति व्यवहर्त्तव्य इति संक्षिप्तो ऽर्थः । न तु पुष्करनालतन्तुमारभ्य परिच्छिद्यमेवेदं प्रमाणमुपदिश्यते । तथा सति हि यजमानेनोर्ध्वबाहुप्रपदोत्थितेनेति सूत्रे यजमानग्रहणमनर्थकं स्यात् । दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु यजमानं प्रतीयादिति परिभाषायाश्च प्रमाणग्रहणमकर्त्तव्यं स्यात् । सर्व्वयजमानानामङ्गुलादिप्रमाणानां नियतत्वेनैकविधत्वात् । अतो यथोक्तैव व्याख्या । एवं वेदिकरणे माहात्म्यमन्यथा करणे साहसोक्तिद्वारा प्रत्यवायश्चोक्तः ।

अनेन विधिना यस्तु वेदिं करोति मानवः ।
यजमानं तथात्मानमुभौ तारयते ध्रुवम् ॥
अज्ञात्वा शुल्बसद्भावं यज्ञे सौत्रामणीसुते ।
वेदिं ये कर्त्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैरिति ॥
प्रमाणञ्च प्रमेयं च यच्चान्यद्वस्तुसंज्ञितम् ।
सर्व्वं तच्छास्त्रतो ज्ञात्वा यज्ञे सिद्ध्यन्ति याज्ञिकाः ॥
यथा न क्षीयते मानं यथा न च विवर्द्धते ।
यथा च रमते दृष्टिस्तथा योगं समाचरेदिति ॥

अत्रायं प्रोक्तरज्जुद्वयसंक्षेपसंग्रहः ।
द्विगुणा त्रिषु दोःकर्णौ सार्द्धेषु त्रिषु दोःश्रुतिः ॥
श्रोण्यंसांकौ तयोरज्ज्वोर्द्वौ णिष्ठ शास्त्रेरिताद्धृतः ।

अस्यार्थः । आयामद्विगुणा सार्द्धायाममाना च क्षेत्रमानाय द्विधा रज्जरुक्ता । तत्र या द्विगुणा साष्टभागा कार्या । तत्र त्रिभागो भुजः पञ्चभागः कर्णः । सार्द्धा त्वष्टादशभागा कार्या । तत्र पञ्चभागो भुजस्त्रयोदशभागश्च कर्णः । उभयोर्भुजभागमध्ये शास्त्रोक्तमानार्द्धमानेन श्रोण्यंसचिन्हं कार्यं यथासंभवं भुजकर्णान्तरे निरञ्छनाङ्कः ।

शकटमुखस्य चैवम् ॥ १८ ॥

Digitized by Google

18. The same has to be done with regard to the areas shaped like the fore-part of a cart (the praüga).

प्रउगाकृतिचयनादौ शकटमुखाकृति क्षेत्रम् । तत्रापि शास्त्र-वदर्द्धे श्रोणिशङ्कुत्रयः ॥

एतेन प्राग्वंश्यवेदिमानानि व्याख्यातानि ॥ १९ ॥

19. Thereby the (measurements of the) prágvamśa and the vedis are explained.

समचतुरस्रदीर्घचतुरस्ररज्जुकथनेन प्राग्वंशस्य हविर्द्धानपत्नीशाला-दर्वेर्देश्चैष्टिकवारुणप्रघासिकपाशुकसौमिक्यादेर्मानान्युक्तानि बोद्धव्यानि । दर्शितानि च तानि लेशतः शास्त्रवदर्द्धइति सूत्रव्याख्यायाम् । वेदीनां बहुत्वान्मानानीति बहुवचनम् । मध्यसंगृहीतामिति दृष्टिवेद्यामुक्तम् । तत्र मध्यसङ्ग्रहे परिशिष्टम् ।

आनीय रज्जुपूर्व्वार्द्धात्पश्चार्द्धे यावदेव तु ।
द्विगुणीकृत्य तां रज्जुं तत्र शङ्कू निखानयेत् ॥
वेदिश्रोण्यंसयोर्मध्ये तया रज्ज्वाष्टभागया ।
वा पृथुत्वतुरीयेण मद्धेनालिख्य सङ्ग्रहो इति ॥

अत्रास्यार्थः । वेदेः प्राक्तिर्यङ्मानार्द्धे यः प्राच्यन्तशङ्कुस्तस्मादंस-शङ्कुमेकं तद्भागगतं श्रोणिशङ्कुञ्चैकं वेष्टयन् रज्जुं पश्चात्तिर्यङ्मानार्द्ध-गतशङ्कुं यावदानयेत् । तस्या रज्जोर्मानं प्रोक्तरूपवेदिपक्षे सप्तपञ्चा-शदधिकशताङ्गुलप्रमितं भवति । ततस्तां रज्जुं द्विगुणीकृतां पूर्व्वार्द्धश-ङ्कुतो ऽंसशङ्कुं वेष्टयंस्तथैव निदध्यात् । तदन्तश्चांसचिन्हादधः सार्द्धद्वाचत्वारिंशदङ्गुलान्ते श्रोणिचिह्नोपरि तु सार्द्धत्रिंशदङ्गुलान्ते पत-ति । तत्र शङ्कुरेवमुत्तरतः । तस्या एव सप्तपञ्चाशदधिकशताङ्गुल-मितायाः अष्टमों ऽशः सार्द्धैकोनविंशतिरङ्गुलानि किं चिदधिकानि तावता व्यासार्द्धेन तस्माच्छङ्कुद्वयाद्व अभ्यन्तरीणे वृत्तार्द्धे लेख्ये । वेदिमध्यस्य संग्रहं संक्षेपणं कुर्यात् । वाशब्दः पक्षान्तरे । अथ वा तयोः पार्श्वद्वयनि-खातशङ्क्वोरन्तरस्य पृथुत्वं षड्भागोनषडशीत्यङ्गुलसंमितं भवति । तस्य तुरीयों ऽशः सार्द्धैकविंशत्यङ्गुलानि किं चिदूनानि । तावता व्यासार्द्धेन वा पूर्ववत्संग्रहवृत्तार्द्धे उभयतो लेख्ये । वेद्यन्तरेषु तु न मध्यसङ्ग्रहः प्रमाणान्तरोपदेशेन प्राकृतप्रमाणबाधात् ।

शालामानं च ॥ २० ॥

20. And the measure of the Śálá.

एतेनैव व्याख्यातमिति पूर्वेणान्वयः । दीर्घचतुरस्रविधिना शाला कार्या । शालास्वरूपं परिशिष्टे पठ्यते ।

विंशत्या तु करैः शाला दशायामेन विस्तृता ।

त्रिमितं चतुरस्रं स्याद्दशारत्निप्रमाणतः ॥

इति विंशतिहस्तायता दशहस्तविस्तृता शाला दशहस्तसमचतुरस्रं त्रिमितमित्यर्थः । तत्र शाला सूत्रेषूदग्वंशोपदिष्टा । सैव सिद्धवत्सोमे प्राग्वंशत्वेनोपदिष्टा । इह तु यत्र शालायामेव सूत्रकृदुपदिष्टवान् । पूर्वसूत्रादस्य पृथक्करणे प्रयोजनमग्रिमसूत्रविशेषोक्तिः ।

तत्रोदीची प्राचीवत् ॥ २१ ॥

21. There the north line takes the place of the east line,

तत्र शालायां प्राच्यन्तयोः शङ्कू निहन्तीत्यादि यत्कार्यमुक्तं तदुदीच्यां कर्त्तव्यम् । उदगायामत्वाच्छालाया उदयज्जुन्यासः कार्य इति भावः ।

सदसश्चैवम् ॥ २२ ॥

22. And likewise that of the Sadas.

शालामानवत्सदसो ऽपि मानं दीर्घचतुरस्रविधिना कार्यम् । सदसो ऽपि हि दीर्घचतुरस्रं तत्रोदीची प्राचीवदित्येतदत्रापि संबध्यते ।

अपरिमितं प्रमाणाद्भूयः ॥ २३ ॥

23. The word indefinite (wherever it is used with regard to measurements) means that the measure is to exceed the stated (definite) measure.

यत्र यत्र सूत्रकृता ऽपरिमितशब्दः प्रयुक्तः, यथा वरुणप्रघासेष्वामपरिमिता वेति, यथा च दीक्षासु द्वादश दीक्षा अपरिमिता वेति, तत्र तत्रोक्तप्रमाणादधिकप्रमाणं ग्राह्यम् । बहुत्वे हि रूढो ऽपरिमितशब्दो बहुत्वं चापेक्षिकम् । अत उक्तप्रमाणापेक्षयैव बहुत्वं ग्राह्यं सान्निध्यात् । यत्त्विष्टिवेद्यामुक्तं अपरिमितां वेति, तत्र नोक्तादधिकमानता, किं तु मानाभावः । नात्र मात्रास्तीति श्रुतेः । यच्च चयने अपरिमितेष्टक इत्युक्तम् । तत्रापि नवैमे सर्वाणि रूपाण्युपधत्तानिवै वरे च यथनवाभ्यापयपेत्यनभ्यापनमव्यापनं श्रूयते । तेन सोऽप्यपरिमितशब्दो मानाभावार्थः । एतद्द्वयव्यतिरेकेण शास्त्रे ऽन्यो ऽपरिमितशब्द उक्तमानाधिकार्थः ।

प्रमाणे शास्त्रं प्रमाणं निह्रासविवृद्ध्याः ॥ २४ ॥

24. The precept contained in the holy text is the (only) rule for the measure of decrease and increase.

ह्रासस्य वृद्धेश्चोपदेशे तयोः प्रमाणे परिच्छेदे शास्त्रमेव प्रमाणं नान्यत् । यथा सौत्रामणीवेदेः सौमिकीतो ह्रासः प्रक्रमतृतीयेन मानं कृत्वैव । यथा चाष्टविधादिचयनेषु पुरुषमात्राभ्युच्चयेनैव वृद्धिः । यथा वाऽरत्निभिरेव यूपोच्छ्रायः ।

योगश्च ॥ २५ ॥

25. And (in addition) reasoning.

ह्रासवृद्ध्योर्योगो युक्तिश्च सति शास्त्रे प्रमाणं यथा चात्वालोत्करावन्तरेण संचर इति चात्वालसहपाठादुत्करोऽपि वेद्यन्तएव संभाव्यते । तत्राष्टप्रक्रमाग्न्याधानेषु यथा वेद्यन्तउत्करः एतेदेवं गार्हपत्याहवनीययोरन्तरं षड्ढा सप्तधेत्यादि रज्जुमानं वक्ष्यमाणं कर्तव्यम् ।

इतरस्य वितृतीये दक्षिणत इत्येतद्वक्ष्यामः ॥ २६ ॥

26. We will now explain the Sútra "itarasya, etc."

यत्कात्यायनेन दक्षिणाग्निं प्रकृत्य सूत्रितमितरस्य वितृतीये दक्षिणत इति तद्विविच्य वक्ष्याम इत्यर्थः ।

गार्हपत्याहवनीययोरन्तरं षड्ढा सप्तधा वागन्तुसमं त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणायम्य तस्मिन्नग्निः ॥ २७ ॥

27. Having divided the distance between the gárhapatya and the áhavaníya into either six or seven parts together with an added part (increase each of the six or seven parts by its own sixth or seventh part) and having divided (the whole length) into three parts, one stretches (a cord of the given length whose ends are attached to the two poles fixed in the centres of the two fire places) seizing it by a mark at its western third (the one nearest the gárhapatya) towards the south; on the spot (reached by the mark) the southern agni is to be placed.

गार्हपत्याहवनीयाग्निस्थानयोर्मध्ययोरन्तरालमितां रज्जुं षड्विभागां सप्तविभागां वा कृत्वा पक्षद्वयेऽप्येकैकं भागमपरषष्ठांशमितं सप्तमांशमितं वा वर्धयित्वा तां सवर्धितभागां रज्जुं त्रेधा विभज्य रज्जुप्रान्तपाशौ गार्हपत्याहवनीयस्थानशङ्क्वोः प्रक्षिप्य गार्हपत्यस्थानासन्नतृतीयभागकृतचिन्हेन दक्षिणत आकृष्याकृष्टचिह्नस्पृष्टभूभागे दक्षिणाग्निस्थानमध्यं बोध्यम् ॥ अत्राप्यन्तरालरज्जोः षड्ढाविभागपक्षे तावताधिकस्य वर्धने पुनस्तावत्यारज्जोस्त्रेधा विभज्य पश्चिमत्र्यंशे दक्षिणत आकृष्टे गार्हपत्यदक्षिणाग्न्य-

न्तरालरज्जुरक्षणया भवति ॥ तत्र तिर्यङ्मानीपार्श्वमान्यो तुल्ये भवत एव इत्ययं पक्षो मुख्यः ॥ अपि वान्तरं त्रिभागोनयेति सूत्रेणापि ह्याचार्यः समतिर्यङ्मानीपार्श्वमानीपक्षमेव विशदीकृत्य वक्ष्यति । ततः सप्तधाविभागपक्षो ऽल्पान्तरत्वेन तिर्यङ्मानीपार्श्वमानीव्यतिरेके दोषाभावं मन्यमानेनोपन्यस्तः॥एवं चेतरस्य वितृतीये दक्षिणत इति कल्पसूत्रेण सममप्यविरोधः।

विपर्यस्योत्तरत उत्करः ॥ २८ ॥

28. Having exchanged (the end of the cord) one fixes the (place of the) utkara (by stretching the cord) towards the north.

विपर्यासः पाशयोः ॥ उत्तरतश्चाकर्षः ॥ तेन गार्हपत्याहवनीययोरन्तरालमितां रज्जुं षड्धा सप्तधा वा कृत्वा तावन्तमपरं भागं संबध्य त्रिधा विभज्य पूर्ववितृतीयलक्षणेनोदगायम्य तस्मिन्कर्षस्पृष्टभूभाग उत्करः ॥ अत्र च चात्वालोत्करावन्तरेण संचर इति वेद्यन्तलग्नचात्वालसहपाठादग्रेणोत्करं तच्चात्वालं परिलिखेदिति श्रुतेः पूर्वेणोत्करसंचरं परिहाप्येति सूत्राच्चोत्करो ऽपि वेद्यन्तलग्न एवेष्यते । ततश्च षड्धा सप्तधेत्युपप्रदर्शनमात्रे यथोत्तरतो वेद्यन्तलग्न एव उत्करः संभाव्यते तथा कार्यं तेनाष्टासु विक्रमेष्वादधीतैकादशसु द्वादशसु मत्या वेति मत्यादिपक्षाधाने कदा चिद्वेदेः पश्चिमतो दूरे ऽप्युत्करापत्तेः । तच्चानिष्टम् । अग्नीदुत्तरत उत्करं करोतीति सूत्रेण वेद्युत्तरत एवोत्करस्योक्तत्वात् । तस्माद्वेदिलग्न एवोत्तरतः स कार्यः । उत्करश्च तीक्ष्णाग्रं कूटम् । पुञ्जराशिः उत्करः कूटमस्त्रियामिती कोशकृद्वचनात् । के चिदुत्कीर्यते एतस्माद्वेतस्मिन्वोत्कीर्यत इत्युत्करं गर्तं व्याख्यन् । ते रूढेर्योगाद्बलीयस्त्वं न जानन्तीत्युपेक्ष्याः । अत एव च उत्करे वाजिनमासादयतीत्यधिकरणस्य पूर्वपक्षे मीमांसायां तीक्ष्णाग्रे कूटउत्करे कथं वाजिनासादनं स्यादित्याशङ्कितम् । किं च वेदिं परिसमुह्य वितृतीये ऽग्नीदुत्तरत उत्करं करोतीत्युत्करोत्पत्तिर्वेदिपरिसमूहनैस्तृणादिभिरेवोक्तेति कूटतैव संभाव्यते न गर्तता ॥ अभिन्यासश्च गर्ते न संभवति वेद्यन्त उत्कर इति वेदिवितृतीयएवोत्तरपूर्वान्ते तूत्कर इति युक्तमुत्पश्यामो वितृतीये ऽग्नीदुत्तरत उत्करं करोतीति सूत्रम् ।

अपि वान्तरं त्रिभागोनया रज्ज्वा पूर्वार्धे समचतुरस्रं कृत्वा श्रोण्यामग्निः ॥ २९ ॥

29. Or else one makes a square at the eastern part (of the interval between âhavaníya and gárhapatya, i. e. a square lying

to the west of the centre of the áhavaníya) by means of a cord which is less (in length) by one-third of the interval; in the south west corner of this square is the centre of the dakshiṇa agni.

अपिवेति स्फुटतरवितृतीयसाधनपक्षान्तरपरिग्रहार्थम् ॥ अन्तरं च पूर्वापराग्निद्वयस्य प्रकृतत्वात् तदन्तरमिव रज्जुः स्वतृतीयांशेनोना कार्या । तावन्त्या च करण्या ऽऽहवनीयमध्यात्प्रत्यक् समचतुरस्रं कर्तव्यम् । तदग्निद्वयपूर्वापरार्धवर्ति भवति । तस्य चतुरस्रस्य दक्षिणश्रोण्यां दक्षिणाग्निस्थानम् । अयं कल्पसूत्राविरोधी मुख्यतरः पक्षः । अत्राष्टप्रक्रमाधानपक्षे प्रक्रमस्य च पादमात्रत्वकरणे दक्षिणाग्निखरस्यार्धचन्द्राकृतेररत्निमात्रस्य परिशिष्टोक्तस्य पूर्वाग्रं वेदिमध्ये पततीति गार्हपत्यखरपूर्वभागादष्टपादेष्वाहवनीयखरपश्चिमभागः कर्तव्यः । एकादशद्वादशपरिमितप्रक्रमपक्षे तु गार्हपत्याहवनीययोरन्तरमेव तावन्मातव्यमिति वार्तिकउपपादितम् ।

विपर्यस्योत्तराऽंसउत्करः ॥ ३० ॥

30. The reverse thing having been done (i. e. the square having been made to the east of the centre of the gárhapatya) the utkara's place is to be fixed in the north-east corner.

विपर्यासवचनात्पश्चिमार्धे गार्हपत्यमध्यात्पुरस्तादग्निद्वयान्तरालमितरज्ज्वा स्वत्रिभागोनया करण्या चतुरस्रं कर्तव्यं तदुत्तरांसे चोत्करः । प्रदेशमात्रसूचनार्थमेतदुक्तम् । उत्करस्य तु वेदिलग्नत्वं प्रागुक्तमेव । उत्करश्च कूटरूपत्वाद्वृत्तः प्रादेशो याज्ञिकैः क्रियते । अत्र

अरत्निश्चतुरस्रश्च पूर्वस्याग्नेः खरो भवेत् ।
रथचक्राकृतिः पश्चाच्चन्द्रार्ध इव दक्षिण

इति यज्ञपार्श्वपरिशिष्ट उक्तम् । तत्र समचतुरस्रकरणमुक्तम् । वृत्तकरणं च वक्ष्यति । चन्द्रार्धाकारा तु भूररत्निमितैवं कार्याऽस्मद्वार्तिकोक्तानुसारात् ।

अग्नेरुदक्सार्धनवाङ्गुले मध्यं ततो लिखेत् ।
वृत्तमेकोनविंशत्या प्राची ज्या मध्यगा भवेत् ॥
उदगर्धं विहायार्वाक्खरो ऽग्नेर्दक्षिणस्य तु ।

दक्षिणाग्निस्थानादुत्तरतः सार्धेषु नवाङ्गुलेषु मध्यं प्रकल्प्य तत एकोनविंशत्यङ्गुलमितव्यासार्धेन वृत्तं कृत्वा तन्मध्ये प्राची रेखारूपा कार्या । तया वृत्तं द्विधा भक्तं भवति । तत उत्तरभागमपहाय दक्षिण-

भागो ऽरत्निमितो दक्षिणाग्निखरो विधेयः। प्रकारान्तराणि तु यानि वार्त्तिके दर्शितानि तानि सर्वाणि पूर्वपक्षरूपाणि वृत्तार्धचन्द्रार्धत्वेन परिशिष्ट उक्तत्वाद्वृत्तार्द्धता वा ऽस्मिन्नेव पक्षे प्रव्यक्ता भवति। अरत्निमात्रत्वं तु ज्यावाणैक्यदलहतशरस्य वर्गं दशाहतं नवभिर्विभजेदवाप्तमूलं प्रजायते कार्मुकस्य फलमिति गणितात्प्रत्येतव्यम्। यच्चपि पिशीलमात्रा भवन्तीति धिष्ण्यानां विज्ञायते चतुरस्रा इत्येकेषां परिमण्डला इत्येकेषामित्यापस्तम्बो ऽसूत्रयत्। पिशिलमानञ्च बहून्तरालमितं चतुर्मुष्टिमितं अरत्निमितं त्रिंशदङ्गुलं षट्त्रिंशदङ्गुलं वेति पञ्चधाचार्यैर्व्याख्यातं तथाप्यरत्निश्चतुरस्रास्त्विति परिशिष्टवचनादरत्निपरं पिशीलपदमेतच्छाखायां व्याख्येयम्। यच्चतुरस्रा इत्येकेषां परिमण्डला इत्येकेषामिति पक्षद्वयं दर्शितं तदपि शाखाभेदाद्व्यवस्थितम्। अस्यां शाखायां चतुरस्र एवाग्निखरः धिष्ण्यानां चयने चतुरस्रतादर्शनात् प्रमाणं चतुरस्रमादेशादन्यदिति वक्ष्यमाणत्वात्। एतेन सभ्यावसथ्ययोः खरौ चतुरस्रावरत्निमितौ ज्ञेयौ। गार्हपत्यस्य वृत्तत्वन्तु परिशिष्टवचनाद्गार्हपत्यचितौ च परिमण्डलतादर्शनात्। दक्षिणाग्नेश्चार्द्धचन्द्रत्वं परिशिष्टादेव अन्यत्र समचतुरस्रता।

अग्नीनां तु खरः कार्यो मेखलात्रयसंयुतः।
द्वादशाङ्गुल उच्छ्रायो विस्तारे चतुरङ्गुल

इत्यपि परिशिष्टे पठितम्। उक्तखरमानाद्बहिर्मेखलात्रयं चतुरङ्गुलमुपर्युपरि निवेश्यम् यथा त्रितयं मिलित्वा द्वादशाङ्गुलमुच्चं भवति। तथाधानकाले सम्भारान्तर्गताः शर्कराः परिशिष्टे संख्याताः।

पञ्चाशच्छर्कराः पश्चात्पूर्वे दद्यात्त्रिसप्ततिम्।
एतत्स्याच्छर्करामानं दक्षिणे चैकविंशतिरिति।

मन्त्रशास्त्रे ऽपि समचतुरस्रयोन्याकारार्द्धचन्द्रवृत्तत्र्यस्रिषडस्रयष्टास्रिपद्माकारपञ्चास्रिसप्तास्रिभेदाद्दशधा कुण्डान्युक्तानि तानि च हस्तमात्रभूमिकान्यारभ्यादशहस्तभूमिकेभ्यो होमाधिक्याद्वर्धन्ते वृद्धिश्च क्षेत्रफलगतैव कर्तव्या। द्विप्रमाणा चतुष्करणी त्रिप्रमाणा नवकरणीत्यादिवक्ष्यमाणत्वात्। एतत्सर्वं सोपपत्तिकं शारदातिलकटीकायां विवृतमस्माभिः॥

इति नैमिषीयसोमसुद्रामचन्द्रकृतायां शुल्बसूत्रवृत्तौ प्रथमा कण्डिका समाप्ता॥ (शेषमग्रे)

प्रथमः परिच्छेदः ।

(Continued from page 112.)

न चैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं न स्यादिन्द्रियाजन्यत्वादिति वाच्यं नहि इन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वम् अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः । ईश्वरज्ञानस्येन्द्रियाजन्यस्य साक्षात्त्वानापत्तेश्च ।

If then mind is not an organ of sense, the consciousness of pleasure, &c., cannot be said to be an immediate or perceptive cognition, for the consciousness of these (according to Vedantic doctrine) is not effected through a sense-organ:—such a position is not to be maintained. For immediate or perceptive cognition does not consist in being that which is produced by a sense-organ,* (else) even an inference and the rest would become immediate or perceptive cognitions, in that these are effected by mind. And (further) it would follow that Ísvara has no immediate cognition, since his cognition is not produced by means of a sense-organ.†

* Pratyaksha is thus defined in the Nyáya:—

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् or the knowledge produced by the contact of object with sense-organ. Pleasure, pain, &c. are not perceived by the five external sense-organs, but by the mind or internal organ of sense. And the Naiyáyika urges against the Vedántin that if indriyatva be denied to manas, the consciousness of pleasure and pain cannot be explained. The Vedantin replies that the difficulty rests with the Naiyáyika, in his definition of Pratyaksha. The definition is vicious in that it includes anumiti and the other pramás; for these are affected by mind (manojanytayá), as all are agreed. But if the mind is a sense-organ, then all the elements necessary for pratyaksha (as required by the above definition) are present, viz., the contact of an object with a sense-organ. And hence the other pramáṇas are unnecessary.

† Ísvara, the creator of the universe, precedes sense-organs, but he perceives immediately, as is proved abundantly from Ṣruti. Further, if Ísvara is not conscious, whence the creation of the universe? The Naiyáyika definition of pratyaksha is charged with the fault of avyápti, as regards Ísvara.

सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमिति चेत्। किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किं वा विषयगतस्य। आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः। तथाहि त्रिविधं चैतन्यं विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यञ्चेति। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यमन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यमन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्।

What is the condition essential to perception according to your (Vedantic) doctrine? If this be your question, we reply:—do you ask for the condition of perception as regards the cognition resulting from the act (process)* of cognition or as regards the object? If you refer to the former, we declare that it is the non-difference between the intelligence, which is particularised by the object, and the intelligence belonging to the pramáṇa. To explain:—intelligence is threefold, vishaya-intelligence, pramáṇa-intelligence and pramátṛi-intelligence: or to speak of them respectively (tatra), the vishaya-intelligence † is the intelligence particularised by jars and like objects; the pramáṇa-intelligence is the intelligence particularised by the modification (vṛitti) of the antahkaraṇa, and the pramátṛi-intelligence is the intelligence particularised by the antahkaraṇa.

यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा

As the water of a tank, issuing from an aperture, enters the beds (of fields) by means of a drain and assumes four-cornered or other shapes in the shape of these (fields); so the internal organ, which possesses the cha-

* The question in the text is due to the double usage with regard to perception, by which the object is spoken of as being immediately perceived (e. g. मम घटः प्रत्यक्षः), and the knowledge of the object as immediate perception (घटज्ञानञ्च प्रत्यक्षम्).

† The विषयचैतन्यम् is also termed प्रमेयचैतन्यम्

घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते स एव परिणामो वृत्तिरित्युच्यते ।

अनुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात् ।

तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात् तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोर-

racteristic of light,* goes out (of the body) through the door of the eye or some other sense-organ in the direction of a jar or like object and is modified in the form thereof.

This same modification (of the internal organ) is termed a vṛitti.

But, in the case of inference and the rest, there is no movement of the antahkaraṇa towards the fire † or other inferred object; for there is no contact between the organ of sight or other sense-organ and the fire or other inferred object.

And so in the case of a perception expressed by the words "this is a jar," since the jar or like object and the vṛitti in the form of the object occupy the same space together externally (to the body), the intelligence which is particularised by both (viz. the object perceived and the vṛitti) is one and identical. For the vṛitti of the internal organ and the object, such as a jar or the like, though they are the two dividers (i. e. limiting conditions of the intelligence which underlies them), do not produce a difference (between the

* The antahkaraṇa is made up of the five subtile elements, or more accurately, from the particles of the sattva fetter which constitute a part of them. The subtile element tejas is thought to preponderate in antahkaraṇa, giving to it the power of illumination : hence the term taijasa as applied to antahkaraṇa. But it must not be forgotten that all illumination is really due to the one supreme intelligence, chaitanya.

† "This hill is fiery because of the (observed) smoke" is the stock instance of an inference.

Digitized by Google

यन्तःकरणवृत्तिघटादिविषयोरेकदेशस्थितत्वेन भेदाजनकत्वात् ।

अतएव मठान्तर्व्वर्त्तिघटावच्छिन्नाकाशो न मठाकाशाद्भिद्यते ।

intelligence which is particularised by the vṛitti and the intelligence which is particularised by the object) because they are situated in the same spot (i. e. where the object lies).*

In like manner also the ákása, which is particularised by a jar standing within a house, is not distinct from the ákása that pervades the house (although the jar and the house are two distinct upádhis of the ákása).†

* The movement of the internal organ towards the object is explained, in the text, on a strictly material analogy; but the difficulty occasioned by the object and the antahkaraṇa occupying the same space at the same time is not recognised. The Vedántin may reply that in reality the antahkaraṇa is nothing apart from the chaitanya which underlies it, though conventionally (vyávahárikadaśáyám) we may regard them as distinct; and so also as regards the object of perception. And the sarvavyápitva of chaitanya, he would add, removes this difficulty. But only one step further back, might be the reply. If subject and object are not really distinct, how come they to appear so? Through Máyá, which is inexplicable, anirvachaníyá: this is the Vedántin's last resource:—न जानामि किमप्येतदित्यन्ते शरणंतव । Chitradípa, Pañchadaśí. The text, however, seems to advance a psychological explanation of sensuous perception without recording the failure of the attempt.

† Ákása is conceived as a subtile element, infinite and all pervading. By reason of this similarity it often appears, in the Upanishads, as a type of Paramátmá. I do not understand the familiar instance of the ghaṭákása and maṭhákása. Why should the upahitas be considered not distinct because the upadhis are co-terminous (so to speak) in the case of the antahkaraṇa and the object, or when one falls within the other (antahpátitva) as in the instance of the maṭhántarvartighaṭákása? The Vedántin would reply that the ghaṭákása becomes a part of the whole maṭhákása and is therefore not distinct from it. But as long as there are determinants there must be things determined. And, it must be remembered, we are now discussing relative existence (vyávahárika sattá), in which state upádhis are presented as true.

तथा चायं घट इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यात्तद्वृत्त्यवच्छिन्नचैतन्यस्याभिन्नतया तत्र घटज्ञानस्य घटांशे प्रत्यक्षत्वम् ।

सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वान्नियमेनाहं सुखीत्यादिज्ञानस्य सुखाद्यंशे प्रत्यक्षत्वम् ।

नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशे प्रत्यक्षत्वापत्तिरिति चेन्न । तत्र स्मर्यमाणसुखस्यातीतत्वेन

And thus in the case of such a perception as "this is a jar," the knowledge of the jar is a perception, as regards the jar (ghaṭánśe); because the intelligence which is particularised by the vṛitti in the form of the jar, is not distinct from the intelligence which is particularised by the jar, in that there is contact of the jar with the vṛitti in the form of the jar.

As regards pleasure, pain &c. the knowledge conveyed by the words "I am happy" and the like, is necessarily a perception or immediate cognition, because the intelligence which is particularised by pleasure, &c., and the intelligence which is particularised by the vṛitti in the form of such pleasure, are conditioned by the two upádhis (viz. the sukha and the vṛitti of the sukha) that are necessarily situated in the same spot.

An objection takes the form of a doubt:—if such be your position (evam)*, then does it not follow that the recollection of pleasure and pain, which stands as a vṛitti of one's own † antahkaraṇa is a perception, as re-

* The preceding paragraph seemed to lay down, as the only necessary condition of pratyaksha of pleasure and pain, that the two limiting conditions of chaitanya should be situated in the same spot (upádhyorekadeśasthatva). If this be so (एवम्), then you must admit, (so the objection runs), that you perceive a past pleasure. For there is a vṛitti in the form of this past pleasure (technically called smṛiti); this smṛiti has become a vishaya in the present instance and the antahkaraṇa is modified in the form of it.

† स्व refers to Jíva, the individual cogniser.

स्मृतिरूपान्तःकरणवृत्तेर्व्वर्त्तमानतया तदुपाध्योर्व्यवच्छिन्नकालत्वेन तत्तदवच्छिन्नचैतन्ययोर्भेदात् उपाध्योरेकदेशस्थत्वे सति एककालीनत्वस्यैव उपाधेयाभेदप्रयोजकत्वात्। यदि च एकदेशस्थत्वमात्रमुपाधेयाभेदप्रयोजकं तदा अहं पूर्व्वं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्त्तमानत्वं विषयविशेषणं देयम् ।

gards pleasure and pain? Not so; we reply. For, in the present instance (tatra) there is a difference, *inter se*, in the intelligences which are particularised by the two upádhis* (tattad), in that the upádhis exist in different times, as the notion of past time belongs to the pleasure which is remembered, and that of present time to the vṛitti of antahkaraṇa in the form of recollection. For the essential condition of non-difference between the two conditionates (viz. the two chaitanyas) consists in the existence of the upádhis in the same time as well as in the same place. And if the state of being situated in the same spot is in itself the cause of non-difference in that which is conditioned (chaitanya), then the notion of (existence in) present time † must be inserted as an additional limitation of the object (in the definition of pratyaksha) with a view to guard against the fault of ultra-extensiveness ‡ in (the vṛitti of) recollection, which must therefore be expressed thus:—"I was happy in a former time."

* Vishaya and Vṛitti, the two upádhis of chaitanya, are situated in the same spot, viz. internally, in the antahkaraṇa: therefore, according to your definition, pratyaksha must result. The text provides against this objection by amending the definition.

† The vishaya must be limited by the notion of present time (वर्त्तमानत्वम्), that is, it must be presented as existing in present time. The definition of pratyaksha, thus limited, cannot include smṛiti or recollection and is therefore free from the fault of अतिव्याप्ति.

‡ i. e. अलक्ष्ये लक्षणगमनम्.

नन्वेवमपि स्वकीयधर्म्माधर्म्मौ वर्त्तमानौ यदा शब्दादिना ज्ञायेते तदा तादृशशाब्दज्ञानादावतिव्याप्तिः। तत्र धर्म्माद्यवच्छिन्नतद्‌वृत्त्यवच्छिन्नचैतन्ययोरेकत्वात् इति चेन्न। योग्यत्वस्यापि विषयविशेषणत्वात्।

अन्तःकरणधर्म्मत्वाविशेषेऽपि किञ्चिद्योग्यं किञ्चिदयोग्यमित्यत्र फलबलकल्प्यः स्वभावएव शरणम्। अन्यथा न्यायमतेऽप्यात्मधर्म्मत्वात् सुखादिवद्धर्म्मादेः प्रत्यक्षत्वापत्तिर्दुर्वारा।

Another doubt:—granting this limitation of varttamánatva (evam), when dharma and adharma, which belong to one's self (and are regarded) as existing in present time, are cognised by means of Śabda and the other pramáṇas, then there is ultra-pervasiveness in such knowledge acquired by Śabda, &c. For, in the present case, the two intelligences which are particularised, (the one) by dharma or adharma, (the other) by the vṛitti in the form of this dharma or adharma, are identical. To this we reply no; because the notion of appositeness i.e. being a fit object, must be an additional limitation of the object (in the definition of pratyaksha).

For although the being an attribute of antahkaraṇa is the same for all its attributes, the one attribute is a fit object (for pratyaksha) and the other is not; in this case, our appeal is to the nature of the attribute, which must be conceived in accordance with the results (that come from our attempt to perceive the attribute). * And if the additional limitation be rejected (anythá), it will follow that there can be a perception, according to the Nyáya also, of dharma and adharma as of pleasure and pain, in that they are qualities of the Self: (and this will be a difficulty) hard to get over.

* None of the Darśanas allow that there is pratyaksha of dharma and adharma. The knowledge of these is obtained by Śabda (verbal communication), e.g. tvamadhármiko'si "you do not possess dharma," or by anumána, &c. According to the Vedánta, dharma and adharma

नन्वेवमपि वर्त्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वापत्तिः स्यादिति वाच्यम् । इष्टत्वात् । दशमस्त्वमसीत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात् ।

Granting this limitation of yogyatva (evam), it may be objected that in the case where the feeling of happiness is present in one's mind, the knowledge, conveyed by such a sentence as "thou art happy" and the like, may be termed perceptive or immediate cognition. We reply, yes; we agree to this. For from verbal communication also perceptive cognition is proved to result, when the object perceived is in contact (with the vṛitti), as in the assertion "thou art the tenth" * and the like.

are attributes of the antahkaraṇa, as is the case with pleasure and pain. When asked why dharma and adharma are not fit objects for pratyaksha, the Vedántin replies, it is in their own nature not to be. And beyond the circumference of this circle, he adds, the Naiyáyika himself cannot escape. The only difference between them, as to the point in hand, is that the latter predicates these attributes of Átmá. Dharma and adharma however do not belong to God, in the Nyáya.

* In the Pañchadaśí, (Tṛipti-dípa, śloka 23 et seq :), "daśamastvam asi" illustrates the seven states of the chidábhása or personal soul. The tenth man is at first conscious only of his nine companions, but learns in the end that he himself is the tenth :—

नवसंख्याहृतज्ञानो दशमो विभ्रमात्तदा ।
न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥
न भाति नास्ति दशम इति स्वं दशमं तदा ।
मत्वा वक्ति तदज्ञानकृतमावरणं विदुः ॥
नद्यां ममार दशम इति शोचन्प्ररोदिति ।
अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः ॥
न मृतो दशमोऽस्तीति श्रुत्वाप्तवचनन्तदा ।
परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥
त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः ।
अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति ॥
अज्ञानावृत्तिविक्षेपद्विविधज्ञानतृप्तयः ।
शोकापगम इत्येते योजनीयाश्चिदात्मनि ॥

Digitized by Google

अतएव पर्व्वतो वह्निमान् इत्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षं पर्व्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदात् । वह्न्यंशे तु अन्तःकरणवृत्तिनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य अन्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य च परस्परं भेदात् । तथा चानुभवः पर्व्वतं पश्यामि वह्निमनुमिनोमीति ।

न्यायमते तु पर्व्वतमनुमिनोमीत्यनुव्यवसायापत्तिः । असन्निकृष्ट-

Wherefore, the knowledge conveyed by the proposition "this hill is fiery (because of the observed smoke)" is non-perceptive (non-immediate) cognition as regards the fire (which is inferred) and perceptive (immediate) as regards the hill. For (in the latter case) there is no difference between the intelligence, which is particularised by the hill or like object, and the intelligence, which is particularised by the vṛitti that has gone out (from the body to the hill: i. e. the two chaitanyas have become one). But as regards the fire* (the cognition is non-perceptive), because there is a difference, *inter se*, between the intelligence, which is particularised by the fire, and the intelligence, which is particularised by the vṛitti of the internal organ; for (in this case) there has been no motion outwards of the vṛitti of the internal organ. Accordingly, our consciousness takes this form:— I see the hill: I infer the fire.

But according to the tenet of the Nyáya, there will result a secondary cognition † in the form:—"I infer the hill."

Our text maintains that the tenth man has pratyaksha of himself, or to put it technically, the vṛitti of his antahkaraṇa takes the form of his body and thus his knowledge is immediate or perceptive cognition.

* There is a vṛitti of the antahkaraṇa in the form of the fire which is inferred. The vṛitti being in the form of recollection of the fire which was once perceived, as in a kitchen hearth or the like.

† अनुव्यवसाय or secondary cognition is thus defined in the Nyáya:—ज्ञानविषयकं ज्ञानम् or cognition relative to a cognition, e. g. घटोऽयम् is the primary cognition and घटमहञ्जानामि is the anuvyavasáya

पक्षानुमितौ तु सर्वांशेऽपि ज्ञानं परोक्षम् । सुरभि चन्दनमित्यादिज्ञानमपि चन्दनखण्डांशेऽपरोक्षं सौरभांशे च परोक्षं सौरभस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात् ।

However, in the case of an inference in which the minor term* is not in contact (with an organ of sense), the knowledge (thus obtained) is non-perceptive in all respects. The knowledge also, conveyed by the proposition "(I see) the sweet sandal-wood" is perceptive or immediate cognition as regards the piece of sandal; but is non-perceptive as regards the sweet smell; for, since fragrance is not an apposite object for the sense of sight, the definition (of pratyaksha) already enounced, which contains the notion of fitness (yogyatva), does not (here) apply.

न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्ज्जातित्वं न

And such an objection is not to be urged that, since non-immediate and immediate or perceptive cognition occur together, according to the Vedánta (evam), in the same deliverance

The Vedántin maintains that in an inference there is an immediate or perceptive cognition (प्रत्यक्षज्ञान) of the hill, for instance, as well as a non-immediate cognition (परोक्षज्ञान) of the fire or inferred object. But the Naiyáyika holds that the cognition, in inference, is only one and non-immediate. Against him the Vedántin urges the following objection:—Since, in your anumiti, the knowledge is only one and non-immediate (parokshavishayakam jńánam tachchaikameva), the anuvyavasáya, which will result from this primary cognition, must also be one and non-immediate. Therefore while you speak of inferring the fire you ought also to say "I infer the hill."

* An instance of such an inference is the following:—पृथिवीपरमाणवो गन्धवन्तः पृथिवीत्वाद्यन्नैवन्तन्नैवम् Here the minor term (paksha or sádhyaván) is the ultimate atom of earth, which, from its very nature, cannot be perceived by a sense organ. This is the only case of an inference in which the Vedántin admits that the jńána (cognition) is non-immediate in all respects (सर्वांशे i. e. as regards the major and minor terms, sádhya and sádhyaván).

Digitized by Google

स्यादिति वाच्यम् । इष्टत्वात् । जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणागोचरत्वेनाप्रामाणिकत्वात् । घटोऽयमित्यादि प्रत्यक्षं हि घटत्वा-

of consciousness (jnáne), these two cannot be regarded as (each in itself) a genus.* For we are prepared not to regard each as a genus (ishṭatvát), because there is no evidence for the explanations (given by the Nyáya) of the attributes connoted by the terms játi and upádhi,† since all the pramáṇas fail in their application (with this view). The

* जाति, genus, generality or class is one of the seven padárthas (objects of knowledge, categories?) in the Nyáya and is thus defined:—नित्यत्वे सति अनेकसमवेतत्वम्, the state of what is eternal and rests on many as their intimately related substrate. And the samaváya sambandha or intimate relation is also one of the padárthas, one and eternal: समवायत्वञ्चित्यसम्बन्धत्वम् । एकसमवायसिद्धिः । It exists between the whole and it parts, the class and the individual, substance and its qualities, agent and action, the ultimate atom and its visesha (ultimate particularity (?), which makes that atom different from every other ultimate atom). The text brings forward a Nyáya objection, as follows:—if (as the Vedántin maintains) there can be paroksha and aparoksha jñána in the same anumiti, the játitva (class-notion?) of each of these two jñánas is destroyed owing to their being thus intermixed. The Kiraṇávalí of Udayana Áchárya, quoted in the Siddhántamuktávalí (Bibliotheca Indica, page 6), declares सङ्कर, intermixture, to be a cause destructive of Játi.

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥

The objection would have weight, if we admitted such a thing as játitva, but we do not:—is the Vedántin's reply.

† उपाधित्व is introduced to meet the case of Ákáśa, which is one only. Ákáśatva could not therefore be termed a játi, for the definition of játi demands अनेकसमवेतत्वम्. Ákáśatva is termed an upádhi. व्यक्तेरभेदः (see preceding note), i. e. where only the individual exists, as one of the causes destructive of játi, applies in the case of Akáśa.

Digitized by Google

दिसद्भावे मानं न तु तस्य जातित्वे- ऽपि जातित्वरूपसाध्यस्याप्रसिद्धौ तत्साध्यकानुमानस्याप्यनवकाशात् समवायासिद्ध्या ब्रह्मभिन्ननिखिलप्रपञ्चस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च । एवमेवोपाधित्वं निरसनीयम् ।

पर्व्वतोवह्निमानित्यादौ च पर्व्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभे-

immediate cognition "this is a jar," and the like, is a proof that there is such an attribute as jarness (ghaṭatva) * and so forth, but there is no proof that the attribute ghaṭatva itself is a játi (genus or class). For the thing to be proved (sádhya), that is, the attribute játi, not being known, the process of inference to prove the sádhya can have no scope to apply; and because the whole universe, apart from Brahma, is non-eternal, and because (the relation, sambandha, called) Samaváya (intimate) is not proved, the attribute, játi, (therefore), which is joined with the attributes, eternalness and intimate union, is not proved to exist in jarness and the rest. And the notion of upádhi is to be refuted in the same manner.

As regards the knowledge expresed by the inferential proposition "this hill is fiery," if we admit a difference between

* The Vedántin admits ghaṭatva as an attribute, which distinctively constitutes a jar as such. It is this jarness that serves to distinguish a jar from all other objects: but for this attribute, technically called a vyávarttaka dharma, the cognition "this is a jar" would be impossible. Beyond this the Vedántin refuses to go. The attempt to prove, by an inference, the existence of játi, as a thing in itself, is to the Vedántin a search after the horns of a hare; both are equally aprasiddha.

Digitized by Google

द्वाङ्गीकारेण तत्तद्वृत्त्यवच्छेदकभेदे- न परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये न विरोधः । तथाच तत्तदिन्द्रिययो- ग्यवर्त्तमानविषयावच्छिन्नचैतन्याभि- न्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम् ।

the vṛittis of the antahkaraṇa for the fire and the hill, because the avachchhedakas (determining attributes)* of the vṛitti of those two (tattad) are different, no contradiction will result through immediate and non-immediate cognition occurring† together in the same intelligence.‡ To continue, pratyaksha consists in the non-difference between the intelligence particularised by an object, which exists in present time and is fit to be perceived by any of the sense-organs, and the intelligence particularised by the vṛitti, (which has taken) the form of such object.

* अवच्छेदकं, determining or distinguishing attribute. In the text parvatatva and vahnitva are the two avacchedakas. Parvatatva, for example, is that attribute which distinguishes the vṛitti, that has taken the form of the hill, from all vṛittis of other objects. पर्व्वताकारवृत्तेर्वृत्त्यन्तरेभ्यो व्यावर्त्तकधर्म्मविशेषः पर्व्वतत्वरूपः स एवावच्छेदक इत्युच्यते । Thus the simple घटः may be lengthened into घटत्वावच्छेदकावच्छिन्नो घटः For other meanings of avachchedaka—see Professor Cowell's note in Kusumáñjali.

† वृत्तौ I take as equivalent to सत्तायाम्.

‡ चैतन्य synonymous in the Vedánta with jñána, cognition. Knowledge is not regarded as a quality of Átmá, as in the Nyáya, but is Brahma itself.

A. V.

(To be continued.)

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 9—10.] [Vol. IV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1882.

Price Rs. 9-0 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ अथ ब्रह्मसूत्रतात्पर्यविवरणम् ॥

तत्र चतुर्थाध्यायस्य द्वितीयपादारम्भः ॥

अथापरासु विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन् प्रथममुत्क्रान्तिक्रममाचष्टे. छान्दोग्ये "अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्," इति वागादीनि दशेन्द्रियाणि मनसि लीयन्ते, स लयः किं स्वरूपतो वृत्त्या वेति संदेहे 'वाङ्मनसी'ति श्रुतौ वृत्तिशब्दाश्रवणात् स्वरूपलय इति प्राप्ते आह वाङ्मनसीति ।

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥ २० ॥

मनसो वागादिकं प्रत्यनुपादानत्वादुपादान एव कार्यस्य स्वरूपलय इति मृद्घटादौ व्याप्तेर्दर्शनाच्च वागादीनां स्वरूपलयः, वृत्तिस्त्वनुपादानेऽपि लयमर्हति, जलप्रक्षिप्ताङ्गारेषु दाहप्रकाशात्मिकाया अनुपादाने जले लयदर्शनात्, श्रुतौ वाक्शब्देन वृत्तिर्लक्ष्यते वृत्तिवृत्तिमतोरभेदेनोपचारात्, तस्माद्वागादीनां मनसि लयः, कुतः, दर्शनात्, दृश्यते हि वाग्वृत्तेः पूर्वोपसंहारो लोके, कथं तर्हि वाङ्मनसि संपद्यत इति शब्दस्तत्राह शब्दाच्च, शब्दोऽप्यस्मिन् पक्षेऽवकल्पते वृत्तितद्वतोरभेदात् ॥१॥२०॥

अत एव च सर्वाण्यनु ॥ २ ॥ २१ ॥ १ ॥

अत एव "तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानै"रित्यत्राविशेषेण सर्वेन्द्रियाणां मनसि संपत्तिः श्रूयते, तत्रापि चक्षुरादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात् तत्स्वरूपलयासंभवाच्छब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वेन्द्रियाणि मनोऽनुवर्तन्ते, सर्वेषां मनस्युपसंहाराविशेषेऽपि वाचो ग्रहणं वाङ्मनसीत्युदाहरणानुरोधेनेत्याह· अत एवेति ॥ २ ॥ २१ ॥ १ ॥

Digitized by Google

वाङ्मनसीत्यत्र वृत्तिसंपत्तिविवक्षेत्युक्तम्, मनः प्राण इत्यत्र वृत्तिसंपत्तिरेवोत वृत्तिमत्संपत्तिरिति विचार्यते, तत्र श्रुत्यनुग्रहात् तत्प्रकृतिकत्वोपपत्तेश्च वृत्तिमत एव संपत्तिरिति प्राप्ते आह तन्मन इति ।

तन्मनः प्राण उत्तरात् ॥ ३ ॥ २२ ॥ २ ॥

तदपि गृहीतबाह्येन्द्रियवृत्तिकं मनो मनोवृत्तिलयद्वारेणैव प्राणे लीयते, उत्तराद्वाक्यात्, मनः प्राण इतिरूपात्, नच स्वरूपतो मनोलयः प्राणे, अतत्प्रकृतित्वात्, नच दर्शितं मनसः प्राणप्रकृतित्वम्, नैतत्, नहीदृशप्रणाल्या मनः प्राणे संपत्तुमर्हति, अन्ने मनः संपद्यतेऽप्सु चान्नमप्स्वेव प्राण इति, तस्माच मुख्यं मृद्घटयोरिवोपादानोपादेयत्वं किंतु प्रणाल्या भवद्युक्तया, नहि प्राणे कस्यचिल्लयं पश्यामः, तस्मात् साक्षादनुपादाने प्राणे वृत्त्या मनोलयः, वृत्तितद्वतोरभेदादुपचारः ॥ ३ ॥ २२ ॥ २ ॥

अथ प्राणस्य तेजसि लये चिन्ता, किं प्राणस्य तेजस्येव वृत्त्युपसंहार उत देहाद्यध्यक्षे जीवे, तत्र श्रुतेः स्वातन्त्र्याल्लीनैकादशेन्द्रिययुक्तप्राणस्य तेजस्येव लयः, अश्रुतकल्पनाया अन्याय्यत्वाच्छ्रुतेश्च, इति प्राप्ते ब्रूते सोऽध्यक्ष इति ।

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥ २३ ॥

स प्राणोऽध्यक्षेऽविद्याकर्मपूर्वप्रज्ञोपाधिविज्ञानात्मनि जीवेऽवतिष्ठते; तत्प्रधाना प्राणवृत्तिर्भवतीत्यर्थः, "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती"ति श्रुतेर्जीवे लयः प्राणस्य, यथा राजानं सर्वे भृत्याः समायन्तीतिवत्, नच प्राणस्तेजसीति विरोधः, जीवेन सह पश्चात् तेजआदिभूतेष्विति तदर्थात्, तस्मात् प्राणो जीवे, कुतः, तदुपगमादिभ्यः, "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवती"त्यादौ तदुपगमात्, आदिपदादुपपत्तिरपि ग्राह्या ॥ ४ ॥ २३ ॥

कथं प्राणस्तेजसीत्यत्राह भूतेष्विति ।

भूतेषु तच्छ्रुतेः ॥ ५ ॥ २४ ॥

स प्राणसंयुक्तोऽध्यक्षस्तेजःसहचरितभूतेषु देहबीजेषु सूक्ष्मेष्व-

तिष्ठते यथा कश्चित् स्रुघ्नान्मथुरां गत्वा पाटलिपुत्रं व्रजति सोऽपि स्रुघ्नात् पाटलिपुत्रं यातीति वक्तुं शक्यते तद्वत् ॥ ५ ॥ २४ ॥

ननु कथं तेजःसहचरितेषु भूतेष्वित्युच्यते, एकस्य तेजस एव श्रवणात्, अत आह नैकस्मिन्निति ।

नैकस्मिन् दर्शयतो हि ॥ ६ ॥ २५ ॥ ३ ॥

नैकस्मिन्नेव तेजसि जीवोऽवतिष्ठते कार्यस्य शरीरस्यानेकात्मकत्वप्रदर्शनात्, दर्शयतः श्रुतिस्मृती एनमर्थम्, "आपः पुरुषवचसः", "पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमय" इत्यादिश्रुतिः, स्मृतिश्च,

"अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ।
ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः ॥ इति ॥ ६ ॥ २५ ॥ ३ ॥

निर्गुणब्रह्मज्ञानिन उत्क्रान्तिरेव नास्तीति वक्ष्यते, या तु सगुणब्रह्मविद उत्क्रान्तिर्नासावज्ञानिनामुत्क्रान्त्या समाना, ब्रह्मलोकरूपमोक्षस्य तद्विपरीतसंसाररूपस्य च विषयत्वेन तत्प्राप्तिद्वारा भूताया उत्क्रान्तेर्वैषम्यस्योचितत्वात्, इति प्राप्ते आह समाना चेति ।

समाना चाऽऽसृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥ २६ ॥ ४ ॥

वाङ्मनसीत्याद्या उत्क्रान्तिर्विद्वदविदुषोः समाना आसृत्युपक्रमात्, अविशेषश्रवणात्, विद्वान् प्रकाशितं मूर्धन्यमोक्षनाडीद्वारमाश्रयते, अविद्वांस्तु देहबीजभूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहमनुभवन् संसरतीत्युत्तरत्र भेदः, ततः पूर्वमिदमेव जन्म, अत ऐहिकसुखदुःखक्रान्तिरपि समाना, उपक्रान्ते मार्गे त्ववुक्तफलभेदाद्वैषम्यमस्तु, नन्वमृतत्वं विदुषा प्राप्तव्यं तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेत्यत्राह अनुपोष्य, इदं सर्वमदग्ध्वा कथममृतत्वमिति, तस्मात् समानैव विदुदविदुषोरुत्क्रान्तिः ॥ ७ ॥ २६ ॥ ४ ॥

"तेजः परस्यां देवतायाम्," इत्यत्र तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतान्तरसहितं परस्यां देवतायां संपद्यत इत्युक्तम्, तत्रात्यन्तिकी संपत्तिर्भवितुमर्हति परमात्मनो भूतोपादानत्वात्, इति प्राप्ते आह तदापीतेरिति ।

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥ २७ ॥

तत् श्रोत्रादिकरणाश्रयभूतं तेजआदि भूतसूक्ष्म आपीतेरा संसारमोक्षात् सम्यग्ज्ञाननिमित्तादवतिष्ठते, किंतु वृत्तिलय एव संसारिणः, तत्त्वविदस्तु त्वदुक्तप्रकारेण भूतानां स्वरूपेण लयोऽस्तु तस्य निर्गमाभावत्वात् ॥ ८ ॥ २७ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥ २८ ॥

तच्चेतरभूतसहकृतं तेजो जीवस्याश्रयीभूतं चकारात् स्वरूपतः परिमाणतश्च सूक्ष्मं भवति, कुतः, नाडीनिर्गमणेन सौक्ष्म्यमुपलभ्यते श्रुत्या, तनुत्वात् संचारोपपत्तिः स्वच्छत्वाच्चाप्रतिघातः, अत एव देहान्निर्गच्छन् पार्श्वस्थैर्नोपलभ्यते, इत्याह सूक्ष्ममिति ॥ ९ ॥ २८ ॥

नोपमर्देनातः ॥ १० ॥ २९ ॥

अतः सूक्ष्मत्वादस्य स्थूलशरीरस्योपमर्देन दाहादिनिमित्तेन सूक्ष्मशरीरमुपमृद्यत इत्याह नेति ॥ १० ॥ २९ ॥

अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥ ३० ॥ ५ ॥

मृतावस्थायां स्थितेऽपि देहे रूपादिषु सत्स्वप्यूष्मा नोपलभ्यते जीवदवस्थायामेवोपलभ्यते, अतः प्रसिद्धस्थूलशरीरातिरिक्तव्यपाश्रय एवैष ऊष्मेत्युपपद्यते, "उष्ण एव जीविष्यन् शीतो मरिष्यन्" इति श्रुतेरित्याहास्यैव चेति ॥ ११ ॥ ३० ॥ ५ ॥

"न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते" इति तत्त्वविदो मत्युत्क्रान्ती निवारिते, निषेधस्यापादानं जीवो न देहः, देहानुत्क्रान्तौ मरणाभावः प्रसज्येतेत्याशङ्कते प्रतिषेधेति ।

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥ ३१ ॥

तप्ताश्मनिक्षिप्तं जलं यथा नान्यत्र गच्छति नापि दृश्यते किं तु स्वरूपेण लीयते तथा तत्त्वविदः प्राणा देहादनुत्क्रान्ता अपि न देहेऽवतिष्ठन्ते किंतु लीयन्ते, अतो जीवनाभावान्मृतो देह इति व्यवहारः, देहादुत्क्रम्य जीवेन सह प्राणानामवस्थितौ प्राणानामवस्थितत्वेन देहान्तरग्रहणस्यावश्यकत्वान्मुक्तिरेव न स्यात्, तस्मादुत्क्रान्तिप्रतिषेधस्य देह एवापानं न जीव इति चेन्न, शाखान्तरे "न तस्मात् प्राणा उत्क्रामन्ती"ति तच्छब्दार्थस्य प्राधान्याच्छ्रेयसाधिकृतो देही संबध्यते न देहः, एवं च शारीरादुत्क्रान्तिनिषेधोऽयं न शरीरादुत्क्रमणनिषेध इति जीवादुत्क्रमणप्रतिषेध इति शङ्कासूत्रार्थः ॥ १२ ॥ ३१ ॥

समाधानमाह स्पष्ट इति।

स्पष्टो ह्येकेषाम् ॥ १३ ॥ ३२ ॥

यतः केषां शाखिनां स्पष्टं देहापादान एव निषेध उपलभ्यते 'यत्रायं पुरुषो म्रियते उदस्मात् प्राणाः क्रामन्ति आहो स्विन्नेती'न्यत्र नेति होवाच याज्ञवल्क्य'इत्यनुत्क्रान्तिपक्षं परिगृह्य न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु मृत इत्याशङ्क्य 'तत्रैव समवलीयन्त' इत्युत्क्रान्तिसिद्धये 'स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते' इति तच्छब्दपरामृष्टस्योत्क्रान्त्यवधेरुच्छ्वसनादीनि समामनन्ति, देहस्यैवैतानि स्युर्न देहिनः, तस्माद्देहादुत्क्रान्त्यादिनिषेधः, उत्क्रान्त्यादिनिमित्ताभावात् ॥ १३ ॥ ३२ ॥

स्मर्यते च ॥ १४ ॥ ३३ ॥ ६ ॥

स्मर्यते भारते गत्याद्यभावः,

सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः।

देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः ॥

तस्माद्ब्रह्मविदो गत्युत्क्रान्त्याद्यभाव इत्याह स्मर्यते चेति ॥ १४ ॥ ३३ ॥ ६ ॥

तानि परे तथा ह्याह ॥ १५ ॥ ३४ ॥ ७ ॥

तानि प्राणशब्दोदितानीन्द्रियाणि भूतानि च तस्मिन्नेव परे परात्मनि ब्रह्मविदो लीयन्ते, कुतः, तथा ह्याह श्रुतिः, "एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं यन्ति" इति, न च "गताः कलाः पञ्चदशप्रतिष्ठा" इत्यपरा श्रुतिर्विद्वद्विषयैव विरोधिनीति, सा व्यवहारापेक्षया पार्थिवाद्याः कलाः पृथिव्यादिस्वप्रकृतीरपि यन्तीति, इतरा तु श्रुतिर्विद्वद्विषयेति ब्रह्मविदः सर्वं कलाजातं ब्रह्मैव संपद्यत इत्याह तानीति ॥ १५ ॥ ३४ ॥ ७ ॥

स विदुषः कलाप्रलय इतरेषामिव सावशेष उत निरवशेषः, तत्र लयसामान्याच्छक्त्यवशेषप्रसक्तावाहाविभागेति ।

अविभागो वचनात् ॥ १६ ॥ ३५ ॥ ८ ॥

निरवशेष एव, वचनात्, कलाप्रलयमुक्त्वाऽऽह "भिद्येते चासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति," अविद्यानिमित्तानां कलानां विद्यया लये न सावशेषत्वम्, तस्मादविभागः ॥ १६ ॥ ३५ ॥ ८ ॥

उत्क्रान्तिरुभयोर्मार्गोपक्रमपर्यन्तं समेत्युक्तम्, इदानीं मार्गेऽपक्रमेऽपि साम्यमस्तु, हृत्प्रद्योतनादेः समत्वश्रवणात्, तथाहि "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य" इति, अयमर्थः, वाङ्मनसि संपद्यत इति क्रमेण सजीवं लिङ्गशरीरं शक्त्यवशेषं परमात्मनि यदा लीयते तदा पूर्वं जन्म समाप्तं भवति॰ अथ जन्मान्तरीयं तल्लिङ्गं पुनर्हृदये प्रादुर्भवति तस्मिन्नवसरे हृदयाग्रेऽवस्थितस्य लिङ्गस्य गन्तव्यभाविजन्मालोचनात्मकोऽन्त्यप्रत्ययत्वेन लोकप्रसिद्धः कश्चित् प्रद्योतो भवति तेन युक्तः सन्नाडीभ्यो निर्गच्छति, एतत् सर्वेषां समानम्, तस्माच्चोपासकस्येतरेभ्यो विशेष इति प्राप्ते आह तदोकेति ।

Digitized by Google

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥ ३६ ॥ ९ ॥

मूर्धन्ययैव नाड्योपासको गच्छति, इतराभ्य इतरे, कुतः, उपासकेन मूर्धन्यनाड्या चिन्तितत्वात् सगुणब्रह्मविद्यासामर्थ्याच्च, समानं द्वयोर्हृदयाग्रप्रद्योतनं विद्यासामर्थ्यात् तत्प्रकाशितनाडीद्वारः, विद्वान् गच्छतीति तच्छेषः, विद्याशेषभूता मूर्धन्या तद्गतिरनुशीलयितव्या, तामभ्यस्य तयैव प्रतिष्ठित इति युक्तम्, तस्माद् हृदयालयेन ब्रह्मणानुगृहीतस्तद्भावमापन्नः शतेभ्योऽधिकयातिरिक्तया मूर्धन्यया नाड्या याति, "शतं चैका हृदयस्य नाड्य" इत्यादावुक्तम्, तस्मान्नोत्तरत्र साम्यम् ॥ १७ ॥ ३६ ॥ ९ ॥

अथ या एता नाड्य इत्युपक्रम्य नाडीसंबन्धमुक्त्वा अथैतैरेव रश्मिभिरूर्ध्वमाक्रमत इत्युक्तम्,मूर्धन्यया निर्गतस्य रश्मिसंबन्धः अतः स चाहनि मृतस्य संभवति न रात्रिमृतस्य रश्मीनामभावात्, इति प्राप्ते ब्रूते रश्मीति।

रश्म्यनुसारी ॥ १८ ॥ ३७ ॥

रश्मिनाड्योः संबन्धो यावद्देहभावी, अत एव ग्रीष्मक्षपासु देहदाह उपलभ्यते, अनुपलम्भश्रुतिरेव रश्मिनाड्योरपि योगं दर्शयति, तस्मान्निश्यपि मृतो रश्मिं याति ॥ १८ ॥ ३७ ॥

ननु रात्रौ रश्मिसंबन्ध इत्युक्तं न संभवति रात्रौ रश्म्यभावादित्याशङ्क्याह निशि नेतीति।

निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वात् तद्दर्शयति च ॥ १९ ॥ ३८ ॥ १० ॥

रश्मिनाडीसंबन्धस्य यावद्देहभावित्वाद् यावद्देहभावी किरणसंपर्कः, श्रुतिरप्याह "अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्तेऽमुष्मिन्नादित्ये सृप्ता" इति, उपलभ्यते च निदाघे रात्रावपि संतापः, तस्मादविशेषेणैवेदं रात्रिंदिवं रश्म्यनुसारित्वं दर्शयति श्रुतिः "अहरेवैतद्रात्रौ विदधाती"ति ॥ १९ ॥ ३८ ॥ १० ॥

Digitized by Google

दक्षिणायने मृतस्योपासकस्य न ब्रह्मलोकप्राप्तिः, उत्तरायणस्यैव ब्रह्मलोकमार्गत्वस्मरणात्,अनियमे भीष्मस्योत्तरायणप्रतीक्षणं व्यर्थं स्यात्, इति प्राप्ते आह· अत इति।

अतश्चायनेऽपि दक्षिणे॥ २०॥ ३९॥

नोत्तरायणशब्देन कालो विवक्षितः किंत्वातिवाहिकी देवतेति वक्ष्यते, भीष्मप्रतीक्षणं तु पितृप्रसादलब्धस्वच्छन्दमरणत्वख्यापनाय, यदि कालविशेषमरणापराधेन फलं नाप्नुयात् तदा पाक्षिकफला विद्या प्रसज्येत, तस्माद्दक्षिणायने मृतोऽपि विद्याफलं प्राप्नोति॥ २०॥ ३९॥

ननु

"यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ"॥

इति कालप्राधान्येनोपक्रम्याह· अहरादिकालविशेषः स्मृतावनावृत्तये नियतः, कथं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायादित्याशङ्कायामाह योगिन इति।

योगिनः प्रति च स्मर्यते स्मार्ते चैते॥ २१॥ ४०॥ ११॥

इति ब्रह्मसूत्रे चतुर्थाध्यायस्य द्वितीयः पादः॥ २॥ :: ::॥

अत्र पादेऽधिकरणानि॥ ११॥ * *॥

योगिनः प्रत्ययमहरादिकालविनियोगोऽनावृत्तये स्मर्यते, स्मार्ते चैते योगसांख्ये न श्रौते, अतो विषयभेदात् प्रमातृविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतविज्ञानेष्ववतारः।

ननु

"अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्"॥

इति श्रुताविव देवयानपितृयाणौ प्रत्यभिज्ञायेते, स्मृतावपि, 'चैव स्मार्ते चैते' 'तं कालं वक्ष्यामी'ति स्मृतौ कालप्रतिज्ञानाद्विरोधमाशङ्क्य परिहृतः सः, यदि स्मृतावप्यग्न्याद्या आतिवाहिका गृह्यन्ते न तदा कश्चिद्विरोधः॥ २१॥ ४०॥ ११॥

इति ब्रह्मसूत्रतात्पर्यविवरणे चतुर्थाध्यायस्य द्वितीयः पादः॥ २॥ :: ::॥

Digitized by Google

मू० ॥ उभयमपि पराऽऽत्मनः स्वरूपं
विमलचिदेकरसं स्वयं प्रकाशम् ॥
इति भवति विना प्रमाणमस्मि-
न्नुदितनयादभिवाञ्छनोपपत्तिः ॥ ६८ ॥

टी० ॥ ननु निरतिशयसुखाऽऽदावज्ञाते कथं सर्वप्राणिनामभिलाषः ज्ञातगोचरत्वात्तस्येति चेत्तत्राऽऽह । उभयमिति । निरतिशयसुखं निःशेषदुःखहानंचेत्यर्थः । परमाऽऽत्मनोऽहंकारविलक्षणस्य तत्साक्षिण इत्यर्थः । तादृशसुखज्ञानाऽर्थं साक्षिस्वरूपं विशिनष्टि । स्वयं प्रकाशमिति । तच्च हेतुत्वेनाऽऽह । विमलेति । साक्षिस्वरूपस्याऽनावृतता वैमल्यमुक्तम् । तथा च स्वयंप्रकाशाऽऽत्मस्वरूपत्वान्निरतिशयसुखाऽऽदेः सर्वेषां भानमविरुद्धमित्याह । इति भवतीति । उदितनयात् इह जगतोत्यादिनेति शेषः ॥ ६८ ॥

मू० ॥ कर्मकाण्डकृतशुद्धिबुद्धित-
स्तर्किते च खलु मोक्षवस्तुनि ॥
अर्थिताऽस्य घटते प्रयोजक-
ज्ञाननुन्नमनसो महात्मनः ॥ ६९ ॥

टी० ॥ नन्वनावृतसाक्षिस्वरूपसुखाऽऽदेः कथं निरतिशयत्वं लोके तथाऽननुभवात् । वस्तुतस्तत्तथाविधमिति चेत्सत्यं तथाऽप्यज्ञानाऽऽवृतप्रकाशे तज्ज्ञानं विना न कामना स्यादित्याशङ्क्याऽऽह । कर्मकाण्डेति । काण्डशब्दः समूहवाची । तर्किते परमप्रेमाऽऽस्पदत्वाऽऽदिनोहिते मोक्षवस्तुनि आनन्दाऽऽत्मनि । अस्य विशिष्टाऽधिकारिणः । प्रयोजकज्ञानमानन्दाऽद्वयाऽऽत्मप्रतिपादकवाक्यजन्यमापातज्ञानं तेन नुन्नं प्रेरितं तदभिमुखीकृतं मनो यस्य । अत एव महात्मनः नित्याऽद्यनुष्ठानादतिविमलमानसस्य परमप्रेमाऽऽस्पदत्वाऽऽदिलिङ्गेन वेदान्तवाक्येन चाऽऽपाततोऽवगताऽऽनन्दाऽऽद्याऽऽत्मनि प्रेप्सा कथं न भवेदित्याशयः ॥ ६९ ॥

Digitized by Google

मू० ॥ धर्मनिर्णयनिमित्तमिष्यते
वेदवित्परिषदेव मानवे
तद्वदत्र गुरुणाऽस्य सङ्गति-
स्तेन चाऽस्य घटतेऽर्थिता गुरौ ॥ ७० ॥

टी० ॥ ननु प्रथममेवाऽधिकारिणा श्रुतिन्यायाभ्यामानन्दाऽऽत्मकं वस्तु परिज्ञातं चेत्कृतं तस्य गुरूपसदनाऽऽदिनेत्याशङ्क्य स्वयमुत्पादितज्ञानस्याऽन्यथात्वशङ्काकलङ्कसंभवादाचार्यवान्पुरुषो वेदेत्यादिशास्त्राच्चाऽऽचार्यमुखेनैव ब्रह्म निर्णेतव्यमिति सदृष्टान्तमाह । धर्मनिर्णयेति । मानवे मनुस्मृतौ शास्त्रे । चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा । सा ब्रूते यं स धर्मः स्यादेको वाऽऽध्यात्मवित्तम इति मनुना धर्मनिर्णयो वेदवित्पर्षत्साध्य इत्युच्यते । तद्वदात्मज्ञानस्याऽपि गुरूपदेशसाध्यत्वात्तदर्थमस्य गुरूपसदनं युक्तमित्याशयेनाऽऽह । तद्वदत्रेति । ब्रह्मनिर्णयसाधनमिति शेषः । फलितमाह । तेनेति ॥ ७० ॥

मू० ॥ यः कर्मकाण्डविषयेऽभिहितोऽधिकारी
सोऽयं प्रवृत्तिषु निवृत्तिषु तुल्यरूपः ॥
अत्राऽभिधित्सितविशेषणपूगयुक्तो
साधारणस्त्वभिमतः पुरुषो निवृत्तौ ॥ ७१ ॥

टी० ॥ ननु धर्ममीमांसायां षष्ठाऽध्याये वेदार्थोऽधिकारी निरूपित इति किमत्राऽथशब्देनाऽधिकारिनिरूपकेण । न च शास्त्राऽन्तरत्वान्न पुनरुक्तिर्दोषायेति वाच्यम् । तथापि कृतकरणाऽऽनर्थक्यात् । अन्यथा वेदस्याऽर्थवत्त्वादेरप्यत्र निरूपणं स्यादिति तत्राऽऽह । यः कर्मकाण्डेति । मीमांसाशास्त्र इति शेषः । कर्मसमूहमुद्दिश्येति वाऽर्थः । अभिहितः षष्ठाऽध्याये निरूपित इत्यर्थः ॥ प्रवृत्तिषु निवृत्तिषु तुल्यरूप इति । अग्निहोत्राऽऽदौ प्रवर्तमानस्याऽपि कलञ्जभक्षणाऽऽदिनिवृत्तिलक्षणे तन्निवृत्तिशीलस्याऽप्यग्निहोत्राऽऽद्यनुष्ठानलक्षणे प्रत्यवायतौल्यात् अयं प्रवृत्त्यादितुल्य इत्यर्थः । प्रस्तुताऽधिकारिणस्ततो विशेषमाह । अत्रेति । अस्मिन्

शास्त्रे अथशब्देन सूचितमप्यधिकारिविशेषणं तार्तीयन्यायेनैव स्थिरं भवतीत्यभिधित्सितेत्युक्तम् । वेदान्तशास्त्रे हि साधनचतुष्टयसंपन्नेन सकलकर्मत्यागिना ब्रह्म विचार्यमिति निरूप्यत इति ततोऽस्य विशेषः नचाऽयं षाष्ठन्यायेन सिध्यतीति न वैयर्थ्यम् । अर्थवत्त्वादिकं तु वेदस्य न ततो न्यायाऽन्तरमपेक्षत इति नाऽत्र तन्निरूपणमिति भावः ॥ ७१ ॥

मू० ॥ शास्त्रं प्रवृत्तिषु निवृत्तिषु तुल्यरूपं
साधारणस्य पुरुषस्य पुराऽभ्यधायि ॥
अस्योच्यते सकलकर्मनिवृत्तिभाजः
सर्वं निवृत्तिविषयं श्रवणाऽऽदिशास्त्रम् ॥ ७२ ॥

टी० ॥ नन्वस्याऽपि श्रवणाऽऽदिप्रवृत्तेर्निवृत्तेश्चाऽग्निहोत्राऽऽदेः सत्त्वादयमपि प्रवृत्तिनिवृत्तिसाधारण एवेत्याशङ्क्याऽऽह ॥ शास्त्रमिति ॥ प्रवृत्तिषु निवृत्तिषु साधारणस्य पुरुषस्य तुल्यं समबलं शास्त्रं विधिनिषेधशास्त्रमिति पुरा पूर्वतन्त्रे अभ्यधायि जैमिनिनेति शेषः । अस्य ज्ञानाऽधिकारिणः संन्यासिनः सर्वं श्रवणाऽऽदिशास्त्रं निवृत्तिविषयमित्युच्यते बादरायणाऽऽदिभिरिति संबन्धः । अग्निहोत्राऽऽदिशास्त्रं हि तदधिकारिणस्तदर्थकर्तव्यतामेव प्रतिपादयति । न तु तदितरव्यापारं परिसङ्ख्यष्टे ॥ स्वाऽर्थे बाधकाऽभावादिति स उभयसाधारणः अतस्तच्छास्त्रद्वयमपि तं प्रति समबलमेव जैमिनिना विचारितम् । बादरायणस्तु शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येदिति शास्त्राऽनुसारेण ज्ञानोद्देशेन सकलकर्मत्यागं निरूप्य संन्यासिनैव ब्रह्म विचार्यमित्याह । तत्र यदि श्रवणाऽऽदिशास्त्रमस्य प्रवृत्तिं काममप्युपदिशेत्तर्हि सकलकर्मसंन्यासशास्त्रं बाध्येतेति श्रवणाऽऽदिशास्त्रमपि निवृत्तिविषयमेवेत्यधिकारिद्वयं परस्परविलक्षणमित्यर्थः ॥ ७२ ॥

मू० ॥ शास्त्रद्वैविध्यदृष्टेर्द्विविधमधिकृतेर्भेदमप्याश्रयन्ते
तद्द्वैविध्योपलब्धेः पुरुषमधिकृतं शास्त्रयोर्भिन्नमाहुः ॥

शास्त्राऽर्थद्वित्वहेतोः पुरुषमधिकृतं तद्गतं वाऽधिकारं
नो चेद्भिन्नं प्रतीयुर्द्विविधमिह वृथा शास्त्रमापद्यते हि ॥ ७३ ॥

टी० ॥ एवं धर्ममीमांसाशास्त्रस्य प्रवृत्तिनिवृत्तिसाधारणाऽधिकारिविषयत्वं ब्रह्ममीमांसायास्तु निवृत्तिमात्रनिष्ठपुरुषविषयत्वमित्युक्तम्। एतच्च मीमांसकानामपि संमतमित्याह । शास्त्रेति ॥ असंनिकृष्टाऽर्थप्रतिपादकं वचनं शास्त्रं तद्द्वैविध्यदृष्टेर्हेतोरधिकारस्य द्विविधं भेदमभ्याश्रयन्ते । तस्याऽधिकारस्य द्वैविध्योपलब्धेः पुरुषं तद्विशिष्टमधिकृतमधिकारिणं शास्त्रयोः शास्त्रार्थयोः । उक्तमर्थं विपक्षे बाधकमुखेन द्रढयति ॥ शास्त्राऽर्थेति । मीमांसका एवमाहुः । असंनिकृष्टाऽर्थवचनं शास्त्रं तद्भेदे च तदर्थो भिद्यते भिन्नाऽसंनिकृष्टाऽर्थं विना तदयोगात् ॥ तदर्थभेदे च तदनुष्ठाननिमित्तमधिकारोऽपि भिद्यते । अन्यथा चित्राकारीर्यादेरपि स्वर्गकामाऽऽद्यधिकारसंबन्धप्रसङ्गात् । ततश्च तद्विशिष्टोऽधिकार्यपि शास्त्रभेदे भिद्यते अन्यथा शास्त्रभेदो न स्यादिति तद्वदिहाऽपि प्रवृत्तिनिवृत्ति विषयतया केवलनिवृत्तिविषयतया च भिन्नयोर्धर्मब्रह्ममीमांसयोस्तदर्थाऽधिकारिणोर्भेदेन भवितव्यमिति भावः ॥ ७३ ॥

मू० ॥ यमनियमविधानैर्वाङ्मनःकायचेष्टा-
व्युपरमणमशेषैः कथ्यते न प्रवृत्तिः ॥
यदि भवति कदा चित्का चिदस्य प्रवृत्तिः
श्रुतिविहितनिवृत्तेः कर्मणां कत्थनं स्यात् ॥ ७४ ॥

टी० ॥ ननु सर्वं निवृत्तिविषयं श्रवणाऽऽदीत्युक्तमयुक्तं ज्ञानाऽधिकारिणोऽप्यहिंसाऽऽदिनियमवच्छौचाऽऽदेर्नियमस्याऽपि संन्यासिन उपदेशात्तत्राऽऽह । यमनियमेति । यमनियमयोर्विधानैर्विधायकवाक्यैरित्यर्थः । अत्र यमग्रहणं दृष्टान्ताऽर्थमुक्तम् । अशेषैर्यमनियमविधानैरिति संबन्धः ॥ प्रवृत्तिः शौचाऽऽदिरूपा यमशास्त्रवन्नियमशास्त्रस्याऽपि निवृत्तिपरत्वमेव । न प्रवृत्तिपरत्वमित्यर्थः ॥ तत्र हेतुमाह । यदीति । अस्य ज्ञानाऽधिकारिणः कर्मणां श्रुतिविहितनिवृत्तेरिति संबन्धः ॥ कत्थनं कत्थना पीडेति

यावत् ॥ यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतिर्ज्ञानार्थिनः सकलकर्मत्यागं विधत्ते ॥ न च यावज्जीवाऽऽदिवाक्याऽनुसारेण काम्यकर्मत्यागमात्रं प्रव्रज्या श्रुत्यर्थ इति वाच्यम् ॥ यज्ञोपवीताऽऽदेरपि तत्र त्यागविधानात् । संन्यासिनो धर्मविधायकवाक्ये मुण्डोऽपरिग्रह इति शिखाऽऽदिराहित्यनियमदर्शनेन प्रतिप्रसवन्यायेनाऽपि यज्ञोपवीताऽऽदेरनङ्गीकारात् । तस्माद्यदहरेव विरजेदिति वैराग्यस्य तदधिकारस्य श्रवणाद्विरक्तमुमुक्षुविषयं संन्यासशास्त्रम् ॥ यावज्जीवाऽऽदिशास्त्रं तु न तत्समानविषयमित्यविरक्तविषयमेव । अतः संकोचकाऽभावात्संन्यासशास्त्रं सकलकर्मनिवृत्तिं विधत्ते ॥ तदस्य शौचाऽऽदिप्रवृत्त्यभ्युपगमे बाधितं स्यात् ॥ न च शौचाऽऽद्यनेकविधिबलात्तदिष्टमिति वाच्यम् ॥ शौचाऽऽदिशास्त्रस्य संन्यासशास्त्रवत् विरक्तमुमुक्षुमात्रविषयत्वाऽभावेन सामान्यविषयस्य ततो दुर्बलत्वादिति न काऽपि ज्ञानाऽधिकारिणो विधितः प्रवृत्तिरिति भावः ॥ ७४ ॥

मू० ॥ औदासीन्यविशेषमेव हि परब्रह्माऽऽत्मधीजन्मने
शास्तीदं श्रवणाऽऽदिशास्त्रममुना त्वाक्षिप्यते व्यापृतिः ॥
तां तां व्यापृतिमन्तरेण घटते सामान्यशास्त्राऽर्थधी-
रित्यर्थाल्लशुनाऽऽदिभक्षणगतौदासीन्यबोधादिव ॥ ७५ ॥

टी० ॥ नन्वेवं श्रवणाऽऽदौ कथं मुमुक्षोर्ब्रह्म जिज्ञासोः प्रवृत्तिः तत्प्राऽऽपकाऽभावात् ॥ न चाऽन्वयव्यतिरेकाभ्यां श्रवणाऽऽदेर्ज्ञानसाधनत्वाऽवगमात्स्वत एव मुमुक्षोस्तत्र प्रवृत्तिरिति वाच्यम् । नियमेन तत्र प्रवृत्त्ययोगात् । अन्यतोऽप्यभिलषितज्ञानसंभवात् कथं वा तच्छास्त्रस्य निवृत्तिनिष्ठत्वमिति तत्राऽऽह ॥ औदासीन्येति ॥ औदासीन्यं प्रवृत्त्यभावः तस्य विशेषमनात्मश्रवणाऽऽदिरूपप्रवृत्तिविशेषाऽभावमित्यर्थः ॥ शास्ति उपदिशति । अमुना ज्ञानाऽर्थमुपदिष्टौदासीन्यविशेषेण व्यापृतिः आत्मश्रवणाऽऽदिप्रवृत्तिः अर्थादाक्षिप्यत इति संबन्धः । अनुपपत्तिमेवाऽऽह ॥ तां तामिति ॥ श्रवणमननाऽऽदिरूपामित्यर्थः ॥ सा सा शास्त्राऽर्थधीरनात्म-

श्रवणमननाऽऽदिनिवृत्तिरूपौदासीन्यात्मकश्रोतव्याऽऽदिशास्त्राऽर्थधीः। न घटते इति यत इत्यर्थः॥ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्य इत्यादिशास्त्रेणाऽऽत्मज्ञानाऽन्वयव्यतिरेकसिद्धतयोक्तबाधकबलेन च श्रवणाऽऽदिव्यापारविधानाऽसंभवेनाऽऽत्मज्ञानविरोध्यनात्मश्रवणाऽऽद्यभावरूपमौदासीन्यं विधीयते सेयं परिसंख्या अनात्मव्यापारवर्जनमन्तरेण श्रुतशोऽनुष्ठितश्रवणाऽऽदिनाऽप्यद्वयाऽऽत्मज्ञानाऽसंभवात्तस्मिंश्च विहिते चेतसो निर्व्यापारत्वाऽसंभवेन तावताप्यभिमतज्ञानाऽसिद्धेश्चाऽन्वयव्यतिरेकाऽऽद्यवधृतज्ञानसाधनभावश्रवणाऽऽदिप्रवृत्तिराक्षिप्यत इति भावः। अर्थाऽन्तरनिषेधसामर्थ्यादर्थान्तरसिद्धौ दृष्टाऽन्तमाह। लशुनाऽऽदीति॥ लशुनं न भक्षयेत् कलञ्जं भक्षयेदित्यादिनिषेधेन तद्भक्षणाऽऽदेरिष्टसाधनत्वाऽभावरूपौदासीन्यबोधाद्यथा तद्भक्षणाऽऽदिप्रापकरागाऽऽदिनिवृत्तौ यतते तद्वदित्यर्थः॥ ७५॥

मू० ॥ औदासीन्ये बोधिते शास्त्रवृन्दै-
रर्थादस्मात्प्रच्युतस्याऽस्त्यनर्थः॥
इत्यालोच्य प्रच्युतेः प्रापकस्य
प्राबल्येऽर्थे प्रातिलोम्यं विधत्ते॥ ७६॥

टी०॥ दृष्टाऽन्तं विशदयति॥ औदासीन्य इति॥ भक्षणाऽऽदिधात्वर्थमतेष्टसाधनत्वाऽभाव इत्यर्थः। शास्त्रवृन्दैः लशुनाऽऽदिभक्षणनिषेधशास्त्रैः। अस्मान्निषेधशास्त्राऽर्थादौदासीन्यात्प्रच्युतस्य भ्रष्टस्य भक्षणाऽऽदौ प्रवृत्तस्येति यावत्॥ अनर्थे नरकपातोऽस्तीत्यर्थादालोच्येति संबन्धः। लशुनं न भक्षयेदित्यादिनिषेधवाक्येन तद्भक्षणस्य बलवदनिष्टाऽननुबन्धीष्टसाधनत्वं निषिध्यते तस्यैव लिङादिप्रतिपाद्यत्वात्। तत्र लशुनाऽऽदिभक्षणस्य प्रत्यक्षप्रमितेष्टसाधनतया तद्विरहप्रयुक्तवर्णितविशिष्टाऽभावाऽनुपपत्तेर्बलवदनिष्टाऽननुबन्धित्वरूपविशेषणाऽभावादेव स वाच्य इति नरकसाधनत्वं तस्य निश्चीयते तदिदमुक्तमर्थादालोच्येति। एवं तस्याऽनर्थहेतुत्वनिश्चयवान्भक्षणाऽऽदिप्रवृत्तेः प्रापकस्य वक्ष्यमाण-

Digitized by Google

रागाऽऽदेः प्राबल्यरूपेऽर्थे प्रातिलोम्यं विधत्ते यथा पुनस्तद्वचनाऽऽदावुत्कटरागो न भवति तथा स्वयं यत्नं कुरुत इत्यर्थः । एवं च यथा लशुनाऽऽदिभक्षणे प्रवर्तकरागोत्कटत्वनिवृत्तये श्रुतिमन्तरेण स्वयमेव प्रवर्तते एवमत्राऽपीति द्रष्टव्यम् ॥ ७६ ॥

मू० ॥ औदासीन्यं बोधयच्छास्त्रमेत-
न्नित्यं पथ्यं बोधयत्यस्य पुंसः ।
पथ्यादस्मात्प्रच्युतस्याऽस्त्यपथ्यं
बुद्धाऽपथ्यप्रातिलोम्ये यतेत ॥ ७७ ॥

टी० ॥ दार्ष्टाऽन्तिकं विशदयति ॥ औदासीन्यमिति ॥ अनात्मविचाराऽऽदेर्मोक्षसाधनत्वाऽभावमित्यर्थः । एतच्छास्त्रं श्रोतव्यो मन्तव्य इत्यादिनित्यमात्यन्तिकं पथ्यमिष्टं ज्ञानद्वारा मोक्षसाधनमिति यावत् । तथा च श्रुतिः । अन्या वाचो विमुञ्चथेति । अस्य मुमुक्षोस्ततः किं तत्राऽऽह । पथ्यादिति । अस्त्यपथ्यं संसाररूपोऽनर्थ इति बुद्धेति संबन्धः । अपथ्यप्रातिलोम्ये यतेत यथाऽपथ्यं न भवति तथा पूर्वोक्तविधयाऽऽत्मश्रवणाऽऽदौ यतेतेत्यर्थः । पाठाऽन्तरेत्वपथ्यं बुद्धेति संबन्धः ॥ ७७ ॥

मू० ॥ वृत्ता प्रवर्तकनिवर्तकशास्त्रसिध्यै
षष्ठे प्रवृत्तिविनिवृत्त्यधिकारिचिन्ता ॥
अत्रैकमेव तु निवृत्त्यधिकारमार्ग-
माश्रित्य सूत्रकृदथाऽत इति प्रवृत्तः ॥ ७८ ॥

टी० ॥ एवं काण्डद्वयस्याऽधिकारिभेदमुपपाद्योपसंहरति । वृत्तेति कृतेत्यर्थः । प्रवर्तकनिवर्तकशास्त्रसिद्धौ विधिनिषेधशास्त्राऽर्थाऽनुष्ठानसिद्ध्यै षष्ठे पूर्वमीमांसायामिति शेषः । प्रवृत्तिनिवृत्त्यधिकारिचिन्ता स्वर्गकामाऽधिकरणाऽऽदौ कलञ्जभक्षणनिषेधाऽधिकरणाऽऽदौ च प्रवृत्तिनिवृत्त्यधिकारिचिन्ता वृत्तेति संबन्धः । अत्र अस्मिन् शास्त्रे त्वेकमेवेति संबन्धः । एवं चाऽत्राऽधिकारिचिन्तायां न पुनरुक्तिरिति भावः ॥ ७८ ॥

मू० ॥ औदासीन्यप्रच्युतेः प्रापकौ च
रागद्वेषौ नाऽपरो हेतुरस्ति ॥

रागद्वेषप्रातिलोम्ये प्रवृत्ति-

रौदासीन्यप्रापणाच्छास्त्रतोऽर्थात् ॥ ७९ ॥

टी० ॥ इदानीं सिंहावलोकनन्यायेन प्रच्युतेः प्रापकस्येत्युक्तम् प्रापकमेव विशदयति ॥ चौदासीन्यप्रच्युतेरिति । रागद्वेषौ धात्वर्थस्येष्टसाधनताज्ञानाद्धात्वर्थगोचरेच्छा रागः । अनिष्टसाधनताज्ञानात्तत्र द्वेषः। लौकिकभोजनाऽऽदौ वैदिकाऽग्निहोत्राऽऽदौ चाऽविशेषेण राग एव प्रवर्त्तकः । न तु वेदे प्रवर्त्तनातो लिङ्गादिव्यापारात्प्रवृत्तिः प्रमाणस्येष्टसाधनत्वाऽऽदिस्वप्रमेयबोधनव्यापारं विना व्यापारान्तराऽभावादित्याशयेनाऽऽह ॥ नाऽपरइति ॥ एवं प्रवर्त्तकनिवर्त्तकौ रागद्वेषौ इत्युक्त्वा लशुनभक्षणाऽऽदौ रागिणस्तन्निवृत्त्यर्थं प्रवृत्तिप्रकार इत्यालोच्य प्रच्युतेः प्रापकस्येति प्रागुक्तं स्मारयति । रागद्वेषेति ॥ प्रातिलोम्ये प्रतिलोमे शास्त्रवदनिष्टसाधनताऽनुसन्धानेऽप्रवृत्तिः स्यादिति शेषः ॥ ७९ ॥

मू० ॥ अशुचेः प्रतिषेधशास्त्रतो

न भवत्येव हि वेदचिन्तनम् ॥

श्रवणाऽऽदिनिवृत्तिशास्त्रतः

स्वयमर्थादथ शोधमापतेत् ॥ ८० ॥

टी० ॥ एवं मुमुक्षोर्निवृत्तिमात्रेऽधिकार इति बादरायणस्य तद्वुत्पादनमर्थवदित्युक्तम् । नन्वेवं सति मुमुक्षोः कथं शौचाऽऽदिसिद्धिरित्यत आह । अशुचेरिति ॥ प्रतिषेधशास्त्रत इति ॥ द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः । स्वाध्यायभूमिं चाऽशुद्धामात्मानं चाऽशुचिं द्विज इति स्मृत्या वेदाऽनुशीलिनोऽशुचित्वप्रतिषेधादशुचेर्वेदचिन्तनं न संभवत्येव तेन विना च प्रागुक्तन्यायेन वेदाऽन्तश्रवणाऽऽदिर्न स्यात् । न हि वेदवाक्यमननुसन्दधता वेदान्तवाक्यं विचारयितुं शक्यमिति इतरनिवृत्तिपरश्रवणाऽऽदिशास्त्रसामर्थ्यादेव शौचाऽऽदिर्विधिमन्तरेणाऽपि तदस्य सिद्ध्यतीति ॥ ८० ॥

Digitized by Google

मू० ॥ अचतुर्गुणशौचवारणा-

त्स्वयमेवाऽस्य चतुर्गुणं भवेत् ॥

अचतुर्ष्वशनस्य वारणा-

त्स्वयमेवाऽस्य चतुर्षु भोजनम् ॥ ८१ ॥

टी० ॥ नन्वेवमपि यतीनां तु चतुर्गुणं चातुर्वर्ण्यं चरेद्दैद्यमित्यादिशास्त्रसिद्धशौचाऽऽद्याश्रितचातुर्गुण्याऽऽदिनियमः कथं सिध्येत्तत्राऽऽह । अचतुर्गुणेति । तेनाऽपि हि शास्त्रेण सकलनिवृत्तिविधायिशास्त्राऽनुसारेणाऽचातुर्गुण्याऽऽदिनिवारणादर्थाच्छौचचातुर्गुण्याऽशनचातुर्गुण्याऽऽदिसिध्यतीति न काऽप्यनुपपत्तिरिति भावः ॥ ८१

मू० ॥ इति योजय सर्वमीदृशं

कथितन्यायवशेन सादरम् ॥

विधिहीननिवृत्तिशास्त्रतः

कथितेऽस्मिन्नधिकारवर्त्मनि ॥ ८२ ॥

टी० ॥ एवं सकलसंन्यासविधायकशास्त्रबलान्मुमुक्षोरात्मश्रवणाऽऽदिशास्त्रमपि तदितरपरिवर्जनपरमेव नाऽस्य प्रवृत्तिविधायकं किंचिदपि शास्त्रमस्तीत्युपपादितमुपसंहरति । इतीति । अनेन । प्रकारेणेत्यर्थः । ईदृशमापाततः प्रवृत्तिविधायितया प्रतीयमानं चित्तवशाऽऽनाऽऽदि शास्त्रम् । अस्य पक्षस्य महद्भिरादृतत्वाच्च न त्वयाऽत्राऽऽदरशैथिल्यं कार्यमित्याशयेनाऽऽह सादरमिति । अस्मिन्नधिकारवर्त्मनि । कथितन्यायवशेन विधिहीननिवृत्तिशास्त्रतस्तच्छास्त्रबलादीदृशं सर्वं साऽऽदरमिति अनेन प्रकारेण योजयेति संबन्धः ॥ ८२ ॥

मू० ॥ इति के चन वर्णयन्ति त-

द्विपरीतं प्रवदन्ति के चन ॥

प्रविभज्य तदप्युदीर्यते

निपुणाऽऽचार्यपरम्पराऽऽगतम् ॥ ८३ ॥

टी० ॥ उक्तमनूद्य तत्प्रतिपक्षं पक्षान्तरं प्रस्तौति । इति केचनेति । ज्ञानाऽधिकारिणः केवलं निवृत्तावेवाऽधिकारं के चन वर्णयन्ति । अन्ये के चन तद्विपरीतं ततो निवृत्तिमात्रनिष्ठायाः विपरीतं प्रवृत्तिमपि वदन्तीत्यर्थः । ननु सकलकर्मनिवृत्तिविधायिनि शास्त्रे सति कथं तद्विपरीतपक्षोत्थानमित्याशङ्क्याऽऽह । प्रविभज्येति । तद्विपरीतं प्रविभज्योदीर्यते मयेति शेषः ननु श्रुतिविरुद्धत्वात्तदुपेक्षैव न्याय्येति तत्राऽऽह । निपुणाऽऽचार्येति । तथा च तदुपेक्षाऽऽर्हं न भवतीत्यर्थः निपुणेति पूर्वस्मादस्य विशेषं द्योतयति तदग्रे व्यक्तो भविष्यति ॥ ८३ ॥

मू० ॥ उत्सर्गतः सकलकर्मनिवृत्तिनिष्ठा

संन्यासशास्त्रशतकोटिभिरर्पिताऽस्य ॥

अस्ति प्रतिप्रसवशास्त्रमुखात्प्रतीता

चेष्टाऽऽत्मबुद्धिपरिपाकफलाऽपि का चित् ॥ ८४ ॥

टी० ॥ नन्वेवं सति सकलत्यागश्रुतेः का गतिरित्याशङ्क्य ततः सामान्यतः सकलनिवृत्तिसिद्धावपि ज्ञानाऽधिकारिणो विशिष्य श्रवणाऽऽदिरूपा प्रवृत्तिरपि प्रतिप्रसवरूपाच्छ्रवणाऽऽदिशास्त्रात् सिध्यतीति भवति तस्योभयनिष्ठेत्यभिप्रेत्याहोत्सर्गत इति । सामान्यत इत्यर्थः । निवृत्तिनिष्ठा निवृत्त्यधिकारः अस्य मुमुक्षोर्ज्ञानाऽधिकारिणो यद्यपि तथाप्यस्तीत्यध्याहृत्य संबन्धः तथाप्यस्ति प्रवृत्तिरिति यदुक्तं तदाह प्रवृत्तिप्रसवशास्त्रमुखात्सामान्यतः परित्यक्तस्य विशेषरूपेण विधायिशास्त्रबलात् चेष्टाश्रवणाऽऽदिरूपा शौचाऽऽदिरूपा च प्रवृत्तिरात्मबुद्धिपरिपाकफला आत्मसाक्षात्कारस्य साक्षाद्वा परम्परया वा निश्चयत्व प्रयोजिका ॥ ८४ ॥

मू० ॥ यमस्वरूपा सकला निवृत्ति-

स्तथा प्रवृत्तिर्नियमस्वरूपा ॥

निवर्तकादत्र यमप्रसिद्धिः

प्रवर्तकात्स्यान्नियमप्रसिद्धिः ॥ ८५ ॥

टी० ॥ ननु संन्यासशास्त्राऽनुरोधेन श्रवणाऽऽदिशास्त्रस्याऽपि पूर्वोक्तनिवृत्तिमात्रपरत्वेनाऽस्यैकनिष्ठायां संभवन्त्यां किमुभयनिष्ठाऽभ्युपगमेनेत्याशङ्क्य श्रवणाऽऽदिशास्त्रस्येतरनिवृत्तिपरत्वे स्वाऽर्थत्यागोऽन्याऽर्थकल्पना प्राप्तबाधश्चेति चैदोष्याऽऽपत्तेर्नियमपक्ष एवाऽऽश्रयणीय इति ज्ञानाऽधिकारिणोऽप्युभयनिष्ठत्वमन्यथा यमनियमाऽऽदिविभागप्रसिद्धिरपि न स्यादित्याह । यमस्वरूपेति । स्मृतिसिद्धयमसंज्ञितेत्यर्थः । निवृत्तिः सर्वप्रकारेण प्राणिपीडाऽनृतवचनाऽऽदेर्निवृत्तिः । प्रवृत्तिः शौचाऽऽदिरूपेत्यर्थः यमनियमयोः संक्षिप्य स्वरूपमाह निवर्तकादिति । अत्र तयोर्मध्ये हिंसाऽऽदिनिवर्तकशास्त्रप्रतिपाद्यो यमः शौचाऽऽदिप्रतिपादकशास्त्रप्रतिपाद्यो नियम इत्यर्थः ॥ ८५ ॥

मू० ॥ निवृत्तिरस्ति द्विविधा बहिः स्थिता
शरीरसर्वेन्द्रियसंयमाऽऽत्मिका ॥
तथापराऽभ्यन्तरवस्तुसंश्रया
सदात्मकूटस्थचिदेकविग्रहा ॥ ८६ ॥

टी० ॥ अधिकारिनिरूपणप्रस्तावे मुक्तियोग्यं तत्स्वरूपं प्रागहङ्काराऽऽद्यध्यस्तत्वनिरूपणेनाऽर्थसिद्धं ब्रह्म वा इदमित्यादिशास्त्रसंमतं साक्षाद्दर्शयितुम् । अथ वा यमस्वरूपा सकला निवृत्तिरिति कथमसङ्गतया ब्रह्मस्वरूपस्येतराऽसंसृष्टत्वेन प्रपञ्चोपशम इत्यादिश्रुत्या प्रपञ्चनिवृत्त्यात्मतया च प्रमितस्य निवृत्तिरूपत्वात् न च साध्यरूपा साधनाऽऽत्मकयमाऽऽत्मिकेत्याशङ्क्य निवृत्तिविधायकशास्त्रसिद्धैव सा यमाऽऽत्मिका न निवृत्तिमात्रमिति वक्तुं तां विभजते ॥ निवृत्तिरस्तीति ॥ द्वैविध्यमेवाऽऽह । बहिः स्थितेत्यादिना । आत्मबाह्यशरीराऽऽद्याश्रितेत्यर्थः तत्र हेतुमाह । शरीरेति । अभ्यन्तरवस्तुसंश्रया सर्वान्तरवस्त्वात्मिका । तत्सिद्धय आह सदात्मेति ॥ ८६ ॥

मू० ॥ तयोस्तु बाह्या विधिशास्त्रलभ्या
प्रयत्ननिर्वर्त्यतया प्रतीतेः ॥
विधानशास्त्रं विरहय्य लभ्या
चितिस्वरूपा त्वितरा निवृत्तिः ॥ ८७ ॥

टी० ॥ अस्त्वेवं प्रकृते किमायातमिति अभिधित्सितसिद्धये तयोर्बाऽन्तरविशेषमाह तयोस्त्विति ॥ विधिशास्त्रलभ्या हिंसाऽऽदिनिषेधविधिलभ्येत्यर्थः । तत्रहेतुः प्रयत्ननिर्वर्त्यतयेति । न हिंस्यादित्यादिनिषेधविधेर्हिंसां कुर्यादित्यर्थप्रतीतेः सा तथेत्यर्थः । एतच्च परसिद्धाऽन्तमाश्रित्योक्तं स्वमते हिंसाऽऽदिगतश्रेयःसाधनत्वाऽभावस्यैव तदर्थत्वादिति ॥ इतरा तु नैवमित्याह ॥ विधानेति ॥ तस्या यत्नाऽसाध्यत्वे चितिस्वरूपेति हेतुगर्भं विशेषणम् ॥ ८७ ॥

मू० ॥ मायामयी बाह्यनिवृत्तिरिष्टा
चितिस्वरूपा परमार्थसत्या ॥
तयोर्निवृत्त्योश्च निवृत्तिशास्त्रं
विधायकं बाह्यनिवृत्त्यपेक्षम् ॥ ८८ ॥

टी० ॥ बाह्याऽऽन्तरनिवृत्त्योः साध्याऽसाध्यत्वे हेत्वन्तरमेवाऽऽह ॥ मायामयीति ॥ तथा चाऽनिर्वचनीयायास्तस्याः साध्यत्वं संभवतीत्यर्थः ॥ परमाऽर्थसत्येति ॥ तथा च तस्या न प्रागसत्त्वमिति न साध्यत्वमित्यर्थः ॥ ततोऽपि किं तत्राऽऽह ॥ तयोरिति ॥ बाह्याऽऽभ्यन्तरयोरित्यर्थः ॥ बाह्याया एव कृतिसाध्यत्वसंभवाद्धिंसाऽऽदिनिषेधशास्त्रं हिंसाऽऽद्यौदासीन्याऽनुकूलाऽन्तरक्रियात्मिकां तामेव विधत्ते ॥ एवं च विधेयाऽऽत्मकयमोऽपि सैवेति भावः ॥ ८८ ॥

मू० ॥ प्रवृत्तिशास्त्रेण समेऽपि संमते
निवृत्तिशास्त्रस्य विधेयबोधने ॥

Digitized by Google

निवृत्त्यनुष्ठाननिबन्धनत्वतो।
निवर्तकं शास्त्रमिदं प्रवर्तते ॥ ८६ ॥

टी० ॥ ननु यदि निषेधशास्त्रमपि निवृत्तिक्रियां विधत्ते तर्हि सर्वमेव विधिशास्त्रमिति विधिनिषेधविभागो न सिध्येदित्याशङ्क्याऽऽह प्रवृत्तीति । प्रवृत्तिनिवृत्तिरूपविधेयवैलक्षण्यात्तद्विभागसिद्धिरित्याशयेनाऽऽह निवृत्तीति । निवृत्त्यनुष्ठाने निबन्धनं कारणं तस्य भावस्तत्त्वं तत इत्यर्थः । इदं धर्मविषयम् । एतदुक्तं भवति न ज्ञानाऽधिकारी मुमुक्षुर्निवृत्तिमात्रनिष्ठस्तथासति श्रवणाऽऽदिशास्त्रे त्रिदोषपरिसंख्याप्रसङ्गात् किन्तु श्रवणाऽऽदिरूपप्रवृत्तिनिष्ठोऽपि श्रवणाऽऽदेश्चाऽऽत्मज्ञाने साधनत्वं यद्यप्यन्यतः सिद्धं तथापि तुषनिवृत्तिसाधनतया सिद्धाऽवहननं इवाऽत्राऽपि नियमविधिसंभवात् नियमाऽपूर्वस्य ज्ञानप्रतिबन्धकनिवृत्त्याऽर्थवत्त्वोपपत्तेरिति ॥ ८९ ॥

मू० ॥ शास्त्रद्वयेन परिदर्शितसाधनेन
साध्यस्पृहापरवशः पुरुषो मुमुक्षुः ॥
शुश्रूषते गुरुमथेत्युदितः स चाऽत्र
वेदाऽन्तवाक्यविषयश्रवणाऽधिकारी ॥ ९० ॥

टी० ॥ ननु यदिज्ञानाऽधिकारिणोऽप्युभयत्राऽधिकारस्तर्हि षष्ठाऽध्यायनिरूपिताऽधिकारिणो नाऽस्य विशेष इति किं भगवतः पृथक्कृत्वाऽदनेनेत्याशङ्क्याऽस्त्यस्य ततो महान्विशेष इत्याह । शास्त्रद्वयेनेति पूर्वकाण्डप्रदर्शितेन विविदिषाऽर्थमनुष्ठितेन यज्ञाऽऽदिनाऽहिंसादिना च शुद्धाऽन्तःकरणो वेदाऽन्तोक्तविवेकवैराग्यशमदमलक्षणसाधनेन हेतुना मुमुक्षुः पुरुषः साध्यस्य तत्त्वसाक्षात्कारस्य स्पृहया परवशः प्रवृत्तिपर्यन्तज्ञ.नेच्छया प्रेर्यमाणो यो गुरुं शुश्रूषते चोऽवधारणे स एव वेदाऽन्तवाक्यविषयश्रवणाऽधिकार्यत्र जिज्ञासासूत्रेऽथेत्युदित इति संबन्धः एवं च साधनचतुष्टयसंपन्नस्य ब्रह्मजिज्ञासोर्गुरुं शुश्रूषमाणस्य वेदान्तऽश्रवणाऽधिकारिणोऽवि-

वेका॒ऽविरक्ता॒ऽशान्ता॒ऽमुमुक्षुनिवृत्तमुख्कुलवासात् कर्मा॒ऽधिकारिणो॒ऽति-स्फुटमेव वैलक्षण्यं न्याया॒ऽन्तरसाध्यमस्तीति ना॒ऽत्र तदुत्पादनं व्यर्थमिति भावः ॥ ९० ॥

मू० ॥ स परिपृच्छति को॒ऽहमसौ च कः

सहजमस्य च तस्य च किं पृथक् ॥

उत तयोरभिदेश्वरजीवयो-

रिति च संशयसंकुलमानसः ॥ ९१ ॥

टी० ॥ एवमुपससाद चतुष्टयसाधन इत्यादिना प्रस्तुता॒ऽधिकारिनिरूपणं समाप्येदानीं स गुरुमुपव्रज्य किमकरोदिति जिज्ञासायामाह । स परिपृच्छतीति। उक्तो॒ऽधिकारी इति संशयसंकुलमानसो गुरुमुपेत्य पृच्छतीति संबन्धः संशयप्रकारं दर्शयन्नर्थात्प्रश्नप्रकारमप्याह । को॒ऽहमित्यादिना। अहमनुभवे प्रकाशमान आत्मा मम स्वरूपमहमनुभवश्च देहेन्द्रिया॒ऽऽदिसङ्घे जायमानः किमालम्बन इति न ज्ञायत इति को॒ऽहमिति त्वंपदार्थप्रश्नः स्वस्वरूपस्या॒ऽभ्यर्हितत्वात्प्रथमं जिज्ञासेति द्रष्टव्यम् । तत्पदार्थे प्रश्नमाह। असौ च क इति। तत्त्वमसिवाक्ये यस्तत्पदार्थः असौ च कः किं तत्तेजो॒ऽसृजतेत्यादिना जगत्कर्तृत्वा॒ऽऽदिप्रपञ्चवत्तया निर्दिष्ट एव सः। किं वा सदेवसोम्येदमग्र आसीदेकमेवा॒ऽद्वितीयमिति श्रुतिप्रसिद्धं समस्तभेदशून्यं सदेवेति । वाक्या॒ऽर्थे प्रश्नमाह । सहजमित्यादिना । स्वाभाविकमित्यर्थः । अस्य जीवस्य । तस्य तत्पदार्थस्य ब्रह्मणः । पृथक्पृथक्त्वं तयोरीश्वरजीवयोरिति संबन्धः द्वासुपर्णेत्यादौ जीवेश्वरयोर्भेदश्रवणात्तत्वमसीत्यादौ चा॒ऽभेदश्रवणाद्वाक्यद्वयस्य विशेषा॒ऽनवगमात्संशयः ॥ ९१ ॥

(शेषमग्रे)

माधवीयधातुवृत्तिः ।

लुङ् ॥ भूतोपाधिकार्थाद्धातोर्लुङ् स्यात् । भूतः पञ्चविध इत्युक्तं, तत्रानद्यतने लङ्विधानात्ततोन्यः सर्वो भूतोऽत्र गृह्यते । अनद्यतन इति बहुव्रीहिनिर्देशाच्च व्यामिश्रे लङः प्रसङ्गः । लस्य तिबादिषु 'च्लि लुङी'ति च्लिः । तस्य 'च्लेः सिजि'ति सिजादेशः । स्थानिन्यादेशे च चकारानुबन्धनस्य प्रयोजनं वक्ष्यते । तस्य 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेष्वि'ति लुक् । स च नित्यत्वादिटः पूर्वं 'दाधाघ्वदाबि'ति दाधारूपा धातवो घुसंज्ञाः । अडागमः । अभूत् । अत्र सिचो लुका लुप्तत्वात् प्रत्ययलक्षणाभावात् 'सिचि वृद्धिः परस्मैपदेष्वि'ति परस्मैपदे परे सिचि विधीयमाना वृद्धिर्न भवति । तथा गुणोपि न भवति 'भूसुवोस्तिङी'ति तिङि सार्वधातुके निषेधात् । अत एव वा निषेधाद्वृद्धेरप्यलाभो भविष्यति । यदि स्याद् अपवादेन बाधितत्वादप्रसङ्गात् कथमसौ निषिध्येत । नन्वस्तिसिचोऽपृक्त इत्यस्तिसिज्भ्यां परस्य सार्वधातुकापृक्तस्य विधीयमान ईट् प्रत्ययलक्षणेनात्र कस्मान्न भवति । अत्र के चिदेवमाहुः । अस्तीति द्विसकारकनिर्देशादेकेन सिचो विशेषणाच्छ्रूयमाणात्सिचः परस्येड्विधिरितीह न भवतीति । इदमविचारितरमणीयम् । अस्तीति पदान्तभूतस्यास्य सकारस्य पदान्तरेणान्वयायोगात् पृथक्पदत्वे तु न तस्य धातुत्वं नापि तत्सहितस्य समुदायस्येति धातुविषयश्तिब्निर्देश एव नोपपद्यते । अन्ये वर्णयन्ति आर्धधातुके भुवोरीट्प्रतिषेध इत्यत्र न केवलमस्त्यादेशस्य भुवः स्थानिवत्त्वेन प्राप्त इण्णिषिध्यते किं त्वनादेशस्यापीति स्थानिवत्त्वदूषणपरे च तत्र वार्त्तिके कथमनादेशो भूर्गृह्यत इति त एव प्रष्टव्याः । न चानादेशस्याग्रहणे निषेधस्य वैयर्थ्यं प्रमाणम् । अर्थभेदेन रूपद्वयार्थत्वात्तस्य । वयं तु परिहरामः सिचोल्पाच्कत्वात् बहुविषयत्वेनाभ्यर्हितत्वाच्च पूर्वनिपाते कर्त्तव्ये अस्तिसिच इति वचनात्तन्त्रादिना विद्यमानसिच इत्यस्याप्यर्थस्य लाभादिति । किं च अर्थद्वयपरिग्रहे श्तिबप्युपपद्यते ऽन्यथा सिजस्भ्यामित्येव ब्रूयात्, न चास्तीत्यस्यतिनिवृत्त्यर्थः, विकर-

येन व्यवधानात् ताभ्यां परस्य सार्वधातुकापृक्तस्यासंभवात् । अभूताम् । अभूवन् । अजादौ भुवो वुगिति वुक् । अत्र झेः प्रत्ययलक्षणेन सिचः परत्वेपि सिजभ्यस्तविदिभ्यः परस्य ङित्त्वादेशस्य झेर्विधीयमानो जुसभावो न भवति। 'आतः' इति नियमात् सिज्लुगन्तादपि भवत्यात एवेति, अभ्यस्त- 'मुभे अभ्यस्तं' 'जक्षित्यादयः षड्' इति वक्ष्यते । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ॥ लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥ लिङो निमित्तं हेतुहेतुमद्भावादि कुतश्चिद्वैगुण्यात्क्रियाया अनभिनिर्वृत्तिः क्रियातिपत्तिः, अत्र धातोर्लृङ् स्यात्, लस्य तिबादिषु स्यतासी इति स्यः । इडागमः, इतश्चेत्यादि । यदि सेवापरोऽभविष्यत् आढ्योऽभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम । क्रियातिपत्तिर्न सेवापरो नाप्याढ्य इति ॥

अथात्मनेपदं प्रदर्श्यते ॥ कर्त्तरि कर्मव्यतिहारे ॥ कर्म क्रिया । अन्यस्यान्येन करणं परस्परकरणं च कर्मव्यतिहारः । अस्मिन् गम्यमाने आत्मनेपदं स्यात् इति लस्य तिबादिषु विकरणादिसाधारणं पूर्ववदेव, 'टित आत्मनेपदानां टेरे' इति टिल्लादेशानामात्मनेपदानां टेरेत्वं स्यात् । इदं चेत्वमादन्तप्रयुक्तकार्यातिदेशात्केवलस्याप्यचष्टिसंज्ञाविधानाद्भवति । व्यतिभवते । व्यतिभवेते । अत्रातो ङित इत्यदन्तादङ्गात्परस्य ङिदवयवस्याकारस्येयादेश इति 'सार्वधातुकमपि'दिति ङित्त्वम् । आताम आकारस्येयादेशे वलि लोपः । नानर्थकेऽलोन्त्यविधिरिति टेरेत्वमत्रान्त्यस्य न भवति, 'ईदूदेद्द्विवचनं प्रगृह्य'मिति ईदाद्यन्तस्य द्विवचनस्य प्रगृह्यत्वात् 'प्लुतप्रगृह्या अची'ति प्रकृतिभावाद् व्यतिभवेते एतावित्यादावयादि न भवति । इह प्रकृतिभावः परभूतनिमित्तविकाराभावस्तेन स्वरो भवत्येव । व्यतिभवन्ते, अत्र त्रीणि कार्याणि प्राप्नुवन्त्यन्तादेशोऽद्भावः शबिति । अत्र विशेषविहितत्वेनान्तादेशापवादादद्भावान्नित्यत्वाच्छप्, तत्र कृते झस्यादन्तत्वादद्भावस्य न प्राप्तिरिति सामान्यविहित एवान्तादेशः प्रवर्तते । व्यतिभवसे । 'थासः से' इति टिल्लादेशस्य थासः सेभावः । व्यतिभवेथे भवेते इतिवत् । व्यतिभवध्वे । व्यतिभवे । व्यतिभवावहे । व्यतिभवामहे । एत्वात्परत्वादा-

द्गुणः । कृते वा तस्मिन्नतो गुणादिति पररूपम् । व्यतिशब्दः कर्मव्यतिहार-द्योतनार्थः । तस्य 'ते प्राग्धातोः' ते गत्युपसर्गसंज्ञा धातोः प्राक् प्रयोक्तव्या इति नियमात् पूर्वप्रयोगः । 'उपसर्गाः क्रियायोगे' 'गतिश्चे'ति प्रादयो यत्-क्रियायुक्तास्तं प्रत्युपसर्गसंज्ञाः सन्तो गतयः । इतरेतरस्य व्यतिभवन्ति, अन्यो-न्यस्य व्यतिभवन्तीत्यत्रेतरेतरान्योन्योपपदाच्चेति कर्मव्यतिहारलक्षणमात्म-नेपदं निषिध्यते । 'अन्योन्योपपदाच्चे'ति चकारेण परस्परोपपदादपि न भवति । परस्परं व्यतिभवन्ति । व्यतिबभूवे । व्यतिबभूवाते । व्यतिबभूविरे । व्यतिबभूविषे । व्यतिबभूवाथे । व्यतिबभूविढ्वे । व्यतिबभूविध्वे । व्यतिबभूवे । व्यतिबभूविवहे । व्यतिबभूविमहे ॥ लिट-स्तझयोरेशिरेच् ॥ लिटस्तझयोरेशिरेचावादेशौ स्तः । एशः शकारो 'ऽनेका-ल्शि'दिति सर्वादेशार्थः, 'विभाषेट'इति इणः परो य इट् ततः परेषां षीध्वं-लुङ्लिटां धकारस्य वा मूर्द्धन्य इति तद्विकल्पः । टेरेत्वमजादौ वुक् । वलादौ क्रादिनियमादिट् । 'भवतेर'इत्यभ्यासस्यात्वम् । व्यतिभविता । व्यतिभवितासे । थासः सइति सेभावे तासस्त्योरिति सलोपः । व्यतिभ-विताध्वे । अत्र सकारस्य धकारादिप्रत्ययपरत्वाद्धि चेति लोपे धकारस्या'नचि च'ति अच उत्तरस्य यरो द्वित्वमचि नेति द्वित्वे 'झलां जश् झशी'ति धका-रस्यान्तरतम्याद्दकारः । येषां 'धि चे'ति सिचो लोप इति पक्षस्तेषामप्यत्र सकारस्यान्तरतम्याज्जशि दकारे नात्र रूपभेदः । व्यतिभविताहे । हट एत्वे 'ह एतीति' सकारस्य हकारः, व्यतिभवितास्वहे । व्यतिभविष्यते इत्यादिपूर्ववत् । व्यतिभवताम् । व्यतिभवेताम् । व्यतिभवन्ताम् । व्यतिभवस्व । व्यतिभवेथाम् । व्यतिभवध्वम् । व्यतिभवै । व्यतिभवावहै । व्यतिभवामहै ॥ टेरेत्वमातो ङित इत्यादि पूर्ववत् । 'आमेत'इति लोडादेशानामेकारस्यामादेशः । सेध्वेशब्दयोस्तु 'सवाभ्यां वामा'विति यथासंख्यं वामादेशावपवादौ । उत्तमेकारस्यैत्वे 'एत ऐ' इत्यैकारः । अय-मप्यामादेशापवादः । अत्राडागमे कृते तस्य तत्परस्य चैकारस्य ॥ आटश्च ॥ आटोचि परे पूर्वपरयोरेका वृद्धिरैकारः । तस्य शबकारस्य च ॥ वृद्धिरेचि ॥ अवर्णादेचि परे पूर्वपरयोरेका वृद्धिरित्यैकारः । व्यत्यभवत । व्यत्यभवेताम् ।

Digitized by Google

व्यत्यभवन्त । व्यत्यभवथाः । व्यत्यभवेथाम् । व्यत्यभवध्वम् । व्यत्यभवे । व्यत्यभवावहि । व्यत्यभवामहि । व्यतिभवेत । व्यतिभवेयाताम् । व्यतिभवेरन् । व्यतिभवेथाः । व्यतिभवेयाथाम् । व्यतिभवेध्वम् । व्यतिभवेय । व्यतिभवेवहि । व्यतिभवेमहि । 'लिङः सीयुडि'ति लिङादेशस्य सीयुट्टित्त्वादादिः। सुट् तिथोः । लिङः सलोपः । आद्गुणः । वलि लोपः । 'झस्य रन्'िति लिङो झस्य रनित्यादेशः, न विभक्ताविति नेत्कारः । 'इटोदि'ति लिङादेशस्येटोऽदादेशः । तकार उच्चारणार्थो नादेशावयवः । यद्वादेशावयवत्वेपीदमस्यमुरिति थमुप्रत्ययस्य प्राग्दिशो विभक्तिरित्यतः परे दिक्शब्देभ्य इत्यतः पूर्वं प्रत्यया विभक्तय इति विभक्तित्वे तत्स्थत्वेन मकारस्येत्संज्ञानिषेधे सिद्धे तत्परित्राणायोकारासञ्जनेन न विभक्तावित्यस्यानित्यत्वज्ञापनादित्त्वं लभ्यते । आशिषि । व्यतिभविषीष्ट । व्यतिभविषीयास्ताम् । व्यतिभविषीरन् । व्यतिभविषीष्ठाः । व्यतिभविषीयास्थाम् । व्यतिभविषीढ्वम् । व्यतिभविषीध्वम् । व्यतिभविषीय । व्यतिभविषीवहि । व्यतिभविषीमहि । आर्द्धधातुकत्वादेषु लिङः सलोपाभावः । अत्र सीयुट् यदागमास्तद्ग्रहणेन गृह्यन्ते इति प्रत्ययग्रहणेन गृह्यते, तथा तदवयवभक्तः सुडपि तत्समुदायभक्त इति द्वयोरपि सकारयोः प्रत्ययावयवत्वादादेशप्रत्यययोरिति षत्वम् । यथा हि 'शीङो रुडि'ति प्रत्ययावयवझकारादेशस्यातोऽपि रुट् समुदायभक्तत्वेन सार्वधातुकग्रहणेन गृह्यत इति शेरत इत्यत्र 'शीङः सार्वधातुक' इति गुणः प्रवर्त्तते । ष्टुना ष्टुः ॥ षकारटवर्गाभ्यां युक्तयोः सकारतवर्गयोर्यथासंख्यं ष्टुरिति तकारथकारयोः षकारठकारौ । निमित्तिनिमित्तयोर्यथासंख्यं 'तोः षी'ति षकारे परे तवर्गस्य ष्टुत्वनिषेधाच भवति । 'विभाषेट'इति मूर्द्धन्यविकल्पः । व्यत्यभविष्ट । व्यत्यभविषाताम् । व्यत्यभविषत । व्यत्यभविष्ठाः । व्यत्यभविषाथाम् । व्यत्यभविध्वम् । व्यत्यभविषि । व्यत्यभविष्वहि । व्यत्यभविष्महि । सिचीड्गुणावादेशषत्वानि यथायोगं ष्टुत्वं च । 'आत्मनेपदेष्वनत' इति झस्याद्भावः । तकारस्य प्रयोजनाभावाच्चत्वम्, ध्वमि षत्वस्य पूर्वत्रासिद्धत्वात् 'धि चे'ति सलोपे गुणः । इट्, इणः परत्वा'द्विभाषेट' इति मूर्द्धन्यविकल्प उदाहार्यः । व्यत्यभविष्यत । इत्यादि लङ्वत् ॥

अथ भावकर्मणोर्लकाराः प्रदर्श्यन्ते ॥ तत्र भावकर्मणोरित्यनयोर्लस्यात्मनेपदमेव । 'सार्वधातुके यगि'ति भावकर्मवाचिनि सार्वधातुके लटि लोटि लङि विध्यादिलिङि च यक् । अन्यत्र सार्वधातुके स्यादिभिरस्य बाधः, लिडाशीर्लिङोरस्यार्द्धधातुकत्वाच्च प्रसङ्गः । यकः कित्वाच्च गुणः । भूयते । भूयताम् । अभूयत । भूयेत । भवता । अत्र प्रत्ययेन कर्तुरनभिधानात्तृतीया ।'कर्तृकरणयोस्तृतीये'ति तिङ्कृत्तद्धितसमासैरनभिहितयोरनयोस्तृतीयोच्यते । तत्र भावस्य युष्मदस्मदर्थाविशेष्यत्वात्प्रथमपुरुष एवात्र व्याख्यायते, स्वतः क्रियाया निवृत्तभेदाया अभिधानादेकवचनमेव भवति भवद्भ्यां, भवद्भिः त्वया युवाभ्यां युष्माभिः मया आवाभ्यामस्माभिर्भूयत इति । भवन्तीत्यादौ तु प्रत्ययेन कर्तुरभिधानात् तत्कृतं बहुत्वम् । भूयते मासः । 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणां देशश्चाकर्मणा'मिति मासादयो ऽकर्मकाणां कर्माणि । तत्र कर्मणोऽभिधानात् कर्मणि द्वितीया न भवति, सा च तिङादिभिरनभिहिते विधीयते । भूयते भवता मासमित्यत्र भावे लविधानात् कर्मणो ऽनभिधानाद् द्वितीया । ननु सकर्मकत्वात्कथं भावे लकारः । उच्यते । कालादिभिर्न कश्चिदप्यकर्मक इति तद्व्यतिरिक्तेन कर्मणा ऽकर्मकाणां भावे लविज्ञानात्, कथं तर्हि मासे लो, ऽकर्मकाणां भावकर्त्रोर्लविधेः । उच्यते । एवंविधानां भावकर्मकर्तृषु लविज्ञानात् । तथोक्तं कालाध्वनोरित्यत्र मासादौ कर्मणि भावे च लकारं प्रस्तुत्य प्राकृतमेवैतत्कर्म यथा कटं करोतीति, पुनश्च तत्र यदि प्राकृतमेवैतत्कर्म अकर्मकाणां भावे लो भवतीति भावे लो न प्राप्नोतीति चोदयित्वा ऽकर्मकाणामित्युच्यते, न च केचित्कालभावादिभिरकर्मकास्तत एवं विज्ञास्यामः क्व चिद्ये ऽकर्मका इति । अथ वा येन कर्मणा सकर्मकाश्चाकर्मकाश्च भवन्ति तेनाकर्मकाणां न चैतेन कर्मणा कश्चिदप्यकर्मकः । अथ वा यत्कर्म भवति न च भवति तेनाकर्मकाणां न चैतत्कर्म क्व चिदपि न भवतीति । अनुभूयते सुखमित्यादौ संवेदनाद्यर्थत्वाद् भुवः संवेद्यादिभिरपि सकर्मकत्वात्कर्मण्येव लः । भूयेते भूयन्ते इत्याद्युदाहार्यम् । तथा, भूयताम् । अभूयत । भूयेत । मास इत्यादि च । लिटि न विशेषः । अत्र के चिदाहुः । 'भव-

तेर' इत्यत्वं शिणपानिर्देशात् भावकर्मणोर्नेति । अयमस्यार्थस्य कथं प्रतिपादक इति स एव प्रष्टव्यः । तस्य तु प्रयोजनं यङ्लुकि मन्त्रविषये आमभावे लिट्परत्वे सत्यत्वनिवृत्तिः । भविता । भाविता । 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च'इत्यजन्तानां हनादीनां च धातूनामार्धधातुकेषु भावकर्मविषयेषु स्यादिषु वा चिणीव कार्यमिट् चेत्यभिधानात् चिण्वत्पक्षे वृद्धिः ॥ इहेड्विधानमनिडर्थं णयन्तार्थं च । स्यसिजादीनामार्धधातुकत्वस्याव्यभिचारेऽपि तेन विशेषणं सीयुडर्थम् । तेन सार्वधातुके विध्यादिलिङि सीयुटि चिण्वत्त्वस्याभावः । एवं स्यसिच्सीयुड्विषये द्वैरूप्यमुदाहार्यम् । भविष्यते । भाविष्यते । अभविष्यत । अभाविष्यत । अभावि । अभाविषाताम् । भविषीष्ट । भाविषीष्टेत्यादि । लुङ्लिङोर्ध्वमि चिण्वत्पक्षे विभाषेट इति मूर्धन्यविकल्पनाद्चातूरूप्यं नेयम् । लुङि तशब्दे चिण् भावकर्मणोरिति चिण्विधानात् त्रैश्चिण् । ततः चिणो लुगिति तशब्दस्य लुक् ॥

अथ कर्मकर्त्तोच्यते ॥ कर्मवत्कर्मणा तुल्यक्रियः ॥ कर्त्तरि शबित्यतः कर्तृग्रहणमनुवृत्तं प्रथमान्तमिह विपरिणम्यते । इह कर्म न पारिभाषिकं तेनात्यन्तविलक्षणेन क्रियायाः सादृश्यायोगात् । नापि क्रियामात्रं यथा कथं चन क्रियया क्रियायाः सादृश्याव्यभिचारात् । अतः कर्मेह तत्स्था क्रिया, अनया तुल्यक्रियः कर्ता कर्मणा तुल्यस्तत्कार्याणि लभतइत्यर्थः । तानि च यगात्मनेपदचिण्चिण्वद्भावाः । एकस्मिंश्च प्रयोगे कर्मणा तुल्यक्रियस्य कर्तुरसंभवात् कर्मत्वकर्तृत्वे प्रयोगभेदेन ज्ञेये । यद्येवं पटं भावयतीत्यत्र कर्मस्था क्रियोत्पत्तिरस्ति तया तुल्यक्रियत्वं पटो भवतीत्यत्र कर्तुरिति यगादि कस्मान्न भवति । अर्थस्वभावादेवास्य योगस्य धातुविषयत्वे सिद्धे धातोरित्यनुवृत्तिसामर्थ्याद्विभक्तिविपरिणामेन सप्तम्यन्तं विवक्षितैकत्वं विज्ञायतइत्येकस्मिन् धातौ कर्मणा तुल्यक्रियस्य कर्तुः कर्मवद्भावाद् इह तु धातुर्भिद्यते । एवं च कर्मव्यापारोपसर्जनकर्तृव्यापारार्थो धातुर्यत्र सौकर्यातिशयप्रतिपादनाय कर्मव्यापारमात्रे वर्तते सोस्य विषयः संपन्नः ।

ततश्च शत्रुमभिभवतीत्यत्र न्यग्भवनोपसर्जने न्यग्भावने वृत्तो भवतिर्यदा न्यग्भवनमात्रे वर्त्तते तदाभिभूयते शत्रुः स्वयमेवेति यगात्मनेपदे भवतः । नन्वत्र कर्मस्था क्रिया न्यग्भवनं सैव कर्तृस्थापीति क्रियाभेदाभावात् कथं भेदनिबन्धनं सादृश्यमिति चेन्न । कर्मकर्त्रवस्थाभेदेन भिन्नकारकत्वेन भेदोपपत्तेः । नन्वत्रातिदेशेन यगादिवद् द्वितीया कस्मान्न भवति । न चानभिहितइति निषेधोऽस्य कार्यातिदेशत्वाद् अत्र च तदधिकाराभावात् । उच्यते । व्यत्ययो बहुलं लिङ्याशिष्यङिति संहितया सूत्रपाठाद् द्विलकारको निर्देशः, तत्रैकं लग्रहणमनुवर्त्तते तच्चेह षष्ठ्यन्तं सत् तदन्तत्वं प्रयोजयति कार्यप्रतीतिश्चाध्याह्रियतइति लान्तकार्यविषयत्वादतिदेशस्य द्वितीयायास्तथाभावादप्रसङ्गः । एवं च कर्माश्रयाः कृत्यादयोपि न भवन्ति । नन्वभिभूयमानो देवदत्तो यज्ञदत्तमभिभवतीत्यत्रापि कर्मवद्भावः प्राप्नोति, अत्र हि यज्ञदत्ते कर्मणि दृष्टो न्यग्भाव इतरस्मिन् देवदत्ते च कर्तरि दृश्यते यदसौ न्यग्भवन् न्यग्भावयति, नैष दोषः । इह कर्मणा तुल्यक्रिय इति कर्मस्थया क्रियया तुल्यायाः प्रसङ्गात्कर्तुश्च क्रियापेक्षत्वात् प्रत्यासत्त्या तदपेक्षयैव कर्तुः कर्मवद्भावविज्ञानात् । इह च न्यग्भवनं न कर्तृत्वउपयुज्यते किं तु न्यग्भावनमेव, अन्यभवतोपि न्यग्भावने कर्तृत्वसंभवात् । तत्करणात्स्वाश्रयाकर्मकत्वनिबन्धनो भावे लकारोपि भवति । अभिभूयते शत्रुणा स्वेनैवेति तेन शत्रोस्तृतीया भवति । सर्वत्र कर्मवदुदाहरणानि ॥ लुङि तशब्दे तु अचः कर्मकर्तरीति चिणादेशविकल्पनात् पक्षे सिच्, तस्य पूर्ववच्चिण्वदिट् तत्पक्षे वृद्धौ अभ्यभावि । अभ्यभाविष्ट । अभ्यभविष्टेति त्रैरूप्यम् । स्वाश्रयभावे लकारे चिण् भावकर्मणोरिति चिणेव । अभ्यभावि शत्रुणा स्वेनैवेति ।

(शेषमये)

श्रीगुरुभ्यो नमः

अङ्गुलै रथसम्मितायाः प्रमाणम् ॥ १ ॥

1. The measure of (the vedi) measured by (the dimensions of) a chariot (is estimated) according to aṅgulis.

वरुणप्रघासे रथमात्र्युत्तरेति रथमात्री वेदिरुक्ता सेह विवेच्या । तदर्थमाह रथसम्मितायाः वारुणप्रघासिक्या वेदेः प्रमाणमङ्गुलैर्वक्ष्यामीति सूत्रशेषः । यद्यपि तत्पुरुषस्याङ्गुलेः संख्याव्ययादेरिति समासान्तात्प्रत्ययविधानात्समासविशेषएवाङ्गुलेरदन्तता तथापि अस्मादेवार्षप्रयोगाददन्तोऽप्यङ्गुलशब्दो नपुंसकलिङ्गोऽस्तीति ज्ञेयम् । तच्चाङ्गुलैर्मानं रथस्य रथकृच्छास्त्रप्रसिद्धमेवोच्यते सूत्रकृता ।

तत्राष्टाशीतिशतमीषा ॥ २ ॥

2. The pole is one hundred and eighty-eight aṅgulis long.

ईषा नाम रथे प्रागपरायतः काष्ठविशेषः तेनात्रेषाशब्देन वेदेः पूर्वापरायामो लक्ष्यते । तदष्टाशीत्यधिकशताङ्गुलमितं भवति । चतुरङ्गुलोनाष्टारत्निमितमित्यर्थः ।

चतुः शतमक्षः ॥ ३ ॥

3. The axle is one hundred and four aṅgulis long.

अक्षो नाम पश्चात्तिर्यग्रथाङ्गं काष्ठम् । तेनात्र वेदिश्रोण्यायामो लक्ष्यते । स चतुरधिकशताङ्गुलमितो भवति । अरत्निचतुष्टयं सच्यंशमित्यर्थः ।

षडशीतिर्युगम् ॥ ४ ॥

4. The yoke eighty-six.

युगं नाम वाहस्कन्धोपरि दीयमानं काष्ठं रथाङ्गम् । तदत्र पुरस्तात्तिर्यगायाममंसं वेदेर्लक्षयति । षडशीत्यङ्गुलः प्राक्तिर्यगायामो दशाङ्गुलोनचतुररत्निमित इत्यर्थः ।

चत्वारो ऽष्टकाः शम्या ॥ ५ ॥

5. Thirty-two aṅgulis is the śamyá (according to whose dimensions the chátvála is to be measured out).

शम्या नाम युगविवरप्रवेश्यं काष्ठं रथाङ्गम्। तदिह चात्वालमानकृत्काष्ठं लक्षयति। शम्येव शम्येति। सा चतुर्भिरष्टाङ्गुलैः कार्या द्वात्रिंशदङ्गुलेत्यर्थः। अत्र चतुररत्निः श्रोणिः। षट्प्राची। त्र्यरत्नी अंसौ। तथा सप्त प्राचीत्यादिपक्षान्तराण्यपि कल्पसूत्रे दर्शितानि आपस्तम्बेन चोक्तानि। तानि रथप्रमाणस्यैवानियमेन पक्षान्तराणि ज्ञेयानि। अत एव च रामायणादौ बहुधा रथमानानि दर्शितानि। अत्र तु परिशिष्टकृतैकं पक्षमालम्ब्यैतत्प्रमाणमुक्तम्। तत्त्वतस्तु अनियम एव। अत एव चापस्तम्बः। पद युगे ऽरत्नाविषयति शम्यायाश्च मानार्थेषु यथाकामी शब्दार्थस्य विषयित्वादित्यसूत्रयत्।

पैतृक्यां द्विपुरुषं चतुरस्रं कृत्वा करणीमध्येषु शङ्कवः स समाधिः ॥ ६ ॥

6. For the paiṭrikí (i. e. the vedi, to be used at the piṭrimedha-sacrifice) a square whose area amounts to two square purushas is to be constructed and poles are to be fixed at the middle points of the sides; this is the mode of construction. (The four poles mark the corners of the vedi whose sides are marked by cords connecting the poles).

पितृमेधे दिक्स्रक्तिं पुरुषमात्रं मिमीतइत्युक्तं श्रुतौ सूत्रे च। अत्र यन्ये तु विदिक्स्रक्तिः समचतुरस्रप्रकार एवोक्तः। अतो दिक्स्रक्तिताकरणार्थमयमारम्भः। समचतुरस्रस्याक्ष्णया रज्जुर्द्विकरणीति वक्ष्यति। तया पुरुषमात्रसमचतुरस्रस्याक्ष्णयारज्ज्वा करण्या द्विपुरुषक्षेत्रकं समचतुरस्रं कृत्वा तस्य पार्श्वमानीद्वयतिर्यङ्मानीद्वयरूपाणां दिक्चतुष्टयगतानां चतसृणां करणीनां मध्येषु शङ्कुचतुष्टयं दद्यात्। सूत्रचतुष्टयञ्च पातयेत्तद्विग्गतकोणं पुरुषमात्रं समचतुरस्रं भवति स समाधिरिति क्षेत्रपरिच्छेद इत्यर्थः। कथं दिक्स्रक्तिता स्यादित्याक्षेपे ह्येवं समाधानं भवति। एवमन्यत्रापि समाधिशब्दार्थः।

करणी तत्करणी तिर्यङ्मानी पार्श्वमान्यक्ष्णया चेति रज्जवः ॥ ७ ॥

7. The terms "karaṇí" (the making one, the producing one i. e. the cord measuring the side of a square); tat-karaṇí (the one which produces so much, viz. a square of the double', threefold, etc. area); tiryaṅmáni (that which measures transversally i. e. the transverse eastern and western sides of areas); párśvamáni (that which measures the sides i. e. those sides of areas which are parallel to the práchí); and akshṇayá (the diagonal) must be understood to denote cords (measuring the sides of areas).

एताः पञ्च रज्जुविशेषाणां संज्ञा व्यवहारार्थाः क्रियन्ते ऽन्वर्थाश्चैताः । करणीति । क्रियते ऽनया करणाधिकरणयोश्चेति ल्युट् । या समचतुरस्रे प्राचीमध्यरेखामिता रज्जुः सा प्रमाणरज्जुः करणी नाम । तत्क्रियते ऽनया सा तत्करणी । तदिति क्षेत्रद्विगुणत्रिगुणादि सामान्येनोच्यते । ततश्च द्वे क्षेत्रे समस्यैकत्र करोति सा द्विकरणी । एवं त्रिकरणीचतुष्करण्यादयः । लाघविकेन तु सूत्रकृता तत्करणीत्येव द्विकरण्यादिसंज्ञाः संक्षिप्य दर्शिताः । तिर्यङ्मानं श्रोण्यंसरूपं मीयते यया सा तिर्यङ्मानी । प्राच्यन्तयोस्तिर्यङ्निविष्टं रज्जुद्वयम् । पार्श्वे मीयते ऽनया पार्श्वमानी । चतुरस्रपार्श्वद्वयमापिके प्रागायते रज्जू उच्येते । अक्षिवच्चयति क्षेत्रमक्ष्णया । अक्षिशब्दस्य टिलोपो नयतेर्णत्वमार्षम् । चतुरस्रे कोणात्प्रतिकोणं नीता हि मध्यरज्जुस्तच्चतुरस्रमक्षिद्वयरूपतां नयति । तथा त्र्यश्रिण्यपि तिर्यङ्मानीपार्श्वमान्यन्तो नीताक्ष्णया भवति । एतासां संज्ञानां व्यवहारश्च बहुतरं तत्रतत्र द्रष्टव्यः । ननु शास्त्रादौ किं नैताः संज्ञाः कृताः । व्यवहारश्चाक्ष्णया तिर्यङ्मानीशेष इति संज्ञाकरणात् पूर्वं कृतो दृश्यते । सत्यं । सकृत्स व्यवहारो ऽतीतः । अग्रे त्वेतासां संज्ञानां भूयान् व्यवहार इति तत्सन्निधौ संज्ञाः कृताः । यथोक्तत्र व्यवहारेषु ता बुद्धौ विपरिवर्तेरन् ।

पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याक्ष्णयारज्जुर्दशकरणी ॥ ८ ॥

8. A transverse side of one pada; a side of three padas; the diagonal of such (an oblong) is the side of a square whose area contains ten square padas.

दशपदोत्तरवेदिर्भवतीत्येवम् । पादप्रमाणा रज्जुस्तिर्यग्दक्षिणोत्तरत्वेन प्रसार्य तदेकतरान्ता त्रिपादप्रमाणा रज्जुः प्रागायता पार्श्वतः प्रसार्य तिर्यग्रज्जोरपरान्तात्पार्श्वरज्जोरग्रं नीता कर्णरूपाक्ष्णयारज्जुर्यस्य क्षेत्रस्य करणी क्रियते तत् क्षेत्रं दशपदमितं क्षेत्रफलकं भवति । सोमे हि दशपदोत्तरवेदिर्भवतीत्युक्तं तदर्थमेतदभिहितम् । तस्येति क्षेत्रापेक्षयोक्तम् । तेन पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी यस्येत्यध्याहारः । यत्तदोर्नित्यसम्बन्धात् । एवमन्यत्रापि । अत्र च शाखान्तरश्रुतिर्मूलम् । शतपथे हि सर्वत इत्युपक्रम्य यजमानस्य वा दश दशपदानीति श्रूयते । तेन शतपदक्षेत्रफलेव प्रतीयते । कात्यायनश्च वरुणप्रघासे शम्यामात्रीं वितृतीयायामपरिमितां युगमात्रीं यजमानदशपदां वा सोमे वोत्तरे व्यपस्फुरणश्रुतेरसंभवाच्चेति सूत्रयन्नवरतस्त्र्यरत्निप्राचीकायां वरुणप्रघासवेदौ दशपदकरणीकक्षेत्रफलाया वेदेः सिद्धवदसम्भवं हेतूकुर्वन्दशपदकरणीकामेवेच्छति । दशपदक्षेत्रफलायाश्च संभवाभावात् । दशपदकरणीकाया एव हि त्र्यरत्निप्राचीकायां वेदावसम्भवः । एतेन शुल्बकृत् कात्यायनादन्यो भाति ।

द्विपदा तिर्यङ्मानी षट्पदा पार्श्वमानी तस्याक्ष्णयारज्जुश्चत्वारिंशत्करणी ॥ ९ ॥

9. A transverse side of two padas; a side of six padas; the diagonal of such (an oblong) is the side of a square of forty padas.

चत्वारिंशत्पदोत्तरवेदिर्भवतीत्येतत् । पदद्वयमाना तिर्यङ्मानी षट्पदमाना तु यस्य पार्श्वमानी तस्य क्षेत्रस्य याऽक्ष्णयारज्जुः सा करणीभूय यच्चतुरस्रं करोति तच्चत्वारिंशत्पदक्षेत्रफलं भवति । उत्तरवेदिं निवपति चत्वारिंशत्पदामिति चयने सूत्रितम् । तदर्थमिदमुक्तम्

उपदिष्टं युगप्रमाणꣳ शम्याप्रमाणं च दर्शनात् ॥ १० ॥

10. The measure of the yoke (yuga) and the śamyá have (already) been taught as it is seen (that the holy text mentions uttara-vedis having these measures; whereby a statement of their nature becomes needful.)

चयने युगमात्रीं वेत्युत्तरवेदिर्दृश्यते तथा सोमे शम्यामात्रीमिति तु वरुणप्रघासे उत्तरवेदिरुपदिष्टा दृश्यते। तस्माद्दर्शनाद्धेतोस्तत्सिद्ध्यै युगप्रमाणं शम्याप्रमाणं चोपदिष्टं "षडशीतिर्युगं" "चत्वारो ऽष्टकाः शम्ये"ति । उत्तरवेदिप्रसङ्गादेतत्सूत्रकृता स्मारितम् । अग्नौ चत्वारिंशत्पदोत्तरवेदिर्मन्त्रोपदिष्टा युगमात्री तु कुत्रोपदेक्ष्यत इति शिष्यबुद्ध्याकाङ्क्षा भवति तदर्थमिदमुच्यते युगमानोपदेशेन युगमितोत्तरवेदिरुपदिष्टा ज्ञेया तथा शम्यामात्रीत्यर्थः ।

दीर्घचतुरश्रस्याक्ष्णयारज्जुस्तिर्यङ्मानी पार्श्वमानी च यत्पृथग्भूते कुरुतस्तदुभयं करोतीति क्षेत्रज्ञानम् ॥ ११ ॥

11. The diagonal cord of an oblong produces by itself both (squares) which the transverse side and the side produce if taken separately; this is the knowledge (requisite) for (the measurement of) areas.

दीर्घचतुरस्रे क्षेत्रे या तिर्यङ्मानी सान्यत्र करणीभूता यावत्समचतुरस्रं करोति तथा तस्मिन्दीर्घचतुरस्रे या पार्श्वमानी सान्यत्र करणीभूता यावत्समचतुरस्रं करोति तत्समचतुरस्रद्वयमेकीकृतं तस्यैव दीर्घचतुरस्रस्य याक्ष्णयारज्जुः सान्यत्र करणीभूता समचतुरस्रं करोति । यथा पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याक्ष्णयारज्जुर्दशकरणीति दीर्घचतुरस्रमुक्तम् । तत्र पदमात्री तिर्यङ्मानी करणी सती पदमात्रं क्षेत्रं समचतुरस्री करोति। त्रिपदा च पार्श्वमानी करणी सती नवपदक्षेत्रफलं समचतुरस्री करोति । त्रिप्रमाणा नवकरणीति वक्ष्यमाणत्वात् । तयोरक्ष्णयारज्जुः

करणी सती नवपदफलं पदमात्रस्य क्षेत्रद्वयमपि संक्षिप्य दशपदं समचतुरस्रं करोतीति युक्तमुक्तम् । कर्णस्य तिर्यङ्मानीपार्श्वमानीवर्गद्वयैक्यमूलत्वात् । तथा द्विपदा तिर्यङ्मानी षट्पदा पार्श्वमानी तस्यास्त्वक्ष्णयारज्जुश्चत्वारिंशत्करणीति दीर्घचतुरस्रं दर्शितम् । तत्र द्विपदा तिर्यङ्मानी करणी सती चतुष्पदफलं समचतुरस्रं करोति । द्विःप्रमाणा चतुष्करणीति वक्ष्यमाणत्वात् । षट्पदा च पार्श्वमानी करणी सती षट्त्रिंशत्पदफलं समचतुरस्रं करोति । यावत्प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान्समस्येदिति वक्ष्यमाणत्वात् । तयोरक्ष्णयारज्जुश्चतुष्पदफलं षट्त्रिंशत्पदफलस्य क्षेत्रद्वयमेकीकृत्य करणी सती संक्षिपति । चत्वारिंशत्पदफलं समचतुरस्रं करोतीति युक्तमुक्तम् । तथा प्रमाणं तिर्यग्द्विकरण्यायामस्तस्याक्ष्णयारज्जुस्त्रिकरणीति दीर्घचतुरस्रान्तरं वक्ष्यति । तत्रापि प्रमाणं करणी भवदेकं क्षेत्रं समचतुरस्रीकरोति । द्विकरणी तु द्वे । तयोरक्ष्णया तदुभयं क्षेत्रं करणी सती संक्षिपतीत्यपि युक्तम् । नन्वेतेषां त्र्यश्रीणामेव तिर्यङ्मानीपार्श्वमान्यक्ष्णयोदाहृता न दीर्घचतुरस्राणामिति चेत् । मैवम् । तानि त्र्यश्रीण्येव द्वैगुण्येन दीर्घचतुरस्राणि तावत्तावत्तिर्यङ्मानीपार्श्वमान्यक्ष्णयानि भवन्ति इति साम्यात्त्र्यश्रीण्यपि चतुरस्रत्वेनोदाहृतानीत्यदोषः । एतत्क्षेत्रज्ञानार्थमुपदिष्टम् । तेनैतस्यैव सूत्रस्य प्रपञ्चो दशकरणीचत्वारिंशत्करणीत्रिकरण्यादिसूत्राणीत्यर्थः । एवमनुक्तक्षेत्राणामपि वृद्धिर्ज्ञेया । अत एवास्माभिः शुल्बवार्तिके उक्तम् ।

एकोनेष्टस्य करणी पार्श्वे तिर्यगथैककम् ।
तत्कर्णो इष्टकरणीत्येवं सर्वत्र दृश्यतामिति ॥

यथा इष्टा पञ्चकरणी । तत्रैकोनेष्टकरणी चतुष्करणी द्विःप्रमाणा पार्श्वमानी । एककरणी तिर्यङ्मानी । तयोरक्ष्णया पञ्चकरणी भवतीत्यादि ज्ञेयम् । अन्यदपि वार्तिके उक्तम् ।

यावती करणीष्टा सा सङ्ख्या भेद्या द्विधेच्छया ।
तिर्यक्पार्श्वे तत्करण्यावक्ष्णयेष्टकरण्यपि

इति ।'यथा चत्वारिंशत्करणीष्टा। सा चत्वारिंशत्सङ्ख्येच्छया द्विधा भक्ता षट्त्रिंशच्चत्वारि चेति। तत्र षट्त्रिंशत्करणी षण्मात्रा पार्श्वमानी चतुष्करणी तु द्विमात्रा तिर्यङ्मानी । तदक्ष्णया चत्वारिंशत्करणी-त्यादि ।

समचतुरश्रस्याक्ष्णया रज्जुर्द्विकरणी ॥ १२ ॥

12. The diagonal cord of a square produces the double (of the square produced by the side).

समचतुरश्रस्य क्षेत्रस्य याक्ष्णया कर्णरज्जुः । सा करणी सती तावत्समचतुरश्रं द्विगुणं करोति । समग्रहणं दीर्घचतुरश्रव्युदासार्थम् । करणीवर्गो हि क्षेत्रफलम् । तिर्यङ्मानीपार्श्वमान्योर्यो वर्गौ तदैक्यमूलं चाक्ष्णया । समचतुरश्रे च तिर्यङ्मानीपार्श्वमान्यो करणीतुल्ये एव । आश्वमेधिकचयने आद्यो ऽग्निर्द्विगुण इत्युक्तम् । तत्र द्विस्तावायामेस्या उपयोगो वक्ष्यमाणत्रिकरण्याश्च । क्षेत्रज्ञापने च ।

करणीं तृतीयेन वर्धयेत्तच्च स्वचतुर्थेना-

त्मचतुस्त्रिंशोनेन सविशेष इति विशेषः ॥ १३ ॥

13. Increase the cord=side of a square by its third, the third again by its fourth part less its (the fourth part's) thirty-fourth part; this is the difference (of karaṇí and dvi-karaṇí); thus the term "viśesha" is explained (see the comm. for a different explanation of the last words).

द्विकरणीप्रमाणम् । या पूर्वं समचतुरश्रस्याक्ष्णया द्विकरणी उक्ता सा कियती भवतीति स्वरूपज्ञानार्थमिदं सूत्रम् । द्विगुणीकर्तु-मिष्टस्य समचतुरश्रस्य करणीं स्वतृतीयांशेन वर्धयेत् । तृतीयांशं स्वचा तुर्यांशेन वर्धयेत्कीदृशेन स्वकीयचतुस्त्रिंशांशहीनेन । यथा द्वादशाङ्गुल-करणीकं समचतुरश्रं द्विगुणीकर्तुमिष्यते । तस्य करणी तृतीयांशेन वर्द्धित-षोडशाङ्गुला भवति । स च तृतीयों ऽशश्चतुरङ्गुलात्मकः स्वकीयतुरीयां-शेनाङ्गुलेन स्वचतुस्त्रिंशभागोनेन वर्धनीयः । अत्राङ्गुलस्योदरदेशमिताश्च-

Digitized by Google

र्तुस्त्रिंशत्तिला अवयवाः कथ्यन्ते । तत्र तिलोनसप्तदशाङ्गुला द्विकरणी भवति । अत्रात्मचतुस्त्रिंशेन भागेन स्वत्रयस्त्रिंशांशाधिकेनेति चतुस्त्रिंशो भागो विशेषणीयः । तदा सूक्ष्मतरमायातीति वार्तिके दर्शितमस्माभिः । सूत्रकृता स्वल्पान्तरत्वाच्छिष्यबुद्धिक्लेशो मा भूदित्ययमंश उपेक्षितः । ततश्च षोडशाङ्गुलानि द्वात्रिंशत्तिलास्त्रयस्त्रिंशांशोनश्चापरस्तिल इति सूक्ष्मद्विकरणीस्वरूपम् । करणीतो वर्द्धितो ऽंशो यः स करणीद्विकरण्योः विशेषो भेदको भवतीति विशेषो भेदो ऽस्यामस्यां करणीतः । अथवा इति विशेषः । अस्य भेदकस्य विशेषव्याख्या ज्ञेया । अत एवापस्तम्बस्तद्विशेषमभ्यस्यलक्षणं कृत्वाद्धं मा गमयेदिति व्यवजहार । इदं द्विकरण्यां प्रमाणं स्वरूपत उक्तम् ।

(शेषमग्रे)

प्रथमः परिच्छेदः ।

(Continued from page 352.)

घटादेर्विषयस्य प्रत्यक्षत्वन्तु प्रमात्रभिन्नत्वम् ।

But the condition of a jar or like object as immediately perceived, consists in its non-difference from the Pramâtṛi.

ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः अहमिदं पश्यामीति भेदानुभवविरोधादिति चेत् । उच्यते । प्रमात्रभेदो नाम न तावदैक्यं किन्तु

A doubt is started: how can there be non-difference of a jar, and the like, from the intelligence which is particularised by the internal organ, since the consciousness of a difference, expressed in "I see this," is contradictory (of this abhhinnatva)? To such an objection we reply:—non-difference from the Pramâtṛi does not indeed mean identity (with it), but the not having an existence

प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः । तथाहि घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता अधिष्ठानसत्तातिरिक्तारोपितसत्ताया अनङ्गीकारात् । विषयचैतन्यञ्च पूर्व्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धम् घटादेरपरोक्षत्वम् ।

अनुमित्यादिस्थलेऽन्तःकरणस्य

वह्न्यादिदेशनिर्गमनाभावेन वह्न्यव-

distinct from the existence of the Pramátṛi. To explain: since a jar or like object is erroneously surmised* in the intelligence which is particularised by it (the jar), the existence of the jar is indeed the existence of the vishaya-intelligence, (the intelligence particularised by the vishaya); for we do not admit that the existence of an illusorily surmised object is distinct from the existence of its substrate. And the vishaya-intelligence (becomes one with) the intelligence (underlying) the Pramátṛi in the manner already described. Therefore, since the Pramátṛi-intelligence is also the substrate of the jar, the existence of the jar is not different from the existence of the Pramátṛi: thus pratyaksha of a jar or like object is established.

But in the case of inference and the rest (viz. upamána, &c.), the existence of the fire or other inferred object is distinct from the existence of the Pramátṛi, because the intelligence, which

---

* Two questions were asked regarding immediate cognition:—first, how is pratyaksha of an object arrived at, and second, what is the condition of an object immediately cognised? To the first, the question of process, the answer is that the vṛitti of the antahkaraṇa, in the form of the object, becomes non-distinct from the object. And the text declares, in answer to the second, that an immediately perceived object consists in the object not having an existence distinct from the existence of the Pramátṛi.

अध्यास, erroneous surmisal is defined thus:—तदभाववति तत्प्रकारकं ज्ञानम् and the usual drishṭánta is रजतत्वाभाववत्यां शुक्तौ रजतत्वप्रकारकं ज्ञानम्. Chaitanya of course is the substrate, in which all else is surmised.

च्छिन्नचैतन्यस्य प्रमातृचैतन्यभेदात्मकतया वह्न्यादिसत्ता प्रमातृसत्तातो भिन्नेति नातिव्याप्तिः ।

नन्वेवमपि धर्म्माधर्म्मादिगोचरानुमित्यादिस्थले धर्म्माधर्म्मयोः प्रत्यक्षत्वापत्तिः । धर्म्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्म्मादिसत्तायाः प्रमातृसत्तानतिरेकादिति चेन्न योग्यत्वस्यापि विषयविशेषणत्वात् ।

नन्वेवमपि रूपी घट इति प्रत्यक्षस्थले घटगतपरिमाणादेः प्रत्यक्षत्वापत्तिः रूपाद्यवच्छिन्नचैतन्यस्य परिमाणाद्यवच्छिन्नचैतन्यस्य च एकतया

is particularised by the fire, is distinct from the intelligence (underlying) the Pramátṛi, for there is no motion outwards of the antahkaraṇa in the direction of the fire or other object inferred. Thus (the fault of) ultra-pervasiveness is not to be found (in our definition of pratyaksha).

Another doubt:—granting the preceding, an immediate cognition of dharma and adharma will result, in the case of an inference which deals with dharma and the like. For, since the intelligence particularised by dharma and the rest is not distinct from the intelligence particularised by the Pramátṛi, there is no difference between the existence of dharma and the rest and the existence of the Pramátṛi. To such an objection we say No: for the additional limitation of appositeness must be made with regard to the vishaya (in pratyaksha).

Again an objection in the form of a doubt: granting the above, an immediate cognition of weight and the rest belonging to a jar will result, in the case of an immediate cognition expressed by "this jar has colour." For, since the intelligence particularised by colour, &c., and the intelligence particularised by the weight, &c., are identical,* and

* The colour, weight and other qualities of a jar are not to be regarded as distinct from the jar, in accordance with the Vedantic maxim धर्मधर्मिणोरभेदः. But it is not necessary, as the text shows, that when there is a vṛitti in the form of one attribute, the others also should be perceived.

रूपाद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदेन परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया परिमाणसत्तायाः प्रमातृसत्तातिरिक्तत्वाभावादिति चेन्न तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात् । रूपाकारवृत्तिदशायां परिमाणाकारवृत्त्यभावेन परिमाणाकारवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात् ।

नन्वेवं वृत्तावव्याप्तिः । अनवस्थाभिया वृत्तिगोचरवृत्त्यनङ्गीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेन्न ।

the intelligence underlying the Pramátṛi is not distinct from the intelligence particularised by colour, &c., the intelligence also which is particularised by weight, &c., (must be) identical with that of the Pramátṛi, (and therefore) the existence of the weight is not different from the existence of the Pramátṛi. We refuse this objection, because an additional limitation must be made as regards the Pramátṛi, viz., that it be conditioned by (associated with) the vṛitti in the form of whatever object (is immediately cognised). Since there is no vṛitti in the form of weight so long as there is a vṛitti in the form of colour, the intelligence (belonging to) the Pramátṛi, which is associated with the vṛitti in the form of weight, has no existence identical (with the existence of the intelligence of the Pramatṛi associated with the vṛitti in the form of colour), (and therefore) there is no fault of ultra-pervasiveness (in our definition).

Another doubt: concede the above limitation (evam), (and still the definition will be) non-pervasive with regard to the vṛitti. For, through fear of an infinite regress, a (second) vṛitti of the (primary) vṛitti cannot be admitted; in this case, the definition above mentioned, which is joined (with the limitation that the Pramátṛi) should be conditioned (by being associated with) the vṛitti that has taken the form of its own object (sva), does not apply. To such an objection, we say no. For, though

अनवस्थाभिया वृत्तेर्वृत्त्यन्तराविषयत्वेऽपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्य तत्रापि सम्भवात् ।

through fear of an infinite regress, it is not admitted that the vṛitti is cognised by a (second) vṛitti, (yet), since we maintain that (the vṛitti becomes) its own object,* (the definition) "to have an existence not distinct from that of the intelligence (underlying) the Pramátṛi, which is conditioned by the vṛitti (that has itself for) its own object." applies in this case also (i. e., to the vṛitti which is the vishaya in this case).

एवञ्चान्तःकरणतद्धर्म्मादीनां केवलसाक्षिविषयत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रापि सत्त्वान्नाव्याप्तिः ।

Thus, although the antahkaraṇa and its attributes are objects of perception to the Sákshí alone, the preceding definition applies, in that we maintain (that the Pramátṛi must be associated with) a vṛitti in the from of the antahkaraṇa or its attributes (tattad), and therefore there is no fault of non-pervasiveness (in the definition).

न चान्तःकरणतद्धर्म्मादीनां वृत्ति-

And it must not be maintained that, in admitting the antahkaraṇa and its attributes

* To recapitulate:—the text demands as necessary for pratyaksha that (*a*) the antahkaraṇa should be modified in the form of the object, the technical term vṛitti being given to such modification; and (β) that the Pramátṛi should be conditioned by or associated with the vṛitti that has taken the form of the object. An objector urges that this vṛitti will require, according to (β), a second vṛitti with which the Pramátṛi must be associated in order that the first vṛitti may be cognised; the second vṛitti will demand a third and so on. But this infinite regress of vṛittis is inadmissible and therefore the definition in the text is faulty. Our author replies that the first vṛitti becomes its own object (वृत्तेः स्वविषयत्वाभ्युपगमेन) and that a second is therefore unnecessary. And the वृत्तेः स्वविषयत्वम् only means that the vṛitti is cognised without a second vṛitti.

विषयत्वाभ्युपगमे केवलसाक्षिविषयत्वाभ्युपगमविरोध इति वाच्यम् नहि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किन्तु इन्द्रियानुमानादिप्रमाणमन्तरेण साक्षिविषयत्वम् । अतएवाहङ्कारटीकायामाचार्यैरहमाकारान्तःकरणवृत्तिरङ्गीकृता । अतएव प्रातिभासिकरजतस्थले रजताकारा अविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता ।

तथा चान्तःकरणतद्धर्म्मादिषु केवलसाक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य सत्त्वान्नाव्याप्तिः ।

तदयं निर्गलितार्थः । स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम् ।

तत्र संयोगसंयुक्ततादात्म्यादीनां

to be objects of immediate cognition by means of a vṛitti, there is a contradiction in holding that these are objects of immediate cognition to the Sákshí only. For to be cognisable by the Sákshí alone does not mean being an object of cognition to the Sákshí without (the aid of) a vṛitti, but that the object is cognised by the Sákshí without (the aid of) an organ of sense or a process of inference or like pramáṇa. And for this reason, in the Ahamkáraṭíká, teachers admit a vṛitti of the antahkaraṇa, in the form of the aham. And so too the Sámpradáyikas admit a vṛitti of avidyá, in the form of silver, in the case (of perception) of apparent silver (in nacre).

Thus then, since the preceding definition (which provided that the Pramátṛi should be) associated with the vṛitti, applies to the antahkaraṇa and it attributes, which are cognisable by the Sákshí only, there is no fault of non-pervasiveness.

This is the result obtained from this: the condition of an object immediately perceived consists in (the object) being apposite and having no existence distinct from the existence of the chaitanya underlying the Pramátṛi, which is associated with the vṛitti in the form of the object (sva).

In Pratyaksha (tatra) there is an application of the intercourses,* named sanyoga, san-

* The Saunikarshas are six according to the Vedánta :—

सन्निकर्षाणां चैतन्याभिव्यञ्जकवृत्तिजनने विनियोगः ।

yuktatádátmya and the rest, to produce a vṛitti which makes manifest the intelligence (underlying the object).

सा च वृत्तिश्चतुर्व्विधा संशयो निश्चयो गर्व्वः स्मरणमिति । एवं वृत्तिभेदेन एकमप्यन्तःकरणं मन इति बुद्धिरित्यहङ्कार इति चित्तमिति चाख्यायते। तदुक्तम् । मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् । संशयो निश्चयो गर्व्वः स्मरणं विषया इमे ॥

And this vṛitti is of four kinds :—doubt, certainty, self-assertion and recollection. And by this division of vṛitti, the antahkaraṇa, although one, receives the names, manas, buddhi, ahamkára and chitta. This has been declared :—Manas, buddhi, ahamkára and chitta are internal instruments : doubt, certainty, self-assertion and recollection :—these are gained (by these instruments).

तच्च प्रत्यक्षं द्विविधं सविकल्पकनिर्व्विकल्पकभेदात् । तत्र सवि-

And Pratyaksha is of two kinds: salvikalpaka and nirvikalpaka.*

(i.) संयोग or conjunction of object and sense-organ; इन्द्रियार्थसन्निकर्षः

(ii.) संयुक्ततादात्म्य, here संयुक्त is ghaṭa, for instance, which is in contact with a sense-organ, and तादात्म्य is the identity of ghaṭatva with ghaṭa. For the Vedánta does not admit a difference between the attribute and its substrate :—धर्मधर्म्मिणोरभेदवशात्.

(iii.) संयुक्ताभिन्नतादात्म्य, here संयुक्त is ghaṭa, as before, the अभिन्न is the colour of the ghaṭa, ghaṭarúpa, and तादात्म्य is the identity of rúpatva with rúpa, according to the principle laid down in (ii).

(iv.) तादात्म्य. In the case of perception of sound, for example, (śabdapratyakshe), śabda being the attribute of ákáśa is not distinct from it.

(v.) तादात्म्यावदभिन्न, taking the instance in iv, तादात्म्य is the identity of sound with ákáśa, and तद्वदभिन्न is śabdatva.

(vi.) विशेष्यविशेषणभाव, taking the case of घटाभाववत् भूतलम्, here bhútala is the विशेष्य or thing qualified or determined, and the ghaṭábhava, or absence of the jar from that spot of ground, is the विशेषण or attribute qualifying that bhútala. The ghaṭábháva is in the Vedánta cognised by means of the special pramáṇa, anupalabdhi.

* सविकल्पकं ज्ञानम् is a judgment declaring the relation between determined and determinant. In ghaṭo 'yam, for instance, ghaṭatva is

Digitized by Google

कल्पकं वैशिष्ट्यावगाहि ज्ञानं यथा घटमहं जानामीत्यादि ज्ञानम् निर्विकल्पकन्तु संसर्गानवगाहि ज्ञानम् । यथा सोऽयं देवदत्तः तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानम् ।

ननु शाब्दमिदं ज्ञानं न प्रत्यक्षम् इन्द्रियाजन्यत्वादिति चेन्न नहि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं दूषितत्वात् किन्तु योग्यवर्त्तमानविषय-

Savikalpaka knowledge is that which enters into (implies) a state of being determined, as in the instance :—" I perceive jar.", Nirvikalpaka knowledge is that which does not enter into any such relation, as in the example "this is that Devadatta," and the knowledge effected by such sentences as "that thou art."

An objection in the form of a doubt :—This knowlege obtained through verbal communication (śábdam) cannot be immediate cognition, for it is not effected by a sense-organ. To this we reply, not so. For, it is not an essential principle in Pratyaksha that it should be effected through a sense-organ, because (the principle) would be rendered void, (as already

---

the viśeshaṇa or determining attribute predicated of ghaṭa the viśeshya or thing determined. The relation betweeen these two is called vaiśishṭya :—घटघटत्वयोर्वैशिष्ट्यम्. Other synonyms of viśeshaṇa are prakára and vikalpa.

But in nirvikalpaka cognition, all determining attributes are left out of view. To take the cases in the text, the Devadatta of past time does not determine the Devadatta of present time; the contradictory ideas of present and past time being disregarded. And so with the text "tat tvamasi" explained at length in the Vedántasára.

These judgments are affirmative in form only : there is no real vaiśishṭya, for in these cases the subject and predicate are identical.

In the Nyáya, nirvikalpaka jñána is not pratyaksha; we are not conscious of it: ज्ञानं यन्निर्विकल्पकाख्यं तदतीन्द्रियमिष्यते. Bháshá-parichchheda, Śloka 57. But analysis renders it necessary to postulate this nirvikalpaka cognition as preceding the savikalpaka jñána or pratyaksha, as in ghaṭam aham jánámi: *vide* Siddhántamuktávalí *in loco* and Professor Cowell's note in Kusumañjali.

Digitized by Google

त्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम् ।

तथा च सोऽयं देवदत्त इतिवाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निःसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्तावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभिन्नतया सोऽयं देवदत्त इतिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वम्। एवं तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्यापि। तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात् ।

ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्व्विकल्पकत्वम् । उच्यते । वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम् अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयतापत्तेः किन्तु तात्पर्य्य-

shown). But the essential principle has been declared to consist in the identity of the vishaya-intelligence with the pramáṇa-intelligence, while the object (perceived) is apposite (and delivered) in present time.

And accordingly, the knowlege expressed in the sentence. "This is that Devadatta" is immediate cognition, because the object perceived is in contact (with the antahkaraṇa), in that the vṛitti of the antahkaraṇa has gone out from the body towards the object, (and therefore) the intelligence particularised by this vṛitti is identical with the intelligence particularised by Devadatta. And the same holds good of the knowledge effected by such sentences as " that art thou" and the like. For, in this case, since the Pramátṛi alone is the object (of the immediate cognition), there is no difference between these two (intelligences, i. e. intelligence of vṛitti in the form of Pramátṛi and intelligence of Pramátṛi itself).

Another doubt:—How can the knowledge effected by a sentence be nirvikalpaka, for it implies a relation between the meanings of the words (of the sentence)? We reply that, as regards being the object of knowledge effected by a sentence, the relation between the meanings of the words is not the essential principle, for (if this were so) a relation that was not intended might become the object of a cognition effected by a sentence;

Digitized by Google

विषयत्वम् । प्रकृते च सदेव सोम्येदमग्र आसीत् इत्युपक्रम्य तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्युपसंहारेण विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्य्यमवसितमिति कथं तात्पर्य्याविषयं संसर्गमवबोधयेत् ।

इदमेव तत्त्वमसीत्यादिवाक्यानामखण्डार्थत्वं यत्संसर्गानवगाहि यथार्थज्ञानजनकत्वमिति । तदुक्तम् । संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् । उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता । प्रातिपदिकार्थमात्रपरत्वं वा अखण्डार्थत्वमिति चतुर्थपादार्थः ।

तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षीश्वरसाक्षी चेति । तत्र जीवो नाम अन्तःकरणावच्छिन्नं चैतन्यं तत्साक्षी तु अन्तःकरणोपहितं चैतन्यम् । अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः । विशेषण-

but (the essential principle is) that the object should be the meaning intended. And so, to take the point in hand, the meaning of the Upanishads, beginning with the text Sadeva saumya, &c." down to " tattvam asi, &c." is laid down, as applying to the pure (unconditioned) Brahma. How then could (such texts) make known a relation which was not intended as their meaning?

That the passages " tat tvam asi" and the like convey the simple notion means only that they convey the correct notion quite free from all relations. This is declared :—"that which is the cause of the simplicity of the notion conveyed by such passages is either its freedom from all relations or its being the express meaning of the words."

Or the express meaning is the meaning without implying any relation :—such is the sense of the fourth páda of the above verse.

And Pratyaksha is again of two kinds according as the Jíva-sákshí is cogniser or I'svara-sákshí. The Jíva is the intelligence which is particularised by the antahkaraṇa, but the Jíva-sákshí is the intelligence which is conditioned by the antahkaraṇa. The difference between these two (Jíva and Jíva-sákshí) is caused by thinking of antahkaraṇa as an attribute or as a limiting condition. An attribute is inherent in a product. A limiting condition is not inherent in a product; it serves to distinguish what it conditions from everything else (vyá-

Digitized by Google

स्व कार्य्यान्वयि उपाधिश्च कार्य्यानन्वयी व्यावर्त्तको वर्त्तमानश्च रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणं कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः । अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते ।

प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम् अयञ्च जीवसाक्षी प्रत्यात्मं नाना एकत्वे तु चैत्रावगते मैत्रस्याप्यनुसन्धानप्रसङ्गः ।

ईश्वरसाक्षी तु मायोपहितं चैतन्यं तच्चैकं तदुपाधिभूतमायाया एकत्वात् इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रा-

varttaka) and must be known as present (varttamána). In the case of a jar, non-eternal (i. e. a product) and possessing colour, the colour is an attribute. In the case of the organ of hearing, which is ákáśa particularised by the outer fleshy portion of the ear, such outer portion is regarded as a limiting condition. This very upádhi is termed *paricháyaka* by the Naiyáyikas.

As regards our present point, the antahkaraṇa is a limiting condition of the intelligence which illuminates the object, because, being unsentient it cannot itself illuminate the object. And this Jíva-sákshí* is distributed to each individual, for if it were one only, Chaitra's knowledge would be remembered by Maitra also.

But Íśvara-sákshí, is intelligence conditioned by Máyá, and is one only because Máyá, which is his limiting condition, is one. In such texts as "Paramátmá takes various forms through Máyá," † the word "Máyábhis" is in the plural because by it are intended the several powers of Máyá and its sattva, rajas and tamas fetters. In the following texts the unity of

* Jíva is intelligence reflected in the antahkaraṇa, and the idea of Jíva is invariably combined with that of antahkaraṇa. The outer world is cognised by Jíva. Jíva-sákshí, Sákshí, Pratyagátmá, the persistent consciousness, is the same intelligence conceived as underlying the antahkaraṇa and conditioned by it. The inner world, (antahkaraṇa and its vṛitti), is cognised by Sákshí and not by Jíva, for the latter cannot be regarded apart from the internal organ.

† Ṛig-Veda 6. 47. 18.

Digitized by Google

यतया मायागतसत्त्वरजस्तमोरूप गुणाभिप्रायतया चोपपत्तिः । मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् । तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते । योगी मायाममेयाय तस्मै विद्यात्मने नमः । अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इत्यादिश्रुतिषु एकवचनेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते ।

ततश्च तदुपहितं चैतन्यमीश्वरसाक्षी तच्चानादि तदुपाधेर्मायाया अनादित्वात् । मायावच्छिन्नं चैतन्यञ्च परमेश्वरः मायाया विशेषणत्वे ईश्वरत्वं उपाधित्वे साक्षित्वं इतीश्वरत्वसाक्षित्वयोर्भेदः न तु धर्मिणोरीश्वरतत्साक्षिणोः ।

स च परमेश्वर एकोऽपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमो गुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते । (शेषमये) A. V.

Máyá is rendered certain by the use of (the word) in the singular number for the sake of simplicity:—"know for a certainty that Máyá is Nature (Prakṛiti), that Maheśvara is the associate of Máyá"* and "Hail to that absolute spirit, consisting in intelligence; which spirit having entered into his heart, the ascetic passes over (is forced) from Avidyá (that is) Máyá outspread,"† and "The one, unborn follows, in his service, the one unborn, consisting of one form, of red, white and black colour, producing manifold progeny. The other unborn (the liberated soul) spurns this (Máyá) whose, enjoyment he has tasted."‡

And thus the intelligence conditioned by Máyá, that is Íśvara-sákshí, is without beginning, because Máyá, his limiting condition, is without beginning. And intelligence particularised by Máyá is Parameśvara. When Máyá is viewed as a distinguishing attribute the notion of Íśvara is gained; when viewed as a limiting condition, the notion of Íśvara-sákshí. Therefore the distinction holds between the attributes Íśvaratva and Sákshitva and not of Íśvara and Íśvara-sákshí, as possessing these attribntes.

And this Parameśvara, though one only, denotes Brahmá, Vishṇu, Śiva and the rest, owing to the various sattva, rajas and tamas fetters which belong to Máyá, his limiting condition.

* Śvetáśvatara iv. 10. † Paráśarasmṛiti (?). ‡ Śvetáśvatara iv. 5.

॥ अथ ब्रह्मसूत्रतात्पर्यविवरणम् ॥

॥ तत्र चतुर्थाध्यायस्य तृतीयपादारम्भः ॥

ब्रह्मलोकमार्गश्छान्दोग्यबृहदारण्यकयोः पञ्चाग्निविद्यायामर्चिरादिकः पठ्यते "तेऽर्चिषमभिसंभवन्ति अर्चिषोऽह"रिति, विद्यान्तरे वाय्वादिः "स वायुमागच्छती"ति, पर्यङ्कविद्यायामग्निलोकादिकं "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छती"ति, तत्र भिन्नप्रकरणस्थत्वाद्बहुविधो मार्ग इति प्राप्ते आहार्चिरादिनेति ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥ ४१ ॥ १ ॥

सर्वस्य विदुषोऽर्चिरादिरेक एव मार्गः, कुतः, पञ्चाग्निविद्यावाक्यशेषे पञ्चाग्निविदो विद्यान्तरोपासकांश्चोद्दिश्यार्चिरादेरेव पठितत्वात्, "य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवन्ती"ति तस्यैव प्रथितेः, वाय्वादीनां मार्गगुणोपसंहारन्यायेन तस्यैवोपलक्षणत्वात् तत्रैवान्तर्भावनीयः, तस्मादेक एवार्चिरादिमार्गः॥ १ ॥ ४१ ॥ १ ॥

"तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षं तस्माद्यान् षडुदङ्ङेति मासांस्तेभ्यः संवत्सरं तस्मादादित्यं तस्माच्चन्द्रमसं तस्माद्विद्युतं तत् पुरुषोऽमानवः स एतान् ब्रह्म गमयती"ति श्रुतेर्मार्गे शाखान्तरश्रुतो वाय्वादिः कथमप्यन्तर्भावयितुं न शक्यते, तत्र वायोरश्रवणात् कल्पकाभावाच्च, इति प्राप्ते आह वायुमब्देति ।

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥ ४२ ॥ २ ॥

श्रुत्यन्तरमेवास्य कल्पकम्, तथाहि "स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खण्डेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छती"त्युपासको वायुमागत्य वायुमण्डलं सच्छिद्रं कृत्वा रथचक्रच्छिद्रपरिमितेन वायुच्छिद्रेण वायुमण्डलमुल्लङ्घ्यादित्यमण्डलं प्राप्नोतीत्यर्थः, एवं च वायोरादित्यात् पूर्वं प्रतीतेः क्रमोऽविरोधी अवगन्तुं शक्यते,

मासेभ्यः संवत्सरं तस्माद्वायुं तस्मादादित्यमिति,बृहदारण्यके मासोत्तरं संवत्सरमुक्त्वा तत्स्थाने देवलोकः पठितः, स च संवत्सरानन्तरं वायोः पूर्वं योज्यः, तस्मात् संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ निवेश्यौ, 'वायुलोक'मित्यविशेषोक्तस्य वायोर्विशेषेण स्पष्टतया 'स वायुमागच्छ-ती'ति विशेषेण च० मब्दादित्ययोरन्तराले वायुरित्येक एवार्चिरादि-मार्गः ॥ २ ॥ ४२ ॥ २ ॥

कौषीतकिनां "स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोक"-मिति श्रुतं तत्रापीममेव पूर्वपक्षमाशङ्क्याह तडितोऽधीति ।

तडितोऽधि वरुणः संबन्धात् ॥ ३ ॥ ४३ ॥ ३ ॥

'चन्द्रमसो विद्युत'मिति श्रुतविद्युतस्तडितोऽधि० उपरि वरुणलोको निवेश्यस्तत इन्द्रप्रजापतिलोकयोरागन्तूनामन्ते निवेश इति न्यायादित्य-विरोधः, विद्युत्पूर्वकवृष्टिगतजलस्य वरुणोऽधिपतिरिति विद्युद्वरुणयोः संबन्ध इत्यर्थः ॥ ३ ॥ ४३ ॥ ३ ॥

य एतेऽर्चिरादयः श्रुतास्ते किं मार्गचिह्नानि० उत भोगभूमय० उत नेतारोऽतिवाहकाः, तत्र चिह्नभूताः, यथा कश्चिदनुशिष्यते गच्छ त्वममुं गिरिं ततो न्यग्रोधं ततो नदीं ततो ग्राममितिवत्, यद्वा ब्रह्मलोकं गच्छतो विश्रामस्थानभोगभूमयोऽर्चिरादयः, लोकशब्दस्य भोगभूमौ प्रसिद्धेरिति प्राप्ते आहातिवाहिका इति ।

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥ ४४ ॥

"तत् पुरुषोऽमानवः स एतान् ब्रह्म गमयती"त्यन्ते श्रूयमाण-स्यामानवस्य नेतृत्वावगमात् तत्साहचर्येण तल्लिङ्गेनार्चिरादयोऽप्याति-वाहिकदेवता इत्यवगम्यते ॥ ४ ॥ ४४ ॥

तासामातिवाहिकत्वं युक्तिसिद्धमित्याहोभयेति ।

उभयव्यामोहात् तत्सिद्धेः ॥ ५ ॥ ४५ ॥

ये मार्गगा उपासकास्ते देहवियोगात् संपिण्डितकरणग्रामा इत्य-स्वतन्त्राः,अर्चिरादीनामप्यस्वातन्त्र्ये गन्तृगमयितृत्वं न संभवतीति चेतना

देवता अर्चिरादयो यात्रायां नियुक्ता इत्युच्यते, लोकेऽपि मत्तमूर्च्छिता-दयः संपिण्डितकरणाः परप्रयुक्तवर्त्मानो भवन्ति, रात्र्यादावनवस्थित प्रहरादीनां नहि स्वरूपसंभव उपपद्यते, नवा प्रतिपालनमपीत्युक्तम्, देवतात्वे तासां ध्रुवत्वेन न कोऽपि दोषः, अर्चिराद्यभिमानात् तासामर्चिरादित्वम्, संपिण्डितकरणत्वादेव च गन्तॄणां न तत्र भोगः, अन्येषु भुञ्जानेष्वपि लोकशब्दोपपत्तेः, अतोऽग्निस्वामिकं लोकं प्राप्तोऽग्निनातिवाह्यते वायुलोकं प्राप्तो वायुनेति क्रमेण योजयितव्यम् ॥ ५ ॥ ४५ ॥

ननु कथमातिवाहिकत्वपक्षे वरुणादिषु तत्संभवः, विद्युतो ह्यधिवरुणादय उक्ताः, विद्युदनन्तरं त्वा ब्रह्मप्राप्तेरमानवस्यैव पुंसो गमयितृत्वं श्रुतम्, तत् कथम्, तत्रोत्तरमाह वैद्युतेति ।

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥ ४६ ॥ ४ ॥

विद्युदभिसंभवादूर्ध्वं तदन्तर्वर्तिनाऽमानवपुरुषेणैव वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्ति तस्यैव तस्य गमयितृत्वस्य श्रुतेः, वरुणादयस्तस्यैव साहाय्यादिनानुग्राहकाः, तस्मादर्चिरादयो देवतात्मानः ॥ ६ ॥ ४६ ॥ ४ ॥

कार्यं तु बादरिरस्य गत्युपपत्तेः ॥ ७ ॥ ४७ ॥

ब्रह्म गमयतीत्यत्र ब्रह्म किं कार्यमपरमुत परमेवाविकृतम्, तत्र ब्रह्मशब्दाद् गतिश्रुतेश्च कार्यमेव सगुणमपरं ब्रह्म नयत्येतानमानवः पुरुष इति बादरिराचार्यो मन्यते, तथात्वे प्रदेशवत्त्वाद् गन्तव्यत्वमुपपद्यते, नतु शुद्धं ब्रह्म तस्य सर्वगतत्वेन गन्तव्यत्वासंभवात्, इत्याह कार्यं त्विति ॥ ७ ॥ ४७ ॥

विशेषितत्वाच्च ॥ ८ ॥ ४८ ॥

"तेषु ब्रह्मलोकेषु पराः परावतो वसन्ती"ति श्रुत्यन्तरे विशेषितत्वाच्च कार्यमेव ब्रह्मात्रावगन्तव्यम्, 'ब्रह्मलोकान्' इति श्रुत्यन्तरे श्रुतं बहुवचनं कार्यपरत्वेऽवस्थाभेदेनोपपत्तेः, तस्मात् कार्यविषयमेवेदं नयनमिति ब्रूते विशेषितेति ॥ ८ ॥ ४८ ॥

Digitized by Google

ननु कार्यविषयो ब्रह्मशब्दो न भवितुमर्हति, सर्वकार्यजगत्कारणं ब्रह्मेति प्रतिष्ठापितत्वादत आह सामीप्यादिति ।

सामीप्यात् तु तद्व्यपदेशः ॥ ९ ॥ ४९ ॥

कारणसामीप्यादपरस्य ब्रह्मणस्तस्मिन्नपि भवत्येव ब्रह्मशब्दः ॥ ९ ॥ ४९ ॥

ननु कार्यब्रह्मप्राप्तौ 'न स पुनरावर्तते' इति न संभवति परस्मादन्यत्र नित्यत्वासंभवात्, दर्शयति च देवयानेन प्रस्थितानामनावृत्तिं "न स पुनरावर्तते" इत्यादिनेत्याशङ्क्याह कार्येति ।

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ १० ॥ ५० ॥

कार्यब्रह्मप्राप्त्यनन्तरं ब्रह्मलोकप्रलये सति तत्रैवोत्पन्नसम्यग्ज्ञानास्तदध्यक्षेण हिरण्यगर्भेण सहातः परं पदं प्रतिपद्यन्त इति क्रममुक्तिरनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या ॥ १० ॥ ५० ॥

उक्तार्थे संमतिमाह स्मृतेरिति ।

स्मृतेश्च ॥ ११ ॥ ५१ ॥

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।

परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" ॥

तस्मात् कार्यब्रह्मविषया गतिरिति सिद्धान्तः ॥ ११ ॥ ५१ ॥

यं पूर्वपक्षमाशङ्क्यायं सिद्धान्तः कृतः स सूत्रैरेव प्रदर्श्यते परमिति ।

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥ ५२ ॥

जैमिनिराचार्यः "स एतान् ब्रह्म गमयती"त्यत्र परमेव ब्रह्म प्रापयतीति मन्यते, ब्रह्मशब्दस्य तत्र मुख्यत्वात्, गौणमुख्ययोश्च मुख्य एव संप्रत्ययात् ॥ १२ ॥ ५२ ॥

दर्शनाच्च ॥ १३ ॥ ५३ ॥

एवं "तयोर्ध्वमायन्नमृतत्वमेती"ति गतिपूर्वममृतत्वं दर्शयति, अमृतत्वं च परब्रह्मण्युपपद्यते न कार्ये विनाशित्वात्, "यत्रान्यत् पश्यति

Digitized by Google

तदल्पं तन्मर्त्य''मिति वचनात् परविषयैवैषा गतिरित्याह दर्शनादिति ॥ १३ ॥ ५३ ॥

किंच "प्रजापतेः सभां वेश्म प्रतिपद्यत" इति नायं कार्यविषयः प्रतिपत्त्यभिसंधिः, "नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मे''ति कार्यभिन्नस्यैव ब्रह्मणः प्रकृतत्वात्, "यशोऽहं भवामि ब्राह्मणाना''मिति च "न तस्य प्रतिमास्ति यस्य नाम महद्यश" इति परस्यैव च यशोनामत्वप्रसिद्धेः, तस्मात् परब्रह्मविषया गतिश्रुतय इति जैमिनिमतमाह न च कार्यमिति।

नच कार्ये प्रतिपत्त्यभिसंधिः ॥ १४ ॥ ५४ ॥ ५ ॥

तावेतौ पक्षावाचार्येणोक्तौ तत्र गत्युपपत्त्यादिभिः कार्यब्रह्मपरत्वपक्ष एवाभिमतो मुख्यः सन् शुद्धब्रह्मपरत्वपक्षमाभासयितुं समर्थ इति स एव सिद्धान्तः, मुख्यत्वादिर्द्वितीयपक्षः पूर्वपक्ष एव, नह्यसत्यपि संभवे मुख्यस्यैवार्थस्य ग्रहणमित्याज्ञास्ति कस्यचित्, परविद्याप्रकरणेऽपि च तत्स्तुत्यर्थं विद्यान्तराश्रयगत्यनुकीर्तनमुपपद्यते "विष्वगन्या उत्क्रमणे भवन्ती''तिवत्, "प्रजापतेः सभां वेश्म" इति तु पूर्ववाक्यविच्छेदेन कार्येऽपि प्रतिपत्त्यभिसंधिर्न विरुध्यते, तस्मादपरविषयैव गतिश्रुतिः, किंचिद्विपर्यासेनानयोः पक्षयोः पूर्वपक्षसिद्धान्तभावमाहुस्तच, मन्तव्यत्वानुपपत्तेर्ब्रह्मणः, नहि गतमेव गम्यते, नचौपाधिकं गन्तव्यत्वम्, प्रतिबिद्धसर्वविशेषस्य शुद्धस्यैव तद्यात्वश्रुतेः, अधिकं वक्तव्यमपि विस्तरभयान्नोच्यते, तस्मात् कार्यं बादरिरित्येव स्थितः पक्षः, 'परं जैमिनि'रिति च पूर्वपक्षत्वेन पक्षान्तरप्रतिभानं शिष्यबुद्धिवैशद्याय सूचितमित्यभिप्रायः सूत्रकृतः ॥ १४ ॥ ५४ ॥ ५ ॥

कार्यब्रह्मविषया गतिर्न परविषयेत्युक्तम्, इदानीं "स एतान् ब्रह्म गमयती''त्युक्तोऽमानवपुरुषो निर्गुणब्रह्मोपासकानेव नयत्युत प्रतीकोपासकानपि, तत्र 'एता'नित्यविशेषश्रवणात् सर्वानिति प्राप्ते आहाप्रतीकेति।

अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात्
तत्क्रतुश्च ॥ १५ ॥ ५५ ॥

प्रतीकालम्बनभिन्नान् नयतीति बादरायणो मन्यते, न ह्यप्रतीकालम्बनान् नयति प्रतीकालम्बनान् नयतीत्युभयथाभावाभ्युपगमे कश्चिद्दोषोऽस्ति, अनियमन्यायस्य प्रतीकव्यतिरिक्तेष्वप्युपपत्तेः, तत्क्रतुश्च ब्रह्मक्रतुश्च ब्राह्ममैश्वर्यमासादयेत्, "तं यथा यथोपासते तदेव भवती"ति श्रुतौ ब्रह्मभावनात्मकः क्रतुर्ब्रह्मप्राप्तिहेतुरित्यवगमनेन, नहि प्रतीकोपासकानां ब्रह्मक्रतुरस्ति येन ते सत्यलोकं गच्छेयुः, तस्मादसति विशेषवचने तत्क्रतुन्यायेन ब्रह्मोपासकानामेव तत्प्राप्तिर्नेतरेषाम् ।

किंच यथाप्रतीकं तेष्ववीचीनानि फलानि श्रूयन्ते "तत्रास्य यथा कामचारो भवती"ति, नाम ब्रह्मेत्युपासितुः शब्दशास्त्रलक्षणे नामविशेषे स्वातन्त्र्यं भवतीत्यर्थः ॥ १५ ॥ ५५ ॥

कथं तर्हि पञ्चाग्निविदां प्रतीकोपासकानां सत्यलोकप्राप्तिर्वचनबलादिति ब्रूमः, तस्माच्छ्रायतो न प्रतीकोपासकान् ब्रह्मलोकं प्रापयत्यमानवः पुरुष इत्याह विशेषमिति ।

विशेषं च दर्शयति ॥ १६ ॥ ५६ ॥ ६ ॥

इति ब्रह्मसूत्रे चतुर्थाध्यायस्य तृतीयः पादः ॥ ३ ॥ :: :: ॥

अत्र पादेऽधिकरणानि ॥ ६ ॥ * * ॥

न प्रतीकालम्बनानामितरैस्तुल्यत्वम् ॥ १६ ॥ ५६ ॥ ६ ॥

इति ब्रह्मसूत्रतात्पर्यविवरणे चतुर्थाध्यायस्य फलविचारात्मकस्य तृतीयः पादः ॥ ३ ॥ :: :: ॥

Digitized by Google

॥ अथ ब्रह्मसूत्रतात्पर्यविवरणम् ॥

॥ तत्र चतुर्थाध्यायस्य चतुर्थपादारम्भः ॥

"एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत" इत्यत्र किं देवलोकाद्युपभोगस्थानेष्विवागन्तुकेन चिद्रूपेणाभिनिष्पद्यत उतात्ममात्रेणेति, तत्रागन्तुकेनैव निष्पत्तिर्मोक्षस्यापि फलत्वात्, इति प्राप्ते आह संपद्येति।

संपद्याविर्भावः स्वेनशब्दात् ॥ १ ॥ ५७ ॥

केवलेनैवात्मनाविर्भवति न धर्मान्तरेण कुतः स्वेनेति स्वशब्दात्, पूर्वमपि विद्युत एव स्वरूपं नच स्वकीयमर्थो विशेषणवैयर्थ्यात्, यद्यद्रूपं मुक्तावुपादत्ते तत् तत् स्वकीयमेवेति कस्य व्यावृत्तये विशेष्येत, आत्मवाचित्वे तु स्वकीयत्वव्यावृत्तिः प्रयोजनम्, नचाभिनिष्पत्तिरुत्पत्तिः पूर्वसिद्धस्योत्पत्त्यभावात्, किंतु तत्त्वज्ञानेन ब्रह्मताविर्भावो निष्पत्तिः, नचाभिसंपत्त्यभिनिष्पत्त्योरैकार्थ्यम्, संपत्तिर्नाम तत्पदार्थशोधनम्, अभिनिष्पत्तिस्तु वाक्यार्थावबोधः, नच पूर्वसिद्धत्वे मोक्षस्य फलत्वानुपपत्तिः, निवृत्ताज्ञानफलत्वाकारेण पूर्वसिद्धत्वाभावात्, तस्मात् पूर्वसिद्धस्वरूपमेव मुक्तिरूपम् ॥ १ ॥ ५७ ॥

कः पुनर्विशेषः पूर्वावस्थातोऽत आह मुक्त इति।

मुक्तः प्रतिज्ञानात् ॥ २ ॥ ५८ ॥

योऽत्राभिनिष्पद्यत इत्युक्तः स सर्वबन्धविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते, पूर्वंचान्धो भवत्यपि रोदितीव विनाशमपीतो भवतीत्यवस्थात्रयकलुषितेनात्मनेत्ययं विशेषः, कथमिदानीं मुक्त इत्यवगम्यते, प्रतिज्ञानात्, "एतं त्वेव ते भूयोऽनुव्याख्यास्यामी"त्यवस्थात्रयदोषविहीनमात्मानं व्याख्येयत्वेन प्रतिज्ञाय "अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत" इत्युक्त्वा "स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष"इत्युपसंहरति, यथा रोगनिवृत्तावरोगी निष्पद्यते तद्वत् ॥ २ ॥ ५८ ॥

कथं पुनर्मुक्त इत्युच्यते ज्योतिःशब्दस्य भौतिके कार्यज्योतिषि रूढत्वात्, विकारस्य चार्तत्वप्रसिद्धेः, नचानतिवृत्तो विकारविषयात् कश्चिद्विमुक्तो भवितुमर्हति, इति चेत्याहात्मेति।

आत्मा प्रकरणात् ॥ ३ ॥ ५९ ॥ १ ॥

ज्योतिरत्रात्मैव प्रकरणात्, "य आत्माऽपहतपाप्मा विरज" इत्यनेन प्रकृते परात्मनि सति न भौतिकं ज्योतिर्ग्राह्यं प्रकृतहानाप्रकृतक्रियाप्रसङ्गात् "तद्देवा ज्योतिषां ज्योति"रिति ॥ ३ ॥ ५९ ॥ १ ॥

ननु पूर्वोक्तं मुक्तिरूपं परस्माद् ब्रह्मणो भिन्नं कर्तृकर्मव्यपदेशात्, 'एष संप्रसादः परं ज्योतिरुपसंपद्य' त्यत्र संप्रसादशब्दार्थो जीवः कर्तृत्वेन, ज्योतिःशब्दार्थो ब्रह्म कर्मत्वेन, तस्मान्मुक्तस्य जीवस्य स्वरूपं ब्रह्मणो भिन्नमिति प्राप्ते आहाविभागेनेति।

अविभागेन दृष्टत्वात् ॥ ४ ॥ ६० ॥ २ ॥

परेणात्मनाऽविभक्त एव मुक्तोऽवतिष्ठते, कुतः, दृष्टत्वात् 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'यत्र नान्यत् पश्यति' 'न तु तद् द्वितीयमस्ति' 'ततोऽन्यद्विभक्तं यत् पश्येत्,' इत्यादीन्यविभागेनैव परमात्मानं दर्शयन्ति, यथादर्शनमेव च फलं तत्क्रतुन्यायात्, 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति,' 'एवं मुनेर्विजानत आत्मा भवति गौतमे' ति वाक्यान्यविभागमेव दर्शयन्ति, 'स्वे महिम्नी' ति च दर्शनात् ॥ ४ ॥ ६० ॥ २ ॥

स्वेन रूपेणाभिनिष्पद्यते नापररूपेणेति स्थितम्, अधुना तद्विशेषश्चिन्त्यते, मुक्तस्वरूपं द्वेधा श्रुतम्, "य आत्माऽपहतपाप्मे"त्यादिना "सत्यकामः सत्यसंकल्प" इत्यन्तेन सविशेषम्, "यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन एव" "एवं वा अरेऽयमात्मा प्रज्ञानघन" इति निर्विशेषं श्रुतम्, एते रूपे विरुद्धत्वान्मुक्तिदशायां न संभवतोऽतः कालभेदेन व्यवस्थापनीये, इति प्राप्ते आह ब्राह्मेणेति।

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥ ६१ ॥

प्रतिपत्तृभेदाद्युगपदेव सविशेषत्वनिर्विशेषत्वे उपपद्येते, मुक्तदृष्ट्या

निर्विशेषत्वं बहुप्रतीत्या तु द्वितीयमिति प्रतिपत्तृभेदाद्व्यवस्थासिद्धौ किं कालभेदकल्पनया, तस्माद्युगपदेव सविशेषत्वनिर्विशेषत्वे ॥ ५ ॥ ६१ ॥

मतान्तरमाह चितीति तन्मात्रेणेति।

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥ ६२ ॥

यद्यप्यपहतपाप्मत्वादयो भेदेन निर्दिष्टास्तथापि शब्दविकल्पजा एवैते, चैतन्यमेवास्यात्मनः स्वरूपमिति चैतन्यमात्रेणाभिनिष्पत्तिर्युक्ता 'प्रज्ञानघन' इत्यादिभ्यः, सत्यकामत्वादीनामौपाधिकत्वात् तेषां न चैतन्यवत् स्वरूपसंभवः, अनेकाकारत्वप्रतिषेधात्, अत एव लक्षणादि सर्वं दुःखाभावमात्रपरम्, तस्मान्निरस्ताशेषप्रपञ्चेन प्रसन्नेनाप्यपदेश्येन बोधात्मनाभिनिष्पद्यते, इत्यौडुलोमिर्मन्यते ॥ ६ ॥ ६२ ॥

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥ ६३ ॥ २ ॥

एवमिति, एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेऽपि बहुव्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मैश्वर्यरूपस्याप्रत्याख्यानादविरोधं बादरिराचार्यो मन्यते ॥ ७ ॥ ६३ ॥ ३ ॥

पूर्वाधिकरणत्रयेण विदेहमुक्तौ विचारितायां ब्रह्मलोकलक्षणाया मुक्तेरविशिष्टत्वात् तद्विचारः प्रवर्तते, तत्रार्चिरादिमार्गेण ब्रह्मलोकं गतस्योपासकस्य वस्तुसृष्टिराम्नायते, "स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ती"त्यादि, तत्र किं संकल्पमात्रात् समुत्थानमुत निमित्तान्तरसहितादिति संदेहे बाह्योऽपि हेतुरपेक्षितो न तु संकल्पमात्रं तथात्वे आशामोदकतुल्यत्वेन पुष्कलभोगाभावप्रसङ्गादिति प्राप्ते आह संकल्पेति।

संकल्पादेव च तच्छ्रुतेः ॥ ८ ॥ ६४ ॥

संकल्पादेवेत्येवकारेण पितृमातृभ्रातृगन्धमाल्यादिभोग्यसृष्टौ बाह्यहेतुव्यावर्तनात्, न आशामोदकसाम्यम्, उपार्जितमोदकसमत्वस्यापि संकल्पयितुं शक्यत्वात्, उपासनाप्रसादेन संकल्पशक्तेर्निरङ्कुशत्वात्, तस्मात् संकल्पमात्रं भोग्यसृष्टिहेतुः ॥ ८ ॥ ६४ ॥

Digitized by Google

अत एव चानन्याधिपतिः ॥ ९ ॥ ६५ ॥ ४ ॥

मुक्तपुरुषसंकल्पस्यानन्यसंकल्पत्वादेवानन्याधिपतिः, नास्यान्योऽधिपतिर्भवति, नहि प्राकृतोऽपि संकल्पयत्नन्यस्वामिकत्वं सत्यां गतावात्मनः संकल्पयति, मुक्तस्य सत्यसंकल्पत्वात् सर्वं मनःशरीरादिकं भवतीत्याह श्रुतिः,"अथ य इहात्मानमनुविद्य व्रजन्ति एतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवती"ति, इत्याहात एवेति ॥ ९ ॥ ६५ ॥ ४ ॥

अभावं बादरिराह ह्येवम् ॥ १० ॥ ६६ ॥

मनस्तावत् संकल्पसाधनं सिद्धम्, तस्य शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्यस्य विदुषः सन्ति न वेति चिन्त्यते, तत्र बादरिः शरीरस्येन्द्रियाणां चाभावं विदुषो महीयमानस्य मन्यते, यत एवं ह्याहाम्नायः, "मनसैवैतान् कामान् पश्यन् रमते ब्रह्मलोक"इति, मनःशरीरादिकं स्याद्यदि, तदा मनसैवेति विशेषणं न स्यात्, तस्मान्मोक्तेऽभावः शरीरेन्द्रियाणाम् ॥ १० ॥ ६६॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥ ६७ ॥

जैमिनिस्तु मनोवच्छरीरेन्द्रियाणामपि भावं मुक्तं प्रति मन्यते,यतः "स एकधा भवति त्रिधा भवती"त्यनेकधा भावमामनन्त्यतः, न ह्यनेकविधत्वं विना शरीरभेदेन समञ्जसं भवति, यद्यपि निर्गुणभूमविद्यायामनेकधा भावविकल्पः पठ्यते तथापि विद्यमानमेवेदं सगुणावस्थायामैश्वर्यं भूमविद्यास्तुतये संकीर्त्यत इति, अतः सगुणविद्या फलभावेनोपतिष्ठत इत्याह भावमिति ॥ ११ ॥ ६७ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥ ६८ ॥

बादरिस्तूभयविधश्रुतिदर्शनादुभयविधत्वं साधु मन्यते, यदा शरीरितां संकल्पयति तदा सशरीरो भवति यदा त्वशरीरतां तदाऽशरीर इति, सत्यसंकल्पत्वात् सत्यसंकल्पवैचित्र्याच्च द्वादशाहवत्, यथा द्विविधो द्वादशाहः, सत्रात्मकः॰ अहीनश्च, उभयलिङ्गश्रुतिदर्शनात्, एवमत्रापीत्याह द्वादशाहवदिति ॥ १२ ॥ ६८ ॥

Digitized by Google

तन्वभावे संध्यवदुपपद्यते ॥ १३ ॥ ६९ ॥

यदा तु तनोः सेन्द्रियशरीरस्याभावस्तदा संध्ये स्थाने शरीराद्यभावेऽप्युपलब्धिमात्रा एव पित्रादयः कामा भवन्ति,एवं मोक्षेऽपि स्युः, एवं ह्युपपद्यत इत्याह तन्वभाव इति ॥ १३ ॥ ६९ ॥

भावे जाग्रद्वत् ॥ १४ ॥ ७० ॥ ५ ॥

भावे तनोर्यथा जागरिते विद्यमाना एव पित्रादयः कामा भवन्त्येवं मुक्तस्याप्युपपद्यन्त इत्याह भाव इति ॥ १४ ॥ ७० ॥ ५ ॥

भावं जैमिनिरित्यत्र सशरीरत्वं मुक्तस्योक्तम्, तत्र 'त्रिधा भवती'त्यादिना युगपदनेकदेहस्वीकार ऐच्छिक आम्नातः, तत्रैको देहः सात्मक इतरे निरात्मकाः, आत्ममनसोर्बहुभावस्याश्रुतत्वात् कल्पकाभावाच्च, इति प्राप्ते आह प्रदीपवदिति ।

प्रदीपवदावेशस्तथाहि दर्शयति ॥ १५ ॥ ७१ ॥

यथैक एव प्रदीपोऽनेकप्रदीपभावमापद्यते विकाशशक्तियोगात्, एवमेक एव विद्वानैश्वर्ययोगादनेकभावमापद्य सर्वाणि शरीराण्याविशति, कुतः, तथाहि दर्शयति शास्त्रम्, 'स एकधा भवति त्रिधा भवती'ति शास्त्रं दारुयन्त्रवच्छरीराभ्युपगमे न ह्यवकल्पते, नापि जीवान्तरावेशः, नच निरात्मनां शरीराणां प्रवृत्तिः संभवति,यत् त्वात्ममनसोर्भेदानुपपत्तेरनेकशरीरयोगासंभव इति, एकमनोऽनुवृत्तीनि समनस्कान्येवापराणि सत्यसंकल्पत्वात् स्रक्ष्यति, सृष्टेषु तेषूपाधिभेदादात्मनोऽपि भेदेनाधिष्ठातृत्वं योक्ष्यते, एषैव च योगिनामनेकशरीरयोगप्रक्रिया योगशास्त्रे ॥ १५ ॥ ७१ ॥

ननु कथं मुक्तस्यानेकशरीरावेशलक्षणमैश्वर्यम्, यतः "तत् केन कं विजानीयात्," "नतु द्वितीयमस्ति यद्विजानीयात्,"इत्यादिश्रुतिर्विशेषविज्ञानं वारयतीत्यत आह स्वाप्ययेति ।

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥ ७२ ॥ ६ ॥

स्वाप्ययः सुषुप्तिः संपत्तिः कैवल्यं तयोः सुषुप्तिकैवल्ययोरन्यतरा-

वस्थामपेत्यैतद्विशेषसंज्ञाभाववचनं "केन कं विजानीया"दित्यादि, यतस्त-त्रैवैतदधिकारवशादाविष्कृतम्, "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ति," सगुणविद्याविपाकावस्थानं त्वेतत् स्वर्गादिवदवस्थान्तरं यत्रैतदैश्वर्यमुच्यते, तस्माददोषः ॥ १६ ॥ ७२ ॥ ६ ॥

ये सगुणब्रह्मोपासकाः सह मनसेश्वरसायुज्यं गच्छन्ति तेषां भोगयोग्यं देहेन्द्रियमात्रस्रष्टृत्वमुत वियदादिसकलस्रष्टृत्वम्, तत्र "आप्नोति स्वाराज्य" मिति श्रुत्या निरवग्रहैश्वर्यावगम इति प्राप्ते आह जगदिति ।

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥ ७३ ॥

वियदादिजगत्सृष्टिप्रतिपादकप्रकरणेषु सर्वत्र परमात्मैव स्रष्टृत्वेनावगम्यते न क्वापि योगिनो मुक्ता वा, अन्यथानेकेश्वरत्वे सति कश्चित् सिसृक्षति कश्चित् संजिहीर्षतीति जगद्व्यवस्था न स्यात्, कथं तर्हि स्वाराज्यश्रुतिः, ईश्वराधीनस्वाराज्याभिप्रायेति, उपासानुष्ठित ईश्वरो भोगमात्रसिद्धये तेषां स्वाराज्यं ददौ, मुक्तिं च तत्त्वविद्योत्पादनेन ददौ, तस्माज्जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यमस्तीति ॥ १७ ॥ ७३ ॥

अथ यदुक्त'माप्नोति स्वाराज्य'मित्यादि प्रत्यक्षोपदेशाद्विदुषामपि निरवग्रहमैश्वर्यं न्याय्यं स्यादिति प्राप्तेऽभिधीयते प्रत्यक्षेति ।

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥ ७४ ॥

नाधिकारिकमण्डलस्थोक्तेः, पूर्वपक्षोक्तं न, कुतः, आधिकारिको यः सवितृमण्डलादिविशेषायतनेष्ववस्थितः परमेश्वरस्तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते, यत उत्तरत्र "आप्नोति मनसस्पति"मित्याह, यो हि सर्वमनसां पतिः पूर्वसिद्ध ईश्वरस्तं प्राप्नोतीत्युक्तम्, तदनुसारेणैवोत्तरत्र "वाक्पतिश्चक्षुष्पति"रित्याह, एवमन्यत्रापि यथासंभवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यमिति ॥ १८ ॥ ७४ ॥

Digitized by Google

विकारावर्त्ति च तथाहि स्थितिमाह ॥ १९ ॥ ७५ ॥

विकारावर्त्यपि च नित्यमुक्तं पारमेश्वरं रूपमस्ति, न केवलं विकारमात्रगोचरं सवितृमण्डलादि, तथाह्यस्य द्विरूपां स्थितिमाह श्रुतिः, "एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी"ति, नच तदविकारं रूपमितरालम्बनाः प्राप्नुवन्तीति शक्यते वक्तुम्, अतत्क्रतुत्वात् तेषाम्, अतो यथा द्विरूप ईश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठते, एवं सगुणोऽपि निरवयवमैश्वर्यमनवाप्य सावयव एवावतिष्ठत इति ॥ १९ ॥ ७५ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥ ७६ ॥

दर्शयतश्च श्रुतिस्मृती विकारावर्तित्वं परस्य ज्योतिषः, "न तत्र सूर्यो भाति न चन्द्रतारकम्," "न तद्भासयते सूर्य" इत्यादि, तदेवं विकारावर्तित्वं परज्योतिषः प्रसिद्धमित्यर्थः ॥ २० ॥ ७६ ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥ ७७ ॥

इतश्च न निरङ्कुशं विकारालम्बनानामैश्वर्यम्, यस्माद् भोगमात्रमेषामनादिसिद्धेनेश्वरेण समानमिति श्रूयते, "तमाहापो वै खलु मीयन्ते लोकोऽसा"विति "यथैतां देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयती"त्यादिभेदव्यपदेशलिङ्गेभ्य इत्याह भोगमात्रमिति ॥ २१ ॥ ७७ ॥

नन्वेवं सातिशयत्वादन्तवत्त्वमैश्वर्यस्य स्यात्, ततश्चैषामावृत्तिः प्रसज्येत, इति प्राप्ते आह भगवान् बादरायण आचार्योऽनावृत्तिरिति।

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥ ७८ ॥ ७ ॥

इति ब्रह्मसूत्रे चतुर्थाध्यायस्य चतुर्थः पादः, समाप्तश्च फलाध्यायः ॥ ४ :: :: ॥

अत्र पादेऽधिकरणानि ॥ ७ ॥ * * ॥

नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं शास्त्रोक्तविशेषणं गच्छन्ति यस्मिन्नरश्च वै ण्यश्चार्णवौ ब्रह्मलोके

तृतीयस्यामितो दिवि यस्मिन्नैरं मदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता पूर्ब्रह्मणो यस्मिंश्च प्रभुविमितं हिरण्मयं वेश्म यश्चानेकधा मन्त्रार्थवादादिविशेषेषु प्रपञ्च्यते तं ते प्राप्य चन्द्रलोकादिवन्नाविमुक्तभोगा आवर्तन्ते,कुतः, "तयोर्ध्वमायन्नमृतत्वमेति," नैतेषां पुनरावृत्तिः, एतेन प्रतिपद्यमाना इमं मानवमावर्तन्ते ब्रह्मलोकमभिसंपद्यन्ते न च पुनरावर्तं नावर्तन्त इत्यादिशब्देभ्यः, अन्तवत्त्वेऽपि त्वैश्वर्यस्य यथानावृत्तिस्तथा वर्णितं पूर्वमेव, सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः, तदाश्रयेणैव हि सगुणशरणानामप्यनावृत्तिरिति । अनावृत्तिः शब्दादित्यभ्यासः सूत्रे शास्त्रपरिसमाप्तिं दर्शयति ॥ २२ ॥ ७८ ॥ ७ ॥

नानादर्शनसारसंग्रहधिया यद् ब्रह्मसूत्रे मया
श्रीमच्छंकरभाष्यभावनवता सद्वाप्यसद्वापि तत् ।
गृह्णन्त्वेतदपेतमत्सरमदा ब्रह्मात्मतत्त्वार्थिनो
नानाटिप्पणभावनेन विवृतं स्वल्पं हि सन्तः स्फुटम् ॥ १ ॥
वेदाब्धिवसुचन्द्रेऽब्दे ॥ १८ २४ ॥ राधे शुक्ले च पर्वणि ।
व्यलिखत् सूत्रतात्पर्यं भैरवस्तिलकाभिधः ॥
शास्त्राभ्यासालसानां च ब्रह्मबोधमभीप्सताम् ।
बालानामुपयोगाय श्रीसाम्बस्तेन तुष्यतु ॥

इति ब्रह्मसूत्रतात्पर्यविवरणे चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ :: :: ॥

समाप्तं च ब्रह्मविचारशास्त्रम् ॥ समाप्तश्चायं ग्रन्थः ॥

प्रथमाध्यायसूत्राणि ॥ १३४ ॥ द्वितीयाध्यायसूत्राणि ॥ १५७ ॥ तृतीयाध्यायसूत्राणि ॥ १८६ ॥ चतुर्थाध्यायसूत्राणि ॥ ७८ ॥

१३४ + १५७ + १८६ ॥ + ७८ = ५५५ ॥ व्याख्यानग्रन्थसंख्याश्लोकाः ॥ ३२०० ॥ अत्र समग्राधिकरणानि १९४ ॥

ओंनमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ॥ शुभमस्तु ॥

Digitized by Google

॥ अथ ब्रह्मसूत्रतात्पर्यविवरणस्य ॥
॥ उपसंहारः ॥

यस्य प्रसादात् परमेश्वरस्य सिध्यन्ति पुंसां सकलेप्सितानि।
कामं स मे पूरयतान्निकामं तत्पादपद्मं शिरसा नमामि ॥ १ ॥

श्रीमन्नेस्फील्डसाहेबप्रभुवर्ये प्रशासति।
अध्यायद्वयमस्याद्यं पूर्वं मुद्रितवानहम् ॥ २ ॥

ततस्-थीबोशब्दः परिलसति येनाद्य कृतिना
प्रभौ तस्मिन् शासत्यनुपमपटीबस्यनलसे।
सुसाहेबोत्कृष्टे बुधजनमनःप्रीतिविषये
सदा न्याय्ये वर्त्मन्यभिरतमतौ शीलजलधौ ॥ ३ ॥

मुद्रणायान्तिमाध्यायद्वयं शिष्टमहं पुनः।
निवेद्य मुद्रयेत्याज्ञामममुद्रं वहन् मुदा ॥ ४ ॥

समापिपं पण्डितपत्त्रमध्ये मुद्राविधानेन च शोधनेन।
भवेत् प्रमादादिह काप्यशुद्धिः सा शोधनीया सुधिया दयातः ॥ ५ ॥

प्रथमसमय एषोऽस्यास्ति वै मुद्रणाया-
स्तदिह किमपि मध्ये तर्कये स्यादशुद्धम्।
पथि सकृदतियत्नैः संस्कृते चापि नूत्ने
क्व भवति समभावः सर्वथा सर्वदृष्ट्या ॥ ६ ॥

ममाशयः केवलमस्य विद्या आसीत् प्रकाशाय तिरोहितस्य।
दृग्गोचरीभूय भवद्विधानामेतज्जनिं स्वां सफलां विधत्ताम् ॥ ७ ॥

आनन्दकाननिवासकृतार्थमूर्तिः
श्रीराजकीयपठनालयलब्धकीर्तिः।
श्रीविश्वनाथपदपङ्कजसेविधर्मा
सोऽहं भवामि बुधबेचनरामशर्मा ॥ ८ ॥

Digitized by Google

माधवीयधातुवृत्तिः ।

अथ पुरुषविषये किं चिद् विचार्यते ॥ युष्मदस्मदन्येषु सह विवक्षितेषु 'त्यदादीनि सर्वैर्नित्यम्' । अन्यैस्सहवचने त्यदादीनि शिष्यन्ते मिथस्तु पराणीति शिष्यमाणाभ्यां युष्मदस्मद्भ्यामशिष्यमाणार्थाभिधानेपि स्वार्थापेक्षौ मध्यमोत्तमावेव भवतः । न तु शिष्यमाणाशिष्यमाणरूपस्यार्थस्य युष्मदस्मदर्थान्यत्वेन शेषत्वात्प्रथमः, यत्र युष्मदस्मदी समानाधिकरणे न स्तः स शेष इत्युक्तत्वात् । तेन देवदत्तश्च त्वं च युवां भवथः, देवदत्तश्च स च त्वं च यूयं भवथ । देवदत्तश्चाहं च आवां भवावः । देवदत्तश्च स चाहं च वयं भवाम इति । युष्मदस्मदोः सहविवक्षायामस्मदा शिष्यमाणेन युष्मदस्मदर्थाभिधानेपि परत्वादस्मदर्थापेक्ष उत्तमो भवति । त्वं चाहं च आवां भवाव इति । भवतापि युष्मदस्मदोः सहवचने तस्य पूर्वपाठाश्रयेण तयोरेव शेषे भवांश्च त्वं च युवां भवथः । भवांश्चाहं चावां भवाव इति । सहविवक्षा चानेकस्यार्थस्यैकगुणक्रियाभिनिवेशार्थं बुद्ध्या निरूप्यमाणस्य क्रियागुणद्वारेणान्योन्यापेक्षया समुदायभावमापन्नस्य सहभावेन वक्तुमिच्छा, उद्भूतावयवभेदत्वाच्च द्विवचनबहुवचने । असहविवक्षायां द्वैतम् । एक एव लकारो ऽनेककारकार्थाभिधायी प्रतिकारकमावर्त्तते वेति । तत्राद्ये पक्षे युष्मदस्मदन्यानामशेषत्वाद्यथायोगं मध्यमोत्तमौ भवतः । स च त्वं च भवथः, तथा मध्यमोत्तमयोर्युगपत्प्रसङ्गे परत्वादुत्तमः, त्वं चाहं च भवाव इति । पक्षान्तरे तु अभिधेयतत्तत्कारकापेक्षया प्रथमादयो यथायोगं भवन्तीति न विवादः । भवान् भवति, त्वं भवसि, अहं भवामीति । अलिङ्गसंबोधनैकविषयश्च युष्मदर्थो भवदर्थस्त्वन्य इति तद्योगे प्रथमोक्तिः । यदा त्वस्मात्संबोधनविभक्तिः तदा युष्मदर्थयोगात् मध्यमो भवति हे भवन् भवसीति । अतित्वं भवति अत्यहं भवतीत्यादौ त्वामतिक्रान्तो मामतिक्रान्त इत्यत्यादयः 'क्रान्ताद्यर्थे द्वितीयये'ति तत्पुरुषे त्वमतिक्रान्तो येनाहमतिक्रान्तो येनेति 'अनेकमन्यपदार्थे' इत्यनेकं सुबन्तमन्यस्य पदस्यार्थे वर्त्तमानं समर्थं समस्यतइति बहुव्रीहौ वा ऽतिक्रमितुः प्राधान्यात्तस्यैव

Digitized by Google

लान्तार्थविशेषणत्वाच्च मध्यमोत्तमौ । यदा त्वतिशब्दः पूजितवचनः तदा स्वती पूजायामिति तत्पुरुषे युष्मदस्मदोरर्थस्य प्राधान्यात्तेन विशेष्यत्वादति त्वं भवसि अत्यहं भवामीति भवतः । त्वद्भवति मद्भवतीत्यत्र च्व्यन्तयोरेतयोस्त्वमिवाहमिवेतिस्वार्थारोपेण वर्त्तमानत्वादमुख्यार्थत्वाद्गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय' इति न्यायेन मध्यमोत्तमौ न स्तः । तथाहि, 'अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरि च्वि'रिति कार्यात्मनाऽभूतस्य कारणस्य कार्यात्मना भावे विवक्षिते संपद्यमाने कार्यात्मना भवतिकर्त्तरि वृत्तात्प्रातिपदिकात्कृभ्वस्तियोगे च्विर्विधीयते । एतदुक्तं भवति । अभेदविवक्षया कारणवृत्तेः कार्यशब्दात् प्रत्यय इति । त्वत्कल्पो भवति मत्कल्पो भवतीत्यादावपि गौणार्थत्वाच्च न मध्यमोत्तमौ । तत्र 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' संपूर्णता पदार्थानां समाप्तिः, किं चिन्न्यूनतेषदसमाप्तिः, एतद्विशिष्टेऽर्थे वर्त्तमानात्प्रातिपदिका'त्तिङश्चे'ति तिङन्ताच्च स्वार्थे कल्पबादय इति प्रकृत्यर्थसदृशार्थान्तरवृत्तिभ्यो विधानात् । यदा तु कालान्तरदृष्टगुणेषदसमाप्तिविशिष्टस्वार्थवृत्तेः प्रत्ययाः तदा न गौणार्थत्वमिति त्वत्कल्पो भवसि मत्कल्पो भवामीति भवतः । त्वमेवेदानीं किं चिन्न्यूनगुणो भवसीत्यर्थः । पूर्वत्र तु त्वत्सदृशोऽन्यो भवतीत्यर्थः ॥

अथ तिङन्तात्प्रत्ययाः प्रदर्श्यन्ते ॥ अतिशायने तमबिष्ठनौ ॥ अतिशायनं प्रकर्षाभिभवः । एतदुपाधिकार्थवृत्तेर्ङ्याप्प्रातिपदिकादेतौ स्याताम् । तथा तिङश्चेति तिङन्ताच्च । बहूनामेकस्य निर्धारणे वृत्तौ 'द्विवचनविभज्योपपदे तरबीयसुनौ' । द्वयोरर्थयोर्वचने विभज्ये विभक्तव्ये चोपपदे तरबीयसुनोर्विधानात् । ता'वजादी गुणवचनादेवे'तीष्ठनीयसुने गुणवचनादेव नियमात्तिङन्तात्तरप्तमपावेव, एतदन्ता'त्किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' । किमादिभ्यो यो घस्तदन्तादद्रव्यप्रकर्षे गम्यमाने आमुरित्यामुः । उकारो मकारस्यानन्त्यत्वेनेत्त्वनिवृत्तयद्लुप्यते, तत्र 'स्वरादिनिपातमव्ययम्' तथा 'तद्धितश्चासर्वविभक्ति'रित्यसर्वविभक्तियुक्तं तद्धितान्तं, तथा 'कृन्मेजन्त'इति मेजन्तं, तथा 'क्त्वातोसुन्कसुन' इति तदन्तं, 'अव्ययीभावश्चे'त्यव्ययीभावश्च, 'तरप्तमपौ घः' । तत्राणि परे । 'यचि भम्' । यकारादाव-

Digitized by Google

जादौ च स्वादावसर्वनामस्थाने परतः पूर्वं भमिति घान्तस्य भसंज्ञा । इह स्वादयः स्वौजसमौडित्यारभ्य कप्पर्यन्ताः । घान्तस्य 'यस्येति च' । इवर्णावर्णयोरीति भसंज्ञानिमित्ते तद्धिते च परे लोप इति लोपः, भवतितरां भवतितमां,तद्धिताश्च 'तद्धिता' इत आरभ्य आपञ्चमाध्याय-समाप्तेर्वक्ष्यमाणाः प्रत्ययाः, आमन्तं'कृत्तद्धितसमासाश्च'कृदन्तं तद्धितान्तं समासश्च प्रातिपदिकमिति प्रातिपदिकं, कृतः समासाश्च वक्ष्यन्ते । प्रातिपदिकाच्च 'ङ्याप्प्रातिपदिकात्''स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुबि'ति विधीयमानेषु स्वादिषु एकत्वार्थमेकवचनं सुः । तस्य चा'व्ययादाप्सुपः' । अव्ययाद्विहितस्यापः सुपश्च लुगिति लुक् । स्वरादिष्वामितिपाठादव्ययत्वम्, आबिति टाप्डाप्चापः । 'प्रशंसायां रूपप्' प्रशंसा स्तुतिः । एतदुपाधिकार्थान् ङ्याप्प्रातिपदिकात् तिङन्ताच्च रूपप् स्यात् । स्वभावादेतदन्तान्नपुंसक*प्रथमैकवचनमेव । तस्य स्वमोर्नपुंसकादिति नपुंसकलिङ्गात्परत्वेन लुकि प्राप्ते 'अतोऽम्'-त्यम्भावे 'अमि पूर्वः' । अकोऽमि परे पूर्वपरयोः पूर्वरूपमेकादेश इति पूर्वरूपत्वम् । तेन भवतिरूपमित्यादि भवति । एवं कल्पबाद्यन्तादपि स्वभावान्नपुंसकात्स्वादिकार्यम् । 'अव्ययसर्वनाम्नामकच् प्राक् टे'रित्यकच् । तत्र तिङश्चेत्यनुवृत्तेरस्यापि टेः प्रागज्ञातादिषु प्रागिवीयेष्वर्थेषु भवति । अकार उच्चारणार्थः । चकारश्चित इति स्वरार्थः । तत्र हि† चितः सप्रकृतेरित्युच्यते । भवतकि ॥

अथ तिङो ऽन्ये लादेशा उच्यन्ते ॥ 'लटः शतृशानचावप्रथमासमानाधिकरणे' ॥ लटः शतृशानचावादेशौ स्यातामप्रथमान्तेन चेत्सामानाधिकरण्यं भवति । तत्र शेषत्वादस्य लटः शता, तस्य शित्त्वात्सार्वधातुकत्वे पूर्ववच्छबादयः । शत्रन्तस्य 'कृदतिङि'ति तृतीयधात्वधिकारविहितस्य प्रत्ययस्य कृत्संज्ञाविधानात् कृदन्तत्वेन प्रातिपदिकत्वादविशेषेण स्वादिप्रसङ्गे कर्मत्वस्य विवक्षितत्वात्कर्मणि द्वितीयेति

* प्रथमेति बहुषु पुस्तकेषु नास्ति ।

† चित्वाच्चित इत्युच्यतइति पा० बहुषु पुस्तकेषु ।

द्वितीया । द्वितीयादिशब्दैः सुपां त्रिकाः पूर्वाचार्यप्रसिद्ध्योच्यन्ते । तत्रापि सुपस्त्रीणि त्रीणि पदानि भूत्वैकशो यथासंख्यमेकवचनादिसंज्ञानीति तिङ्वदेकत्वादौ क्रमेणैकवचनादि भवति । तत्रामौटौः ॥ 'सुडनपुंसकस्य' ॥ सुडिति प्रत्याहारेणाद्यतः पञ्च वचनानि गृह्यन्ते । तान्यनपुंसकस्य संबन्धीनि सर्वनामस्थानानीति सर्वनामस्थानत्वे 'उगिदचां सर्वनामस्थाने धातो'रिति नुम् । उगितामङ्गानां लुप्तनकारस्याञ्चतेः पूर्वमधातोरुगितः पश्चाद्धातोरञ्चतेश्च नुम् । अञ्चतिग्रहणादुगितो धातोर्यदि भवति अञ्चतेरेवेति नियमार्थकाद् अधातुग्रहणमधातुभूतपूर्वार्थं, नुम् मित्त्वा'न्मिदचोन्त्यात्पर'इत्येकत्र संनिविष्टानामचामन्त्यादचः परः । 'नश्चापदान्तस्य झलि' । अपदान्तयोर्नकारमकारयोर्झल्यनुस्वार इति नस्यानुस्वारः । 'अनुस्वारस्य ययि परसवर्णः' । स च 'स्थानेन्तरतम'इति नासिक्यानुस्वारस्य तादृशो नकारः । भवन्तं पश्य भवतस्तानित्यत्र 'स्वादिष्वसर्वनामस्थान'-इति पूर्वस्य प्राप्तायाः पदसंज्ञायाः 'यचि भ'मिति भसंज्ञया परया ऽनवकाशया बाधात् 'झलां जशोन्त'इति जश्त्वं न भवति । कर्तृकरणविवक्षायां, 'कर्तृकरणयोस्तृतीया' । उक्तः कर्ता । 'साधकतमं करणम्,' । क्रियाप्रसिद्धौ यत्कारकं कारकान्तरापेक्षया प्रकृष्टं विवक्ष्यते यद्व्यापारानन्तरं क्रियानिष्पत्तिर्विवक्ष्यते तत्करणम् । तदुक्तम् ।

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥
वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यतइत्येषा विवक्षा दृश्यते यतः ॥
क्रियते येनयेनैव तत्तत्करणमिष्यते ।
तेनाश्वेन रथेनेति सिद्धं दीपिकयेति च ॥

इति । टाङकारष्टाङसीति विशेषणार्थः । अन्यथा सुपां सुलुगिति विहितस्यापि ग्रहणमापद्येत । भवता तेन । भवद्भ्यां ताभ्यां, भवद्भिस्तैः । हलादौ पदत्वाज्जश्त्वम् । संप्रदानविवक्षायां 'चतुर्थी संप्रदाने' ॥ इदाश्वनभिहितइति शेषः ॥ 'कर्मणा यमभिप्रैति स संप्रदानम्' ॥ ददातिकर्मणा

करणभूतेन कर्त्ता यमर्थमभिप्रैति तदनिराकर्तृत्वे प्रेरयिचनुमन्तृ कारकं सम्प्रदानम् । उक्तञ्च ।

अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते संप्रदानता ॥

इति । दानं च पुनरग्रहणाय किं चिदुद्दिश्य स्वीयत्यागः । भवते तस्मै ददाति । भवद्भ्यां ताभ्यां ददाति । भवद्भ्यस्तेभ्यो ददाति । अपादानविवक्षायाम् 'अपादाने पञ्चमी' ॥ 'ध्रुवमपाये ऽपादानम्' ॥ सावधिकं गमनमपायः । तदुक्तम्

संयोगभेदाद् भिन्नात्मा गतिरेव भ्रमिर्यथा ।
ध्रुवावधिरपायेऽपि समवेतस्तथा ध्रुवः ॥

इति । अस्मिन् साध्ये यद् ध्रुवमेतदनाविष्टं तत्कारकमपादानम् । तथाहि ।

अपाये यदुदासीनं चलं वा यदि वा ऽचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥

इति । त्रिविधं चैतत् । यथाह ।

निर्दिष्टविषयं किं चिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधा ऽपादानमुच्यते ॥

इति । तत्र प्रथमं धातुना ऽभिहितापायविषयं द्वितीयं धात्वन्तरार्थत्वेनाभिहितापायविषयम् । तृतीयं तु सामर्थ्यादिना प्रतीयमानापायविषयम् । भवतस्तस्मादागच्छति । भवतो मेघाद्विद्योतते विद्युत् । अत्र निःसरणाङ्गे विद्योतने विद्युतिर्वर्त्तते । भवतस्तस्मादाढ्यतरः । अत्र प्रकर्षप्रत्ययसामर्थ्याद्विभागकारणतया प्रकर्षलक्षणा क्रिया प्रतीयते, अत्रावधिविभक्तयोरेकीकारो विभागस्तद्धेतुरपकर्षणं च बोद्धुम् । तथा चाह ।

बुद्ध्या समीहितैकत्वात् पञ्चालान् कुरुभिर्यदा ।
पुनर्विभजते वक्ता तदापायः प्रतीयते ॥

इति । तत्रतत्र इसीत्यनुवादार्थौ इकारेकारौ । विभागोपायः,

अस्मिन् साध्ये यद् ध्रुवमेतद्धेतुभूतक्रियानाविष्टं तदपादानमिति सूत्रार्थः । शेषविवक्षायाम् । 'षष्ठी शेषे' अनभिहितइति शेषः । कर्मादिभ्यो ऽन्यः प्रातिपदिकार्थव्यतिरेकहेतुः स्वस्वामिसंबन्धादिः शेषः, द्विष्ठोप्यसौ संबन्धो गुणभूतेन शब्देन प्रतिपाद्यतइति तस्मादेव षष्ठी न तु प्रधानात् ।

द्विष्ठोप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते

इति । तथा वार्त्तिकमपि 'उक्तं पूर्वेणे'ति । अस्यार्थः । प्रातिपदिकार्थसूत्रे पदसामानाधिकरण्ये उपसंख्यानमधिकत्वादिति चोद्यस्य न वाक्यार्थत्वादिति सामानाधिकरण्यप्रतीतेर्वाक्यार्थत्वेन पदसंस्कारवेलायामभावात् प्रातिपदिकार्थनिबन्धना प्रथमा यथा भवत्येवमत्रापि प्रधानगतसंबन्धप्रतीतेर्वाक्यार्थत्वेन पदसंस्कारवेलायामभावाच्च प्रसङ्गः षष्ठ्या इति परिहारभाष्यं चार्थरूपमेवैतदेवं जातीयकमिति, भवतो ऽस्य स्वं, भवतोरनयोः, भवतामेषाम् अधिकरणविवक्षायाम् ॥ सप्तम्यधिकरणे च ॥ चकाराद् दूरान्तिकार्थेभ्यश्च ॥ आधारोऽधिकरणम् ॥ कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणविवक्षायां 'सप्तम्यधिकरणे च' ॥ चकाराद् दूरान्तिकार्थेभ्यश्च ॥ आधारोऽधिकरणम् ॥ कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधारस्तत्कारकमधिकरणम् । त्रिविधं चैतत् । यदाह,

कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥
औपश्लेषिकमेकं स्यात्तथा वैषयिकं परम् ।
अभिव्यापकमित्येतत्त्रिधाधिकरणं मतम् ॥
आस्ते कटे शकुन्तः खे तिले तैलं व्यवस्थितम् ।
क्रमेणाधारभेदानामुदाहरणदर्शनम् ॥

इति । भवति कटे शेते । मेघच्छन्ने भवति खे बलाकाः, भवति तिले तैलं, भवतोरनयोः, भवत्स्वेषु । प्रथमासामानाधिकरण्ये प्रथमासामानाधिकरण्याभावे च 'नन्वोर्विभाषे'त्यतो विभाषानुवृत्तेर्विकल्पेन भवतः ॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥ भवानयम् ।

Digitized by Google

हल्ङ्याब्भ्य इति सुलोपः । तकारस्य संयोगान्तलोपः । तस्यासिद्धत्वा'न्न लोपः प्रातिपदिकान्तस्ये'ति विधीयमानो नलोपो न भवति । भवन्तौ । भवन्तः । जसो जकारो ऽसन्देहेन विभक्तिस्वरूपप्रतिपत्त्यर्थः । भवत्तरः । भवत्तमः । भवद्रूपः । भवत्कल्प इत्यादौ तरबादि पूर्ववत् । भवत्कः । 'प्रागिवात्कः' । इवे प्रतिकृताविद्यतः प्रागितः परेष्वज्ञातादिष्वर्थेषु द्योत्येषु कः प्रातिपदिकादिति कः । तद्धितत्वाच्च ककारस्येत्त्वम् । शत्रभावे भवतीत्यादि पूर्वमुक्तमेव । अत्र तिङस्थानिवत्त्वेन लत्वाच्छत्रादेशो न भवति, वाग्रहणस्य व्यवस्थितविभाषाविज्ञानात् । यदि हि स्थानिवद्भावेन तिङन्तात्वस्माच्च तरप् किमेत्तिङव्ययेत्याम्स्यात् । ततश्च भवत्तरामिति तृतीयं रूपं स्यात् । असामानाधिकरण्ये सत्यपि भवत इदं भावतम् ॥ तस्येदम् ॥ षष्ठीसमर्थाद् ङ्याप्प्रातिपदिकात्सम्बन्धिन्यर्थे ऽणिति अण् । 'तद्धितेष्वचामादे'रिति वृद्धिः ञिति णिति तद्धिते परेऽङ्गस्याचामादेरचो वृद्धिरिति । इयं चात उपधाया इति ञिति णिति प्रत्ययमात्रे परेऽङ्गस्योपधाया अतो विधीयमानां वृद्धिमपवादत्वाद्बाधते । न च भवत इत्यस्य देवदत्तादिविशेषापेक्षत्वादस्तीहापि सामानाधिकरण्यमिति वाच्यम् । तर्हि सापेक्षत्वादस्मात्प्रत्यय एव न स्यात् । 'समर्थः पदविधि'रितीह शास्त्रे पदविधिः समर्थपदाश्रय इत्युक्तत्वात् । इदमप्युदाहरणं, भवतो भक्तिर्भवद्भक्तिरिति ॥ षष्ठी ॥ षष्ठ्यन्तं समर्थेन सुबन्तेन वा समस्यत इति समासः । 'सुपो धातुप्रातिपदिकयो'रिति तद्धितान्तसमासप्रातिपदिकयोरन्तर्भूतस्य सुपो लुक् । अत्र केचिल्लडिति वर्त्तमाने 'लटः शतृशानचा'विति पुनर्लड्ग्रहणाद् नन्वोर्विभाषेति भूते विहितस्यापि लटोऽप्येतावादेशौ भवत इति । एतद्भाष्यवार्त्तिकयोर्नोक्तं वृत्तिकारस्य च नेष्टम् । यदाह लडिति वर्त्तमाने पुनर्लड्ग्रहणात् क्व चित् प्रथमासामानाधिकरण्येऽपि भवतीति ॥ संबोधने च ॥ शतृशानचाविति शेषः । आभिमुख्यकरणं संबोधनम्, तच्च स्वभावात्क्व चित् कार्ये विनियोगार्थम् । यदाह ।

सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः ।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियायां विनियुज्यते ॥

Digitized by Google

इति । हे सुखमनुभवन्नर्थस्य ॥ लक्षणहेत्वोः क्रियायाः ॥ लक्षणं चिन्हं, हेतुः कारणं, क्रियाया लक्षणहेत्वोर्वर्त्तमानाद्धातोर्लटः शतृशानचौ स्याताम्, शयनमनुभवन् यवनो भुङ्क्ते । अत्र शयनानुभवनं यवनभोजनस्योपलक्षणं, शुश्रूषुर्भवन्विद्यामधिगच्छति, अत्रापि शुश्रूषाभवनं विद्याधिगमस्य हेतुः । योगद्वयमिदं प्रथमासमानाधिकरणे नित्यार्थम् । प्रथमा च 'संबोधने चे'ति संबोधनाधिकप्रातिपदिकार्थे विहिता ॥ माङ्याक्रोशे ॥ आक्रोशः शपनम् । अस्मिन् गम्यमाने माङ्युपपदे शतृशानचौ भवतः । मा भवन् । माङि लुङि प्राप्ते ऽस्मादेवादेशवचनाल्लडनुमीयते । सुखमनुभवन्नित्यादौ 'कर्तृकर्मणोः कृती'त्यनयोः कृद्योगे विधीयमाना षष्ठी न भवति 'न लोकाव्ययनिष्ठाखलर्थतृना'मिति लादियोगे प्रतिषेधात् । ल इति शतृशानचौ कानच् क्वसुकिकिनौ चोच्यन्ते । उ इत्युवर्णान्ताः, उः, इष्णुः, उकः प्रत्यय एव । अव्यय इति 'कृन्मेजन्तः' । 'क्त्वातोसुन्कसुन' इति उक्ता अव्ययकृतः । 'क्तक्तवतू निष्ठा' । खलर्थः खल् युच् तृन्निति 'पूङ्यजोः शान'न्निति शानन्नादयस्तृन्निति तृन्पर्यन्ताः प्रत्याहारेणोक्ताः । प्रत्याहारश्च लटः शन्निति तृशब्दस्य तृनो नकारेण । सुखस्यानुभवन्निति प्रयोगः शेषलक्षणषष्ठ्या अत्र षष्ठीसमासः 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेनेति' पूरणादिभिः षष्ठीसमासो न भवति, तत्र पूरणा इति पूरणप्रत्ययान्ताः । गुण इति गुणद्वारेण गुणिनि वर्त्तितुं शक्ता गुणगुणिनिष्ठाः शुक्लादयः,ये तु गुणं स्वनिष्ठतयैवाभिदधति ते रसादयस्तत्स्थैश्च गुणैः षष्ठी समस्यतइति तैः समास उक्तः । सुहितार्थास्तृप्त्यर्थाः । सदिति 'तौ सदि'ति सत्संज्ञौ शतृशानचौ । अव्यया उक्ताः । तव्यो न सानुबन्धकः । निरनुबन्धकग्रहणे न सानुबन्धकस्येति । समानाधिकरणमेकविभक्त्यन्तं विशेषणं विशेष्यं च ॥

(शेषमये)

(Continued from page 374.)

सटीकसंक्षेपशारीरकम् ।

मू० ॥ तीर्थेन तं विविदिषन्तमनन्यभक्तं
संसारसागरभयाऽऽतुरचित्तवृत्तिम् ॥
एकं मुमुक्षुमधिकारिणमात्मतत्त्व-
ज्ञाने समीक्ष्य गुरुराह दयाविधेयः ॥ ६२ ॥

टी० ॥ इदानीमेतादृशमेव शिष्यमुपलभ्य गुरुणा ब्रह्माऽद्वयमुपदेष्टव्यमिति शिक्षयन् गुरुरुपदिशतीत्याह । तीर्थेनेति । पावनेन विविदिषाऽर्थमनुष्ठितयज्ञाऽऽदिना गङ्गास्नानाऽऽदिना चाऽऽत्मानं विविदिषन्तं तमिति संबन्धः । तीर्थेन गुरुणा वा वेदितुमिच्छन्तं तमित्यर्थः । आत्मविविदिषुरपि कश्चिदन्यामन्यां देवतामुपास्ते स न गुरुणोपदेष्टव्य इत्यभिप्रेत्याह । अनन्यभक्तमिति । प्रत्यगेकप्रवणचित्तमित्यर्थः । एवं भूतोऽपि कश्चित्सांसारिकभोगपरित्यागाऽऽतुरचित्तो भवतीति तं व्यावर्तयति । संसारेति । नन्वेवंविधोऽधिकारी जगति दुर्लभः सत्यं तथापि कश्चित्संभवति । उक्तं हि भगवता । मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये इत्याशयेनाऽऽह । एकमिति । एकजीवाऽभिप्रायं वा । गुरोः शिष्योपदेशव्यापारे निमित्तमाह । दयाविधेय । इति तथा च न शिष्याननुबध्नीयादिति निषेधोऽत्र न प्रवर्तत इति भावः ॥ ६२ ॥

मू० ॥ वक्ष्यामि वत्स तव वाञ्छितमत्ययस्य-
मत्यन्तमेव च हितं शृणु तन्मनस्कः ॥
त्वं प्रत्यगव्यवहितं तव सुप्रसिद्धं
ब्रह्माऽद्वितीयमुदितं च तदस्यजस्रम् ॥ ६३ ॥

टी० ॥ इदानीं गुरोः शिष्योपदेशप्रकारं शिक्षयंस्तदुपदेशमाह । वक्ष्यामीति । अनुद्विग्नमनाः सदुपदेशाऽर्थमवगच्छत्विति वत्सेति पुत्रवत्संबोधनं सदेवसोम्यत्यादिलिङ्गात् शरणाऽऽगतस्य शिष्यस्य वाञ्छितमप्य-

नर्थकं चेत्तु कथं तदुपदेष्टव्यमित्याशङ्क्य वाञ्छितं विशिनष्टि । अत्य-वस्थमिति । अवस्थात्रयाऽतीतं तुरीयमिति यावत् । तथा च प्रपञ्चोपशमः शिव इति श्रुत्या निष्प्रपञ्चस्य सुखरूपत्वप्रतिपादनाच्चोक्तदूषणमित्याशये-नाऽऽह । अत्यन्तमिति । वक्ष्यमाणाऽर्थस्याऽतिसूक्ष्मतया शिष्यस्य तत्र चेतः-प्रणिधानाऽर्थमाह । शृणु तन्मनस्क इति । किं तच्छ्रोतव्यमित्यपेक्षायां प्रश्न-क्रमेणोत्तरमाह । त्वमित्यादिना । त्वं न देहो न चेन्द्रियमनःप्राणाऽहंकारा-स्तेषां साऽवयवतया कार्यत्वाद्विनाशित्वाच्च घटाऽऽदिवदनात्मत्वादात्म-नश्च कृतनाशाऽऽदिपरिहारायाऽनादित्वात्तेषां जडतया तदतिरिक्तसाक्षि-भास्यत्वाच्च नाऽऽत्मत्वं साक्षी च स्वप्रकाशचैतन्याऽऽत्मा नाऽन्यमपेक्षते स च निर्धर्म एव साक्ष्यस्य रूपाऽऽदिवदतद्धर्मत्वादित्याशयेनाऽऽह । प्रत्यग-व्यवहितमिति । जडाऽनृताऽऽदिस्वभावदेहाऽऽदिप्रतीपमञ्चति प्रकाशते इति स्वप्रकाशचैतन्यमत एवाऽव्यवहितं नित्याऽपरोक्षमित्यर्थः । तत्र सर्वाऽ-नुभव एव प्रमाणमित्याह । सुप्रसिद्धमिति । अन्यथा जगदान्ध्यप्रसङ्ग इति भावः । द्वितीयस्योत्तरमाह । ब्रह्मेति । बृहदित्यर्थः । तत्किमाकाशसदृशं नेत्याह । अद्वितीयमिति । सजातीयाऽऽदित्रिविधभेदशून्यं सन्मात्रमित्यर्थः । तत्र प्रमाणमाह । उदितं चेति । सदेवेत्युपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्यन्तेन ग्रन्थेन दर्शितमित्यर्थः । तृतीयस्योत्तरमाह । तदस्यजस्र-मिति । अद्वैतब्रह्मोपासनया जीवस्य ब्रह्मभावो भवतीति केचित् तान्प्र-त्याह । तदसीति । तद्विवरणमजस्रमिति साध्यत्वे तस्याऽनित्यत्वाऽऽप-त्तिः । चकारदर्शिततत्त्वमसीति श्रुतिविरोधः तत्राऽसीति ब्रह्मभावस्य वर्तमानताश्रवणात् अतस्त्वंसाक्षिचैतन्याऽऽत्मा सदाऽद्वयं सदात्मकं ब्र-ह्मैव न तु ततो भिन्नोऽसीति ॥ ९३ ॥

मू० ॥ यद्यत्र पश्यसि विरोधमुदीरय त्वं
सद्यस्ततः परिहरामि तमप्रयत्नात् ॥
वाक्यं निरस्तसकलप्रतिबन्धकं स-
त्त्वां बोधयिष्यति कराऽर्पितबिल्वतुल्यम् ॥ ९४ ॥

Digitized by Google

टी० ॥ एवं संक्षेपेण शिष्यप्रश्नानामुत्तरमभिहितमिदानीं तत्र शिष्यस्याऽङ्गीकाराऽऽग्रभावलिङ्गेन वाक्याद् दृढतराऽनुभवो नोत्पन्न इति स्वयमेवोन्नीय वाक्यात्तदनुभवप्रतिबन्धाऽपनयनाऽर्थं प्रयतते अन्यथा वक्ष्यामीत्यादिस्वप्रतिज्ञाऽसिद्धेस्तत्राऽपि वाक्याऽर्थस्य पुरुषाऽर्थत्वादव्यवधानेनोपस्थितत्वाच्च तद्विरोधमेव प्रथमं परिहर्तुमाह । यत्प्रश्चेति । वाक्यार्थ इत्यर्थः । ततस्त्वदुदीरणाऽनन्तरं परिहारे भवतां क्लेशः स्यादिति शिष्यमतिमालक्ष्याऽऽह । अप्रयत्नादिति । विरोधपरिहारे प्रयोजनमाह । वाक्यमिति । कराऽर्पितबिल्वतुल्यं करतलाऽऽमलकाऽऽदिकल्पं यथाऽपरोक्षं स्यात्तथेत्यर्थः ॥ ९४ ॥

मू० ॥ अत्राऽऽह सद्वयमहं मम रूपमीक्षे
तच्चाऽद्वयं विगणयामि परोक्षमेव ॥
पारोक्ष्यसद्वयविभागयुजोर्विरोधा-
द्वाक्यार्थबोधमतिदुर्लभमेव मन्ये ॥ ९५ ॥

टी० ॥ एवं गुरुणाऽनुज्ञातः शिष्यो निःशङ्को वाक्याऽर्थाऽसंभवं चोदयति । अत्राऽऽहेति । सद्वयं प्रतिशरीरं भिन्नं कर्तृत्वाऽऽदिमच्च इच इत्यनेनाऽपरोक्षत्वमपि विरोधप्रदर्शनाय स्वस्मिन्दर्शयति । ततः किं तत्राऽऽह । तच्चेति । तत्पदार्थरूपमित्यर्थः । चोऽवधारणे । अद्वयमेवेति संबन्धः । विगणयामि कार्यलिङ्गेन तदुपाऽऽदानतया तर्कयामि । तर्कयोग्यं तत्स्वरूपमाह । परोक्षमेवेति । अपरोक्षे तर्काऽनुदयात्तर्क्यते चेत्परोक्षमेवेत्यर्थः । ततः किं तत्राऽऽह । पारोक्ष्येति । एतच्चाऽद्वयत्वस्योपलक्षणं सद्वयेति भावप्रधानः तच्चाऽऽपरोक्ष्योपलक्षणं पारोक्ष्यसद्वयत्वयोः परस्परमविरोधेन विरोधेन विरोध्युपलक्षणस्य कर्तव्यत्वात् तथा च पारोक्ष्याऽऽपरोक्ष्यसद्वयत्वाऽद्वयत्वरूपविभाजकधर्मयुजोरित्यर्थः । एवं वाक्याऽर्थाऽभेदाऽसंभवे वाक्यात्तद्बोधोऽपि न संभवतीत्याह । वाक्याऽर्थेत्यादिना । एतदुक्तं भवति तत्त्वमसीत्यादि वाक्यं जीवब्रह्माऽभेदनिष्ठमिति वाच्यमन्यथा तदर्थाऽयोगात्तच्च न संभवति सद्वयाऽद्वययोः परोक्षाऽऽपरोक्षयोश्च जीव-

ब्रह्मणोरभेदाऽसंभवात् एवं च तद्गोचरमुपनिषज्जन्यं ज्ञानं कुतस्त्यमिति ॥ ९५ ॥

मू० ॥ यद्वस्तु सद्वयतयाऽवगतं स्वशब्दा-
त्तस्याऽद्वयत्वमवगन्तुमशक्यमेव ॥
यद्वस्तु च व्यवहितं प्रतिपादितं त-
त्प्रत्यक्तया न तु जनः प्रतिपत्तुमीशः ॥ ९६ ॥

टी० ॥ ननु जीवेश्वरयोस्तत्त्वमादिशब्दैरभेदविरोधिसद्वयत्वाऽऽदि न प्रत्येतुं शक्यं तेषां तदसामर्थ्यादिति कथं न तयोरभेदधीरित्याशङ्क्य प्रसिद्धाऽर्थोऽभिधायित्वात्तत्त्वमादिशब्दानां जीवस्य च प्रमातृत्वाऽऽदि-सद्वयरूपेणैव प्रसिद्धेस्तदर्थस्याऽपि प्रकरणेनाऽद्वयतयैवाऽवगमाद् भेदवि-रोधिरूपा प्रतीतिरसिद्धेत्याशयेनाऽऽह । यद्वस्त्विति । सद्वयतयेत्याऽपरोक्ष्य-स्याऽप्युपलक्षणम् । अद्वयत्वं सकलभेदशून्यत्वं व्यवहितं प्रतिपादितमिति तच्छब्देनाऽद्वयं परोक्षमेव प्रतीयत इति तयोक्तम् । प्रत्यक्तया । अपरोक्षचेत-न्याऽऽत्मना । ईशः शक्तः ॥ ९६ ॥

मू० ॥ आकाङ्क्षितं भवति पूरणशक्तियुक्तं
यत्सन्निधौ पतितमस्य हि सङ्गतिः स्यात् ॥
नाऽऽकाङ्क्षयैव न तु सन्निधिनैव वा स्या-
त्संबन्धिता हि विरहय्य पदाऽर्थशक्तिम् ॥ ९७ ॥

टी० ॥ ननु शुक्तिरजतयोरभेदाऽयोग्ययोरपि शब्दादभेदधीदर्शना-द्योग्यता शाब्दज्ञाने नाऽपेक्ष्यते किन्तु आकाङ्क्षाऽऽदिकमेवेत्याशङ्क्य शाब्द-प्रमायां योग्यतास्वरूपसत्यपेक्षितैव न त्वाकाङ्क्षाऽऽदिमात्रमित्याह । आका-ङ्क्षितमिति । येन विना यस्य पदस्य स्वाऽर्थाऽनुभवाऽजनकत्वं सा तस्य शब्दस्य तस्मिन्नाकाङ्क्षा तदर्थयोरपि साऽऽकाङ्क्षशब्दप्रतिपाद्यतया सैवा-ऽऽकाङ्क्षा तद्युक्तमित्यर्थः । पूरणशक्तियुक्तम् । अन्वययोग्यं यत्सन्निधौ पतितं समीपस्थ पदेन यत् ज्ञापितं हि यस्मात्पदार्थशक्तिं योग्यतां यद्यपि

शाब्दज्ञानमात्रे योग्यता स्वरूपसती नाऽपेक्ष्यते शब्दाऽऽभासप्रतिपाद्ये तदभावाचाऽपि तज्ज्ञानं तत्र मानाऽभावाद् योग्यताज्ञानविरहसहकृतात्त-दितरकारणचक्रादेव शाब्दभ्रमोपपत्तेः तथाऽपि शाब्दप्रमायां स्वरूपेण साऽपेक्षितैव यस्मादाकाङ्क्षाऽऽदौ सत्यपि तया विना तदभावस्तस्माद-न्वयव्यतिरेकाभ्यामाकाङ्क्षाऽऽदित्रितयमपि शाब्दप्रमायां कारणमिति भावः ॥ ९७ ॥

मू० ॥ योग्यत्वमत्र न च तत्त्वमसीति वाक्ये
संबन्धितां प्रति पदाऽर्थयुगस्य भाति ॥
पारोक्ष्यसद्वयविभागविरोधहेतो-
र्गौरश्व इत्यभिहिते तु यथैव वाक्ये ॥ ९८ ॥

टी० ॥ ननु ब्रह्मविकारत्वाज्जीवानां तदंशत्वाद्वा मृद्घटाऽऽदिव-दस्त्येवाऽभेदयोग्यतेति भेदाऽभेदवादिनस्तत्राऽऽह । योग्यत्वमिति । चोऽ-वधारणे पदार्थयुगस्य तत्त्वंपदार्थयोः संबन्धितामभेदं प्रति योग्यत्वं नैव भातीति संबन्धः । जीवस्य ब्रह्मविकारत्वेऽनित्यत्वाऽऽद्यापत्तेर्निरवयवस्य ब्रह्मणः सांऽशत्वाऽयोगाच्च न मृद्घटवत्तदभेदो वाक्यार्थः किन्त्वात्यन्तिक एव स वाक्यार्थः स्यात्स च प्रागुक्तयुक्त्या न संभवतीत्याशयेन सदृष्टान्त-माह । पारोक्ष्येति । पारोक्ष्याऽऽदिकृतो विभागो भेदस्तेन सह विरोधाद्धे-तोरित्यर्थः ॥ ९८ ॥

मू० ॥ सोऽयं गिरेरिव न लक्षणयाऽपि वृत्ति-
र्मानान्तराऽधिगतिहीनतयाऽऽत्मनि स्यात् ॥
मानान्तराऽधिगतगोचर एव दृष्टः
शब्दप्रयोग इह लाक्षणिकस्तु लोके ॥ ९९ ॥

टी० ॥ ननु तत्त्वंपदवाच्ययोः परस्पराऽभेदाऽयोग्यत्वेऽपि विरुद्धां-ऽशपरित्यागेन पदद्वयलक्ष्ययोरभेदो न विरुध्यत इति तमेव वाक्यं बोध-यितुं यथा सोऽयमिति प्रत्यभिज्ञावाक्यं तदेतत्पदवाच्ययोस्तदेतद्देशकाल-

विशिष्टयोरभेदाऽसंभवेन तदेतद्देशकालांशं विहाय लक्षितवस्तुस्वरूपाऽभेदं प्रतिपादयतीत्याशङ्क्याऽऽह । सोऽयमिति । तत्त्वंगिरोरिति शेषः । यथा सोऽयमिति गिरोर्लक्षणया देवदत्ताऽऽदिस्वरूपे प्रवृत्तिरेवं तत्त्वं गिरोरात्मनि लक्षणयाऽपि वृत्तिर्न स्यात्कुतस्तत्राऽऽह । मानान्तरेति । आत्मनि मानान्तरेणाऽवगमासंभवान्न लक्षणेत्यर्थः । ननु मानान्तराऽभावेऽपि तत्र सा किं न स्यादित्याशङ्क्याऽऽह । मानान्तराऽधिगतेति । मानान्तरेण वाच्यसंबन्धितयाऽवगते लक्षणा भवति अन्यथा लक्ष्यस्वरूपनिर्धारणाऽयोगात् शब्दादेव तन्निर्णये तस्याऽपि शब्दस्य लाक्षणिकत्वेनाऽनवस्थापातात् ततश्च लक्ष्यस्य मानान्तरगम्यत्वं लक्षणा व्यापकमात्मनो व्यावर्त्तमानं लक्षणामपि व्यावर्त्तयतीति भावः ॥ ९९ ॥

मू० ॥ तस्मादखण्डविषया न वचःप्रवृत्तिः
संसर्गबोधनमपास्तमयोग्यभावात् ॥
एवं न वाक्यगतशब्दसमन्वयोऽपि
दूरे प्रमान्तरविरोधनिराससिद्धिः ॥ १०० ॥

टी० ॥ आत्मनि लक्षणाऽसंभवसमर्थनफलमाह । तस्मादिति । यस्माल्लक्षणयाऽपि सामाधिकरण्यं न घटते तस्मादखण्डविषया तत्त्वमादिवचःप्रवृत्तिरिति योजना । संसर्गबोधनं तु प्रकृतवाक्येऽयोग्यभावादपास्तमित्यर्थः । समानाऽधिकरणवाक्यं हि लोके द्विविधं दृष्टम् एकं विरुद्धांऽशपरित्यागेन लक्षणया स्वरूपमात्रपरं यथा सोऽयमिति वाक्यं किं चित्तु वाच्ययोरेव तादात्म्यलक्षणसंसर्गपरं यथा मृद्घटः नीलोत्पलमित्यादि एतच्च द्वैविध्यं लक्षणाऽसंभवात्पूर्वोक्तन्यायेन विरोधाच्च ब्रह्मणि न संभवतीत्यर्थः । ननु वेदान्तविरोधाद्विरोधग्राहकप्रमाणानामेवाऽप्रामाण्यमस्त्वित्यत आह । एवमिति । वेदान्तवाक्ये प्रयुक्तो यः शब्दस्तस्य सामानाऽधिकरण्येनाऽन्वयोऽपि न संभवति यदा तदा पदाऽर्थयोर्विशेषणविशेष्यभावेन प्रमितिरेव न सिद्ध्येद् दूरे विरोधग्राहकप्रामाण्यनिराससिद्धिः

प्रत्यक्षाऽऽदिबाधितमर्थमग्निरनुष्ण इति वाक्यवद्वेदोऽपि न प्रमापयितुं शक्त इति कुतस्तद्विरोधात्तदितराऽप्रामाण्यमिति भावः ॥ १०० ॥

मू० ॥ किं च प्रमान्तरमपेक्ष्य गिरः प्रवृत्तिः
सिद्धेषु वस्तुषु जगत्युपलब्धपूर्वा ॥
ब्रह्माऽऽत्मवस्तुनि तथा वचसः प्रवृत्ति-
र्युक्ताऽऽत्मनस्तु फलवत्परिनिष्ठितत्वात् ॥ १०१ ॥

टी० ॥ किं च वेदान्ता यदि सिद्धं ब्रह्म प्रतिपादयेयुस्तर्हि मानान्तरसंवादायत्तप्रामाण्याः स्युः नदीतीरे फलानीति लौकिकवाक्ये तथा दर्शनात्र च तत्संभवति तत्र मानान्तराऽसंभवात् वेदस्याऽनपेक्षत्वक्षतिप्रसङ्गाच्चेत्यभिप्रेत्याऽऽह। किं चेति। सिद्धेषु प्रयत्नाऽनिष्पाद्येषु पराऽभिमतकार्यविलक्षणेष्विति यावत्। उपलब्धपूर्वेति। पूर्वमुपलब्धेत्यर्थः। ततः किं तत्राऽऽह। ब्रह्मेति। तथा तथैव। कुतस्तत्राऽऽह। आत्मनस्त्विति। आत्मनोऽपीत्यर्थः परिनिष्ठितत्वादिति सिद्धत्वादित्यर्थः ॥ १०१ ॥

मू० ॥ नद्यास्तीरे फलमिति गिरः सिद्धवस्तुप्रवृत्ते-
र्दृष्टा स्वार्थप्रमितिजनने स्वाऽन्यमानव्यपेक्षा ॥
तद्वद् ब्रह्मण्यपि तु वचसो वैदिकस्याऽभ्युपेया
तस्मादस्मिन्न खलु घटते मानभावः श्रुतीनाम् ॥ १०२ ॥

टी० ॥ फलवदित्युक्तदृष्टान्तं विशदयन्दार्ष्टान्तिकमपि विशदयति। नद्या इति। सिद्धवस्तुप्रवृत्तेः सिद्धवस्तुनि प्रवृत्तिर्यस्यास्तस्यास्तुरवधारणे तद्वदेवेति संबन्धः। अस्त्वेवं तत्राऽऽह। तस्मादिति। वेदान्तप्रतिपाद्ये मानान्तरप्रवृत्तौ तत्सिद्धाऽर्थाऽनुवादतया वेदान्तानां तात्पर्याऽभावेनाऽप्रामाण्यं स्यात्तदभावे च सिद्धवाक्यप्रामाण्यप्रयोजकरूपाऽभावादप्रामाण्यं स्यादिति भावः ॥ १०२ ॥

मू० ॥ नाऽखण्डवस्तुविषया वचसः प्रवृत्ति-
र्लोकेऽपि दृष्टिपथमापतिता कदा चित् ॥

नानापदार्थघटनाविषयत्वहेतो-

र्दूरेत्यता श्रुतिशिरोवचनेषु तस्याः ॥ १०३ ॥

टी० ॥ पूर्वं सोऽयमित्यादिलौकिकवाक्यस्याऽखण्डाऽर्थत्वमुपेत्य वेदान्ते लक्षणाऽसंभवेन दूषितम् । इदानीं तत्राऽपि तदसंप्रतिपत्त्वं कुतस्तद्दृष्टान्तेन वेदान्तेषु तदवकाशो भवेदित्याह । नाऽखण्डेति । असंसृष्टवस्तुविषया नेत्यर्थः । लोकेऽपि सोऽयमित्यादावपि । कुत इति चेत्तत्राऽऽह । नानेति । अपर्यायाऽनेकपदोपस्थापिताऽर्थानां घटना संसर्गस्तद्विषयत्वाद्धेतोर्वचस इत्यनुषङ्गः । ननु यथा प्राभाकराणां लोके लिङादीनां नियोगाऽर्थत्वाऽभावेऽपि वेदे तदर्थता तद्वदत्राऽप्यस्त्वित्याशङ्क्याऽऽह । दूरेत्यतेति । दूरमेतीति दूरेत्यम् अव्ययात्त्यबिति त्यप्प्रत्ययाऽसंभवाच्छेषाऽधिकारे दूरादेत्य इति वर्तिकोक्तेरेत्यप्रत्ययः तस्य भावस्तत्ता दूरे गतता दूरे गतिरिति यावत् । तस्या अखण्डवस्तुविषयप्रवृत्तेः वक्ष्यमाणदोषादुक्तलिङादिदृष्टान्ताऽसंप्रतिपत्तेश्चेति भावः ॥ १०३ ॥

मू० ॥ आदाय मुख्यगुणलाक्षणिकप्रवृत्ती-

रर्थं समर्थयति शब्द इति प्रसिद्धम् ॥

आस्वेष नाऽन्यतमयाऽपि वदत्यखण्डं

शब्दान्तराऽऽत्तविषयादधिकाऽर्थवृत्तेः ॥ १०४ ॥

टी० ॥ ननु सोऽयमित्यादेरर्थान्तराऽसंभवादखण्डाऽर्थतैव युक्तेत्याशङ्क्य किं मुख्यया वृत्त्या पदानां तद्वाक्यमखण्डनिष्ठं गौण्या वा लाक्षणिक्या वा न सर्वथाऽपीत्याह । आदायेति । अस्त्वेवं किं तत इत्याशङ्क्याऽऽह । आस्विति । मुख्याऽऽदिवृत्तिषु मध्य इत्यर्थः । एषः शब्दः । कुतो न वदति तत्राऽऽह । शब्दान्तरेति । एकपदोपात्तविषयादधिकाऽर्थवृत्तेः शब्दस्येति शेषः अन्यथा वाक्यत्वमेव न स्यादिति भावः ॥ १०४ ॥

मू० ॥ आधिक्यमुत्सृजति शब्दगणो निजेऽर्थे

शब्दान्तराऽऽत्तविषयादिति मन्यमानाः ॥

Digitized by Google

वाक्यत्वमेव पदजातगतं विहन्यु-
र्न ह्यस्ति हस्तकरशब्दगतं तदेषाम् ॥ १०५ ॥

टी० ॥ वाक्यत्वाऽनुपपत्तिमेव स्पष्टयति । आधिक्यमिति । पदान्तराऽनुपाऽऽत्तविशेषमित्यर्थः । उत्सृजति न बोधयति । शब्दगणः वाक्ये प्रयुक्तः पदसमूहः । वाक्यत्वविघाते दृष्टान्तमाह । न हीति । हस्तः कर इत्यादिपदगतम् । तद्वाक्यत्वम् । एषां वादिनां शब्दानां वा । यदि वाक्ये प्रयुक्तानि पदानि मुख्याऽऽद्यन्यतमया वृत्त्याऽन्यमन्यमर्थविशेषं न प्रतिपादयेयुः किं त्वेकमेव तदा तेषां पर्यायताऽऽपत्तेर्हस्ताऽऽदिपदसमूहवद्वाक्यत्वं न स्यात् अपर्यायपदसमूहस्यैव वाक्यत्वादिति ॥ १०५ ॥

मू० ॥ किं च स्वयंप्रभमलुप्तचिदेकरूपं
सर्वप्रमाणविषयाद्बहिरभ्युपेत्य ॥
आत्मानमात्मनि च शास्त्रमुदाहरन्तः
सिद्धान्तमभ्युपगतं परिपीडयन्ति ॥ १०६ ॥

टी० ॥ किं च ब्रह्मणो वेदान्तजन्यज्ञानविषयत्वाऽभ्युपगमे सिद्धान्तहानिरित्याह । किं चेति । स्वयंप्रभत्वे हेतुरलुप्तेति । अत एव सर्वेषां प्रमाणानामविषय इत्याह । सर्वप्रमाणेति । आत्मानं स्वप्रकाशाऽऽदिस्वभावं सर्वप्रमाणविषयादनात्मनो वहिरन्यमभ्युपेत्येति संबन्धः अत एवेयं श्रुतिः अन्यदेव तद्विदितादिति । तर्ह्ययमभ्युपगम उचित एवेत्याशङ्क्य वेदान्तमेयता तस्यैवं न सिध्येदित्यभिप्रेत्य विपक्षे बाधकमाह । आत्मनि चेति ॥ १०६ ॥

मू० ॥ सर्वेषु वस्तुषु जडेष्वजडप्रकाशं
कुर्वत्प्रमाणमिति संप्रतिपन्नमेतत् ॥
ब्रह्माऽऽत्मवस्त्वजडबोधवपुः कुतोऽस्मि
वेदान्तवाक्यजनिताऽजडसंविदन्या ॥ १०७ ॥

Digitized by Google

टी० ॥ किं च वेदान्तानां ब्रह्मपर्यायकं चित्स्वरूपत्वाच्च मानत्वमित्याह । सर्वत्रेति । जडेषु अस्वप्रकाशेषु घटपटाऽऽदिष्वित्यर्थः अजडप्रकाशं स्वयं प्रकाशं विषयस्फुरणं घटाऽऽदीनां जडत्वात्स्वतः स्फुरणाऽसंभवाच्चतुरादि तत्र स्फुरणमादधद्व्यवहार उपयुज्यत इति तस्य तत्र प्रामाण्यं युक्तं ब्रह्माऽऽत्मनस्तु अजडबोधस्वरूपतया स्वमहिम्नैव सिद्धेस्तदन्याऽजडप्रकाशाऽसंभवाच्च किं तत्र जनयित्वा वेदान्तास्तत्र प्रामाण्यं लभेरन्नित्याह । ब्रह्माऽऽत्मेति । अजडेति च्छेदः ॥ १०७ ॥

मू० ॥ किं च क्रियापदमपेत्य पदानि वाक्य-
भावेन सम्यगिह सङ्गतिमाप्नुवन्ति ॥
नाऽत्र क्रियापदमपेक्षितमामनन्ति
वाक्यं कुतो भवति वेदशिरस्तदानीम् ॥ १०८ ॥

टी० ॥ किं च वेदान्तानां सिद्धब्रह्मनिष्ठत्वे तद्गतपदानां परस्परमन्वय एव न सिध्येत् क्रियापदेनैव सिद्धपदानामन्वयनियमात् ब्रह्मवाक्येच क्रियाऽसंभवादित्याह । किं च क्रियेति । इह लोके । नन्वत्राऽप्यसि अस्मीत्यादि क्रियापदमस्तीति चेत्तत्राऽऽह । नाऽत्रेति । वेदान्ते अस्याऽऽदिक्रियापदमपेक्षितं विवक्षिताऽर्थं वेदान्तिनो नाऽऽमनन्तीतिसंबन्धः अस्याऽऽदिपदस्याऽपि सन्मात्रनिष्ठत्वाऽभ्युपगमाच्चाऽस्य क्रियापदत्वं साध्याऽर्थस्यैव तथात्वादतस्तन्निमित्तो न पदसमन्वय इत्याह । वाक्यमिति ॥ १०८ ॥

मू० ॥ नाऽपूर्वमर्थमुपलम्भयितुं पदानां
सामर्थ्यमस्ति परिहृत्य तु वाक्यभावम् ॥
स्वाऽर्थस्मृतिं हि जनयन्ति पदानि लोके
विज्ञातसंगतितया न तु कार्यमन्यत् ॥ १०९ ॥

टी० ॥ ननु तर्हि पदविधयैव वेदान्तपदानि ब्रह्म प्रमापयिष्यन्ति इति नेत्याह । नाऽपूर्वमिति । तुरवधारणे नेवाऽस्तीति संबन्धः कुतः सामर्थ्याऽभावस्तत्राऽऽह । स्वाऽर्थेति । तत्राऽपि हेतुमाह । लोक इति । वृद्धव्यव-

Digitized by Google

द्वारेत्यर्थः। अन्यदनुभवरूपम्। पदानि हि वृद्धव्यवहारे स्वाऽर्थे गृहीतसङ्गतिकान्येव वाक्याऽर्थं वाक्यविधया बोधयन्तीति वाच्यम्। अन्यथाऽव्युत्पन्नानामपि वाक्यश्रवणे तदर्थाऽनुभवप्रसङ्गात् एवं च पदानि पदविधया पूर्वाऽनुभूतस्वाऽर्थस्मृतिमेव जनयन्ति न त्वनुभवम् अपूर्वाऽर्थत्वाऽभावात् वाक्यभावेनैव तेषामपूर्वाऽर्थोपलम्भशक्तिः वाक्याऽर्थस्य विशिष्टस्य वैशिष्ट्यस्य वाऽपूर्वत्वात्तदभावे च वेदान्तानां नाऽपूर्वोपलम्भनशक्तिरस्तीति भावः॥ १०९॥

मू० ॥ हित्वा न वाक्यपदते प्रतिपत्तिहेतु-
र्वेदो भवेदिति कथं चन वक्तुमीशः॥
कश्चित्कदा चिदपि तत्र कुतः श्रुतीनां
प्रामाण्यमात्मनि भवेदिति वर्णयन्ति ॥ ११०॥

टी० ॥ तर्हि वर्णानामेव प्रागनवगताऽर्थतया प्रामाण्यं स्यादिति तत्राऽऽह। हित्वेति। वाक्यपदते वाक्यतां पदतां चेत्यर्थः। वेदो वाक्यपदते हित्वा कथं चन कथमपि वर्णाऽऽत्मनाऽपि कदा चिदपि प्रतिपत्तिहेतुर्भवेदिति कश्चिदपि वक्तुं नेशः। तत्रैवं सति श्रुतीनां प्रामाण्यमात्मनि कुतो भवेदिति वर्णयन्ति वर्णनीयमित्यर्थः। अथ वैवं सत्याऽऽत्मनि श्रुतीनां प्रामाण्यमिति यद्वर्णयन्ति तत्कुतः किंबलादित्यर्थः। न हि वर्णमात्रात्क्वाऽप्यनुभवोऽस्तीति भावः॥ ११०॥

मू० ॥ किं च प्रमान्तरमिहाऽभ्युपयन्प्रतीचि
वेदान्तवाक्यमनुवादकमभ्युपेयात् ॥
मानान्तरं यदि च नेच्छति शब्दशक्ते-
स्तत्त्वग्रहः कथमिति प्रतिपादनीयम् ॥ १११॥

टी० ॥ किं च वेदान्तस्थसत्यज्ञानाऽऽदिपदानामनात्मनि संगतिग्रहो न संभवति न ह्यात्मातिरिक्तं सत्यादिस्वभावं किं चिदस्ति नाऽप्यात्मनि तेषां सङ्गतिग्रहस्तद्ग्राहकमानानामात्मनि प्रवृत्तौ वेदान्तवाक्यमनुवादकं स्यात्। आत्मनि मानान्तराऽभावे च तत्र सद्धाविश-

ग्रहस्य कथं सङ्गतिग्रहः स्यात्तेन विना वा कथं वेदान्तानां तत्प्रामाण्य-मित्याह । किं च प्रमान्तरमिति । अभ्युपयन्नङ्गीकुर्वन्कथमिति प्रतिपादनी-यमिति न कथमपि स्यादित्यर्थः ॥ १११ ॥

मू० ॥ किं च प्रवृत्तिविनिवृत्तिविहीनवस्तु-
तत्त्वप्रतीतिजननान्न च किंचिदस्ति ॥
पुंसः प्रयोजनमतोऽपि न तत्र मानं
वेदान्तवाक्यमिति युक्तिमदुच्यमानम् ॥ ११२ ॥

टी० ॥ एवं वेदान्तानां सिद्धब्रह्मबोधकत्वे नदीतीरे फलसत्तावा-क्यवन्मानान्तरसाऽपेक्षताऽऽपत्तिर्मानान्तराऽभावे च सङ्गतिग्रहाऽसंभवाच्च तत्र तेषां प्रामाण्यमित्युक्तम् । इदानीं सिद्धवस्तुज्ञानेन प्रवृत्तिनिवृत्त्यसंभ-वात्प्रवृत्तिनिवृत्ती विना च सुखप्राप्तिदुःखपरिहाररूपप्रयोजनाऽसंभवा-त्तेन विनाऽध्ययनविधिपरिगृहीतवेदान्तानां प्रामाण्याऽयोगादपि न सिद्ध-निष्ठं वेदान्तप्रामाण्यमित्याह । किं च प्रवृत्तीति । प्रवृत्तिनिवृत्ति*विहीनं तदयोग्यं यद्वस्तुतत्त्वमात्मतत्त्वं तत्प्रतीतिजननादित्यर्थः हेयोपादेययोः क-लञ्जभक्षणाऽऽग्निहोत्राऽऽद्योरनर्थाऽर्थसाधनयोर्ज्ञानात्तद्भक्षणाद्विनिवृत्ति-रग्निहोत्राऽऽदौ च प्रवृत्तिः संभवति तद्वाक्यं प्रयोजनवदर्थनिष्ठमात्मतत्त्वं तु नित्यसिद्धत्वाच्च हेयं नाऽप्युपादेयमिति न तज्ज्ञानात्प्रवृत्त्यादिसंभव इति निष्प्रयोजनमेवाऽऽत्मवाक्याऽध्ययनं स्यात्तच्चानुपपन्नं न ह्युपेक्षाज्ञानेन तदध्ययनविधिः फलवान्भवतीति न तत्र वेदप्रामाण्यं युक्तमिति भावः ॥ ११२ ॥

मू० ॥ अज्ञातमर्थमवबोधयतः प्रमायां
हेतुत्वमभ्युपगतं ननु वेदविद्भिः ॥
अज्ञातता च परमात्मनि दुर्निरूपा
विज्ञानमात्रवपुषीति न मानकृत्यम् ॥ ११३ ॥

* विनिवृत्ति ॥ पा० २ ।

Digitized by Google

टी० ॥ किं चाऽज्ञातार्थोऽवगमकं प्रमाणमिति प्रमाणसामान्यलक्षणं वेदविद आहुः । विशिष्य च वेदस्य तथैव वक्तव्यं यथोऽनुपलब्धे तत्प्रमाणं बादरायणस्येति जैमिनिनोक्तेः । अन्यतो ज्ञातेऽर्थे मानाऽभावप्रयुक्ताऽसत्त्वशङ्काऽभावेन वेदस्य तत्र तात्पर्यकल्पनासंभवाच्च न च तात्पर्यं विना शब्दः स्वाऽर्थे प्रमाणमित्याह । अज्ञातमिति । अवबोधयतः चक्षुरादिकरणस्येति शेषः । ततः किं तत्राऽऽह । अज्ञाततेति । चोऽवधारणे दुर्निरूपेवेति संबन्धः तत्र हेतुर्विज्ञानेति स्वप्रकाशचैतन्याऽऽत्मनि प्रतीचि नाऽज्ञानं वक्तुं शक्यं न हि प्रचुरप्रकाशे सवितरि तमः संभवति ततोऽज्ञाताऽर्थोऽवगमलक्षणप्रमाणकृत्याऽभावादाऽऽत्मनि वेदान्तप्रामाण्यसंभव इति भावः ॥ ११३ ॥

मू० ॥ बोधस्वभावकमबुद्धमनुष्णमुष्णं
शीतस्वभावकमशीतमितीदृशानि ॥
कः श्रद्दधीत पुरुषो वचनानि तस्माद्
ब्रह्माऽप्रबुद्धमिति वाक्यमयुक्तमाहुः ॥ ११४ ॥

टी० ॥ ननु नेदं प्रमाणसामान्यलक्षणं धारावहनद्वितीयाऽऽदिबुद्धावभावात् । किं तु यथाऽर्थोऽनुभवः प्रमा तत्करणं प्रमाणमिति सामान्यलक्षणमिति चेत्र । धारावहनबुद्धिसत्त्वेऽपि तद्विषयस्य प्रथमज्ञानेन निश्चितस्याऽसत्त्वशङ्काऽनुदयेन द्वितीयाऽऽदिज्ञानानां तदनिवर्तकानां प्रमेयसत्त्वप्रयोजकप्रामाण्याऽभावेन तत्र लक्षणाऽगमनस्याऽदोषत्वाद्यथाऽर्थोऽनुभवत्वं च शुक्तिरजताऽऽदिज्ञानाऽसाधारणम् । अबाधिताऽर्थज्ञानं प्रमेत्यपि न बाधस्य बोध्याऽभावप्रमारूपतयाऽऽत्माऽऽश्रयादित्यज्ञाताऽर्थबोधकत्वमेव परीक्षकसंमतं प्रामाण्यं तच्चाऽऽत्मनि वेदान्तानां न संभवति अज्ञानाऽभावादित्युक्तं तदभ्युपगमे च तस्य स्वप्रकाशता हीयेत न ह्यात्मतत्त्वं स्वप्रकाशमबुद्धमिति वचनद्वयप्रामाण्यं संभवतीति सदृष्टान्तमाह । बोधस्वभावकमिति । आहुः वेदान्तिन इति शेषः ॥ ११४ ॥

मू० ॥ उपाध्यभावेनभवेदुपाधिम-
तटस्थमज्ञानमुपाधिरिष्यते ॥
प्रमाणबुद्धेर्न तदात्मवस्तुनि
स्वयंप्रकाशे न ततोऽत्र मानधीः ॥ ११५ ॥

टी० ॥ नन्वज्ञानविशिष्टं न प्रमाणगोचरस्तस्याऽपि प्रमाणगोचरत्वाऽऽपत्तेः * तस्य ततो निवृत्त्ययोगाच्च नाऽपि तदुपलक्षितं वस्तुमात्रे प्रमाणप्रसङ्गेन तदभावेऽप्यनुपपत्त्यभावादित्याशङ्क्य नाऽज्ञानं तत्र विशेषणं न वोपलक्षणं किं तूपाधिः ॥ उपाधिश्च यावत्कार्याऽवस्थायी तदनन्वयी यथा श्रोत्रत्वस्य कर्णशष्कुली एवं चाऽज्ञानाऽभावे वस्तुनः प्रमेयत्वं न संभवति कर्णशष्कुल्यभाव इव श्रोत्रत्वमित्यभिप्रेत्याऽऽह । उपाध्यभाव इति । कर्णशष्कुल्याद्यभाव इत्यर्थः उपाधिमत्तत्प्रयुक्तश्रोत्रत्वाऽऽदि । तटस्थं प्रमेयाद्बहिर्भूतम् । किं तदुपलक्षणं नेत्याह । उपाधिरिति । अत्र तटस्थमित्यनेन विशेषणादुपाधेर्विशेषो दर्शितः उपाध्यभाव इत्यादिनोपलक्षणादिति द्रष्टव्यं प्रमाणबुद्धेरुपाधिरिति संबन्धः । अज्ञानस्योपाधित्वे फलितमाह । न तदात्मेति । तदज्ञानं स्वयंप्रकाश आत्मवस्तुनि न तादात्म्येनाऽप्युपाधिः संगच्छत इत्यर्थः । यत एवमज्ञानाऽसंभव आत्मनि ततो हेतोरत्राऽऽत्मनि न मानधीः संभाव्यत इत्युपसंहारः ॥ ११५ ॥

मू० ॥ अद्वैतमात्मपदमाहुरनन्यमानं
द्वैतं प्रमाणमिह च प्रतिपादयन्ति ॥
वाक्ये निजे पदविरोधमनीक्षमाणाः
पाण्डित्यमप्रतिहतं प्रतिलभ्य धीराः ॥ ११६ ॥

टी० ॥ किं चाऽद्वैतलक्षणवादिना वेदान्ताऽर्थोऽवगन्ता प्रमाता वेदान्ताः प्रमाणं तदुपदेष्टा गुरुस्तदुपकरणं युक्त्याद्यभ्युपगम्यते न वा । आद्ये व्याहतिः द्वितीये न प्रमेयसिद्धिः । एवं स्वप्रकाशं स्वाऽन्तिरिक्तप्रमाणागम्य-

* विषयत्वाऽऽप । पा० २ ।

मित्यपि प्रमाणविरुद्धमित्याह । अद्वैतमिति । आहुः वेदान्तिन इति शेषः द्वैतमुक्तप्रमात्रादिप्रमाणं प्रमितिसाधनं चेति संबन्धः । पाण्डित्यमित्याद्युपहासः ॥ ११६ ॥

मू० ॥ मातृप्रमाणमितिमेयविभागभिन्नं
ब्रह्मैव चेद्भवति तत्र च वर्णयामः ॥
कूटस्थताऽपहतिरेकरसत्वहानिः
शाक्यैश्च सन्धिरिति दूषणमन्यदत्र ॥ ११७ ॥

टी० ॥ ननु प्रमात्रादिविभागः सर्वोऽप्यस्त्येव न चैवमद्वैतक्षतिः अद्वैतब्रह्मण एव निखिलप्रपञ्चपरिणामितया मात्रादेस्तदभिन्नत्वादित्येवं वदन्तं बौद्धगन्धिनमेकदेशिनं प्रत्याह । मातृप्रमाणेति । मितिः प्रमा तत्र च वर्णयामो दूषणमिति संबन्धः । तदेवाऽऽह कूटस्थताऽपहतिरिति । निर्विकारस्य ब्रह्मणः प्रमात्रादिविकाराऽभ्युपगमे निर्विकारश्रुतिविरोधः एवमनेकाऽऽत्मप्रपञ्चाऽभेदे विज्ञानघन एवेत्यादिश्रुत्यवगतैकरसत्वहानिरेवं ज्ञानाऽऽत्मनो ब्रह्मणः स्वाऽवभास्यप्रपञ्चाऽऽकारत्वे शाक्यैर्विज्ञानवादिभिः सन्धिः कृतः स्यात्तन्मतप्रवेशाऽऽपत्तिरिति यावत् । चकारदर्शितं दूषणान्तरमप्याह । अन्यदत्रेति । युगपदेकत्र भेदाऽभेदविरोधादित्यर्थः ॥ ११७ ॥

मू० ॥ अज्ञानकल्पितमनिर्वचनीयमिष्टं
मात्रादिमानफलपर्यवसानमेतत् ॥
इत्युच्यते यदि तदा परमाऽऽत्मनोऽपि
मेयत्वतो भवति कल्पितताप्रसङ्गः ॥ ११८ ॥

टी० ॥ ननु प्रमात्राऽऽदिविभागः सत्यो न भवति येनोक्तदूषणं स्यात् किं तु दृश्यत्वाच्छुक्तिरजतवत्तत्राऽऽज्ञानकल्पित इति न कोऽपि दोष इत्याशङ्क्याह । अज्ञानकल्पितमिति । ननु तदपि सच्चेत्कथं नोक्तदोषस्तत्राऽऽह । अनिर्वचनीयमिति सदसद्विलक्षणमिति नोक्तदोष इत्यर्थः एतन्मात्राद्यज्ञानकल्पितमिति संबन्धः माता आदिर्यस्य मानफलं पर्यवसाने च यस्य तत्त-

योक्तं दृश्यत्वेन प्रमात्रादेः कल्पितत्वे ब्रह्मणोऽपि तत्प्रसङ्गस्तस्याऽपि वेदान्तवेद्यतया दृश्यत्वादित्याह । तदेत्यादिना ॥ ११८ ॥

मू० ॥ ब्रह्म प्रमेयमथ नेष्टमिह प्रमाणं
वेदान्तवाक्यमिति पचपराहतिर्वः ॥
न ह्यप्रमेयमवबोधयदस्ति मानं
नाऽदाह्यदाहक इति प्रथितः कृशानुः ॥ ११९ ॥

टी० ॥ ननु नाऽस्ति ब्रह्मणो दृश्यत्वं स्वप्रकाशत्वादिति चेत्तर्हि तत एव वेदान्तप्रमेयमपि न स्यात् अदृश्यस्य मानविषयत्वाऽनुपपत्तेरित्याह । ब्रह्मेति । अथ चेदित्यर्थः ब्रह्म प्रमेयं नेष्टं चेत्तर्हि इह ब्रह्मणीति संबन्धः । पचपराहतिमेव सदृष्टान्तं व्यनक्ति । नह्यप्रमेयमिति । अदाह्यं गगनाऽऽदि तस्य दाहक इत्यर्थः ॥ ११९ ॥

मू० ॥ किं चाऽप्रसिद्धमिदमत्र जगत्त्रयेऽपि
स्वाऽज्ञानकल्पितमनिर्वचनीयमेकम् ॥
निःशेषतीर्थदृगुदीरिततन्त्रमार्गे
सिद्धे यतः सदसती सकलेऽपि तन्त्रे ॥ १२० ॥

टी० ॥ अज्ञानकल्पितमनिर्वचनीयमित्यत्रोक्तं मात्रादेरनिर्वचनीयत्वमुपेत्य ब्रह्मणोऽपि तत्प्रसङ्ग इति दूषितम् । इदानीं तदेवाऽसंप्रतिपन्नमित्याह । किं चाऽप्रसिद्धमिति । इदं शब्दाऽर्थमाह । स्वाऽज्ञानेति । एकमेकमपि वस्त्विति शेषः । ननु लोकाऽप्रसिद्धमपि कस्मिंश्चिच्छास्त्रे वैशेषिकाऽभिमतविशेषवत्सिद्धं स्याच्चेत्याह । निःशेषेति । तीर्थदृशः शास्त्राऽर्थविदः वैशेषिकाऽऽदिनिखिलशास्त्राऽर्थविद्भिरुदीरिततन्त्रमार्गे तन्त्र्यत इति तन्त्रं शास्त्राऽर्थः तत्प्रतिपत्त्युपाये सकलेऽपि तन्त्रे शास्त्रे सदसती एव सिद्धे यत इति संबन्धः वैशेषिकाऽऽदिभिर्हि स्वशास्त्रे सदसद्वस्तुनी एव निरूपिते न तु तदुभयविलक्षणमपि किं चिद्विशेषवस्तु लोकाऽप्रसिद्धोऽपि प्रमाणबलात्तैरभ्युपेत इति न तद्विदमभ्युपगन्तुमुचितमिति भावः ॥ १२० ॥

मू० ॥ अज्ञानमप्यसदभावतया प्रसिद्धे
द्वैतप्रसूतिकृदतो न तदभ्युपेयम् ॥
नाऽसत्कदाचिदपि सज्जनने समर्थं
वन्ध्या सुता न खलु पुत्रशतं प्रसूते ॥ १२१ ॥

टी० ॥ ननु वैशेषिकाऽऽदिभिरज्ञानाऽनभ्युपगमात्तत्कल्पितमनिर्वचनीयं नाऽभ्युपेतं सिद्धान्ते तु तत्सत्त्वात्कथं तत्कृतमनिर्वचनीयं नाऽभ्युपेयमित्याशङ्क्याऽज्ञानकल्पितत्वमेव न संभवतीत्याह । अज्ञानमिति । असत्त्वच भवति तत्र हेतुः अभावतया प्रसिद्धेरिति अज्ञानमिति नञा ज्ञानाऽभावतयाऽज्ञानं प्रतीयते अभावश्च न सन् तत्रसत्ताजातेरभावात् अभावत्वाऽऽदिस्वरूपस्याऽपि दुर्निरूपत्वादित्यर्थः अज्ञानस्याऽसत्त्वसमर्थनफलमाह । द्वैतेति । यतोऽसदज्ञानमतो द्वैतस्योत्पत्तिकृत्तदज्ञानं नाऽभ्युपेयम् । असदपि तत्प्रागभाववत्कथं न द्वैतं जनयेदित्याशङ्क्य तद्दृष्टान्ताऽसंमत्याऽसतोऽकारणत्वं सदृष्टान्तमाह । नाऽसदिति । न हि ज्ञानाऽभावोऽज्ञानं सतो भावस्य प्रपञ्चस्योपादानं भवितुमर्हतीति भावः ॥ १२१ ॥

मू० ॥ वाक्यप्रसूतमतिरिन्द्रियजन्यधीव-
न्नाऽर्थोऽऽपरोक्ष्यजननी भवितुं समर्था ॥
तेनाऽस्तु वाक्यजनिताऽऽत्मपरोक्षबुद्धि-
र्भ्रान्तिः सदाऽजडतयाऽनुभवे परोक्षे ॥ १२२ ॥

टी० ॥ किं चेतोऽपि वेदान्तानां नाऽपरोक्षे ब्रह्मणि प्रामाण्यं संभवतीत्याह । वाक्यप्रसूतेति । किं वेदान्ता ब्रह्मणि अपरोक्षां धियं जनयन्ति किं वा परोक्षां नाऽऽद्य इत्याह । इन्द्रियेति । इन्द्रियजन्यज्ञानवद्वाक्यजन्या मतिरर्थोऽऽपरोक्ष्यस्याऽर्थोऽभिव्यक्तेर्जननी भवितुं समर्था न वाक्यजन्यत्वाच्चाऽपरोक्षेत्यर्थः । ततो द्वितीयः परिशिष्यत इत्याह । तेनेति । तत्र दोषमाह । भ्रान्तिरिति । तदर्थं ब्रह्माऽऽत्मानं विशिनष्टि । सदेति । सदा परोक्ष इति संबन्धः । तदर्थमाह । अनुभव इति । अनुभवोऽपि वेद्यस्येव तस्य

सदाऽऽपरोक्ष्यं तदर्थमाह । अजडतयेति । तथा च वेदान्तानां तत्राऽप्रामाण्यमेव स्यादिति भावः ॥ १२२ ॥

मू० ॥ नित्याऽपरोक्षमपि वस्तु परोक्षरूपं
वेदान्तवाक्यमवबोधयति स्वभावात् ॥
प्रामाण्यमत्र कथमस्य वदोपपन्नं
न ह्यन्यदन्यदिति बोधयतः प्रमात्वम् ॥ १२३ ॥

टी० ॥ नन्वात्मा चेन्नित्याऽपरोक्षस्तर्हि घटाऽऽदाविन्द्रियजन्यज्ञानमिव वेदान्तजन्यमपि तत्राऽपरोक्षमस्तु मास्तु वेदान्ताऽप्रामाण्यमिति नेत्याह । नित्याऽपरोक्षमिति । स्वभावाच्छब्दस्वभावात् । शब्दो हि लोके घटाऽऽदिगोचरो वेदे चाऽग्निहोत्राऽऽदिगोचरस्तत्र परोक्षज्ञानमेव जनयतीति शब्दस्य परोक्षज्ञानजनकत्वमेव स्वभावः नत्विन्द्रियस्येवाऽपरोक्षज्ञानजनकत्वमिति कथं वेदान्तानामपरोक्षे वस्तुनि परोक्षज्ञानं जनयतामप्रामाण्यं न स्यादित्याह । प्रामाण्यमिति । नन्वपरोक्षं सत्यज्ञानाऽऽदिस्वभावं ब्रह्म तथैव बोधयन्ति वेदान्ता न विपरीततया तच्च ज्ञानं शब्दस्वभावात् परोक्षमित्येतावन्मात्रमिति कथं प्रामाण्यं न स्यादित्यत आह । न ह्यन्यदिति । वेदान्तजन्यज्ञानस्य परोक्षत्वे तद्विषयब्रह्माऽपि परोक्षं वाच्यं परोक्षाऽर्थविषयस्यैव ज्ञानस्य परोक्षत्वदर्शनादेवं च परोक्षं ब्रह्म यत्साक्षादपरोक्षादहं ब्रह्माऽस्मीति वाक्यमपरोक्षतया प्रतिपादयत्कथं प्रमाणं न चाऽपरोक्षज्ञानविषयः परोक्षं ब्रह्माऽस्ति येन सदर्थतया वाक्यजन्यं परोक्षज्ञानप्रामाण्यं* भवेदित्यर्थः । अन्यत्परोक्षं ब्रह्म अन्यदिति अपरोक्षमिति बोधयत इत्यर्थः ॥ १२३ ॥

मू० ॥ वस्त्वस्तु नित्यमपरोक्षमिदं तु वाक्यं
तद्वस्तु वक्तुमपरोक्षमशक्तमेव ॥
न ह्यस्ति शब्दजनिताऽथ जगत्त्रयेऽपि
बुद्धिः करोति खलु या विषयाऽऽपरोक्ष्यम् ॥ १२४ ॥

* ज्ञानं प्रमाणं । पा० २ ।

Digitized by Google

टी० ॥ नन्वग्निहोत्राऽऽदिवाक्यस्य परोक्षज्ञानजनकत्वेऽपि शब्दस्य न तत्स्वभावः कल्पनीयः दशमस्त्वमसीत्यादिवाक्यस्याऽपरोक्षज्ञानजनकत्वात् । अन्यथा तत्राऽपरोक्षोऽदशमत्वभ्रमस्ततो न निवर्ततेत्याशङ्क्य दृष्टान्ताऽसंप्रतिपत्त्या दूषयति । वस्त्वस्त्विति । अपरोक्षं यथा स्यात्तथा तद्वस्तु वक्तुमशक्तमित्यर्थः । अदशमत्वादिभ्रमस्य तत्रेन्द्रियजन्यसाक्षात्कारादेव निवृत्तेः शब्दस्य तत्राऽपि परोक्षज्ञानजनकत्वमेवेति न तत्स्वभावभङ्ग इति भावः ॥ १२४ ॥

मू० ॥ अत्राऽऽह यद्यपि किमप्युपनेयमत्र
चैतन्यवस्तुनि न संभवति प्रमाणैः ॥
अस्त्येव तत्र भवभीतिनिदानभूत-
मज्ञानमात्रमपनेयमनन्यमाने ॥ १२५ ॥

टी० ॥ पूर्वं घटाऽऽदौ चक्षुरादिप्रमाणस्य स्वप्रकाशस्फुरणाऽऽधानवच्चिदात्मनि वेदान्तानां तदसंभवाच्च प्रामाण्यसंभव इत्युक्तम् । इदानीं वेदान्तजन्यवृत्त्या तत्रस्फुरणाऽजननेऽपि न वेदान्तानामानर्थक्यमविद्यानिवृत्तेस्तत्साध्यत्वेन तत्र वेदान्तप्रामाण्यसंभवादिति सिद्धान्तिशङ्कां दूषयितुमनुवदति । अत्राऽऽहेति । उपनेयमाधेयं स्फुरणमनन्यमाने स्वप्रकाशे तत्राऽस्त्येवेति संबन्धः ज्ञानमज्ञानमात्रं निवर्तयति प्रपञ्चस्तु तन्निवृत्त्या निवर्तते । अथ वा प्रपञ्चोऽपि तद्विकारः तदात्मक एवेति मात्रमित्युक्तम् ॥ १२५ ॥

मू० ॥ नैतत्प्रमाणमपनेतृ सतो न ताव-
न्नैतन्निवर्त्यमसतोऽप्युपघातसिद्धे ।
नाऽप्यन्यदस्ति सदसद्यदनेन हेयं
तस्मात्प्रमाणमपनेतृ न कस्य चिद्धः ॥ १२६ ॥

टी० ॥ एतद् दूषयति । नैतदिति । त्वदुक्तं नेत्यर्थः । कुतस्तत्राऽऽह । प्रमाणमिति । न तावत्प्रमाणं सतोऽज्ञानस्याऽपनेतृ निवर्तकं सत आत्मवदनिवर्त्यत्वात् एतत्प्रमाणमसतोऽप्यज्ञानस्योपघातसिद्धे निवृत्तिसिद्धे नि-

योज्यं योजनीयं नाऽसतो निवृत्त्यनुपपत्तेर्नाप्येतत् पक्षद्वयादन्यत् सदसदात्मकमज्ञानमस्ति यदनेन प्रमाणेन हेयं स्यात् विरोधेनैकस्य सदसदात्मकत्वाऽयोगात् । यस्मादज्ञानस्योक्तकल्पत्रयेऽपि निवृत्तिर्न संभवति तस्माद्वा युष्माकं मते प्रमाणं वेदान्तवाक्यं कस्याऽपि न ज्ञानद्वाराऽपनेत्रिति वेदान्ताऽऽनर्थक्यं तदवस्थमेवेति भावः ॥ १२६ ॥

मू० ॥ मानं न कारकमिति प्रथितं पृथिव्यां
स्याच्चेत्क्रियावदिदमुज्झति मानभावम् ॥
जन्यं न मानफलमित्यपि युष्मदीयाः
संविद्रते न खलु जातु चिदन्तरेऽस्मिन् ॥ १२७ ॥

टी० ॥ किं चाऽविद्यानिवृत्तिरसती चेत्र प्रमाणाज्जायेत सती चेत्तज्जनकमानस्य कारकताऽऽपत्तिः जडक्रियापर्यवसायिनस्त्वियमात्र च तदुपपन्नं मानस्य व्यञ्जकतयाऽकारकत्वव्याप्तिविरोधादित्यभिप्रेत्याह । मानं न कारकमिति । एवं तदाकारकस्याऽमानत्वं व्याप्तिविरोधं चाऽऽह । स्याच्चेदिति । कारकमित्यनुषङ्गः क्रियावदग्निहोत्राऽऽदिक्रियावत् । अथ वा क्रियावत् क्रियाजनकं कारकमिति यावत् । स्यादिति संबन्धः । इदं मानमुज्झति त्यजेदित्यर्थः । ननु चक्षुरादेः प्रमाणस्य जडज्ञानक्रियाजनकत्वं सर्वसंमतमित्याशङ्क्य तदपि न भवतां संमतमित्याह । जन्यं न मानफलमिति । संविद्रते संजानते अङ्गीकुर्वत इति यावत् । अजडाऽजन्याऽभिव्यक्ताऽनुभवस्यैव सर्वप्रमाणफलत्वेन ब्रह्मवादिभिरङ्गीकाराज्जडवृत्तिमात्रनिष्ठं न चक्षुरादिप्रामाण्यमिति भावः । अथ वा यथा मानं न कारकमिति नियममाहुः एवं जन्यं न मानफलमित्यपि स्वरूपाऽनुभवस्यैव सर्वप्रमाणफलत्वमिच्छन्तो वार्तिककृत्प्रभृतयोऽङ्गीकुर्वते तदप्येवं सति विरुद्धं स्यादित्याह । जन्यं न मानफलमिति । अस्तु तर्हि घटाऽऽदाविव ब्रह्मण्यभिव्यक्तं चैतन्यं प्रमाणफलमित्याशङ्क्य ब्रह्मणः फलाऽव्याप्यत्वाच्चैतदित्याह । न खल्विति । जातु कदाप्यस्मिन्नन्तरे अभिव्यक्ता चिच्च खल्विति संबन्धः वेदान्ताऽभिव्यक्तचैतन्यस्य निष्प्रपञ्चाऽऽत्मस्वरूपतया तत्फलत्वाऽसंभवादिति भावः ॥ १२७ ॥

Digitized by Google

मू० ॥ नाद्यापि वेदम्यहमनिर्वचनीयभाषां
सर्वप्रवादहृदयान्यपि गाहमानः ॥
तात्पर्यतो न च तथाविधमस्ति किं चि-
ल्लोकप्रसिद्धमपि यद्विषयेयमिष्टा ॥ १२८ ॥

टी० ॥ नन्वज्ञानस्य सदसद्विविकल्पेनाऽनिर्वचनीयत्वमुक्तमनुपपन्नम-निर्वचनीयत्वात्तस्य ज्ञाननिवर्त्त्यत्वसंभवान्नचैवं मानस्य कारकत्वप्रसङ्गोऽपि ह्यनिर्वाच्यस्य निवृत्तेरधिष्ठानचिन्मात्रतया तत्पर्यवसायिमानस्य व्यञ्जक-तयाऽकारकत्वादित्याशङ्क्याऽऽह । नाऽद्यापीति । वैशेषिकादिनिखिलशा-स्त्राऽभ्यासाऽनन्तरमपीत्यर्थः । अनिर्वचनीयभाषां सदसद्विलक्षणरूपां तां तर्हि सम्यक् शास्त्राऽन्तराऽनभ्यासात्तदज्ञानं नेत्याह । सर्वेति । सर्वशास्त्र-तात्पर्याणि गाहमानो विचारयन्नपीति संबन्धः तात्पर्यतस्तद्गतमनसा ततश्च तदभावादेव तदज्ञानं नाऽन्यनिमित्तं तदिति दर्शयन् लोकेऽपि तदप्रसिद्धिं दर्शयति । न चेति । तथाविधं सदसद्विलक्षणरूपाऽनिर्वचनीयम् । इयमनिर्वचनीयभाषा । लौकिकरजताऽऽदिभ्रमस्याऽप्यन्यथाख्यात्यादिरूप-त्वेन लोकेऽपि तदप्रसिद्धिरिति भावः ॥ १२८ ॥

मू० ॥ तस्मात्प्रमाणफलमत्र निरूप्यमाणं
ब्रह्माऽऽत्मवस्तुनि न संभवतीह किं चित् ॥
कृत्यं विना न च निरूपयितुं प्रमाणं
वेदान्तवाक्यमिह शक्यमनर्थकत्वात् ॥ १२९ ॥

टी० ॥ एवं वेदान्तानामुक्तन्यायैर्ब्रह्मणि प्रामाण्याऽसंभवसमर्थन-मुपसंहरति । तस्मादिति । अत्रस्फुरणाऽविद्यानिवृत्त्योर्मध्ये किं चिदपि निरूप्यमाणमिह ब्रह्माऽऽत्मवस्तुनि न संभवतीति संबन्धः । चोऽवधारणे नैव शक्यमिति संबन्धः एतच्च परोक्षत्वसद्वयत्वाऽऽदिकृतविरोधाऽऽदेर-प्युपलक्षणम् ॥ १२९ ॥

मू० ॥ कार्याऽन्वयाऽन्वयिनि वस्तुनि शब्दशक्तिं
श्रोतु प्रवर्तकाधियं परिकल्प्य बालः ॥

चेष्टावशात्पुनरपि प्रविभज्य भागं
भागस्य वाचकमिति स्वयमेव वेत्ति ॥ १३० ॥

टी० ॥ एवं वेदान्तानां मानान्तरविरोधादिभिन्ने सिद्धोदासीनप्रत्यगभिन्ने ब्रह्मणि प्रामाण्यमित्युक्तम् । इदानीं सर्वस्य वेदस्य कार्यपरत्वनियमाच्च शुद्धे ब्रह्मणि प्रामाण्यं लोके शब्दानां कार्यव्युत्पत्तिबलेन वेदस्याऽपि तदर्थत्वादित्यभिप्रेत्य कार्ये सर्वशब्दशक्तिग्रहं लोके दर्शयति । कार्याऽन्वयेति । बालो व्युत्पित्सुर्गामानयेत्यभियुक्तवाक्यश्रवणाऽनन्तरं प्रवर्त्तमानस्य श्रोतुर्गवानयनाऽऽदिचेष्टावशात् प्रवर्तकधियं गवानयनाऽऽदिकार्यमिति ज्ञानम् । विमता प्रवृत्तिरेतत्कार्यज्ञानपूर्विका एतत्प्रवृत्तित्वाद्यदेवं तदेवं यथा मम स्तनपानाऽऽदिप्रवृत्तिरिति परिकल्प्य तस्य कारणमालोचयन् गामानयेत्यादि शब्दाऽन्वयव्यतिरेकाभ्यां शब्दजन्यत्वं निश्चित्य तद्गोचरे वस्तुनि कार्ये प्रस्तुतवाक्यसामर्थ्यं स्वयमेव वेत्तीत्यनुषङ्गः तर्हि किं वाक्ये प्रयुक्तसर्वपदानामविशिष्टाऽर्थे शक्तिः तथा सति पर्यायता स्यात् न वक्ष्यमाणन्यायेन पृथगर्थत्वादित्याह । पुनरपीति । संमुग्धतया वाक्यसामर्थ्यग्रहणानन्तरं वाक्यभागं पदानि प्रविभज्य तत्तत्पदं भागस्य कार्याऽन्विततत्तदर्थस्य वाचकमित्यपि वेत्तीत्यर्थः लोके हि शब्दानां वृद्धव्यवहाराऽनुसारेण सामर्थ्यमवगम्यते वृद्धव्यवहारश्च प्रवर्तकवाक्याऽधीनः अन्यस्मात्प्रवृत्तिहेतुज्ञानाऽसंभवात् न हि गौस्तिष्ठतीति वाक्यात्कश्चित्प्रवर्तत इति वाक्ये प्रथमं सामर्थ्यं ग्राह्यं प्रवर्तकं च तद्बुद्ध्वा प्रवर्तते तच्च स्वस्मिन्कार्यमिति निर्णीतमतस्तज्ज्ञानमेव गामानयेतिवाक्यश्रवणानन्तरं मध्यमवृद्धस्य गवानयनाऽऽदिप्रवृत्त्याऽनुमीयते तच्च तस्य गवानयनाऽऽदिवाक्यजन्यमिति च ततस्तद्गोचरे विशिष्टकार्ये तद्वाक्यं समर्थमिति निश्चीयते प्रवर्त्तकवाक्यस्य तदन्यज्ञानस्य जनकत्वाऽसंभवेन तदशक्तत्वात् एवं संमुग्धतया पदसमुदायस्य विशिष्टकार्ये सामर्थ्यमवगत्य पश्चाद्गाम्बधान वत्समानयेत्यादौ विभज्य तत्तत्पदप्रयोगे अन्वयव्यतिरेकाभ्यामेव कार्याऽन्विततत्तदर्थे तत्तत्पदं शक्तमिति वेत्तीति सर्वशब्दानां कार्यमर्थः । न च पर्यायता कार्यविशेषस्य व्यभिचारेऽपि कार्यसामान्यस्य तदभावेन तदन्वितस्य शब्दाऽर्थत्वोपपत्तेरिति ।

नन्वेवं कार्यपदस्य कथं शक्तिः कार्यान्तराऽभावेन तदन्वितकार्याऽसंभवात् नाऽपि गवादौ तच्छक्तिरस्ति । न च कार्यपदं कार्यमात्रे शक्तमिति वाच्यं शब्दार्थस्याऽनेकरूपत्वप्रसङ्गादिति तत्राऽऽह । अन्वयेति । कार्यस्य योऽन्वयःसंबन्धस्तदन्वयिनि तदाश्रये कार्यस्य हि सिद्धेनाऽन्वयः सिद्धे-कार्ये च वर्तते अन्वयस्य द्विनिष्ठत्वादिति न शब्दशक्तिप्रयोजकरूपस्याऽने-करूपत्वमिति ॥ १३० ॥

मू० ॥ त्यक्तः कार्यान्विताथै वदितुमलमयं शब्द इत्येष पक्षो
नोक्तो योग्येतराऽर्थोऽन्वितमिति तु पुनः पूर्वमप्येष पक्षः ॥
किंतु स्यादस्य शक्तिर्निजसहजवशादन्विताऽर्थाऽभिधाने
योग्यत्वाऽऽदेस्तु पश्चात्स्वयमुपनिपतत्यस्य कार्यैदमर्थ्यम् ॥१३१॥

टी० ॥ ननु कार्याऽन्वयाऽन्वयित्वाऽपेक्षयाऽन्वितत्वस्य लघुशरीर-त्वात्तत्रैव शक्तिरस्तु अन्यथा गौरवात् । न चैवमतिलाघवेन तत्तदर्थमात्रे शक्तिरस्त्विति वाच्यम् । अन्वितस्यैव शब्दश्रवणानन्तरं नियमेन प्रतीतेरि-त्याशङ्क्य पूर्वपक्षी तदनुमोदते । त्यक्त इति । एष पक्ष इत्यनेन संबन्धः । अलं समर्थः । तर्हि किं योग्येतराऽन्विते शक्तिराश्रिता तदपि न अतिगौरवादि-त्यभिप्रेत्याऽऽह । नोक्त इति । अस्माभिरिति शेषः कस्तर्हि तव शब्दाऽर्थस्त-त्राऽऽह । किंतु स्यादिति । अस्य शब्दस्य निजसहजवशान्नैसर्गिकस्वभावाद-न्विताऽर्थाऽभिधाने शक्तिरिति संबन्धः तर्हि सिद्धोऽपि शब्दाऽर्थः स्यादिति नेष्टसिद्धिस्तत्राऽऽह । योग्यत्वाऽऽदेरिति । उपनिपतति आयाति आगच्छे-दित्यर्थः ॥ सिद्धपदार्थानां साध्येन कार्येणैवाऽन्वयो न तु सिद्धेन सिद्धसा-ध्ययोरेवाऽन्वये आकाङ्क्षायोग्यतासंभवादन्वितमात्रे शक्तादपि गवादिप-दाद्योग्यताऽऽदिमहिम्ना गवादेः कार्याऽन्वय एव सिद्धेरिति सर्वस्य शब्दस्य कार्यैदमर्थ्यं कार्यशेषत्वं कार्यप्रतिपादकत्वमिति ॥ १३१ ॥

मू० ॥ प्रवृत्त्यभावस्य विरोधि कार्यं
कालत्रयाऽनन्वितमाहुरेके ॥

Digitized by Google

स्वगोचरस्येप्सितसाधनत्वं
विज्ञापयत्प्रेरकमाहुरन्ये ॥ १३२ ॥

टी० ॥ ननु किमिदं कार्यं योग्यताऽऽदिवलाद्यदन्वयः पदार्थानामुपनिपतेत् । न तावद्धात्वर्थः तस्य स्वर्गाऽसाधनस्य स्वर्गकामिकार्यत्वाऽसंभवेनाऽन्येषां तदैदमर्थ्याऽयोगात् । नाऽपि नियोगरूपं तल्लोके तदभावात् । न चोभयसाधारणकृतिसाध्यत्वविशिष्टं तदिति वाच्यं स्वर्गघटाऽऽदेरपि नियोगवत्परम्परया तत्संभवेन तदन्वयस्याऽपि शब्दार्थत्वप्रसङ्गेन मतान्तरादविशेषादतो लोकवेदयोरनुगतं शब्दाऽर्थताप्रयोजकं न सिध्येदित्याशङ्क्याऽऽह । प्रवृत्तीति । यन्निमित्तं पुरुषस्य कामनाऽऽदियुक्तस्य नियमेन प्रवृत्त्यभावो न भवेत्तद्रागाऽऽदावतिव्याप्तिवारणाय तद्विशिनष्टि । कालत्रयेति । भूतभविष्यद्वर्तमानान्यतमकालाऽन्विततयाऽप्रतीयमानं स्वरूपेण कार्यस्य भविष्यत्कालाऽन्वयित्वादित्यर्थः यत्कालत्रयाऽनन्वितं प्रवृत्त्यभावस्य विरोधि तत्कार्यं रागाऽऽदौ घटाऽऽदिपदात्प्रतीयमानघटाऽऽदौ चाऽतिव्याप्तिवारणाय दलद्वयम् । एके गुरुमतैकदेशिनः अन्येषां तन्मतानुसारिणां नियोगकार्यलक्षणमाह । स्वगोचरस्येति । अत्र प्रेरकं कार्यमित्युक्ते रागे अतिव्याप्तिरत उक्तम् । स्वगोचरस्येत्यादि । तावति विज्ञापयदित्यन्त उक्ते इष्टसाधनत्वबोधकप्रमाणेऽतिप्रसङ्गः स्यादित्यत उक्तं प्रेरकमिति प्रमाणस्य बोधकत्वादेव न प्रेरकत्वमिति ततो व्यावृत्तिसिद्धिः । इदं तु लक्षणं धात्वर्थकार्यविलक्षणनियोगाऽऽख्यकार्यविषयं स्वगोचरस्येष्टसाधनत्वज्ञापकत्वनिर्देशात् । न च नित्यनियोगेऽव्याप्तिः तद्विषयस्येप्सितसाधनत्वाऽनङ्गीकारादिति वाच्यं तत्राऽपि नियोगस्यैव कृत्युद्देश्यतयेष्टत्वात्तत्र धात्वर्थस्याऽपीष्टसाधनत्वोपपत्तेस्तत्राऽपि लक्षणसंभवादिति द्रष्टव्यम् । एवं च सति कृतिसाध्यत्वाऽऽदिना येन केन चन विशेषणेन विशिष्टतयेष्टसाधनत्वज्ञानस्य प्रेरकत्वकल्पनेऽपि न कार्यलक्षणं तत्र गच्छति इष्टसाधनत्वज्ञापकत्वस्येष्टसाधनत्वज्ञानेऽभावादिति भावः । स्वर्गकामोयजेतेत्यादौ लिङाऽऽदिना लोके कार्यव्युत्पत्त्यनुसारेण कार्यमवगम्यते तच्च कार्यं धात्व-

र्थोऽतिरिक्तमेव काम्यमानस्वर्गसाधनस्यैव तत्कामिकार्यत्वात् यागस्य च तदभावात्। तच्च शब्दात्प्रतीयमानं कार्यं कस्य कुत्रेति नियोज्यविषयावपेक्षते कृतिसाध्यत्वरूपेण शब्दात्प्रतीयमानस्य किमाश्रयविषयकृतिसाध्यं तदिति कृत्याऽऽश्रयविषययोः कृतिनिरूपकतया अपेक्षितत्वात्तत्र स्वर्गकामः कार्यं स्वकृतिसाध्यं किंविषयकृतिसाध्यं किमाश्रयतयाऽवगच्छतीति नियोज्यः धात्वर्थस्याऽव्यवधानेन कृतिसाध्यः कृत्यवच्छेदद्वारा नियोगमवच्छिनत्ति यागविषयकृतिसाध्यं तदिति प्रतीतेरिति स तद्विषयस्तदुभयविशिष्टं च कार्यं स्वर्गकामो यजेतेति वाक्यार्थः एवं च कार्यस्य धात्वर्थाऽतिरिक्तस्य स्वतः कार्यत्वाऽसंभवात्स्वस्य कृतिसाध्यत्वनिर्वाहाऽर्थं स्वविषयस्य धात्वर्थस्य कृतिसाध्यत्वमाक्षिपति तच्च परम्परया काम्यस्वर्गसाधनत्वाऽभावेऽनुपपन्नं न हि कामी कश्चित्तदसाधनं करोतीति तदेव कार्यं धात्वर्थस्येप्सितसाधनत्वमप्याक्षिपत्तत्र पुरुषं प्रेरयतीति तदेवैके प्रेरकं कार्यमाहुरित्यर्थः ॥ १३२ ॥

मू० ॥ या नान्यमुद्दिश्य कृतिः प्रवृत्ता
तयैव यद्व्याप्यतया प्रतीतम् ॥
तदेव कार्यं कथयन्ति के चि-
द्विचक्षणाः कार्यनिरूपणायाम् ॥ १३३ ॥

टी० ॥ अनन्योद्दिष्टकृतिसाध्यत्वं कार्यत्वमिति तदभियुक्तसंमतं लक्षणमाह। या नान्यमिति। प्राभाकरा हि इत्थं वदन्ति कार्यमेव कृतिसाध्यस्वभावं पुरुषाऽर्थः न तु स्वर्गाऽऽदिः स्वतस्तथा तस्य कार्यं प्रत्येव तत्साध्यस्याऽपि गर्भदासवच्छेषत्वादतः कार्यमुद्दिश्यैव तत्कृतिः प्रवृत्तेति या नान्यमुद्दिश्येत्युक्तम्। व्याप्यतया साध्यतया ॥ १३३ ॥

मू० ॥ भूत्वा रागः कारणं पुंप्रवृत्ते-
र्नैवं कार्यं कार्यरूपं विहाय ॥
रूपेणाऽन्येनेष्यतेऽस्या निमित्तं
भिन्दन्त्येवं रागकार्ये बहुज्ञाः ॥ १३४ ॥

टी० ॥ ननु लोके राग एव धात्वर्थगोचरप्रवर्त्तको दृष्टः न कार्यं तदतिरिक्तं किं चिद्दृष्टमस्तीत्याशङ्क्य तस्य रागव्यावर्त्तकं रूपं तावदाह । भूत्वेति । पूर्वक्षणे स्थित्वेत्यर्थः । कार्यरूपं कृत्युद्देश्यस्वरूपमन्येन स्वरूपेण सिद्धस्वरूपेणाऽस्याः पुंप्रवृत्तेः । रागो हि निष्पन्नः सर्वत्र प्रवृत्तो कारणं न ह्यसिद्धो रागः क्व चित्प्रवर्त्तयति । कार्यं तु विपरीतमसिद्धाऽवस्थस्यैव कृत्युद्देश्यत्वात्तस्यैव च स्वसिद्ध्यर्थं पुंप्रवर्त्तकत्वात्सिद्धस्य कार्यस्य कृत्युद्देश्यत्वाऽयोगेन तदयोगात् । न च लोके रागाऽतिरिक्तं न प्रवर्त्तकं दृष्टमिति वाच्यं न तावत्फलरागस्य साक्षाद्धात्वर्थे प्रवर्तकत्वं भिन्नविषयत्वात् धात्वर्थगोचरेच्छायाश्च कृतिसाध्यत्वप्रकारिकायास्तद्गोचरकर्त्तव्यताज्ञानं विनाऽसंभवात् न च समानाऽऽकारज्ञानं विना तदाकारेच्छा भवति तस्य च कर्त्तव्यताज्ञानस्याऽवलम्बनान्तराभावात् । धात्वर्थ एव तदालम्बनमिति तदेव लोके कार्यमित्यभिप्रेत्याह । भिन्दन्तीति । भेदेनाऽवगच्छन्तीत्यर्थः ॥ १३४ ॥

मू० ॥ आवापोद्वापहेतोः पदमिदममुकस्याऽभिधाने समर्थं
स्वोत्पत्त्यैवेति शक्तिप्रतिनियममिमं पार्श्ववर्ती तटस्थः ।
जानात्यालोच्य भूयो नयनिपुणमतिर्भागशः कार्ययुक्ते
वस्तुन्येतस्य हेतोरुपनिषदखिला कार्यशेषे प्रमाणम् ॥ १३५ ॥

टी० ॥ एवं कार्याऽन्विते गवादिपदगतशक्तिनिर्वाहाय लौकिकवैदिककार्यस्वरूपं निरूप्येदानीं भागं भागस्य वाचकमिति स्वयमेव वेत्तीति प्रागुक्तं कार्याऽन्विते तत्तदर्थविशेषे गवादिपदशक्तिनियममुपपादयति । आवापोद्वापहेतोरिति । नयनिपुणमतिः नये निपुणा मतिर्यस्य सः । तटस्थः उदासीनः । पार्श्ववर्ती व्युत्पित्सुः । भूयो बहुश आलोच्याऽर्थादन्वयमिति सिध्यति । आवापोद्वापहेतोः इदं गवादिपदममुकस्य गोत्वाऽऽदेः कार्याऽन्वितस्याऽभिधाने कथने स्वोत्पत्त्यैव स्वभावत एव समर्थमिति भागशः प्रतिपदमिमं शक्तिप्रतिनियमं प्रतिपदाऽर्थनियतशक्तिं कार्ययुक्ते वस्तुनि जानातीति संबन्धः । पार्श्ववर्ती व्युत्पित्सुर्हि मध्यमवृद्धस्य प्रवृत्त्या प्रवर्तकं गवाद्यानयनकार्यताज्ञानमनुमाय तत्र गामानयेत्यादिवाक्यस्याऽन्वयव्य-

Digitized by Google

तिरेकाभ्यां कारणत्वमप्यनुमाय तद्वाक्यस्य तस्मिन्प्रवर्तके संमुग्धतया शक्तिमवगच्छतीत्युक्तं तदनन्तरं गां बधानेत्यादिप्रयोगान्तरे गोपदस्या-ऽऽपे प्रयोगे तदर्थं प्रागवगतं पश्यन्वत्समानयेति प्रयोगान्तरे तदभावात्तदर्थं चाऽपश्यन्नन्वयव्यतिरेकाभ्यां गोपदं यत्किंचित्कार्याऽन्वितगोत्वे शक्तं कार्यसामान्यस्याऽव्यभिचारात्। एवमानयनाऽऽदि पदमपि यत्किंचित्का-रकाऽन्विताऽऽनयनाऽऽदौ एवं कारकपदान्तरं क्रियापदान्तरमपि तत्तत्पदा-ऽऽवापोद्वापाद्धेतोस्तत्तत्कार्याऽन्वितेऽर्थे शक्तमिति प्रतिपदं शक्तिप्रतिनियमं जानाति प्राथमिककार्याऽन्वयाऽन्वित * गृहीतसंगतिभङ्गप्रसङ्गेन केवले वस्तुनि संगतिग्रहाऽयोगात्सोयं नयनिपुणमतिरित्यनेनोक्तो नयः अन्योऽपि प्रवर्तकवाक्याऽधीना व्युत्पत्तिः प्रवर्तकं च कार्यज्ञानमित्येवमादिर्नयः भूय सलोच्येति दर्शितः ततो न्यायसिद्धा गवाऽऽदिपदानां कार्याऽन्विते शक्ति-रिति वेदान्तानामपि कार्यशेष एव ब्रह्मणि प्रामाण्यमित्यर्थः ॥ १३५ ॥

मू० ॥ आज्ञाऽऽदिभेदेऽप्य† नुवर्तमाने
प्रवृत्त्यभावस्य विरोधिभावे ।
लिङादिशब्दस्य स वेत्ति शक्तिं
प्रवर्तकाऽऽख्याविषयत्वयोग्ये ॥ १३६ ॥

टी० ॥ अस्त्वेवं गवादिपदानां शक्तिग्रहः कार्यपदस्य कथं शक्तिग्रहः नियोगस्य प्रमाणान्तराऽगोचरतया तच्च लिङादेः शक्तिग्रहाऽयो-गात्। न च लिङाऽऽदिनैवोपस्थिते तस्मिन्शक्तिग्रह इति वाच्यं शक्तिग्रहा-त्पू॰ लिङादेस्तदुपस्थापकत्वाऽयोगादित्याशङ्क्य प्राभाकराणां मतभेदेन लिङादिसंगतिग्रहप्रकारान्दर्शयति। तत्र तावल्लोके आज्ञाऽऽदय एव प्रव-र्तकाः वेदे तु स्वाधिकार्यं प्रवर्तकम् उभयत्र च प्रवर्तकत्वसामान्यमेकम-स्ति तत्र लिङादेः संगतिग्रह इति केचित्तन्मतमाह। आज्ञाऽऽदीति। उत्-कृष्टस्य पुरुषस्य निकृष्टपुरुषप्रेरणा आज्ञा आदिपदेन याच्ञा निकृष्टस्य

* न्वितेर्थे। पा० २।
† भेदेप्य। पा० २।

Digitized by Google

उत्कृष्टप्रेरणा समस्य समाऽनुज्ञा * च गृह्येते । प्रवर्त्तकशब्दाऽभिधेयत्वयोगे प्रवृत्त्यभावस्य विरोधिमात्रे प्रवर्त्तकत्वसामान्ये एवं च गोत्वाऽऽदिसामान्यवत्तादृशादिपदात्प्रवृत्तिरिव लिङादिपदादभिहितप्रवर्त्तकसामान्याऽपर्यवसानादाज्ञाऽऽदयो नियोगश्च सिध्यतीति भावः ॥ १२६ ॥

मू० ॥ अन्ये वदन्ति निरुपाधिनियोगरूपं
वेदे भवत्यपुरुषप्रभवे स्वतन्त्रम् ।
लोके पुनः पुरुषधीरचितेषु कार्ये
सोपाधिकं तदिति कारणतो वचःसु ॥ १३० ॥

टी० ॥ अन्ये त्वस्ति लोकेऽपि नियोगः स च सोपाधिकः वेदे तु स स्वतन्त्र एव तत्रोभयाऽनुगतनियोगत्वसामान्ये लिङादिसंगतिरित्याहुः । तन्मतमाह । अन्ये इति । वैदिकनियोगस्य निरुपाधित्वे युक्तिमाह । अपुरुषप्रभव इति । अपौरुषेय इत्यर्थः अतस्तत्राऽऽज्ञाद्यसंभवान्न नियोगस्तदुपाधिक इत्यर्थः । अत एव स्वतन्त्रं लोके तु वैपरीत्यमाह । लोक इति । पुनःशब्दो विशेषद्योती विशेषमेवाऽऽह । सोपाधिकमिति । वक्ष्यमाणोपाधियुक्तमिति तत्कार्यं वदन्तीति संबन्धः । तदुपपादनाय कारणत इत्युक्तं तदेव विवृण्वन्वचांसि विशिनष्टि पुरुषधीरचितेष्विति पुरुषसंबन्धाल्लौकिकवचसामित्यर्थः ॥ १३० ॥

मू० ॥ आम्नायाच्चजाद्युपाधिप्रणिपतितवपुः साधनेहाऽनुबद्धं
विज्ञातोपायभावं विषयमनुसरत् पौरुषेयीषु वाक्षु ।
वेदे कर्तृस्थरागाऽऽद्युपधिविरहितं कर्तृशून्ये ततोऽस्मि-
न्सर्वत्रैकस्वभावस्थितवपुषि भवेल्लब्धशक्तिर्लिङादिः ॥ १३८ ॥

टी० ॥ लोके कोऽयमुपाधिरिति जिज्ञासायामाह । आज्ञायाज्ञाऽऽदीति । माणवकाऽऽदि ह्युपाध्यायाऽऽद्याज्ञाऽऽदिनैव गवानयनाऽऽदौ प्रवर्तते तथा चाऽऽज्ञाऽऽदिरूपो य उपाधिर्निमित्तं तस्मिन्प्रणिपतितं तेन

* समप्रेरणाऽनुज्ञा । पा० २ ।

संबद्धं वपुर्यस्याः फलसाधनेहायाः सानुबन्धो यस्य तत् । अथ वा वपुरुक्तं साधनेहाऽनुबद्धत्वं च पृथगेव विशेषणं तस्य वैदिककार्याद्वैलक्षण्यान्तरमप्याह । विज्ञातोपायभावमिति । नियोगप्रतीतेः प्रागेव यस्य हितोपायत्वमवगतं विषयं धात्वर्थमनुसरद्धात्वर्थो यत्फलसाधनत्वेन प्रागवगतस्तदनुसरत्तदनुकूलं न तु धात्वर्थस्य तदधीनं फलसाधनत्वमित्यर्थः । कार्यमिति पूर्वश्लोकादनुषञ्जनीयम् । भवतीति च शेषः । पौरुषेयीषु वाक्षु आज्ञायाश्चेत्यादेः संबन्धः । वेदे निरुपाधिनियोगरूपमित्युक्तमुपपादयति । कर्तृस्थरागाऽऽदीति । वेदे कर्तुराज्ञाद्युपाधिरहितमित्यर्थः । कुत इत्यत आह । कर्तृशून्य इति । अपौरुषेये वेदे कर्तुरभावात्तदाज्ञादिकमपि नाऽस्ति यस्मात्तत्र तदुपाधिकमित्यर्थः । नन्वेवं लोकवेदयोर्नियोगवैलक्षण्ये कथं लिङाद्यर्थत्वं तत्राऽऽह । ततोऽस्मिन्सर्वत्रेति । लोकवेदयोरेकस्वभावतया नियोगत्वरूपेण स्थितवपुषि तस्मिन्नियोगे नियोगत्व इति यावत् । लिङादिलब्धशक्तिर्भवेदिति तदैकार्थ्यं युक्तमेवेति भावः ॥ १३८ ॥

मू० ॥ अन्ये भिन्नस्वभावं विविधमभिदधत्यानुरूप्येण कार्यं
लोके धात्वर्थरूपं श्रुतिवचसि पुनस्तन्नियोगाऽऽख्यमेव ।
संमुग्धे तत्र शक्तिं शिशुरयमवगम्याऽऽदितो न्यायचक्षुः
पश्चाद्वेदैकवेद्यं वदति लिङिति च प्रेक्षते निश्चयेन ॥ १३९ ॥

टी० ॥ अभिनवगुरुमतमाह । अन्य इति । विविधमित्यस्य विवरणं भिन्नस्वभावमिति । आनुरूप्येण योग्यतामहिम्ना । वैविध्यमेवाऽऽह । लोक इति । संमुग्धे धात्वर्थनियोगस्वरूपेणाऽविवक्षितविशेषे तत्र कार्यमात्रे । आदितः प्रथमतः । न्यायचक्षुः वक्ष्यमाणन्यायज्ञः ॥ १३९ ॥

(शेषमग्रे)

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page 423.*)

अथ शत्रन्तात्स्त्रीप्रत्यया इह प्रदर्श्यन्ते ॥ उगितश्च । यत्प्रातिपदिकमवयवद्वारेण साक्षाद्वोगित् 'येन विधिस्तदन्तस्ये'ति तदन्तात्, व्यपदेशिवद्भावेन केवलाच्च प्रातिपदिकात् स्त्रियां ङीप्स्यात् । ङकारः सामान्यग्रहणार्थः, पकारस्तदविघातार्थः । 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्ने,' 'व्यपदेशिवद्भावो ऽप्रातिपदिकेने'ति परिभाषे प्रातिपदिकस्य स्वरूपग्रहणेन प्रत्ययविधिविषये इति नेह स्तः । ङीबन्तस्य 'यू स्त्र्याख्यौ नदी' ॥ अन्यानपेक्षया स्त्रियां वृत्तमीदूदन्तं नदी, नदीत्वे । 'शप्श्यनोर्नित्यम्' । शप्श्यनोर्निमित्तत्वेन संबन्धिनः शतुर्नित्यं नुम् शीनद्योः परयोः, नुम् मित्त्वादन्त्यादचः परः । इह नदीशब्दो नद्यवयवे वर्त्तत इति शतुर्नदीपरत्वम् । भवन्ती । अतिभवन्ती । ङ्यन्तत्वात्स्वादिषु सोर्हल्ङ्यादि लोपः । भवन्त्यौ । भवन्त्यः । अजादा'विको यणची'ति संहितायां यण् भवति । 'प्रथमयोः पूर्वसवर्ण'इत्यकः प्रथमाद्वितीययोरजादौ विभक्तौ परतः पूर्वपरयोः पूर्वसवर्णदीर्घ एक इत्येतदत्र न भवति 'दीर्घाज्जसि चे'ति निषेधात् चकारादिज् गृह्यते । हे भवन्ति । 'अम्बार्थनद्योर्ह्रस्व' इति ह्रस्वः । अम्बार्था मात्रर्थाः । 'एङ्ह्रस्वात्संबुद्धेरिति' संबुद्धेर्हलो लोपः ॥ 'एकवचनं संबुद्धिः' ॥ संबोधने प्रथमाया इति शेषः । भवन्तीम् । अत्रा'मि पूर्वः' पूर्वसवर्णदीर्घश्च यणं बाधेते । ङिद्वचनेष्वा'ण् नद्या' इति टित्त्वादाद्यवाडागमे 'आटश्चे'ति यथायोगमैकार औकारश्च वृद्धिः । भवन्त्यौ, भवन्त्यः । आमि 'ह्रस्वनद्यापो नुडि'ति नुट् टित्त्वादादौ, भवन्तीनाम् । सप्तम्येकवचनस्य 'ङेराम्नद्याम्नीभ्य'इत्यामादेशे । भवन्त्याम् । नीशब्देन तदन्तो ग्रामण्यादिरुच्यते । भवन्तितरा । भवन्तीतरा । पूर्ववत्तप् । अत्र 'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्व' इति घादिषु परेषु ङ्यन्तस्यानेकाचो विधीयमानो नित्यो ह्रस्व 'उगितश्चे'त्युगितः परस्या नद्या उच्यमानेन ह्रस्वविकल्पेन बाध्यते, अत्र घादयः प्रत्ययाश्चेलडादीनि

प्रातिपदिकानि । अत्र हरदत्तः । चेलडादीनां वृत्तिविषये कुत्सनवचनत्वात् तैः 'कुत्सितानि कुत्सनै'रिति समास इति । न्यासकारस्तु चेलड्ब्रुवगोत्राणामेवं समासमुक्त्वा मतल्लिकाभ्यां तु विशेषणं विशेष्येणेत्याह । एवं तमबादिष्वप्युदाहार्यम् ॥

अथ नपुंसकप्रक्रिया ॥ भवत् ब्राह्मणकुलं तिष्ठति पश्येति वा । 'स्वमोर्नपुंसका'दिति लुक् । भवन्ती कुले । 'नपुंसकाच्चे'त्यौङः शीभावः । औङिति प्रथमाद्वितीययोर्द्विवचनस्य पूर्वाचार्यसंज्ञा । शकारः 'शीनक्वो'रिति निर्देशार्थः । 'शप्श्यनो'रिति नित्यं नुमागमः । भवन्ति कुलानि । 'जश्शसोः शि'रिति नपुंसकाङ्गात्परत्वे जश्शसोः शिरादेशः । शकारः शीति तत्रानुवादार्थः । 'शि सर्वनामस्थान'मिति शेः सर्वनामस्थाने नुमिति नुम् । भवतेत्यादि पुल्लिङ्गवत् ।

अथ शानच् ॥ व्यतिभवमानाः । 'आने मुगि'त्यदन्तस्यानपरत्वेन मुक्कित्त्वादन्त्यः । व्यतिभवमानौ । प्रथमयोः पूर्वसवर्णदीर्घस्य 'नादिची'ति निषेधे 'वृद्धिरेची'ति वृद्धिः, व्यतिभवमानान् । 'तस्माच्छसो नः पुंसी'ति तस्मात्प्रथमयोः पूर्वसवर्णदीर्घात् परस्य शसः सकारस्य न इति नकारादेशः, व्यतिभवमानेन । 'टाङसिङसामिनात्स्याः', अदन्तादङ्गात्परेषां टादीनां यथासंख्यमिनादय इति इनादेशे गुणः । व्यतिभवमानाभ्याम् । 'सुपि चे'त्यदन्ताङ्गस्य दीर्घ इति सुप्परत्वाद्दीर्घः । व्यतिभवमानैः । 'अतो भिस ऐसि'त्यदन्ताङ्गात्परत्वेन भिस ऐसादेशः । व्यतिभवमानाय । 'ङेर्यः' इत्यदन्तादङ्गात्परत्वेन यादेशः । कष्टायेति निर्देशात्संनिपातपरिभाषाया अनित्यत्वा'त्सुपि चे'ति दीर्घः । व्यतिभवमानेभ्यः । अत्र झलादिबहुवचनसुप्परादन्ताङ्गत्वेन 'बहुवचने झल्ये'दित्येत्त्वं 'सुपि चे'ति दीर्घश्च प्राप्नोति तत्र 'विप्रतिषेधे परं कार्यं' द्वयोस्तुल्यबलविरोधे परस्य प्राप्यमाणत्वात्परमेत्त्वं प्रवर्त्तते । व्यतिभवमानात् । व्यतिभवमानस्य । टाङसीत्यादिना ङसिङसोरात्स्यौ । व्यतिभवमानयोः । 'ओसि चे'त्यदन्तस्याङ्गस्योस्परत्वेनैकारे ऽयादेशः । व्यतिभवमानानाम् । ह्रस्वनद्यापो नुडिति नुट् । ह्रस्वान्तस्याङ्गस्य नाम्परत्वेन 'नामी'ति दीर्घः । सुपि चेत्येव वा, व्यतिभ-

वमाने । आत्नुणः । व्यतिभवमानेषु । एत्वे षत्वं, व्यतिभवमानस्येदं व्यातिभवमानम् । अत्रासामानाधिकरण्ये शानच् । तस्येदमित्यण्यादिवृद्धिः । 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैजि'ति पदान्ताभ्यां यकारवकाराभ्यां परस्याचामादेरचो वृद्धिर्न भवति किं तु ताभ्यां पूर्वमैच् भवति तद्धिते ञ्णिति किति वा परइत्येतस्य 'न कर्मव्यतिहार'इति निषेधः ।

अथ स्त्रियाम् ॥ व्यतिभवमाना । अजाद्यतष्टाप् ॥ अजादिगणपठितादकारान्ताच्च प्रातिपदिकात् स्त्रियां टाबिति टाप् । पकारः सामान्यग्रहणार्थः, टकारस्तदविघातार्थः । अत्र शानचः स्थानिवत्त्वेन टित्वा- 'ट्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपख्युना'मिति यथा कथंचित् टितः प्रातिपदिकाड्ढाद्यन्ताच्चानुपसर्जनात् स्त्रियां विधीयमानो ङीप् ट एव इत् यस्य स टिदित्यवधारणस्याश्रयणाल्लटश्च ट्यनुबन्धकत्वाच्च भवति, सामगीत्यादौ टको ऽनेकानुबन्धकत्वेऽपि टित्त्वसामर्थ्यात् ङीप्, लटस्तु टित्त्वमेत्वाद्यर्थतया सावकाशम् । हल्ङ्यादिना सुलोपः । व्यतिभवमाने । 'औङ आप' इत्याप्तः परत्वेनौङः शीभावे गुणः । ईकारप्रत्ययपरत्वेन यस्येति लोपो न भवति । 'औङः श्यां परे प्रतिषेध' इति निषेधात् । व्यतिभवमानाः । सवर्णदीर्घः । हे व्यतिभवमाने । 'संबुद्धौ चे'त्याप एत्वम् । एङः परत्वात्सोर्लोपः । व्यतिभवमानया । 'आङि चाप' इत्येत्वे ऽयादेशः । आङिति तृतीयैकवचनस्य पूर्वाचार्यसंज्ञा । चकारादोसि च, व्यतिभवमानायै । 'याडाप' इति आपः परस्य ङिद्वचनस्य याडागमष्टित्वादादिः । वृद्धिरेचीति वृद्धिः । व्यतिभवमानायाः । व्यतिभवमानयोः । आङि चाप इत्येत्वेऽयादेशः । व्यतिभवमानानाम् । ह्रस्वनद्यापो नुडिति नुट् । व्यतिभवमानायाम् । ङेराम्मादेशः, व्यतिभवमानासु ।

अथ नपुंसकम् ॥ व्यतिभवमानम् । 'अतोमि'त्यम्भावः । व्यतिभवमाने । 'नपुंसकाच्चे'ति शीभावे पूर्ववदौङः श्यामिति यस्येतिलोपनिषेधः । व्यतिभवमानानि । जश्शसोः शिः ॥ 'नपुंसकस्य झलच' इति नुम् । सर्वनामस्थाने चासंबुद्धा'विति नान्तस्याङ्गस्योपधाया दीर्घः । हे व्यतिभवमाने-

स्यन्नातोमित्यम्भावेऽमि पूर्वत्वे एङ्ह्रस्वादिति संबुद्धेर्हलो मकारस्य लोपः । तृतीयादि पुल्लिङ्गवत् । लटः सद्वेति लट इव ल्टोपि शतृशान-चोर्विधानाद् भविष्यदित्यादि लड्वत् सर्वमुदाहार्यम् । तत्र स्त्रियां नपुंसके द्विवचने चा'च्छीनद्योर्नुमि'ति नुम्विकल्पो विशेषः । अत्रानुवृत्तं शतृग्रहणं स्वावयवे वर्तते । तेनावर्णान्तादङ्गात् परो यः शत्रवयवस्तदन्तस्याङ्गस्य शी-नद्योः परयोर्वा नुमिति सूत्रार्थः, अथ वाऽवर्णान्तादङ्गात् शीनद्योः परयोः शत्रन्तस्य वा नुमिति । तत्र येन नाव्यवधानमिति तकारेण व्यवधानमाश्र-यिष्यते, अवर्णान्तादङ्गात्परो यः शता तदन्तस्याङ्गस्येति सूत्रार्थो नोक्तः । अङ्गान्तस्य शत्रवयवस्य चान्तरङ्गत्वान्नुमः पूर्वमेकादेशे व्यपवर्गाभावादवर्णा-न्ताङ्गात्परस्य शतुरसंभवात् । न चान्तादिवद्भावः, 'उभयत आश्रये नान्ता-दिवदि'ति निषेधात्, भूतपूर्वगत्याश्रयणे तु लुग्विकरणादादवदती घ्नतीत्या-दावपि स्यात् । व्यतिभविष्यमाण इत्यादा'वट्कुप्वाङ्नुम्व्यवायेऽपी'ति णत्वम् । अडादिभिर्व्यवायेपि रषाभ्यां परस्य समानपदस्थस्य नो ण इति सूत्रार्थः । भविष्यदित्यत्र तु 'पदान्तस्ये'ति निषेधान्न भवति ॥

अथ सनादयः प्रदर्श्यन्ते । धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ यो धातुरिषिकर्म समानकर्तृकश्चार्थद्वारेण तस्मादिच्छायां वा सन् स्यात्, नकारो निर्देशाद्यर्थः ॥ सनि ग्रहगुहोश्च ॥ ग्रहिगुहिभ्यामुगन्तादे-काचश्च परस्य सनो नेडितीड्निषेधः । 'इको झलि'ति इगन्ताद्धातोः परस्य झलादेः सनः कित्त्वान्न गुणः ॥ सन्यङोः ॥ एतदन्तस्य प्रथमैकाचो द्वे भवतो ऽजादेस्तु द्वितीयस्येति द्वित्वेऽभ्यासकार्यम् । 'सनाद्यन्ता धातव' इति सना-दिणिङ्पर्यन्तानां प्रत्ययान्तानां धातुत्वात्पूर्ववल्लडादिषु तिबादयः । बुभू-षतीत्यादि । लिटि तु ॥ कास्प्रत्ययादाममन्त्रे लिटि ॥ कासः प्रत्ययान्ताच्च धातोर्लिटि परे आम्प्रत्यय इत्याम् । अकारो मकारपरित्राणाय । सूत्रे त्वत एव निर्देशात्पररूपम् । आमश्चार्द्धधातुकत्वादतो लोप आर्द्धधातुकइति सनोऽकारस्य लोपः । 'आम' इत्यामः परस्य लेर्लुक् । प्रत्ययलक्षणत्वेन कृद-न्तत्वादुत्पन्नस्य सुपः स्वरादिष्वामिति पाठादव्ययत्वाल्लुक् । तत्र यद्यमा साहचर्यादामपि तद्धित एवेत्युच्यते तर्ह्याम इत्येव लुग्भविष्यति । लिङ्ग्रहणं

तु तत्र निर्वक्ष्यते । अत्रामन्तस्याव्यक्तपदार्थकत्वात्पदत्वाय प्रथमातिक्रमे कारणाभावात्सर्वेभ्योत्पद्यते । तस्य हल्ङ्यादिलोपः सिद्ध इति किं लुको विधानेनेति । यदा तु प्रयोगवशाद् द्वित्वाद्यभिव्यक्तौ द्विवचनाद्युत्पद्यते तदर्थं लुगेषितव्यः ॥ कृञ् चानुप्रयुज्यते लिटि ॥ आमन्तस्य पश्चादेवाव्यवहिता एव कृभ्वस्तय एव लिट्पराः प्रयोक्तव्याः । अत्राभूततद्भावे कृभ्वस्तीति कृशब्दस्य कृञो द्वितीयेति ञकारेण प्रत्याहारनिर्देशात् कृञिति कृभ्वस्तय उच्यन्ते । बुभूषां चकार । बुभूषां बभूव । अत्र मोनुस्वारः । पदान्तस्य मोनुस्वारे हलीत्यनुस्वारे तस्य वा पदान्तस्येति यणि परे विधीयमानः परसवर्णविकल्पो भवति । अनुस्वारः पक्षउदाहार्यः । आम्प्रत्ययवत् कृञोऽनुप्रयोगस्येत्यत्र पूर्ववदित्यनुवृत्त्या पूर्ववत् कृञोऽनुप्रयोगस्येति द्वितीयोऽपि योगः संपद्यते । तत्राद्य आम्प्रत्ययप्रकृतेरिवाकर्त्रभिप्रायेऽप्यनुप्रयुज्यमानस्य कृञ आत्मनेपदं प्राकरणिकं विधत्ते । द्वितीये त्वयोत् पूर्वस्येव कर्त्रभिप्राये परस्मैपदमित्यत्र आम्प्रकृतेः शेषत्वेन नित्यपरस्मैपदित्वात् कृञोऽपि परस्मैपदमेव । इदमेव कृञ्ग्रहणमनुप्रयोगे कृञिति प्रत्याहारग्रहणमिति ज्ञापयति । अन्यथाऽनुप्रयोगस्येत्येव ब्रूयात् । बुभूषामास । अत्र 'अस्तेर्भू'रित्यार्द्धधातुके विषये विधीयमानो भूभावोऽनुप्रयोगे प्रत्याहारग्रहणसामर्थ्याच्च भवति । अन्यथा प्रतिपत्तिलाघवाय कृभ्वित्येव ब्रूयात् । बुभूषिता । इत्यतो लोपो गुणं परत्वाद् वार्णादाङ्गमिति वा बाधते । बुभूषिष्यति । बुभूषतु । अबुभूषत् । बुभूषेत् । आशिषि । बुभूष्यात् । अतो येयो न भवति । आर्द्धधातुकत्वात् । अत्र 'कृत्सार्वधातुकयोर्दीर्घ' इति अकृत्यकारेऽसार्वधातुके च परेऽजन्तस्याङ्गस्य विधीयमानो दीर्घो 'ययल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेने'त्यल्लोपेन बलीयस्त्वेन बाध्यते । अबुभूषीत् । 'अस्तिसिचोऽपृक्त' इति इडागमे 'इट ईटी'ति सिचो लोपः । 'सिज्लोप एकादेशे सिद्धो वक्तव्य' इति सिज्लोपस्य पूर्वत्रासिद्धत्वाभावात्सवर्णदीर्घः । अबुभूषिषुः । सिजभ्यस्तेति जुस् । अबुभूषिष्यत् ॥

अथात्मनेपदम् ॥ व्यतिबुभूषते । व्यतिबुभूषां चक्रे । आम्-प्रत्ययवदिति नित्यस्तङ् कृञः । व्यतिबुभूषां बभूव । आसेति वा । व्यतिबुभूषितासे । व्यतिबुभूषिष्यते । व्यतिबुभूषताम् । व्यत्यबुभूषत । व्यतिबुभूषेत । आशिषि व्यतिबुभूषिषीष्ट । व्यत्यबुभूषिष्यत । सर्वत्र पूर्ववत्सन इति तङ् । सनः पूर्वो धातुर्येन निमित्तेनात्मनेपदी सनन्तमपि तेनैव तथेत्यर्थः ॥

अथ भावकर्मणोः ॥ बुभूष्यते त्वया । अनुबुभूष्यते सुखम् । यक्य-कृत्सार्वधातुकयोर्दीर्घ इति दीर्घं बाधित्वातो लोपः पूर्वविप्रतिषेधेन भवति । बुभूषां चक्रे भवता । अनुबुभूषां चक्रे सुखम् । बुभूषामासइति वा । इहानुप्रयुज्यमानस्यामन्तार्थाभिव्यक्तिमात्रकरत्वात् करोतेर्भावे, इतराभ्याम-कर्मकत्वाद् भाव उपपद्यते । प्रयुज्यते चैवं'रोमन्थमन्थरचलद्गुरुसास्नमासां चक्रे निमीलदलसेक्षणमौक्षकेण' । 'प्रकाशेनाकाशे दिनकरकरान्विक्षिपद्भि-स्मिताक्षैर्नरेन्द्रैरौपेन्द्रं वपुरथ विशङ्काम वीक्षां बभूव' इति । 'ह एति' इत्यस्तेर्हत्वं तासिसाहचर्यात्सार्वधातुकोत्तमैकवचने एवेतीह लिटस्तभ-योरिरिति तशब्दस्यैशीटश्चैत्वे न भवतीति । के चित्तु तासेरुत्तमैकवचन-मेकारः संभवतीत्येतावन्मात्रसाहचर्याश्रयेण लिडुत्तमैकवचनेपि हत्वमि-च्छन्ति । तत्र साहचर्यसंकोचे कारणं न विद्मः । लङ्लृटोराशीर्लिङि लुङि च कर्तृवदेव रूपम् । न च चिण्वदिटि वृद्धौ चा'तो युक् चिण्कृतो'रित्या-कारान्तस्य चिणि ञ्णिति कृति च परे युको विधानाद्रूपभेदप्रसङ्गः, णयल्लो-पावित्यादिना वृद्धेरतो लोपेन बाधस्योक्तत्वात् । लुङेकवचने तु चिणो विधानात् तत्राबुभूषीति विशेषः । तथा लोटि लङि विध्यादिलिङि कर्तृवत् प्रक्रिया । यक् तु विशेषः । कर्मकर्त्तरि 'भूषाकर्मकिरादिसनां चो-पसंख्यानमन्यत्रात्मनेपदा'दिति यक्चिणोर्निषेधात्सर्वत्र कर्तृवद्रूपम् । तत्क-रणात्स्वाश्रये भावे लकारे यक्चिणोर्विषये कर्मवद्रूपम् । कर्त्तरि तृतीया विशेषः । अभिबुभूष्यते शत्रुणा स्वयमेवेत्यादि । इच्छायाः कर्तृस्थत्वेन कर्मस्थत्वाभावेऽपीष्यमाणस्य प्राधान्यात्तस्य च कर्मस्थत्वादस्ति कर्मव-द्भावः । अत एव भूषाकर्मेति यक्चिणौ निषिध्येते ॥

Digitized by Google

अथ यङ् ॥ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥ पौनः-पुन्यं भृशार्थो वा क्रियायाः समभिहारः। तत्र द्योत्यएवंविधाद्धातोर्यङ् स्यात्। द्विर्वचनानि पूर्ववत् ॥ गुणो यङ्लुकोः ॥ यङि यङ्लुकि चाभ्यासस्येको गुण इति गुणः। बोभूयते। 'अनुदात्तङित आत्मनेपद'मित्यात्मनेपदम्। यङो ङकारस्य गुणप्रतिषेधार्थत्वेनावयवे चरितार्थत्वाच्च समुदायार्थत्व-मिति यङन्तस्य धातोरङित्त्वात्कथमात्मनेपदमिति नाशङ्क्यम्। तत्र धातु-ग्रहणाभावान्ङिन्मात्रात्परस्य लस्य तद्विधेः। अनुदात्तेतो ये धातवो ङित-श्चेति प्रायिकाभिप्रायं वृत्तिकारवचनम्। अथ वा ङितश्चेत्यत्र शब्दादि-त्यध्याहार्यम्। अत एवानुदात्तेतो ङितश्च ये धातव इति नोक्तम्। वहादावतिप्रसङ्गपरिहारस्तत्रतत्र वक्ष्यते। बोभूय्यते त्वया। अनुबोभू-य्यते सुखमित्यादि, सनन्तवत्प्रक्रिया। कर्मवत्कर्मकर्ता। लुङि तशब्दे 'अचः कर्मकर्तरी'ति चिणो विकल्पनात् पक्षे सिजपि भवति। तेनाभ्यबो-भूयि शत्रुः स्वयमेव। अभ्यबोभूयिष्टेति च। वत्करणाद्भावे लकारे नित्यं चिणेव। अभ्यबोभूयि शत्रुणा स्वयमेवेति।

(शेषमग्रे)

॥ अथ चित्सुखीभूमिका ॥

धृत्वानेकावतारानवति निजजनात् योऽनुकम्पासरस्वान्
यत्पादाम्भोजजन्मा जगदघनिचयं स्वर्धुनीयं धुनीते।
यं स्मृत्वा सर्वजन्मी स्वमनसि निहितं सर्वमाप्नोति कामं
संसाराब्धौ निमज्जज्जनतरणिरसौ पूरयत्वस्मदिष्टम् ॥ १ ॥
वेदान्तशास्त्रवेद्यं प्रागासीदुपनिषत्सु संप्रोक्तम्।
मन्त्रब्राह्मणरूपा उपनिषदः सन्ति विख्याताः ॥ २ ॥
ईशावास्योपनिषत् तासु मता मन्त्ररूपैका।
इतरा उपनिषदश्च ब्राह्मणरूपाः सदाम्नाताः ॥ ३ ॥

वेदशिरांसीति च ताः सर्वविद्भिरुच्यन्ते ।
तत एव च पूर्वेषामार्षप्रज्ञावतामभूद् बोधः ॥ ४ ॥
अथ युगक्रमतः क्रमतो ह्रसन्मतिषु पुंसु भवत्सु दयानिधिः ।
सकललोकहिताय ततः सदा मुनिपराशरसत्यवतीसुतः ॥ ५ ॥
अद्वैतप्रतिपादकोपनिषदां दौर्गम्यमालोचयन्
मन्दात्मानुजिघृक्षयेव चतुरध्याय्यात्मसूत्रात्मना ।
संदर्भं कृतवांस्तदर्थविवृतिं बोधायनर्षिः पुरा
शिष्यः सत्यवतीसुतस्य विदधौ या लभ्यते नाधुना ॥ ६ ॥
यत्त्वित्यादिग्रन्थैर्यन्मतमधुनापि शाङ्करे भाष्ये ।
रामानुजस्य भाष्ये[१] सिद्धान्ततया लभामहेऽद्यापि ॥ ७ ॥
तदनु शङ्करयादवभास्करप्रभृतिभिर्मतमद्वयमास्थितैः ।
अपि परस्परदूषणतत्परैरखिलसूत्रमिदं व्युपबृंहितम् ॥ ८ ॥
द्वैतं प्रतिजानानैरनुसृतवद्भिर्निजां निजां सरणिम् ।
रामानुजवल्लभमुखविदिताचार्यैरनेकधा विवृतम् ॥ ९ ॥
व्याख्यास्तथापि चास्मिन् समये शंकरमतानुरोधिन्यः ।
बहुभिर्बहुधा विहितास्तन्मध्ये मुद्रिता मया काश्चित् ॥ १० ॥
अथाहं कंचनापूर्वं ग्रन्थं वेदान्तशास्त्रगम् ।
मुमुद्रयिषुरुद्योगमकार्षं तद्गवेषणे ॥ ११ ॥
प्राप्तं च चित्सुखीनाम्ना प्रसिद्धं बहुकालतः ।
चित्सुखाचार्यसंन्यासिनिर्मितं सूत्रसंमतम् ॥ १२ ॥
वेदान्ततत्त्वपूर्वः प्रदीपशब्दोऽपि वाचकोऽस्त्यस्य ।
मूले त्वस्योल्लेखः प्रत्यक्तत्त्वप्रदीपिकानाम्ना ॥ १३ ॥
ग्रन्थः कियानयमिति प्रश्ने ज्ञेया विपश्चितां प्रवरैः ।

१ तथा च रामानुजभाष्यप्रारम्भवाक्यम्, भगवद्बोधायनकृतां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुस्तदनुसृत्य मयेह सूत्राक्षराणि व्याख्यास्यन्ते, इति ।

पञ्चसहस्री संख्या चत्वारोऽस्मिन् परिच्छेदाः ॥ १४ ॥
वेदान्ततत्त्वदीपो न केवलं किंतु सर्वशास्त्राणाम् ।
तत्त्वानामयमद्धा प्रदीप इत्थं वदन्ति विद्वांसः ॥ १५ ॥
प्रथमपरिच्छेदेऽस्य प्रागस्ति स्वप्रकाशतावादः ।
तदनु तमोवादोऽच्छो मिथ्यात्वाज्ञानवादौ च ॥ १६ ॥
भ्रमाधिष्ठानवादोऽस्मिन्नज्ञानावचनीयता ।
सिद्धार्थबोधकत्वं च वेदान्तानामुदीरितम् ॥ १७ ॥
अखण्डार्थत्ववादोऽथ स्वतस्त्वपरतस्त्वयोः ।
प्रामाण्यस्य ततो वादः शक्तिवादस्ततः परम् ॥ १८ ॥
जीवब्रह्माभिदाबोधः कृतो लक्षणया ततः ।
अपौरुषेयतावादो वेदानामवधारितः ॥ १९ ॥
द्वितीयेऽस्य परिच्छेदे न्यायशास्त्रादिसंमताः ।
द्रव्यादयः पदार्था ये क्रमात् तेषां प्रखण्डनम् ॥ २० ॥
परिच्छेदे तृतीये तदात्मतत्त्वस्य केवलम् ।
बोधस्य मोक्षहेतुत्वं निर्णीतं परखण्डनैः ॥ २१ ॥
तुर्येऽथ परिच्छेदे जीवन्मुक्तिर्विदेहमुक्तिश्च ।
श्रुत्या स्मृत्या युक्त्या प्रयोजनं साधितं विदुषः ॥ २२ ॥
इत्थं मयाऽऽपातत एव वीक्ष्य संक्षेपतो ग्रन्थगतं व्यलेखि ।
तत्त्वं विशेषेण समस्तमेतद्विपश्चितो द्रक्ष्यथ मुद्रितेऽस्मिन् ॥ २३ ॥
अद्वैतसिद्धिप्रमुखैरुदीच्यैरयं गतार्थत्वमुपैति नो यत् ।
अतो विनोदाय महामतीनां जाता प्रवृत्तिर्मम मुद्रणाय ॥ २४ ॥
मूलग्रन्थोऽयं महानेव तस्मान्नैतद्व्याख्यामुद्रणेऽकारि यत्नः ।
जिज्ञासा चेत् स्याद्बुधानां तदाऽरं मूले जाते मुद्रिते मुद्रयिष्ये ॥ २५ ॥
एकं पुस्तकमापं हरिकृष्णाख्याद् बुधर्षभाद्रुद्रम् ।

Digitized by Google

मूलं तत्र मनीषी हरिनाथो नामतः प्रथितः ॥ २६ ॥
अपरं च राममिश्राद्विद्वद्वर्यादलप्स्यहं पुस्तम् ।
येन प्राकाशितरां ब्रह्मामृतवर्षिणी सभा काश्याम् ॥ २७ ॥
इत्थं पुस्तकलाभतोऽङ्कनविधौ संजातसौकर्यतः
सज्जः संप्रति मुद्रणाय जनितोत्साहश्च विद्वद्वरैः ।
नामंनाममहं परेश्वरपदं तं कामदं प्रार्थये
ग्रन्थः स्यादयमङ्कनस्य विधिना स्वामिन् प्रपूर्णोऽधुना ॥ २८ ॥
श्रीमत् धीवोपदं भुम्दिः प्रभुभिर्यैः प्रभूष्यते ।
तत्संमतिर्ममोत्साहे प्रवृत्तौ चास्ति कारणम् ॥ २९ ॥
संभावयामि च बुधा भवतां प्रसादः
स्यादस्य सम्यगवलोकनतोऽतिमात्रम् ।
आशा प्रवृत्तिजनिका सकलस्य पुंस-
स्तामीश्वरोऽतिदयया स तनोति सिद्धाम् ॥ ३० ॥
काशीस्थराजकीयप्रधानपाठालयीयसंख्यावान् ।
सांख्याध्यापनकारी वेचनरामोऽस्मि कान्यकुब्जोऽहम् ॥ ३१ ॥

॥ अथ चित्सुखीप्रारम्भः ॥

॥ तत्र प्रथमः परिच्छेदः ॥

॥ श्रीगणेशाय नमः ॥

स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्याततद्वैभवो
यः पाञ्चाननपाञ्चजन्यवपुषा[१] व्यादिष्टविश्वात्मतः ।
प्रह्लादाभिहितार्थतत्त्वणमिलद्दृष्टप्रमाणं हरिः
सोऽव्याद्वः शरदिन्दुसुन्दरतनुः सिंहाद्रिचूडामणिः ॥ १ ॥

१ पाञ्चाननं सिंहसंबन्धि पाञ्चजन्यं पुरुषसंबन्धि यद्वपुः, नरसिंहात्मकमित्यर्थः ।

ज्योतिर्यद्दलिताम्भूर्तिव्यासभङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥ २ ॥
विप्रतिपत्तिव्रातध्वान्तध्वंसप्रगल्भवाचाला ।
क्रियते चित्सुखमुनिना प्रत्यक्तत्त्वप्रदीपिका विदुषा ॥ ३ ॥
प्रमाणनखनिर्भिन्नमत्तामोहामरारये ।
नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने ॥ ४ ॥

अथ कोऽयं स्वप्रकाशशब्दार्थः । किं स्वश्चासौ प्रकाशश्च स्वप्रकाशः १ । स्वस्य स्वयमेव प्रकाश इति वा २ । सजातीयप्रकाशाप्रकाश्यत्वं वा ३ । स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वं वा ४ । स्वव्यवहारहेतुप्रकाशत्वं वा ५ । ज्ञानाविषयत्वं वा ६ । ज्ञानाविषयत्वे सत्यपरोक्षत्वं वा ७ । व्यवहारविषयत्वे सति ज्ञानाविषयत्वं वा ८ । स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वं वा ९ । अवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्व वा १० । तद्योग्यत्वं वा ११ ।

नाद्यः, वेद्यस्यापि ज्ञानस्य स्वप्रकाशत्वाभ्युपगमात् ।

न द्वितीयः,कर्मकर्तृभावविरोधेन लक्षणस्यासंभवात् ।

न तृतीयः, प्रदीपादेः सजातीयप्रकाशाप्रकाश्यस्याप्यस्वयंप्रकाशत्वेन लक्षणस्यातिव्याप्तेः, घटादेरपि सजातीयप्रकाशाप्रकाश्यस्य स्वप्रकाशत्वप्रसङ्गाच्च, नहि प्रदीपादौ ज्ञाने वा घटत्वादिर्जातिरस्ति येन घटादयः सजातीयप्रकाश्या भवेयुः, सत्तया सजातीयत्वं तत्राप्यस्तीति चेन्न विशेषणवैयर्थ्यात्, सत्ताविरहिणः प्रकाशस्यैवासंभवात्, प्रकाशाप्रकाश्यत्वमित्येतावतैव चरितार्थत्वात् ।

न चतुर्थः, सुखादावतिव्याप्तेः, सुखादेरपि स्वसत्तायां प्रकाशाव्यभिचारात् ।

न पञ्चमः,प्रदीपादावतिव्याप्तेः, प्रदीपादेरपि स्वव्यवहारहेतुत्वात्, प्रकाशत्वाच्च, अथ ज्ञानव्यवहारहेतुप्रकाशत्वं विवक्षितम्, तदपि न,

Digitized by Google

अनुव्यवसायेऽतिव्याप्तेः, तस्य वेद्यत्वेऽपि व्यवसायज्ञानव्यवहारहेतुप्रकाशत्वात्, प्रदीपज्ञानमिदमिति व्यवहारहेतौ प्रदीपप्रकाशेऽतिव्याप्तेश्च, किंच व्यवहारहेतुत्वं विशेषणमुपलक्षणं वा, नाद्यः, मुक्तिप्रलयादावव्याप्तेः, न द्वितीयः, उपलक्षितत्वस्यापि विशेषणत्वे प्रागुक्तदोषानुषङ्गात्,स्वरूपमात्रत्वे तु ज्ञानं प्रकाश इत्येव स्यात्, तथा सति न लक्षणसिद्धिः ।

नापि षष्ठः, स्वयंप्रकाशत्वसाधकानुमानागमादिजन्यज्ञानविषयत्वेन लक्षणस्यासंभवित्वात्, तस्याप्यविषयत्वे कथाप्रवृत्त्यनुपपत्तेः ।

नापि सप्तमः,अविषयत्वस्यैवासंभवेन निरस्तत्वात्, विषयत्वशब्देन कर्मत्वविवक्षायां गुरुमतानुसारिणामात्मन्यतिव्याप्तेश्च, तस्य ग्राहकतया सिद्धस्य विषयत्वेऽप्यपरोक्षतायास्तैरङ्गीकारात् ।

नाप्यष्टमः, प्राचीनदोषानुषङ्गात्, शुक्तिरजतादिसंसर्गेऽख्यातिवादिनामतिव्याप्तेश्च,तस्य व्यवहारविषयत्वेऽपि तैर्ज्ञानविषयतानङ्गीकारात् ।

नापि नवमः, स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वस्य प्रदीपादौ घटादौ च भावेनातिव्याप्तेः, सत्तया सजातीयत्वविवक्षायां तु तद्व्यवहारस्यापि सत्तया सजातीयादृष्टादिजन्यस्य तदपेक्षत्वेन लक्षणस्यासंभवित्वप्रसङ्गः ।

नापि दशमः, अवेद्यत्वेऽनुमानाद्यगोचरतया कथानवतारप्रसङ्गस्य दर्शितत्वात्, अपरोक्षव्यवहारविषयत्वमिति शब्देन प्रत्यक्षज्ञानविषयत्वस्य कण्ठोक्तत्वात्, तद्विपरीतावेद्यत्वाभिधाने मे माता बन्ध्येतिवद्व्याघाताच्च, सुषुप्तिप्रलयमोक्षेष्वव्याप्तेश्च, तदा व्यवहारस्यैवासंभवेन तद्विषयत्वाभावात् ।

नाप्येकादशः,उक्तव्यवहारयोग्यताया धर्मत्वेऽद्वैतवादिनामपसिद्धान्तापातात्, स्वरूपत्वे तु ज्ञानस्वरूपस्यात्मनो व्यवहारनिरूपणीयत्वात् स्वप्रतियोगिकत्वप्रसङ्गात् । तदेवं न स्वप्रकाशलक्षणं पश्यामः ।

नापि प्रमाणम्, अथानुभूतिरनुभूतिव्यवहारहेतुप्रकाशोऽनुभूतित्वात्, यन्नैवं तन्नैवं यथा घट इत्यनुमानं प्रमाणम्, न चाप्रसिद्धविशेषणः

पक्षः, अनुभूतिव्यवहारस्य हेतुभूतः प्रकाशः परेषामपि हि प्रसिद्धः; ततोऽनुभूतेस्तत्स्वरूपत्वप्रतिज्ञोपपद्यते ।

न चानुव्यवसायज्ञाने साध्यस्य सिद्धत्वाद्भागे सिद्धसाधनता तत्स्वरूपस्यैवासंमतत्वेन तस्य धर्मिभागतानङ्गीकारादिति चेत्, मैवम्, अनुभूतिव्यवहारस्य हेतुभूतः प्रकाशो यत्र सिद्धस्तत्र हेतोर्वृत्तौ केवलव्यतिरेकित्वव्याकोपात्, अवृत्तौ सपक्षाप्रवेशिनोऽसाधारणानैकान्तिकत्वापातात्, वृत्तावपि भागे सिद्धसाधनताया दुष्परिहरत्वात् ।

न च स्वस्यासिद्धतामात्रेण परसिद्धे साध्यवति धर्मिणि सिद्धसाधनतायाः परिहारः, अन्यथा अन्यथाख्यातिवादिभिः केनचिद्धेतुना रजतज्ञानस्य पुरोवर्तिविषयत्वे साधिते वेदान्तिना चानिर्वचनीयपुरोवर्तिरजतविषयत्वेन सिद्धसाधनत्वेऽभिहिते नास्माकं तत् सिद्धमिति वचनमात्रेणान्यथाख्यातिवादिनश्चरितार्था भवेयुः ।

अथ नानिर्वचनीयवादिनं प्रत्ययं प्रयोगस्तस्य सिद्धसाधनतापत्तेः, तर्ह्यनुव्यवसायवादिनं प्रत्यप्ययं प्रयोगो न स्यात्, भागे सिद्धसाधनत्वप्रसङ्गात्, स्वप्रकाशवादिनं प्रति च सिद्धसाधनत्वादप्रयोग इति मूकीभाव एव स्यात् ।

अथ विवादपदपदेनानुव्यवसायस्य व्यवच्छेदान्नास्य धर्मिभागतेति मतिः, तथापि तस्य साध्यविशेषणप्रसिद्धिस्थलत्वेनाभ्युपगमाद्धेतोः केवलव्यतिरेकित्वाभावस्तदवस्थः, तदनङ्गीकारे च न विशेषणप्रसिद्ध्युपपत्तिः ।

अथ परं प्रत्येव तस्य प्रसिद्धिस्थलता, तर्हि तं प्रति केवलव्यतिरेकित्वप्रयोगायोगः । किंच व्यवहारहेतुत्वस्य प्रकाशविशेषणतायां केवल्ये तदभावात् स्वयंप्रकाशताभावः, व्यवहारहेतुत्वयोग्यतायां च स्वरूपातिरिक्तायां स एव दोषः ।

अथ तदुपलक्षितप्रकाशात्मत्वमेव साध्यम्, तथाप्युपलक्षितत्वस्य साध्यान्तर्भावे स एव दोषः, अनन्तर्भावे च प्रकाशस्वरूपताया एव साध्यत्वात् तस्याश्चान्यत्रापि सिद्धत्वाच्च केवलव्यतिरेक्यनुमानावकाशः, एते-

नानुभूतिरनुभाव्या न भवति· अनुभूतित्वादित्यादिप्रयोगोऽपि परास्तः, तत्राप्यप्रसिद्धविशेषणताया दुष्परिहरत्वात्, ज्ञानं वेद्यं वस्तुत्वाद्घटवदिति प्रतिप्रयोगसंभवाच्च ।

न च हेत्वसिद्धिः, सत्ताधिकरणत्वलक्षणवस्तुत्वस्यावधीरितकल्पिताकल्पितविशेषस्यानुभूतित्वादिवद्धेतुत्वोपपत्तेः ।

ननु किमिदं साध्यमानं वेद्यत्वं वास्तवमुतावास्तवमाहोस्विद्व्यावहारिकमथवा साधारणम् । आद्ये साध्यविकलं निदर्शनमितरेषु सिद्धसाधनत्वमिति चेत्, मैवम्, घटादेरिव व्यावहारिकप्रमाणसिद्धवेद्यतापादनेऽपि स्वप्रकाशत्वासिद्धेः, किंचानुभूतिपदं स्वगोचरगोचरज्ञानजन्यं पदत्वात् कुम्भपदवत् ।

ननु किमत्र गोचरशब्देन विषयमात्रमुच्यते किं वा वाच्योऽर्थः· अथवा लक्ष्यः*,न तावत् प्रथमद्वितीयौ सिद्धसाधनतापत्तेः, अभ्युपेयते ह्यनुभूतिशब्दवाच्यस्यान्तःकरणवृत्तिविशिष्टस्य ज्ञानस्य ज्ञानगोचरता, तृतीये मुख्यार्थविवक्षया प्रयुक्तगङ्गादिपदैर्व्यभिचार इति चेत्,मैवम्, लक्षकपदं पक्षीकृत्य लक्षकपदत्वेन गङ्गादिलक्षकपदवल्लक्ष्यज्ञानजन्यत्वानुमानात् ।

किंच· अनुभूतिपदाभिधेयस्य स्वप्रकाशत्वमभिधीयते भवद्भिरुत लक्ष्यस्य। नाद्यः, अपसिद्धान्तत्वापातात्। न द्वितीयः, प्रतिवादिनं प्रत्याश्रयासिद्धेः, सकलधर्मातीतस्यानुभूतिपदलक्ष्यस्य परैरनङ्गीकारात् ।

किंच स्वप्रकाशतायां सति प्रमाणे तद्वेद्यत्वमसति च साधकाभावादेव न तत्सिद्धिरिति सैषौपनिषदानामुभयतःपाशा रज्जुरित्यलमतिविस्तरेण ।

अत्रोच्यते,

अपरोक्षव्यवहृतेर्योग्यस्याधीपदस्य नः ।
संभवे स्वप्रकाशस्य लक्षणासंभवः कुतः ॥ ५ ॥

न तावत् स्वयंप्रकाशे लक्षणासंभवः, अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यतायास्तल्लक्षणत्वात् ।

* —र्थोऽथ लक्ष्यो वा· इति पाठान्तरम् ।

न च योग्यतावच्छेदकधर्माङ्गीकारेऽव्याप्तिर्मोक्षदशायां तदसंभवाद-प्रसिद्धान्तापत्तिश्चेति शङ्कनीयम्, योग्यत्वात्यन्ताभावानधिकरणत्वस्य तत्त्वात्, गुणवत्त्वात्यन्ताभावानधिकरणत्वस्य द्रव्यत्ववत्, तेन नाव्याप्तिः, नाप्यपसिद्धान्तः, काल्पनिकधर्माणां संसारदशायामभ्युपगमात् ।

"अवमा भवतः केयं साधकत्वप्रकल्पने ।

किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्" ॥

इति सुरेश्वराचार्यवचनात्, "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः" इति पञ्चपादिकाचार्यवचनाच्च । मोक्षदशायां च विवक्षितधर्माभावेऽपि कदाचित् सत्त्वेन तदत्यन्ताभावानधिकरणत्वस्य गुणाश्रयो द्रव्यमितिवत् सिद्धेः, अपरोक्षव्यवहारयोग्यघटाद्यवतिव्याप्ति-परिहारार्थमवेद्यत्वे सतीति विशेषणम्, न चैतावदस्तु लक्षणमिति वाच्यम्, तथा सत्यतीतानागतयोर्नित्यानुमेयेषु च धर्मादिष्वतिव्याप्तेः ।

ननु तेषामप्यागमवेद्यत्वाचावेद्यत्वमिति चेत्, मैवम्, फलव्याप्य-तालक्षणवेद्यत्वस्य तत्राभावात्, तत्र विशिष्टशब्दप्रमाणबलात् तदाकार-धीवृत्तिसमुल्लासमात्रादेव तद्व्यवहार इति वेदवादिनां प्रक्रिया ।

न च योगिप्रत्यक्षगम्यतया· अपरोक्षत्वं धर्मादीनाम्, चोदनैकप्रमाण-वेद्यत्वात् तेषाम् ।

न चैतावता सर्वदर्शित्वभावो योगिनां सर्वदर्शित्वशब्देन योग्यस-र्वद्रष्टृत्वस्य विवक्षितत्वात् ।

"यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।

दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता" ॥

इति न्यायात्, अतो धर्मादिव्यवच्छेदार्थमपरोक्षव्यवहारयोग्यत्वे सतीति विशेषणम् ।

नन्वज्ञानान्तःकरणतद्धर्मसुखादिषु शुक्तिरजतादिषु च लक्षणस्या-तिव्याप्तिस्तदवस्था, तेषामपि फलव्याप्यत्वाभावेनावेद्यत्वात्, अहमज्ञ इत्याद्यपरोक्षव्यवहारयोग्यत्वाच्च, इति चेत्, सत्यम्, अवेद्यत्वेऽपि नाप-रोक्षव्यवहारयोग्यता तेषाम्, अध्यस्ततयैव तेषां सिद्धेः ।

ननु तथाप्यपरोक्षमिति व्यवहारदर्शनाद्योग्यता तत्र कल्पनीयेति चेत्, नैवम्, रजतादिव्यवहारायोग्येऽपि शुक्तिशकलादौ रजतादिव्यवहारदर्शनात् ।

नन्वेवं सत्यवेद्यत्वविशेषणस्य न व्यवच्छेद्यमस्ति, त्वन्मते घटादेरप्यध्यस्ततया॰ अपरोक्षव्यवहारयोग्यत्वाभावात्, नैवम्, व्यवहारदशायां तेषां प्रत्यक्षप्रमाणविषयाणामपरोक्षव्यवहारयोग्यताङ्गीकारात्, तथाप्यवेद्यत्वे सत्यपरोक्षत्वमेव लक्षणमस्तु व्यभिचाराभावादिति चेत्, सत्यम्, अपरोक्षज्ञानविषयत्वेनैव घटादेरपरोक्षत्वाङ्गीकारात्, अत्रापि तथात्वाघ्राघात इति विभ्रमो मा भूदिति तद्व्यवहारेणैव प्रतिवादिनामपि संप्रतिपन्नेन तदेव स्फुटीक्रियत इति न कश्चिद् दोषः ।

कथं तर्ह्यवेद्यस्य व्यवहारयोग्यत्वमिति चेत्, किमिदमवेद्यत्वे व्यवहारविषयत्वं न स्यादित्यनिष्टप्रसञ्जनमुत तद्व्यवहारविषयत्वाद्वेद्यत्वानुमानम् ।

नाद्यः, आपाद्यापादकयोरुभयोरपि परेषामप्रसिद्धेः । नेतरः, तस्य संप्रति साधननिरासमये निराकरिष्यमाणत्वात् । तस्मादनाविलं स्वप्रकाशलक्षणम् ।

प्रमाणमप्यनुभूतिः स्वयंप्रकाशा, अनुभूतित्वात्, यन्नैवं तन्नैवं* यथा घट इत्यनुमानम्, न चाप्रसिद्धविशेषणत्वम्, यतः,

सामान्यतोऽनुमानेन प्रसिद्धेऽपि विशेषणे ।
कथं कथय पक्षोऽयमप्रसिद्धविशेषणः ॥ ६ ॥

तथाहि वेद्यत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगिधर्मत्वात्॰ शौक्ल्यवदिति सामान्यतोदृष्टानुमानेनानिर्धारितधर्मिविशेषनिष्ठस्यावेद्यत्वधर्मस्य प्रसिद्धत्वात्,केवलव्यतिरेकिणश्चोभयवादिसंप्रतिपन्नापरोक्षव्यवहारयोग्यानुभूतिविशेषावलम्बनताया एव समर्थ्यमानत्वाच्चाप्रसिद्धविशेषणता ।

* न यदेवं न तदेवम्, इति पा० ।

Digitized by Google

यद्वा यद्विपर्यये ऽसमीहितप्रसक्तिस्तत् क्वचिन्मानयोग्यमिति सामान्यव्याप्तिः, इह चानुभूतिरनुभाव्या भवति न वेति वादिविप्रतिपत्तेः संशये सत्यनुभाव्यत्वे सत्यसमीहितप्रसक्तेस्तद्विपर्ययस्य सामान्यतो मानयोग्यत्वाधिगमात्, विशेषप्रमाणापेक्षायां व्यतिरेकिण उपन्यासाच्चाप्रसिद्धविशेषणता, अन्यथा कथमिच्छादीनामष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं नैयायिकादयो ऽपि प्रसाधयेयुः, अष्टद्रव्यव्यतिरिक्तद्रव्यस्याप्रसिद्धावप्रसिद्धविशेषणता, प्रसिद्धौ च हेतोस्तत्र वृत्त.वन्वयव्यतिरेकितया केवलव्यतिरेकित्वासंभवः, अवृत्तौ चासाधारणानैकान्तिकतापत्तिः ।

न चैवं सत्यप्रसिद्धविशेषणताया अदूषणतापत्तिः, उक्तसामान्यतोदृष्टानुमानगोचरत्वासंभवे शशविषाणोल्लिखिता भूरित्यादौ तस्याः सावकाशत्वात् ।

अथवा,अयं घट एतद्घटान्यत्वे सति वेद्यत्वानधिकरणान्यः पदार्थत्वात् पटवदित्यादिमहाविद्याप्रयोगैरप्यवेद्यत्वप्रसिद्धिरप्यूहनीया ।

नाप्रसिद्धविशेष्यतापि, अनुभूतेः प्रसिद्धत्वात्, अत एव नाश्रयासिद्धिरपि हेतोः ।

नापि स्वरूपासिद्धिः कल्पितव्यक्तिभेदनिष्ठस्य चन्द्रत्वसामान्यस्येवानुभूतित्वसामान्यस्याप्यभ्युपगमे सिद्धान्ताविरोधात्, कल्पितस्यापि प्रतिबिम्बादिवत् साधकत्वसंभवात्, न च प्रतिवाद्यसिद्धिः, यतस्तेनाप्यनुभूतित्वसामान्यस्याभ्युपगमात् ।

न च कल्पिताकल्पितत्ववैषम्याद्धेतोरन्यतरासिद्धिराशङ्कनीया, अवधीरितकल्पिताकल्पितविशेषस्यानुभूतित्वमात्रस्योभयवादिसिद्धत्वात्, अन्यथा धूमवत्त्वादावपि तदेतद्देशनिष्ठत्वादिविकल्पेनासिद्ध्यादेर्दुष्परिहरत्वात् ।

न च व्याप्यत्वासिद्धिः सोपाधिकस्यैव तथात्वात्, केवलव्यतिरेकिणि चोपाधेरसंभवात्, उपाधिर्हि साध्यव्यापकत्वे सति साधनाव्यापकः, स चान्वयव्यतिरेकी कश्चिद्धर्मः, स कथं केवलव्यतिरेकिणि पक्षव्यतिरिक्तभूमौ साध्येनान्वयी स्यात् ।

न च पक्षे साध्येनान्वयः, तत्र साध्यस्याद्यापि संदिग्धत्वात्, निश्चये सिद्धं नः समीहितमिति किमुपाधिः करिष्यति, पक्षे चोपाधिवृत्तेः साधनव्यापकता च दुर्वारा ।

न च साध्यसद्भावे मा भूदुपाधिः साध्याभावे कश्चिदुपाधिर्भविष्यतीति वाच्यम्, तथाहि यत्रोपाधिरस्ति तत्र साध्यं नास्तीति साध्याभावस्य गमकत्वेनोपाधिरेष्टव्यः, अन्यथोपाधिसद्भावेऽपि साध्याभावो व्यापकतया न वर्तते चेदुपाधिसद्भावे साध्यं स्यात्, तच्च न पक्षे, तत्रोपाधिसद्भावे तस्य साधनव्यापकत्वप्रसङ्गात्, तस्मादन्यत्रोपाधिसत्त्वे साध्यसत्त्वं स्यादिति वाच्यम्, तथा च केवलव्यतिरेकित्वभङ्गप्रसङ्गः, प्रकृते चानुभूतिर्धर्मा वस्तुत्वाद् घटवदिति केवलान्वयिनानुमानेन हि स्वयंप्रकाशत्वव्यतिरेको वक्तव्यः, तत्र च नोपाधिः संभवति, साधनाव्यापकत्वस्य वक्तुमशक्यत्वात् ।

तदेवं नासिद्धो हेतुः, नापि विरुद्धः, वेद्येषु विपक्षेष्वनुभूतित्वहेतोरवृत्तेः, नाप्यनैकान्तिकः, विपक्षाद्व्यावृत्तेरेव, नाप्यसाधारणः, सपक्षाभावात्, विपक्षे बाधकतर्काभावात् । संदिग्धानैकान्तिकतेति चेत्, नैवम्, अनुभूतेरनुभाव्यत्वेऽनवस्थापातात् ।

न च वाच्यमवश्यवेद्यत्वाभावाचानवस्था, व्यवहारस्य तत्स्वरूपसत्तामात्रेणाप्युपपत्तेरिति तद्विषयप्रमाणानुदये तत्सत्ताया अप्यनिश्चयात् तत एव व्यवहार इत्यप्यसिद्धेः ।

अथ यदा कदाचित् तत्सत्ताजिज्ञासोदये व्यवहारादिना केनचिल्लिङ्गेन सापि प्रमीयत इति मतम्. तन्न, घट इति घटमनुभवामीति चानुभूतिद्वयातिरिक्तायास्तत्तदनुभूतिपरम्परावगाहिकायाः कस्याश्चिदनुभूतेरनुभवागोचरत्वात्, अन्तरेण तदनुभवं तत्सत्ताभ्युपगमे प्रमेयसत्ताया अपि तथाभ्युपगमोपपत्तौ प्रमाणगवेषणावैयर्थ्यापातात्, तत्रापि च प्रमाण*गवेषणायां पूर्वोक्तानवस्था तदवस्थैव स्यात् ।

*–णान्वेषणा–इति पा० ।

अथ सा स्वविषयप्रमाणमन्तरेण स्वभावभेदादेव स्वविषयभेद-व्यवहारं जनयेत्, प्रथमेव* तर्हि तथा स्वव्यवहारमिति व्यर्थानुभूतिपरम्पराभ्युपगतिः, तदेवमनुभूतेरनुभाव्यत्वेऽनुभूतिस्वरूपासिद्धिप्रसङ्गस्येव विपक्षे बाधकतर्कत्वाच्च संदिग्धानैकान्तिकता ।

किंच, अनुभूतिरर्थप्रकाशनसमये यदि न प्रकाशेत, तथा सत्यनन्तरक्षणे जिज्ञासोस्तत्र संदेहो विपर्यासो वा विपरीतप्रमा वोदियात्, न च कश्चिदमुमद्राक्षीर्वा भवानिति पृष्टोऽनन्तरक्षणे संदिग्धे विपर्यस्यति संविदभावं वा प्रमिणोति किंतु निश्चिनोत्येव· इदमहमद्राक्षमिति, तेन प्रकाशमानैवानुभूतिरर्थेव्यवहारं जनयतीति युक्तम् ।

न च सुखादिवदन्याधीनप्रकाशत्वेऽपि संशयाद्यविषयत्वोपपत्तिः सति धर्मिणि तद्वदेवावश्यवेद्यत्वेऽनवस्थादोस्स्यात् ।

किंच येन मनःसंयोगेन पटानुभूतिर्जनिता तेनैवानुव्यवसायस्यापि जन्मोत संयोगान्तरेण ।

नाद्यः, अनुव्यवसायं प्रति कर्मकारकतया जनकस्य व्यवसायस्य तज्जन्यानुव्यवसायस्य च यौगपद्यायोगात्, कारणस्य च प्रत्ययपर्याये सामर्थ्यानङ्गीकाराच्च, यतोऽसमवायिकारणभेद एव ज्ञानभेदहेतुरभ्युपेयते, अन्यथापेक्षणीयान्तरासंभवेन युगपदेव घटानुभवस्मरणयोरनुभवान्तरस्य च तद्विषयस्योत्पत्तिप्रसङ्गात्, अक्रमाच्च कारणात् कार्यभेदक्रमायोगात्, बाह्यसामग्र्यवच्छेदकक्रमभेदेन कार्यक्रमाभ्युपगमे युगपदेव संप्रयुक्तेषु घटपटादिषु युगपदेवानेकज्ञानजन्मप्रसङ्गात् ।

न द्वितीयः,घटज्ञानोदयसमये मनसि क्रिया ततो विभागस्ततः पूर्वसंयोगविनाशस्तत उत्तरसंयोगोत्पत्तिस्ततो ज्ञानान्तरमित्यनेकक्षणविलम्बेनोत्पद्यमानस्य ज्ञानस्यापरोक्षतया पूर्वज्ञानग्राहकत्वानुपपत्तेः ।

किंच चक्षुरादिवदप्रकाशमानस्यैव ज्ञानस्य स्वातिरिक्तज्ञानजननेनार्थव्यवहारहेतुत्वाभावाज्जडानां च स्वतः परस्परतो†वा प्रकाशमानत्वायो-

* जनयेत् प्रथमेव· इति पा० ।

† परस्परं वा इति पा० ।

Digitized by Google

गाज्ञानमपि न प्रकाशते चेत्, किमपि न प्रकाशेतेति जगदान्ध्यप्रसङ्ग इत्यादिबाधक* स्तर्क उन्नेयः ।

ननु घटज्ञानवानहमस्मि ज्ञातो घट इति प्रत्यक्षेणैवानुभूतेर्वेद्यत्वप्रतीतेः कालात्ययापदिष्टतेति चेन्न, वेद्यत्वव्यतिरेकेण तस्याः स्वतः स्फुरणेनापि तादृग्व्यवहारोपपत्तेः ।

किंच विदितो घट इत्यत्रानुव्यवसायेन घटस्यैव विदितत्वमवसीयते न तु वित्तेः, विदितत्वस्य घटविशेषणत्वात् ।

अपिच अनुभूतेः प्रत्यक्षतायामपि तत्प्रत्यक्षेणैव तदनुभाव्यत्वस्याप्रत्यक्षीकरणाच्च प्रत्यक्षविरुद्धता, अन्यथानुव्यवसायेन व्यवसायस्य स्वविशेषितवेद्यत्वग्रहणे विशेषणतया स्वस्यापि स्वेन वेद्यत्वापातात् सौगतमतानुमतिप्रसङ्गः ।

न च वेद्यत्वापादकवस्तुत्वाद्यनुमानविरोधो व्याप्तिग्रहणासिद्धेः, तथाहि वस्तुत्वाद्वेद्यत्वं साधयता यद्यद्वस्तु तत् तद् वेद्यमिति व्याप्तिरभ्युपेया, तथा सत्यस्या व्याप्तेर्ग्राहिका संविद् व्याप्तिग्रहणसमये स्फुरति न वा, आद्ये स्वेनैव स्फुरणे सौगतमतानुमतस्वप्रकाशतापत्तिः, तत्स्फुरणस्य स्वहेतुताया अप्यनङ्गीकारे वेदान्तसिद्धान्ताभिमतं स्वयंप्रकाशत्वं त्वयाभ्युपगतं स्यात्, द्वितीये तु संविल्लक्षणवस्तुविशेषास्फुरणादेव सर्वोपसंहारवती व्याप्तिरेवास्तमियात्, तत्र कुतोऽनुमानप्रसरः कुतस्तरां च प्रकृतस्य हेतोः संप्रति साधनता ।

अपिच भाट्टानां ज्ञाततायां व्यभिचारात्, नैयायिकादेश्च वेद्यत्वस्यापि धर्मतयात्यन्ताभावप्रतियोगित्वादवेद्यस्यापि कस्यचित् संभवेन वस्तुत्वादेः केवलान्वयित्वेनाभिमतस्यापि हेतोः संभावितविपक्षतया विपक्षबाधकतर्कमन्तरेणाप्रयोजकत्वात्, न ह्यनुभूतेरप्यवेद्यत्वे वस्तुत्वानुपपत्तिः स्वतः सिद्धतायामपि तदुपपत्तेः, लक्ष्यत्वन्यायविषयत्वहेत्वोरपि यथोक्तमूहनीयम् ।

*–विपक्षबाधक–इति पा० ।

न च लक्षकपदत्वेन लक्ष्यविषयज्ञानजन्यत्वमनुमेयं हेतोरसिद्धत्वात्, न ह्यनुभूतिपदमनुभूतिं लक्षयतीति तवाभिमतं तद्वाचकत्वेनैव स्वीकारात् ।

किंच लक्ष्यज्ञानशब्देन लक्ष्यकर्मकं स्फुरणं किं वा तद्विषयमुत स्फुरणमात्रं किं वा तद्विषयान्तःकरणवृत्तिर्विवक्ष्यते, नाद्यः, अतीताद्यर्थलक्षकपदेषु व्यभिचारात्,नेतरे सिद्धसाधनत्वात्, अस्ति हि तत्स्वभावस्यापि स्फुरणस्य तद्व्यवहारजनकत्वेन तद्विषयत्वम्, अस्ति च स्फुरणमात्रम्, अनुभूतेः स्फुरणरूपत्वात्, तदाकाराया वृत्तेः स्वीकाराच्च,अनुभूतिपदवाच्यस्य लक्ष्यस्य वा स्वप्रकाशत्वमित्यपि विकल्पोऽनुपपन्नः, उभयवादिसंप्रतिपन्नस्फुरणमात्रस्य स्वप्रकाशत्वप्रतिपादनात्, अन्यथा वेद्यत्वसाधनेऽपि तवास्य विकल्पस्य दुष्परिहरत्वात् ।

नन्वेवमपि घटः स्वयंप्रकाशो घटत्वाद् यन्नैवं तन्नैवं यथा पट इत्याभाससमानयोगक्षेमताहेतोरिति चेत्, मैवम्, पृथुबुध्नोदराकारस्य घटशब्दवाच्यस्य स्पर्शरूपादिमतश्चक्षुःस्पर्शनप्रमाणसिद्धत्वेन संमतस्य स्वप्रकाशत्वसाधने प्रत्यक्षविरोधात्, अतद्विषयस्य चाप्रसिद्धत्वेन धर्म्यसिद्धेः ।

न चात्राप्यवेद्यस्यानुभूतित्वमप्रसिद्धमिति वाच्यम्, तथा सति तस्यावेद्यत्वावेद्यत्वयोर्वादिनां विप्रतिपत्त्यभावप्रसङ्गात् ।

न चैवमुभयतःपाशा रज्जुः, अनुभूतेः प्रमाणजन्यस्फुरणाश्रयतया स्फुरणकर्मतया वा घटादिवद्विषयभावाभावेऽपि प्रमाणजनितान्तःकरणवृत्तिव्याप्यत्वेन विषयताङ्गीकारेऽपि स्वप्रकाशत्वाव्याघातात्, उक्तवृत्तिव्याप्यत्वेऽपि स्फुरणव्याप्यत्वाभावापराधेन नाप्रामाणिकतापि, केवलव्यतिरेकाभावात्, अतीतानागतयोः स्फुरणविरहिणोरुक्तवृत्तिव्याप्ययोर्भाट्टैः प्रामाणिकत्वाभ्युपगमात्, चेष्टादिलिङ्गकानुमानविषयस्यापि परज्ञानस्य स्वाश्रये स्वविषयापरोक्षव्यवहारजनने ज्ञानान्तरनिरपेक्षतया स्वप्रकाशत्वोपपत्तेश्च ।

किंच त्वज्ज्ञानं तवापरोक्षव्यवहारयोग्यत्वे सति वेद्यं न भवति ज्ञानत्वान्मदीयज्ञानवत्, न च मदसमवेतत्वं मदन्यसमवेतत्वं वोपाधिः,

साध्याव्याप्तेः, त्वदीयधर्माधर्मादिषु स्वत्समवेतेष्वसमवेतेषु च परमाणुषूक्त-साध्यस्य सद्भावेऽप्युपाधेरभावात् ।

न च ममा*परोक्षव्यवहारयोग्यत्वमुपाधिः, ममापरोक्षव्यवहार-योग्यत्वादिदं ममापरोक्षव्यवहारयोग्यत्वे सत्यवेद्यं न भवति घटवदिति व्यतिरेके ज्ञानेतरत्वस्यैवोपाधित्वात्, विवादपदानि ज्ञानानि घटज्ञाना-न्यत्वे सति वेद्यत्वानधिकरणानि ज्ञानत्वाद् घटज्ञानवत् ।

न च घटज्ञानत्वमुपाधिः, शरीरिजन्यत्वोपाधाविव व्यर्थविशेषण-त्वात् ।

तस्माद्विगलितसकलकलङ्कमनुभूतेः स्वप्रकाशत्वानुमानमिति सि-द्धम् ।

एतेनात्मनोऽपि स्वप्रकाशत्वं व्याख्यातम्, तथाहि,

चिद्रूपत्वादकर्मत्वात् स्वयं ज्योतिरिति श्रुतेः ।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः ॥ ७ ॥

आत्मा संविद्रूपः संवित्कर्मतामन्तरेणापरोक्षत्वात् संवेदनवदिति प्राभाकरं प्रत्यनुमानात्, घटतज्ज्ञानयोः संबन्ध आत्मनिष्ठो ज्ञाननिष्ठ-त्वात् पदविषयत्ववदिति नैयायिकादीन् प्रत्यनुमानादात्मनश्चिद्रूप-त्वसिद्धिः, विपक्षे चात्मनः संशयविपर्यासगोचरत्वापत्तिर्बाधिका, न ह्या-त्मन्यहमनहं वेति कश्चित् संदिग्धे, नैवाहमिति वा विपर्यस्यति ।

न चैतत् स्वप्रकाशज्ञानरूपतामन्तरेणावकल्पते ।

न चान्तरेणापि ज्ञानरूपतां दुःखादिवदेतदुपपद्यत इति शङ्कनीयम्, तेषां स्वसत्तायां ज्ञानाव्यभिचारात् तदुपपत्तेः, न चात्मन्येवमभ्युपगम्यते सुषुप्त्यभावप्रसङ्गात् ।

न च ज्ञानात्मनोः संबन्धोऽनात्मवृत्तिर्ज्ञानवृत्तित्वात् सत्तावदिति शङ्कनीयम्, ज्ञानमेवात्मेत्यभ्युपगच्छतां ज्ञानात्मनोः संबन्धस्यैवाभावादा-श्रयासिद्धिः, "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति द्रष्टृदृष्ट्योः संबन्धः श्रुतित एवाधिगत इति मानमनोहरकारः प्रातिष्ठिपदिति चेत्, मैवम्, श्रुते-

* त्रिषु स्थलेषु मम॰ इति स्थाने तव॰ इति पा॰ ।

लोकप्रसिद्धसंबन्धानुवादेन दृष्टेर्विनाशित्वाभावमात्रप्रतिपादनपरत्वात्, अप्राप्ते हि शास्त्रमर्थवदिति न्यायात्, मुख्यार्थेऽद्वैतश्रुतिविरोधात्, राहोः शिर इतिवदुपचारेणापि संबन्धश्रुतेर्वृत्त्युपपत्तेश्च ।

न चानयोस्तुल्यबलतया विपर्ययः, तत्परत्वातत्परत्वविशेषोपपत्तेः, उपक्रमोपसंहाराद्यविषड्विधतात्पर्यलिङ्गोपेताद्वैतश्रुतिः कथं लोकप्रवादप्रायोपजीविनीं संबन्धश्रुतिं न बाधेत, देवदत्तस्य गन्तुरितिवद् द्रष्टुर्दृष्टेरिति द्रष्टृरूपाया दृष्टेर्दृष्टिलक्षणो वा यो द्रष्टा तस्य विपरिलोपो नास्तीति सामानाधिकरण्येन षष्ठ्याः संबन्धसंभवे वैयधिकरण्यस्य कल्पनायोगात्, "न दृष्टेर्द्रष्टारं पश्ये"रित्यादाविव वैयधिकरण्येऽप्यन्तःकरणपरिणामरूपाया दृष्टेर्या द्रष्टेति वा परिणामिनोऽन्तःकरणस्य द्रष्टुः साक्षिभूता या दृष्टिस्तस्या विपरिलोपो नास्तीति वा· अद्वैतश्रुत्यनुगुणे संभवति संबन्धे गुणगुणिभावेन संबन्धकल्पना· अविदितमीमांसावृत्तान्तस्यैव परं शोभते ।

किंच जीवेश्वरयोर्भेदमभ्युपगच्छता नित्यदृष्टिसंबन्धः कस्योच्यत इति विवेचनीयम्, न तावज्जीवस्य, तस्यानित्यज्ञानाभ्युपगमात्, नापीश्वरस्य, मैत्रेयीब्राह्मणे "न वा अरे पत्युः कामाय पतिः प्रियो भवति" इत्यादिना पतिजायादिप्रियसंसूचितं जीवमुपक्रम्य तस्यैव च "तेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ती"त्यवस्थान्तरप्रतिपादनावसरे विनाशमाशङ्क्य "विनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति यद्वैतन्न पश्यति पश्यन् वैतद् द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत" इति चाविनाशितोपपादनात्, ज्योतिर्ब्राह्मणे च जागराद्यवस्थोपन्यासपुरःसर"मथ यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यती"ति संप्रसादावस्थानमवतार्य "यद्वैतन्न पश्यति पश्यन् वैतन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत" इति विशेषविज्ञानाभावेऽपि स्वरूपविज्ञानस्य नित्यत्वप्रतिपादनात्, ईश्वरपक्षे च विशेषविज्ञानाभावस्य वक्तुमयुक्तत्वात्, तस्य सर्वदा सर्वज्ञत्वात्, सुषुप्त्याद्यवस्थाभावाच्च ।

तस्मादज्ञानात्मनोः संबन्धोऽनात्मनिष्ठ इत्यनुमानमाश्रयासिद्धमिति सिद्धम् ।

यत्तु गुणत्वादनित्यत्वाज्ज्ञानमात्मा न भवति रूपादिवदित्यनुमानं तत् सर्वमन्यतरासिद्धतयापास्तम् ।

अथ घटज्ञानयोः संबन्धो गुणनिष्ठो ज्ञाननिष्ठत्वात् सत्तावत् विपक्षे च जानामीति प्रत्ययस्य निरालम्बनत्वप्रसङ्गो बाधक इति चेत्, मैवम्, रूपतज्ज्ञानयोः संबन्धो द्रव्यनिष्ठो ज्ञाननिष्ठत्वात् सत्तावदिति प्रतिप्रयोगसंभवात्, जानामीति चानुभवस्यान्तःकरणवृत्त्याश्रयप्रमातृविषयतयाप्युपपत्तेः, "विज्ञानमानन्दं ब्रह्म" "प्रज्ञानं ब्रह्म" "प्रज्ञानघन एवे"त्यादिश्रुतिभ्य आत्मनश्चिद्रूपत्वसिद्धिः ।

न चाधिकरणपरतया ज्ञानशब्दो योज्यः, अद्वैतश्रुतिविरोधात्, तस्मात् साधूक्तं चिद्रूपत्वादिति ।

अकर्मत्वाच्चात्मनः स्वतः स्वप्रकाशत्वम्, वेद्यत्वे स्वाश्रयज्ञानविषयतया कर्मकर्तृभावविरोधप्रसङ्गात् ।

न च सुखादिविशिष्टस्याहं सुखीत्यादिज्ञानकर्मत्वं केवलस्य च कर्तृत्वमित्याकारभेदादविरोधः, गमनक्रियास्वपि केवलस्य कर्तृत्वं गमनविशिष्टाकारेण च कर्मत्वमित्याकारभेदेनाविरोधात् कर्मकर्तृभावविरोधस्य सर्वत्रोच्छेदप्रसङ्गात्, तथापि नात्मनः स्वप्रकाशत्वम्, तत्तदर्थसंवेदनाश्रयतयापि स्फुरणोपपत्तेः ।

न चास्य क्रियाफलभाजोऽपि कर्मत्वम्, परसमवेतक्रियाफलशालित्वाभावात् ।

न चैतन्मानसप्रत्यक्षेऽपि समानम्,जानातेः सदा सकर्मकतया कर्मणा व्याप्तस्य तन्निवृत्तौ निवृत्तिरिति चेत्, मैवम्, संविद्व्यतिरिक्तस्य संवित्कर्मत्वेनैवापरोक्षत्वनियमादात्मनः कर्मत्वाभावे तदनुपपत्तेः, संवेदिता संविदाश्रयतयाऽपरोक्षो न भवत्यपरोक्षत्वात् संवेदनवदिति ।

न च विपक्षे बाधकतर्काभावः, स्वसत्तायां प्रकाशव्यभिचारवतः प्रकाशान्तराधीनव्यवहारवत्त्व कदाचित् संशयादिगोचरत्वप्रसङ्गस्यैव बाधकत्वात्, आत्मनो घटादिज्ञाने भासमानत्वाङ्गीकाराच्च, घटादिवदेव

चाक्षुषत्वमपि प्रसज्येत, तज्जनितज्ञाने भासमानताया एव तत्त्वात्, नीरूपस्य च द्रव्यस्य चाक्षुषत्वायोगात्, आत्माचाक्षुषज्ञानेन प्रकाशते-अरूपि-द्रव्यत्वादाकाशवदिति प्रतिप्रयोगसंभवाच्च, अत्रा"यं पुरुषः स्वयं ज्योति"-रिति श्रुतेश्चात्मा स्वप्रकाशः ।

ननु स्वप्नावस्थामधिकृत्येदमाम्नायते, तत्र मनसोऽनुपरमाच स्वयं-ज्योतिष्ट्वम् ।

न च मनसो गजाद्याकारपरिणतस्यावभासकर्मतयैवावस्थानात् करणान्तराभावाच्चात्मैव स्वयं ज्योतिः स्यादिति शङ्कनीयम्, मनसश्चक्षुरा-दिवदिन्द्रियत्वेन प्रत्यक्षत्वानुपपत्तेः ।

तस्मान्मनःसंयोगजन्यज्ञानाधारत्वेन स्वयंशब्दवाच्य आत्मा ज्यो-तिरित्यभिधीयते,ज्योतिःसाधनत्वाद्वा, "वाचैवायं ज्योतिषा अग्निनैवायं ज्योतिषे"त्येतत्प्रकरणपठितवागग्न्यादिवत्, न त्वात्मा स्वयं ज्योतिरिति, द्रव्यस्य गुणत्वानुपपत्तेरिति चेत्, मैवम्, यतः,

संबन्धस्याश्रयत्वेन विघातासमवायिनः ।
इन्द्रियत्वाविघाताच्च मनः प्रत्यक्षमात्मवत् ॥ ८ ॥

मनः प्रत्यक्षं ज्ञानासमवायिकारणाधारत्वादात्मवदित्यनुमानान्म-नसोऽपि प्रत्यक्षत्वोपपत्तेः ।

न च प्रत्यक्षत्वे सतीन्द्रियत्वव्याकोपः, तस्य साक्षिवेद्यस्याप्यैन्द्रि-यकज्ञानाविषयत्वेनेन्द्रियत्वाव्याकोपात् ।

तस्मान्निरस्तसमस्तकलङ्कावकाशमात्मनः स्वप्रकाशत्वम्, तच्चात्म-रूपम्, अविद्यापरिकल्पितप्रपञ्चावभासकत्वादविद्यातमोनिवर्तकत्वाच्च ज्योतिःशब्दाभिधेयम्, यथा भावरूपशार्वरादितमोनिवर्तनेन जगदवभास-कमादित्यादिज्योतिरिति सिद्धम् ।

ननु तमो न भावरूपम्, भावेष्वनन्तर्भावात्, तद्धि पृथिव्यादिद्र-व्याणामन्यतमं तदन्यद्वा स्यात् ।

नाद्यः, क्षितिसलिलात्मसु चतुर्दशसु गुणेषु तेजस्येकादशगुणे मात-रिश्वनि नवगुणे मनसि चाष्टगुणे नभसि षड्गुणे दिक्कालयोः पञ्चगुणयोर-

विमाश्रिनोरनन्तर्भावात्, अन्तर्भावे तु तावद्गुणत्वप्रसङ्गात्, आत्मादावन्तर्भावे नित्यत्वापत्तेश्च ।

नापि द्वितीयः, निर्गुणस्य द्रव्यत्वानुपपत्तौ द्रव्यान्तरत्वस्य सुतरामनुपपत्तेः, नीलोत्पलदलश्यामं महच्चोपलभ्यमानं तमः कथं निर्गुणमिति चेन्न, नीलरूपस्य गन्धाद्येकार्थसमवायिनस्तद्व्याप्तस्य तदभावे भावायोगात्, अपिच द्रव्यान्तरत्वे न तावन्निरवयवत्वम्, नित्यत्वेनालोकानिवर्त्यत्वापत्तेः, सावयवत्वे च तदारम्भकाणां स्पर्शवत्त्वे तस्मिन्नपि स्पर्शोपलम्भप्रसङ्गात्, अस्पर्शवत्त्वे च तेषां मनोवद् द्रव्यारम्भकत्वायोगात्, नापि गुणः, रूपान्तर्भावे पृथिव्यादित्रितयगुणत्वे च तत्सहचारिणां गुणान्तराणामप्युपलब्धिप्रसङ्गात्, नापि नभोनभस्वतोर्गुणः, तयोररूपत्वात्, नापि दिक्कालमनसाम्, एतेषां विशेषगुणरहितत्वात्, नाप्यात्मनः, तस्य बाह्येन्द्रियप्रत्यक्षगुणानधिकरणत्वात्, नापि कर्म, संयोगविभागयोरकारणत्वात्, नापि सामान्यविशेषसमवायाः, तेषां व्यक्त्याश्रयसंबन्धिनामुपलब्धिमन्तरेणानुपलम्भनियमात्, न हि सामान्यस्येव व्यक्तिर्विशेषाणामिव चाश्रयः समवायस्येव संबन्धी तमसः कश्चिदुपलभ्यते ।

न चास्य तमस उपलम्भसंभवः, तदुपलम्भकाभवात्, न च लोचनमुपलम्भकम्, तदव्यापारे तदनुपलम्भापातात्, अस्ति च निमीलितनयनस्यापि तमः पश्यामीत्यभिमानः ।

अपिच रूपत्वे रूपवत्त्वे वा आलोकाजन्यचक्षुर्जन्यसाक्षात्कारविषयत्वं न स्यात्, आलोकसहकृतस्यैव चक्षुषस्तत्र सामर्थ्यात्, नापि मनस्तदुपलम्भकम्, बाह्येन्द्रियनिरपेक्षस्य तस्य बहिरप्रवृत्तेः ।

तस्मात् षट्स्वपि भावेष्वनन्तर्भावात् तद्भावे चोपलम्भकाभावाच्च प्रभाभावस्तम इति ।

अत्रोच्यते ।

तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे ।
द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते ॥ ९ ॥

• तमसः १ ।

अस्ति हि तमस्तमालमालाश्यमलमिति प्रतीतिः ।

न चाप्रतीतावेवायं प्रतीतिभ्रमः, तद्व्यवहारस्य तत्प्रतीतिमन्तरेणानुपपत्तेः, न चायमौपचारिक आलोकाभावे शौक्ल्याभावे पटादौ नीलव्यवहार इवेति युक्तम्, मुख्ये बाधकाभावात्, रूपत्वे रूपवत्त्वे वा आलोकानपेक्षचक्षुर्जन्यज्ञानविषयत्वासंभवो बाधक इति चेत्, नैवम्, आलोकविरोधिनस्तमसश्चालोकाभावव्यञ्जनीयतया तदनपेक्षचक्षुर्विषयत्वोपपत्तेः, सामर्थ्यस्य कार्यगम्यत्वात्, न चेदालोकाभावस्यापि रूपवदभावतया घटाभाववदालोकनिरपेक्षचक्षुर्विषयत्वं न स्यात्, तद्विरोधितया तदनपेक्षत्वं तु प्रकृतेऽपि समानम्, अन्यत्राभिनिवेशात्, न च निमीलितनयनस्य लोचनव्यापाराभावेऽपि तमस उपलम्भादचाक्षुषत्वम्, तत्रापि पक्ष्मपटलान्तर्वर्तितमसश्चक्षुर्व्यापारादेवोपलब्धेः, पिहितकर्णपुटस्य श्रोत्रव्यापारादेवान्तरशब्दोपलब्धिवत् ।

यत्तु गन्धाभावे तद्व्याप्तं नीलरूपमपि न स्यादिति तदपि न, अनुष्णाशीतस्पर्शस्य पृथिव्यां गन्धाभिव्याप्तस्य तदभावेऽपि मरुति प्रतीतेरेवाङ्गीकारवदिहापि प्रतीतेरेव नीलरूपस्य गन्धाभावेऽप्यभ्युपेयत्वात् ।

अथ पाकजस्यैवानुष्णाशीतस्पर्शस्य गन्धादिना व्याप्तिः, तर्हीहापि पाकजस्यैव कालिमगुणस्य गन्धादिना व्याप्तिरिति तुल्यम्, सद्भावग्राहिणः प्रत्यक्षस्योभयत्र समानत्वात् ।

न च स्पर्शाभावात् तमसो रूपवत्त्वाभावः, रूपग्राहकप्रत्यक्षविरोधे हेतोः कालात्ययापदिष्टतया तदभावानुमानानुदयात्, अन्यथा रूपाभावेन पवनेऽपि स्पर्शाभावानुमानस्य दुर्निवारत्वात्, अन्यत्र रूपवतामेव स्पर्शवत्त्वनियमात् ।

न चास्पर्शवत्त्वादेव तमःपरमाणूनां मनोवदनारम्भकत्वमनुमातुं युक्तम्, तत्र वैयर्थ्यस्योपाधेः सद्भावात्, नहि शरीरतया विषयतयेन्द्रियतया वा मनआरब्धद्रव्यस्य भोगसाधनता संभविनी, पार्थिवादिचतुर्विधशरीरान्तर्भूतस्येन्द्रियाणामाश्रयस्य शरीरतया भोगसाधनतानुपपत्तेः, न च विषयतया, रूपस्पर्शशून्यारब्धस्य तद्रहितत्वेन विषयत्वायोगात्, शरीरेन्द्रियत्व-

तिरिक्तोऽवयवी विषय इत्यङ्गीकारात्, नापीन्द्रियतया मनस एवेन्द्रियत्वात्, तदारब्धेन्द्रियान्तरस्वीकारवैयर्थ्यात् ।

न च शरीरेन्द्रियविषयानन्तर्भूतस्य कार्यद्रव्यस्य भोगसाधनत्वं परैरङ्गीक्रियते, आत्मादीनां पुनरस्पर्शवतां शरीरेन्द्रियविषयारम्भासंभवात् समानमेव द्रव्यान्तरारम्भवैयर्थ्यम्, इह पुनस्तमसो महतो रूपवतः संभवति भोगसाधनत्वमिति नारम्भवैयर्थ्यम् ।

किंच· अस्मन्मते न तमस्तमोऽवयवैरारब्धम्, तस्य मूलकारणान्मेघमण्डलान्महाविद्युदादिजन्मवज्जन्माभ्युपगमात् ।

न च मनसो नारम्भकत्वम्, तस्यापि सावयवद्रव्यत्वेन परिणामित्वाभ्युपगमात्, आत्मनश्च स्पर्शरहितस्य सर्वजगदुपादानकारणत्वाभ्युपगमाच्च, चलत्वाच्चालोकवत् तमो द्रव्यान्तरम्, अन्यानुविधाननियमाच्च स्वाभाविकं चलनमस्य घटरूपादिवदिति चेच, द्रव्यस्यापि सुवर्णादिवद्द्रव्यान्तरानुविधानेऽपि स्वाभाविकचलनोपपत्तेः, तथाहि, आकरजस्य तेजसः सुवर्णादिपार्थिवद्रव्योपष्टम्भात् पतनादिप्रतिभासेऽपि न स्वाभाविकं चलनमुपरुध्यते ।

किंच· इदमन्यानुविधानं किमालोकावरकातपत्राद्यनुविधानं किं वा निवर्तकप्रदीपाद्यनुविधानम् ।

नाद्यः, निश्चलेऽप्यचलादौ तच्छायायाश्चलनोपलम्भात् ।

नापि द्वितीयः, वैपरीत्यात्, आलोकागमने गच्छति छायेति प्रतीतेर्गमने चागच्छतीति प्रतीतेः, तद्विरोधित्वाच्च तदनुविधानानुपपत्तेः ।

किंच ।

चक्षुःप्रकाशताजन्यरूपवद्वीक्षणक्षमम् ।
रूपिग्राहीन्द्रियत्वेन यथैव स्पर्शनेन्द्रियम् ॥ १० ॥

चक्षुरालोकाजन्यरूपिद्रव्यसाक्षात्कारजनकं रूपिद्रव्यग्राहकेन्द्रियत्वात् त्वगिन्द्रियवत् ।

न च रूपरहितेन्द्रियत्वमुपाधिः, यद्रूपवदिन्द्रियं तदालोकाजन्यरूपिसाक्षात्कारजनकं न भवति घ्राणवदिति व्यतिरेकव्याप्तौ रूपवद्ग्राह-

कत्वस्यैवोपाधित्वात्, तत् सिद्धमेतत् तमो द्रव्यान्तरमिति, इत्थमालोकव-द्देव भावरूपाज्ञानतमोविरोधिन आत्मनो जगदवभासकस्य ज्योतिःशब्द-वाच्यत्वात् तस्य त्वसङ्गस्य दृश्यसङ्गानिरूपणाद् दृश्यप्रपञ्चस्य स्वतः पर-तश्चासिद्धेर्दृगात्मन्यध्यस्ततयैव सिद्धिरिति सिद्धं मिथ्यात्वम् ।

किं पुनरिदं मिथ्यात्वम् । प्रमाणागम्यत्वं वा १ । अप्रमाणज्ञानग-म्यत्वं वा २ । अयथार्थज्ञानगम्यत्वं वा ३ । सद्विलक्षणत्वं वा ४ । सदसद्वि-लक्षणत्वं वा ५ । अविद्यातत्कार्ययोरन्यतरत्वं वा ६ । ज्ञाननिवर्त्यत्वं वा ७ । प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा ८ । बाध्यत्वं वा ९ । स्वात्यन्ता-भावसमानाधिकरणतया प्रतीयमानत्वं वा १० ।

नाद्यः, ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात्, तस्य स्वप्रकाशत्वेन त्वया सर्वप्रमाणगोचरतानङ्गीकारात् ।

न द्वितीयः सद्वादिभिरपि तस्याङ्गीकृतत्वेनार्थान्तरत्वात्, तस्य तस्य शुक्तिशकलादेस्तेन तेन रजताद्याकारेण प्रतीयमानतया अप्रमाणज्ञा-नविषयत्वात्, सर्वस्य प्रपञ्चस्य क्षणिकमिदं ब्रह्मकार्यमिदमनिर्वचनीय-मिदमिति च मिथ्याज्ञानगोचरतायाः परैरभ्युपगमात्, स्मृतेरप्रमाणतया तद्विषयस्य तथात्वानङ्गीकाराच्च ।

न तृतीयः, उक्तदोषानुषक्तेरेव ।

न चतुर्थः, सद्विलक्षणस्यापि शशविषाणादेरमिथ्यात्वात् ।

न पञ्चमः, एकतरनिषेधस्यान्यतरविधिनान्तरीयकतया तदसं-भवात् ।

न षष्ठः, अनिर्वचनीयाविद्याया अप्रसिद्धत्वात्, अग्रहणमिथ्या-ज्ञानलक्षणाविद्यायास्तत्कार्यस्य च प्रवृत्तिसंस्कारादेः सत्यत्वात् ।

न सप्तमः ज्ञाननिवर्त्यस्यापि ज्ञानसुखादेः सत्यत्वात्, सर्वस्य सत्यत्वेऽपि परैरीश्वरज्ञाननिवर्त्यत्वाङ्गीकारात् ।

नाष्टमः,प्रमाणेन यदुपाधौ यः प्रतिपन्नस्तत्र तस्य निषेधासंभवात्, अन्यथातिप्रसङ्गात्, भ्रान्तिप्रतिपन्नोपाधौ निषेधप्रतियोगित्वस्य सत्यत्वे-

Digitized by Google

ऽपि संभवेनार्थान्तरत्वात्, अन्यथा ख्यातिवादिभिरपि कैश्चिदसिद्धस्यान्यत्र सत्तास्वीकारात् ।

न नवमः, बाधकज्ञानविषयत्वं तन्निवर्त्यत्वं वा बाध्यत्वमित्यभ्युपगमेऽप्यर्थान्तरतायास्तादवस्थ्यात्, शुक्त्यादेरपि बाधकज्ञानविषयत्वाङ्गीकारात्, बाधकज्ञानेन पूर्वज्ञाननिवृत्त्यभ्युपगमाच्च ।

न दशमः, संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तीनां स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानानामपि परैः सत्यत्वाङ्गीकारादर्थान्तरताया दुरतिक्रमत्वात् ।

तदेवं न प्रपञ्चमिथ्यात्वनिरुक्तिः, नापि तत्र प्रमाणम्, तथाहि न तावत् प्रत्यक्षं तत्र क्रमते, उक्तप्रकाराणामन्यतमस्यापि मिथ्यात्वस्य प्रत्यक्षसिद्धत्वे तत्र वादिनां विवादाभावप्रसङ्गात् ।

न च विवादपदं मिथ्या दृश्यत्वात्· शुक्तिरूप्यवदित्यनुमानम्, प्रमाणागम्यत्वस्य सदसद्वैलक्षण्यस्याविद्यातत्कार्ययोरन्यतरत्वस्य वा साधनेऽप्रसिद्धविशेषणत्वात्, अयथार्थज्ञानगम्यत्वस्य गुरुमतेऽप्रसिद्धत्वात्, इतरेषु च सिद्धसाधनत्वात् ।

किंच दृश्यत्वं नाम फलव्याप्यत्वं वा वृत्तिव्याप्यत्वं वा साधारणं वा ।

नाद्यः, अतीन्द्रियेषु तदभावेन भागासिद्धत्वात् ।

न द्वितीयः, ब्रह्मणोऽपि वेदान्तिभिर्वृत्तिव्याप्यत्वाभ्युपगमादनैकान्तिकत्वात् ।

न तृतीयः, ब्रह्मण्यनैकान्तिकत्वादेव ।

एतेन जडत्वाद्यन्तवत्त्वपरिच्छिन्नत्वादयो हेतवो निरस्ताः, तत्रापि साध्यानिरुक्तेः ।

अथायं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी दृश्यत्वाद् घटवदिति चेत्, न, तन्तुनिष्ठात्यन्ताभावे दृश्यत्वहेतौ चानैकान्तिकत्वात्, तयोर्दृश्यत्वेऽपि तन्तुनिष्ठात्यन्ताभावाप्रतियोगित्वात्, प्रतियोगित्वे वा तन्निष्ठात्यन्ताभावाभावात् पटस्य तत्प्रतियोगित्वलक्षणसाध्यासिद्धिस्तन्तूनामदृश्यता च स्यात् ।

किंच प्रपञ्चस्य प्रामाणिकत्वे मिथ्यात्वानुमानानां धर्मिग्राहकप्रमाणेन बाधः, अप्रामाणिकत्वे चाश्रयासिद्धिः, प्रतीतिमात्रसिद्धस्याश्रयत्वे च दूषणाभूषणादेरपि प्रतीतिमात्रसिद्धस्य सर्वत्र संभवात् सर्ववादिविधिनिषेधप्रसङ्गः, एवं साध्यहेतुदृष्टान्तानामपि प्रामाणिकत्वे दृश्यत्वहेतोस्तत्रानैकान्तिकता, अप्रामाणिकत्वे वा साध्यसाधनाद्यभावादनुमानासिद्धिः ।

नाप्यागमः प्रपञ्चमिथ्यात्वे मानम्, तथाहि न ताव“देकमेवाद्वितीयं” “सत्यं ज्ञानमनन्तं ब्रह्मे”त्यत्र ब्रह्मणोऽद्वितीयत्वानन्तत्वप्रतिपादनाद् द्वितीयवस्तुनोऽभावः प्रतीयत इति युक्तं वक्तुम्, अद्वितीयशब्दस्य तत्सजातीयवस्त्वन्तरनिषेधपरत्वादस्मिन् ग्रामेऽयमेक एवाद्वितीयः पुरुष इतिवत्, अनन्तपदस्य च प्रागुत्तरकालीनान्ताभावपरत्वात्, तत्रैव तस्य व्युत्पत्तेः, अन्योन्याभावाधिकरणत्वानधिकरणत्वस्याप्रसिद्धत्वेन तत्र व्युत्पत्त्ययोगात्, “नेह नानास्ति किंचने”त्यादेश्चागमस्य कारणे ब्रह्मणि नानात्वनिषेधपरत्वात्, “इन्द्रो मायाभि”रित्यादेश्च तत्तदिन्द्रियद्वारकबुद्धिवृत्त्युपाधिभिर्मायाशब्दाभिधेयैः स्वशक्तिविशेषैर्वाऽभेदेन परमेश्वरप्रतिपत्तिविधिपरत्वेन प्रपञ्चनिषेधे तात्पर्याभावात्, “मृत्योः स मृत्युमाप्नोती”त्येवंविधायाश्च श्रुतेर्भेददर्शननिन्दयाऽभेदप्रतिपत्तिविधिपरत्वेन प्रपञ्चनिषेधे तात्पर्याभावात्, आगमस्य च स्वरूपावगतौ पदपदार्थविभागप्रतिपत्तौ च प्रत्यक्षादिसाकाङ्क्षत्वात्, प्रत्यक्षस्य चागमानपेक्षत्वात्, “न हिंस्यात् सर्वा भूतानि” “अग्नीषोमीयं पशुमालभेत” “ब्राह्मणो न हन्तव्यः” “ब्रह्मणे ब्राह्मणमालभेत” “अतिरात्रे षोडशिनं गृह्णाति” “नातिरात्रे षोडशिनं गृह्णाति” “उदिते जुहोति” “अनुदिते जुहोती”ति च परस्परव्याकुलत्वात्, प्रत्यक्षादेश्च तदभावात्, आगमस्य चोपचरितार्थत्वेनापि तत्र सावकाशत्वात्, अनवकाशत्वाच्च, भेदग्राहिणः प्रत्यक्षादेः पूर्वसिद्धतया चागमेऽप्यस्तस्य प्रतिष्ठितत्वात्, तद्विरोधे तेषामेव बाधात्, “मृत्तिकेत्येव सत्यं” “त्रीणि रूपाणीत्येव सत्यं” “प्राणा वै सत्यं” “सच्च त्यच्चाभव”दिति च प्रपञ्चस्य सत्यत्वप्रतिपादनात्, विवादास्पदीभूतः प्रपञ्चः सत्यः

Digitized by Google

प्रमाणासिद्धत्वादात्मवदिति· अयं घट एतन्निष्ठबाध्यभेदातिरिक्तभेदाश्रयो द्रव्यत्वात् पटवदित्यनुमानतोऽपि वियदादेरात्मनां च सत्यभेदसिद्धिः ।

न च भेदस्य सत्यत्वे दृग्दृश्ययोः संबन्धानुपपत्तिर्बाधिका, तत्तत्प्रतिपत्तिहेतुभूतेन्द्रियलिङ्गादेस्तत्तद्विषयसंबन्धादेव तदुत्पन्नज्ञानानां तत्तद्विषयं प्रति नियमसिद्धावन्तरेणापि संबन्धान्तरमतिप्रसङ्गाप्रसङ्गात्, शब्दान्तराभ्याससंख्यादेश्च कर्मभेदप्रतिपादकप्रमाणस्य भेदमिथ्यात्वेऽप्रामाण्यप्रसङ्गः ।

न च तस्य लोकसिद्धभेदानुवादकत्वसंभवः, तादृक्कर्मापूर्वभेदस्य लोकतोऽसिद्धेः, सिद्धत्वे च शब्दान्तराद्यधिकरणानारम्भप्रसङ्गात् ।

तदेवं मिथ्यात्वे लक्षणप्रमाणयोरसंभवादनुमानागमाभ्यां प्रपञ्चस्य सत्यत्वापादनाच्च मिथ्यात्वमिति ।

अत्रोच्यते, न तावल्लक्षणासंभवः ।

यतः ।

सर्वेषामपि भावानामाश्रयत्वेन संमते ।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता ॥ ११ ॥

तथाहि पटघटादीनां भावानां स्वाश्रयत्वेनाभिमतास्तन्त्वादयो ये तन्निष्ठात्यन्ताभावप्रतियोगितैव तेषां मिथ्यात्वम्, न हि तेषामन्यत्र सत्ता संभाविनी, तत्रापि चेत् सा न स्यात् तदा गले पादुकान्यायेन मृषात्वमेव पर्यवस्येत् ।

न च निराश्रयेषु नित्येषु भावेषु सा नास्तीति लक्षणस्याव्याप्तिः, ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य कार्यतया कारणाश्रितत्वस्य व्यवहारदशायां रजतादेरिव शुक्त्याद्याश्रिततायाः स्वीकारात् ।

नाप्यतिव्याप्तिः, सत्यस्य ब्रह्मणो निराश्रयत्वात्, तस्य तन्निष्ठात्यन्ताभावप्रतियोगितायाः शङ्कितुमप्यशक्यत्वात् ।

न च परैः प्रदेशवृत्तितयाभ्युपगतेषु संयोगशब्दादिषु सत्येष्वपि लक्षणस्य सद्भावादर्थान्तरता, भावाभावयोरेकाधिकरणत्वाभ्युपगमे सर्व-

ऽपेव तथाभावापत्तेर्विरोधस्य जगति दत्तजलाञ्जलिताप्रसङ्गात्, भावाभावयोर्हि साक्षाद्विरोधस्तन्मुखेनैवान्यत्रेति परीक्षकपरिषदां संमतत्वात्, प्रदेशोपाधिभेदेन वा तत्र विरोधसमाधाने भावात्यन्ताभावयोर्भिन्नाधिकरणत्वेन लक्षणस्य तत्र सत्त्वे कुतः संभवः, कुतस्तरां चातिव्याप्तिः, कुतस्तमां चार्थान्तरता ।

तदेवं न मिथ्यात्वानिरुक्तिः, नापि मानासत्त्वम्, अनुमानसद्भावात् । तथाहि,

अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः ।
अंशित्वादितरांशीव दिगेषैव गुणादिषु ॥ १२ ॥

विमतः पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अवयवित्वात् पटान्तरवत्, एवमेतद्गुणकर्मजात्यादयोऽपि तत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिनस्तत्तद्रूपत्वादितरतत्तद्रूपवदिति, एवमादिप्रयोगः सर्वत्रैवोहनीयः ।

ननु किं प्रामाणिकैतन्निष्ठात्यन्ताभावप्रतियोगित्वं साध्यं किं वा प्रातिभासिकात्यन्ताभावप्रतियोगित्वम् ।

नाद्यः, अभावानां प्रामाणिकत्वे तैरेव द्वैतापत्तेः, प्रामाणिकाभावप्रतियोगित्वे च भावानामपि प्रामाणिकतया न मिथ्यात्वसिद्धिः ।

न द्वितीयः, रजते सीसविभ्रमे सीसमेवैतच्च रजतमिति रजते रजतत्वप्रतिषेधे प्रातिभासिकात्यन्ताभावप्रतियोगिनोऽपि रजतत्वस्यामिथ्यात्वेनार्थान्तरत्वापातात्, इति चेत्, मैवम्, अभावानां प्रामाणिकत्वेऽपि सदद्वैताव्याकोपात्, कथं च व्यावहारिकप्रमाणोपस्थापितस्वभावैर्भावैरभावैर्वा तत्त्वावेदकप्रमाणोपस्थापितस्याद्वैतस्य व्याकोपशङ्कावकाशः । नापि प्रामाणिकाभावप्रतियोगिनोऽपि शुक्तीदमंशरजताकारद्वयालिङ्गितस्य संसर्गस्येदं रजतमित्येकज्ञानोपनीतस्य केवलतद्व्यवहारोपनीतस्य वा धीरूपरजताकारारोपारोपितयोः बहिष्ठस्य वा कुत्रचिद्देशे काले वा केनचिदपि वादिना सत्ता स्वीक्रियते, येन प्रामाणिकाभावप्रतियोगिनः सत्तां भावाः प्रतिपद्येरन् ।

Digitized by Google

द्वितीयस्तु विकल्पोऽनङ्गीकारपरास्तः, न च धर्मिग्राहकप्रमाणबाधः, धर्मिणस्तत्त्वावेदकप्रमाणसिद्धत्वानभ्युपगमात्, तर्ह्याश्रयासिद्धिरिति चेत्, न, सांव्यवहारिकप्रमाणोपनीतस्याप्याश्रयत्वोपपत्तेः, प्रपञ्चस्तत्त्वावेदकप्रमाणविषयो धर्मित्वादात्मवदिति चेत्, न, आत्मत्वस्यैव तत्रोपाधित्वात् ।

न च व्यतिरेकासिद्धिः, अनात्मनः शुक्तिरजतसंसर्गादेस्तत्त्वावेदकप्रमाणाविषयस्योभयवादिसिद्धस्य व्यतिरेकोपसंहारस्थलस्य सद्भावात्, धर्मित्वहेतोः शुक्तिरजतादिसंसर्गे धर्मिणि व्यभिचाराच्च, नासौ धर्मी मिथ्यात्वादिति चेत्, न, एतमेव हेतुं प्रति धर्मित्वाधर्मित्वयोस्तदयोगात् ।

एतेन प्रतीतिमात्रसिद्धस्याश्रयत्वे दूषणभूषणादेरपि तथाभूतस्य सुलभत्वात् सर्ववादिविधिनिषेधप्रसङ्ग इत्यपास्तम्, वादिप्रतिवादिमध्यस्थानां प्रमाणसिद्धमेतदिति संमत्यालम्बनतया त्रिचतुरकक्षाविश्रान्तस्य तत्तदाभासलक्षणानालिङ्गितस्याश्रयस्य[1] दूषणभूषणादेश्च तत्र तत्र कथाङ्गताङ्गीकारात्, तादृशव्यावहारिकप्रमाणसिद्धस्यैव च व्यावहारिकसत्यत्वेन स्वीकारात्, सर्वथा बाधवैधुर्यस्यागमेतरप्रमाणैरसर्वज्ञेन ज्ञातुमशक्यत्वात् ।

एतेनेदमपास्तम्, यदाहुर्भट्टाचार्याः,

संवृतेर्न तु सत्यत्वं सत्यभेदः कुतोऽन्वयम् ।
सत्या चेत् संवृतिः केयं मृषा चेत् सत्यता कथम् ॥
सत्यत्वं न च सामान्यं मृषार्थपरमार्थयोः ।
विरोधाच्च हि वृक्षत्वं सामान्यं वृक्षसिंहयोः ॥

इति ।

वस्तुतोऽसत्यस्यैव यावद्बाधं देहात्मभाववल्लौकिकवैदिकव्यवहाराङ्गतया सत्यत्वेन व्यवहारात् ।

नायमसिद्धो हेतुः, पटस्यांशित्वे वादिनोरविवादात् ।

नापि विरुद्धः, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिनि विपक्षे चात्मन्यंशित्वस्यावृत्तेः ।

१ पक्षस्येत्यर्थः ।

नानैकान्तिकोऽपि, विपक्षाद् व्यावृत्तेरेव । इह तन्तुषु पट इत्यादिनैव प्रत्यक्षेण तन्तुनिष्ठतया पटस्यावगमात् तदपहृतविषयतया कालात्ययापदिष्टेति चेत्, मैवम्, पटस्यैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वमङ्गीकुर्वता तस्य प्रामाण्यानङ्गीकारात्, इह नभसि नीलिमेति प्रत्यक्षाभिमतप्रत्ययबाधेनारूपित्वानुमानप्रवृत्तिवदत्राप्यनुमानप्रवृत्त्युपपत्तेः ।

न चैवं सति दहनशैत्यानुमानादेरप्यप्रतिबद्धप्रसरतया कालात्ययापदिष्टकथा सर्वत्रास्तमियादिति वाच्यम्, तत्र तत्रोभयवादिसंमतप्रबलप्रमाणे परिपन्थिनि जाग्रति तस्य निरङ्कुशप्रसरत्वात्, प्रकृते च तथाभावाभावात् ।

एतेन प्रमाणसिद्धत्वादिति प्रत्यनुमानविरोधोऽपास्तः, प्रमाणसिद्धत्वस्यैवासिद्धेः, यत्र प्रत्यक्षमपि न तत्त्वावेदकं प्रमाणं तत्र का कथा तत्पादोपजीविनो वराकस्यानुमानादेः प्रमाणतायाम् ।

(शेषमग्रे)

श्रीगुरुभ्यो नमः

(Continued from page 389.)

प्रमाणं तिर्यग्दिक्करण्यायामस्तस्याक्ष्णयारज्जुस्त्रिकरणी ॥ १४ ॥

14. Take the measure (i. e. the side of a square) for the transverse side, the diagonal of the square for the long side (of an oblong); the diagonal of this (oblong) produces three (squares of the original measure).

त्रिगुणीकर्तुमिष्टस्य क्षेत्रस्य करणी प्रमाणशब्देनोच्यते । सा तिर्यगिति तिर्यङ्मानी भवति यस्मिन् क्षेत्रे तथा तस्यैव त्रिगुणीचिकीर्षितक्षेत्रस्याक्ष्णया द्विकरणी आयामः पार्श्वमानी भवति यस्मिन् क्षेत्रे तस्य दीर्घचतुरश्रस्य त्र्यश्रिणो वा क्षेत्रस्याक्ष्णया तिर्यङ्मानीपार्श्वमान्योरग्रं प्रापिता करणरूपा रज्जुः । सा करणी सती तत्त्रिगुणीचिकीर्षितं समच-

तुरस्रं क्षेत्रं त्रिगुणीकरोति । आश्वमेधिकचयने त्रिस्तावायामे ऽस्या उपयोगः । वक्ष्यमाणात्तृतीयकरण्याश्च सौत्रामणीवेदिसाधिकायां एकोनेष्टस्य करणीत्यादिपूर्वोक्तश्लोकस्यैवायमर्थ उक्तः ।

तृतीयकरण्येतेन व्याख्याता ॥ १५ ॥

15. Thereby the cord which produces the third part (of a given square) is explained.

सौत्रामण्यामुक्तं प्रक्रमतृतीयेनावृत्तेनेति । तत्र प्रक्रमतृतीयं प्रक्रमस्य तृतीयो भाग इति न । किं तु प्रक्रमक्षेत्रतृतीयांशं या करणी समचतुरस्रीकरोति सोच्यते । सैव चेयं तृतीयकरणी । तयैव प्रक्रमत्वेन कल्पितया सोमवद्या वेदिर्मीयते सा सौमिक्या वेदेस्तृतीयांशरूपा भवति । एवं हि श्रूयते । त्रितृतीये यजेत त्रितृतीयं वै सोमस्य सौत्रामणीति । सा तृतीयकरणी त्रिकरणीकथनेनैवोक्ता भवति । कथं त्रिकरणीज्ञानात् तृतीयकरणी ज्ञाता भवति तच्छिष्यानुजिघृक्षया सूत्रकृदेव विवृणोति ।

प्रमाणविभागस्तु नवधा ॥ १६ ॥

16. The division of the (original square) measure is to be nine-fold (when we want to find the tritíya-karaní).

सूत्रे त्रिपदः प्रक्रमः पठ्यते । त्रिपदमानया करण्या समचतुरस्रीकृतं क्षेत्रं नवपदं भवति । द्वादशाङ्गुलञ्च पदमित्युक्तम् । तत्क्षेत्रं तिर्यङ्मानीद्वये पार्श्वमानीद्वये च त्रिधा त्रिधा विभज्य द्वे प्रागपरे द्वे दक्षिणोत्तरे सूत्रे मध्यतो दत्त्वा नवधा विभक्तव्यम् । पदपदक्षेत्रफलको यथैकां ऽशो भवति ।

करणीतृतीयं नवभागः ॥ १७ ॥

17 The third part of the side (produces) the ninth part (of the square).

यस्य क्षेत्रस्य या त्रिपदा करणी तस्यास्तृतीयांऽशो यः पदं स करणी तत्प्रक्रमनवभागं संक्षिपतीत्यर्थः । तृतीयेन नवमो ऽंश इति वक्ष्यमाणत्वात् । तत्र पदमात्रम् ।

नवभागास्त्रयस्तृतीयकरणी ॥ १८ ॥

18. Three ninth parts (of the square) give (if combined into one square) that side which produces the third part (of the original square).

प्रक्रमक्षेत्रस्य नवमे भागे समचतुरस्रे ऽक्ष्णयारज्जुर्नवमभागद्विकरणी सा पार्श्वमानी नवमभागकरण्योश्च तिर्यङ्मानी तयोरक्ष्णया रज्जुः करणी सती यत्समचतुरस्रं करोति । तत्र नवभागास्त्रयः संक्षिप्ता भवन्ति सैव तृतीयकरणी भवति । तृतीयकरण्येतेन व्याख्यातेति यदुक्तं तस्यायम्प्रपञ्चः कृतः । तृतीयकरण्याः प्रयोजनमिदानीमाह ।

सौत्रामण्यां प्रक्रमार्थम् ॥ १९ ॥

19. At the Sautrámaṇí—sacrifice it (viz: the tṛitíyakaraṇí) is employed instead of the prakrama.

तृतीयकरणीत्यनुवर्तते । सा सौत्रामण्यां प्रक्रमो भवति । एतद-र्थमियमुक्ता । तया सोमवद्वेदिर्मीयते या सौमिक्या वेदेस्तृतीयांशरूपा भवेत् । परिशिष्टे चोक्तम् ।

पदस्याक्ष्णया तिरश्ची चान्तयोरक्ष्णया भवेत् ।
सौत्रामण्यां निमातव्या वेदिः स्यात्सोमवत्तयेति ॥

पदक्षेत्रस्याक्ष्णया पार्श्वमानी तिरश्ची तिर्यङ्मानी तयोरक्ष्णया तृतीयकरणी सौत्रामण्यां प्रक्रम इत्यर्थः । एवञ्च परिशिष्टकृतो ऽपि त्रिपदप्रक्रमतृतीयांश एव सौत्रामण्यां प्रक्रमक्षेत्रमिष्टमिति गम्यते । केचित्तु सोमे तु द्विपदो भवेदिति । यः परिशिष्टे द्विपदः सौमिकः प्रक्रम उक्तः तत्तृतीयभागसंक्षेपिकां तृतीयकरणीमाहुः । तच्च । पदस्याक्ष्णयेत्यादि-परिशिष्टवाक्यान्तरविरोधापातात् । तेन चयनवेदिरपि सोमवेदिरेव अग्निः सोमाङ्गमित्युक्तत्वात् । तत्र यः प्रक्रमस्त्रिपदस्तस्य तृतीयभागसंक्षे-पिका या करणी सैव सौत्रामण्यां प्रक्रमः । चयनानन्तरं च तदङ्गत्वेनापि श्रुतौ सौत्रामणी पठितेति सैव वेदिः प्रस्तुता द्विपदप्रक्रमस्य त्वनग्निक-सोमवेदिर्विषय इति युक्तमुत्पश्यामः । अस्या एव च वेदेर्दैर्घ्यत्वं परि-शिष्टे पठन्ति ।

अज्ञात्वा शुल्बसद्भावं यज्ञे सौत्रामणीसुते ।
वेदिं ये कर्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैरिति ॥

त्रिकरणी समासार्था ॥ २० ॥

20. The trikaraṇí serves for the purpose of combining (areas) (on the purpose of this sútra, see the Comm.)

सौत्रामण्यां तृतीयकरण्याः प्रयोजनं तत्कथनमिह युक्तम् । त्रिकरणी किमर्थमुक्तेति तस्याः प्रयोजनकथनमेतत् । तृतीयकरण्यर्थं प्रक्रमनवभागास्त्रयः समसनीयाः स समासस्त्रिकरण्यैव कर्तुं शक्यस्तदर्थमियमुक्ता । अथ वा त्रिगुणक्षेत्रसमासप्रदर्शनार्था त्रिकरणी तयाश्वमेधे त्रिस्तावापि सिध्यति ।

तुल्यप्रमाणानां समचतुरश्राणामुक्तः समासः ॥ २१ ॥

21. (By the preceding rules) the combination of squares of equal size is (fully) explained.

दशकरणीचत्वारिंशत्करणीद्विकरणीत्रिकरणीकथनेन दिग्दर्शनरूपेण कल्पोपयुक्तस्तुल्यप्रमाणसमचतुरस्रसमासः क्षेत्रज्ञानार्थोऽप्युक्तः । पञ्चकरण्याद्यकथनात् सर्वेषां नोक्त इति चेत् । दीर्घचतुरस्रस्याक्ष्णया रज्जुस्तिर्यङ्मानी पार्श्वमानी चेत्यादिना सूत्रेण दिग्दर्शनरूपेण सर्वेषामप्युक्तस्तत्रैवार्थे चैको नेष्टस्येत्यादिः श्लोको ऽस्माभिर्दर्शितः । एतेन च सूत्रेण सूचितो ऽर्थः स्वयमेवाभ्यूह्य इत्याचार्यः प्रदर्शयति । अन्यथैतत्सूत्रप्रणयनमनर्थकं स्यात् । ततश्च येषां पञ्चादिसूत्राणां समासः साक्षान्नोक्तस्तेषामपि प्रकारान्तरेणोक्त एवेत्ययमेवास्यार्थः ।

नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसो ऽपच्छिन्द्यात्तस्याक्ष्णयारज्जुरुभे समस्यतीति समासः ॥ २२ ॥

22. For the combination of squares of different area one is to cut off the side of the bigger one with the side of the smaller

one (i. e. one cuts off from the bigger one an oblong, the shorter side of which is equal to the side of the smaller one); the cord diagonal to this (oblong) combines both (squares).—These are the rules for combining.

समचतुरस्राणामित्यनुवर्त्तते । पृथक्प्रमाणानां समचतुरस्राणां समासे कर्त्तव्ये ह्रस्वतरस्य करणीमानेन वृद्धतरस्य द्विगतकरण्यौ तिर्यङ्मानीं पार्श्वमानीं वैकस्मात्कोणान्मित्वापच्छिन्द्याच्छिद्रयेदधिकांशं जह्यादित्यर्थः । तस्मादेव कोणादपच्छिन्नकरण्यपच्छेदपर्यन्तं तिर्यङ्मानी वा पार्श्वमानी वा । तस्मादेव च कोणाद्वृद्धतरक्षेत्रस्यान्या दिक्करणी तिर्यङ्मानी पार्श्वमानी वा तयोरक्ष्णयापच्छेदाद् वृद्धतरकरण्यग्रं यावत्प्रवृत्तापच्छेदादधिकं भागं बहिष्कुर्वती अपच्छिन्नांशं तु त्र्यस्रिक्षेत्रान्तःकुर्वती वृत्तान्यत्र चेत्करणी क्रियते तदा सा ह्रसीयो वृद्धतरं च तत्क्षेत्रद्वयं संक्षिप्य समचतुरस्रीकरोति । पुनस्तस्मिंश्चतुरस्रउक्तयुक्त्या भिन्नप्रमाणं चतुरस्रान्तरमपि प्रक्षेप्यम् । इत्यभिप्रायेण समचतुरस्राणामिति बहुवचनान्तमनुवृत्तं पदं व्याख्येयम् । यथा द्वादशाङ्गुलकरणीकाष्टाङ्गुलकरणीकसमचतुरस्रयोः समासे द्वादशाङ्गुलस्याधो द्विगतकरण्यां तिर्यङ्मान्यामेकतःकोणयोरष्टाङ्गुलेष्वपच्छिद्य चतुरङ्गुलां करणीं हित्वापच्छेदात्पार्श्वमान्यग्रं यावत्तथाक्ष्णयां नयेद्यथा ऽष्टाङ्गुला तिर्यङ्मानी द्वादशाङ्गुलपार्श्वमानी यस्य तादृशं त्र्यस्रिक्षेत्रं भवति । साक्ष्णयाकरणी सती यत्समचतुरस्रं करोति तस्मिन्द्वादशाङ्गुलाष्टाङ्गुलयोः समासो भवति । एवं तुल्यप्रमाणानानाप्रमाणक्षेत्रसमास उक्तः ॥

इति नैमिषीयसोमसुद्रामचन्द्रकृतायां
शुल्बसूत्रवृत्तौ द्वितीया कण्डिका समाप्ता ॥

प्रथमः परिच्छेदः ।

(Continued from page 400.)

नन्वीश्वरसाक्षिणोरनादित्वे तदैक्षत बहुस्यां प्रजायेय इत्यादौ सृष्टिपूर्व्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते । उच्यते। यथा विषयेन्द्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते तथा सृज्यमानप्राणिकर्म्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषाः इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्त्तव्यमित्याद्याकारा जायन्ते तासाञ्च वृत्तीनां सादित्वात् तत्प्रतिबिम्बितचैतन्यमपि सादीत्युच्यते ।

An objection takes the form of a doubt:—if Ísvara-sákshí is without beginning, how, in the time previous to creation, is the incidental perception of Param-eśvara proved, as declared in the following and other texts—"It beheld, may I become many, may I produce offspring."* We reply:—that just as various vṛittis of the antahkaraṇa, which is the limiting condition of the Jíva, are produced by reason of the contact of a sense-organ with the object &c.; so, by reason of the actions of living creatures destined to be created, there are produced various vṛittis of Máyá, which is the limiting condition of Parameś-vara, in such forms as "this is now to be created: this is now to be nourished: this is now to be destroyed &c." And since these vṛittis have a beginning, the intelligence also which is reflected in them is said to have a beginning. So much for our reply.

* Chándogya VI. 2. 3.

तद् is तत्सत् i.e. Brahma. This ikshaṇa (knowledge, thought,) is not clearly explained in Śruti or bháshya. Śaṅkara Áchárya uses this text against the unconscious cause of the world (pradháṇa) of the Sáṅkhya:—अतश्च न प्रधानं साङ्ख्यपरिकल्पितञ्जगत्कारणम् । प्रधानस्याचेतनत्वाभ्युपगमात् । इदन्तु सच्चेतनमीक्षितृत्वात् । Ánanda Giri, in his ṭiká on Aitareya I. 1. 2, mentions three different opinions as to this íkshaṇa. The third is noteworthy:— ननु स्वाभाविकनित्यचैतन्येन कथं कादाचित्केक्षणमिति । * * * * * * * * अन्ये त्वीक्षणवाक्यस्य कारणस्याचेतनत्वव्यावृत्तिपरत्वादीक्षणे तात्पर्य्याभावाच्च न तत्र भूयानायासः कर्त्तव्य इत्याहुः ।

एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यं प्रत्यक्षत्वञ्च ज्ञेयगतं ज्ञप्तिगतञ्च निरूपितम् । तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणं चित्त्वमेव पर्व्वतो वह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वांशे स्वप्रकाशतया प्रत्यक्षत्वात् ।

तत्तद्विषयांशप्रत्यक्षत्वन्तु पूर्व्वोक्तमेव तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः । भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्व्वचने तस्यापि लक्ष्यत्वात् ।

यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा पूर्व्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं देयं शुक्तिरूप्यादिभ्रमस्य संसारकालीनबाधविषयप्रातिभासिकरजतादिविषयकत्वात् ।

Thus by describing two kinds of sákshí, two kinds of the knowledge (termed) pratyaksha have been described; and immediate cognition has been explained as relating to the object known and to the cognition (itself). In the latter case (tatra), the general definition of immediate cognition, regarded from the point of view of the cognition itself, is that (pratyaksha) consists in intelligence only; for in knowledge such as "this hill is fiery" and the rest, there is immediate cognition of the intelligence which is conditioned by (i. e. underlies) the vrittis that have taken the form of the fire, &c., because chaitanya is self-luminous as regards itself.

And immediate cognition of such or such an object has been defined above, and there is no fault of non-pervasiveness in that definition (tasya) in the case of an erroneous perception, for in the general exposition of pratyaksha, correct and incorrect, erroneous perception also was included.

But when the definition of correct knowledge of pratyaksha is to be given, we must insert in the aforesaid definition the additional limitation, as regards the object, of abádhitatva (i.e. incapability of refutation). For in the case of erroneous perception of silver in nacre, &c., the apparent silver, &c. is an object which is capable of sublation in every day life.

ननु विसम्वादिप्रवृत्त्या भ्रान्तिज्ञानस्य विषयसिद्धावपि तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वे न प्रमाणं देशान्तरीयरजतस्य क्लृप्तस्यैव तद्विषयत्वसम्भवादिति चेन्न तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात् । न च ज्ञानं तत्र प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे ततएव वह्न्यादेः प्रत्यक्षत्वापत्तौ अनुमानाद्युच्छेदापत्तेः ।

A doubt is started: although the object of an erroneous perception is proved to exist by the effort (though) unsuccessful (of the person who tries to possess such object), there is no proof that the erroneous perception (tasya) has reference to an apparent object, such as silver or the like, produced at that time. For silver known (to exist) elsewhere may be taken as the object of such erroneous perception (tad). If this be your doubt, we reply, not so: since the silver known to exist elsewhere (tasya) is not in contact (with a sense-organ), it cannot be an object of perception. And it must not be maintained that, in this case, there is an intercourse (relating to a transcendental) knowledge; for then, since an immediate cognition of fire or like object would result, inference and the other pramáṇas would be rendered unnecessary.*.

* The Naiyáyika rejects the Vedántin's prátibhásikí sattá and maintains that the erroneous perception of silver in nacre is a case of anyathákhyáti. By which he means that silver which was cognised elsewhere is now, through error, perceived in the nacre. This cannot be, says the Vedántin; for you say that contact of sense-organ and object is necessary for perception:— इन्द्रियार्थसन्निकर्षजन्यज्ञानम्प्रत्यक्षम् and the silver, now erroneously surmised, is existing somewhere else. But this is not all. In the Nyáya, perception is of two kinds, ordinary and transcendental (alaukika). And the intercourse (sannikarsha, pratyásatti, mutual proximity of jñátṛi and jñeya) of the latter is of three kinds. One of these viz., ज्ञानलक्षणा प्रत्यासत्तिः will explain the case of erroneous perception, so says the Naiyáyika. For this is just that intercourse by which one is cognisant of the fragranceness, (saurabhatva,) on seeing a piece of sandalwood:— सवज्ञानलक्षणया पत्वीकारे-

ननु रजतोत्पादकानां रजतावयवादीनामभावे शुक्तौ तव कथं रजतमुत्पद्यते इति चेत् । उच्यते । नहि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव तथाहि काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा च काचिदन्तःकरणवृत्तिरुदेति । तस्याञ्च वृत्तौ इदमवच्छिन्नचैतन्यं प्रतिबिम्बते तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेन इदमवच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्यं

A doubt is started :—how, in your opinion, is silver produced in nacre when the originators of silver, (viz.) its parts, &c., are absent? To such a question we reply that it is not the means commonly recognised as originating apparent silver, but something quite different. To explain :—when there is contact of the eye, affected by some disorder such as cataract or the like, and a presented object, there arises a vṛitti of the antahkaraṇa in the form of this object and in the form of (its) glitter. And in this vṛitti the intelligence particularised by this (object) is reflected. In that spot (i. e. where the object is), in the manner already described, by reason of the vṛitti's egress, the intelligence particularised by this (object), the intelligence particularised by the vṛitti and the pramátṛi-intelligence become non-distinct. And then the Avidyá,* which

सुरभिचन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात् । यद्यपि सामान्यलक्षणयापि सौरभभानं सम्भवति तथापि सौरभत्वस्य भानज्ञानलक्षणया ॥ Siddhántamuktávalí. And in the same way there is a transcendental perception, by means of this jñána-lakshaṇá pratyásatti, of the "silver*ness*" (rajatatva) cognised elsewhere. That the perception is erroneous in this instance makes no matter. The Vedántin's objection to such an intercourse is that it is destructive (even according to the Nyáya) of anumána and the other pramáṇas; for, on seeing smoke issuing from a hill, there would result a perception (transcendental) of "fiery*ness*" (vahnitva). Lakshaṇa, in jñánalakshaṇá, is equivalent to vishaya :— लक्षणशब्दस्य विषयोऽर्थः Siddhántamuktávalí.

*Avidyá, nescience, the mysterious power of the Absolute, is here regarded as the germ or material cause of phenomena. The nacre is made up of this avidyá, and this our author chooses to express in

प्रमातृचैतन्यं चाभिन्नं भवति ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिका अविद्या चाकचक्यादिसादृश्यसन्दर्शनसमुद्बोधितरजतसंस्कारसमीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते ।

परिणामोनाम उपादानसमसत्ताककार्य्यापत्तिः । विवर्त्तो नाम उपादानविषमसत्ताककार्य्यापत्तिः । प्रातिभासिकरजतञ्चाविद्यापेक्षया परिणाम इति चैतन्यापेक्षया विवर्त्तइति चोच्यते । अविद्यापरिणामरूपञ्च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्त्तते अस्मन्मते सर्व्वस्यापि कार्य्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात् ।

ननु चैतन्यनिष्ठरजतस्य कथमिदं रजतमिति पुरोवर्त्तिना तादात्म्यम् ।

has nacreness as its determining attribute and as its substrate (nishṭhá) the vishaya-intelligence which is not distinct from the pramátri-intelligence; aided by the impression of silver, awakened by the sight of similarity of the glitter, &c, (of the presented object to the silver already perceived), together with the defects of cataract, &c., is modified in the form of the object, the silver, and in the form of an apparent cognition of the silver.

Pariṇáma (modification) is the production of an effect, which has the same kind of existence as its material cause. Vivartta (illusory manifestation) is the production of an effect, which has the not same kind of existence as its material cause. And the apparent silver is a modification as regards Avidyá, and an illusory manifestation as regards Brahma:—this is our doctrine. And this silver, which is a modification of Avidyá, resides in the intelligence that is particularised by the object (idam), (which intelligence) is the substrate of the Avidyá; for, according to our doctrine, every product has of necessity the same substrate as the Avidyá, which is the material cause of the product (sva).

A doubt is started:—how is the identity (to be maintained) of the silver, which has intelligence as its substrate, with the

Nyáya terminology by speaking of the avidyá, which has śuktitva as its prakára.

उच्यते । यथा न्यायमते आत्मनि-
ष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपल-
म्भः शरीरस्य सुखाद्यधिकरणताव-
च्छेदकत्वात् तथा चैतन्यमात्रस्य र-
जतं प्रत्यनधिष्ठानतया इदमवच्छि-
न्नचैतन्यस्य तदधिष्ठानत्त्वेन इदमव-
च्छेदकतया रजतस्य पुरोवर्त्तिना संस-
र्गप्रत्यय उपपद्यते । तस्य च विषय-
चैतन्यस्य तदन्तःकरणोपहितचैत-
न्याभिन्नतया विषयचैतन्येऽध्यस्तमपि
रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं
सुखादिवदनन्यवेद्यमिति चोच्यते ।

presented object, as expressed in "This is silver?" We reply: just as in the Nyáya, pleasure and the rest, which have átmá as their substrate, are cognised in their connexion with the body,* because the body serves to define the substrate (viz. Átmá) of pleasure &c.; so, since intelligence considered by itself is not a substrate as regards the silver, (but) intelligence particularised by idam is the substrate of the silver (tad), for idam is the determining attribute; (in this manner) a knowledge of the connexion of silver with the presented object is obtained. And since the vishaya-intelligence becomes non-distinct from the intelligence particularised by the antahkaraṇa, which has taken the form of such object (tad), the silver though erroneously surmised in the vishaya-intelligence is surmised in the sákshí too (and) is known by the sákshí only and by no other, as is the case with pleasure and the rest. This is our further reply.

* In the Nyáya, pleasure, pain, knowledge, desire, volition (prayatna, kṛitti), passion, dharma and adharma, &c., are the special qualities of Atmá. They are perceived through the mind, as the instrument. The mind is an atomic substance, distinct from soul. साक्षात्कारे सुखादीनाङ्करणं मन उच्यते । अयौगपद्याद् ज्ञानानान्तस्याणुत्वमिहोच्यते. Bháshápariccheda, śloka, 85. Átmá is known only through the mind, in connexion with its own special qualities: योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेनात्मनः प्रत्यक्षत्वं सम्भवति न त्वन्यथाऽहञ्जानेऽहङ्करोमीत्यादिप्रतीतेः । again, मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयः (scil. Átmá) मानसप्रत्यक्षविषयश्चेत्यर्थः । रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् ॥ Siddhántamuktávalí—śloka, 50. The special qualities, although belonging to Átmá, are referred to the body, which serves to define pervading soul: pleasure, &c., are not referred

ननु साक्षिण्यध्यस्तत्वे अहं रजतमिति तद्वानिति वा प्रत्ययः स्यादहं सुखीतिवदिति चेत् । उच्यते । नहि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्य्यत्वप्रयुक्तमहं सुखीतिज्ञानं सुखादीनां घटादिवत् शुद्धचैतन्य एवाध्यासात् । किन्तु यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वं तस्य तदाकारानुभवविषयत्वमित्येवानुगतं नियामकम् ।

तथा च इदमाकारानुभवाहितसंस्कारसहिताविद्याकार्य्यत्वात् घटादेरिदमाकारानुभवविषयत्वं अह-

Another doubt:—granting that the silver is erroneously surmised in the sákshí, there ought to be a presentation in the form "I am silver" or "I am silvery," just as there is in the form "I am happy." To this we reply that the consciousness "I am happy" is not produced by the fact that pleasure, &c. are products of avidyá, which has as its substrate that intelligence which is particularised by the antahkaraṇa; for pleasure, &c. are erroneously surmised in pure* intelligence, just as jars and like objects are. But the limiting rule applying (here) is that whatever is the product of the avidyá which is joined with the mental retentum,† produced by the consciousness in a certain form (yadákára) is known as the object of the deliverance of consciousness in the same form as that of the previous deliverance (tadákára).

And so jars, &c. are objects of the consciousness expressed by "idam" because they are products of avidyá joined with the retentum which was produced by the deliverance in the form of "idam." The antahkaraṇa,

---

to jars or like objects but to me or, loosely, my body. ज्ञानादिकं यदात्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदा घटाद्यवच्छेदेन तदाभावोऽस्त्येव । Siddh: muktá śloka 27.

* Śuddhachaitanya is intelligence not defined or conditioned by antahkaraṇa.

† Samskára (bhávaná, vásaná) is the impression left upon the mind by a previous perception, imperceptible itself, but necessary for recollection.

Digitized by Google

माकारानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वादन्तःकरणादेरहमनुभवविषयत्वम् । शरीरेन्द्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्य्यत्वादुभयविधानुभवविषयत्त्वम् । तथाचोभयविधानुभवः इदं शरीरम् अहं देहः अहं मनुष्यः अहं ब्राह्मणः इदं चक्षुः अहं काणः इदं श्रोत्रम् अहं बधिरइति । प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमवच्छिन्नचैतन्यनिष्ठाविद्याकार्य्यत्वेऽपि इदं रजतमिति सत्यस्थलीये इदमाकारांशानुभवाहितसंस्कारसहकृता-

&c. (i.e. manas and buddhi) are objects of the consciousness expressed by "aham" because they are products of avidyá joined with the mental retentum, which was produced by the deliverance in the form of "aham."* The body, sense-organs, &c. are objects of a two-fold deliverance because they are products of avidyá joined with a retentum which was produced by a two-fold deliverance of consciousness. Accordingly there is a two-fold consciousness, thus:—this is body; I am body: I am a man; I am a bráhman: this is the eye; I am blind: this is the ear; I am deaf. And to take the case in hand, although the apparent silver is a product of avidyá, which has, as its substrate, the intelligence that is particularised by "idam" and is not distinct from the pramátṛi-intelligence, it is the object of a deliverance in the form "idam," as expressed in daily life by "this is silver," because it is produced by avidyá joined with

*The Naiyáyika urges in favour of his "I am silver" that the silver is a product of avidyá, that this avidyá has, as its substrate, the intelligence particularised by the antaḥkaraṇa; and that the antaḥkaraṇa having taken the form of the object, the vishaya-intelligence and pramátṛi-intelligence have become non-distinct. Further, that this is exactly similar to the perception of sukha, &c, and therefore there ought to be a consciousness in the form "I am silver." Our text replies :—not so. You have omitted to consider the mental retentum as a concurrent cause of such presentations. The presentation of silver has always been in the form "this is silver." In short, the appeal, in such cases, to the nature of things (svaphalabalakalpyah svabhávah) must be final.

वच्चाजन्यत्वात् इदमाकारानुभवविषयता नत्वहं रजतमित्यहमाकारानुभवविषयतेत्यनुसन्धेयम् ।

the retentum produced by the consciousness in the form of "idam," but it is not the object of a deliverance in the form of "aham" as (would be) expressed by "I am silver." Such must be your conclusion.

नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसम्बन्धितया भानसम्भवे रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थमिति चेत् । उच्यते । स्वगोचरवृत्त्युपहितचैतन्यभिन्नसत्ताकत्वाभावस्य विषयापरोक्षत्वरूपतया रजतस्यापरोक्षत्वसिद्धये तदभ्युपगमात् । नन्विदंवृत्तेरजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवद्विशिष्टज्ञानानभ्युपगमे कुतो

Again a doubt:—concede the preceding, (still) since a knowledge of unreal silver is possible through the sákshí being in immediate relation (with the object), why should you declare for a vṛitti of Avidyá in the form of a semblance of cognition relative to the silver? We reply that because immediate perception of an object consists in the absence of an existence distinct from that of the intelligence which is particularised by the vṛitti of such object (sva), we must maintain a vṛitti of Avidyá (tad) to establish the immediate perception of the silver. And if you further object that since we declare that the vṛitti in the form of "idam" and the vṛitti in the form of "rajatam" are, each of them distinct objects of consciousness, we, in company with the Mímámsakas,* must dis-

* The Prábhákaras reject erroneous cognition (bhramajñána) and maintain that all cognition is correct (yathárthajñána). In the case of apparent silver, the "idam," they would say, is immediately presented (इदमिति पुरोवर्त्तिविषयमनुभवात्मकज्ञानम्) ; the silver is recollected (रजतमित्यसन्निकृष्टरजतविषयं स्मरणात्मकम्). And though the vṛittis are different, the cognition of each is not. For the vṛittis are situated in the same space and the intelligence, which is reflected in them, is one only : वृत्तिभेदेऽपि नास्ति ज्ञानभेदस्तयोरेकदेशस्थत्वेन तत्प्रतिबिम्बितचैतन्यस्यैक्यात् ॥

भ्रमज्ञानसिद्धिरितिचेन्न वृत्तिद्वयप्रतिबिम्बितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्वीकारात् । अतएव साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमादप्रामाण्योक्तिः साम्प्रदायिकानाम् । (शेषमग्रे)

allow a cognition implying a relation, (vaiśishṭya, between these two vṛittis), (and then) how is our erroneous cognition to be established? We reply, you are wrong. For erroneous cognition must be admitted, because the intelligence (though) one, which is reflected in both these vṛittis, declares for the identity of a real with an unreal object. Wherefore the Sámpradáyikas maintain erroneous cognition, for there is no rule restricting (knowledge to) correct knowledge (only), since the cognition of the sákshí is concerned with real and unreal objects.

A. V.

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

१ इष्टिप्रकरणम् ।

१ इष्टिशब्द ऋत्विक्चतुष्टयसंपाद्यसपत्नीकयजमानकर्तृककर्मनामधेयम् ॥

२ तत्र यजते ऽसौ यजमान इतिविग्रहे यजमानशब्दः स्वार्थकर्मानुष्ठानकर्तृवाचकः ॥

३ ऋत्विङ्मध्ये यजमानो यं पूर्वं वृणीते कर्मण आरम्भसमाप्तौ च यः करोति अध्वरं यज्ञं युनक्तीतिविग्रहेण * सोऽध्वर्युरित्युच्यते ॥

* इदमयुक्तम् । यजमानस्याध्वरमिच्छतीत्यर्थे छन्दसिपरेच्छायामपि क्यज्वक्तव्य इति वार्तिकेनाध्वरशब्दात्क्यचि क्याच्छन्दसीत्यनेनोप्रत्यये ऽतो लोपे कव्यध्वरपृतनस्यर्चि-

४ कर्मकाले यजमान आहवनीयस्य दक्षिणत उदङ्मुख उपविशति तस्य पूर्वस्यां दिशि तथैवोदङ्मुखो दक्षिणोत्तरिणोपस्थेन * दक्षिणेऽङ्के उत्तानं सव्यं पाणिं प्रागग्रं निधाय तदुपरि तथैव न्यञ्चं † दक्षिणं निधाय य आस्ते सर्वदा कर्मणि दत्तचित्तः प्रणीताप्रणयनादौ ‡ अभ्यनुज्ञाकर्ता ऋग्यजुःसाममन्त्रकर्मभ्रेषे गार्हपत्यदक्षिणाग्न्याहवनीयेषु क्रमेण प्रायश्चित्ताहुतिहोमकर्ता § च स ब्रह्मपदवाच्यः ॥

५ यस्तु वेद्युत्तरश्रोण्युत्तरतः प्राङ्मुखो दक्षिणोत्तरिणोपस्थेन उपविशति अवकाशवदङ्गुली संहितौ पाणी हृदयदेशे अङ्के वा धारयति सामिधेनीः प्रयाजान् आज्यभागयाज्यापुरोनुवाक्याः सूक्तवाकं शंयुवाकं || च पठति च स होतृपदवाच्यः ॥

६ यश्च ऊर्ध्वाग्रमसिवत् स्फ्यं ¶ दक्षिणहस्ते धारयन् उत्करदेशे च दक्षिणामुखस्तिष्ठति अध्वर्युणा आश्रवणे कृते अस्तुशब्दपूर्वकश्रौषट्शब्दोच्चारणरूपप्रत्याश्रवणं करोति स आग्नीध्र इति अग्नीदिति चोच्यते ॥

लोप इति सूत्रेणाध्वराकारस्य लोपे ऽध्वर्युशब्दः सिद्धो भवतीति कव्यध्वरेतिसूत्रस्थोदाहरणमध्वर्युं वा मधुपाणिमिति प्रदर्शयतः कौमुदीकारस्य संमतम् ।

अथवा कव्यध्वरेति सूत्रे मनोरमायां "मृगय्वादिगणेऽप्यध्वर्युशब्दः पठ्यते तत्र व्युत्पत्त्यन्तरं बोध्य"मित्युक्तेर्मगं यातीतिवद् अध्वरं यातीत्यध्वर्युशब्दः कुप्रत्ययान्तः । तत्राध्वराकारलोपोपि निपातनादिति, उभयथापि मूलप्रदर्शितव्युत्पत्त्याऽध्वर्युशब्दस्यासिद्धेः ॥

* गार्हपत्यादिषु प्रायश्चित्ताहुतिदातृत्वं ब्रह्मणः केवलं बौधायनीयानामेव नत्वापस्तम्बहिरण्यकेशिप्रभृतिसूत्रानुसारिणामिति सामान्य ब्रह्मलक्षणे चिन्त्यमेतत् ।

† दक्षिणं च तदुत्तरं च दक्षिणोत्तरं तद्भुता जानुना । उत्तरं सव्यजानोरुपरिस्थापितम् ॥

‡ न्युब्जम् ।

§ पश्य वाक्यम् (५८) ।

|| पश्य । १८५ । २४७ । २३३ । २५७ ।

¶ पश्य । ३४ ।

७ यजमानस्य स्त्री यजमानवद्यज्ञफलभोक्त्री गार्हपत्यस्य पश्चिमदक्षिणे देशे पूर्वमुदङ्मुखी ऊर्ध्वजानुरुपविशति ततः पयस्वत्याचमनादि गार्हपत्ये समिदाधानान्तं कर्म करोति ततस्तृणनिरसनं कृत्वा तत्रैवोर्ध्वजानुः प्राङ्मुख्युपविशति पत्नीसंयाजप्रचारानन्तरं अवभृथस्थानीये अग्निहोत्रहवणीजलनिनयने पत्न्यञ्जलौ योक्त्र*माधाय होत्रा कृते स्वयं पूर्ववत्समिदाधानं पुनःपरिषेकान्तं कृत्वा पूर्वं यथा वेद्युत्करयो† र्मध्यमार्गेण प्रविष्टा तथा तेनैव मार्गेण विहारान्निर्गच्छति सा पत्नी भवति ॥

८ यागार्थं यत्र यत्र यावती भूमिः श्रुत्यादिभिः परिमाणविशेषविशिष्टत्वेन विहिता तत्र तत्र तावती भूमिः विहारपदवाच्या ॥

९ परस्परसंश्लिष्टानां चतुर्दशसंख्याकानां अणुनामकानां धान्यविशेषाणां यत्परिमाणं तद्, अथवा कोशसंस्थानवत् स्थापितानां पृथुप्रदेशेन संश्लिष्टानां चतुस्त्रिंशत्संख्याकानां तिलानां यत्परिमाणं तदङ्गुलपदवाच्यं परिमाणमिति बोधायनशुल्बसूत्रे प्रसिद्धम् ॥

१० पञ्चदशाङ्गुलं पदमुच्यते ॥

११ शुद्धे रमणीये देशे समचतुरस्रा दीर्घचतुरस्रा वा अग्निहोत्रहोमशाला कर्तव्या वास्तुशास्त्रोक्तरीत्या तस्याः प्राच्यां दक्षिणस्यां च दिशि एकैकं द्वारं कार्यं सा अग्निहोत्रशालेति गीयते ॥

१२ तस्यां शालायां पश्चिमभागे मध्यदेशे सप्तविंशत्यङ्गुलव्यासं मण्डलाकारं गार्हपत्यायतनं भवति ॥

१३ तस्य बाह्यतः शुद्धमृत्तिकानिर्मिता षडङ्गुलपरिमितोच्छ्राया षडङ्गुलपरिमितायामा प्रथमा मेखला भवति ॥

---

* पञ्चवाक्यम् ६५ ।

† पञ्च वाक्ये, ३२ । २५ ।

१४ तस्या उपरि पूर्वोक्तोच्छ्राया चतुरङ्गुलपरिमितायामा द्वितीया मेखला भवति ॥

१५ तदेतन्मेखलाद्वयसंस्थानं कुण्डमित्युच्यते ॥

१६ गार्हपत्यायतने स्थापितो ऽग्निर्गार्हपत्यनामको गृहपतिना यजमानेन संयुक्त इतिव्युत्पत्त्या गृहपतिना संयुक्ते ञ्य इतिसूत्रेण ञ्य प्रत्ययात् ॥

१७ गार्हपत्यस्य मध्यादारभ्य पूर्वस्यां दिशि ऋजुत्वेन नीयमानं आहवनीयमध्यपर्यन्तं सूत्रं पृष्ठ्यासूत्रमित्युच्यते ॥

१८ तादृशसूत्रस्य आधारभूतत्वेनोपलक्षिता भूमिगता रेखा पृष्ठ्या इति व्यवह्रियते ॥

१९ पृष्ठ्यासूत्रस्य यस्मिन् देशे पूर्वो ऽन्तःपतति स आहवनीयमध्यो भवति । आहवनीयमध्यशङ्कोः पूर्वस्यां दिशि एकः शङ्कुस्तथा पश्चिमायां दिशि च एकः शङ्कुः प्रादेशमात्रे देशे निखेयः । अरत्निद्वयायामा उभयतःपाशा रज्जुः कर्तव्या तस्या एकस्मात्पाशादारभ्य द्वादशाङ्गुलमिते देशे किंचिद्दुर्योचिह्नं कार्यं तथा अष्टादशाङ्गुलमिते भागे चिह्नं कर्तव्यम् । पूर्वनिखातपाश्चात्यपौरस्त्यशङ्क्वोः पाशौ प्रतिमोचनीयौ । तत्र चिह्नसमीपवर्ती पाशः पाश्चात्यशङ्कौ निधेयः । ततो द्वितीयचिह्ने सूत्रं गृहीत्वा दक्षिणत आकर्षणं कार्यं यस्मिन् देशे प्रथमलक्षणसंबन्धो भवेत्स आहवनीयायतनस्य नैर्ऋतकोणः । एवमुत्तरतो द्वितीयलक्षणे धृत्वा सूत्रमाकृष्य प्रथमं चिह्नं यत्र पतेत्स आहवनीयवायव्यकोणः । ततः तयोरेव शङ्क्वोः तस्या एव रज्ज्वोः पाशौ विपरीतौ निधाय अष्टादशाङ्गुलमिते चिह्ने रज्जुं धृत्वा दक्षिणत

आकृष्य प्रथमचिह्नपातस्थानमाहवनीयस्याग्नेयकोणः एवमेवोत्त-
रतः द्वितीयचिह्ने धृत्वा आकृष्य प्रथमलक्षणपातस्थानमाहव-
नीयस्यैशानः कोणः । एवं रीत्या संपन्नं चतुष्कोणमाहवनीया-
यतनमुच्यते ॥

२० तस्य बाह्यतः गार्हपत्यकुण्डवद् द्विमेखलं चतुरस्रमाहवनीय-
कुण्डं भवति ॥

२१ तन्मध्ये स्थापितोऽग्निः आहूयतेऽस्मिन्निति व्युत्पत्त्या मुख्य*हो-
माधारत्वाद् आहवनीयपदवाच्यः ॥

२२ पृष्ठ्यासूत्रस्य पञ्चमं षष्ठं वा भागं आगन्तुकं अधिकं पृष्ठ्यासूत्रे
संयोज्य उभयतःपाशां रज्जुं कृत्वा पुनः सर्वस्य सूत्रस्य पञ्च-
भागान् कृत्वा एकं पाशं गार्हपत्यमध्यशङ्कौ प्रतिमुच्य पञ्चधा
विभाजितायाः रज्जोरपरस्मादन्ताद् भागद्वये गते सति चिह्नं
कृत्वा द्वितीयं पाशं आहवनीयमध्यशङ्कौ नियोज्य चिह्ने सूत्रं
धृत्वा दक्षिणत आकृष्य लक्षणसंपातस्थाने शङ्कुं निहन्यात् ।
ततः पञ्चदशाङ्गुलपरिमितां रज्जुं एकतःपाशां कृत्वा तस्मिन्नि-
हते शङ्कौ तं पाशं प्रतिमुच्य तया रज्ज्वा मण्डलं परिलिखेत्
तस्य मण्डलस्योत्तररेखायाः पूर्वनिहितशङ्कोश्च मध्ये अन्यं शङ्कुं
निहन्यात् । तस्या एव रज्ज्वाः पाशं तस्मिन् शङ्कौ प्रतिमुच्य
पञ्चदशाङ्गुलपरिमितया तयैव रज्ज्वा अन्यन्मण्डलं परिलिखेत् ।
अस्य मण्डलस्य रेखा पूर्वकृतमण्डलरेखायाः उपरि दक्षिणभागे
उत्तरभागे च पतति तयोः संसर्गस्थानयोरेकं सूत्रं धृत्वा
पश्चिमपूर्वायतसूत्रकृतरेखात उत्तरतो विद्यमानमण्डलभागं
त्यजेत् मण्डलस्य दक्षिणतो विद्यमानो भागः पूर्वकृतमण्डलस्य

---

* प्रधानः ।

स दक्षिणो भागः शूर्पाकारः संपद्यते स दक्षिणाग्नेरायतनं भवति ॥

२३ तस्य बाह्यतः गार्हपत्यकुण्डवद् द्विमेखलं शूर्पाकारं दक्षिणाग्निकुण्डमित्युच्यते ॥

२४ तन्मध्ये स्थापितोऽग्निर्दक्षिणाग्निरन्वाहार्यपचन इति चोच्यते ॥

२५ पूर्वं पञ्चधा विभाजिताया रज्जोर्दक्षिणाग्न्यायतनसाधने यः पाशो गार्हपत्यमध्यशङ्कौ प्रतिमुक्तस्तं पाशं आहवनीयमध्यशङ्कौ प्रतिमुच्य आहवनीयमध्यशङ्कुपाशं गार्हपत्यमध्यशङ्कौ प्रतिमुच्य पञ्चधा विभाजितरज्जोः द्वयोर्भागयोर्गतयोर्यत्पूर्वं चिह्नं कृतं तत्र सूत्रं धृत्वा उत्तरत आकर्षणीयं चिह्नसंस्पृष्टा भूमिः स्तम्बयजुर्हरणसमये दर्भशकलानि मृत्तिकासहितानि यथा क्षिप्रं ऽवकाशे लोके प्रक्षिप्यते तथा विधिवशात् तस्यां भूमौ प्रक्षिप्यन्ते अत उत्किरन्त्यस्मिन् वेद्यादिसंबन्ध्यवकरादिकमिति व्युत्पत्त्या उत्कर इति गीयते ॥

२६ तथास्थितं तदेव सूत्रं तस्मिन्नेव चिह्ने धृत्वा दक्षिणत आकर्षणीयं चिह्नसंस्पृष्टा भूमिः यागकाले यजमानस्य तत्रोपवेशनविधानाद्यजमानस्थानमित्युच्यते ॥

२७ आहवनीयायतनात्पश्चिमदिशि षण्णवत्यङ्गुलपरिमिते देशे शङ्कुर्निखातव्यः तद्दक्षिणतो द्वात्रिंशदङ्गुलपरिमिते देशे एकः शङ्कुर्निखेयः तथैवोत्तरस्तावत्येव देशे द्वितीयः शङ्कुर्निखेयः दक्षिणशङ्कुस्थानं दक्षिणश्रोणिरित्युच्यते ॥

२८ उत्तरशङ्कुस्थानमुत्तरश्रोणिरिति गीयते ॥

२९ आहवनीयमध्यशङ्कोर्दक्षिणतश्चतुर्विंशत्यङ्गुलपरिमितदेशे एकः

शङ्कुर्निखेयः तथैवोत्तरतस्तावत्येव देशे अपरः शङ्कुर्निखेयः दक्षिणशङ्कुस्थानं दक्षिणांस इत्युच्यते ॥

३० उत्तरशङ्कुस्थानमुत्तरांस इति गीयते ॥

३१ ततः षण्णवत्यङ्गुलपरिमितां रज्जुं तावदागन्तुकभागामुभयतःपाशां कृत्वा मध्ये लक्षणं कृत्वा दक्षिणश्रोण्यंसशङ्क्वोः पाशौ प्रतिमुच्य लक्षणे रज्जुं गृहीत्वा दक्षिणत आकृष्य शङ्कुं तत्र निहन्यात् । तत उभौ पाशौ समस्य लक्षणशङ्कौ पाशद्वयं प्रतिमुच्य रज्जुमध्येन दक्षिणश्रोणीशङ्कोरारभ्य दक्षिणांसशङ्कुपर्यन्तं लिखेत् । एवंकृते या रेखा उत्पद्यते सा वेद्या दक्षिणं पार्श्वमिति व्यवह्रियते ॥

३२ तथैव तस्या रज्ज्वाः पाशौ उत्तरश्रोण्यंसशङ्क्वोः प्रतिमुच्य रज्जुमध्येन चिह्नितेन रज्जुमुत्तरत आकृष्य चिह्नसंपातस्थाने शङ्कुं निहन्यात् तत उभौ समस्य अस्मिन्निहते शङ्कौ प्रतिमुच्य मध्यभागस्थचिह्नेन सूत्रं धृत्वा उत्तरश्रोणिशङ्कोरारभ्य उत्तरांसशङ्कुपर्यन्तं लेखां लिखेत् । सा लेखा वेद्युत्तरपार्श्वमित्युच्यते ॥

३३ अनया रीत्या दक्षिणोत्तरपार्श्वयुक्ता दक्षिणोत्तरश्रोणिसहिता दक्षिणोत्तरांसयुक्ता उरोरूपशरीरावयवत्वेन उपनिषद्युक्ता यागकाले दर्भैराच्छादिता आज्यचरुपुरोडाशादिरूपहविरासादनाश्रयभूता वेदिरित्युच्यते । तस्या बाह्यतः प्रथमा मेखला चतुरङ्गुलोत्सेधा चतुरङ्गुलायामा मृत्तिकानिर्मिता भवति तस्या मेखलाया उपरि द्व्यङ्गुलोत्सेधा द्व्यङ्गुलायामा तथैव द्वितीया मेखला भवति ॥

३४ खदिरकाष्ठनिर्मित अरत्निपरिमितो दीर्घश्चतुरङ्गुलपरिमितविस्तार आकारेण खड्गसदृशः स्फ्य इत्युच्यते ॥

Digitized by Google

३५ पुरोडाशभर्जनार्थं मृत्तिकया निर्मितानि वह्नौ परिपक्कानि इयङ्गुलो-च्छ्रायाणि यस्मिन् पुरोडाशे यावन्ति विहितानि तानि सर्वाणि मिलित्वा गार्हपत्वपश्चाद्भूमौ गार्हपत्यायतनान्तः पश्चिमभागे वा उपधीयमानानि कपालपदवाच्यानि ॥

३६ कस्मिंश्चित्पुरोडाशे एकमेव कपालं भवति तच्च तदेकं कपालं अश्वशफपरिमाणं अश्वशफाकारं उपधीयते स च पुरोडाशः श्रुते एककपाल इति गीयते ॥

३७ पुरोडाशस्यानेककपालत्वे तु अश्वशफाकारता अश्वशफपरिमाणता च कपालसमूहे बोद्धव्या । तत्राष्टाकपाले प्रकृतिभूते पुरोडाशे प्रथमं कपालं चतुरस्रं मध्ये उपधीयते तस्य पुरस्ताद् द्वितीयं शफाकारतासंपादनाय अर्धचन्द्राकारं तृतीयं तु मध्यमस्य पश्चाद् द्वितीयसदृशं चतुर्थं तु मध्यमस्य दक्षिणतस्तादृशमेव पञ्चमं तु दक्षिणस्य पुरस्तादाग्नेयकोणे शफाकारतासंपत्तियोग्यं षष्ठं तु दक्षिणस्य पश्चाद् नैर्ऋतकोणे समुदितस्य शफाकारतासंपत्तियोग्यं सप्तमं तु मध्यमस्योत्तरार्धे पश्चिमभागे शफाकारतासंपत्तियोग्यं अष्टमं तु मध्यस्योत्तरार्धे पूर्वभागे एवमष्टौ कपालानि समुदितानि अश्वशफपरिमितानि अश्वशफाकाराणि भवन्ति । एवं नवकपालादिषु अष्टाकपालन्यूनकपालादिषु च कपालरचना कपालविभागश्च अश्वशफाकारतातत्परिमाणसंपत्तिसंभवेन कर्तव्यो । एते च पुरोडाशास्तावत्सु कपालेषु भर्जनीयत्वादष्टाकपालादिपदवाच्या भवन्ति ॥

३८ दैर्घ्ये प्रादेशमात्री अरत्निमात्री बाहुमात्री वा हस्त्योष्ठीत्वपक्षे अष्टाङ्गुलपरिमितबिला हंसमुखीत्वपक्ष वायसपुच्छकात्वपक्षे च

पञ्चाङ्गुलपरिमितबिला चतुरङ्गुलपरिमितबिला वा बिलावशिष्ट-भागेन दण्डयुक्ता विकङ्कतकाष्ठेन निर्मिता अग्निहोत्रहोमसाधन-त्वादग्निहोत्रं हूयते ऽनयेति करणव्युत्पत्त्या ऽग्निहोत्रहवणी-त्युच्यते ॥

३९ वंशनिर्मितं व्रीह्यादीनां पुरोडाशादिसंबन्धिनां निस्तुषकरणो-पयोगि शूर्पमित्युच्यते ॥

४० कृष्णमृगस्य चर्म व्रीह्याद्यवघातकाले उलूखलस्याधःस्थापनोप-योगि कृष्णाजिनमिति कथ्यते ॥

४१ खदिरकाष्ठनिर्मिता षट्त्रिंशदङ्गुलपरिमितायामा अग्रभागे अष्टा-स्वङ्गुलिषु कुम्बा*ष्टकयुता तन्दुलादिपेषणकाले दृषदो ऽधस्तात् स्थापनायोपयुज्यमाना आग्नीध्रकर्तृकदृषदुपलादिसमाहननादौ करणभूता शम्यापदवाच्या ॥

४२ पलाशकाष्ठनिर्मितं द्वादशाङ्गुलपरिमितोच्छ्रायं उपरितनार्धभागे बिलयुक्तं चरुपुरोडाशसंबन्धिव्रीह्यादिकण्डनोपयोगि उलूखल-मित्युच्यते ॥

४३ उलूखलार्धत्रिगुणायामं खदिरकाष्ठनिर्मितं कण्डनोपयोगि मुसल-मित्युच्यते ॥

४४ पाषाणमयी पेषणकाले पेषणीयद्रव्याश्रयभूता दृषदित्युच्यते ॥

४५ पाषाणनिर्मिता पेषणसाधनभूता उपला कथिता ॥

४६ पलाशकाष्ठनिर्मिता अग्निहोत्रहवणीसदृशी मुख्यहोमकरणत्वात् हूयते ऽनयेति व्युत्पत्त्या जुहूपदवाच्या ॥

४७ अश्वत्थकाष्ठनिर्मिता जुहूतुल्या उप समीपे ध्रियते ध्रियत इति-व्युत्पत्त्या होमकाले अध्वर्युणा सव्यहस्तेन होमार्थधृतदक्षिण-

* कुम्बो वर्तुलग्रन्थिसदृशाकारः ।

हस्तसंबन्धिजुह्वाः समीपे धारणात् उपभृदिति भण्यते ॥

४८ खदिरकाष्ठनिर्मितः अरत्निमात्रो दीर्घः अग्रभागे अङ्गुष्ठपर्वमात्र-वर्तुलबिलयुक्तः आज्यहोमादौ करणभूतः स्रवत्याज्यादिद्रव्य-मस्मादिति व्युत्पत्त्या स्रुवपदवाच्यः ॥

४९ विकङ्कतवृक्षसंबन्धिकाष्ठेन निर्मिता जुहूसदृशी होमाद्यर्थं स्रुवेण गृह्यमाणस्याज्यस्याधारभूता यागसमाप्तिपर्यन्तं वेद्यां विद्यमान-तया स्थिरत्वदर्शनात् ध्रुवति अप्रचलिता भवतीति व्युत्पत्त्या ध्रुवापदवाच्या ॥

५० खदिरकाष्ठनिर्मितं प्रादेशपरिमितं गोकर्णाकारं चतुरङ्गुलपरिमि-तदण्डयुक्तं प्राशित्रं नाम ब्रह्मणे दीयमानो हुतशेषहविर्भागः स ह्रियते ऽनेनेति करणव्युत्पत्त्या प्राशित्रहरणपदवाच्यम् ॥

५१ अश्वत्थकाष्ठनिर्मितं चतुरङ्गुलपरिणाहं पदपरिमितायामबिलयुक्तं चतुरङ्गुलदण्डं इडाया आधारत्वात् इडापात्रमित्युच्यते ॥

५२ हुतहविःशेषादवदाय इडापात्रे स्थाप्यमानो हविर्भाग इडेत्युच्यते ॥

५३ अश्वत्थकाष्ठनिर्मितं अरत्निपरिमितं अग्रभागे चतुरङ्गुलचतुरस्रफ-लकयुतं भर्जनपात्र्यां समुप्तस्य पिष्टस्य मदन्तीभिरद्भिः संमेल-नकरणादौ करणतया विहितं फलकावशिष्टभागदण्डयुतं मेक्षण-पदवाच्यम् ॥

५४ गार्हपत्ये भर्जनपात्रीमधिश्रित्य तस्यां तप्तायां सत्यां अध्वर्युः सव्यहस्तेन उदगग्रं पवित्रं धृत्वा दक्षिणहस्तेन कृष्णाजिनात् पिष्टानि क्षिपति तत्क्षेपणं संवाप इत्युच्यते ॥

५५ भर्जनपात्र्यधिश्रयणकाले यज्जलपात्रमधिश्रितं भवति तत्रत्यं जलं अप्शब्दविशेषणत्वाद्बहुवचनान्तेन मदन्तीशब्देनोच्यते ॥

५६ अनखच्छिन्नं साग्रं प्रादेशमात्रं मन्त्रसंस्कारयुक्तं समपरिणाहं प्रोक्षणादौ प्रायः उपयोगि दर्भद्वयं पवित्रसंज्ञं भवति ॥

५७ गार्हपत्याधिश्रितायां यस्यां पात्र्यां पिष्टानि समुप्यन्ते सा पिष्टोद्वपनीति पठ्यते ॥

५८ अश्वत्थकाष्ठनिर्मितं चतुरङ्गुलदण्डं अष्टाङ्गुलबिलं प्रादेशमात्रं प्रणीतानामकं जलं नीयते ऽनेनेति करणव्युत्पत्त्या प्रणीताप्रणयनमित्युच्यते ॥

५९ पूर्वोक्तं पवित्रमन्तर्धाय मन्त्रेण प्रायश्चित्तादिहोमार्थं जुह्वादिषु तिसृषु स्रुक्षु पूरणार्थं च यस्यां स्थाल्यामाज्यं गृह्यते सा आज्यस्थालीपदवाच्या ॥

६० कर्म द्विविधं समन्त्रकममन्त्रकं च । तत्र समन्त्रके कर्मणि यस्मिन् कर्मणि यो मन्त्रः श्रुत्यादिना मन्त्रान्ते कर्म कुर्वीतेत्यादिवचनात् क्वचित्कर्मण आरम्भादादौ क्वचित् उपस्थानादिकर्मसु कर्मसमकालमेव करणत्वेन विनियुक्तस्तस्य मन्त्रस्योक्तस्थाने पाठाभावः अविहितस्थाने पठनंच एवं कर्मणोऽकरणं अस्थाने कर्मानुष्ठानं च अनयैव रीत्या मन्त्रक्रिययोरुभयोरननुष्ठानं अस्थाने तयोरनुष्ठानं विहिताकरणं निषिद्धाचरणं च प्रायश्चित्तपदैकदेशस्य प्रायःपदस्य नष्टशब्दापरपर्यायस्य वाच्यम् ॥

६१ प्रायो नाम नष्टं तस्य चित्तं नाम पुनः संधानं अकृतस्य कृतत्वसंपादकं अन्यथा कृतस्य सुष्टुकृतत्वसंपादकं कृतस्य निषिद्धस्याकृतत्वसंपादकं कर्म विधायकश्रुत्यादिनैव तथा प्रतिपादनात् तच्च जपहोमादिरूपं तीर्थयात्रास्नानादिरूपं दोषानुसारेण श्रुत्यादिप्रतिपादितं प्रायश्चित्तमिति गीयते ॥

६२ ध्रुवोपभृज्जुहूनां तु स्रुवो भेदाः स्रुचः स्त्रियामिति श्रौतव्यवहारमूलककोशाद् ध्रुवोपभृज्जुहूस्रुवाणां चतुर्णां वाचकः स्रुक्शब्दः ॥

६३ दर्भमुष्टिः प्रदक्षिणमावेष्ट्य द्विगुणः कृतः प्रादेशमात्र उपविष्टवत्सजानुसदृशसंपन्नः समन्त्रकवेदिसंमार्जनादिकर्मोपयोगी प्रच्छिन्नाग्रो वेद इत्युच्यते ॥

६४ इडापात्रतुल्यं भेदार्थे केनचिच्चिन्हेन युक्तं पक्वान् पुरोडाशान् कपालेभ्य उद्वास्य मन्त्रेणाज्योपस्तरणं कृत्वा यस्मिन्पात्रे कृतोपस्तरणस्थाने पुरोडाशान् स्थापयित्वा हविरासादनकाले वेद्यामासाद्य यागकाले तत्पात्रस्थानामेव पुरोडाशानामवदानं प्रधानहोमार्थं ब्रह्मभागार्थं यजमानभागार्थं स्विष्टकृदर्थं प्राशित्रनामकब्रह्मभागार्थं चतुर्धाकरणार्थं इडापात्रे ग्रहणार्थं च क्रियते तत्पात्रं दारुपात्रीत्युच्यते ॥

६५ कर्मकाले आग्नीध्रोऽध्वर्युप्रेषितः पत्नीं मन्त्रेण येन गुणेन मुञ्जमयेन वेष्टनेन त्रिगुणितेन कटिदेशे संनह्यति स गुणो योक्त्रमित्युच्यते ॥

६६ वेदस्य यान्यग्राणि पूर्वं छिन्नानि तानि वेदस्य परिवासनानि इति षष्ठीसमासे परिवासनशब्दस्य कर्मल्युडन्ततया वेदपरिवासनानीत्युच्यन्ते ॥

६७ मेषणसदृशकपालोपधाने गार्हपत्यादङ्गारोद्धरणादौ उपयोगिनी धृष्टिरित्युच्यते ॥

(शेषमग्रे)

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 11.] NOVEMBER, 1882. [Vol. IV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1882.

Price Rs. 9-0 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ चित्सुखी ॥

॥ तत्र प्रथमः परिच्छेदः ॥

(*Continued from page* 487.)

यत्तु पुनरेतस्य घटस्य दृश्यत्वादेतन्निष्ठबाध्यभेदातिरिक्तभेदवत्त्वानुमानं तदप्यद्वैतागमविरोधात् कालात्ययापदिष्टमित्युपेक्षणीयम् ।

मृत्तिकेत्येव सत्यमित्याद्यागमेन प्रपञ्चस्य सत्यतावगमादद्वैतागम एवोपचरितार्थः किं न स्यादितिचेत्, न, तस्यान्यपरत्वात्, तथाहि-एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय ब्रह्मणः सर्वकारणतया सर्वकार्यैरनन्यत्वप्रदर्शनेन तां प्रतिज्ञामुपपादयितुं लोकेऽपि घटरुचकादिकार्याणां मृल्लोहादिकारणादनन्यत्वं दर्शयति 'मृत्तिकेत्येव सत्यं' 'त्रीणि रूपाणीत्येव सत्य'-मित्यादिना न तु तेषां वास्तवत्वमभिप्रैति, 'ऐतदात्म्यमिदं सर्वं तत् सत्यं' 'स आत्मे'त्यन्तेन ब्रह्मण एव सत्यत्वप्रतिपादनविरोधात्, एतेन मिथ्यात्वानुमानस्यागमविरोधोऽप्यपास्तः । दृग्दृश्ययोः संबन्धानुपपत्तिश्च सत्यत्वामानस्य बाधिका ।

न च करणसंबन्धादेव संबन्धोपपत्तिः. ईश्वरज्ञानेऽकरणजन्येऽपि विषयाणां स्फुरणात्, करणजन्येष्वपि योगिज्ञानेषु युक्तावस्थायामन्तःकरणासंबद्धानामतीतानागतानां बाह्यार्थानां च स्फुरणात् ।

न च मनसो बहिरर्थैः संबन्धः, परतन्त्रं बहिर्मन इति न्यायात्, अस्मदादीनां चैन्द्रियकविभ्रमेष्विन्द्रियासंबद्धानामेव स्फुरणाङ्गीकारात्, अस्मदादिप्रमाणजन्येऽपि ज्ञाने सोऽयं देवदत्त इत्यादौ तत्तांशस्य करणासंबद्धस्यापि प्रत्यक्षताभ्युपगमात् ।

न च तत्तायामपीन्द्रियेण सह संयुक्तविशेषणतालक्षणः संनिकर्षः, समवायेतरभावस्येन्द्रियसंप्रयोगमन्तरेणापि प्रत्यक्षतायामयं पर्वतो वह्निमानित्यत्राग्निमत्त्वस्यापि संयुक्तविशेषणतया प्रत्यक्षत्वापत्तेः प्रत्यक्षधर्मिकानुमानमात्रोच्छेदप्रसङ्गः ।

Digitized by Google

अस्तु तर्हि ज्ञानज्ञेययोर्विषयविषयिभावः संबन्ध इति चेत्, न, तदनिरूपणात् ।

तथाहि न तावज्ज्ञानजन्यफलाधारत्वं विषयत्वं विषयनिष्ठफलजनकत्वं च विषयित्वमिति युक्तम्, विकल्पासहत्वात् ।

तत् फलं ज्ञातताव्यवहारो वा ।

नाद्यः, अतीतादौ तदभावेनाविषयत्वप्रसङ्गात्, तत्रैव फलजननेऽप्यनुगतनियामकायोगात्, तद्योगे वा तस्यैव विषयत्वनियामकतोपपत्तेः ।

न द्वितीयः, कराकर्षणादेर्व्यवहारस्यात्मादावभावात्, कलधौतमलादेरपि नान्तरीयकतया तद्व्यवहारविषयस्य तज्ज्ञानविषयतापत्तेः, नापीच्छादिः, आत्मन एव तदाधारतया तदन्यस्याविषयत्वप्रसङ्गात् ।

अथ ज्ञानप्रतिबद्धहानादिलक्षणज्ञानगोचरत्वं तद्योग्यत्वं वा विषयत्वम्, न, ज्ञानगोचरत्वस्यैव निरूप्यमाणत्वात्, हानादिज्ञानानां च हानादिज्ञानान्तराजनकतया निर्विषयत्वप्रसङ्गात् । जनकत्वे वा हानादिज्ञानानुपरमाद्विषयान्तरसंचाराभावः सुषुप्त्यभावश्च प्रसज्येयाताम् । व्यवहारयोग्यत्वं विषयत्वमित्यङ्गीकारे च योग्यतायां योग्यतान्तराभ्युपगमेऽनवस्था, तदनभ्युपगमे योग्यताया अविषयत्वाभावः, अलमिह लक्षणान्तरगवेषणापरिश्रमेण ।

यस्यां संविदि योऽर्थोऽवभासते स तद्विषय इति लक्षणनिरुक्त्युपपत्तेरिति चेत्, मैवम्, विकल्पासहत्वात् ।

संविदीति सप्तम्या किमधिकरणं विवक्ष्यते॰ अथ विषयः किं वा संबन्धिमात्रं सतिसप्तमी वा ।

नाद्यः, घटादिद्रव्याणां बाह्यानामान्तरसंविद्गुणाधिकरणतानुपपत्तेः ।

न द्वितीयः,तस्यैव निरूप्यमाणत्वात्, संविदो विषयत्वं घटादीनां च विषयित्वमिति वैपरीत्यापत्तेश्च ।

न तृतीयः, संविज्जनकतया तत्संबन्धिनो नयनादृष्टादेरपि तद्विषयत्वप्रसङ्गात्, संविदि भासत इति भासमानताया विशेषणत्वान्न नयनादावतिप्रसङ्ग इति चेन्न, भासमानताया एवाद्याप्यनिरूपितत्वात् ।

न चतुर्थः भासमानत्वानिरुक्तेरेव ।

ज्ञानाकारार्पको हेतुर्विषय इति चेन्न, ज्ञानतदाकारयोर्भेदाभावेन सर्वेषामपि ज्ञानहेतूनां तदाकारसमर्पकतया विषयत्वप्रसङ्गात् ।

दृश्यमानतया तदाकारसमर्पको विषय इति चेन्न, दृश्यमानताया एवाद्याप्यनिरूपणात् ।

न च ज्ञानविषयत्वं कर्मत्वम्, अतीतादिज्ञानस्येश्वरज्ञानस्य च कर्मकारकाजन्यत्वेनाविषयत्वप्रसङ्गात् ।

संबन्धान्तरमन्तरेण ज्ञानस्य यद्विशेषणं स तद्विषयो विशेष्यं च विषयीति चेन्न, मत्समवेतं रूपज्ञानमित्यत्र व्यभिचारात्, संबन्धान्तरमन्तरेणैव मत्समवायस्य रूपज्ञानस्य च विशेषणविशेष्यभावेऽपि मत्समवायरूपज्ञानयोर्विषयविषयित्वाभावात्, तत्र समवायस्यानुव्यवसायज्ञानविषयत्वेऽपि रूपज्ञानाविषयत्वात् ।

तदेवं विषयविषयिभावानिरूपणात्, आत्मन्यध्यस्ततया चासिद्धौ प्रपञ्चस्य सत्यत्वे दृश्यत्वानुपपत्तिर्बाधिकेति स्थितम् ।

न च भेदस्य मिथ्यात्वे शब्दान्तरादेः कर्मभेदप्रतिपादकस्याप्रामाण्यप्रसङ्गः ।

घटपटादेरिव व्यावहारिकस्यैव भेदमात्रस्य कर्मगोचरस्य तत्र तत्र शब्दान्तरादिभिः प्रतिपाद्यमानत्वात् तद्गतबाधायोग्यतालक्षणसत्यत्वस्य प्रतिपादने तेषामौदासीन्यात् ।

तदेवं निरस्तसमस्तप्रत्यनीकमनुमानं प्रपञ्चमिथ्यात्वे मानमिति सिद्धम् ।

नन्वस्यानुमानस्य मिथ्यात्वं किमनुमानान्तरेण सिध्यति, किं वा स्वेनैव. आद्येऽनवस्था, तस्य तस्यानुमानस्य मिथ्यात्वसाधनेऽनुमानान्तरापेक्षणात्, जिज्ञासायां सत्यां तत्तदनुमानप्रवृत्तेर्नानवस्था मूलक्षयकरीति चेन्न, यद्यदुक्तसाधनं तत् तदुक्तसाध्यमिति व्याप्तिग्रहणसमये तस्य तस्यानुमानस्य मिथ्यात्वानधिगमे सर्वोपसंहारवती व्याप्तिर्न सिध्येत्, अधिगमे च

तत्तदधिगमाय तत्तदनुमानान्तरं तदैवापेक्षणीयमिति कथय कथं न मूलक्षतिः। द्वितीये तु स्वात्मनि वृत्तिविरोधः, स्वगतमिथ्यात्वस्य स्वेनैव ग्रहणादिति चेन्नैवम्, शब्दशब्दवत् प्रपञ्चसत्यत्वानुमानवदध्ययनविधिवच्चाविरोधात् ।

ननु नाध्ययनविधिप्रयुक्तमध्ययनं तस्याध्यापनविधिप्रयुक्तत्वात्, तथाहि· अध्ययनविधिर्न स्वविषयाध्ययनस्यानुष्ठापनक्षमः, निर्नियोज्यत्वात्, न ह्यत्र कामी जीवनादिनिमित्तवान् यः कश्चिन्नियोज्यः प्रतीयते, नापि विश्वजिदादिवत् कल्पयितुं शक्यः, अध्यापनविधिप्रयुक्तित एव तद्विषयस्याध्ययनस्य सिद्धौ नियोगसिद्धेः कल्पकाभावात् ।

न चाध्यापनविधेरपि निर्नियोज्यतयाननुष्ठापकत्वम्, आचार्यकरणकामस्य नियोज्यस्य प्रतीतेः, तथाहि· "अष्टवर्षं ब्राह्मणमुपनयीत" "तमध्यापयीते"ति श्रूयते, तत्र 'संमाननोत्सञ्जनाचार्यकरणे'ति सूत्रेणाचार्यकरणे नयतेरात्मनेपदविधानात्·'उपनयीत' 'तमध्यापयीते'ति चोपनयनाध्यापनयोरेकप्रयोगतावगमात्· उपनयनपूर्वकाध्यापनसाध्याचार्यत्वप्रतीतौ तत्कामिनो नियोज्यत्वावगमाच्च निर्नियोज्यताध्यापनविधेः, तथाच स्वविषयस्याध्यापनस्यानुष्ठानं प्रयुञ्जानोऽध्यापनविधिस्तन्निष्पादकमध्ययनमपि प्रयुङ्क्ते, तेन विध्यात्तेपलक्षणोपादानप्रमाणेनान्यत एवाध्ययनसिद्धेर्नाध्ययनविधिप्रयुक्तमध्ययनमिति ।

अत्रोच्यते। भवतु नाम सनियोज्यताध्यापनविधेस्तथापि नाध्यापनविधिप्रयुक्तताध्ययनस्य सिध्येत्, कामाधिकारे करणांशे रागस्यैव प्रवर्तकत्वात्, अध्यापनस्यापि काम्यत्वात् तद्विषयरागेणैव तन्निष्पादकेऽप्यध्ययनेऽनुष्ठानलाभादध्यापनविधेरनुष्ठापकत्वकल्पनानुपपत्तेः ।

न चाध्यापनाङ्गत्वादध्ययने विधितः प्रवृत्तिराशङ्कनीया, तत्र श्रुत्यादीनामन्यतमप्रमाणस्यादर्शनात् ।

न चाध्यापनविधिप्रयुक्तत्वादध्ययनस्य तदङ्गत्वम्, प्रयुक्तेर्व्यभिचारात्, न हि भिन्ने जुहोतिस्कन्ने जुहोतीत्यादौ भेदादिना प्रयुज्यमानो होम-

स्तदङ्गमङ्गीक्रियते, तत्प्रयुक्तेरध्ययनस्याप्राप्यसिद्धेः, अङ्गत्वेन प्रयुक्तिः प्रयुक्तौ च तदङ्गत्वमिति परस्पराश्रयता च ।

किंचाध्ययनविधावधिकारिणमङ्गीकुर्वता नियोज्यः कस्मान्न स्वीक्रियत इति वाच्यम्, अनुष्ठानसिद्धये नियोज्योऽपेक्षितव्यः, तच्चान्यत एव सिद्धमिति नासावङ्गीक्रियत इति चेत्, तर्ह्यधिकार्यपि नापेक्षणीयः, अनुष्ठानस्यान्यत एव सिद्धेः, अधिकारी विधिपर्यवसानायापेक्ष्यत इति चेत्, नियोज्येऽपि तुल्यम्, तेनापि विना नियोगापर्यवसानात्, अन्यतोऽपि विषयानुष्ठानसिद्ध्या च नियोगसिद्धौ का नाम विधेरपर्यवसानवाचोयुक्तिः ।

किंच 'तमध्यापयीते'ति च नायमध्यापने विधिः, वृत्त्यर्थत्वेनाध्यापनस्य याजनवत् प्राप्तत्वात्, उक्तं हि ।

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥

इति । तस्मादत्र "तयाचाद्यकामं याजये"दित्यादिषु याजनं न विधीयते किं त्वेतयाचाद्यकामो यजेतेति वाक्यार्थः, तथेहाप्यष्टवर्षो ब्राह्मण उपगच्छेत् सोऽधीयीतेति वाक्यार्थः स्वीकार्यः ।

न चालौकिकनियोगार्थत्वेनाध्यापने विधिः, याजनेऽपि तथा प्रसङ्गात्, अपिच अध्ययनं नित्यम्,

"योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥

इत्यादिनाऽकरणे प्रत्यवायश्रवणात्, अध्यापनं चानित्यं काम्यत्वात्, तथा च कथं नित्यमनित्येन युज्येत विरोधात् ।

तस्मादध्ययनविधिप्रयुक्तमेवाध्ययनमिति न दृष्टान्तासिद्धिः ।

अस्तु वाध्यापनविधिप्रयुक्तमध्ययनं तथाप्यध्यापनविधिरखिलवेदवाक्याध्यापनं विदधानः स्ववाक्याध्यापनमपि विधत्त इति स एव दृष्टान्तो भविष्यतीत्यलमतिविस्तरेण ।

तथै'कमेवाद्वितीय'मित्याद्यागमोऽपि तत्र प्रमाणम् ।

न चाद्वितीयशब्दस्तत्सजातीयवस्त्वन्तरनिषेधपरः, संकोचे कारणाभावात्, एकत्वविशेषणेनैव सजातीयस्य निषिद्धत्वात्, सजातीयमात्रनिषेधपरत्वे चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानस्य वाचारम्भणशब्दस्य च 'तदात्म्यमिदं सर्व'मित्याद्युपसंहारस्य च बाधप्रसङ्गात् ।

न चैकमित्येकत्वसंख्याविधानपरं तत्रैव तस्य व्युत्पत्तेरिति वाच्यम्, एकं रूपमेका संख्या एकोऽभाव इत्यादावपि प्रयोगात् । आनन्त्यमप्युभयान्ताभाव एव तत्रैव तस्य व्युत्पत्तेरित्यपि न, पूर्वापरकालानवच्छेदस्यैवेहानन्तपदेन विवक्षायां नित्यमाकाशमनन्तं चेति प्रयोगानुपपत्तिप्रसङ्गात् ।

न चान्योन्याभावाधिकरणत्वानधिकरणे व्युत्पत्त्यभावो दोषः, अन्तशब्दस्य देशतः कालतो वस्तुतश्च परिच्छेदे व्युत्पन्नत्वात्, तस्य नञ्समासे त्रिविधस्याप्यन्तस्य निषेधोपपत्तौ पृथग्व्युत्पत्त्यनपेक्षत्वात्, "नेह नानास्ति किंचने"ति न ब्रह्मणि नानात्वं निषिध्यते, अप्रसक्तत्वात्, न हि लोकतः श्रुतितो वादिप्रसिद्धितो वा ब्रह्मणि नानात्वं प्रसक्तं येन प्रतिषिध्येत नानाशब्दस्य भावप्रत्ययान्तताभावाच्च न नानात्वनिषेधः, तन्निषेधे वा संकोचे कारणाभावात्, सजातीयस्वगतनानात्वनिषेधाद्ब्रह्माद्वैतमेव पर्यवस्येदिति स एव घट्टकुटीप्रभातवृत्तान्तः प्रसज्येत ।

न 'चेन्द्रो मायाभि'रितीन्द्रियद्वारकबुद्धिवृत्त्युपाधावीश्वरस्य भेदोऽवभासत इत्येतावत्परमिदं वाक्यं न तु द्वैतप्रतिषेधपरमिति युक्तम्, ईश्वरस्य नित्यानुमेयस्यैन्द्रियकबुद्धिवृत्तिविषयत्वानङ्गीकारात्, मायाशक्तिविशेषाभिधाने च 'युक्ता ह्यस्य हरयः शता दशे'ति वाक्यशेषो न संगच्छेत, इन्द्रियबाहुल्याभिधानस्य मायाशक्तिविशेषाभिधानं प्रत्यनुपयुक्तत्वात्, 'अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि चे'ति वाक्यशेषे सर्वस्येश्वरात्मकत्वप्रतिपादनविरोधाच्च, 'मृत्योः स मृत्यु'मिति च नाभेदप्रतिपत्तिविधिः, 'नेह नानास्ति किंचने'ति द्वैतनिषेधवैयर्थ्यात्, अनुपासनप्रकरणत्वाच्च, पूर्वापरालोचनायां चास्य प्रकरणस्य निष्प्रपञ्चब्रह्मात्मत्वप्रतिपत्तौ तात्पर्याधिगमात् ।

Digitized by Google

ननु पूर्वापरवाक्यानामुपासनपरतापि दृश्यते, "आयुर्ह्योपासते मृतं विज्ञाय प्रज्ञां कुर्वीत" "सर्वस्य वशी सर्वस्येशानः" "अन्नादो वसुदानो विन्दते वसु य एवं वेदे"त्यादिश्रवणादिति चेन्मैवम्, प्रसङ्गागतत्वादुपासनानुवादस्य "तमेव धीरो विज्ञाये"ति च "यस्मिन् पञ्च पञ्चजना" इति च पूर्वोदिताकाशादितत्त्वाधारतया सप्रपञ्चताप्रसक्तावधारणस्य तन्निवारणपरत्वात्, 'प्रज्ञां कुर्वीते'ति च प्रज्ञाशब्देन विज्ञानशब्दाभिधेयपरोक्षज्ञानातिरिक्तसाक्षात्काराभिधानाङ्गीकारे तस्यानवधिसुखरूपात्मसाक्षात्कारतया फलत्वेन विधेयत्वानुपपत्तेः, 'सर्वस्य वशी'त्यादेः स्तुतिपरतया गुणविधानार्थत्वाभावात्, आगमस्य च स्वरूपप्रतीतौ पदपदार्थसंबन्धावगमे च प्रत्यक्षादिसापेक्षत्वेऽपि तस्य तद्विषयभेदस्य च पारमार्थिकत्वांशस्यानुपजीव्यत्वात् तद्बाधनेऽपि विरोधाभावात्, सांव्यवहारिकभेदाभावस्य च ज्ञानोदयनान्तरीयकतया श्रुतिबाध्यत्वाभावाच्च व्यावहारिकभेदसापेक्षतया श्रुतेरप्रामाण्यप्रसङ्गः । न च 'न हिंस्या'दित्यादिवाक्येषु परस्परपराहतिः, सामान्यविशेषभावेनेच्छाविकल्पेन व्यवस्थितविकल्पेन वाऽविरोधोपपत्तेः ।

न च कर्मज्ञानकाण्डयोर्भेदाभेदविषयतया कर्मानुष्ठानतत्त्यागप्रतिपादकतया च विरोधः, विद्याविद्यावस्थाभेदेन विद्वदविद्वत्पुरुषविषयतया चाविरोधात् ।

तदेवं मिथ्यात्वे लक्षणप्रमाणयोरुपपन्नत्वादनिर्वचनीयानाद्यविद्याविलसित एवायमात्मनि द्वैतप्रपञ्च इत्यलमतिप्रपञ्चेन ।

ननु भोः केयमनिर्वचनीयाविद्या नाम, न हि ज्ञानाभावव्यतिरेकेण काचिदविद्या प्रसिद्धा· उपपन्ना वा, ज्ञानप्रागभावप्रध्वंसयोरेव न जानामीत्यविद्यात्वेन लोके व्यावहारिकव्यवहारोपलम्भात्, अविद्येति च विद्यापदेन समस्यमानस्य च नञस्तदभावस्तद्विरोधी तदन्यो वार्थोऽभ्युपेयः, आद्ये विद्याभावस्यापि वेद्याभाववचानिर्वचनीयता, द्वितीये तु संशयविपर्यासादेर्विद्याविरोधिनो गुणान्तरस्य वा नानिर्वचनीयतोपपत्तिः,

प्रसिद्धभावस्वभावत्वव्याकोपात्, न तृतीयोऽपि विद्यातिरिक्तस्य समस्तस्याविद्यात्वप्रसङ्गात् ।

न चास्या लक्षणं प्रमाणं वा पश्यामः, न तावज्ज्ञाननिवर्त्यमज्ञानम्, पूर्वज्ञानस्यापि तन्निवर्त्यस्याज्ञानत्वप्राप्तेः, अनादित्वविशेषणाददोष इति चेत्, न, ज्ञानप्रागभावे व्यभिचारात्, अनादिभावत्वे सति ज्ञाननिवर्त्यमज्ञानमिति चेच्च, अनादेर्भावस्यात्मवन्नित्यत्वेन निवर्त्यत्वानुपपत्तेः ।

अथ चिरंतनमतानुसारिणानादेरेव भावस्य परमाणुगतश्यामत्वादेरिव निवर्त्यत्वमुच्येत तर्हि तस्मिन्नेवेश्वरज्ञाननिवर्त्येऽतिव्याप्तिः, त्वदुक्तलक्षणस्यापि तस्याज्ञानत्वाभावात् ।

अथानाद्यनिर्वचनीयमज्ञानम्, तदपि न, निर्वचनागोचरताया भावाभावविलक्षणतायाश्चासंभवित्वात् ।

भ्रमोपादानमज्ञानमित्यपि न, आत्मन्यतिव्याप्तेः, सत्योपादानत्वे भ्रमस्य सत्यत्वप्रसङ्गान्नात्मोपादानमिति चेच्च, भ्रमस्यापि स्वरूपसत्यत्वात्, विषयापहाराद्धि तत्र मिथ्येति व्यवहारो न स्वरूपापहारात्, तथात्वे चैतावन्तं कालमिदं रजतमित्यभादित्यनुभवविरोधः ।

अस्तु वा यत् किंचिदविचारितरमणीयं लक्षणम्, तथापि तत्र किं प्रमाणम्, अज्ञोऽहमित्यनुभव इति चेच्च, तस्य ज्ञानाभावविषयत्वेनाप्युपपत्तेः, अनादित्वभावत्वयोस्त्वदभिमतयोरस्यानुभवस्यौदासीन्याच्च ।

नापि सुषुप्तोत्थितस्य न किंचिदवेदिषं गाढमूढोऽहमासमिति परामर्शानुपपत्तिसिद्धः सुषुप्तिकालीनोऽनुभवः प्रमाणम्, त्वन्मते ज्ञानाभावस्यापि साक्षिसिद्धस्य परामर्शोपपत्तेः, अस्मन्मते चेदानीमेव ज्ञानाभावस्यानुमीयमानतया परामर्शासंप्रतिपत्तेः ।

ननु कथं ज्ञानाभावस्य निर्विकल्पकचैतन्यगोचरतया सिद्धिः, तत्सिद्धेर्धर्मिप्रतियोगिज्ञानपराधीनत्वात्, सुषुप्तौ च तदसंभवादिति चेच्च, ज्ञानाभावस्यापि स्वरूपेण भेदादिवन्निर्विकल्पकसिद्धस्य सविकल्पदशायां धर्मिप्रतियोगिज्ञानपराधीनतया स्फुटतरव्यवहारविषयत्वोपपत्तेः ।

न चासिद्धे तत्कालीनधर्मिण्यात्मनि ज्ञानाभावस्येदानीमेवानुमीयमानत्वासिद्धिः प्रतिपक्षे प्रातश्चत्वरादौ धर्मिणि सायं समये तत्र गजाभावानुमानमुपलभ्यत इति वाच्यम्, संप्रतिपन्नोदयास्तमयवद्विवादपदयोरप्युदयास्तमययोरन्तरालकालमनुमाय कालाख्येन लिङ्गेनानुमिते धर्मिण्यात्मनि ज्ञानाभावानुमानोपपत्तेः, भवत्वेवं धर्मिसिद्धिस्तथापि न ज्ञानाभावानुमाने लिङ्गमस्ति, अस्मर्यमाणत्वस्य नियमेनास्मर्यमाणत्वस्य वा पथि गच्छतस्तृणस्पर्शादौ निर्विकल्पकानुभूते वानैकान्तिकत्वादिति चेन्न, ज्ञानसामग्रीवैकल्यलक्षणलिङ्गाज्ज्ञानाभावानुमानोपपत्तेः, तदेव कुतः सिद्धमिति न वाच्यम्, तत्सिद्धेरुभयवादिसिद्धत्वात्, अन्यथा वेदान्तिनामपि सुषुप्तिकाले घटपटादिविशेषज्ञानाभावानुमानं न स्यात्, ज्ञानाभावस्य निर्विकल्पकसाक्षिवेद्यतानङ्गीकारात् ।

न चावस्थाभेदसंभिन्नभावरूपाज्ञानपरामर्शसामर्थ्यसिद्धात् तदनुभवादेव तद्विरोधिनो ज्ञानस्याभावानुमानम्, भावरूपाज्ञानस्य तत्परामर्शस्य च परं प्रत्यव्याप्यसिद्धत्वात् ।

यत्तु कैश्चिदनुमानं रचितम्, न तावदज्ञानं ज्ञानाभावः अभावमानागम्यत्वात् संप्रतिपन्नवत्, अभावो ह्यभावस्य प्रत्यक्षस्य वा विषयः परैरिष्यते, अज्ञानं च न मानगम्यं माननिवर्त्यत्वात् संप्रतिपन्नवदिति, तदन्ये नानुमन्यन्ते, अज्ञानस्य मानागम्यत्वे तत्साधनायानुमानप्रयोगायोगात्, एतन्मानगम्यत्वे वा मानगम्यं न भवतीति स्ववचनव्याघातात् ।

न * चात्मनोऽनुमानेनावेद्यत्वसाधन इवाज्ञानस्य न व्याघातादिदोषापत्तिः, तत्र † वृत्तिव्याप्यत्वेऽपि फलाव्याप्यत्वेनाविरोधात्, इह ‡ च वृत्तिव्याप्यत्वानङ्गीकारात् ।

न च प्रमाणनिवर्त्यस्य प्रमाणागम्यत्वनियमः, प्रत्यभिज्ञाप्रमाणनिव-

* अनुमानप्रमायां हि न पक्षांशे किंतु साध्यांशे इति तत्त्वम् ।

† आत्मनि ।

‡ अज्ञाने ।

Digitized by Google

त्यस्य तद्धेतोः संस्कारस्य नित्यपरोक्षतया साक्षिसिद्धत्वाभावेनानुमानगम्यत्वाङ्गीकारात् ।

न च त्वदुक्तमर्थं न जानामीत्यादिव्यवहारोऽत्यन्तसुषुप्ते ज्ञायमाने वा संभाव्यमानोऽतिरिक्तमेव ज्ञानाभावादज्ञानं गमयति, अवगतेंऽशेऽवगतत्वादेव न जानामीति व्यवहारायोगात्, अनवगतेंऽशे चानवगतत्वादेव प्रश्नानुपपत्तेरिति युक्तम् । त्वदुक्तमर्थं प्रमाणतो न जानामीत्येवंपरतयापि व्यवहारोपपत्तेः, प्रतिवादिवाक्यादधिगतार्थस्यानुवादपुरःसरं प्रमाणासंभवेन सर्ववादिभिर्निराकरणाङ्गीकारात् ।

नापि 'नासदासी''न्नो सदासी'दित्युपक्रम्य 'तम आसीत्''मायां तु प्रकृतिं विद्या''दिन्द्रो मायाभि'रित्याद्यागमस्तत्र प्रमाणम्, तमःशब्देन सांसारिकपुरुषाणां प्रलयकालीनाभावस्यैवोच्यमानत्वात्, मायाशब्देन च परमेश्वरज्ञानशक्तेरेव तत्स्वरूपभूतायाः संकीर्तनात् ।

तदेवमनिर्वचनीयाज्ञाने लक्षणप्रमाणयोरसंभवात् तादृगज्ञानमस्तीत्येतदेवाज्ञानमिति सिद्धम् ।

अत्रोच्यते, न तावल्लक्षणासंभवः, तथाहि,

अनादिभावरूपं यद्विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते ॥ १३ ॥

अनादित्वे सति भावरूपं विज्ञाननिरस्यमज्ञानमिति लक्षणमिह विवक्षितम् ।

न तावदिहाव्याप्तिः, सर्वेषामप्यज्ञानानामुक्तरूपत्रयानुगमात् ।

नाप्यतिव्याप्तिः, अनादेर्भावस्यात्मनो निवर्त्यत्वाभावेन ज्ञाननिवर्त्यत्वस्याप्यभावात्, तदन्यस्य च परमाणोस्तद्गतश्यामत्वादेश्च स्वरूपतोऽनङ्गीकृतस्य दूरत एवानादित्वानङ्गीकारात् ।

न चासंभवित्वम्, भावाभावविलक्षणस्याज्ञानस्याभावविलक्षणत्वमात्रेण भावत्वोपचारादात्मवदनादिभावत्वेनानिवर्त्यत्वानुमानानुपपत्तेः ।

न चैवंविधे मानासंभवः, यतः,

देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः ।
अनादेर्ध्वंसिनी मात्वाद्विगीतप्रमा यथा ॥ १४ ॥

विगीतं देवदत्तनिष्ठं प्रमाणज्ञानं देवदत्तनिष्ठप्रमाभावातिरिक्ता- नादेर्निवर्तकं प्रमाणत्वाद् यज्ञदत्तादिगतप्रमाणज्ञानवदित्यनुमानम् ।

ये तु प्रमा प्रमाप्रागभावनिवृत्तिरेव न तु निवर्तिकेति मन्यन्ते तान् प्रति देवदत्तप्रमा तन्निष्ठप्रमाभावातिरिक्तानादिनिवृत्तिरिति प्रयोक्तव्यम् ।

न चैतदसमवेतत्वमेतदन्यसमवेतत्वं वा तत्रोपाधिः, साध्याव्याप्तेः, एतत्समवेतसुखदुःखेच्छाद्वेषप्रयत्नानामेतन्निष्ठप्रमाभावातिरिक्तानादेः स्व- प्रागभावस्य निवर्तकत्वेन साध्ये विद्यमानेऽपि त्वदुक्तोपाधेरभावात् ।

न च विवादपदमनादेर्भावस्य निवर्तकं न भवति पदार्थत्वात् संप्रतिपन्नवदिति प्रत्यनुमानविरोधः, सत्ताद्रव्यत्वाद्यनिवर्तकत्वेन सिद्ध- साधनत्वात् ।

ननु संप्रतिपन्नात्मादिपदार्थातिरिक्तस्य भावस्याभावातिरिक्तस्य चानादेर्न निवर्तकमिति विशेषणादिदमदूषणमिति चेत्, न, तस्य तवाप्र- सिद्धतयाऽप्रसिद्धविशेषणत्वापत्तेः ।

किंच 'न किंचिदवेदिष'मिति परामर्शसिद्धसौषुप्तिकानुभवोऽप्यत्र प्रमाणम् ।

न च ज्ञानाभावविषयोऽयमनुभवः, अभावप्रतीतेर्धर्मिप्रतियोगिबो- धपराधीनतया तदभावे तस्यानुभवितुमयोग्यत्वात् ।

न च भेदसादृश्यादिवत् स्वरूपेणाभावस्यापि निर्विकल्पकधुद्धिबो- ध्यता, तथात्वे सादृश्यादिवदेव भावत्वापत्तेः, निर्विकल्पकबुद्धिबोध्यो भाव इति परैस्तथाङ्गीकारात् ।

नायं सुषुप्तिकालीनानुभवजपरामर्शः किंतूत्थितस्ये * दानीमेव सौ- षुप्तिकज्ञानाभावानुमानमिति च न वाच्यम् । तदनुमापकलिङ्गासिद्धेः ।

* उत्थितस्य इति पा० ।

न च सामग्र्यभावो लिङ्गम्, तस्याप्यसिद्धेः ।

न च ज्ञानाभावेन तस्यानुमानम् अन्योन्याश्रयतापत्तेः, सामग्र्यभावाज्ज्ञानाभावानुमानं तदभावाच्च सामग्र्यभावानुमानमिति ।

न चैवं सति वेदान्तिनामपि ज्ञानाभावानुमानासंभवः, अवस्थाभेदसंभिन्नभावरूपाज्ञानसंवेदनादेव सुषुप्त्यवस्थायां तद्विरुद्धस्य ज्ञानस्य तत्सामग्र्याश्चाभावानुमानात्, त्वयापि गत्यन्तराभावादेवमेव ज्ञानाभावानुमानस्यावश्याभ्युपेयत्वात् ।

न चैवंविधमज्ञानमद्याप्यसिद्धमिति वाच्यम्, तत्प्रमाणस्य दर्शितत्वात्, त्वदुक्तमर्थं न जानामीति व्यवहारान्यथानुपपत्तिरपि भावरूपाज्ञानसद्भावे मानम् ।

न च प्रमाणतो न जानामीत्येवंपरतयापि व्यवहारोपपत्तिः, त्वदुक्तेऽर्थे न प्रमाणज्ञानं ममास्तीत्यस्य विशिष्टविषयज्ञानस्य प्रमाणत्वात्, तद्विशेषणतयार्थस्यापि प्रमाणेनाधिगतत्वात् स्ववचनव्याघातापत्तेः, एतदतिरिक्तप्रमाणज्ञानं त्वदुक्तेऽर्थे मम नास्तीति च वदतो वचनव्याघातदोषानुषङ्ग एव, अस्यापि ज्ञानस्य पूर्ववदेव प्रमाणजन्यत्वात् ।

न च सामान्यतः प्रमाणेनार्थस्याधिगमेऽपि विशेषानधिगमाददोषः, विशेषस्याप्यधिगमानधिगमयोः पूर्वोक्तदोषानतिवृत्तेः ।

ननु भावरूपमप्यज्ञानं ज्ञाननिरस्यमभ्युपगम्यते भवद्भिस्तत् कथं ज्ञायमानेऽर्थे न जानामीति व्यवहारः, मैवम्, अस्मन्मतेऽज्ञानस्य साक्षिसिद्धतया प्रमाणाबोध्यत्वात्, प्रमाणज्ञानोदयात् प्राक्कालेऽज्ञानं तद्विशेषितोऽर्थः साक्षिसिद्धोऽज्ञात इत्यनुवादगोचरो भवति भवति च प्रश्नार्ह इत्यविरोधात्, उक्तं च संप्रदायविद्भिः, "सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एवेति ।

किंच "तम आसी" "न्मायां तु प्रकृतिं विद्या" दित्याद्यागमोऽपि तत्र प्रमाणम् ।

न च तमःशब्देन ज्ञानाभावः कथ्यते, 'नासदासी'दित्यभावं व्यावर्त्य 'तम आसी'दिति प्रतिपादनात् ।

न च परमेश्वरज्ञानशक्तिर्माया, भूयश्चान्ते विश्वमायानिवृत्तिः, 'मायामेतां तरन्ति ते' 'तरत्यविद्यां वितताम् योगी माया'मित्यादिना ज्ञाननिवर्त्ये मायाशब्दप्रयोगदर्शनात् ।

तदेवं लक्षणप्रमाणयोरुपपन्नत्वादनादिभावरूपाज्ञानमस्तीति सिद्धम् ।

किंच भ्रमोपादानमज्ञानमिति लक्षणेऽपि न दोषः । न चात्मन्यतिव्याप्तिः, तस्य केवलस्य कूटस्थस्य कस्याप्यनुपादानत्वात्, सत्योपादानत्वे च विभ्रमस्यापि सत्यत्वप्रसङ्गात् ।

न च विभ्रमोऽपि स्वरूपतः सत्यः, तथात्वे प्रमाणज्ञानवदेव विषयापहारलक्षणबाधस्याप्यसंभवप्रसङ्गात् ।

न चैतावन्तं कालमिदं रजतमित्यभादित्यनुभवविरोधः, अनिर्वचनीयस्यापि विभ्रमस्याभावविलक्षणतया तथात्वेनानुसंधानोपपत्तेः ।

न च स्वरूपसत् एवासीदिति प्रतिसंधानम्, एतावन्तं कालमिहादर्शे मुखमासीत् स्फटिकश्च लोहित आसीदित्याद्यनुसंधानदर्शनात्, प्रयोगश्च विगीतो विभ्रम एतज्ज्ञानकारणबाध्यातिरिक्तोपादानोविभ्रमत्वाद् देवदत्तादिविभ्रमवत्, दर्शित एव च सत्योपादानत्वे सत्यत्वप्रसङ्गो विपक्षे बाधकस्तर्कः ।

तस्माद्यदुपादानो विभ्रमस्तदज्ञानमिति सिद्धम् ।

ननु तथाप्यसंभवि लक्षणम्, सर्वप्रत्ययानां यथार्थत्वेन विभ्रमाणामेवाभावात्, विगीताः प्रत्यया यथार्थाः प्रत्ययत्वात् संप्रतिपन्नवदित्यनुमानात्, अन्यथान्याकारस्य प्रत्ययस्यान्यालम्बनतायामनुभवविरोधात्, संविदां स्वविषयव्यभिचारे चानाश्वासप्रसङ्गात्, असतोऽपि संसर्गादेरभावसमानतायामसत्ख्यातेरपि दत्तावसरतया सौगतमतानुप्रवेशप्रसङ्गात्, असतश्च संसर्गादेः स्फुरणकारणानिरूपणात्, चक्षुरादेश्च संप्रयुक्तमात्रग्राहि-

Digitized by Google

स्यात्, देशान्तरनिवेशिनः स्वरूपासतश्च संप्रयोगायोग्यत्वात्, दोषाणां च स्वारसिककार्यप्रसवशक्तिप्रतिरोधमात्रहेतुत्वात्, मूषिकाघ्रातशालिबीजादौ तथा दृष्टत्वात्, दावदग्धवेत्रबीजात् कदलीकाण्डजन्मनो दग्धस्यावेत्रबीजत्वेन दोषाणां विपरीतकार्यकारणतां प्रत्यनुदाहरणत्वात्, सर्वत्र च प्रतीयमानयोः संसर्गिणोः संसर्गव्यवहारस्यासंसर्गाग्रहनिबन्धनत्वात्, संसर्गज्ञानस्यापि हेतुत्वकल्पनायां गौरवात्, असंसर्गाग्रहप्रसञ्जितसंसर्गव्यवहारमात्रबाधनादेव बाधकस्य बाधकतोपपत्तेः, इदमिति प्रत्ययस्य च दोषदूषितचक्षुर्जन्यतयानाकलितविशेषस्य सामान्यमात्रग्रहणरूपत्वात्, रजतमिति चासंनिहितविशेषविषयस्य संप्रयोगलिङ्गाद्यजन्यतया संस्कारमात्रकारणत्वेन स्मरणत्वात्, तस्य च दोषहेतुकत्वेन तत्तांशागोचरतया स्वविषयाविवेचकत्वात्, तयोश्चान्योन्यसंसर्गसाकाङ्क्षयोः सामान्यविशेषालम्बनयोः स्वरूपतो विषयतश्चागृहीतासंसर्गयोर्निरन्तरोत्पन्नयोः स्वरूपेण यथार्थयोरप्ययथार्थव्यवहारप्रवर्तकयोर्विभ्रमत्वप्रसिद्धिरप्युपपत्तेः ।

तदेवं प्रत्ययानां यथार्थत्वेन स्वरूपतो विभ्रमत्वाभावाद् विभ्रमोपादानमज्ञानमिति लक्षणमलक्षणमेवेति ।

अत्रोच्यते, नैतत् सारम् । यतः ।

स्वीकारे विभ्रमाणां स्यात् स्वीयसिद्धान्तबाधना ।
अनभ्युपगमे तेषामाश्रयासिद्धिरुद्धता ॥ १५ ॥

वि[1]गीतविभ्रमाभ्युपगमे सिद्धान्तविरोधात्, अनभ्युपगमे हेतोराश्रयासिद्धेरनुमानानुदयात् ।

अयथार्थव्यवहारहेतोर्ज्ञानस्य पक्षीकरणाददोष इति चेत्, न, यथार्थस्यापीश्वरज्ञानस्य सर्वव्यवहारहेतोरयथार्थव्यवहारं प्रत्यपि हेतुतया तत्र तार्किकाणां सिद्धसाधनत्वात् ।

इदं रजतमित्यत्रापीदमंशविषयस्य वृत्तिज्ञानस्यायथार्थव्यवहारहेतोरप्यधिष्ठानविषयस्य वेदान्तिभिर्यथार्थत्वाङ्गीकारात् ।

१ श्लोके विमृशोति विगीतेति ।

ज्ञानत्वं यथार्थमात्रवृत्ति ज्ञानमात्रवृत्तित्वात् प्रमात्ववदिति विवक्षितमिति चेत्, मैवम्, मात्रशब्देनायथार्थवृत्तिव्यावृत्तिविवक्षायामयथार्थव्यवहारे ज्ञानत्वस्य वृत्त्यभावेन सिद्धसाधनत्वात् ।

अयथार्थवृत्तित्वात्यन्ताभावाधिकरणत्वं विवक्षितमिति चेत्, न, दुष्टसामग्र्यप्रसूतमात्रवृत्तित्वस्य तत्रोपाधेः सत्त्वात्, यथार्थशब्देन च सदर्थविषयत्वायां नायं सर्प इत्यादिबाधविरोधात्, तुच्छव्यावृत्त्यर्थविवक्षायां चास्मान् प्रति सिद्धसाधनत्वात् ।

किंच, अयथार्थप्रत्ययोऽस्तीत्यस्य प्रत्ययस्य यथार्थत्वे तस्य सालम्बनत्वाय कश्चिदप्ययथार्थप्रत्ययोऽभ्युपेयः, तथा सति तत्रैव हेतोरनैकान्तिकता, अयथार्थत्वे तस्य प्रत्ययस्य काण्ठोक्त एव व्यभिचारः ।

अयथार्थप्रत्ययोऽस्तीत्येतादृशः प्रत्ययो नास्ति किंतु व्यवहारमात्रं पदार्थानामसंसर्गाग्रहनिबन्धनमिति चेत्, मैवम्, सर्वत्र संसर्गव्यवहारस्य व्यवह्रियमाणपदार्थसंसर्गज्ञानपूर्वकत्वनियमात्, अन्यथा मध्यमवृद्धव्यवहारेऽप्यसंसर्गाग्रहादेव तदुपपत्तेर्व्युत्पित्सोः संसर्गज्ञानानुमानाभावाच्छब्दप्रामाण्यभङ्गप्रसङ्गः ।

एवमनुमानाभास इव सदनुमानेऽप्यसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरनुमानोच्छेदः प्रत्यभिज्ञाप्रामाण्योच्छेदश्च, ज्वालैकत्वव्यवहारवत् सर्वत्र प्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेः ।

यत्र दोषशङ्का नास्ति तत्र संसर्गज्ञानानुमानादुपपद्यत एव शब्दप्रामाण्यम्, अन्यथान्यथाख्यातिवादिनोऽपि विपर्ययाशङ्कया व्युत्पत्तिविरहाच्छब्दे प्रामाण्यभङ्गप्रसङ्गो दुर्निवार इति चेत्, मैवम्, तव संसर्गज्ञानानुमाने लिङ्गानिरूपणात् ।

तथाहि किं दोषाभावः संसर्गज्ञानानुमापकः किं वा व्यवहारमात्रम्, उताविसंवादिव्यवहारः ।

नाद्यः, दोषाभावस्य संसर्गज्ञानस्य च व्यभिचारित्वात्, सत्यपि दोषाभावे सामग्रीवैकल्ये संसर्गज्ञानानुदयात्, न च दोषाभावविशिष्टसामग्री-

Digitized by Google

सद्भावेन संसर्गज्ञानानुमानम्, सामग्र्याः कार्यैकसमधिगम्यत्वात्, सति संसर्गज्ञाने सामग्र्यनुमननं तदनुमाने च संसर्गज्ञानानुमानमिति परस्पराश्रयप्रसङ्गात् ।

नापि द्वितीयः, इदं रजतमित्याद्ययथार्थव्यवहारे व्यभिचारात् ।

नापि तृतीयः, विनापि संसर्गग्रहं संसृष्टयोरसंसर्गाग्रहादेव तदुपपत्तेः, त्वन्मते घटत्वतद्वृत्त्योः समवायस्याप्रत्यक्षतया संसर्गाग्रहेऽपि संवादिव्यवहारदर्शनेनानैकान्त्याच्च, व्यवहाराविसंवादस्य च देशान्तरकालान्तराधीनाधिगततया व्यवहाराधिगमसमयेऽनधिगतत्वेनातल्लिङ्गत्वात्, बालस्य मध्यमवृद्धसमवायिसंसर्गज्ञानानुमानानुदये व्युत्पत्तिविरहप्रसङ्गात् ।

न च प्रतीतिविरोधः, रजताकारायाः प्रतीतेः शुक्तिकालम्बनतानभ्युपगमात्, न हि रजतं शुक्तिरिति परैरपि प्रतीतिरूपेयते, इदमाकारस्य तु रजतज्ञानालम्बनतामनभ्युपगच्छतस्तवैव प्रतीतिविरोधः, इदं रजतमिति सामानाधिकरण्येन पुरोवर्तिन्यङ्गुलिनिर्देशपुरःसरमादानादिव्यवहारदर्शनात् ।

न च संविदां विषयव्यभिचारादनाश्वासप्रसङ्गः, विसंवादिव्यवहारजनकत्वपक्ष इवास्मन्मतेऽप्याश्वासोपपत्तेः ।

न चासतः संसर्गादेरवभासाभ्युपगमादसत्ख्यातिप्रसङ्गः, भासमानस्य संसर्गादेः सद्विलक्षणतावदसद्विलक्षणताया अप्यङ्गीकारात् ।

न चायथार्थज्ञानजन्मनि कारणाभावः, दोषदूषितचक्षुरादेस्तत्कारणत्वोपपत्तेः, ज्ञानानामाजानतो यथार्थव्यवहारजनकत्वेऽपि दोषवशादयथार्थव्यवहारहेतुत्ववदेव दुष्टानां करणानां विपरीतज्ञानहेतुताया अपि संभवात्, यथा च दवदाहस्य वेत्रबीजविनाशकत्वं रूपान्तरजनकत्वं च तथा दोषाणामपि यथार्थज्ञानप्रतिबन्धकत्वमयथार्थज्ञानजनकत्वं च किं न स्यात्, सर्वत्र चासंसर्गाग्रहादेव संसर्गव्यवहारमभ्युपगच्छतः शब्दलिङ्गादिप्रामाण्यभङ्गस्य दर्शितत्वादेव कल्पनागौरवस्यादूषणत्वात्, असंसर्गाग्रहमात्रस्य व्यवहाराप्रसञ्जकत्वादेव तत्प्रसञ्जितायथार्थव्यवहारबाधकत्वेन बाधकस्य बाधकत्वोपपादनासंभवात् ।

न च व्यवहारविच्छेदो बाधः, अतदर्थिनां तत्र व्यवहारानुदयेनेदं रजतमित्यादिज्ञानस्याबाधकत्वप्रसङ्गात्, तदर्थिनां च व्यवहारविच्छेदकस्य बाधकत्वे चौरादिज्ञानस्यापि तद्विच्छेदकस्य बाधकतापत्तेः ।

न च तद्योग्यताविच्छेदो बाधः, तद्विच्छेदे समयान्तरे पुनस्तत्र व्यवहाराभावप्रसङ्गात् ।

योग्यताप्रतिबन्धो बाध इत्यपि न, विवेकज्ञानवेलायां हेत्वभावादेव फलासिद्धौ प्रतिबन्धकल्पनानवकाशात् ।

न चाग्रहणनिवृत्तिर्बाधः, सर्वग्रहणानां तथात्वेन बाधरूपत्वप्रसङ्गात् ।

अतो न व्यवहारनिवारणेन बाधकस्य बाधकतोपपत्तिः, रजतगोचरविज्ञानस्य च दोषदूषितलोचनजन्यतया परिशेषासिद्धौ संस्कारमात्रजन्यतया स्मृतित्वकल्पनायोगात् ।

नन्वसंप्रयुक्तत्वेन रजतज्ञानं प्रत्यकारणस्य रजतस्य न तद्गोचरत्वं सर्वत्र साक्षात्कारिज्ञाने तज्जनकस्यैव विषयत्वादिति चेत्, न, प्रत्यभिज्ञायां तत्ताया अपि गोचरत्वात् ।

तत्र संस्कारसचिवमिन्द्रियं तत्तां गोचरयति संस्कारोपस्थापितत्वात् तत्ताया इति चेत्, प्रकृतेऽपि तर्हि संस्कारोपनीतं रजतं दोषकलुषितेन्द्रियेण विषयीक्रियत इति न दोषः, तथापि समारोपे किं प्रमाणमिति चेदुच्यते ।

नयनं नयनोद्भूतसम्यग्ज्ञानातिरेकिणः ।
ज्ञानस्य कारणं तत्त्वाद्यथैव नयनान्तरम् ॥ १६ ॥

एतच्चक्षुरेतच्चक्षुर्जन्ययथार्थज्ञानातिरिक्तज्ञानजनकं चक्षुष्ट्वादिन्द्रियत्वाद्वा चक्षुरन्तरवदिन्द्रियान्तरवच्च ।

न च चक्षुश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकं न भवति· इन्द्रियत्वाद् घ्राणवदिति प्रकरणसमता, मनस्यनैकान्तिकत्वात्, तस्य साधारणकारणस्य चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तरसादिज्ञा-

नजनकत्वात्, चक्षुषश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तरसादिज्ञाना-जनकतया सिद्धसाधनत्वाच्च ।

न च बहिरिन्द्रियत्वादिति विशेषणाच्चानैकान्तिकता, तत्रापि सिद्धसाधनतायास्तादवस्थ्यात् ।

न च यथोक्तयथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकत्वात्यन्ताभा-वाधिकरणतया साध्यस्य विवक्षितत्वा * द्दोषः, घ्राणादिषु चक्षुर्जन्ययथा-र्थज्ञानाजनकत्वस्यैवोपाधेः सत्त्वात् ।

न च व्यतिरेकोपसंहारस्थलाभावः, मनसश्चक्षुर्जन्ययथार्थज्ञानजन-कस्यातिरिक्तज्ञानजनकतया व्यतिरेकोपसंहारभूमित्वात्, विवादपदानि पदानि स्वस्मारितपदार्थान्वयप्रतिपादकानि आकाङ्क्षासंनिधिमत्पदकद-म्बकत्वाद् गामानयेत्यादिपदकदम्बकवत् ।

न च योग्यतावत्त्वमुपाधिः, साध्येन समव्याप्त्यभावात्, आका-ङ्क्षासंनिधिरहितपदेषु योग्यतावत्त्वेऽपि साध्याभावात् ।

न चाकाङ्क्षादिमत्त्वे सति योग्यतावत्त्वमुपाधिः, व्यर्थविशेष्या-पातात्, न ह्याकाङ्क्षासंनिधिमत्त्वे सति योग्यताऽभावेनान्वयज्ञानाजन-कत्वमुभयवादिसंप्रतिपन्नस्थले दृष्टमस्ति, अयोग्यार्थविषयाणामाकाङ्क्षासंनि-धिमत्पदानां सर्वेषां पक्षीकरणात् ।

न च योग्यतावत्त्वस्य विषमव्यापकत्वेनोपाधिता, पदयोग्यार्थं तदन्वितप्रतिपत्तिजनकं न भवतीति व्यतिरेकोपसंहारस्थलस्य पूर्वोक्त-न्यायेन दर्शयितुमशक्यत्वात् ।

न च विवादपदानि पदानि स्वस्मारितार्थान्वयप्रमितिजनकानि आकाङ्क्षासंनिधिमत्पदत्वाद् गामानयेति पदवदित्याभाससमानयोगक्षेम-ता, तत्र बाधकप्रमाणविरोधेन कालात्ययापदिष्टत्वात्, प्रतीतिमात्रसाधने तु बाधाभावात्, उक्तं चैतद्भट्टाचार्यैः, "अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति ही"ति, विपक्षे च प्रतिपन्नाप्रतिपत्तौ तन्निराकरणाय कथारम्भासं-

---

* विशेषितत्वादिति पा० ।

भवो बाधः, तथाहि[1] शब्दोऽनित्य इति शब्दस्यानित्यत्वे वादिना प्रतिपादिते यदि न तत् प्रतिवादी प्रतिपद्येत तदा वादिना परिषदा च विज्ञातस्यापि स्वयमविज्ञातेऽविज्ञातं नाम निग्रहस्थानमापद्येत, प्रतिपत्तैा वा विपर्ययाभ्युपगमप्रसङ्गः, न हि शब्दस्यानित्यत्वज्ञानं तन्नि-त्यत्ववादिनो यथार्थम् ।

किंचैकाधिकरणाविरुद्धधर्मद्वयप्रतिपत्तिलक्षणा विप्रतिपत्तिरेव भवन्मते न भवेत्, तत्र कुतस्तरां कथाप्रवृत्तिः, कुतस्तमां च विप्रतिपत्तिनिरासः ।

अपिच[2] सर्वस्य वाक्यस्य संसर्गप्रतीत्यजनकत्वेऽनृतापार्थकनिरर्थकभेदो न स्यात्, समुदायार्थप्रतीतैा सत्यामपि पदार्थैा बाधितो भवति तद्वाक्यमनृतमुच्यते यथा नद्यास्तीरे पञ्च फलानि सन्तीति विप्रलम्भकवचनम्, यत्रावयवार्थप्रतीतैा सत्यामपि समुदायार्थाप्रतीतिस्तदपार्थकं यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनमित्यादि, अवयवार्थप्रतीतेरपि यत्राभावस्तन्निरर्थकं यथानित्यः शब्दः कचटतपानां गजडदबत्वात् खफछठथवदिति. स चायमनृतापार्थकादिभेदः क्वचिदपि[3] शब्दस्य संसर्गप्रतीत्यजनकत्वे न संभवतीत्यलमतिविस्तरेण ।

यदसत् तन्न प्रकाशते यथा गगनकुसुमम्· असच्च शुक्तिरजततादात्म्यमिति चेत्, मैवम्, गगनकुसुमस्यापि तच्छब्दात् प्रतीयमानत्वेन दृष्टान्तस्य साध्यविकलत्वात्, तादात्म्यस्य च प्रतीतावन्यथाख्यातिस्वीकारात्, अप्रतीतावाश्रयासिद्धेः, असंसर्गाग्रहबलेन च तद्व्यवहारे तत्रासत्त्वस्याप्रतीतैा हेतोरपक्षधर्मत्वात् ।

तस्माद् रजतादिविभ्रमे पुरोवर्तिशुक्तिशकलादि रजताद्यात्मनावभासत इति सिद्धम् ।

भवत्वेवं विभ्रमसद्भावः, विभ्रमालम्बनं तु किमसत् सदेव वा किं वोभयात्मकमुतोभयविलक्षणमिति विवेचनीयम् ।

---

१ एतदेव विकल्पपूर्वकं विवृणोति तथाहीति ।

२ बाधकान्तरमाह·अपिचेति ।

३ एतेषु मध्ये क्वचिदपीत्यर्थः ।

Digitized by Google

न तावदसत्, असतोऽपरोक्षप्रतिभासानर्हत्वात्, तदादित्सया प्रवृत्त्यनुपपत्तेश्च ।

क्वचिदसद्विशेषेऽपि * प्रतिभासप्रवृत्ती किं न स्यातामिति चेत्, न, विशेषाधिकरणत्वे तुच्छत्वानुपपत्तेस्तस्य निःस्वभावत्वात्, सद्विलक्षणयमा-चेणासत्त्वाभिधाने मायावादिमतप्रवेशात् ।

अन्तरेणापि ज्ञेयसामर्थ्यं निःस्वभावेऽप्यसति स्वकारणविशेषसमा-सादितस्वभावविशेषं विज्ञानमेवाविद्ययाऽसत्प्रकाशनशक्तिमदिति चेत्, तर्हि वक्तव्यं किमस्याः शक्तेः शक्यमिति ।

यद्यसदेव किमेतस्याः कार्यमुत ज्ञाप्यम् ।

नाद्यः, असतोऽकार्यत्वात्, प्रकाशनशक्तित्वव्याघाताच्च ।

न द्वितीयः, प्रकाशान्तराभावात्, अनवस्थानाच्च ।

तदेव विज्ञानमसतः प्रकाश इति चेत्, न, विज्ञानाश्रयां शक्तिं प्रति विज्ञानस्यैव शक्तशक्यतया विषयत्वानुपपत्तेः, न ह्येकस्यैकदैव सिद्धतया शक्त्याश्रयत्वमसिद्धतया च तद्विषयत्वं संभवति, युगपदेव सिद्धसाध्यत्वविरोधात् ।

शक्यमेव तर्हि शक्तेर्मा भूदिति चेत्, न, शक्तेः कस्य कुत्रेति शक्तश-क्यनिरूपणाधीननिरूपणत्वात् ।

अस्तु तर्हि स्वकारणविशेषासादितस्वभावभेदं विज्ञानमेवासतः प्रकाश इति चेत्, न, सदसतोः संबन्धानिरूपणात् ।

असदधीननिरूपणत्वं ज्ञानस्य तत्संबन्ध इति चेत्, न, तदधी-ननिरूपणत्वस्यापि संबन्धान्तराधीनत्वात्, असतश्च निरुपाख्यत्वात् संब न्धान्तरानुपपत्तेः, ज्ञानजन्यातिशयानाधारत्वाच्च, घटादिवदसतो ज्ञानवि-षयत्वानुपपत्तेः ।

अयमसदनुभव इत्यसता विना नानुभवो निरूप्यते तेन † तेनावि-नाभावः संबन्ध इति चेत्, मैवम्, अतदुत्पत्तेरतदात्मनश्चानुभवस्य तद-विनाभावासंभवात् ।

* अपिर्वर्जितं पा० ।

† यदसत्तेन इति शब्द इति पा० ।

तस्मात् स्वप्रत्ययासादितस्वभावभेदं विज्ञानमेवासत् प्रकाश इत्यसत्ख्यातिवादिनामयमसत्प्रलाप इत्यारोप्यमाणं नासत्· नापि सत्, नेदं रजतमित्यादिबाधविरोधात् ।

यत्र बाध्यते ततोऽन्यत्रास्तीति चेत्, न, तत्र प्रमाणानिरूपणात्, तथाहि भ्रान्त्यनुभवस्तत्र प्रमाणमुत बाधानुभवः किं वा भ्रमानुपपत्तिः· बाधानुपपत्तिर्वा· असत्ख्यात्यनुपपत्तिर्वा ।

नाद्यः, तस्य पुरोवर्तिरजतसत्तामात्रगोचरतयाऽसंनिहिततत्सत्तायामौदासीन्यात् ।

न द्वितीयः, बाधानुभवस्यापि पुरोवर्तिन्यारोपिताभावविषयस्य देशान्तरतत्सत्तानावेदकत्वात् ।

न तृतीयः, रजतावभासस्य यथाप्रतीतपुरोवर्तिरजतसत्तां विनानुपपत्तावपि देशान्तरे तदीयसत्तामन्तरेणानुपपत्त्यभावात् ।

न चतुर्थः, बाधकस्य प्रसक्तप्रतिषेधात्मनस्तत्रैव तत्सत्ताक्षेपकतयान्यत्र तत्सत्तानाक्षेपकत्वात् ।

न च वाच्यमन्यत्रापि तस्यासत्त्वे तत्रापि कुतो न बाधः स्यादिति, तत्र तस्याप्राप्तेरेव बाधाभावोपपत्तौ तत्सत्ताध्यवसायायोगात् ।

नेदं रजतमिति पुरोवर्तिनि रजततादात्म्यनिषेधात्मा बाधानुभवो रजतमर्थात् क्वापि परिशिनष्टीति चेत्, न, तथा सति वनस्पत्योरिव विविक्तयोर्द्वयोरप्यत्रैवानन्तरं प्रतीतिप्रसक्तेः ।

नापि पञ्चमः, असतः संसर्गस्येव रजतस्याप्यसतः ख्यात्युपपत्तेः, अथाधुनिकस्य कस्यचिन्मतानुसारेणेदं रजतमिति ज्ञानमिदमाकाररजताकारयोर्न संसर्गग्राहकमपितु तयोरेकज्ञानसंसर्गिणोर्भेदाग्रहाद्यथार्थव्यवहारो गृह्यमाणयोर्भेदाग्राहि सविकल्पकमेकविज्ञानं विभ्रम इति भ्रमलक्षणाभ्युपगमात्, तथा च नासतः कस्यचित् ख्यातिरिति कश्चिद् ब्रूयात् तं प्रति ब्रूयात् · मध्यमवृद्धव्यवहारेऽप्येकज्ञानोपारोहिणोः संसर्गिणोरसंसर्गाग्रहादेव व्यवहारोपपत्तौ बालस्य संसर्गज्ञानानुमानानुदयाच्छब्दप्रामाण्यभङ्गप्रसङ्गात्,

एवमनुमानाभास इव तदनुमानेऽप्यसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरनुमानोच्छेदः प्रत्यभिज्ञाप्रामाण्योच्छेदश्च ज्वालैकत्वव्यवहारवत् सर्वत्र प्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरिति गुरुमतनिरसनेनैव गुरुमतपरिमोषणनिपुणमतेर्मतं निरस्तमिति ।

किंच कणभक्षाक्षचरणमतमवलम्ब्यैवमन्यथाख्यातिमन्यथा वर्णयतो द्वितीयसूत्रे मिथ्याज्ञानविवेचनवेलायामिहात्मनि मिथ्याज्ञानमनेकप्रकारं वर्तते· तद्यथाऽनित्ये नित्यमिति सभये निर्भयमित्यादिभाष्यविरोधः, कः पुनर्विपर्ययोऽतस्मिंस्तदिति प्रत्यय इत्युद्द्योतकारवार्तिकविरोधश्च प्रसज्येतेति ।

बध्यतां बध्यतां बालो नानेनार्थोऽस्ति जीवता ।
स्वपक्षहानिकर्तृत्वाद्यः कुलाङ्गारतां गतः ॥

इति न्यायविषयतामयं नातिवर्तते ।

तस्मादसत्ख्यात्यनुपपत्तिरपि नान्यत्र सत्तावेदिका· आरोपितस्य ।

कुत्र चेदमारोपितमन्यत्र भवद्भवेत्, न तावद्देशान्तरादौ, तस्यासंनिहितस्य द्रष्टुमयोग्यत्वात् ।

दुष्टं करणं विप्रकृष्टमपि द्रष्टुं शक्नोतीति चेत्,न, दुष्टकरणस्य पुंसः सर्वदर्शित्वप्रसङ्गात्. अतो दोषोऽप्यसदनिर्वचनीयं वा दर्शयति दृष्टानुसारात् ।

तदेवं न देशान्तरादावारोप्यसद्भावः ।

अस्तु तर्हि बुद्धौ स्वरूपेणासतो गगनारविन्दादिवदप्रतिभासाद्येदं रजतमिति, बाधस्येदंतामात्रगोचरत्वाद् द्वयोर्बाधकल्पनायां कल्पनागौरवाद्येदं रजतमिति च रजते बाधदर्शनात् ।

न चेदंतानिषेधे सत्यनिदंतया बहिरपि व्यवस्थोपपत्तौ कुतः संविदाकारतेति साम्प्रतम्, व्यवहितस्यापरोक्षसंविदैक्यमन्तरेणापरोक्षत्वानुपपत्तेः, संविदाकारो रजतं संप्रयोगमन्तरेणापरोक्षत्वात् संवेदनवदिति प्रयोगोपपत्तेः ।

ननु संप्रयोगो नाम किमिन्द्रियसंयोगादिविशेषः किं वा संबन्धमात्रम् ।

नाद्यः, रूपादिनानैकान्त्यात् । द्वितीये तु विशेषणासिद्धिः, दृष्टान्ते साधनविकलता च, न ह्याध्यासिकसंबन्धं विनास्माकं रूप्यं तद्धीश्चापरोक्षा । धीरूपत्वे च रजतादेर्भ्रान्तिं विनापि दर्शनप्रसङ्ग इति चेत्, मैवम्, इन्द्रियसंनिकर्षानधीनापरोक्षत्वस्य विवक्षितत्वात्, संवेदनस्य चेन्द्रियसंबन्धमन्तरेणैव स्वतः सिद्धतया साक्षिसिद्धत्वेन वा साधनवैकल्याभावात् ।

न च धीरूपत्वे रजतादेर्भ्रान्तिं विनापि दर्शनप्रसङ्गः, धियोऽन्यत्वेऽपि घटादिवद्भ्रान्तिं विनापि दर्शनप्रसङ्गस्य तुल्यत्वात्, ततो धीरूपमेव रूप्यमिति चेत्, तदयुक्तम्, अत्यन्तालीकाया अपि बाह्यतायाः प्रतिभासवदत्यन्तासतोऽपि रजतादेः प्रतिभासोपपत्तेः ।

न च नेदं रजतमितीदंतामात्रमेव बाध्यते कल्पनालाघवादिति न्याय्यम्, इदं रजतमिति प्रतिपन्नविशिष्टरजतस्य नेदं रजतमिति बाधस्यानुभवसिद्धतया कल्पनीयत्वाभावात्, अत एव कल्पनालाघवन्यायानवतारात् ।

न च संविदैक्यमन्तरेणापरोक्षत्वानुपपत्तिः, बाह्यतावत् तदुपपत्तेः ।

किंचारोपितं बुद्धौ चेत्, गुञ्जापुञ्जादौ दहनसमारोपे देहदाहप्रसङ्गः, बुद्धावपि तस्यातात्त्विकत्वादप्रसङ्ग इति चेत्, तर्हि न तद्बहिः सन्नान्तरित्यत्यन्तासदनिर्वचनीयं वा स्यात्, गत्यन्तराभावात्, संप्रयोगमन्तरेणापरोक्षत्वादिति हेतुर्बहिष्ठेऽप्यबुद्ध्याकारे वर्तत इति सव्यभिचारः, तस्माच्चासत्, नापि सत्समारोपितम्, नापि सदसद्रूपं विरोधात्, अविरोधे वा न भ्रान्तिबाधौ, द्वयोरपि परमार्थविषयत्वात्, उभयाकारस्यैकाकारप्रतिभासो भ्रम इति चेत्, तर्हि बाधस्यापि भ्रमत्वप्रसङ्गः, तस्याप्येकाकारविषयत्वात्, सर्वज्ञानानां च सर्वात्मनानवभासकत्वाद्भ्रान्तित्वप्रसङ्गो दुर्वारः स्यात्, तस्माद् गत्यन्तराभावादनिर्वचनीयमारोपितमिति सिद्धम् ।

ननु किमिदमनिर्वचनीयत्वम्, किं निरुक्तिविरहः किं वा निरुक्तिनिमित्तस्य विरहः ।

नाद्यः, इदं रजतमित्यादिनिरुक्तेरङ्गीकारात् ।

न द्वितीयः, विकल्पासहत्वात् ।

तथाहि निरुक्तेर्निमित्तं ज्ञानमर्थो वा ।

नाद्यः, रजतादिज्ञानस्य निरुक्तिनिमित्तस्य मायावादिभिरभ्युपगमात् ।

न द्वितीयः, अर्थस्यापि सतो विरहेऽसत्ख्यातिप्रसङ्गात्, असतोऽपि विरहे सत्त्वप्रसङ्गात्, उभयविरहस्य च परस्परविरुद्धयोर्लोकसिद्धयोरन्यतरनिषेधस्येतरविधिनान्तरीयकत्वनियमदर्शनादेवानुपपत्तेः, भावाभावयोरलौकिकयोः स्वकपोलपरिकल्पितयोर्निषेधसमुच्चयाङ्गीकारे तु लौकिकसदसतोरनिषेधाच्च निरुक्तिनिमित्तार्थासंभवः, अतो न सदसद्विलक्षणमनिर्वचनीयम्, नापि ज्ञानबाध्यम्, बाध्यशब्देन निवर्त्यत्वाङ्गीकारे पूर्वज्ञानस्य संस्कारस्य चोत्तरज्ञाननिवर्त्यत्वादनिर्वाच्यत्वापातः, विश्वस्य चेश्वरज्ञाननिवर्त्यत्वादनिर्वाच्यत्वं स्यादिति लक्षणस्यातिव्याप्तिः ।

अथ बाध्यत्वं नाम बाधकज्ञानविषयत्वम्, तदा शुक्त्यादेर्ब्रह्मणश्चानिर्वाच्यत्वं स्यात्, तयोरधिष्ठानतया बाधकज्ञानविषयत्वात् ।

अथ नाभूदस्ति भविष्यतीति कालत्रयसत्तानिषेधो बाधस्तद्विषयत्वं च बाध्यत्वमिति, मैवम्, मायाविवर्तस्य पुरोवर्तिरजतस्य तथाविधनिषेधविषयत्वानङ्गीकारादल्लक्षणस्याव्याप्तिः, लौकिकपरमार्थरजतस्याच्च तथाविधनिषेधविषयत्वाङ्गीकारादनिर्वाच्यत्वापत्तिरिति लक्षणस्यातिव्याप्तिश्च, एतेन प्रतिपन्नोपाधौ निषेध्यत्वमनिर्वचनीयत्वमित्यपास्तम्, पुरोवर्तिनि प्रतिपन्नस्य रजतस्याधिष्ठानज्ञानेन मायायां विलीयमानायां तत्परिणामतया स्वयमेव विलीयमानस्य नेदं रजतमिति निषेधाविषयत्वात् ।

किंच अत्र प्रमायां ख्यातत्वे सति बाध्यत्वानुपपत्तिः, असतो नरशृङ्गादेरख्यानात्, सतश्च चिदात्मनो बाधाभावात्, उभयस्य चेह दर्शनात्,

इति चेन्न, देशान्तरे सत्त्वात् ख्यातेरिहासत्त्वाद्बाधस्यापि संभवादन्यथाप्युपपत्तेः।

किंचासतो भानमनुपपन्नमित्यसत्, असतोऽपि तच्छब्दाद्भानात्, अन्यथा त्वपार्थकत्वं वाक्यस्य, प्रयुक्तपदानां संभूय कारित्वनियमात्।

किंचेदं सद्विवक्षितम्, किं सत्तायुक्तम्, अथाबाध्यम्, उत ब्रह्मस्वरूपम्।

नाद्यः, सत्तायुक्तस्य प्रपञ्चस्य भवन्मते बाध्यतया यत् सत् तदबाध्यमिति व्याप्तेरसिद्धेः।

न द्वितीयः, यदबाध्यं तदबाध्यमिति साध्याविशिष्टत्वापत्तेः।

न तृतीयः, सिद्धसाधनत्वात्, अर्थान्तरत्वाच्च। किंचात्रान्यथैवोपपत्तिरभ्यूहनीया, सद्विलक्षणत्वे नृशृङ्गवत् ख्यात्यनुपपत्तेः, असद्विलक्षणत्वे चात्मवद्बाधायोगात्, उभयविलक्षणस्योभयानुपपत्तेः।

न च वाच्यं सदसत्त्वे, बाधाभावाभानप्रयोजकेन तु तद्वैलक्षण्ये गौरवादिति, असतोऽपि तत्पदात् प्रतिभानेन सतोऽपि प्रपञ्चस्य बाध्यत्वदर्शनेनोक्तोत्तरत्वात्।

तदेवं नार्थापत्तिरनिर्वचनीये प्रमाणम्।

अस्तु तर्ह्यनुमानम्, विवादपदमनिर्वाच्यं भ्रमविषयत्वात् यन्नैवं तन्नैवं यथात्मा।

न चाप्रसिद्धविशेषणः पक्षः, इच्छादीनामष्टद्रव्यातिरिक्ताश्रितत्वानुमानवत् सामान्यतः प्रसिद्धिविशेषपरिशेषाभ्यां तत्प्रसिद्ध्युपपत्तेः, इति चेत्, न, शुक्त्यादावात्मनि च विपक्षे वर्तमानतया विरुद्धत्वात्, गुणत्वलिङ्गेन क्वचिदाश्रितत्वप्रसाधनवदनिर्वाच्यत्वसाधने लिङ्गाभावात्।

अथैतद्दोषपरिजिहीर्षया विमतं सदसद्विलक्षणम्, दोषप्रयुक्तभानत्वात् भ्रान्तिसिद्धतादात्म्यवदिति प्रयुञ्जीत, तदप्यसत्, दृष्टान्तस्य साध्यविकलत्वात्, न हि शुक्तिरजततादात्म्यस्य सदसद्वैलक्षण्यं परीक्षकैरभ्युपगम्यते येनोभयवादिसिद्धतया तस्य दृष्टान्तता स्यात्।

अथ भावरूपतयाऽपरोक्षत्वेन भानाद्बाधाच्च तस्य सदसद्विलक्षणत्वं युक्त्या साध्येत, तदा रजतस्यापि तथा तत् साधयितुं शक्यमिति व्यर्थोऽयं वञ्चकबन्धविधिप्रयासः ।

किंचेदं दोषप्रयुक्तभानत्वं किं दोषजन्यज्ञानविषयत्वम्· उत दोषजन्यप्राकट्याश्रयत्वम् ।

नाद्यः, ज्ञानस्यैकत्वेन तज्ज्ञानविषयाधिष्ठाने व्यभिचारात् ।

न द्वितीयः, प्रतिवादिनं प्रत्यसिद्धत्वात्, न हि देशकालव्यवहितस्य रजतादेर्दोषजन्यभानाश्रयत्वमुपपद्यतेऽभ्युपेयते वा परैः ।

किंचेदमनिर्वचनीयत्वं न भ्रान्तिज्ञानानुकूलम्· नापि बाधकज्ञानानुसारि,भ्रान्तौ सदिदं रजतमिति सत्त्वेन बाधे च नेदं रजतमित्यसत्त्वेन स्फुरणात् ।

अपिच· अनिर्वचनीये रजते रजतशब्दो न जातिनिबन्धनः, तत्र जातेरभावात्,भावे वा सत्यरजतवदेवाबाध्यत्वप्रसङ्गात् ।

नाप्यौपाधिकः, पाचकादिशब्दवदखण्डशब्दत्वात्, उपाधेरनिरूपणाच्च ।

नाप्यश्वादिशब्दवद्रूढः, स्वभ्रान्तिमात्रसिद्धस्यान्यत्रादृष्टचरत्वेन रजतस्य तेनागृहीतसंबन्धत्वात् ।

किंचानिर्वचनीयं चेद्रजतं न प्रतीयेत, तथाहि, किं दुष्टेन्द्रियेण तत्प्रतीतिरुत संस्कारात्· अथवा साक्षिचैतन्यात् ।

नाद्यः, तस्य प्रतिभासमात्रशरीरतया संप्रयोगायोग्यत्वात् ।

न द्वितीयः, अननुभूते संस्काराभावात् ।

न तृतीयः, इन्द्रियान्वयव्यतिरेकानुविधायिनः केवलसाक्षिवेद्यत्वासंभवात् ।

न चाधिष्ठानविषयतयान्वयव्यतिरेकयोरन्यथा सिद्धिः, तथा सति ज्ञानद्वयस्वीकारेणाख्यातिमतानुमतिप्रसङ्गः ।

न च संसर्गप्रतीतेरभ्युपगमान्नाख्यातिप्रसङ्गः, तथापि विज्ञानद्वया-

भ्युपगमेनाख्यातिप्रसङ्गस्य दुर्वारत्वात्; इदमाकारविषयमिन्द्रियजन्यं ग्रहणं रजततत्संसर्गविषयं च साक्षिचैतन्यमित्यभ्युपगमात् ।

तदित्थं लक्षणप्रमाणयोरनिरूपणाच्चानिर्वचनीयावभासो विभ्रम इति ।

अत्रोच्यते ।

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत् ।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः ॥ १७ ॥

सत्त्वेनासत्त्वेन च विचारासहत्वे सति सदसत्त्वेन च यद्विचारं न सहते तदनिर्वाच्यम् ।

न चैवं सत्यव्याप्तिरतिव्याप्तिर्वा, सर्वभ्रमगोचराणां तथाभावनियमात्, सदादीनां च तत्तद्विचारसहत्वेन परैरभ्युपगमाच्च ।

एवं च सति निरुक्तिविरहः किं वा निरुक्तिनिमित्तस्य विरह इत्यादिविकल्पोऽकाण्डताण्डवितम्. निरुक्तेर्निमित्तभूतायाः प्रतीतेस्तदालम्बनस्य चार्थस्य व्यवहारगोचरत्वेऽपि सदसदादिप्रकारैर्निश्चित्य वक्तुमनर्हत्वाङ्गीकारात् ।

न च परस्परविरुद्धयोः सदसत्त्वयोर्निषेधसमुच्चयोऽनुपपन्नोऽन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वादिति युक्तम्, निषेधसमुच्चयस्य तात्त्विकत्वानङ्गीकारात्. तत्तत्प्रतियोगिदुर्निरूपतामात्रप्रकटनाय तत्तद्विलक्षणत्वाभिलापः, न हि स्वरूपतो दुर्निरूपस्य किंचिदपि रूपं वास्तवं संभवति, तथा सति तस्यापि तात्त्विकत्वप्रसङ्गात् ।

न चैकतरनिषेधोऽन्यतरविधिनान्तरीयकः, अनिर्वचनीयवादिनं प्रति व्याप्त्यसिद्धेः ।

ज्ञानबाध्यत्वं वानिर्वचनीयत्वम् ।

न च पूर्वज्ञानसंस्कारयोरतिव्याप्तिः, तयोर्हि ज्ञाननाश्यत्वेऽपि ज्ञानबाध्यत्वाभावात् ।

बाधो हि नाम प्रतिपन्नोपाधावबोधनम् ।

(शेषमग्रे)

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page 459.*)

अथ यङ्लुक् ॥ यङोऽचि च ॥ यङोऽचि प्रत्यये नित्यं लुक् । चकारेण बहुलग्रहणानुकर्षणादयं विकल्पेनानैमित्तिकोऽपि । प्रत्ययलक्षणेन यङन्तत्वाद्धातुत्वे लडादि । द्विर्वचनम् । आत्मनेपदं तु ङिन्माचात्तद्विधेः प्रत्ययलक्षणत्वाभावाच्च भवति । 'चर्करीतं परस्मैपदि अदादिवच्चे'ति वचनात् 'अदिप्रभृतिभ्यः शपः' । इत्यदादिभ्य उत्तरस्य शपो विधीयमानो लुग्यङ्लुगन्तेऽपि भवति । चर्करीतमिति यङ्लुगन्तस्य पूर्वाचार्यव्यपदेशः । अत्र परस्मैपदीत्यनुवादो न विधिरित्याहुः ॥ 'यङोवे'ति यङ्लुगन्तात्परस्य हलादेः पितः सार्वधातुकस्य वा ईडागमः । बोभवीति । बोभोति । 'भूसुवोस्तिङी'ति गुणनिषेधोऽत्र न भवति दाधर्तिसूत्रे बोभूत्विति गुणाभावार्थाविपातनात् ज्ञापकात् । इदमेव प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमित्यत्र ज्ञापकम् । बोभूतः । बोभुवति ॥ अदभ्यस्तात् ॥ अभ्यस्तादङ्गात्परस्य प्रत्ययादेर्झकारस्यादित्यदादेशे उवङादेशः ॥ उभे अभ्यस्तम् ॥ अस्मिन्प्रकरणे ये द्वे विहिते ते उभे अपि समुदिते अभ्यस्तम् । तथा 'जक्षित्यादयः षडि'ति । जक्ष एतदादयो जागृ दरिद्रा शास् दीधीङ् वेवीङ् चकास्, बोभवां चकार । पूर्ववत् कृञोऽनुप्रयोगस्येति कृञो नित्यं परस्मैपदम् । बोभविता । बोभविष्यति । बोभवीतु । बोभोतु । बोभूतादित्यत्र तातङो ङित्त्वाच्च गुणः । 'सार्वधातुकमपिदि'त्यस्य प्रसज्य प्रतिषेधत्वात्तत्र चङिदित्यनुवृत्तेस्तस्य च श्रूयमाणस्य पितश्चोद्देश्योपादेयत्वव्यत्ययेन पिच्च ङित् ङिच्च पिदित्यर्थद्वयस्य भाष्ये समाश्रयणात्तातङः स्थानिवत्त्वप्राप्तं पित्त्वं ङित्त्वेनानवकाशेन निवार्यतइति ईडभावः । बोभूहि । 'सेर्ह्यपिच्चे'ति पित्त्वनिषेधादीड्गुणौ न भवतः ॥ बोभवानि । बोभवाव । आडुत्तमस्य पित्त्वात् उवङ् बाधित्वा परत्वाद्गुणो भवति । अहलादित्वादीडभावः । अबोभवीत् । अबोभोत् । अबोभूताम् । अबोभवुः । सिजभ्यस्तेति जुसि 'जुसि चे'तीगन्तस्याङ्गस्य गुणः । बोभूयात् । यासुटो ङित्त्वेन पित्त्वस्य निवर्त्त

नादीटोभावः ॥ आशिषि त्वसार्वधातुकत्वेन लिङः सलोपाभावो विशेषः । बोभूयुरित्यत्र जुसभावे 'उस्यपदान्तादि'ति पररूपत्वम् । यासुटो जुसभक्तत्वेन जुसीति गुणोऽत्र न भवति, येन नाप्राप्तिन्यायेन सार्वधातुकमपिदित्यादिष्टङित्त्वाश्रयस्य निषेधस्यैव तेन बाधात् तत्र 'क्सस्याचि'त्यतोऽचीत्यधिकारादजादौ जुसि तद्विधानाद्वा । अबोभोत् । अबोभूवीत् । आबोभूताम् । अबोभूवन् । गातिस्थेति सिचो लुक् । यङो वेतीटो विकल्पः । सिचः प्रत्ययलक्षणेनास्तिसिच इति नित्यस्तु न भवति श्रूयमाणे सिचीत्युक्तत्वात् । ईट्पक्षे भुवो वुगित्यजादिलक्षणो वुङ्नित्यत्वाद्गुणं बाधते । अबोभूवन्नित्यत्र सिचः प्रत्ययलक्षणेन सिजभ्यस्तेति जुसभाव 'आत' इति नियमान्न भवति । अभ्यस्ताश्रयस्तु विदिसाहचर्याल्लङ्विषय इति नेह प्रसज्यते । विदेर्ह्यव्यवहितो झिर्लङ्येव संभवति । न च सिचा साहचर्याल्लुङ्विषयोऽपि स्यादिति वाच्यम् । विप्रतिषेधे परमिति परसाहचर्यस्य बलीयस्त्वात् । अबोभविष्यदित्यादि ॥

अथात्मनेपदम् ॥ व्यतिबोभूते । व्यतिबोभुवाते । अजादावुवङ् । व्यतिबोभवां चक्रे । व्यतिबोभवां बभूव । आम्प्रत्ययवदिति कृञो नित्यं तङ् । व्यतिबोभवितासे । व्यतिबोभविष्यते । व्यतिबोभूताम् । व्यतिबोभुवाताम् । अजादावुवङ् । उत्तमे पित्वाद् गुणः ॥ व्यतिबोभवै । व्यत्यबोभूत । व्यत्यबोभुवाताम् । व्यत्यबोभुवि । पूर्ववदुवङजादौ । व्यतिबोभुवीत । व्यतिबोभुवीयाताम् । व्यतिबोभुवीय । पूर्ववदजादावुवङ् । आशिषि व्यतिबोभविषीष्ट । आर्द्धधातुकत्वादिड्गुणौ । ध्वमि 'विभाषेट' इति मूर्द्धन्यविकल्पो द्रष्टव्यः । व्यत्यबोभविष्ट । ध्वमि पूर्ववन्मूर्द्धन्यविकल्पः । व्यत्यबोभविष्यत । भावकर्मणोः कर्मकर्त्तरि च बोभूयते त्वयेत्यादि सर्वं प्रकृतिवत्रेयमभ्यास एको विशेषः ॥

अथसत् ॥ बोभुवद् ब्राह्मणाः । उगिल्लक्षणो नुम् नाभ्यस्तादिति निषिध्यते । बोभुवती स्त्री । बोभुवती कुले । स्त्रियां नपुंसकद्विवचनयोश्च नित्यत्वादन्तरङ्गत्वाच्च नुमः पूर्वं शपो लुक्यङ्गस्यानवर्णान्तत्वादाच्छीनद्योरिति विकल्पितो नुम् न भवति । नापि शप्श्यनोरिति नित्य-

स्तस्यावर्णात्परशतृविषयत्वात् । न च प्रत्ययलक्षणेनात्परत्वं तस्याप्रत्ययलक्षणत्वात् । बोभुवति कुलानि । बोभुवन्ति कुलानीत्यत्र तु शो नाभ्यस्तादिति निषेधस्य 'वा नपुंसकस्ये'ति विकल्पनात् पक्षे नुम् भवति । व्यतिबोभुवानः । लडादेशस्य तु श्येन व्यवधानादभ्यस्तात्परत्वाभावाद्वाऽभ्यस्तादिति निषेधो न भवति । नापि 'वा नपुंसकस्ये'ति विकल्प इति सर्वं प्रकृतिवत् ॥

अथ णिच् ॥ हेतुमति च ॥ स्वतन्त्रस्य कर्तुः प्रयोजको हेतुः तद्व्यापारः प्रेषणादिर्हेतुमान् स च कर्त्ता मा विरंसीदिति तत्र धातोर्णिच् स्यात् । णकारो वृद्ध्यर्थः । चकारो णिच्णिङोः सामान्यग्रहणाविघातार्थः । सनाद्यन्तत्वाद्धातुत्वे लडादयः । तेषां णिचश्चेति क्रियाफलस्य कर्तृगामित्वे तङ् । अन्यथा तु परस्मैपदम् । भावयते सस्यम् । भावयति सस्यम् । यदा तु फलस्य कर्तृगामित्वमुपपदेन प्रतीयते तदा 'विभाषोपपदेन प्रतीयमान'इति परस्मैपदमपि भवति, स्वस्य सस्यं भावयतीति । यदा चित्तवत्कर्तृकादकर्मकादस्माण्णिच् तदा क्रियाफलस्य कर्तृगामित्वे'ण्यणावकर्मकाच्चित्तवत्कर्तृकादि'ति परस्मैपदम् । पुत्रं भावयतीति ॥ विभाषोपपदादप्ययमेव विप्रतिषेधेन ॥ स्वं पुत्रं भावयतीति । 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णा'वित्यणौ कर्ता णौ कर्म । भावयां चक्रे, चकार, बभूव, आस । 'अयामन्ताल्वाय्येत्न्विष्णुष्वि'ति आमादिषु विधीयमानो णेरयादेशो 'णेरनिटी'त्यनिडादावार्द्धधातुके विधीयमानं णिलोपमपवादत्वाद्बाधते । यदायं ण्यन्तः चित्तवत्कर्तृकत्वेन नित्यं परस्मैपदी तदा तु प्रयुक्तः करोतिरपि पूर्ववत् कृञोनुप्रयोगस्येति भिन्नेन कल्पितेन योगेन परस्मैपद्येव । भावयिता इत्यादि प्रकृतिवत् । आशीर्लिङि 'णेरनिटी'ति णिलोपः स चा'कृत्सार्वधातुकयो'रिति दीर्घं यल्लोपावित्यादिना बाधतइति भाव्यादित्यादि भवति । आत्मनेपदे त्विडादित्वाण्णिलोपो नेति गुणायादेशयोर्भावयिषीष्टेत्यादि । ध्वमि 'विभाषेट' इति मूर्द्धन्यविकल्पः । लुङि 'णिश्रिद्रुस्रुभ्यः कर्तरि चङि'ति सिजपवादश्चङ् । चकारङकारौ विशेषणार्थौ, णिलोपः । 'णौ चङ्युपधाया ह्रस्व' इति

चङ्परे णावङ्गस्योपधाया ह्रस्वः । 'चङी'त्यनभ्यासस्य चङ्परस्य धातोः प्रथमस्यैकाचो ऽजादेस्तु द्वितीयस्येति द्विर्वचने कर्त्तव्ये णौ कृतं स्थानिवदिति रूपस्थानिवत्त्वे भूशब्दो भौशब्दो वा द्विरुच्यते । तत्र भौशब्दस्य द्विर्वचनपक्षेऽपि ह्रस्व इति भौशब्दस्य ह्रस्वो भवत्येव । 'एच इग्घ्रस्वादेश'इति नियमादिग्भवत्वान्तरतम्यादुकारः । तस्य च 'ओः पुयण्ज्यपर'इतीकोऽकारः । उवर्णान्तस्याभ्यासस्यावर्णपरे पवर्गे यणि जकारे च परत इकार इति सूत्रार्थः । तस्य 'दीर्घो लघो'रिति दीर्घः । चङ्परे णौ यदङ्गं तदभ्यासस्य लघोर्लघुनि धात्वक्षरे परे दीर्घो भवति अनग्लोपइति सूत्रार्थः । इदमेवेत्ववचनं ज्ञापकं णौ कृतस्य स्थानिवत्त्वे । अन्यथोवर्णान्ताभ्यासो न कश्चिदपि स्यात् । नन्वत्र 'सन्वल्लघुनि चङ्परे ऽनग्लोप'इति चङ्परे णौ यदङ्गं तदभ्यासस्य लघुनि परेऽनग्लोपे सन्वत्कार्यातिदेशादित्वं सिद्धं सन्वत्कार्यं चेत्त्वमेव । 'सन्यत'इति सनि परेऽभ्यासाकारस्येत्वविधानात्किं णौ कृतस्य स्थानिवत्त्वेन येनोःपुयण्ज्ञीति वक्तव्यं स्यात्सत्य,मत्र सन्वद्भावेनापि सिद्ध्यति जुहावयिषतीत्यादावप्येवं स्यात् । अबीभवत् । नन्वत्र यङ इव चङो ङित्वेन तङ् स्यादिति चेत्, न । विकरणात्पूर्वं नियमप्रवृत्तेः । अत्र च ज्ञापकं 'वृद्भ्यः स्यसनो'रिति स्यसनोस्तङो विकल्पनम् । पूर्वं तु विकरणे तेन व्यवधानाच्चानुदात्तेतोऽनन्तरस्तङस्ति नापि शेषादित्यात्मनेपदपरस्मैपदनियमयोरत्राप्रसङ्गादेवात्मनेपदपरस्मैपदयोर्लस्य तिबादय इति सामान्येन लसिद्धेः किमनेन विकल्पवचनेन ॥

अथ कर्मणि ॥ णयन्तस्य सकर्मकत्वाद्भावासंभवः । तत्र लट्लोट्लङ्विध्यादिलिङ्क्षु यकि विकरणे णिलोपे भाव्यते । भाव्यताम् । अभाव्यत । भाव्येतेत्यादि । अतो ऽन्येषु लुङ्व्यतिरिक्तेषु कर्तृवद्रूपम् । लुङि तु कर्त्तरि चङो विधानात्सिजेव । तशब्दे तु चिणि अभावि । अभावयिषातामित्यादि । तत्र चिणि णिलोपः । अन्यत्र गुणायादेशौ ध्वमि 'विभाषेट' इति मूर्द्धन्यविकल्पः । स्यादिषु चिण्वदिट्पक्षे 'असिद्धवदत्राभादि'ति चिण्वदिटो ऽसिद्धत्वाण्णिलोपे भाविष्यते । अभाविष्यत । अभाविषा-

Digitized by Google

ताम् । भाविषीष्ट । भावितेत्याद्यपि द्रष्टव्यम् । अत्रापि षीध्वंलुङोर्धकारस्य पूर्ववद्वा मूर्द्धन्यः । कर्मकर्त्तरि तु 'यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञा-त्मनेपदाकर्मकाणामुपसंख्यान'मिति यक्चिणोर्निषेधाद्यथायोगं सर्वत्र कर्तृवद्रूपं स्यादिषु तु कर्मवत् । वत्करणाद्भावे तु कर्मवदुदाहार्यं कर्त्तरि तृतीया विशेषः । णिश्रन्थीति यक्चिणोर्निषेधः कर्मकर्त्तरीति लस्य एव ॥

अथः कृतः प्रदर्श्यन्ते ॥ भव्यं भवता । अनुभव्यो घटः । 'अचो यदि'ति यत् । अयं 'कर्त्तरि कृदि'ति कर्त्तरि प्राप्तोऽपि 'कृत्याः' प्राङ् ण्वुल इति तव्यादीनां ण्वुलः प्राचां कृत्यसंज्ञाविधानात् 'तयोरेव कृत्यक्त-खलर्था' इति भावकर्मणोर्नियम्यते । 'भव्यगेयप्रवचनीयोपस्थानीयजन्या-प्लाव्यापात्या वा' इतिनिपातनात् कर्तरि अपि भवति । अत्र वाग्रहणा-त्तयोरेवेति सामान्यस्य बाधां विज्ञापयति । उदाहरणेषु गुणे 'वान्तो यि प्रत्यये' इत्यावादेशः । अत्र वान्त इति पूर्वसूत्रनिर्द्दिष्टाववावावुच्येते, तौ च तत्र यथासंख्यादोदौतोरितीहापि तथैव । अनेन विशेषविहितेन यता सामान्यविहितानां तव्यत्तव्यानीयरां बाधः । 'वाऽसरूपो ऽस्त्रियामि'-त्यस्याधिकारविहितस्यासरूपप्रत्ययस्य पक्षे बाधकत्ववचनात् । तव्यत-व्यतोः स्वरे षष्ठीसमासनिषेधे च विशेषः । भवितव्यं, भवनीयम् । अनीयरो रेफ 'उपोत्तमं रिती'त्युपोत्तमस्योदात्तार्थः । अवश्यभाव्यम् । 'ओरावश्यक'इत्यवश्यंभावे द्योत्यउवर्णान्तलक्षणो ण्यत् । वृद्धौ वान्त इत्यावादेशः । पूर्ववदनेनापि तव्यादीनां न बाधः । यत्तु सरूपत्वाद्बाध्यते 'नानुबन्धकृतमसारूप्यमि'त्युक्तम् । अवश्यमो मकारस्य लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपीति समासे लोपः । समासस्तु 'मयूरव्यंसकादयश्चे'ति तत्पुरुषः । मयूरव्यंसकादिराकृतिगणः । देवभूयं गतः । देवत्वं गत इत्यर्थः ।'भुवो भाव'इत्यनुपसर्गे सुबन्तउपपदे भुवः क्यप् । कित्त्वान्न गुणः । अनुपपदादुपसृष्टाच्चाचो यदेव । 'उपपदमतिङि'ति तत्पुरुषो नित्यं समा-सः । उपपदं सुबन्तं समर्थेन नित्यं समस्यते समासोतिङन्तश्चेति सूत्रार्थः । इदमेवातिङ्ग्रहणमत्र सुपेत्यस्यासंबन्धे ज्ञापकम्, तथा योगविभागेन 'कुगतिप्रादय' इत्यत्रापि संबध्यतइति तत्रापि सुपेत्यस्यासंबन्धं ज्ञापयति ।

Digitized by Google

तेन 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरि'ति पूर्वाचार्यपरिभाषार्थः संगृहीतो भवति । अस्य प्रयोजनमुत्तरत्र दर्शयिष्यते । 'तत्रोपपदं सप्तमीस्थमि'ति तृतीये धात्वधिकारे सप्तम्या निर्दिष्टस्योपपदसंज्ञा । धात्वधिकारादेव तृतीये धात्वधिकारइति सिद्धे तत्रग्रहणं योगविभागेनाधिकृतेन प्रत्ययपदेन संबध्यते । तेनायमर्थस्तत्रोपपदे सत्येव प्रत्यय इति । अभिभावी । अभिभूतवानित्यर्थः । अभिभावीभूत इति, ग्रहादौ णिन्यन्तो निपातितः । परिभवी । परिभावी । अत्रैव निपातनाणिनौ पक्षे वृद्ध्यभावः । अभावी । अचामचित्तकर्तृकाणामिति ग्रहादिपाठाण्णिनिः । अत्र प्रतिषिद्धानामित्यनुवृत्तेरयं प्रत्ययो नञ्पूर्वादेव ॥ नञ् ॥ नञ् समर्थेन सुबन्तेन समस्यतइति तत्पुरुषसमासः । 'न लोपो नञ' इति उत्तरपदे नलोपः । 'सर्वनामस्थाने चासंबुद्धावि'ति नान्ताङ्गत्वादुपधादीर्घः सर्वत्र 'इन्हन्पूषार्यम्णां शौ' । 'सौ चे'ति उपधालक्षणदीर्घमात्रस्य शौ सावेवेति नियमादभिभाविनावित्यादौ न भवति । पदान्ते 'न लोपः प्रातिपदिकान्तस्ये'ति नलोपः । संबुद्धौ तु 'नङिसंबुद्ध्योरि'ति निषेधान्न भवति । परिपूर्वत्वे 'प्रातिपदिकान्तनुम्विभक्तिषु चे'ति समासप्रातिपदिकान्तस्य नकारस्य नुम्विभक्तिस्थस्य पूर्वपदस्थान्निमित्तादुत्तरस्य वा णत्वविधानात् पक्षे परिभाविणाविति णकार उदाहार्यः । संबुद्धौ तु 'पदान्तस्ये'ति निषेधः । ननु च विकल्पमपवादत्वाद्बाधित्वा 'कृत्यचः' इति उपसर्गस्थान्निमित्तात्परस्य कृत्स्थस्याचः परस्य नकारस्य नित्यं विधीयमानं णत्वं स्यात् तच्च सन्माना ऽनीयानीयिष्ठादेशा इति प्रतिपदं परिगण्यते । न चापवादेषु पूर्वत्रासिद्धत्वप्रसङ्गः । नैष दोषः । 'कृत्यचः' इत्यस्य 'न भाभूपूकमिगमिप्यायीवेपामि'ति निषेधात् । स्त्रियामृन्नेभ्यो ङीपि अभिभाविनीत्यादि । नपुंसके स्वमोर्लुकि नलोपः । संबुद्धौ तु 'वा नपुंसकानामि'ति नलोपः । अभिभाविवचित्यादि । शौ तु 'इन्हन्पूषार्यम्णां शावि'ति दीर्घे ऽभिभावीनीति । वा सरूपविधिना सर्वधातुभ्यः ण्वुल्तृचावपि भवतः । अभिभावकः । अभिभवितेत्यादि । तत्र 'युवोरनाकावि'त्यकादेशः । यु वु इत्युत्सृष्टानुबन्धयोः प्रतिज्ञातानुना-

Digitized by Google

सिकयणोः प्रत्यययोर्ग्रहणम् । तृचि तु 'ऋदुशनस्पुरुदंसोनेहसां चे'ति असंबुद्धौ सावृकारान्तानामुशनसादीनां चाङ्गानां विधीयमानो नङ्घ्त्वा-दन्त्यादेशः। 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणामि'त्य-बादीनामङ्गानामुपधायाः संबुद्धिवर्जिते सर्वनामस्थाने दीर्घविधानाद्दीर्घे नलोपः । अत्र चासंबुद्धौ 'नोपधाया' इति नान्तलक्षणो वा दीर्घः । द्वि-वचनादौ सर्वनामस्थाने संबुद्ध्येकवचने च 'ऋतो ङि सर्वनामस्थानयोरि'ति गुणः । स च ॥ उरण् रपरः ॥ ऋवर्णस्य स्थाने उण् प्रसज्यमान एव रपर इति रपरः। तत्र संबुद्धौ 'रात्सस्ये'ति हल्ङ्यादिना वा सुलोपे हे अभिभवितर् । अन्यत्र सर्वनामस्थानेऽप्यपृक्तेति दीर्घे अभिभवितारावित्यादि । अभिभ-वितॄनित्यत्र पूर्वसवर्णदीर्घे तस्माच्छस इति नत्वे 'पदान्तस्ये'ति णत्व-निषेधः । अभिभवित्रा । अभिभवितृभ्यामित्यादि । अजादौ यण् । ङसिङसोस्तु तयोरकारस्य ऋकारस्य च 'ऋत उदि'ति उकार उभयोः स्थाने भवन्नप्यसावृकारस्थानिकोऽपीति पूर्ववद्रपरत्वे सलोपः । अभिभ-वितॄणामिति 'क्षुभ्नादिषु चे'ति णत्वनिषेधे नृनमनतृप्नोतिग्रहणाद् ऋव-र्णगतोऽपि रेफो णत्वनिमित्तमिति रषाभ्यामिति णत्वे नामीति दीर्घः । अभिभवितरि । ऋतो ङीति गुणः । स्त्रियामृन्नेभ्यो ङीबिति ङीप् । अ-भिभवित्रीत्यादि । नपुंसके पूर्ववत्स्वमोर्लुक् । अभिभवितृ । औङः शीभावे 'इकोचि विभक्ता'विति नुम् । अभिभवितृणी । शौ 'नपुंसकस्य झलच' इति नुमि 'सर्वनामस्थाने चासंबुद्धावि'ति दीर्घे अभिभवितॄणि । अयं नुम् वृद्ध्यौत्वगुणेभ्यो नुम् पूर्वविप्रतिषेधेने'ति ऋतो ङीति गुणं बाधते । तृतीयादावादौ 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्ये'ति समानायामा-कृतौ भाषितपुंस्कस्येगन्तस्य नपुंसकस्य पुंवद्भावविधानात् पुंसीव पक्षे नुम-भावादभिभवित्रा । अभिभवितृणा, इत्याद्युभयमपि । आमि 'नुमचिरतृ-ज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेने'ति नुटि नामीति दीर्घः। भवतीति भावः। भवतेश्चति वक्तव्यात्पक्षे णः । तस्याभावेऽज्विधिः सर्वधातुभ्य इत्यपि । भवः । आशितो भवत्यनेनेत्याशितंभव ओदनः । आशितस्य भवन-माशितंभवः। 'आशिते भुवः करणभावयोरि'ति खच्, उपपदसमासः। 'अ-

र्हाद्विषदजन्तस्य मुम् इति खिदन्तउत्तरपदे ऽजन्तस्य पूर्वस्यान्त्यादचः परो मुमागमः । आढ्यम्भविष्णुः । आढ्यंभावुकः । अनाढ्य आढ्यो भवतीत्यर्थे आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्व्यन्तेषूपपदेषु 'कर्तरि भुवः खिष्णुच्खुकञा'विति कर्त्तरि कारके खिष्णुच्खुकञौ । उभयत्र खित्वात् पूर्ववद् मुम् । खुकञो ञित्वाद्वृद्धिः । सुभगादिष्वप्येवमुदाहार्यम् । भविष्णुः । 'भुवश्चे'ति तच्छीलतद्धर्मतत्साधुकारिष्विष्णुच् । अस्य भाषाविषयत्वं चान्द्रा इच्छन्ति । भाष्यादौ छान्दसत्वमेव स्पष्टम् । तच्छीलादौ तच्छब्देन धात्वर्थ उच्यते । तत्र फलनिरपेक्षप्रवृत्तिः तच्छीलः । धात्वर्थः कुलक्रमागतो धर्मो यस्य स तद्धर्मा । धात्वर्थं सकृदपि यः साधु करोति स तत्साधुकारी भूष्णुः । 'ग्लाजिस्थश्च क्स्नु'रित्यत्र चकारादस्मादपि क्स्नुः । गित्त्वाच्च गुणः । अत एव 'श्र्युकः किती'तीटो निषेधः, भावुकः । 'लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञि'ति तच्छीलादावुकञ् । ञित्त्वाद्वृद्धिः । परिभवी । 'जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्चे'ति तच्छीलादाविनिः । इकारो नकारपरित्राणाय । वा सरूपविधिना परिपूर्वादप्युकञ् भवति । परिभावुक इति । विभूर्नाम कश्चित् । प्रतिभूर्धनिकाधमर्णयोर्मध्यस्थः । 'भुवः संज्ञान्तरयो'रित्यनयोर्गम्यमानयोः क्विप् । अन्तरशब्देन धनिकाधमर्णयोर्मध्यस्थ उच्यते । संज्ञान्तरे स्वभावादुपसर्गनियमः क्वित्त्वाच्च गुणः । इकारो वेरिति सामान्यग्रहणार्थः । पकारस्तदविघातार्थः । वकारस्य 'वेरपृक्तस्ये'ति लोपः । विभुवावित्यादावोः सुपी'ति धातोरवयवः संयोगो यस्मादुवर्णात्पूर्वो नास्ति तदन्तस्यानेकाचोऽङ्गस्याजादौ सुपि यणिति प्राप्तस्य यणो 'न भूसुधियो'रिति निषेधादुवङ् । वर्षासु भवतीति वर्षाभूः । वर्षाभ्वौ । वर्षाभ्वः । पूर्ववत् क्विप् । संज्ञायाम् ॥ अस्यां सप्तम्यन्तं समस्यतइति तत्पुरुषः । 'क्विप् चे'ति सोपपदनिरुपपदसाधारणे सर्वधातुविषये क्विप्युपपदसमासो वा । 'वर्षाभ्वश्चे'त्यजादौ यण् । चशब्दो दृन्कारपुनःपूर्वस्य च भुवो यणर्थः । दृन्भूशब्दो दृन्भू इति निपातितः । अत्र तु भूशब्दस्यानर्थकत्वा'न्न भूसुधियोरि'त्यत्र ग्रहणाभावः सिद्ध इति कैयटे । तेनैः

सुपीत्यस्याप्रवृत्ता'विको यणची'त्येव यण् सिद्ध इत्यर्थः । दृन्भू इति मान्तमेके पठन्ति । अनुस्मृतौ कारशब्दस्य स्थाने करशब्दः पठ्यते । दृन्पुनः करवर्षासु भुव इति । कारशब्दस्यैकदेशविकृतस्यानन्यत्वात् सिद्धमिति तद्वृत्तौ । अत्र क्षीरस्वामिसुभूतिचन्द्रप्रभृतयो भेके वर्षाभूशब्दं ह्रस्वान्तं प्रतिपद्यन्ते । अत एव स्त्रियां शिली मण्डूपदी भेकी वर्षाभ्वी कमठी डूलीति भुवश्चेति उकारान्तलक्षणं ङीषं पठन्ति । 'वर्षाभ्वश्चे'ति अत्र वर्षासु भवतीति वर्षा वा भवते प्राप्नोतीति वर्षाभूरोषधिविशेष इत्यर्थविशेषमभिदधानस्य कैयटस्याप्ययमेवाशयो लक्ष्यते । तथा भागुरिरपि ह्रस्वान्तं मन्यते । यथाह च ।

भार्या भेकस्य वर्षाभ्वी शल्की स्यान्मद्गुरस्य तु ।
शिली गण्डूपदस्यापि कच्छपस्य डुलिःस्मृता ॥

इति । यादवप्रकाशस्तु भेके ऽप्यूकारान्तमाह । भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमीति । तथा सुबोधनीकारोऽपि । भुवश्चेत्युवन्तान् ङीष्विधानात् वर्षाभ्वीति पाठो न युक्तः । युक्तस्तु पाठो वर्षाभूः कमठी डुलिरिति । एवमेवोक्तं प्रक्रियारत्नेऽपि । वर्षासु प्रावृषि भवतीति वर्षाभूर्मण्डूकः पुंस्त्री तेनास्त्र्याख्यत्वाच्च ह्रस्वादय इति नदीसंज्ञायामाख्याग्रहणं नियतस्त्रीलिङ्गपरिग्रहार्थमिति तन्मतम् । कैयटेऽप्येवमुक्तम् । आख्याग्रहणसामर्थ्यान्नियम आश्रीयते स्त्रियमेव यावाचक्षाते न तु लिङ्गान्तरयुक्तमपीत्यर्थ इति । उक्तं च तत्र इष्वशनिप्रभृतीनामुभयलिङ्गानां पट्वादीनां च गुणवचनत्वात्सर्वलिङ्गानां स्त्रीविषयत्वाभावात् स्त्रियां वृत्तौ नदीसंज्ञा न प्राप्नोति, एवं तर्हि ङिति ह्रस्वश्चेत्यत्रैवंविधो नियमो नाश्रीयते केवलस्य स्त्रीशब्दस्यानुवर्त्तनादित्यदोष इति । हरदत्तस्तु पदान्तरमनपेक्ष्य स्त्रीवचनानां ग्रहणार्थमाख्याग्रहणं न तु नियतस्त्रीवचनानामित्याह । यद्वा पदान्तरमनपेक्ष्य स्वयमेव यो य्वो स्त्रियमाचक्षाते इत्याश्रीयते । इष्वशनिप्रभृतीनामुभयलिङ्गानां शब्दार्थ एव स्त्रीत्वमिति संज्ञा भवति । एवं पटुशब्दप्रभृतीनां गुणवचनानामपि शब्दार्थ एव स्त्रीत्वम् । तथा च पटुरानीयतामित्युक्ते स्त्रियमप्यानीय कृती भवतीति । पुनश्चैवमाह नियतस्त्रीवचनानां ग्रहणार्थमाख्याग्रहणमिति वदतो मते चाहूपो-

ह्वायतेः क्विपि संप्रसारणे भाष्ये ग्रामणये अत्रापि भाष्यकारोदाहृते न स्यात् तस्मात्पूर्व एव प्रकार आश्रयणीयः, कथं तर्हि प्रत्युदाहरणं ग्रामण्ये स्त्रियै खलप्वे स्त्रियै इति, उच्यते । क्रियाशब्दत्वेप्यनयोः पुंसि मुख्या वृत्तिः पुंसामेव खल्विदमुचितं यत् ग्रामनयनं नाम । एवं खलपवनमपि । आख्यानं तु स्त्रीपुंससाधारणमिति विशेष इति । न्यासे वक्ष्योमाद्यावप्येवमुक्तम् । वृत्तिकारस्याप्ययमेव पक्षोभिमतः । यदाह । आख्यायकयां शब्दार्थे स्त्रीत्वे यथा स्यात्पदान्तरद्योत्ये मा भूदिति । प्रक्रियारत्ने स्वाधीशब्दो नित्यस्त्रीवचन इति नदीसंज्ञासिद्धिरुक्ता । एवं च हरदत्तादिमते वर्षाभूशब्दस्य भेकाभिधानेपि नदीसंज्ञया भाव्यमिति तन्निबन्धनानि ह्रस्वादीनि भवन्ति । कैयटसुभूतिचन्द्रादीनां मते नदीसंज्ञायां न विवादः, ऊकारान्तस्योपाधिविशेषवाचित्वेन नियतस्त्रीविषयत्वात् । एवं च प्रक्रियारत्नेनोक्तो नदीसंज्ञाभाव ‘स्त्यजेदेकं कुलस्यार्थे’ इति न्यायेन त्याज्यः । षष्ठीबहुवचने तु परत्वान्नित्यत्वाच्च नुटि कृते तस्य विभक्तिस्थत्वा ‘देकाजुत्तरपदे णः’ इति णत्वम् । एकाज् उत्तरपदं यस्य तस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य पूर्वपदस्थान्निमित्तादुत्तरस्य णत्वमिति सूत्रार्थः । विभुः । प्रभुः । संभुः । ‘विप्रसंभ्यो ड्वसंज्ञायामि’ति व्यादिभ्यः परस्माद्भुवो डुप्रत्ययः डित्वाट्टिलोपः । शंभुः । ‘मितद्र्वादिभ्य उपसंख्यानमि’ति डुः । सुखरूपो भवतीत्यर्थः । यद्वान्तर्भावितण्यर्थो भवतिः । तेन सर्वेषां सुखं भावयतीत्यर्थः । यद्वा शमेर्णन्ता ‘दन्येभ्योऽपि दृश्यत’ इति विचि शंशमयिता रोगाणां भवतीति शंभुः । श्रूयते च भिषक्तमं त्वा भिषजां शृणोमि त्वादत्ते भी रुद्र शंतमेभिः । शतं हि मा व्यशीय भेषजेभिः । अध्यवोचदधि वक्ता प्रथमो दैव्यो भिषगिति । शंभवत्यस्मादिति व्युत्पत्तिरपादाने डुप्रत्ययाभावाच्चित्या । विभ्वी, प्रभ्वी, संभ्वी । ‘भुवश्चे’ति भवतेरुदन्तस्यानुपसर्जनस्य स्त्रियां ङीष् । उपसर्जनत्वे त्वतिविभुर्ब्राह्मणीति ङीष् न भवति । भविष्यतीति भावी । ‘भुवश्चे’त्यौणादिक इर्निर्णिद्वद्वा । तेन वृद्धिः । अयं च ‘भविष्यति गम्यादय’ इति गम्यादिषु पाठाद् भविष्यत्कालविषयः । भावं ‘श्रिणीभुवोनुपसर्गे’ इति अकर्तरि च कारके भावे घञ् ।

उपसृष्टात्तु 'ऋदोरबि'त्यप् । प्रभव इति । ऋदिति तकारो मुखसुखार्थ इत्येोरित्युकार ऊकारमपि गृह्णाति । प्रभाव इत्यत्र तु प्रकृष्टो भावः प्रभाव इति प्रत्ययार्थ एव प्रशब्देन विशेष्यते न प्रकृत्यर्थ इति क्रियायोगाभावादनुपसर्गत्वाद् घञ्सिद्धिः । विभावानुभावशब्दौ विभावयतीति ण्यन्तादचि व्युत्पाद्यौ । परिभवः, परिभावः । परीभावः । 'परौ भुवोऽवज्ञान'इति पक्षे घञपौ । 'उपसर्गस्य घञ्यमनुष्ये बहुलमि'ति घञन्तउत्तरपदे पूर्वोपसर्गस्य वा दीर्घोऽमनुष्ये विषये । भूतिः । 'स्त्रियां क्तिनि'त्यकर्त्तरि च कारके भावे च सर्वधातुभ्यः क्तिन् । मन्त्रे वृषेत्यादिना भुवः क्तिन् उदात्तवचनमस्य नित्त्वात् 'ञ्नित्यादिर्नित्यमि'त्याद्युदात्तत्वव्युदासार्थम् । न तु भाषायां प्रयोगनिवृत्त्यर्थम् । प्रयुज्यते च भाष्ये सर्वइमे स्वभूत्यर्थं प्रवर्त्तन्त इति । भूः । 'संपदादिभ्यः क्विब्वक्तव्य'इति क्विप् । क्विपः सर्वस्य लोपः । भवत्यस्मिन्ननेनेति वा भवः । 'पुंसि संज्ञायां घः प्रायेणे'ति पुल्लिङ्गयोः करणाधिकरणयोर्घः । प्रायग्रहणं क्व चिदसंज्ञायामपि यथा स्यादिति । अनाढ्येनानायासेनाढ्येन भूयते ईषदाढ्यंभवं भवता, स्वाढ्यंभवं भवता । अनाढ्येनायासेनाढ्येन भूयते दुराढ्यंभवं भवता । 'कर्तृकर्मणोश्च भूकृञोः' । च्व्यर्थविषयकर्तृकर्मणोरीषदादिषु चोपपदेषु भूकृञोः खलिति खल् । तत्र भुवोऽकर्मकत्वात्कर्त्तरि उपपदे भावे प्रत्ययः करोतेश्च कर्मणि । स्वभावात् कृच्छ्रग्रहणं दुरो विशेषणम् । अकृच्छ्रग्रहणं त्वितरयोः । खित्त्वान्मुम् । नन्वत्र धात्वर्थमात्रं विशिषित ईषतो, गत्योरपि सुदुरोश्च कथं व्यवहितप्रयोगः । न च मुमर्थात् खित्करणादिति वाच्यम् । 'खित्यनव्ययस्ये'त्यत्र कृद्ग्रहणपरिभाषाया उपस्थानात्सगतिके खिदन्तउत्तरपदे मुमर्थत्वस्य संभवात् । न चैवं वाच्यं हृदयस्य हृल्लेखेत्यत्राण्ग्रहणादेवाणन्तस्य ग्रहणे सिद्धे पुनर्लेखग्रहादुत्तरपदाधिकारेपीह प्रत्ययग्रहणपरिभाषाया अप्रवृत्तेर्ज्ञापनात्तदभावात्तद्विषया कृद्ग्रहणपरिभाषा कथं वर्त्ततइति । यतो मुम्यव्ययात्परस्य खितोऽसंभवात्तदन्तस्य च संभवादनव्ययस्येति निषेधसामर्थ्यादुत्तरपदाधिकारेपीह प्रत्ययग्रहणपरिभाषया अवश्यमुपस्थातव्यं ततश्च तद्विषया कृद्ग्रहणपरिभाषाऽप्युपस्थास्यते । एवं तर्हि भाष्ये ईषदाढ्यं-

भवमित्यादेरुदाहृतत्वात् प्रयोगानियमः। अवत्सीयादौ प्रधानभूतक्त्वा-प्रत्ययार्थेनान्वीयमानस्य नञ्शब्दान्तेन समासवत् खिदन्तार्थेनान्वीयमानस्यापीषदादेः खिदन्तान्तेनापि सः। कैयटे तु खित्करणादेव कर्तृकर्मणोः पूर्वप्रयोग उक्तः। तस्यायं भावः। अनव्ययस्येति निषेधसामर्थ्यादेव तदन्तत्वलाभः। नन्वस्मादेव प्रतिषेधादिहोत्तरपदाधिकारेऽपि ज्ञापितया प्रत्ययग्रहणपरिभाषया यतस्तद्विषया कृद्ग्रहणपरिभाषा प्रवर्त्ततेति। मुखतोभूत्वा, मुखतोभूय, मुखतोभावम्। 'स्वाङ्गे तस्प्रत्यये कृभ्वोरि'ति तस्प्रत्ययान्ते स्वाङ्ग उपपदे क्त्वाणमुलौ तत्र 'तृतीयाप्रभृतीन्यन्यतरस्यामि'ति 'उपदंशस्तृतीयायामि'त्येतदारभ्योपपदानाममैव तेन चान्येन च तुल्यविधानानाममन्तेन समासविकल्पनान्मुखतोभावमित्येकं पदं द्वे वा पदे। क्त्वान्तेनापि तृतीयाप्रभृतीनामुपपदानां 'क्त्वा चे'ति समासविकल्पनात्तत्पक्षे 'समासेऽनञ्पूर्वे क्त्वो ल्यबि'ति ल्यबादेशः। अत्रानञिति नञ्सदृशमव्ययं परिगृह्यते। 'कृन्मेजन्तः' 'क्त्वातोसुन्कसुन' इति णमुलक्त्वान्तयोरव्ययत्वात्सुपो लुक्। स्थानिवत्त्वेन ल्यबन्तमव्ययम्। विनाभूय, विनाभूत्वा, विनाभावं, नानाभूय, नानाभूत्वा, नानाभावम्। एकधाभूय, एकधाभूत्वा, एकधाभावम्। 'नाधार्थप्रत्यये च्व्यर्थ' इति नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभुवोः क्त्वाणमुलाविति तौ। नाशब्देन 'विनञ्भ्यां नानाञौ नसहे'ति विहितौ नानाञावुच्येते। धाशब्देन 'संख्याया विधार्थे धा' 'अधिकरणविचाले चे'ति विहितो धाप्रत्यय उच्यते। तत्र विधा नाम प्रकारः सामान्यस्य भेदको विशेषः। अधिकरणविचालोऽप्यधिकरणं द्रव्यं तस्य विचालः एकस्यानेककरणमनेकस्यैकीकरणं वा। तदेकधाभूयेत्यादावयमर्थः। अनेकं द्रव्यमेकं भूत्वेति एकस्यानेकीकरणे द्विधाभूयेत्यादौ द्रष्टव्यम्। ये तु धाप्रत्ययस्यादेशा 'एकाद्धो ध्यमुञन्यतरस्यां' 'द्वित्र्योश्च धमुञ्' 'एधाच्चे'तिविहिता ध्यमुञादयस्तेषामपि स्थानिवत्त्वेन धाग्रहणेन ग्रहणात्तदन्ते वोपपदे भुवः क्त्वाणमुलौ भवत इत्यैकध्यंभूयेत्याद्युदाहार्यम्। नाधार्थेत्यत्रार्थग्रहणं तु ध्यमुञन्तात्स्वार्थे ऽदर्शनमिति यदा डप्रत्ययः स्यात् तदर्थं, स हि स्वार्थिकत्वात् धार्थः तथा नाञर्थमपि।

Digitized by Google

न्यथा सानुबन्धकत्वादपि नामाख्यो न गृह्येत । तूष्णींभूय, तूष्णीं भूत्वा तूष्णींभावम् । 'तूष्णीमि भुव' इति क्त्वाणमुलौ । अन्वग्भूय, अन्वग्भूत्वा, अन्वग्भावम् । 'अन्वच्यानुलोम्य' इति क्त्वाणमुलौ । आनुलोम्यमनुकूलता । नाधेत्यादियोगत्रयविषयेपि तृतीयाप्रभृतीनीति समासविकल्पो द्रष्टव्यः । भूतो घटः । भूतं घटेन । अत्र 'निष्ठे'ति भूते विहितस्य क्तस्य गत्यर्थाविपरत्वे 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चे'ति कर्त्तरि चकाराद्भावकर्मणोश्च विधानाद् भुवश्चाकर्मकत्वात्कर्तृभावावर्थौ, अयं च 'नपुंसके भावे क्तः' 'ल्युट् चे'ति क्तल्युटौ न बाधते यतस्तयोर्धात्वर्थस्य सिद्धता विषयः । अस्य तु धात्वर्थमात्रम् इति विषयभेदस्तेन घटस्य भूतं भवनमिति भवतः । क्तयोगे कर्त्तरि षष्ठ्या न लोकाव्ययेति निषेधो न भवति 'नपुंसके भावे क्त उपसंख्यानमि'ति तद्विधानात् शेषविज्ञानाद्वा तत्सिद्धिः । इदमेषां भूतं 'क्तक्तवतू निष्ठा' 'निष्ठे'ति ध्रौव्यादिभ्यो विहितस्य क्तस्य 'क्तोधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य' इत्यत्राधिकरणमर्थः । चकारो यथाप्राप्तस्यानुज्ञानार्थः । तेन ध्रौव्यार्थेभ्यः कर्तृभावाधिकरणेषु गत्यर्थेभ्यः कर्मकर्त्रधिकरणेषु कर्माविवक्षायां भावे च । प्रत्यवसानार्थेभ्यः कर्माधिकरणयोः पूर्ववच्चापि भवति । ध्रौव्यार्था अकर्मकाः । प्रत्यवसानार्था अभ्यवहारार्थाः । 'अधिकरणवाचिनश्चे'त्यधिकरणे क्तयोगे षष्ठी । 'अधिकरणवाचिना चे'त्यस्याः समासनिषेधः । भवत्यनेनाचेति वा भवनम् । 'करणाधिकरणयोश्चे'ति सामान्यविहितो ल्युट् । अस्य कालसामान्यविषयत्वाद् भूतविषयेणाधिकरणक्तेन न बाधः । परिभवनमित्यत्र 'कृत्यच' इति उपसर्गस्थान्निमित्तादुत्तरस्य कृत्स्थस्याच उत्तरस्य नस्य विधीयमानं णत्वं 'न भाभूपूकमिगमिप्यायीवेपामि'ति निषिध्यते । अत्र ण्यन्तानां च भादीनामुपसंख्यानमिति वचनात्परिभावनमित्यत्रापि णत्वं न भवति ।

पर्यायादयः ॥ दृन्भुः । तरुः, सर्पजातिभेद इति पुरुषकारे । 'अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूरि'ति दृढशब्द उपपदे कूप्रत्ययान्तो निपातितः । उपपदस्य च दृंभावोस्मादेव निपातनात् । के चिदुपपदं नान्तं पठन्ति ।

अजादावस्य यणिति वर्षाभूप्रस्तावेऽवोचाम । क्व चिदुणादिवृत्तौ दृभीव-न्यरत्यस्मात्क्वप्रत्यये निपातनमित्युक्तम् । तत्राप्ययमूकारो न धातोरित्यु-वङोऽप्रसङ्गाद्यणेवेति न रूपभेदः । भवनं गृहम् । बहुलमन्यत्रापीति युच् । भुवनम् । 'भूसूधूभ्रस्जिभ्यश्छन्दसी'ति क्युन् भाषायां बहुलवचनात्साधु-रिति वा भुवनमित्यत्र हरदत्तः । भूमिः । 'भुवः किदि'ति मिन्प्रत्ययः । कृष्णभूमः । उदग्भूमः । पाण्डुभूमः 'अच् प्रत्यन्ववपूर्वात्सामलोम्न' इत्यत्राजिति योगविभागादच् समासान्तः । तथा च श्लोकवार्त्तिके । कृष्णोदक्पाण्डुपूर्वाया भूमेरच्प्रत्ययः स्मृत इति । भूरिः । 'अदिश-दिभूशुभिभ्यः क्रि'न्निति क्रिन् । भुवः । अन्तरिक्षलोको महाव्याहृतिश्च । 'भूरञ्जिभ्यां किदि'त्यसुन्कित्त्वान्न गुणः । प्रभुतः । 'प्रादि भुवो डुतजि'ति डुतच् । ये प्रसिद्धयोगा उणादिप्रत्ययान्ताः प्रदर्शिताः अतः परमप्येवं वक्ष्यन्ते ।

सूत्रवार्त्तिकभाष्येषु छान्दसावेव केवलम् ।
क्वान्क्वसू प्रतीयेते तेन नात्र प्रपञ्चितौ ॥

के चिदाहुः क्वसोः कित्त्वाज् ज्ञापकादनुमीयते ।
अस्तिप्रयोगो भाषायामित्येवं प्राज्ञमानिनः ॥

तथा हि छान्दसत्वे ऽस्य छन्दस्युभयथेत्यतः ।
सार्वधातुकसंज्ञत्वान्ङित्त्वे सिद्धेतिदेशतः ॥

अनुनासिकलोपः स्यात् संयोगान्तेषु धातुषु ।
अन्यत्रापि लिटः कित्त्वे संयोगाल्लिड्विदित्यतः ॥

सिद्धे क्वतः ककारो ऽसौ भाषायामर्थवानिति ।
तदसत्तेरुरित्यादौ यथा लिटि गुणः किति ॥

अच्छृत्यतामितीहापि तितीर्वतिगुणो भवेत् ।
स मा भूदिति कित्त्वस्य भाष्ये फलसमर्थनात् ॥

(शेषमये)

प्रथमः परिच्छेदः ।

(Continued from page 501.)

ननु सिद्धान्ते देशान्तरीयरजतमप्यविद्याकार्य्यमध्यस्तञ्चेति कथं शुक्तिरूप्यस्य ततो वैलक्षण्यमितिचेन्न त्वन्मते सत्यत्वाविशेषेऽपि केषाञ्चित् क्षणिकत्वं केषाञ्चित् स्थायित्वमित्यत्र यदेव नियामकं तदेव स्वभावविशेषादिकं ममापि । यद्वा घटाद्यध्यासेऽविद्यैव दोषत्वेनापि हेतुः । शुक्तिरूप्याध्यासे तु काचादयो दोषाः । तथाचागन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम् । अतएव स्वप्नोपलब्धरथादीनामागन्तुकनिद्रादोषजन्यत्वात् प्रातिभासिकत्वम् ।

A doubt is started: according to your (Vedantic) doctrine, the silver which exists in another spot is also a product of Avidyá and is erroneously surmised (in its substrate), how then is the silver erroneously surmised in the nacre different from that (silver)? We reply that although according to your theory, all things possess a real existence, of some the existence is momentary,* of others lasting; so, in this case, whatever restricting rule (you maintain), the same, such as the own nature of a thing, &c. we accept for ourselves. Or, to continue, Avidyá, in the form of a defect, also, is the only cause of the erroneous surmisal of jars and like objects; but cataract, &c., (as) defects (are the additional causes) of the erroneous surmisal of silver in nacre. And so the essential principle of an apparent object consists in its being produced by some incidental defect. Wherefore the apparent existence of chariots and like objects, perceived in dreams, is due to their being produced by the incidental defects of sleep.

* According to the Nyáya, the following special qualities of Átmá exist through the first and cease to be perceived in the second kshaṇa:—knowledge, pleasure, pain, desire, passion and volition. Sound, the special quality of ákása, is also momentary.

ननु स्वप्नस्थले पूर्व्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादितिचेन्न रथादेः स्मृतिमात्राभ्युपगमे रथं पश्यामि स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः अथ रथान् रथयोगान् पथः सृजतइति रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्च । तस्मात् शुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोऽपि प्रातिभासिका यावत्प्रतिभासमवतिष्ठन्ते ।

Again a doubt:—since, in the dreaming state, our dealings with chariots, &c., previously perceived (in the waking state), are due to memory only, you must not postulate the creation of chariots and like objects, for this is cumbrous. We reply, not so: for if we declare that recollection alone is the cause of chariots, &c., there will result a contradiction of the consciousness "I see a chariot," "I saw a chariot in my dream" and similar deliverances. And because it would contradict the Śruti, which declares the creation of chariots, &c., thus:—"Then he creates chariots, horses, paths." * Therefore chariots, &c., perceived in dreams, have an apparent existence, just as the silver surmised in nacre (has an apparent existence), (and) persist as long as the appearance lasts. †

ननु स्वप्ने रथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदा असन्निकृष्टतया अनिर्व्वचनीयप्रातिभासिकदेशोऽभ्युपगन्तव्यः तथाच रथा-

Another doubt:—Since the particular portion of space, which is perceived as the substrate of chariots, &c., is not, at the time of dreaming (tadá), in contact (with sense-organs), this space must be regarded as inconceivable ‡ and possessing an

* Brihadáranyaka IV. 3. 10.

† यावत्प्रतिभासम् i.e. यावत्कालपर्य्यन्तमधिष्ठानज्ञानं न स्यात् ॥

‡ The space in which the chariot is seen in a dream is said to be the work of Máyá, that is, inconceivable either as sat or asat, bháva or abháva, níravayava (without parts) or sávayava. The same applies to the time of the dream. But if the time and space of the dream-world are Máyátmika, dreaming cannot be explained. How can an object be illusorily surmised in a substrate itself illusory or inconceivable?

ऽध्यासः कुत्रेति चेन्न चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात् प्रतीयमानरथादिरस्तीत्येव प्रतीयते इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानं देशविशेषोऽपि चिदध्यस्तः । प्रातिभासिके रथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकं तदा सर्व्वेन्द्रियाणामुपरमात् ।

अहं रथ इत्यादिप्रतीत्यापादनन्तु पूर्व्ववन्निरसनीयम् ।

स्वप्ने रथादयः साक्षान्मायापरिणामा इति केचित् । अन्तःकरणद्वारा तत्परिणामा इत्यन्ये ।

ननु रथादेः शुद्धचैतन्याध्यस्तत्वे इदानीं तत्साक्षात्काराभावेन जागरणेऽपि स्वप्नोपलब्धरथादयोऽनुवर्त्तेरन् । उच्यते । कार्य्यविनाशो हि द्वि-

apparent existence—and where then does the erroneous surmisal of chariots, &c., take place? We reply that the chariot seen (in a dream) is presented as indeed existent (astíyeva), because self-luminous intelligence is the substrate of the chariot or like object. Thus intelligence, which shines forth as a positive entity, is the only substrate. The particular part of space (in which the chariot is dreamt to exist) is also surmised in intelligence. The perception by the sense-organs of the apparent chariot or like object is also apparent (only), for, in dreams (tadá), all sense-organs cease to exist.

The argument in favour of such a deliverance as "I am a chariot" is to be refuted in the manner already shown.

Some hold that the chariots, &c, of the dreaming state are modifications, direct, of Avidyá. Others declare that they are modifications of Avidyá, indirectly, through the antahkaraṇa.

An objection takes the form of a doubt:—Since the chariot or like object is illusorily surmised in pure intelligence, (and) at the present time there is no immediate perception of that (pure intelligence), the chariots &c known in dreams ought to continue (to be known) even in the waking state.* Our reply is

* The objection may be put thus: pure intelligence, according to Vedantic tenet, is the substrate of the illusorily surmised chariot, seen in a dream. The illusory surmisal must continue until there

विधः । कश्चिदुपादानेन सह कश्चित्तु विद्यमानएवोपादाने । आद्यो बाधः द्वितीयस्तु निवृत्तिः आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारस्तेन विनोपादानभूताया अविद्याया अनिवृत्तेः । द्वितीयस्य कारणं विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिर्वा । तदिह ब्रह्मसाक्षात्काराभावात् स्वप्नप्रपञ्चो मा बाधिष्ट मुषलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वजनकीभूतनिद्रादिदोषनाशेन वा रथादिनिवृत्तौ कोविरोधः ।

एवञ्च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठाविद्याकार्य्यत्वपक्षे शुक्तिरितिज्ञानेन तदज्ञानेन सह रज-

that the destruction of an effect is of two kinds: the one (where the effect is destroyed) together with its material cause; the other (when the effect is destroyed) and the material cause only continues to be known (as existing). The former is termed bádha (sublation). The latter nivṛitti (cessation). The cause of the former is the immediate perception of the true nature of the substrate, for without such intuition there is no destruction of Avidyá, which is the material cause. The cause of the latter is the rise of an opposing vṛitti or the cessation of some defect. Grant therefore that the ·dream-world is not sublated because, in the present case, intuition of Brahma has not been attained, (but) what contradiction is there in holding that the cessation of chariots &c. is due (either) to the rise of a second opposing vṛitti or to the destruction of the defects of sleep, which produce the object of dreams (sva), just as jars and like objects are destroyed by the strokes of a pestle?

And thus, if the silver surmised in nacre be viewed as a product of that Avidyá, which has as it substrate, the intelligence particularised by nacre, *sublation* of the silver together with its Avidyá (i.e. its material

is an intuition of the substrate, i. e. pure intelligence. But such intuition is not obtained in the ordinary waking state; therefore we ought to be immediately conscious, even when awake, of the chariot seen in a dream.

तस्य बाधः । मूलाविद्याकार्यत्वपक्षे तु मूलाविद्यायाः ब्रह्मसाक्षात्कार निवर्त्यतया शुक्तितत्त्वज्ञानानिवर्त्यतया रजतस्य तत्र शुक्तिज्ञानाद्विवृत्तिमात्रं मुषलप्रहारेण घटस्येव ।

ननु शुक्तौ रजतस्य प्रतिभाससमये सत्ताभ्युपगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात् किन्तु इदानीं न रजतमिति स्यात् इदानीं

cause) is effected by the knowledge "this is nacre." But if the silver be regarded as a product of Avidyá in its fundamental (collective) aspect, only a *cessation* of silver is produced by the knowledge of nacre, just as the cessation of a jar is effected by a pestle's strokes; for the destruction of Avidyá in its fundamental aspect is effected by intuition of Brahma and not by a knowledge of nacreness.

An objection in the form of a doubt:—if you maintain the existence of silver, when it appears in nacre, the cognition, prohibitive in trinal time, as expressed by "this is not silver," * could not occur; but it would take the form of "this is not now silver," as is the case with the cognition "the jar is not now dark." † To such an objec-

* The objector urges that when a knowledge of the underlying nacre has been gained, the cognition respecting the silver ought not to be expressed by "this is not silver" which would be prohibitive as regards time past, present and future, but by "this is not now silver." For the Vedántin maintains a certain sort of existence (viz., prátibhásikí sattá) for the silver during the illusory surmisal. The text removes this objection by showing that the denial in "this is not silver" was not of silver as silver, (rajatatvávacchinna) with which we are conversant in practical life, nor even of the existence of apparent silver, simply as such. What then is negatived in "this is not silver"?—the existence of apparent silver, which at the time of the erroneous surmisal seemed to possess the attribute of conventional existence. Apparent silver never was the silver, practically true, of every day life, it is not now nor can it be in the future, and therefore "nedam rajatam" is correct in all points.

† The clay of a baked jar loses its dark for a red colour.

Digitized by Google

घटः श्यामो नेतिवदितिचेन्न नहि तत्र रजतत्वावच्छिन्नप्रतियोगिकाभावोनिषेधविषयः किन्तु लौकिकत्वपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिकः। व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिकाभावाभ्युपगमात् ।

ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतं न वा अनवगते प्रतियोगितावच्छेदकावच्छिन्नरजतस-

tion we say no. For the object of the prohibition, in the present case, is not that non-existence which has, as its counterentity, that (entity) which is constitutively determined by "silverness;" but (the non-existence) which has, as its counterentity, apparent silver distinguished by the attributes of conventional and real existence: because we maintain a non-existence that has for its counterentity that which is distinguished by attributes which do not reside in (this same entity), as their common substrate. *

Another doubt:—was real existence perceived in the apparent silver or not? If not perceived, the perception of the non-existence (of silver, as expressed in "this is not silver") cannot be established, because there is no knowledge of the

* लौकिकत्वपारमार्थिकत्व as a dvandva samása would mean 'conventional and absolute existence regarded as attributes," or, (not as a dvandva) "existence, practically true, considered as an attribute." Practical existence, as an attribute, cannot inhere in an apparent object as its substrate; with reference to such a substrate, the attribute लौकिकत्व is said to be a व्यधिकरणधर्म्म. But this vyadhikaraṇa-dharma can serve to define or limit an abhάva by being regarded as an avachedaka of the pratiyogí whose non-existence is affirmed. Thus the non-existence of apparent silver, which seemingly possessed the attribute of conventional existence, may be affirmed, without implying a denial of the prátibhásikí sattá of the silver while the illusory surmisal continued. Or again, the non-existence of a jar as possessing the nature of cloth may be affirmed, although the jar still exists :—घटसत्त्वे पटत्वरूपेण घटाभावोऽस्तीति. But this is not true Vedánta. Existence cannot be really regarded as an attribute. Attributes have no existence apart from their substrate and there is but one substrate, one existence, *tatsat*, the Brahma.

Digitized by Google

स्वज्ञानाभावाद्भावप्रत्यक्षानुपपत्तिः। अवगते अपरोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वात् रजते पारमार्थिकत्वमप्यनिर्व्वचनीयं रजतवदेवोत्पन्नमिति तदवच्छिन्नरजतसत्त्वे तदवच्छिन्नाभावस्तस्मिन् कथं वर्त्ततेति चेन्न पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससम्भवेन रजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात् । यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरङ्गीकारात् ।

existence of silver particularised by the attribute, which serves to define the counterentity (apparent silver). * If real existence was perceived, the real existence in the silver is also found to be inconceivable, just as the silver (itself) is; for the existence of the object at the time of the presentation is a necessary concomitant of an immediate presentation. How therefore could non-existence (of the silver), particularised by the attribute of real existence (tad), occur in the apparent silver, (tasmin) when (as you say), silver particularised by the attribute of real existence is itself found to exist? To this we reply:—not so. For we do not admit the production of the attribute of real existence inhering in the silver, because there can be an appearance, in the silver, of the attribute of real existence which inheres in its substrate. † And because the only case in which we admit the production of an apparent object is when the illusorily surmised object is not in contact (with a sense-organ).

* प्रतियोगितावच्छेदक is पारमार्थिकत्व, the attribute of real existence, regarded as the avacchedaka of apparent silver which is the pratiyogí. With reference to such a pratiyogí, पारमार्थिकत्व is a vyadhikaraṇa-dharma. प्रतियोगितावच्छेदकावच्छिन्न is रजत.

† The text does not admit that the attribute of real existence is produced in the apparent silver, but that real existence, which is an attribute of the chaitanya underlying the nacre, appears in the prátibhásika silver. In other words, that the practical or "relatively real" existence (laukikapáramárthikatva) of the nacre is illusorily surmised in the apparent silver, and this a case of anyathákhyáti.

अतएव इन्द्रियसन्निकृष्टजपाकुसुमगतलौहित्यस्य स्फटिके भानसम्भवात् नतत्स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः । नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकं लौहित्यं स्वीक्रियेत इति चेन्न इष्टत्वात् ।

एवं प्रत्यक्षभ्रमान्तरेष्वपि प्रत्यक्षसामान्यलक्षणानुगमो यथार्थप्रत्यक्षलक्षणासम्भवश्च दर्शनीयः ।

उक्तप्रत्यक्षं प्रकारान्तरेण द्विविधम् । इन्द्रियजन्यं तदजन्यञ्चेति । तत्र इन्द्रियाजन्यं सुखादिप्रत्यक्षं मनस इन्द्रियत्वनिराकरणात् । इन्द्रियाणि पञ्च घ्राणरसनचक्षुस्त्वक्श्रोत्रात्मकानि । सर्व्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति । तत्र घ्राणरसनत्वगिन्द्रि-

Wherefore the production of redness, in the crystal, is not inconceivable (i. e. due to Máyá), because the redness of the red Japá flower when this is in contact with a sense-organ, can appear in the crystal. Again a doubt: when the red flower is not in contact with a sense-organ, owing to something else being interposed (between it and the sense-organ), we must admit that the redness is an appearance,* because we are conscious of the redness. This appearance we do not deny: we are for it.

Thus, in other cases of erroneous perception the general definition of Pratyaksha must be held to apply and the definition of correct perception to fall short.

Immediate perception, already described, is shown to be twofold in another way:—thus, it is (either) produced through a sense-organ (or) not thus effected. The immediate perception of pleasure, &c. is that which is not produced by a sense-organ because the mind is excluded from the class of sense-organ. And the five sense-organs are the organs of smell, taste, sight, touch and hearing. And all the sense-organs, only when (sva)

* प्रातिभासिकम् is the appearance of an object, inexplicable by anyathákhyáti, and therefore regarded as the work of Máyá. The perception of such an object is termed anirvachaníyakhyáti. Thus the perception of a red crystal, when the red rose is not in its proximity, is inexplicable:—anirvachaníyakhyáti. And so also is the perception of silver in nacre, though the reality which the silver appears to possess can be explained by anythákhyáti.

याणि स्वस्वस्थानस्थितान्येव गन्धरसस्पर्शोपलम्भान् जनयन्ति । चक्षुःश्रोत्रे तु स्वतएव विषयदेशं गत्वा स्वस्वविषयं गृह्णीतः श्रोत्रस्यापि चक्षुरादिवत्परिच्छिन्नतया भेर्य्यादिदेशगमनसम्भवात् अतएवानुभवो भेरीशब्दो मया श्रुतइति । वीचीतरङ्गन्यायेन कर्णशष्कुलीप्रदेशेऽनन्तशब्दोत्पत्तिकल्पनायां गौरवं भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य भ्रमत्वकल्पनायां गौरवञ्च स्यात् ।

तदेवं व्याख्यातं प्रत्यक्षम् ।

इति परिभाषायां प्रत्यक्षपरिच्छेदः ।

(शेषमये)

in contact with their own apposite objects, bring about immediate perception. Of these organs, those of smell, taste and touch, while they are confined to their own quarters (in the body) produce a knowledge of (the qualities), smell, taste and touch. But the organs of sight and hearing, having themselves gone towards the object, apprehend their own apposite objects. For the organ of hearing can go towards a drum or like object because, like the organ of sight, it is confined within a certain limit.* Hence my consciousness is expressed thus:—the noise of the drum was heard by me." It would be cumbrous to postulate the production of an endless number of sounds, after the manner of wave following upon wave,† in the region of the outer portion of the ear—and it would be cumbrous to assume an error in the perception expressed by "the noise of the drum was heard by me." Thus then Pratyaksha has been expounded.

A. V.

* If there were no limiting condition (upádhi) for the ákáśa, which constitutes the organ of hearing, there could be no motion of the organ towards its object, for how could the infinite, all pervading ákáśa be said to move?

† Cf. Bháshápariccheda, śloka 166.

Digitized by Google

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

१ इष्टिप्रकरणम् ।

(*Continued from page 512.*)

६८ अध्वर्युर्यजमानो वाऽन्वाधानं करोति तत्र गार्हपत्यस्य पश्चात्पद्मासनेनोपविश्य त्रिभिः स्वाहाकारान्तैर्ऋङ्मन्त्रैः तिस्रः स्थूलाः समिधो ऽभ्यादधाति ततो दक्षिणाग्नावूर्ध्वजानुरुपविश्य तथैवाभ्याधाय गार्हपत्यस्य पश्चान्मार्गेणागत्य आहवनीयाद् वायव्यदेशे प्रह्वो ऽवस्थाय तथैव तिस्रः समिधो ऽभ्यादधाति ततस्तत्रैव तिष्ठन् दशमेन ऋङ्मन्त्रेणोपस्थानं करोति तदेतत्सकलं कर्म अनुकूलं करिष्यमाणस्य कर्मणः समिधामाधानं इति व्युत्पत्त्या अन्वाधानमित्युच्यते ॥

६९ अनुकूलत्वं करिष्यमाणस्य कर्मणः अन्वाधाने कथमितिचेदित्थं यागात्पूर्वं अग्निषु प्रकृतोपयोग्यर्थकैर्मन्त्रैः समित्प्रक्षेपणेनाग्नयः करिष्यमाणयागे सावधाना आमन्त्रिता इव भवन्ति श्वः सद्यो वा अयमस्मासु होष्यतीति अत एव प्रक्षिप्तानां समिधां रक्षणमात्रमायतनेषु क्रियते यागकाल एव तु तासां प्रज्वलनम् अन्वाधानानन्तरमग्नीनां त्रिवारं परिसमूहनपर्युक्षणे विधीयेते तत्र जलसहितेन पाणिना अग्न्यायतनोपरिष्टाद्भागे ऐशानदिश आरभ्य पुनस्तद्दिक्पर्यन्तं प्रदक्षिणं संमार्जनं परिसमूहनमित्युच्यते ॥

७० तथैव दूरतो स्पर्शनेन प्रदक्षिणं जलपरिषेकमात्रं पर्युक्षणपदवाच्यम् ॥

७१ पर्युक्षणानन्तरं अग्न्यायतनानां अक्षतरङ्गवल्यादिभिर्यत्सुशोभि-

तत्करणं सकृद्धोमयसंमार्जनपूर्वकं अध्वर्युयजमानपत्नीकर्तृकं तत् अग्न्यलङ्करणमित्युच्यते ॥

०२ अग्न्यलङ्करणानन्तरं यजमानस्तीर्थेन निर्गत्य अग्रेणाहवनीयं परीत्य पूर्वोक्ते स्वायतने उपविश्य पाणौ सायं प्रादेशमात्रमुदग्रं दर्भद्वयं धृत्वा तेनैव दक्षिणेन पाणिना पयस्वतीमन्त्रेण त्रिरप आचामति तत आहवनीयं तूष्णीं पर्युक्षणवत्सकृत्पर्युक्ष्य चतुर्भिर्मन्त्रैश्चतस्रः समिध आहवनीय आधाय पूर्ववत्परिषिञ्चति तदेतद्यजमानकर्म व्रतग्रहणं व्रतोपायनमिति चोच्यते ॥

०३ आहवनीयायतनस्योत्तरतः प्रागग्रेषु दर्भेषु प्रणीताप्रणयने प्रणीता नाम आप आसाद्यन्ते तासां पश्चिमप्रदेशः उत्करस्य तु पूर्वदेशः विहारप्रवेशनिर्गमयोर्मार्गः तीर्थसंज्ञकः ॥

०४ प्रणीताऽभाववति कर्मणि आहवनीयोत्तरदेशे आसादितस्य इध्मस्य पश्चिमभाग उत्करस्य पूर्वदेशस्तीर्थमित्युच्यते ॥

०५ चात्वालवत्सु कर्मसु चात्वालपश्चिमदेश उत्करपूर्वदेश एव तीर्थपदवाच्यः ॥

०६ व्रतोपायनान्ते प्रव्रजति यजमाने अध्वर्युः प्राचीमुदीचीमैशानीं वा दिशं गत्वा पलाशस्य शम्या वा प्राचीमुदीचीमैशानीं वा शाखां असिदेन छिनत्ति समन्त्रकं ततस्तां शाखां मन्त्रेण विहारदेशं प्रत्याहरति तदेतत्कर्म शाखाहरणमित्युच्यते ॥

०७ यः सोमेनेष्टवान् तस्य यजमानस्य दर्शेष्टौ इन्द्राग्निदेवतास्थाने इन्द्रो महेन्द्रो वा देवतात्वेन विहितः तत्र सत्यपि पुरोडाशद्रव्ये अधिकं द्रव्यद्वयं विहितं तत्रैकं पयः द्वितीयं दधि तदे-

तद् द्रव्यं होमार्थं सम्यग् नयतीति कर्तृव्युत्पत्त्या तादृशो यजमानः सन्नयन्नित्यभिधीयते ॥

७८ दधिपयसी च पात्यसान्नाय्येति सूत्रेण निपातनात् कर्मव्युत्पत्त्या सान्नाय्यपदाभिधेये ॥

७९ सान्नाय्यदधिपयसोः संपादने गवां संख्या अशक्तत्वात् न्यूना क्रियते चेत् षट्त्वसंख्यातो न्यूना न कार्या षड्भ्यो गोभ्यो न्यूनसंख्याका गावो न कर्तव्याः ततोऽधिकास्त्वेदिष्टापत्तिरेव । पूर्वमाहृतया शाखया एतासां गवां वत्सानां दूरीकरणं समन्त्रकं वत्सापाकरणमित्युच्यते ॥

८० ततस्तस्याः शाखायाः पर्णानि छित्त्वा यं मूलभागं प्रादेशमात्रं छित्त्वा घृष्ट्याकारं करोति सान्नाय्यसंस्कारकाले गार्हपत्याङ्गाराणामुदग्दिशि निहूहणादौ उपयोगी स उपवेष इति गीयते ॥

८१ अग्रभागस्तु त्रिभिर्दर्भैर्वेण्याकारेण निबद्धः शाखापवित्रपदवाच्यस्तस्य सायंदोहादावुपयोगः ॥

८२ असन्नयतस्तु यजमानस्य शाखाहरणाभावात् व्रतोपायनानन्तरं अध्वर्युः गार्हपत्यस्योत्तरतो विद्यमानमसिदं स्वधितिं वादत्ते मन्त्रेण । लोहमयक्षुरः छेदनोपयोगी असिद इत्युच्यते ॥

८३ एवं बर्हिश्छेदनाद्युपयोगी स्वधितिः कुठारः स्वधितिरित्युच्यते ॥

८४ तयोरन्यतरद् गृहीत्वा मन्त्रेणाहवनीयदेशं गत्वा मन्त्रेण वेदिमवेक्ष्य दर्भदेशं गत्वा प्रस्तरपर्याप्तं दर्भमुष्टिं परिगृह्णाति असिदादिना छेदनीयदर्भमुष्टेः आसमन्तात् भेदाय भ्रामणं परिलवनपदवाच्यम् ॥

८५ छिन्ने दर्भमुष्टौ भूमौ यो मूलभागो दृश्यते स छेदनक्रियाया आधारत्वात् अधिकरणे ल्युटा छेदनपदवाच्यः ॥

८६ छेदने भेदने चैव खनने पितृरक्षसोः रौद्राभिचारणीयेषु उदकस्याभिमन्त्रणमिति वचनात् छेदनभेदनखननपैतृकराक्षसरौद्राभिचारणकर्मसु कृतेषु शुद्ध्यर्थं विहितं दक्षिणकरस्य जलेन प्रक्षालनं उदकोपस्पर्शनमुच्यते ॥

८७ तत्र प्रकृतौ या चतस्रो दर्भमुष्टयश्छिद्यन्ते प्रथमा दर्भमुष्टिर्मन्त्रैः संस्कृता वेद्यां जुहूर्यस्यान्निधीयते विधृतिसंज्ञकयोः उदगग्रयोर्दर्भयोरुपरि या च प्रागग्रा स्थापिता भवति सा प्रस्तर इत्युच्यते ॥

८८ अन्यास्तिस्र अमन्त्रकसकलक्रियामात्रसाध्याः वेद्यास्तरणार्थाः हविषां पात्राणां स्थापनयोग्या बर्हिःपदवाच्याः ॥

८९ दर्भत्रयं गृहीत्वा प्रदक्षिणमावेष्ट्य अग्रभागे अन्यद्दर्भत्रयं मूलेन संयोज्य वेष्टनेन ग्रथितमिव कृत्वा तदपि तथैवावेष्ट्य तदग्रभागे अन्यद्दर्भत्रयं तथैव कृत्वा पुनस्तदग्रभागे तथा करोति एवं कृते ग्रन्थित्रयं मध्ये संपद्यते तद्दर्भसूत्रं द्विगुणं कृत्वा अन्ते ग्रन्थिः कार्यः अनेन बर्हिर्बध्यते अत एतद् बर्हिःसंनहनं नाम शुल्बनामकम् ॥

९० एवमिध्मबन्धनार्थे इध्मसंनहनं नाम शुल्बनामकम् ॥

९१ बर्हिः संभरणानन्तरं अध्वर्युरिध्मदेशं गत्वा असिदेन स्वपरशुना वा इध्मं छिनत्ति तूष्णीं तस्मिन्नेकविंशतिसंख्याकानि काष्ठानि भवन्ति तत्र त्रितयं काष्ठानामाहवनीयस्य पश्चाद् दक्षिणत उत्तरतश्च प्रथममेखलाया उपरि स्थापनार्थे मेखलापरिमितायामं

Digitized by Google

परित आहवनीयस्य निधानात् पुरस्तात्सूर्यस्य मनसा परिधित्वकल्पनात्परिधिसंज्ञकं भवति ॥

६२ अन्यानि काष्ठानि प्रादेशमात्राणि तत्र पञ्चदशसामिधेन्यर्थानि एकमनुयाजार्थं द्वे आहवनीयायतनस्यान्तरूर्ध्वाग्रे दक्षिणोत्तरयोर्भागयो रोपणार्थे एतान्यष्टादश काष्ठानि समित्पदवाच्यानि ॥

६३ क्वचिद्विकृतीष्ट्यादिषु अधिका अपि समिधः सामिधेनीवृद्ध्या गृह्यन्ते एवमेकविंशतिदारुकः संघ इध्मपदवाच्यः ॥

६४ इध्मस्य छेदनकाले यानि काष्ठशकलानि इतस्ततः पतन्ति तानि करणव्युत्पत्त्या इध्मप्रव्रश्चनपदेनाभिधीयन्ते ॥

६५ चतुर्णामप्यृत्विजां भोजने पर्याप्तः दक्षिणाग्नौ सुश्रृत ओदनः अनु पश्चात् यागानन्तरमृत्विग्भोजनार्थमाह्रियते इति कर्मव्युत्पत्त्या अन्वाहार्यपदवाच्यः ॥

६६ अन्वाहार्य ओदनो यस्यां स्थाल्यां श्रप्यते सा अन्वाहार्यस्थालीत्युच्यते ॥

६७ मदन्तीनामिका आपो यस्मिन्पात्रे संताप्यन्ते तत्पात्रमपि मदन्तीपदेन व्यवह्रियते ॥

६८ पुरोडाशचरुसंबन्धिव्रीह्यादीन् उलूखले मुसलेनावहत्य पत्नी शूर्पेण निस्तुषकरणरूपं फलीकरणं करोति तत्र ये तुषादयः पतन्ति ते करणव्युत्पत्त्या फलीकरणपदवाच्याः ॥

६९ तेषां यागानन्तरं दक्षिणाग्नौ जुहूा चतुर्गृहीतेनाज्येन सह होमो विहितः अतः यागसमाप्तिपर्यन्तं तेषां स्थापनाय निर्मितं अश्वत्थमयं पात्रं फलीकरणपात्रमित्युच्यते ॥

१०० यदा गार्हपत्ये अध्वर्युः पत्नीसंयाजैः प्रचरति तदा देवानां पत्नीयागकाले स्वीयहविर्भागग्रहणार्थमागतानां देवानां पत्नीनां स्त्रीत्वाल्लज्जया तिरोधानाय अश्वत्थकाष्ठनिर्मितं तिरोधानकरणयोग्यं कटाकारत्वात् अंतर्धानकटमित्युच्यते ॥

१०१ अध्वर्युस्तीर्थप्रवेशानन्तरं गार्हपत्यस्योत्तरत उपविश्य इडाजपं कृत्वा देवा गातुविद इत्यृचं जपति तस्यामृचि यतो वातशब्दो वर्तते अतो वातशब्देन यागारम्भसमाप्त्योर्वर्णनात् इडा देवहूरिति यजुर्मन्त्रजप इडाजपपदेनोच्यते ॥

१०२ तत आहवनीयस्योत्तरतस्तिष्ठन् हस्तौ मन्त्रेण संमृशते एतत्कर्म पाण्योः सावधानत्वाय करिष्यमाणकर्मसुप्रेरणारूपं पाणिसंमर्शनमित्युच्यते ॥

१०३ तत आहवनीयदक्षिणाग्निगार्हपत्यान् क्रमेण दर्भैः परिस्तृणाति अग्नेः षोडशभिर्दर्भैः प्राच्यादिषु परिस्तृतिरिति वचनात् प्राच्यां प्रथममेखलोपरि चतुर्भिर्दर्भैस्तथैव दक्षिणस्यां प्रतीच्यामुदीच्यां च क्रमेण स्तरणं परिस्तरणपदार्थः ॥

१०४ ततो गार्हपत्यस्य पुरस्ताद् वेद्यां परिभोजनीयदर्भानास्तीर्य तेषु द्वन्द्वं न्यञ्चि प्रक्षालितानि यज्ञपात्राणि प्राक्संस्थान्युदगपवर्गाणि स्थापयति तदेतत्कर्म पात्रासादनपदार्थः ॥

१०५ ततो ब्रह्मणि स्वायतने उपविष्टे यजमानेन च समन्त्रकद्वितीयवरणेन वृते परिभोजनीयदर्भैः संततां पृष्ठ्यां गार्हपत्यमध्यादारभ्याहवनीयमध्यपर्यन्तं स्तृणाति मन्त्रेण एतत् कर्म पृष्ठ्यास्तरणमित्युच्यते ॥

१०६ ततो मन्त्रेण पूर्वं निहृत्तं पवित्रमादाय समन्त्रकं सव्यहस्ते पवित्रं धृत्वा दक्षिणहस्तेन जलेनानुमार्ष्टि एतत्कर्म पवित्रकरणं नाम ॥

१०७ अभिमर्शनं नाम यदभिमृशेदिति विधीयते मन्त्रजपसमकालं तत्पदार्थस्पर्शनम् ॥

१०८ चित्तिरित्यादीनि दश वाक्यानि दशहोतृपदवाच्यानि ॥

१०९ अध्वर्युः पवित्रवत्यामग्निहोत्रहवण्यां मुष्टिमात्रं निधाय तया शूर्पे तन्मुष्टिमात्रं व्रीह्यादिकं प्रक्षिपति एतत्कर्म निर्वापपदवाच्यम् ॥

११० ततः सशूकायामेवाग्निहोत्रहवण्यां तिरःपवित्रमप आनीय विहृत्य उन्महयन्नुपस्थायतेन जलेन सपवित्रेणोत्तानेन दक्षिणपाणिना सेचनं पुरोडाशीयादीनां यत् तत् प्रोक्षणमित्युच्यते ॥

१११ स्फ्यः कपालानि अग्निहोत्रहवणी शूर्पं कृष्णाजिनं शम्या उलूखलं मुसलं दृषत् उपला जुहूः उपभृत् स्रुवः ध्रुवा प्राशित्रहरणं इडापात्रं मेक्षणं पिष्टोद्वपनी प्रणीताप्रणयनं आज्यस्थाली वेदः दारुपात्री योक्त्रं वेदपरिवासनानि धृष्टिः इध्मप्रव्रश्चनानि अन्वाहार्यस्थाली मदन्ती फलीकरणपात्रं अन्तर्धानकटं च एते पदार्था अन्ये च ये विकृतिषु उपयुक्तास्ते सर्वे यज्ञायुधपदेन यज्ञपात्रपदेन च श्रुतौ गीयन्ते ॥

११२ उत्पवनं नाम द्रवद्रव्यस्याज्यादेः कस्मिंश्चित्पात्रे स्थितस्य दक्षिणोत्तराभ्यां हस्ताभ्यां परस्परं असंसृष्टे पवित्रे धृत्वा ताभ्यां तस्य द्रव्यस्य ऊर्ध्वभागे प्लवनं उत्पवनमित्युच्यते ॥

११३ उन्महनं नाम स्तुतियुक्तमन्त्रोच्चारणेन पूजनरूपम् ॥

Digitized by Google

११४ समाहननं नाम आग्नीध्रकर्तृकं शम्याकरणकं यज्ञपात्राणां वादनम् ॥

११५ परापवनं नाम अध्वर्युकर्तृकं व्रीह्यादीनामुलूखले अवहतानां शूर्पेण फलानामन्तरेऽवस्थितिर्यथा स्यात्तथा तुषादेर्निरसनम् ॥

११६ व्रीह्यादेरवघातानन्तरं यजमानो यं मन्त्रं किंशब्दवन्तं जपति स मन्त्रो यज्ञयोगमन्त्र इत्युच्यते ॥

११७ पुरोडाशीयानां पेषणार्थे दृषदि स्थापनमधिवपनमित्युच्यते ॥

११८ दृषदि अध्युप्तानां पुरोडाशीयतन्दुलादीनामुपर्युभाभ्यां हस्ताभ्यामुपलायाः तिर्यक्स्थापितायाः पूर्वस्यां दिशि कर्षणं ततः प्रतीच्यां कर्षणं च प्रोहणमित्युच्यते ॥

११९ दृषदः सकाशात् उपलया पिष्टानां दृषदधःस्थापितकृष्णाजिने पातनं यस्यकस्यापि द्रव्यस्य पात्रात् हस्ताद्वाऽधः पतनं च प्रस्कन्दनमित्युच्यते ॥

१२० अध्वर्युः पेषणानन्तरं गार्हपत्यस्य पश्चात् धृष्ट्या पुरोडाशभर्जनार्थे गार्हपत्याङ्गारैः संतापयितुं यथाविहितानि प्रतिपुरोडाशं समुदितानि अश्वशफमात्राण्यश्वशफाकारतामापन्नानि कपालानि मन्त्रैर्विहितक्रमेण स्थापयति तदेतत्कपालोपधानमित्युच्यते ॥

१२१ उपधानं नाम उपधानं तूपबर्हः शय्यायां शयनीयवदितिकोशात्कस्यचित्पूजनीयस्य पदार्थस्य स्थापनार्थे उपबर्हस्थानीयाधाररचनम् ॥

१२२ एवमासादनं नाम यज्ञपात्रादीनां सुशोभिततया रचनम् ॥

१२३ निधानं यथाकथंचित्स्थापनमात्रम् ॥

Digitized by Google

१२४ उपहितानि कपालानि येन मन्त्रेण परस्परसंयुक्तानि क्रियन्ते स मन्त्रो योग इत्युच्यते ॥

१२५ अधिश्रयणं नाम वह्नौ स्थापयित्वा संतापनम् ॥

१२६ परिकर्माङ्गसंस्कार इति कोशात्परिकर्मशब्द ऋत्विग्यजमानभिन्नस्य कर्तव्यत्वेन विहितस्य कर्मणो वाचकः ॥

१२७ तत्कर्मकर्ता परिकर्मी भवति ॥

१२८ अनुमन्त्रणं नाम स्वयमन्येन वा कर्मणि कृते पश्चात्तत्कर्मकरणमन्त्रोच्चारणम् ॥

१२९ मन्त्राश्च कर्मकरणा इति सूत्रात् यैः कर्म क्रियते ते मन्त्रपदवाच्याः ॥

१३० गार्हपत्यस्य पश्चात् शकटं स्थापितं भवति तत्र विद्यमानस्य व्रीह्यादिद्रव्यस्य सपवित्रायामग्निहोत्रहवण्यां मुष्टिमात्रं निधाय तया मन्त्रेण कांचिद्देवतामुद्दिश्य शूर्पे प्रक्षेपो ऽथवा शकटाभावपक्षे गार्हपत्यस्य पश्चादुदगग्रं स्फ्यं निधाय तदुपरि दारुपात्रीं प्रागग्रां निधाय तस्यां पुरोडाशीयानोप्य तस्याः सकाशात् गृहीत्वा अग्निहोत्रहवण्यां निधाय पूर्ववत् शूर्पे प्रक्षेपणं निर्वाप इत्युच्यते ॥

१३१ यत्र अनधः सादयतीति विधीयते तत्र दर्भतृणादिकं किंचित् निधाय तदुपरि स्थापनमनधःसादनमुच्यते ॥

१३२ गार्हपत्यमभिमन्त्रयत इत्यादौ अभिमन्त्रणं नाम गार्हपत्यादेरवेक्षणसमकालं मन्त्रजपः ॥

१३३ यस्मिन्यागे व्रीह्यादेर्द्रव्यस्य निर्वापानन्तरमन्यद्द्रव्यनिर्वापः कर्तव्यो भवति तत्र एकस्य निर्वापानन्तरं निर्वापे करणभूताया

Digitized by Google

अग्निहोत्रहवण्या वस्त्रादिना संमार्जनं पश्चान्निरूप्यमाणद्रव्ये पूर्वनिरुप्तद्रव्यसंबन्धितुषादिसंसर्गाभावार्थं क्रियते तत् यच्च तादृशयागे निरुप्तद्रव्यप्रोक्षणात्प्राग्वस्त्रसंमार्जनं तदपि प्रोच्छनमित्युच्यते ॥

१३४ व्रीह्यादिप्रोक्षणार्थं अग्निहोत्रहवण्यां गृहीताः संस्कृता आपः प्रोक्षणीपदवाच्याः ॥

१३५ मन्त्रं विना क्रियमाणं कर्म तूष्णीमित्युच्यते ॥

१३६ हविः करोतीति हविष्कृदिति व्युत्पत्त्या ऐष्टिकादिकर्मणि अध्वर्योः कार्ये हविःसंपादने सहायत्वमात्रेण सोमे तु सवनीयनिर्वापप्रभृतिपुरोडाशासादनान्तस्य हविःसंपादनस्य स्वकर्तृकत्वेन सोमाङ्गभूते प्रवर्ग्याख्ये कर्मणि रौहिणसंज्ञकपुरोडाशाधिश्रयणादिकर्मकर्तृत्वेन च आग्नीध्र एव हविष्कृत्पदवाच्यः ॥

१३७ समाहननं नाम यज्ञपात्राणां तूष्णीं शम्यया ताडनं तच्च दृषदुपलयोः तु चिः समन्त्रकम् ॥

१३८ अवहननं नाम उलूखले उप्तानां व्रीह्यादीनां नैस्तुष्यसिद्ध्यर्थं मुसलेन कण्डनम् ॥

१३९ फलीकरणं नाम कण्डनेन पृथग्भूतानां तन्दुलादीनामेव शूर्पे स्थितिर्यथा स्यात्तुषादीनां तु अधःपतनं तथा कौशलेन शूर्पचालनम् ॥

१४० पात्रीस्थानां पिष्टानामुपरि संतप्तमदन्तीजलप्रक्षेपः आप्लावनमित्युच्यते ॥

१४१ मेक्षणेन जलपिष्टयोर्मिश्रणं संपवनमुच्यते ॥

१४२ मदन्तीजलेन सिक्तस्य पिष्टपिण्डस्य चतुर्थ्यन्तदेवतानामपूर्वकत्वेतिपदान्तेन मन्त्रेण अभिमर्शनानन्तरं कूर्मवदाकारे कृते पुरोडाशपदवाच्यता ॥

१४३ गार्हपत्यादेः सकाशाद् बहिष्कृतानामङ्गाराणां पुनर्गार्हपत्यादौ प्रक्षेपः प्रत्यूहनम् ॥

१४४ पुरोडाशस्य सर्वकपालस्पर्शनं प्रथनमित्युच्यते पुरोडाशस्य त्वक्सिद्ध्यर्थं पिष्टोद्वपनीस्थजलेन सर्वतः संमर्शनं त्वग्ग्रहणमित्युच्यते ॥

१४५ हविषामासमन्तात्प्रादक्षिण्येन उल्मुकस्य परिभ्रमणं पर्यग्निकरणमित्युच्यते

१४६ संतप्तेषु कपालेषु निहितस्य पुरोडाशस्य गार्हपत्यस्य भस्मना तूष्णीं प्रच्छादनं अभिवासनमित्युच्यते ॥

१४७ ततोऽध्वर्युर्मन्त्रेण साङ्गारं भस्म वेदेन पुरोडाशस्योपरि प्रक्षिप्य परिकर्मिणः संप्रेष्यति ते च यथा सुशृतः स्यात्तथा श्रपयंति तदेतत्पुरोडाशश्रपणमित्युच्यते ॥

१४८ गार्हपत्याङ्गारान् मन्त्रेण गार्हपत्यायतनाद्बहिः पश्चान्निरूह्य ते चाङ्गारा यथा मध्ये स्युस्तथा चुल्लीं स्थापयित्वा तस्यां नपुंसकलिङ्गस्थाने स्त्रीलिङ्गवत्पदघटितप्रथमकपालोपधानमन्त्रेण सजलां स्थालीमधिश्रित्य तस्यां मन्त्रेण पूर्वसंस्कृतानां तन्दुलानां प्रक्षेपणं क्रियते ते च परिपक्वास्तन्दुलाः चरुपदवाच्याः ॥

१४९ यदि पयःसहितां स्थालीमधिश्रित्य चरुः साध्यते तदा स पयसिचरुरित्युच्यते ॥

१५० हविःश्रपणानन्तरं पात्रीसंक्षालनोदकं गार्हपत्योल्मुकेनाभितप्या-
न्तर्वेदि स्फ्येन प्राचीस्तिस्रो लेखाः कृत्वा प्रत्यक् त्रिर्निनयति
त्रिभिः स्वाहान्तैर्मन्त्रैः एतादृशं कर्म अन्यत्रापि क्रियमाणं
यथा उल्मुकं प्राच्यां निरस्येदित्यादौ कस्यचिद्वस्तुनो जाते
कार्ये विधिप्राप्तविनियोगकरणं प्रतिपत्तिकर्मेत्युच्यते ॥

१५१ अध्वर्युर्मन्त्रेण वेदमादाय मन्त्रेण सकृत् द्विस्तूष्णीं वेदेन उदगप-
वर्गं प्रागवसन्नं वेदिं संमृज्य वेद्याः पश्चादुपविश्य मन्त्रेण दर्भाभ्यां
सह स्फ्यमादाय अन्यतरेण दर्भेण स्फ्यं निमृज्य अवशिष्टं
दर्भं वेदिपूर्वतृतीयभागे मन्त्रेण उदगग्रं निधाय मन्त्रेण तस्मिन्
स्फ्येन प्रहृत्य मन्त्रेण मृदासहितं स्फ्यमादाय मन्त्रेण मृदं हृत्वा
मन्त्रेण वेदिमवेक्ष्य मन्त्रेण मृदमुत्करे निवपति आग्नीध्रस्तां
मृदं तत्रैवोत्तानाभ्यां पाणिभ्यां गृह्णाति एवं प्रहरणादि मृन्निव-
पनान्तं समन्त्रकं त्रिवारं कृत्वा तूष्णीं चतुर्थं करोति तत्र चतुर्थे
मृदो हरणे प्रहृतस्य दर्भस्यापितया सह हरणं क्रियते तदन-
न्तरं मन्त्रेण स्फ्येन वेदिदक्षिणांसमारभ्य दक्षिणश्रोणिपर्यन्तं
वेदिदक्षिणप्रान्तं स्पृशति तथैव दक्षिणश्रोणिमारभ्य उत्तरश्रोणि-
पर्यन्तं वेदिपश्चिमप्रान्तं स्पृशति तथैव उत्तरश्रोणिमारभ्य
उत्तरांसपर्यन्तं वेद्युत्तरप्रान्तं स्पृशति इदं स्फ्येन वेदिप्रान्तभाग-
स्पर्शनं वेद्याः परितो यागार्थं करणरूपत्वात् उत्तरपरिग्राहापेक्षया
पूर्वत्वाच्च पूर्वपरिग्राह इत्युच्यते ॥

१५२ पूर्वपरिग्राहानन्तरं यं मन्त्रं जपति स मन्त्रो वेदिः क्रियते
अनेनेति करणव्युत्पत्त्या वेदिकरण इत्युच्यते ॥

१५३ वेदिकरणजपानन्तरं स्फ्येन मन्त्रेण प्राक्संस्थं वेदिं त्रिः खनति
एतादृशं खननं उद्धननमित्युच्यते ॥

१५४ अध्वर्युप्रेषित आग्नीध्रः उद्धतदेशात् त्रिमृदमुद्धृत्य उत्करे निवपति ततोऽध्वर्युरुत्तरपरिग्राहग्रहणार्थं ब्रह्माणमनुज्ञापयति तेनानुज्ञातः पूर्ववत् स्फ्येन अन्येस्त्रिभिर्मन्त्रैर्दक्षिणपश्चिमोत्तरप्रान्तभागान् स्पृशति एतत्स्पर्शनं पूर्वपरिग्राहापेक्षया उत्तरत्वादुत्तरपरिग्राह इत्युच्यते ॥

१५५ उत्तरपरिग्राहानन्तरं उत्करे न्युप्तां मृदं वेद्यामानीय स्फ्येन मन्त्रेण समीकरोति वेदिसंमार्जनप्रभृति समीकरणपर्यन्तं वेदेः करणमिति व्युत्पत्त्या वेदिकरणमित्युच्यते ॥

१५६ पलाशस्य अन्यस्य वा यज्ञियवृक्षस्य प्रादेशपरिमाणं काष्ठं समित्पदवाच्यम् ॥

१५७ अध्वर्युप्रेरणया वेद्यां विद्यमानस्य आज्यस्य समन्त्रकं अधोमुखतया यजमानकर्तृकमीक्षणं आज्यावेक्षणमित्युच्यते ॥

१५८ आज्यं पुनराहारमुत्पुनातात्यत्र पवित्राभ्यामाज्यं प्राङ् नीत्वा पुनः पश्चादानयनं पुनराहारपदवाच्यम् ॥

१५९ आज्यस्थाल्या उत्तरतो वेद्यां प्रागग्रमुदगग्रं वा वेदं निधाय तस्मिन् प्रागग्रां जुहूं स्थापयित्वा तस्यां मन्त्रावृत्त्या आज्यस्थाल्याः सकाशात् स्रुवेणाज्यं गृह्णाति यजमानः प्रतिग्रहणमनुमन्त्रयते अध्वर्युर्दक्षिणहस्तेन जुहूं संमृज्य परिकर्मिणे प्रयच्छति स च प्रणीतोत्तरतः स्थापितयोरिध्मबर्हिषोः पश्चिमदेशे जुहूप्रभृतीः स्रुच उदक्संस्थाः स्थापयति अध्वर्युः पूर्ववत् उपभृति आज्यं अष्टकृत्वो गृह्णाति ततस्तथैव संमृज्य पूर्ववत् प्रयच्छति स च परिकर्मी तथैव सादयति अध्वर्युः पूर्ववत् चतुष्कृत्वो ध्रुवायामाज्यं गृह्णाति तूष्णीं पूरयति तथैव प्रयच्छति अन्यश्च तथैव सादयति तदेतत्कर्म आज्यग्रहणमित्युच्यते ॥

Digitized by Google

१६० प्राणीनामुन्मार्जनादि कृत्वा समन्त्रकं इध्मवेदिबर्हींषि क्रमेण प्रोक्ष्य बर्हिरिध्मप्रणीतयोर्मध्येन प्राक् नीत्वा प्रणीताहवनीययोर्मध्येन पुनराहृत्य वेद्यां पुरोग्रन्थ्यूर्ध्वाग्रं निधाय तिष्ठन्नग्राणि मन्त्रेण प्रोक्ष्य प्रह्वो मन्त्रेण मध्यानि प्रोक्ष्य आसीनो मन्त्रेण मूलानि प्रोक्ष्य प्रत्यङ्मुखाभ्यां स्रुक्पाणिभ्यां ग्रन्थिमाविच्य शिष्टं दक्षिणश्रोणिमारभ्य उत्तरश्रोणिपर्यन्तं प्रथमं प्रस्तरं गृहीत्वा मन्त्रेण मन्त्रेण निनयति ततः प्रोक्षणीधानं निरस्य बर्हिर्विस्रस्य मन्त्रेण तस्मिन् पवित्रे संयोज्य प्रस्तरं यजमानाय ब्रह्मणे वा दत्त्वा बर्हिःसन्नहनं विस्रस्य दक्षिणश्रोणिमारभ्य उत्तरांसपर्यन्तं निधाय तदुपरि प्रथमं दर्भमुष्टिं मन्त्रेण स्तृणाति तस्य पश्चात् द्वितीयं प्रागास्तृतदर्भमूलानि आच्छादितानि यथा स्युः ततस्तृतीयं तथैव स्तृणाति तदेतत्कर्म बर्हिरास्तरणं नाम ॥

१६१ ततः प्रस्तरं गृहीत्वा प्राङभिसृप्य मन्त्रेण आहवनीयस्य पश्चात् प्रथममेखलोपरि उदगग्रं मध्यमं परिधिं परिदधाति यजमानोऽनुमन्त्रयते एवं दक्षिणोत्तरौ परिधी दक्षिणोत्तरयोः क्रमेण प्रागग्रौ स्थापयति अग्रे सूर्यं मन्त्रेण परिधिं कल्पयति एतत्कर्म अग्निपरिधानमित्युच्यते ॥

१६२ परिभोजनीयेभ्यो मध्यमबर्हिर्मुष्टेर्वा अन्यतो वा आहृतं सारं दर्भद्वयं विशेषेण धृतिः धारणं प्रस्तरादीनां धारणं यस्मिन् इति व्युत्पत्त्या विधृतिपदवाच्यम् ॥

१६३ ते च विधृती वेद्यां मन्त्रेण उदगग्रे निधाय तयोरुपरि मन्त्रेण प्रागग्रं प्रस्तरं तदुपरि मन्त्रेण जुहूं प्रागग्रां तस्या उत्तरतो

विधृत्योरधस्तात् मन्त्रेणोपभृतं तदुत्तरतस्तथैव ध्रुवां निधाय मन्त्रेणाभिमृशति तदेतत् स्रुगासादनमुच्यते ॥

१६४ स्रुगासादनानन्तरं स्रुचामुत्तरतः सस्रुवामाज्यस्थालीं निधाय सर्वाण्याज्यान्यभिमन्त्र्य दक्षिणेन सस्रुवामाज्यस्थालीं सवेन दारुपात्रीं वेदं चादाय प्रदक्षिणमावृत्य प्रत्यङ् आहृत्य गार्हपत्यस्य पश्चादुपविश्य दारुपात्र्यां पुरोडाशसंख्यया मन्त्रावृत्त्योपस्तृणाति ततः प्रथमं दक्षिणपुरोडाशस्याङ्गारानपोहति तच्च अपोहनं नाम पूर्वं प्रक्षिप्तानां भस्ममिश्राङ्गाराणां धृष्ट्या दूरीकरणम् ॥

१६५ मन्त्रेण पुरोडाशस्य प्रकटीकरणं पुरोडाशप्रकाशनमुच्यते ॥

१६६ ततो वेदेन विरजसं कृत्वा ऽभिघार्य मन्त्रेण पात्र्याः सकाशात्पुरोडाशमुद्गृह्णाति इदं पुरोडाशोद्वासनमुच्यते ॥

१६७ ततो मन्त्रेण पुरोडाशस्योपरि सर्वत आज्यप्रक्षेप आर्द्रीकरणमित्युच्यते ॥

१६८ तथैव ततः अधोभागे आज्यलेपनं अधस्तादभ्यञ्जनमित्युच्यते ॥

१६९ ततः पुरोडाशं पात्र्यां तूष्णीं निधाय अन्यानपि पुरोडाशादीन् एवमेव उद्वास्य पात्र्यां निधाय स्रुवमभिपूर्य पुरोडाशयोर्मध्ये स्थापयित्वा सर्वाणि हवींष्यादाय वेदिमध्ये स्रुचां पश्चात्तूष्णीं सादयति यजमानस्तु व्याहृतिमन्त्रेण एतद् हविरासादनमित्युच्यते ॥

१७० आमन्त्रणं नाम संबोधनप्रथमान्तपदोच्चारणानन्तरं एहीत्यस्यानुषङ्गेणाकारणम् ॥

Digitized by Google

१०१ प्रागुदगाहवनीयादवस्थायेत्यादौ अधोमुखतया स्थानं अवस्थानमित्युच्यते ॥

१०२ उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे इति कोशात् दक्षिणबाहुना उद्धृतं सव्यांसस्थितं स्मृत्युक्तरीत्या निर्मितं यज्ञोपवीतमित्युच्यते ॥

१०३ एतद्विपरीतं सव्योद्धृतं दक्षिणांसस्थितं प्राचीनावीतमित्युच्यते ॥

१०४ मालावत्कण्ठलम्बितं निवीतमित्युच्यते ॥

१०५ केशवादिभिस्त्रिभिर्नामभिश्चतुर्थ्यन्तैरुदकं ब्राम्हेण तीर्थेन पीत्वा द्वाभ्यां करौ प्रक्षाल्य द्वाभ्यामोष्ठौ संमृज्य द्वाभ्यां मुखमवाङ्निमृज्य एकेन वामकरं प्रक्षाल्य एकेन पादौ संप्रोक्ष्य एकेन मूर्धानं संस्पृश्य एकेन ऊर्ध्वाष्ठमङ्गुल्यग्रैः संमृज्य द्वाभ्यां क्रमेण अङ्गुष्ठतर्जनीभ्यां दक्षिणवामनासारन्ध्रे संमृज्य द्वाभ्यां क्रमेण दक्षिणवामाक्षिणी अङ्गुष्ठानामिकाभ्यां निमृज्य द्वाभ्यां क्रमेण दक्षिणवामश्रोत्रे अङ्गुष्ठकनिष्ठिकाभ्यां संमृज्य एकेन अङ्गुल्यग्रैर्नाभिं संमृज्य एकेन पाणितलेन हृदयं एकेन अङ्गुल्यग्रैः शिरः संमृज्य द्वाभ्यां क्रमेण तैरेव दक्षिणवामभुजौ संमार्ष्टि तदेतत्स्मृत्युक्तं आचमनमित्युच्यते ॥

१०६ दक्षिणेनाङ्गेन य आवर्तते पर्यावृत्तो भवति स दक्षिणावृदित्युच्यते ॥

१०७ एवं सव्येनावर्तमानः सव्यावृत्पदवाच्यः ॥

१०८ सव्योत्तरिणोपस्थेन दक्षिणोत्तरिणोपस्थेन वा आसनं अङ्कधारणापदवाच्यम् ॥

१०९ विहारसंमुखस्वपृष्ठभागो यथा न भवेत् तथा कर्मकाले इतस्ततो गमनं विहाराव्यावृत्तिरित्युच्यते ॥

Digitized by Google

१८० वेदिश्रोण्योत्तरया पार्ष्णी समां निधायेत्यादौ तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिरधस्तयोरित्यमरकोशात्पुल्लिङ्गोऽपि अत्र स्त्रीलिङ्गः पार्ष्णीशब्दो घुटिकाधोभागवाचकः ॥

१८१ प्रपदेन बर्हिराक्रम्येत्यादौ प्रपदशब्दः पादाग्रं प्रपदं पाद इति कोशात् अङ्गुलिपश्चाद्भागस्य पादाग्रस्य वाचकः ॥

१८२ तत्रैव आक्रमणं नाम बर्हिष उपरि प्रपदस्थापनम् ॥

१८३ अङ्गुल्यग्राण्यवकृष्येत्यत्र अवकर्षणं नाम आकुञ्चनम् ॥

१८४ एवं प्रतिसंदध्यादित्यत्र प्रसारणं प्रतिसंधानमित्युच्यते ॥

१८५ सामिधेनीरन्वाहेत्यादौ अध्वर्युप्रेषितो होता उत्तरया वेदिश्रोण्या समां पार्ष्णी निधाय प्रपदेन बर्हिराक्रम्य संहितौ करौ हृदयदेशे अङ्कदेशे वा प्राञ्चौ धारयन् प्राङ्मुखस्तिष्ठन् प्रकृतीष्टौ पञ्चदश विकृतौ पाशुकादौ च ताभ्यो न्यूना अधिका वा या ऋचो मन्द्र-स्वरेण पठति ता ऋचः समिधः आधीयन्ते याभिरिति करण-व्युत्पत्त्या सामिधेनीपदेनोच्यन्ते ॥

१८६ अन्वाहेत्यनुवचनं विधीयते तत्र सामिधेनीनामनुवचने ऋक्-पाठात्पूर्वं त्रिमात्रं हिं इत्युच्चार्य उपांशुसंहितया प्रणवान्ता व्याहृतीः पठति तस्य उच्चैरुपांशु पठ्यमानस्य समुदितस्य आश्वलायनसूत्रे व्यवहारार्थं अभिहिंकार इति संज्ञा कृता ॥

१८७ तदनन्तरं पठ्यमानायाः प्रथमाया ऋचः त्रिवारं पाठो विहितः एवमन्तिमाया अपि अस्य त्रिःपाठस्य तत्रैव सूत्रे अभ्यास इति संज्ञा कृता ॥

१८८ सामिधेनीनां प्रथमाया ऋचः द्वयोरर्धर्चयोः संहितया पाठः ऋ-गन्ते टेः स्थाने त्रिमात्रः प्रणवः तदन्ते मकारः तेन च मकारेण

सह उत्तरस्या ऋचः प्रथमार्द्धर्चेन संधानं कार्यं समाप्ते द्वितीयसा-मिधेन्यर्द्धर्चे उच्छ्वासः कार्यः एतदेकमवसानं ततः द्वितीया-र्द्धर्चेन तृतीयसामिधेन्यर्द्धर्चे संधाय तेन च द्वितीयार्द्धर्चे प्रण-वान्तं संधाय प्रणवान्तिममकारेण चतुर्थसामिधेन्यर्द्धर्चे तस्मिन्नर्-धार्धर्चे उच्छ्वसेत् एतद् द्वितीयमवसानम् । एवं च प्रथमोच्छ्वासे त्रयो ऽर्धर्चाः द्वितीये तु चत्वारः संपद्यन्ते संकलनेन सप्त संपन्नाः त्रिः पठ्यमानायाः प्रथमाया ऋचः षड् अर्धर्चाः द्वितीयस्या ऋच एको ऽर्धर्चः एतदनन्तरं प्रत्युच्छ्वासं द्वावर्धर्चौ भवतः । एवं प्रथ-मावत् उपान्त्याया द्वितीयार्धर्चमारभ्य तदीयप्रणवमकारेण अ-न्तिमाया अर्धर्चे संधाय तेन च द्वितीयार्धर्चे संधाय तदन्तिम-प्रणवेन उत्तरस्या अर्धर्चे संधाय तदन्ते विरमेत् अन्तिमायां त्रिः पठ्यमानायां एतदेकमवसानं ततो द्वितीयार्धर्चमारभ्य तदन्तिम-प्रणवमकारेण उत्तरस्या अर्धर्चे संधाय तेन च द्वितीयार्धर्चे सं-धाय तदन्तिमप्रणवमकारेण द्वादशाक्षरं निगदभागं संधाय तद-न्ते विरमेत् एतत् अन्तिमायां द्वितीयमवसानं अनया रीत्या सामिधेनीनामाद्यन्त्ययोर्ऋचोः पठनं अन्यासामृचामपेक्षया अधिकस्य अर्धर्चस्य एकैकस्मिन् उच्छ्वासे उच्चारणात् अध्यर्धका-रमन्वाहेति सामुलन्तेन अध्यर्धकारमित्यनेन पदेन आश्वलाय-नसूत्रे व्यवहृतम् ॥

१८६ ऋगारम्भे प्रथमार्धर्चे ऽवसाय ततो द्वितीयार्धर्चप्रणवमकारेण उत्तरस्या ऋचः प्रथमार्धर्चे संधाय तदन्ते विरमेत् एवं सर्वा ऋचः पठित्वा अवशिष्टं अन्तिमाया ऋचः द्वितीयार्धर्चे केवलं चतुर्मात्रप्रणवान्तं उक्त्वा विरमेत् एतादृशं पठनं तत्रैव सूत्रे संततमित्युच्यते ॥ (शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

(*Continued from page 452.*)

मू० ॥ धात्वर्थाऽऽख्यानशक्तो यदि भवति गुणाद्वर्त्तितुं वैदिकेऽयं
संबन्धाऽज्ञानहेतोरनलमथ पुनर्वैदिके शक्तिमान्स्यात् ॥
तत्संबन्धात्क्रियामप्यभिवदितुमलं लक्षणावृत्तितोऽयं
लिङ्शब्दस्तेन कार्ये श्रुतिवचनगते शक्त इत्यध्यवस्येत् ॥ १४० ॥

टी० ॥ तमेव न्यायं दर्शयति । धात्वर्थेति । लोके हि प्रवर्त्तकवाक्यात्कार्ये प्रथमं लिङादेः संगतिग्रहः कार्यं च लोकवेदयोर्विलक्षणम् । न च लिङादेरनेकाऽर्थत्वं न्याय्यम् । न च कार्यत्वसामान्यं लिङर्थ इति नोक्तदोषस्तदपर्यवसानाच्च कार्यप्रतीतिर्गवादिपदाद्गवादेरिवोभयत्राऽपि भविष्यतीति वाच्यम् । वैदिकस्याऽपि कार्यस्य गवादिव्यक्तेरिवाऽशब्दाऽर्थत्वाऽऽपत्तेर्मानान्तरेणाऽभिधेयसामान्यसंबन्धितयाऽवगतस्यैव गवादेरिवाऽपर्यवसानलभ्यत्वाच्च । तस्मादेकत्र लिङ् लाक्षणिक इति कुत्र लक्षणा कुत्र शक्तिरिति विचारणीयम् । यदि धात्वर्थे लिङादिपदं शक्तं तदा गुणाल्लक्षणाया वैदिके कार्ये अयं लिङादि वर्त्तितुमनलमसमर्थः । कुतः संबन्धाऽज्ञानहेतोः वाच्याऽर्थसंबन्धितया मानान्तराऽवगते तीराऽऽदौ गङ्गाऽऽदिपदस्य लक्षणा दृष्टा । न च धात्वर्थसंबन्धितया वैदिकं कार्यं मानान्तरेणाऽवगतम् । अपूर्वरूपस्य तस्य तदयोग्यत्वात् अतः संबन्धाऽज्ञानात्तस्मिन्न लिङादिपदस्य लक्षणेत्यर्थः । अथ यदि शक्तिमान्स्यादयमित्यनुषङ्गः तत्संबन्धान्मुख्याऽर्थनियोगसंबन्धात्क्रियां धात्वर्थं यदि लिङादिना वैदिकं कार्यमभिधीयेत तदा विषयभूतधात्वर्थसंबन्धितयैव लिङादिनाऽभिधानाद्वाच्याऽर्थसंबन्धितया ज्ञाते धात्वर्थे लक्षणा युक्ता । यद्यपि लौकिकी क्रिया न तत्संबन्धितयाऽवगता तथापि तत्संबन्धिधात्वर्थजातीयेति तत्रैव लक्षणा वैदिककार्ये तु लोके संगतिग्रहणकालेऽनवगतेऽपि कामिनियोज्यसमभिव्याहारादवगते शक्तिरेवोचितेत्याशयेनाऽऽह । तेनेति ॥ १४० ॥

मू० ॥ एवं शब्दान्तराणां नयनिपुणमतिः शक्तिवित्स्यात्क्रमेण
प्रक्षेपोद्धारदर्शी भवति कतिपयैर्वासरैस्तत्रतत्र ॥
तस्मात्कार्याऽन्विताऽर्थे सकलमपि पदं शक्तिमद् बुध्यमानो
भूताऽऽद्यर्थप्रतीतिं प्रति विमुखमनाः शास्त्रतः स्यान्मनुष्यः॥१४१॥

टी० ॥ ननु लिङादिपदसमभिव्याहारमन्तरेणाऽपि प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्यादौ प्रसिद्धपदसमभिव्याहारेण मधुकराऽऽदिपदानां शक्तिर्गृह्यते तत्र कुतः सर्वपदानां कार्याऽन्विते शक्तिरित्यत आह । एवमिति । शब्दान्तराणां भ्रमराऽऽदिशब्दानां शक्तिविद्भवतीति संबन्धः । सः व्युत्पित्सुः । तत्राऽपि हि प्रवर्तकवाक्यात्कार्याऽन्विते गृहीतसंगतिकपदप्रयोगादेव भ्रमराऽऽदिपदानां शक्तिग्रह इत्युपजीव्यकार्यव्युत्पत्त्यनुरोधेनाऽध्याहृतकार्याऽन्वित एव तदर्थे इति जानातीति नास्ति क्वचिद्व्यभिचार इत्यर्थः । तदिदमुक्तं नयनिपुणेति । प्रक्षेपोद्धारदर्शी । भ्रमराऽऽदिपदप्रयोगस्य तत्र तदितरपदाऽप्रयोगस्य च दर्शीत्यर्थः । तत्रतत्र । कार्यान्वित इतिशेषः । फलितमाह । तस्मादिति । भूताऽऽद्यर्थेति । भूतमतीतमादिपदाद्वर्तमानभविष्यतोर्ग्रहणम् । शास्त्रतो भूताऽऽद्यर्थप्रतीतिं प्रतीति संबन्धः ॥ १४१ ॥

मू० ॥ वाक्याद्भूतार्थनिष्ठाद्भवति न तु नृणां शब्दशक्तिप्रतीति-
लिङ्गं श्रोतृस्थबुद्धेर्न हि किमपि भवेदत्र बालोपलभ्यम् ।
न ह्येतत्पुत्रजन्माऽऽद्यवगतिनियतं नित्यवन्निश्चितं नो
यद्वक्त्रादिप्रसादप्रचितितललुठनादीक्ष्यते श्रोतृदेहे ॥ १४२ ॥

टी० ॥ ननु न प्रवर्तकवाक्याधीनः प्राथमिकसंगतिग्रहः येनैवं स्यात्किं तु पुत्रस्ते जात इत्यादिवाक्यादेरपि प्रथमं संगतिसंवेदनं स्यात्तच्छ्रवणाऽनन्तरं पितुर्मुखप्रसादाऽऽदिलिङ्गेन पार्श्वस्थश्रोतरि तद्वाक्यार्थज्ञानोन्नयनसंभवात्तत्र वाक्यस्याऽन्वयव्यतिरेकाभ्यां कारणत्वाऽवगमसंभवाच्चाऽन्वित एव पदानां शक्तिरस्तु नाऽपि योग्यताऽऽदिमहिम्नाऽन्विते गृहीतसंबन्धानां कार्यैदमर्थ्यमिति तत्राऽऽह । वाक्यादिति । भूताऽर्थनिष्ठाद्वाक्यान्नृणां

शब्दशक्तिप्रतीतिर्नैव संभवति कुतो नियतलिङ्गाऽभावेन तदर्थज्ञानाऽनुमानाऽसंभवादित्याह । लिङ्गमिति । अत्र श्रोतरि लोके वा । ननूक्तं पितुर्मुखप्रसादाऽऽदिलिङ्गमिति तत्राऽऽह । नह्येतदिति । एतच्छब्दाऽर्थमाह । यद्रुक्तादीति । क्षितितललुठनाऽऽदि शोककार्यं तच्च पुत्रस्ते मृत इत्यादिवाक्याऽर्थज्ञाने लिङ्गमिति वदन्तं प्रत्युक्तं मुखप्रसादाऽऽदेर्भार्यासुखप्रसवधनप्राप्तितद्वियोगाऽऽदिज्ञानादपि संभवेन पुत्रजन्माऽऽग्रवगतिनैयत्याऽभावेन ततस्तदनुमानाऽसंभवाच्च सिद्धाऽन्वितशब्दार्थ इति भावः ॥ १४२ ॥

मू० ॥ तस्मादाध्वं निराशाः श्रुतिशिरसि न तस्याऽस्ति निष्पन्नरूपे
प्रामाण्यं कार्यशून्ये कथमपि च परब्रह्मणि स्वप्रधाने ॥
भूतं भव्यप्रधानं भवति हि न पुनः स्वप्रधानं कदा चि-
च्छास्त्रस्थाः शब्दशक्तिस्थितिनिपुणधियो विस्तरादेवमाहुः ॥१४३॥

टी० ॥ तस्माल्लोके सर्वपदानां कार्याऽन्वित एव संगतिग्रह इति वेदेऽपि तेषां स एवाऽर्थो न्याय्यः लोकवेदयोः पदतदर्थभेदाऽभावात् । एवं च वेदान्तानामपि कार्याऽन्विते ब्रह्मण्येव प्रामाण्यं वक्तव्यमिति न कार्यशून्ये स्वप्रधाने परब्रह्मणि कथमपि प्रामाण्यं संभवतीत्याह । तस्मादिति । श्रुतिशिरसि निराशा आध्वं भवतेति संबन्धः । किं च तद्भूतानां क्रियाऽर्थेन समाम्नायः भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति जैमिनिशबरस्वामिनोर्मतं तौ च वेदाऽर्थनिर्णयेऽधिकृताविति तदुक्तमेव ग्रहीतुमुचितमित्यभिप्रेत्याह । भूतमिति । सिद्धमित्यर्थः । भव्यं साध्यं प्रधानं यस्य भव्यशेषमित्यर्थः स्वप्रधानं न भव्याऽनन्वयि सच्छास्त्राऽप्रतिपाद्यमित्यर्थः । शास्त्रस्था जैमिन्यादय एवमाहुः एवमित्येतद्विवृतं भूतं भव्येत्यादिना । शब्दशक्तीति । वैदिकशब्दशक्तिव्यवस्थायां निपुणधिय अबाधितमतय इति यावत् ॥ १४३ ॥

मू० ॥ तस्मादसंगतमिदं प्रतिभाति यन्मे
वाक्यप्रमाणकमुदीरितमद्वयत्वम् ॥

इत्येवमेष मम बुद्धिपथं विरोधः
प्राप्तः प्रभो परिहरैनमनुग्रहाय ॥ १४४ ॥

टी० ॥ एवं वर्णितन्यायबलाज्जैमिन्यादिवचनबलाच्च कार्याऽन्विते श्रुतितात्पर्यमिति अद्वयस्वप्रधानस्य ब्रह्मणो वाक्यप्रमाणकत्वं भवदुक्तमसंगतमिति पूर्वपक्षमुपसंहरति । तस्मादसंगतमिति । इदंशब्दार्थमाह । वाक्यप्रमाणकमिति । एवंविधपूर्वपक्षकरणेन स्वस्मिन्गुरूणां व्युत्थितत्वभ्रममपनयन्प्रार्थयते । इत्येवमिति । यत एवमुक्तप्रकारैर्विरोधो वेदान्तानां ब्रह्मणि प्रामाण्यासंभवो मम बुद्धिपथं प्राप्तोऽतो ममैव बुद्धिदोषादसंगतमिव भवदुक्तं वाक्यप्रमाणकमद्वयं प्रतिभाति न तु भवताऽसंगतमुक्तमित्यर्थः । प्रभो इति तत्परिहारे गुरोरनायासं द्योतयति । एनं विरोधम् ॥ १४४ ॥

मू० ॥ सत्यं यदाह गुरुमान्यदिवाक्यगम्यं
संसर्गरूपमिह वेदशिरःस्वभीष्टम् ॥
अस्त्येव तत्र पदयोरुभयोर्विरोधः
पारोक्ष्यसद्वयविरोधकृतस्तदानीम् ॥ १४५ ॥

टी० एवं प्रत्यगभिन्नेऽद्वये स्वप्रधाने ब्रह्मणि वेदान्तप्रामाण्याऽसंभवे चोदिते किं जीवब्रह्मणोस्तत्त्वंपदवाच्ययोरभेदो न संभवतीति चोदयसि उत तदुभयलक्ष्ययोस्तत्राऽऽद्यमङ्गीकरोति । सत्यमिति । यदाह । भवानिति शेषः । गुरुमान् । शिक्षितमतिः । अन्यस्य सूक्ष्मेऽर्थे एवंविधाऽऽक्षेपाऽयोगात् । संसर्गरूपं मुख्याऽर्थयोस्तादात्म्यमङ्गीकृतमेव दर्शयति । अस्त्येवेति । तत्र । वाच्याऽर्थाऽभेदे ॥ १४५ ॥

मू० ॥ यत्कर्मकाण्डनिपुणैरुदितं पुरस्ता-
द्वाक्याऽर्थलक्षणमदः पुनरत्र नेष्टम् ॥
भेदाऽऽदिवर्जितमखण्डमुशन्ति यस्मा-
च्छ्रीबादरायणमताऽनुगता महान्तः ॥ १४६ ॥

टी० ॥ ननु संसर्गो वा विशिष्टो वा वाक्यार्थ इति विद्वद्भिरङ्गीकृत-

Digitized by Google

मिति वेदान्तवाक्यस्याऽपि तदन्यतरोऽर्थः स्वीकर्तव्यस्तत्र चेत्पदतदर्थयोर्विरोधोऽङ्गीकृतस्तर्हि कथं तद्वाक्यार्थः सिद्ध्येदित्याशङ्क्य वेदान्तव्यतिरिक्तानामेवाऽर्थस्तथाऽभ्युपेयो न तु वेदान्तानां वेदमात्रस्य वाऽतस्तद्विरोधोऽत्र न दोषायेत्याह । यत्कर्मकाण्डनिपुणैरिति । यद्वाक्यार्थलक्षणमिति संबन्धः । पुरस्तात्पूर्वतन्त्रे । अदस्तल्लक्षणम् । अत्र वेदान्ते । वाक्यविशेषाऽर्थलक्षणं वाक्यविशेषाऽर्थं नाङ्गीकृतं चेत्त काऽपि क्षतिरिति भावः । ननु वाक्याऽर्थसामान्यलक्षणमेव तदस्तु अन्यस्य सामान्यलक्षणस्याऽसम्भवादन्यथा वेदान्तवाक्यविशेषस्य कीदृशोऽर्थः स्यादिति लक्षणान्तराऽसंभवं मन्वानं प्रत्याह । भेदाऽऽदीति । भेदः संसर्गः स्वादिपदाद्विशिष्टग्रहणम् । अखण्डमपर्यायानेकपदप्रतिपाद्यमसंसृष्टमेकप्रातिपदिकाऽर्थमात्रं वा । उशन्ति कमनीयतया कथयन्ति यस्माद्भेदादीति संबन्धः । श्रीबादरायणमतानुगता इति । भगवद्बादरायणः खलु तत्तु समन्वयादिति सूत्रेणाऽखण्डैकरसे ब्रह्मणि वेदान्तप्रामाण्यं न्यरूपयत् । अतस्तन्मताऽनुसारिणः शङ्करभगवत्पादास्तच्छिष्याश्च तथैवोशन्तीति न वेदान्तवाक्याऽर्थलक्षणान्तराऽसंभवो बादरायणमतानुगतानां महत्त्वं पक्षपातराहित्येन श्रुत्यर्थविचारकौशल्यम् । नाऽपि सामान्यलक्षणाऽसंभवो वाक्यप्रतिपाद्यत्वस्यैव हि तत्सामान्यलक्षणत्वं न संसर्गत्वाऽऽदिरूपस्याऽननुगमादिति भावः ॥ १४९ ॥

मू० ॥ भेदाऽऽदिरूपमवबोधयितुं समर्थं
यद्वाक्यमस्ति तदखण्डविलक्षणाऽर्थम् ॥
तल्लौकिकं भवतु वैदिकमेव वाऽस्तु
नाऽस्माकमत्र विषये विमतिः कदाचित् ॥ १५० ॥

टी० ॥ ननु उक्तवाक्याऽर्थलक्षणावान्तरभेदव्यवस्थायां किं मानमित्याशङ्क्य तत्तद्वाक्यार्थे तस्यतस्य वाक्यस्य तात्पर्यग्राहकमानमेव तत्र प्रमाणमिति श्लोकद्वयेनाऽऽह । तत्र प्रथमं यत्कर्मकाण्डनिपुणैरित्यनेन भेदादिवाक्याऽर्थस्योक्तं लक्षणं स्वीकरोति । भेदाऽऽदीति । लौकिकं गामानयेत्यादि वैदिकमग्निहोत्रं जुहोतीत्यादि च यत्रोक्तविषये भेदाऽऽदि-

रूपे वाक्याऽर्थे नोऽस्माकं कदा चिदपि विमतिरस्ति न हि व्यसनितयाऽखण्डाऽर्थत्वं वयमिच्छाम इतिभावः ॥ १४७ ॥

मू० ॥ यद्वाक्यजातमथ वेदशिरोनिविष्टं
यद्वाऽपि लौकिकमखण्डमपास्य नाऽन्यत् ॥
शक्नोति वस्तु वदितुं तदशेषमेव
ब्रूयादखण्डमिति तु प्रतिपादयामः ॥ १४८ ॥

टी० ॥ इदानीं भेदाऽऽदिवर्जितमित्यनेन कथितं वेदान्तवाक्याऽर्थस्वरूपं सोपपत्तिकमुच्यत इत्याह । यद्वाक्येति । अथेति पक्षान्तरोपक्रमार्थः । वेदशिरोनिविष्टं सत्यं ज्ञानमनन्तं ब्रह्म तत्त्वमसीत्यादिवेदान्तवाक्यं लौकिकं प्रकृष्टप्रकाशश्चन्द्रः सोऽयमित्यादिवाक्यमन्यद्वस्तु वदितुं न शक्नोति तदशेषमखण्डमेव ब्रूयादित्यनन्तरमेवोपपादयिष्यत इत्यर्थः ॥१४८॥

मू० ॥ सोऽयं पुमानिति हि मुख्यपदाऽर्थयुक्त-
वाक्यार्थबुद्धिजननस्य न वाक्यमेतत् ॥
ईशीत वाच्यशबलस्य पदद्वयेन
संसृष्टबुद्धिजनने पदयोर्विरोधात् ॥ १४९ ॥

टी० ॥ ब्रह्मणि वेदान्तवाक्यं द्विविधमेकमहंकारादिसाक्षिणः प्रत्यक्चैतन्यस्य निरतिशयानन्दाद्वयनित्यमुक्तब्रह्माऽभेदपरं यथा तत्त्वमसीत्यादि । एतच्च परमपुरुषार्थप्रत्यग्ब्रह्मैक्यनिष्ठत्वान्महावाक्यम्, अपरं तत्त्वंपदार्थस्वरूपपरं यथा विज्ञानमानन्दं ब्रह्म योऽयं विज्ञानमयः प्राणेष्वित्यादि एतच्च पदार्थनिष्ठत्वादवान्तरवाक्यं तत्र महावाक्यस्याखण्डार्थत्वे लोके सोऽयमिति वाक्यमुदाहरणम् । इतरस्य प्रकृष्टप्रकाशश्चन्द्र इति तत्र सोऽयमिति वाक्यस्याऽखण्डार्थत्वं प्रमाणाभावान्नास्तीत्याशङ्क्याह । सोऽयमिति । मुख्यपदार्थेति । तदिदंशब्दयोर्यौ मुख्यार्थौ तद्देतद्देशकालवैशिष्ट्यरूपतत्तेदन्ताविशिष्टौ तद्युक्तस्तान्निरूपितो यो वाक्यार्थोऽभेदस्तद्बुद्धिजननस्यैतत्सोऽयमिति वाक्यं नेशीतेति संबन्धः । सोऽयमिति हि वाक्यं

समानाधिकरणवाक्यत्वादेकार्थनिष्ठं वाच्यं तत्र यदि मुख्यपदार्थयोरैक्यं तदा तद्देशकालविशिष्टद्वयस्य विरोधेनाऽभेदाऽसंभवादिति, इदं वाक्यं तत्प्रतिपादयितुमसमर्थमिति भावः । ननु देवदत्तस्तत्तेदन्ताभ्यामुक्तरूपाभ्यां संसृष्टः, देवदत्ते तत्तेदन्त इति वा वाक्यार्थोऽस्तु न विरोध इति तत्राह । वाच्यशबलेति । वाच्यं यच्छबलं विशिष्टं तन्निष्ठपदद्वयेनेत्यर्थः । स अयमिति पदाभ्यां तत्तेदन्तयोः पुरुषविशेषणतयोपस्थितयोः स्वातन्त्र्याऽसंभवेन पुरुषे च प्रथमान्तपदेनोपस्थिते सप्तम्यर्थासम्भवेन चोक्तप्रकारद्वयाऽसंभवः, किं च देवदत्ते तत्तेदन्ते इति ज्ञानेन न भेदभ्रमनिवृत्तिः संभवति इदं च वाक्यं तदर्थमेव वृद्धैः प्रयुज्यते देवदत्तभेदेऽपि तत्संभवात्, न चैकस्मिन्देवदत्ते तत्तेदन्ते इति ज्ञानाद्भेदभ्रमनिवृत्तिसंभवइतिवाच्यम्, समानाधिकृतपदद्वयव्यतिरेकेण तदेकत्वे प्रमाणाभावात्तस्मादर्थान्तराऽसम्भवाद्वाच्यशबलस्यपदद्वयेन संसृष्टबुद्धिजननमेव वाच्यं तच्च न संभवति पदयोर्विरोधार्थत्वादित्यर्थः ॥ १४९ ॥

मू० ॥ एतद्धि सोऽयमिति वाक्यमखण्डनिष्ठं
वक्तव्यमत्र गतिरस्ति न का चिदन्या ॥
तद्देशकालमनुकृष्य स इत्यनेन
नाऽयंपदार्थमुपढौकयते हि नेतत् ॥ १५० ॥

टी० ॥ अस्तु तर्ह्येकस्मिन्नेव पदे लक्षणा तथा च न विरोधः प्रतियोग्यन्तराभावात् । नाप्यखण्डार्थता देवदत्ते एकस्य विशिष्टस्यान्येन तादात्म्यप्रतिपादनादित्याशङ्क्याह । एतद्धीति । अखण्डनिष्ठं पदद्वयलक्षणयेति शेषः । अत्र,अस्मिन्वाक्ये । गतिः, त्वदुक्तप्रकारावगतिः । कुत इति चेत्तत्राह । तद्देशकालमिति । सइत्यनेन, स इति पदेन तद्देशकालविशिष्टमनुकृष्याऽऽदायाऽयंपदार्थम्, अयमिति पदस्य लक्षितमर्थं नोपढौकयते प्रापयितुं न शक्नोतीत्यर्थः । सोऽयमिति । वाक्यमिति शेषः हीति दृष्टान्तार्थं यथा तत्पदं स्ववाच्यमिदंपदलक्ष्यं न प्रथयति, एवमेतत्पदमपि स्ववाच्यं नोपढौकयते, तत्पदलक्ष्यमितिशेषः, एकपदलक्षितस्वरूपस्य पदान्तरवा-

च्यादभेदनिष्ठत्वे वाक्यस्य यावद्देवदत्तस्वरूपं तत्तद्विशिष्टमेव स्यात्। अन्यथा वर्तमानसमयस्थदेवदत्ते तद्देदसंशयादिनिवर्तकताऽस्य वाक्यस्य न स्याच्चिवर्तते चास्माद्वाक्यात्तत्संशयादिरिति पदद्वयलक्षणया तदेतद्देश-कालद्वयवृत्तिदेवदत्ताऽभेदपरमितीदं वाक्यमखण्डाऽर्थनिष्ठमेव। न चैवं तत्स्वरूपस्यैकैकपदादपि प्रतीतेरेकपदार्थज्ञानादपितन्निवृत्तिप्रसङ्गः, वक्त-व्यं वा पदार्थस्वरूपादधिकं वाक्यप्रमेयमन्यथा वाक्यादपि तदयोगा-दिति वाच्यम्। पदद्वयलक्ष्यवाक्यार्थयोरन्यूनाऽनतिरिक्तत्वेऽपि वाक्यात्त-देतद्देशकालपरामर्शपूर्वमखण्डदेवदत्तस्वरूपाभेदप्रतिपादने भवति तज्ज्ञानं निश्चयरूपमतस्ततः संशयादिनिवृत्तिरुपपद्यते नैवमेकैकपदलक्ष्यज्ञानमिति न ततः संशयनिवृत्तिः, एवं च सोऽयमित्यादेरर्थान्तराऽसंभवादबाधाच्चा-ऽखण्डाऽर्थतैवेति भावः ॥ १५० ॥

मू० ॥ एवं सतीदमपि तत्त्वमसीति वाक्य-
माश्रित्य लाक्षणिकवृत्तिमखण्डनिष्ठम् ॥
सोऽयं पुमानिति यथा वचनं तथास्तु
नो चेत्समं हि तदलाबुनिमज्जनोक्त्या ॥ १५१ ॥

टी० ॥ दार्ष्टान्तिकेऽपि तदाह। एवं सतीति। लोके पदद्वयलक्ष-णया सोऽयमितिवाक्यस्याऽखण्डार्थत्वे सतीत्यर्थः। तथाच नाऽस्माकम-लौकिककल्पनेति भावः। लाक्षणिकवृत्तिं पदद्वयेऽपीति शेषः। तत्त्वम-सीति वाक्यमखण्डाऽर्थनिष्ठम् अकार्यकारणद्रव्यमात्रविषयसमानाधिक-रणवाक्यत्वात् यथा सोऽयं पुमानिति वचनमित्याशयेन दृष्टान्तमाह। सोऽयं पुमानिति। तथेदं तत्त्वमसीति वाक्यमखण्डार्थनिष्ठमस्त्विति संबन्धः। पदद्वयलक्षणयाऽखण्डाऽर्थत्वाऽनङ्गीकारे पूर्वपक्षदशायामुक्तवा-क्याऽप्रामाण्यमाह। नो चेदिति। अतिशुष्कमच्छिद्रं केवलमलाबु अप्सु निमज्जतीति वचनं यथाऽप्रमाणं तथेदमपि स्यादित्यर्थः। तत्त्वमसीति-वाक्यस्यापि वक्ष्यमाणविरोधेन संसर्गादिवाक्यार्थाऽसंभवेन पदद्वयलक्षण-याऽखण्डाऽर्थतैवोचितेति भावः। एतेन सिद्धान्तोपक्रमे उक्त तदुभयलक्ष्य-

Digitized by Google

योरिति द्वितीयकल्पे विरोधबीजाभावात्तद्वोद्ध्यमनुपपन्नमित्युक्तमिति द्रष्टव्यम् ॥ १५१ ॥

मू० ॥ मानान्तराऽधिगतगोचरगामिनी स्या-
च्छब्दस्य लाक्षणिकवृत्तिरिति प्रलापः ॥
सिद्धत्वमात्रमिह लाक्षणिकप्रवृत्ते-
र्निर्वाहकारणमनङ्गमतोऽन्यदस्याः ॥ १५२ ॥

टी० ॥ यत्तु पूर्वपक्षावसरे वाच्याऽर्थसंबन्धितया मानान्तराऽधिगतिर्लक्षणाबीजमिति तथाऽनवगते ब्रह्मणि न लक्षणा स्यादित्युक्तं तदनूद्य दूषयति । मानान्तरेति । अधिगतेति भावे निष्ठा अधिगतिरित्यर्थः । प्रलापोऽसदभिलापः । ननु लाक्षणिकपदस्य लक्ष्येण साक्षात्संबन्धाऽनवगमात्स्वार्थप्रनाड्यैव तदुपस्थापकत्वं वाच्यं तच्च मानान्तरेण तथावगमं विना नेति कथमयं प्रलाप इति चेत्सत्यं मानान्तरं विनाऽपि तदर्थसंबन्धितयाऽवगममात्रेण सा सिध्यति स चाऽवगमस्त्वमहमादिपदलक्ष्येऽहंकारादिसाक्षिणि स्वप्रकाशे तद्बलात्सिध्यति । ब्रह्माऽऽदिपदलक्ष्यं चाऽद्वयं ब्रह्माऽऽदिपदवाच्यं शबलं वस्तुतः स्वसंसर्गशून्ये कल्पितं शबलत्वादध्यस्तत्वाद्वा शबलान्तरवद्रजतादिवदिति तर्केण तत्संबन्धितया सिध्यतीति न मानान्तराऽपेक्षेत्याह । सिद्धत्वेति । ज्ञातत्वमात्रमित्यर्थः । इह लक्ष्ये ॥१५२॥

मू० ॥ मानान्तराऽधिगतता हि न लक्षणायां
किं चित्करी भवति पिङ्गलतावदग्नेः ॥
धूमस्य जन्मनि हि पिङ्गलता न हेतु-
र्यद्यप्यवस्थितवती हुतभुक्शरीरे ॥ १५३ ॥

टी० ॥ ननु तीरादेर्गङ्गादिपदलक्ष्यस्य मानान्तरेण तथाऽधिगतिर्नियमेन दृष्टा तत्कथं सा तत्राऽप्रयोजिकेति चेत्तत्राह । मानान्तराधिगततेति । हीति द्वयं प्रसिद्धौ किं चित्करी निमित्तं न भवतीति संबन्धः । नियमेन तत्र विद्यमानस्याऽपि गौरवेणाऽप्रयोजकत्वे दृष्टान्तमाह । पिङ्ग-

Digitized by Google

लतावदिति । अग्ने रूपमिव किं चित्करी न भवतीति संबन्धः । दृष्टान्तं विवृणोति । धूमस्येति । न हेतुर्हीति संबन्धः । अग्नित्वमेव हि धूमजनकतायामग्नेः प्रयोजकं न तु पिङ्गलाऽग्नित्वमपि गौरवादिति भावः । शुक्तिरजतादेरपि इदमित्यादिपदान्तरेण लक्ष्यत्वसंभवान्मानान्तरेण तस्याऽवगत्यभावाच्च मानान्तरगम्यत्वं तत्प्रयोजकमिति भावः ॥ १५३ ॥

मू० ॥ शब्दस्य लाक्षणिकवृत्तिरपि त्रिधैषा
का चिज्जहाति न जहाति च वाच्यमन्या ॥
भागं जहाति न जहाति च भागमन्या
सोऽयं त्रिधा भवति लाक्षणिकप्रकारः ॥ १५४ ॥

टी० ॥ ननु ब्रह्मादिशब्दानामन्यत्र संगत्यसंभवात्तत्रैव शक्तिः कल्पनीया । एवं च कथं तत्रैव तेषां लक्षणा तच्छक्तपदलक्षिताऽर्थोपादाने चेदमपि शास्त्रमनात्मनिष्ठं स्यादित्याशङ्कां परिहर्तुं लक्षणात्रैविध्यमाह । अथ वा लोके लक्षणाऽनेकविधा तत्र काऽसौ लक्षणा तत्त्वमसिवाक्ये संमतेत्याशङ्क्य तां विवेक्तुं लोके प्रसिद्धं लक्षणाभेदं मत्वाऽऽह । शब्दस्येति । एषा लाक्षणिकवृत्तिरिति संबन्धः । त्रैविध्यमेवाह । का चिदित्यादिना । का चिद्वाच्यं जहाति जहल्लक्षणेत्यर्थः । अन्या वाच्यं न जहाति अजहल्लक्षणेत्यर्थः । अन्या भागं वाच्यार्थांशं जहाति अन्यं भागं न जहाति च जहदजहल्लक्षणेत्यर्थः । तत्त्रैविध्यमुपसंहरति । सोऽयमिति ॥ १५४ ॥

मू० ॥ गङ्गापदं हि निजमर्थमपास्य तीरे
यद्वर्तते भवति सा जहती प्रसिद्धा ॥
शोणस्थितो बहिरितीह तु लक्षणाया-
मादायशोणिमगुणं तुरगे प्रवृत्तिः ॥ १५५ ॥

टी० ॥ लोके क्रमेण तासामुदाहरणमाह । गङ्गापदमितिद्वयेन । निजमर्थं स्ववाच्यप्रवाहमपास्य त्यक्त्वा यद्यस्माच्छोणः शोणिमगुणोऽश्वत्वनियतः ॥ १५५ ॥

Digitized by Google

मू० ॥ सोऽयं पुमानिति वचस्तुभयप्रकारा
देशादिभागपरिवर्जनतः प्रसिद्धा ॥
पुंसश्च केवलमुपात्ततया पदाभ्या-
मेवं त्रिधा भवति लाक्षणिकी प्रवृत्तिः ॥ १५६ ॥

टी० ॥ सोऽयमिति । उभयप्रकारा । जहदजहद्रूपा । तदेवोपपादयति । देशादीति । तदेतद्देशकालवैशिष्ट्यरूपभागवर्जनात्केवलं यथा स्यात्तथा तदिदं पदाभ्यां पुंस उपात्ततया चेत्यर्थः । उपसंहरति । एवं त्रिधेति । गङ्गायां घोष इत्यत्र हि वस्तुतो गङ्गासंबन्धि यत्तीरं घोषान्वययोग्यं तदेव लक्षणया प्रतीयते न तु गङ्गाविशिष्टतीरं तस्य तेन रूपेण घोषाऽन्वयायोग्यत्वादतो गङ्गापदे जहल्लक्षणैव, एवं वह्निः शोणस्तिष्ठतीत्यादौ निष्कृष्टद्रव्यगुणमात्रस्य बहिर्देशस्थित्यनुपपत्तेः शोणगुणविशिष्टस्यैवाश्वस्य नियमेन स्थित्यवगमात्साऽजहल्लक्षणा स्वार्थमुपादायैव तस्य द्रव्ये वृत्तेः । सोऽयमित्यादौ तु प्रागुक्तन्यायेनाऽभेदो विरुद्धदेशादिपदार्थभागं परित्यज्य धर्मिस्वरूपं पदार्थभागमुपादायेदं वाक्यमभेदं प्रतिपादयतीति तत्र सा जहदजहद्रूपेति लाक्षणिकी वृत्तिस्त्रिधा भवतीत्यर्थः ॥ १५६ ॥

मू० ॥ वेदेऽपि लाक्षणिकवृत्तिरियं त्रिधेयं
यज्ञायुधीतिवचने तु जहत्प्रवृत्तिः ॥
वैश्वानरादिवचनेष्वजहत्प्रवृत्ति-
स्तत्त्वमिरोरुभयरूपतया प्रवृत्तिः ॥ १५७ ॥

टी० ॥ एवं वेदेऽपि तत्त्रैविध्यमुदाहरणेनाह । वेदेऽपीति । यज्ञायुधी यजमानः स्वर्गं लोकमेतीति वाक्येऽन्त्येष्टिप्रकरणस्थेऽग्निहोत्रकपालादिपात्रैर्विशिष्टो यजमानः स्वर्गं गच्छतीति प्रतीयते तदनुपपन्नम् । अग्निहोत्रपात्राणां प्रत्यक्षेणैव दाहात् यजमानस्य अग्निहोत्रकपालादियज्ञायुधविशिष्टस्य स्वर्गगमनाऽयोगाद्यज्ञायुधीशब्दः तस्मिन्स्वार्थं परित्यज्य वर्तेत इति सा जहल्लक्षणा मत्वर्थप्रत्ययस्य संबन्धमात्रनिष्ठत्वमभिप्रेत्य संबन्धिनि यजमाने जहल्लक्षणेत्युक्तं विशिष्टात्केवलमन्यदित्याशयेन वा

जहत्प्रवृत्तिः। जहल्लक्षणा वृत्तिः। वैश्वानरादिवचनेष्विति। प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमित्यत्र वैश्वानरशब्दो जाठरेऽग्नौ रूढ़स्तदवच्छिन्ने चात्मनि वर्त्तते अन्यथा आत्मानं वैश्वानरमिति सामानाधिकरण्याऽयोगात् तथा च स्वार्थाऽपरित्यागेन स आत्मनि वर्त्तत इति तस्य तत्राऽजहल्लक्षणा। आदिशब्देन सृष्टीरुपदधातीत्यत्र सृष्टिसृष्टीष्टकासु वर्त्तमानः सृष्टिशब्दो गृहीतः। तत्त्वंगिरोरिति। तत्त्वमसिवाक्यस्य तत्त्वंपदयोरित्यर्थः। उभयरूपतया। जहदजहद्रूपतया पदद्वयार्थेऽपि अभेदविरोधिविशेषणांशपरित्यागेनापरोक्षचैतन्याऽद्वयानन्दे पदद्वयप्रवृत्तेः सा जहदजहल्लक्षणेत्यर्थः। एतेन ब्रह्माऽऽत्मनि शक्तब्रह्मादिपदस्य कथं तत्र लक्षणा ब्रह्माऽऽदिपदलक्ष्यस्य शास्त्राऽर्थत्वे इदमपि शास्त्रमनात्मनिष्ठमिति दूषणद्वयं परिहृतं शबले ब्रह्मणि परिगृहीतसङ्गतिकस्य शुद्धे ब्रह्माऽऽत्मनि लक्षणोपपत्तेरिति ॥ १५७ ॥

मू० ॥ ब्रह्माऽज्ञाने ह्यद्वितीयत्वमेकं
ब्रह्मण्यन्यच्चाद्वितीयत्वमस्ति ॥
तत्संपर्कात्तच्च चाद्वैतताऽन्या
व्युत्पन्नोऽयं ब्रह्मशब्दस्तु तत्र ॥ १५८ ॥

टी० ॥ ननु कथं तर्हि ब्रह्मशब्दस्य पूर्णब्रह्माऽर्थत्वं ब्रह्मातिरिक्तस्य सर्वस्य परिच्छिन्नत्वेन तच्छबले पूर्णतारूपबृहत्त्वासंभवादित्याशङ्क्याह। ब्रह्माऽज्ञानेति। ब्रह्माश्रयविषयाऽज्ञान इत्यर्थः। हि यस्माद्ब्रह्माऽज्ञान एकमद्वितीयत्वमस्ति तस्य सकलप्रपञ्चविवर्त्ताऽऽश्रयतया ब्रह्मण्यध्यस्तत्वेन तदन्तर्भूततयाऽत्र सजातीयादिभेदशून्यत्वाद् ब्रह्मणि शुद्धे चाऽन्यदद्वितीयत्वमस्ति तदतिरिक्तस्य सर्वस्य मिथ्यात्वेन जीवानां च तन्मात्रत्वेन सजातीयादिभेदशून्यत्वात्। तत्संपर्कात्तयोः परस्परमधिष्ठानाऽध्यस्ततया तादात्म्यात्संवृत्ते तत्र तदुभयात्मके शबले अन्याऽद्वैतताऽस्ति अद्वितीयद्वयात्मकस्य तस्याऽप्यद्वैततानियमात्। एवं सति ब्रह्मशब्दस्य वेदान्तेषु जगत्कारणे बहुशः प्रयोगाज्जगत्कारणत्वस्य केवलेऽसंभवात् मायां तु प्रकृतिं देवात्मशक्तिमित्यादिवचनैश्चेर्हति शबले व्युत्पत्तिरविरुद्धेत्याह । व्युत्पन्न इति ॥ १५८ ॥ (शेषमग्रे)

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12. DECEMBER, 1882. [Vol. IV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1882.

Price Rs. 9-0 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कैरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

॥ अथ चित्सुखी ॥

॥ तत्र प्रथमपरिच्छेदावशेषः ॥

(*Continued from page 539.*)

न च पूर्वज्ञानस्य तत्संस्कारस्य वा प्रतिपन्नोपाधावात्मनि नासीदात्माधिकरणं ज्ञानं संस्कारो वेत्यभावो बोध्यते, ईश्वरज्ञानेन च मुद्गरप्रहारेणेव घटादेः प्रपञ्चस्य प्रध्वंस एव क्रियते नाभावबोधनम्, अतो नातिव्याप्तिः।

एतेन बाधकज्ञानविषयत्वाच्छुक्त्यादेर्ब्रह्मणश्चानिर्वाच्यत्वप्रसङ्ग इत्यपास्तम्, धर्मितया बाधकज्ञानप्रतिपन्नत्वेऽपि बोध्यमानाभावप्रतियोगित्वाभावात्।

अत एव प्रतिपन्नोपाधौ नाभूदस्ति भविष्यतीति कालत्रयसत्तानिषेधो बाधस्तद्विषयत्वं च बाध्यत्वमिति केचिदाचार्याः।

न चाव्याप्त्यतिव्याप्ती, शुक्तिशकले प्रतिपन्नस्य रजतस्य कालत्रयेऽपि तत्र सत्ताभावस्य नेदं रजतमिति बाधेन बोध्यमानत्वात्, लौकिकपरमार्थरजतस्य देशान्तरादौ सत्त्वेन प्रमितस्य तस्य तत्रासत्त्वबोधनस्याशक्यत्वात्।

तस्य शुक्तिकाशकले कालत्रयासत्त्वं बोध्यत इति चेत्, न, तस्यात्राप्रसक्तेः।

रजताभासप्रसक्तिरेव तत्प्रसक्तिरिति चेत्, मैवम्, रजताभास इत्यप्रतीतेः, इदं रजतमित्येव प्रतीतेश्च।

प्रतिपन्नोपाधौ निषेधात् तदाभासता पश्चान्निश्चीयत इति चेत्, एवं तर्हि नाव्याप्तिः, प्रतिपन्नोपाधौ तस्य निषेधस्य त्वयाङ्गीकारात्, अत एव देशान्तरादौ प्रमितस्य लौकिकपरमार्थरजतस्यैतन्निषेधप्रतियोगित्वम्, आभासविषयत्वात् तस्य, अन्यथा जगति रजतमेव न स्यात्।

तस्माल्लौकिकपरमार्थरजतमेव नेदं रजतमिति निषेधप्रतियोगीति पूर्वाचार्यवाचोयुक्तिरपि पुरोवर्तिनि रजतार्थिनः प्रवृत्तिदर्शनाल्लौकिकरज-

तात्मत्वेनापरोक्षतया प्रतीतस्य कालत्रयेऽपि लौकिकरजतमिदं न भवतीति निषेधप्रतियोगितामङ्गीकृत्य नेतव्या ।

न चैवं सत्यन्यथाख्यातेः प्रसक्तिः, संसर्गवत् संसर्गिणोऽपि ख्याति-बाधान्यथानुपपत्त्या सदसद्विलक्षणताङ्गीकारात्, एवं च सति कुतोऽति-व्याप्तिः, प्रमाणं च तत्र ख्यातत्वे सति बाध्यत्वान्यथानुपपत्तिः ।

न च देशान्तरे सत्त्वादत्रासत्त्वाच्च ख्यातिबाधयोरन्यथाप्युपप-त्तिः, अन्यत्र सत्ताया इह प्रतीत्यहेतुत्वात्, न हि भूमावम्भोरुहं सदिति दृष्टाक्षस्यापि नभसि तदवभासते, अप्रतीतत्वादेव बाधायोगात् ।

न चासतोऽभाने शब्दस्यापार्थकत्वप्रसङ्गः, अपरोक्षभानाभावस्येह विवक्षितत्वात्, परोक्षभानस्य चानिराकरणात् ।

न च सच्छब्दार्थानिरुक्तेर्यत् सत् तदबाध्यमिति व्याप्त्यसिद्धिः, त्वयापि हि तत्त्वे सदसती इति तत्त्वं व्यवस्थापयता यदेव सत्त्वेन व्यवस्थापितं तस्यैव मयापि व्यवहारदशायामबाध्यत्वोक्तेः ।

न चान्यथैवोपपत्तिः, सदसत्त्वयोरेवाबाधाभानप्रयोजकत्वोपपत्तौ तद्वितरवैलक्षण्यस्य तत्प्रयोजकत्वकल्पनायां गौरवात् ।

न चासतोऽपि तत्पदात् प्रतिभासनात् सत्तायुक्तस्यापि प्रपञ्चस्य बाधाभ्युपगमात् तयोरप्रयोजकत्वम्, अपरोक्षतया भानस्य व्यवहारदशायां चाबाध्यस्येह विवक्षितत्वात् ।

ननु सत्त्वासत्त्वयोरेवाबाध्यत्वाभानप्रयोजकत्वे यत् सद्विलक्षणं तद्बाध्यं यदसद्विलक्षणं तत् ख्यातिरिति व्यतिरेके गौरवं स्यात् ।

सत्त्वासत्त्वयोस्तु ख्यातिबाधप्रयोजकतायां लाघवमिति चेत्, मैवम्, तवापि व्यतिरेके गौरवस्य तुल्यत्वात्, अख्यात्यबाध्यत्वयोः सदसद्वैलक्षण्यस्य प्रयोजकताङ्गीकारात् ।

एवमपि प्रयोजकत्वविनिगमनायां को हेतुरिति चेत्, पक्षान्तरे ख्यात्यसंभवः, तथाहि न तावत् सत्त्वादध्यस्तस्य ख्यातिः, तस्येहासत्त्वात्, सतश्च ख्यातौ भ्रान्तिबाधयोरनुपपत्तेश्च, असत्त्वे वाऽपरोक्षतया भानानु-

पपत्तेः, अनुमानमप्यत्र प्रमाणम्, विमतमनिर्वचनीयं बाध्यत्वाद् यन्नैवं तन्नैवं यथात्मेति ।

संसर्गस्यैव बाध्यत्वाद्रजतस्य बाध्यत्वमसिद्धमिति चेत्, न, द्वयोरपरोक्षतया प्रतिभासमानयोः संसर्गमात्रनिषेधे वनस्पत्योरिव विविक्तयोर्बाधोत्तरकालमुभयोरपीहावभासप्रसङ्गात् ।

न चाप्रसिद्धविशेषणः पक्षः, यस्मात् ।

एकालम्बनसंसर्गनिषेधे सदसत्त्वयोः ।

धर्मत्वाद्रूपरसवत् सिद्धानिर्वचनीयता ॥ १८ ॥

विवादाध्यासिते सदसत्त्वे एकधर्मिनिष्ठात्यन्तताभावप्रतियोगिनी धर्मत्वाद् रूपरसवदिति, अनिर्धारितधर्मिनिष्ठतया सामान्यतः सिद्धस्य सदसद्वैलक्षण्यस्य केवलव्यतिरेकिणो रजतधर्मिनिष्ठतयोपसंहाराद्‌प्रसिद्धविशेषणत्वाभावात् ।

न चानिर्वचनीयत्वे सदिदं रजतमिति भ्रमानुभवविरोधः, अधिष्ठानेदन्तासंसर्गवत् तत्सत्तासंसर्गस्याप्यनिर्वचनीयस्यैव विभ्रमेऽनुभवात् ।

अपिच ब्रह्मणीव पारमार्थिकसत्तायाः प्रपञ्च इव च व्यावहारिकसत्ताया अभावेऽपि प्रातिभासिकसत्तास्वीकारेण सदिदं रजतमित्यनुभवो न विरुध्यते ।

न च नेदं रजतमित्यसत्त्वानुभवविरोधः, अर्थक्रियासामर्थ्यलक्षणसत्त्वस्यैव तत्र निषिध्यमानत्वात् ।

न चानिर्वाच्ये रजतशब्दप्रयोगायोगः, सविकल्पकरजतानुभवसंस्कारजन्यतया रजतभ्रमस्य तद्वाचकशब्दोल्लेखोपपत्तेः ।

न चानिर्वचनीयत्वे रजतस्य प्रतीत्यनुपपत्तिः, शुक्त्यवच्छिन्नात्मचैतन्यस्याविद्याविवर्ततया चैतन्येऽध्यस्तत्वात्, तेन प्रतीत्युपपत्तेः ।

न च संप्रयोगाभावादपरोक्षत्वानुपपत्तिः, अध्यस्तस्यापरोक्षतायां संप्रयोगानपेक्षत्वात्, अन्यथा भवतोऽपि रजततत्संसर्गयोरपरोक्षत्वाभावापातादधिष्ठानसंप्रयोगादेवापरोक्षत्वमस्मन्मतेऽपि तुल्यम्, अन्यत्र स्वपक्षपक्षपातात् ।

Digitized by Google

न चेन्द्रियान्वयव्यतिरेकानुविधायित्वं रजतस्य, तयोरधिष्ठानग्रहणेनान्यथा सिद्धत्वात् ।

न चैवं सति स्पर्शनेनाधिष्ठाने गृहीतेऽपि चाक्षुषो रजतविभ्रमः स्यादिति वाच्यम्, सादृश्यदर्शनजन्ये विभ्रमे तेनैवेन्द्रियेण सादृश्यस्य ग्रहणनियमात्, अन्यथा तत्रापि तिक्तो गुड इति विभ्रमो न भवेत्, आरोप्यस्य रसस्य रसनेन्द्रियग्राह्यतया द्रव्यग्राहकस्पर्शनेन्द्रियागोचरत्वात् ।

तस्मात् तत्राधिष्ठानग्रहण एवेन्द्रियस्योपयोग इति त्वयापि वक्तव्यम्, तथा च न तत् प्रकृतेऽपि दण्डवारितम् ।

न च ज्ञानद्वयाङ्गीकारादख्यातिप्रसङ्गः, इदमंशावच्छिन्नसाक्षिचैतन्यस्यैवाधिष्ठानज्ञानफलभूतस्य स्वमायाविवर्तरजतादिसिद्धित्वात्, अन्तःकरणवृत्तिलक्षणज्ञानद्वयानङ्गीकारात् ।

तदेवं लक्षणप्रमाणयोरनिर्वचनीये रजतादिविभ्रमे संभवात् तद्वद्द्वैतप्रपञ्चविभ्रमोऽपि वेदान्तवाक्यप्रमाणजन्यादधिष्ठानाद्वितीयात्मविज्ञानाद्विलीयत इति सिद्धम् ।

ननु कथं वेदान्तवाक्यानां सिद्धार्थबोधकत्वम्, सकलपदानां लोके कार्य एव संगतिग्रहणात्, "लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधक" इति न्यायात्, लोके च प्रवर्तकवचनश्रवणसमनन्तरं श्रोतुः प्रवृत्तिमुपलभ्य प्रवृत्तिलिङ्गेन प्रवर्तकप्रत्यये पदसमुदायस्य सामान्यतः सामर्थ्यमधिगम्य पुनरावापोद्वापाभ्यां* च प्रत्येकं कार्यान्विते पदानां संगतिग्रहणात्, आनयनादिलक्षणकार्यविशेषव्यभिचारेऽपि कार्यमात्रस्य सर्वत्राव्यभिचारात्, तदन्वितस्वार्थेषु† पदानां सामर्थ्याधिगमात् ।

न चान्तरेणापि व्यवहारं पुत्रस्ते जात इत्यादिवाक्यश्रवणसमनन्तरं श्रोतुर्मुखविकासादिना लिङ्गेन हर्षमनुमाय तद्धेतुप्रत्यये वाक्यस्य सामर्थ्यं सामान्यतोऽधिगम्यावापोद्वापाभ्यां‡ पुनः पुत्रादिपदानां तनया-

*—द्वाराभ्यामिति सर्वत्र पा० ।
†—स्वार्थे इति पा० ।
‡—द्वारा—इति पा० ।

व्यर्थविशेषेषु संगतिग्रहो दृश्यत इति वाच्यम्, परिशेषावधारणानुपपत्तेः, प्रियासुखप्रसवादेरपि हर्षहेतोः संभवात्, यत्र च प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति प्रसिद्धपदसमभिव्याहारात् प्रसिद्धेतरपदार्थोऽप्रसिद्धमधुकरपदार्थः समधिगतविभक्त्यर्थश्च यं मधुपाने कर्तारं पश्यति तं मधुकरशब्दवाच्यत्वेन प्रत्येति तत्रापि न कार्यपरताव्याकोपः, तादृश्या अपि व्युत्पत्तेर्व्यवहारनिबन्धनप्रथमकार्यव्युत्पत्तिनिबन्धनतया तदानुगुण्येन व्यवस्थानात्, पुत्रस्ते जात इत्यादेश्च सिद्धार्थप्रयोगस्य लाक्षणिकत्वेनाप्युपपत्तेः, परस्परान्वयस्य कार्यान्वयाव्यभिचारात्, पुत्रस्ते जातस्तं पश्येति वक्तव्येऽपि कार्ये विव्रियतामिति पदावधीरणेन द्वारं द्वारमिति प्रयोगवत् प्रयोगोपपत्तेः ।

ननु न कार्यान्विते पदानां सामर्थ्यमध्यवसातुं शक्यम्, कार्यस्य कार्यान्तराभावेन कार्यपदस्य कार्यान्वितत्वार्थाभिधायित्वानुपपत्तेः, योग्येतरान्विताभिधाने च प्रयोजकद्वैविध्यापातादिति चेन्न, कार्यान्वयान्वयिनि कार्यपरपदार्थान्विते वा पदशक्तिग्रहणाभ्युपगमे प्रयोजकद्वैविध्याप्रसक्तेः ।

यत्तु कैश्चिदुच्यते कार्यान्वयान्वयिनीत्यत्र किं कार्यं विशेषणमन्वयस्य किं वोपलक्षणम् ।

नाद्यः, अन्वयस्य कार्यविशिष्टस्य कार्यान्वये सति कार्यस्य संबन्धद्वयप्रसङ्गात्, युगपच्च कार्यान्वययोर्विशेषणता विशेष्यता चापद्येत, न चैतत् सर्वमुपपन्नम्, अलौकिकत्वात् ।

नापि द्वितीयः, कार्यस्य शब्दशक्त्यगोचरत्वप्रसङ्गादिति ।

तदसत्, कार्यान्वयान्वयिनीति कार्यस्य संबन्धव्यावर्तकमात्रतया विवक्षितत्वात्, तत्र यथा गवादिपदार्थानामकार्यरूपाणां तत्संबन्धिनिरूपकता तथैव कार्यस्यापि संबन्धस्योभयनिष्ठत्वात्,इतरथा योग्येतरान्वयपक्षेऽप्यन्वययोग्येनेतरेणान्वयस्य विवक्षितत्वात्· अन्वयस्य विशेषणोपलक्षणपक्षयोरुक्तदोषानुषङ्गस्तुल्य एव स्यात्, उपलक्षणपक्षेऽपि कार्यस्य शब्दशक्तिविषयत्वं न व्याहन्यते, कार्योपलक्षितत्वस्यान्वयविशेषणतया

कार्यस्यापि परम्परया शब्दशक्तिप्रतियोगित्वोपपत्तेः, एवमनभ्युपगच्छतश्च स्वप्रच्युत्युपलक्षितसत्तायोगित्वमनित्यत्वमित्येवमादि लक्षणमपि न निर्वहति, प्रच्युतेः कार्यानन्वये सत्तायोगित्वमात्रस्यैव लक्षणत्वादात्मादेरप्यनित्यत्वापत्तेः, स्वयमेव चानुभूतिरनुभूतिव्यवहारहेतुप्रकाश इति प्रतिज्ञाय मोक्षदशायां व्यवहारहेतुत्वाभावा*ल्लक्षणस्याव्याप्तिमाशङ्क्य व्यवहारहेतुत्वमुपलक्षणमित्यङ्गीकृत्योपलक्षितत्वमपि क्वचित् साध्यम्, यथा विनाशोपलक्षितसत्तायोगित्वमनित्यत्वमिति स्वकीयग्रन्थे निबद्धत्वात् ।

एतेन विवादपदानि पदानि न कार्यान्वयान्वयिनि शक्तिमन्ति पदत्वात् कार्यपदवदित्यनुमानमपास्तम्, विशेषणोपलक्षणपक्षयोरुक्तदूषणोद्धरणात्, कार्यपदस्यापि कार्यान्वयान्वयिनि शक्तिमत्त्वेन दृष्टान्तस्य साध्यविकलत्वात्, विवादपदानि पदानि कार्यपराणि पदत्वात् कार्यपदवदिति प्रयोगसंभवाच्च ।

न च 'विज्ञानमानन्दं ब्रह्मे'त्यादिपदेषु व्यभिचारः, तेषामपि द्रष्टव्य इत्यादिविधिशेषतया कार्यपरत्वात् ।

तदेवं सकलपदानां कार्यपरत्वान्न सिद्धे ब्रह्मणि वेदान्तवाक्यानां प्रामाण्यमिति ।

अत्रोच्यते, न तावत् सिद्धे प्राथमिकव्युत्पत्त्यसंभवः, प्रागुदीतन्यायेन पुत्रस्ते जात इत्यादिवाक्यादपि व्युत्पत्तिसंभवात् ।

न च तत्र पारिशेष्यावधारणानुपपत्तिः, यतः ।

हृष्टचैत्रसुतोत्पत्तेस्तत्पदाङ्कितवाससा ।
वार्त्ताहारेण यातस्य परिशेषविनिश्चितेः ॥ १९ ॥

यो हि परिदृष्टचैत्रप्रहर्षहेतुपुत्रजन्मा पुत्रपदालिप्तकुङ्कुमाङ्कितपटप्रदर्शकेन वार्त्ताहारेण सह चैत्रसकाशं गतस्तस्य दिष्ट्या वर्धसे चैत्र पुत्रस्ते जात इति वार्त्ताहारव्याहारश्रवणसमनन्तरं समुन्मीलत्पुलकसकलकलेवरमुत्फुल्लगण्डयुगलमुल्लसितनयनयुगलं चैत्रमवलोकयतस्तत्प्रमोदलि-

*—रहेतुत्वाल्लक्षण—इति पा० ।

ङ्गेन स एव नूनमनेन मदवलोकितः सुतसंभवः प्रमोदहेतुरेतस्माद्वाक्यादधिगत इति परिशेषावधारणोपपत्तेः ।

न च प्रियासुखप्रसवस्यापि संभवात् परिशेषावधारणानुपपत्तिः, पुत्रपदाङ्कितपटदर्शनवत् प्रियासुखप्रसवसूचकाभावात् ।

न च विद्यमानतामात्रेण तत्रापि शङ्कावकाशः, कार्येऽप्युपानच्छत्रदण्डाद्याहरणलक्षणानेकावान्तरकार्यदर्शनेन शङ्काप्रसरस्य दुर्निवारत्वात् ।

एवमुक्तरीत्या सिद्धेऽपि प्राथमिकव्युत्पत्तेः संभवात् प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्यादिप्रसिद्धपदसमभिव्याहारनिबन्धनव्युत्पत्तावपि सिद्धार्थपरता न व्याहन्यते, मुख्यार्थविषयतया सिद्धेऽपि प्रयोगे लाक्षणिकत्वकल्पनानुपपत्तेः ।

न च प्रथमावगतकार्यान्वयानुरोधेन * लक्षणाश्रयणम्, प्रथममपि पुत्रस्ते देशान्तरादागतः पुत्रस्ते गच्छति पुत्रस्ते सुखी पुत्रस्ते निरामय इत्यादिप्रयोगेष्वावापोद्धाराभ्यां पुत्रादिपदानां स्वस्वार्थे व्युत्पत्तेरुपपत्तेः, प्रथमव्युत्पत्त्यनुसारेण च लक्षणाश्रयणे लोके भावार्थकार्ये व्युत्पत्तेर्वेदे तदसंभवाद् यजेतेत्यादिशब्दानामबोधकताप्रसङ्गः, कामाधिकारे च प्रथमं कामसाधने नियोगे लिङादिपदानां व्युत्पत्तेर्नित्यनैमित्तिकाधिकारे लाक्षणिको लिङादिप्रयोगः स्यात् ।

एवं नित्यनैमित्तिकयोः स्वतन्त्रकार्ये पदशक्त्यधिगतेरङ्गवाक्ये परार्थकार्ये लिङादिपदप्रयोगो मुख्यो न स्यात् ।

अथावधीरितभावार्थकामसाधनस्वतन्त्रपरतन्त्रविशेषं कार्यमात्रं व्युत्पत्तिगोचरः सर्वत्र तस्याव्यभिचाराल्लाघवाच्चेति मतम्, तर्हीहापि योग्येतरान्विते पदशक्तेरव्यभिचाराल्लाघवाच्चेति समः समाधिः ।

एवं च सति कार्यान्वयान्वयिनि पदशक्तिरित्यपास्तम्, अन्वितमात्रस्य प्रयोजकत्वे संभवति कार्यान्वयान्वयिनीति कल्पनायां गौरवात् ।

न च कार्यपरपदार्थान्वितस्वार्थे शक्तिः, विकल्पासहत्वात् ।

तथाहि कार्यपरत्वं पदधर्मः किं वा पदार्थधर्मः ।

*—कार्यानुरोधेन इति पा० ।

नाद्यः, सर्वपदानां लिङादिपदवत् कार्यपरत्वे पर्यायतापत्तेः, अथ पर्यायतापरिहाराय मुख्यगौणसाक्षात्परंपरादिभेदेन कार्यपरतां विशिंष्यात्, न तर्ह्येकप्रयोजकत्वलाभः, मुख्यादिविशेषणानां सर्वपदेष्वेकरूपताभावात्, न हि सिंहो देवदत्त इत्यादौ सिंहादिशब्दानां मुख्यगौणयोस्तत्परत्वमेकरूपम्, तथा सति देवदत्तादेरपि केसरादिमत्त्वप्रसङ्गात् ।

नापि द्वितीयः, पदार्थानां कार्याबोधकत्वेन तत्परत्वाभावात् ।

अथ कार्यशेषत्वं कार्यपरत्वं पदार्थानाम्, तर्हि कार्यशेषत्वं कार्यपदार्थस्य नास्तीति तदन्विताभिधायिकारकपदानां कार्यपदार्थान्विताभिधायित्वं न स्यादिति न किंचिदेतत् ।

यत् पुनरनुमानं कार्यपराणि सर्वपदानि पदत्वात् कार्यपदवदिति तदपि न पिवेच हन्यादित्यादिनिषेधवाक्यस्थपदैरनैकान्तम्, न हि तत्र प्राप्तक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण किंचिदनुष्ठेयमवबोध्यते, हननप्रागभावस्यानादित्वेनाननुष्ठेयत्वात्,न हन्यामिति संकल्पस्य विधारकप्रयत्नस्य वा विधानाभ्युपगमे तस्याप्रतीयमानतया लक्षणाप्रसङ्गात्, प्राप्तक्रियायाश्चेष्टसाधनत्वाभावबोधादेव निवृत्तेर्वाक्यस्य चरितार्थत्वोपपत्तेश्च ।

न च 'विज्ञानमानन्दं ब्रह्मे'त्यादिवचसां प्रतिपत्तिविधिशेषत्वम्, विकल्पासहत्वात् ।

तथाहि किं शाब्दी प्रतिपत्तिर्विधेयोत भावनात्मिका· अथ साक्षात्कारलक्षणा ।

नाद्यः, तस्याः 'स्वर्गकामो यजेते'त्यादिशब्दादिवाद्विदितपदपदार्थसंगतेः स्वयमेवोत्पत्तेः ।

न द्वितीयः, ज्ञानप्रकर्षहेतुत्वस्यान्वयव्यतिरेकसिद्धत्वेन भावनाया अविधेयत्वात् ।

न तृतीयः, साक्षात्कारस्य ब्रह्मरूपत्वेन नित्यत्वेनाविधेयत्वात्, अन्तःकरणपरिणतिरूपत्वे चानन्दसाक्षात्कारतया फलत्वेन विधेयत्वानुपपत्तेः, द्रष्टव्य इत्यादिपदानां चार्हार्थतयाप्युपपत्तेः ।

अथापि सिद्धार्थव्युत्पत्तौ किं मानमिति चेत्, उच्यते ।

विवादाध्यासितः सिद्धः शब्दव्युत्पत्तिगोचरः ।
मेयत्वान्न्यायगम्यत्वात् तवाभिमतकार्यवत् ॥ २० ॥

न च कार्यत्वमुपाधिः, व्यतिरेकासिद्धेः, यत् कार्यं न भवति नासौ शब्दव्युत्पत्तिगोचरो यथा संप्रतिपन्नमिति व्यतिरेकव्याप्तेः परं प्रति दर्शयितुमशक्यत्वात् ।

नन्वाकृतेरेव शब्दार्थत्वाद्व्यक्तेस्तदभावात् तत्रानैकान्तिकमिति चेत्, मैवम्, आकृतेः शब्दार्थत्वेऽपि तस्या एव शब्दार्थत्वमिति नियमानङ्गीकारात्, व्यक्त्याकृतिजातयः पदार्था इत्यक्षचरणपक्षपातिभिरङ्गीकारात्, आकाशादिपदानां च व्यक्तिवचनताया मीमांसकैरप्यभ्युपगमात्, व्यक्तिशब्दस्य च व्यक्तिवाचकत्वात् ।

ननु तत्रापि व्यक्तित्वोपाधेरेव वाच्यत्वं न च व्यक्तेस्तस्यालक्ष्यत्वादिति चेत्,मैवम्, क्वचिच्छब्दान्तरवाच्यस्यैव शब्दान्तरलक्ष्यत्वाभ्युपगमात्, व्यक्तिः शब्दवाच्या न भवतीति स्ववचनव्याघाताच्च ।

तस्मात् सिद्धं सिद्धे ब्रह्मणि वेदान्तानां प्रामाण्यमित्यङ्गीकृत्यैतदवोचाम, कार्यं प्रामाण्यमेव शब्दस्यानुपपन्नं तत्र संगतिग्रहणायोगात् ।

ननु कथं संगतिग्रहणायोगः, प्रवृत्तिदर्शनात् प्रवर्तकज्ञानमनुमाय तस्य च प्रवर्तकज्ञानत्वादेवात्मीयप्रवर्तकज्ञानवत् कार्यविषयतामध्यवस्यानन्तरं शब्दान्वयव्यतिरेकानुविधायितया तस्य शब्दजन्यत्वावगमेन तत्रैव शब्दशक्तेर्ग्रहणात् ।

न च स्वात्मनि प्रवर्तकबोधस्येष्टसाधनविषयत्वात् परप्रवृत्तावपि तदेव प्रवर्तकतयानुमीयते न कार्यमिति वाच्यम्, अतीतानागतविषयेष्विष्टसाधनज्ञानेषु प्रवर्तकत्वव्यभिचारात् ।

अथ कृतिसाध्येष्टसाधनज्ञानं प्रवर्तकम्, तर्हि कार्यमेव नामान्तरेण प्रवर्तकं त्वयाप्यङ्गीकृतम्, तस्यैव कृतिसाध्यत्वात्, "कृतिसाध्यं प्रधानं यत् तत् कार्यमभिधीयते" इत्यभिधानात् ।

तथापि कृतिसाध्येष्टसाधनज्ञानमेव प्रवर्तकं न केवलं कार्यज्ञान-

मिति चेत्, मैवम्, इष्टसाधनतावबोधस्य कार्यावबोधं प्रति हेतुतयान्यथा सिद्धेः, उक्तं हि ।

किंतु[१] स्वयं क्लेशरूपं कर्म यत् कार्यतां व्रजेत् ।
फलसाधनता तत्र कारणं तेन कार्यता ॥

इति ।

ननु चिकीर्षैवैषा ममेदं कार्यमिति न तु तदतिरिक्तं कार्यं नामात्र किंचित् प्रतीयत इति चेत्, मैवम्, अन्तरेणापि कार्यधियं समीहितसाधनतामात्रावबोधात् सुधामरीचिमण्डलोदयादौ चिकीर्षाया अप्यनुपपत्तेः ।

न चास्याः कार्यधियः कृतियोग्यतामात्रमालम्बनम्, कृतियोग्ययोरपि दुःखतत्साधनयोस्तददर्शनात्, नापि समीहितसाधनम्, अतीतवर्तमानयोः समीहितसाधनयोस्तदभावात्, नापि फलमेव, तत्साधनेऽपि दर्शनात्, नापि फलतत्साधनयोरनुस्यूतमभिलाषगोचरतामात्रमस्या आलम्बनम्, अभिलाषमात्रगोचरेऽपि सुधामरीचिमण्डलादौ तदभावस्य दर्शितत्वात् ।

तस्मादेभ्योऽतिरिक्त एव कश्चिदाकारः कार्यधीगम्यः, स एव चाकारः कृतिसाध्यः कृत्युद्देश्यः कार्यमित्युच्यते, स एव च प्रवर्तकतया स्वात्मन्यधिगतत्वाच्छब्दशक्तेर्गोचरः ।

तथापि कथमलौकिकनियोगे वैदिकलिङादिशब्दानां व्युत्पत्तिरिति चेत्, उच्यते,यद्यपि लोकव्युत्पत्त्यनुसारेण क्रियायाः कार्यत्वं प्राप्तम्, तथापि वेदे 'स्वर्गकामो यजेते'ति नियोज्याभिधायिना स्वर्गकामपदेन समभिव्याहारान्नियोज्यः, "स च कार्यं यः स्वकीयत्वेन बुध्यत" इति न्यायात्, तस्य च कामिसंबन्धात् साध्यस्वर्गविशिष्टस्य क्षणप्रध्वंसिन्यां क्रियायां कालान्तरभाविस्वर्गसाधनयोग्यतावैधुर्येण कार्यताबुद्ध्यनुत्पत्तेः क्रियातोऽतिरिक्तं कालान्तरभाविफलसाधनं नियोगमेव नियोज्यं प्रति लिङादयः कार्यमवगमयन्ति, तच्च स्वात्मनि पुरुषं नियुञ्जानं नियोग इति मानान्तरापूर्वतया अपूर्वमिति च व्यपदिश्यते ।

न च फलजनकतया फलं प्रति शेषत्वादपूर्वस्य प्राधान्यप्रच्युतिः,

१ अयमर्थः, हितसाधनताकार्यतयोः पूर्वं भेद उक्तः, अनन्तरं हितसाधनेष्वेव किमिति कार्यताप्रतिर्नान्यत्रेति शङ्कां परिहरन्त आहुः शालिकनाथाः किंत्विति ।

स्वसिद्ध्यनुकूलनियोज्यलाभायैव फलशेषतावलम्बनात्, स्वशेषभूतगर्भदासोपकाराय संविदधानस्य[1] स्वामिन इव प्राधान्यानुपरोधात्, तदुक्तम् ।

स्वात्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये ।
कुर्वन् स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥

इति ।

तदेवमलौकिकत्वेऽपि नियोगस्य यूपाहवनीयादिवत् पदान्तरसमभिव्याहारात्लिङादीनां तत्र संबन्धग्रहणोपपत्तेरुपपन्नं तत्राम्नायस्य प्रामाण्यम्, प्रयोगश्च, विवादाध्यासिता लिङादय एतत्क्रियातिरिक्तकार्याभिधायिनः कार्याभिधायित्वाद् गामानयेत्यादिपदवदिति, विपक्षे यागातिरिक्तकार्यानभ्युपगमाद् यागस्य च स्वर्गसाधनत्वानुपपत्तेः 'स्वर्गकामो यजेते' त्यादिवाक्यानामप्रामाण्यप्रसङ्गो बाधक इति ।

अत्रोच्यते, भवेदेष मनोरथो यदि स्वात्मन्यपि कार्यबोधस्य प्रवर्तकत्वमध्यवसीयेत, समीहितसाधनताया एव तु स्वात्मनि प्रवर्तकत्वाध्यवसायात् ।

न च भूतादौ व्यभिचारः, यतः ।

कार्यस्यावगतेर्हेतुर्याहशं हितसाधनम् ।
प्रवृत्तेस्ताहशं हेतुर्व्यभिचारस्ततः कुतः ॥ २१ ॥

येनापि हि कार्यावबोधस्यैव प्रवर्तकत्वमभ्युपेयतेऽभ्युपेयत एव तेनापीष्टसाधनतावबोधं प्रति हेतुता, तदभावे कार्यबोधानुपपत्तेः, तत्रापीष्टसाधनतामात्रस्य भूतादौ व्यभिचारात् कृतियोग्येष्टसाधनताज्ञानमेव कार्यताज्ञानहेतुरित्यभ्युपेयम्, तथा च तादृगिष्टसाधनबोधस्यैव प्रवृत्तिहेतुत्वोपपत्तौ किमन्तर्गडुना कार्यावबोधनेन ।

न चेदृगिष्टसाधनज्ञानमेव कार्यज्ञानम्, तस्य तज्ज्ञानं प्रति हेतुत्वाभ्युपगमात् ।

न च ममेदं कार्यमिति चिकीर्षामपहाय कार्यज्ञानं नाम किंचिदुपलभामहे ।

---

१ योगक्षेमं कुर्वत इत्यर्थः ।

न च चिकीर्षैव कार्यधियमन्तरेणानुत्पद्यमाना तां कल्पयतीति युक्तम्. कृतियोग्येष्टसाधनतावबोधादेव चिकीर्षाया अप्युपपत्तेः ।

न च कृतिसाध्यं प्रधानमिति कार्यलक्षणं युक्तम्, फलेऽतिव्याप्तेः ।

अथ साक्षात् कृतिसाध्यत्वं विवक्षितम्, न च तत् फलेऽस्तीति मतम्, मैवम्, नियोगे तदभावेनाव्याप्तेः, भावार्थस्यैव साक्षात्कृतिसाध्यत्वात् ।

अथ साध्यैकस्वभावत्वम्, न,[1] प्रागभाववत्सु व्यभिचारात् ।

न च[2] सदा साध्यैकस्वभावत्वम्, यागाद्यनुष्ठानोत्तरकालमपि तस्य साध्यैकस्वभावत्वे कदाचिदपि नियोगासिद्धौ स्वर्गासिद्धिप्रसङ्गात् ।

अस्तु वा यत् किंचिदविचारितरमणीयं लोके कार्यं तथापि कथं वैदिकलिङादिशब्दादलौकिकनियोगस्य प्रतिपत्तिः, मानान्तरानधिगते तस्मिल्लिङादेः संगतिग्रहणायोगात्, अधिगमे वा अतो मानान्तरापूर्वमपूर्वमिति गीयत इति स्वकपोलकल्पितापूर्वत्वभङ्गप्रसङ्गः ।

न च कार्यमात्रेऽवसितसंगतिका लिङादयः शब्दा नियोज्याभिधायिस्वर्गकामादिपदसमभिव्याहारसामर्थ्यात् क्रियातिरिक्तमेव कार्यमवगमयन्ति· आशुतरविनाशिन्याः क्रियायाः कालान्तरभाविस्वर्गादिसाधनतानुपपत्तेरिति युक्तं वक्तुम्, अनुपपत्तिवेद्यत्वे मानान्तरगोचरत्वप्रसङ्गात् ।

ननु नेयमर्थापत्तिस्तर्क एवायमुपन्यस्तः, तेन तर्काधिगते नियोगे संगतिग्रहः संगच्छते,तर्कस्यामानत्वात् ।

प्रमाणानुग्राहकस्तर्को न तु प्रमाणमिति हि परीक्षका इति चेत्, मैवम्, तर्कगोचरत्वेऽपि प्रमाणान्तरगोचरत्वस्यापरिहार्यत्वात्, तथाहि, प्रमाणान्तराधिगतव्याप्यव्यापकभावयोरेकाभ्युपगमेन द्वितीयस्य नियतप्रसञ्जनरूपस्तर्कः, यथा यद्ययं वह्निमान्न स्याद्धूमवानपि न स्यादिति, तथा च यद्ययं लिङादिः क्रियातिरिक्तकार्याभिधायी न भवेत्, तदा न स्वर्गका-

[1] किमिदं साध्यैकस्वभावत्वम्, किं साधनार्हत्वानधिकरणत्वं किं वा सिद्धत्वानधिकरणत्वम् । आद्येऽतिव्याप्तिरित्याह नेति ।

[2] द्वितीयं दूषयति नचेति ।

मपदेन समभिव्याह्रियेत, समभिव्याह्रियते चायम्, तस्मात् क्रियातिरिक्त-कार्याभिधायक इति प्रसङ्गरूपेऽपि तर्के द्वयोरापाद्यापादकभागयोस्तदभा-वयोश्च धूमवत्त्ववह्निमत्त्वयोस्तदभाववयोरिव मानान्तरगोचरता कथं न स्यात् ।

न चापाद्यापादकभावोऽपि क्रियातिरिक्तकार्यस्याप्रसिद्धत्वेन तद-भावस्याप्रसिद्धत्वादप्रमाणभूतश्च तर्कः स्मृत्यनुभवभेदेन ज्ञानद्वैराश्यवादि-ना स्मृतावन्तर्भवतीति वाच्यम् ।

न चात्राननुभूते नियोगे स्मृतिः संभवति, संस्कारजन्यायाः स्मृते-स्तदभावेऽभावात् ।

ननु पूर्वानुभवजन्यसंस्कारमात्रजन्यं ज्ञानं स्मृतिरिति न ब्रूमः किंतु सापेक्षं ज्ञानम्, अस्ति चात्र प्रमाणानुग्राहकतया तर्कस्य तदपेक्षा ततो नोक्तदोष इति चेत्, मैवम्, विकल्पासहत्वात् ।

तथाहि किमुत्पत्तौ सापेक्षत्वमुत विषयाववबोधे ।

नाद्यः, प्रमाणज्ञानानामपीन्द्रियलिङ्गादिसापेक्षतया स्मृतित्वप्रसङ्गात् ।

न द्वितीयः, विषयाववबोधेऽपि सापेक्षत्वे स्मृतेः प्रदीपादिवज्ज्ञान-त्वाभावप्रसङ्गात्, अपसिद्धान्तापत्तिश्च ।

प्रमाणमनुभूतिः सा स्मृतेरन्या स्मृतिः पुनः ।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते ॥

इति शालिकनाथवचनविरोधात् ।

न चार्थापत्तिगम्यत्वमपि, कृतेर्भावार्थजननद्वाराऽपूर्वसाधनत्ववत् क्रियाया एवापूर्वावान्तरव्यापारायाः स्वर्गसाधनत्वोपपत्तेः ।

अपिच "यो ब्राह्मणायावगुरेत् तं शतेन यातया" इत्यत्रावगुरणक-र्मणः क्षणिकस्यापि दुरितापूर्वजननद्वारा कालान्तरभाविशतयातनाफल-साधनत्ववत् क्षणिकाया अपि यागक्रियाया अपूर्वजननद्वारा स्वर्गसाधन-ता किं न स्यात् ।

नन्ववगुरणे दुरितापूर्वकल्पना कामाधिकारे क्रियातिरिक्तनियोगसि-द्ध्युत्तरकालीना, तथाहि तत्राशुतरविनाशिन्याः क्रियायाः कालान्तरभावि-

फलसाधनत्वासामर्थ्यात् तदतिरिक्तापूर्वस्य फलसाधनत्वे स्थिते पश्चादवगुरणेऽपि कालान्तरभाविशतयातनाफलमपि दुरितापूर्वद्वारेणेति कल्प्यते तथा सति कथं नियोगासिद्धिः, तत्सिद्ध्युत्तरकालीनत्वादस्याः कल्पनाया इति चेत्,मैवम्, कृतिसाध्ये नियोगे प्रतीते कृतेर्भावार्थैकविषयत्वान्नियोगस्य चाभावार्थरूपत्वात् साक्षात् कृतिसाध्यत्वासंभवाद् भावार्थं साधयन्ती कृतिर्नियोगं साधयतीति यथा कल्प्यते, अत एव चाघटितसंघटकतया भावार्थो विषयः करणं च नियोगं प्रतीति गीयते, यथाहुः ।

कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः[१] ।
कार्ये संघटिताकारे करणत्वेन संमतः ॥

इति,

तथा लोकावगतसामर्थ्यैर्लिङादिशब्दैरधिगतफलसाधनभावायाः क्रियाया नियोगमन्तरेणापि स्वजन्यापूर्वावान्तरव्यापारद्वारा फलसाधनत्वसंभवे तद्दृष्टान्तावष्टम्भत एवावगुरणेऽपि दुरितापूर्वकल्पनायां संभाविन्यामलोकवेदसिद्धनियोगकल्पनानुपपत्तेः, इतरथा क्लृप्तक्रियाकार्यवाचकत्वभङ्गोऽपरिक्लृप्तनियोगवाचकत्वकल्पना यागस्य च फलनियोगयोः करणत्वकल्पना चेति गौरवं प्रसज्येत ।

किंच यथा तवाग्नेयादीनामुत्पत्त्यपूर्वावान्तरव्यापाराणां परमापूर्वसाधनभावस्तथास्मन्मतेऽप्यपूर्वावान्तरव्यापाराया एव क्रियाया ईश्वरप्रसादावान्तरव्यापाराया वा फलसाधनतोपपत्तेर्न नियोगकल्पनावकाशः ।

न चोत्पत्त्यपूर्वाणामेव परमापूर्वसाधनत्वमाग्नेयादीनां तु तत्साधनसाधनतैवेति युक्तं वक्तुम्, प्रमाणाभावात् ।

तथाहि किं 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्यधिकारवाक्येनैषां परमापूर्वसाधनत्वमवगतमुताग्नेयोऽष्टाकपाल इत्याद्युत्पत्तिवाक्यैः ।

नाद्यः,दर्शपूर्णमासाभ्यामित्यस्य कर्मसमुदायवाचकत्वात्, यजेतेति च परमापूर्वाभिधानात् ।

१ प्रतिपत्त्युपाधो विषयत्वं निष्पत्त्युपाधो करणत्वमित्यस्ति तयोर्भेदः ।

नापि द्वितीयः, दर्शपूर्णमासाभ्यामित्यधिकारवाक्यसंनिधिसमाम्नातानामुत्पत्तिवाक्यानामधिकारापूर्वानुवादशङ्काकुण्ठतशक्तीनां द्रागित्येवापूर्वान्तरप्रत्ययाजनकताश्रयणात्, अन्यथाधिकारवाक्यसंनिधिपरिपठितसमिदादिवाक्यस्थलिङादिशब्दानामपि स्वतन्त्रकार्याभिधायकत्वे ग्राहकग्रहणभङ्गप्रसङ्गः, प्रयोजनप्रयोजनिभावेनान्विताभिधानं ग्राहकग्रहणमित्यभ्युपगमात्, स्वतन्त्राणां च प्रयोजनप्रयोजनिभावासंभवात्, आग्नेयादीनामेव त्वधिकारापूर्वं प्रत्यवगतकरणविषयभावानां तद्विकत्वेन तदनुपपत्तो तत्सिद्ध्यर्थमेवावान्तरव्यापारतयोत्पत्त्यपूर्वाङ्गीकरणात् ।

कश्चायं नियोज्यो नाम यदन्वयात् क्रियातिरिक्तनियोगसिद्धिः, स किं कार्यं प्रति गुणभूतः प्रधानभूतो वा ।

नाद्यः, गुणत्वे कर्तृत्वान्वयान्तर्भावात् ।

न द्वितीयः, प्राधान्येऽधिकार्यन्वयापातात्, गुणप्रधानभावातिरिक्तप्रकारान्तरासंभवाच्च ।

कार्यमात्मीयत्वेन योऽवबुध्यते स नियोज्य इति चेत्, तथाभूतावबोधस्यापि गुणप्रधानभावान्तर्भावेनोक्तदूषणापत्तेः ।

क्रियाकार्यं प्रति गुणभूतत्वं कर्तृत्वं क्रियातिरिक्तं प्रति गुणभूत्वमेव नियोज्यत्वमिति विषयभेदाद्भेद इति चेत्, मैवम्, क्रियातिरिक्तकार्यसिद्धौ नियोज्यान्वयसिद्धिर्नियोज्यान्वयसिद्ध्यधीना च क्रियातिरिक्तकार्यसिद्धिरिति परस्पराश्रयप्रसङ्गात् ।

न च नियोगस्य कृत्युद्देश्यत्वम्, अपुरुषार्थत्वात्, सुखदुःखप्राप्तिपरिहारौ तदुभयसाधनं वा पुरुषार्थः, न चैषामन्यतमो नियोगो येन पुरुषार्थतया कृत्युद्देश्यः स्यात् ।

न च स्वर्गादिसाधनतया पुरुषार्थत्वम्, नित्यनैमित्तिकनियोगयोस्तदभावेन कृत्युद्देश्यतावैधुर्यापातात्, नियोगसिद्धेरेव च पुरुषार्थत्वे नियोगस्य स्वर्गसाधनताभ्युपगमानर्थक्यप्रसङ्गात् ।

ननु कामाधिकारे फलकामिनो नियोज्यत्वात् फलं प्रति करणीभूतस्यैव यागस्य नियोगं प्रति विषयत्वात् तत्साध्यस्य नियोगस्य फलान्त-

रसाधनता, नित्ये तु न फलकामिनोऽधिकारः, नापि फलं प्रति करणी-भूतस्य यागस्य नियोगं प्रति विषयत्वं किंतु नियोगं प्रत्येव विषयत्वं कारणत्वं च, अन्यथा नित्यकाम्यवैषम्यानुपपत्तेः ।

तस्मान्नित्येषु नियोगसिद्धिरेव पुरुषार्थ इति चेत्, मैवम्, नित्यकाम्यवैषम्यस्यान्यथाप्युपपन्नत्वात्, तथाहि द्वयोः फलवत्त्वाविशेषेऽपि यत्र कामना निमित्ततया श्रूयते कल्प्यते वा तत् काम्यम्, यत्र पुनर्नैवं यदकरणे च प्रत्यवायस्तदितरदिति वैषम्योपगमात्, नित्यनैमित्तिकयोश्च फलशून्यत्वे हितसाधनताबुद्ध्या प्रवृत्तिरेव पुंसां न स्यात् ।

ननु नियोगसिद्धेः परमपुरुषार्थत्वात् तत्साधने यागादौ हितसाधनबुद्ध्यैव प्रवृत्तिर्नियोगार्थसिद्धेः किमन्यत् प्रयोजनं सर्वविधीनामिति गुरुणैवोदीरितत्वादिति चेन्नैवम्, तथा सति तवापि नित्यकाम्यवैषम्यभङ्गप्रसङ्गात्, तथाहि फलं प्रति करणीभूते यागादौ रागत एव प्रवृत्तिरितिकर्तव्येषु तु वैधी, कामाधिकारे नित्येषु तु करणेतिकर्तव्यतयोर्विधित एव प्रवृत्तिरिति वैषम्यं तवाभिमतम्, तच्चेदं भज्येत, नियोगस्य फलरूपत्वेन तत्करणे यागादावपि रागत एव प्रवृत्त्युपपत्तेः ।

किंचेदं यागस्य फलं प्रति करणत्वं श्रुतिलिङ्गादिगम्यम् उत नियोगानुपपत्तिगम्यम् ।

नाद्यः, श्रुत्यादेरदर्शनात्, 'स्वर्गकामो यजेते'त्यादौ फलं प्रति करणत्वस्य प्रकृतिप्रत्ययाभ्यामप्रतीतेः, यागेन फलशिरस्कस्य नियोगस्यैव साध्यत्वप्रतीतेरभ्युपगमात्, लिङ्गादीनां चानाशङ्कनीयत्वात् ।

नापि द्वितीयः, विकल्पासहत्वात् ।

किं नियोगः स्वसिद्धये यागस्य फलकरणत्वं कल्पयति उत फलसिद्धये स्वस्य फलकामिकृतिसाध्यत्वसिद्धये वा ।

न प्रथमः, स्वसाधनीभूतयागानुष्ठानादेव स्वस्य सिद्धेः ।

न द्वितीयः, स्वसिद्ध्यैव फलस्यापि सिद्ध्युपपत्तेः ।

॥ माधवीयधातुवृत्तिः ॥

(Continued from page 459.)

एध वृद्धौ ॥ ऋत्यन्ता उदात्ता अनुदात्तेतः । एधते । एधसे । एधे । एधमानः । एधां चक्रे । एधां बभूव । एधामास । 'इजादेश्च गुरुमतोऽनृच्छ' इत्याम् प्रत्ययः । 'दीर्घं चे'ति दीर्घं गुरुसंज्ञम् । करोतेराम्प्रत्यय' वदिति नित्यं तङ् । एधिता । एधितासे । एधिताहे । एधिष्यते । एधिष्यसे । एधिष्ये । एधिष्यमाणः । 'लटः सद्वा' । एधताम् । एधस्व । एधै । 'सवाभ्यां वामौ' । 'एत ऐ' । ऐधत । ऐधथाः । ऐधे । आडजादीनामिति अजादेरङ्गस्य लुङ्लङ्लृङ्क्षु आडागम इत्याट् । टित्वादादावाटश्चेति वृद्धिः । ऐधेत । आशिषि एधिषीष्ट । एधिषीष्ठाः । एधिषीय । ऐधिष्ट । ऐधिष्ठाः । ऐधिध्वम् । ऐधिषि । 'धि चे'ति सलोपः । इणन्तमङ्गमिति इणः षीध्वंलुङ्लिटां धोऽङ्गादिति धकारस्य मूर्धन्यः । अत्र हरदत्त एवं मूर्द्धन्यमुक्त्वोपायान्तरमाह । अन्ये त्विटो विभाषाया वक्ष्यमाणत्वात् गोबलीवर्दन्यायेन तद्व्यतिरिक्तमिणन्तमिह गृह्यत इति ऐधिध्वमित्यादौ ढत्वं नेच्छन्ति । ऐधिष्यत । ऐधिष्यथाः । ऐधिष्ये । भावे लट्लोट्लङ्विध्यादिलिङ्क्षु यगुदाहार्यः । एध्यते भवतेत्यादि । लुङि चिणो लुगिति तशब्दस्य लुकि ऐधि भवतेति । शेषे तु कर्तृवद्रूपम् । सन्यजादित्वात् द्वितीयस्यैकाचो द्विर्वचनेऽभ्यासकार्यम् । 'पूर्ववत्सन' इति तङ् । एदिधिषत इत्यादि सर्वत्र प्रकृतिवत् । एदिधिष्यत इत्यादि कर्तृवत् । न च ण्यादिषु णिज्वदिट्पक्षे वृद्धौ पुकि रूपान्तरमपि स्यादित्याशङ्क्यम् णयल्लोपेत्यादिना ऽतो ऽल्लोपेन वृद्धेर्बाधस्योक्तत्वात् । एधयते सस्यम् । 'णिचश्चे'ति कर्त्रभिप्राये तङ् । अस्मिन्नुपपदेन प्रतीयमाने 'विभाषोपपदेन प्रतीयमान' इति परस्मैपदमपि भवति । स्वं सस्यमेधयतीति । चित्तवत्कर्तृके त्वणावकर्मकाच्चित्तवत्कर्तृकादिति परस्मैपदमेव पुत्रमेधयतीति । विभाषोपपदादपि परत्वादिदमेव भवति, तेन स्वपुत्रमेधयतीत्येव । गतिबुद्धीति सर्वत्र प्रयोज्यकर्मत्वम् । एधयां चक्रे । चकार । बभूव । आस । अयामन्तेति णेरयादेशः । अत्र यदा प्रकृतेः

Digitized by Google

चिण्वत्कर्तृकत्वेन नित्यं परस्मैपदं तदा कृञोऽनुप्रयोगस्येति कल्पितेन योगेन तथैव । एधयितासि । एधयितासे । एधयिष्यति । एधयिष्यते । एधयतु । एधयताम् । ऐधयत् । ऐधयत । एधयेत् । एधयेत । आशिषि एध्यात् । एधयिषीष्ट । यासुट्यनिड्वादार्धधातुकत्वाण्णिलोपो ऽकृत्सार्वधातुकयोरिति दीर्घस्य पूर्वविप्रतिषेधेन बाधकः । ध्वमीटि गुणायादेशयोरियणः परत्वादिटि 'विभाषेट' इति मूर्द्धन्यविकल्पः । ऐदिधत् । ऐदिधत । णिश्रीति चङि णिलोपस्य 'द्विर्वचनेऽची'ति द्विर्वचननिमित्तेऽचि योऽजादेशः स द्विर्वचने कर्त्तव्ये स्थानिवत्वं प्रतिपद्यत इति चङीति द्विर्वचने स्थानिवत्त्वादजादेर्द्वितीयस्येति धिशब्दो द्विरुच्यते । इदं च णौ चङ्युपधाह्रस्वाद्बहिरङ्गादप्युत्तरकालं द्रष्टव्यम् । तत्र च लिङ्गमेधितेरेदित्करणं, तद्धि मा भवानेदिधदित्यत्र नाग्लोपीति चङि ह्रस्वस्य निषेधार्थं पूर्वं तु द्विर्वचने ह्रस्वभाव्युपधा नेति किं निषेधेन । तेन मा भवानिदिधदिति भवति 'न माङ्योग' इत्याटो निषेधः । कर्मणि लुङ्येकवचने चिण् । अन्यत्र सिचीट्गुणायादेशाः । ऐधि । ऐधयिषातामित्यादि । ध्वमि धि चेति सलोपे गुणायादेशयोरियणः परत्वादिटो 'विभाषेट' इति वा मूर्द्धन्यः । अन्येषु लेषु कर्तृवद्रूपम् । लिट्यनुप्रयोगे नित्यं तङ् उदाहार्यः । स्यादिषु पक्षे चिण्वदिट तस्यासिद्धवदत्रेत्यसिद्धत्वाण्णिलोपे एधिष्यत इत्यादि प्रकृतिवत् रूपाण्यपि पक्षे द्रष्टव्यानि । न च ध्वमि णेरियणः पर इडिति तल्लोपात्पूर्वं 'विभाषेट' इति रूपभेदस्य प्रसङ्गः । नित्यत्वादन्तरङ्गत्वात्पूर्वत्रासिद्धत्वाच्च पूर्वमेव णेर्लोपात् कर्मकर्तरि यक्चिणोर्विषये तयोर्णिश्रन्थीति निषेधाच्छप्सिचोः कर्तृवद्रूपम् । स्यादिषु कर्मवत् । तत्करणात्स्वाश्रये भावे लकारे सर्वत्र कर्मवत् । कर्तरि तृतीया विशेषः । एधयते स्वेनैवेत्यादि । प्रेधते । 'एत्येधत्यूठ्स्वि'ति वृद्धिः । एजादावेणि धातावेधतौ ऊठि चावर्णात् पूर्वपरयोरेकादेशो वृद्धिरिति सूत्रार्थः । इयं च वृद्धिरेत्येधत्योरेङि पररूपस्यापवाद इत्यवर्णान्तोपसर्गलाभः । ऊठि त्वाद्गुणस्य । अत्र वृत्तौ एज्ग्रहणमेतेरेव विशेषणं नैधतेरव्यभिचारादिति । अत्र प्रदीपकृत् प्रेदिधदित्यत्र व्यभिचारसंभवाचेतत्सारमित्याह । इदमेव त्वसारं णयन्तस्य शब्दान्तरत्वादेधतिग्रहणेनाग्रहणात् ।

Digitized by Google

अत एव हि न भाभूपूकमीत्यत्र यन्तानां च भादीनामुपसंख्यानमित्युक्तम् । वक्ष्यन्ति च तत्र न्यासकारादयः शब्दान्तरत्वात् यन्तानां न प्राप्नोति तस्मादुपसंख्यानमिति । स्वयं च तत्रैव वक्ष्यतीति पूर्वापरविरोधं स एव प्रष्टव्यः । किं च यधिकस्यापि यङ्लुके उपसर्गात्सुनोतीत्यत्राभिषुषावयिषतीत्यत्र यन्तेनाभेर्योगात्सुनोतिं प्रत्यनुपसर्गत्वात् षत्वं न स्यादिति चोदयित्वा प्रेषणादिरिहाभिषवे इति सुनोतिं प्रति उपसर्गत्वात् षत्वं सिद्धमिति भाष्यकारादीनां समाधानमनुपपन्नं स्यात् । अत एव हि वृद्धिविधौ हरदत्तः । एजग्रहणमेतेरेव विशेषणं न पुनरेधतेरिति वृत्तिमुपादाय बाहुल्याभिप्रायेणैतदुक्तं मा प्रेदिधदित्यत्र व्यभिचारसंभवादित्याहुरिति मतान्तरेणाह । एधितः । एधितमनेन । इदमेषामेधितम् । क्तोऽधिकरणे चेति क्तः । एधः । असुन्नित्यसुन् ॥

स्पर्द्ध संघर्षे । संघर्षः पराभिभवेच्छा ॥ पराभिभवस्य धात्वर्थेनोपसंग्रहात् अकर्मत्वम् । उक्तं च ।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥

इति । स्पर्द्धते । स्पर्द्धसे । स्पर्द्धमानः । पस्पर्द्धे । पस्पर्द्धिषे । पस्पर्द्धे ॥ 'शर्पूर्वाः खयः' ॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते अन्ये हलो निवर्तन्तइति पकारशेषः । स्पर्द्धिता । स्पर्द्धितासे । स्पर्द्धिताहे । स्पर्द्धिष्यते । स्पर्द्धिष्यसे । स्पर्द्धिष्ये । स्पर्द्धताम् । स्पर्द्धस्व । स्पर्द्धै । अस्पर्द्धत । अस्पर्द्धथाः । अस्पर्द्धे । स्पर्द्धेत । स्पर्द्धेथाः । स्पर्द्धेय । आशिषि स्पर्द्धिषीष्ट । स्पर्द्धिषीष्ठाः । स्पर्द्धिषीय । अस्पर्द्धिष्ट । अस्पर्द्धिष्ठाः । अस्पर्द्धिषि । अस्पर्द्धिष्यत । अस्पर्द्धिष्यथाः । अस्पर्द्धिष्ये । भावे लट्लोट्लङ्विध्यादिलिङ्ङु यकि स्पर्द्ध्यते । स्पर्द्ध्यताम् । अस्पर्द्ध्यत । स्पर्द्ध्येतेत्यादि । लुङि तशब्दे चिण्यस्पर्द्धीति, आशीरादिषु कर्तृवत् । पिस्पर्द्धिषते । पिस्पर्द्धिषां चक्रे । पिस्पर्द्धिषितेत्यादि । 'सन्यत' इतीत्वमभ्यासस्य पूर्ववत् 'पूर्ववत्सन' इति तङ् । आर्धधातुकेऽतो लोपः । विध्यादिलिङ्यतोलोपाभावाल्लिङः

सलोपे गुणवलिलोपयोः । पिस्पर्द्धिषेत । भावे यक्चिणोर्विशेषः । पिस्पर्द्धिष्यत इत्यादि । पास्पर्द्ध्यते । 'दीर्घोकित' इत्यभ्यासस्याकारस्य दीर्घो यङि तल्लुकि च । पास्पर्द्धां चक्रे, पास्पर्द्धितेत्यादि । तत्रार्द्धधातुके 'यस्य हल' इति हल उत्तरस्य यस्य लोपः । स चादेः परस्येति यकारस्य । अकारस्य अतो लोपः । भावे स्वादिषु यक्यप्यतो लोपयलोपयोः कर्तृवत्सर्वत्र रूपम् । पास्पर्द्धितव्यइत्यादि । लुङि तु चिण्यपास्पर्द्धीति भवति । सन्यङोस्तास्यादिषु चिण्वदिटि न विशेषः, अतो लोपेन वृद्धेर्बाधादित्युक्तम् । यङो लुक्यदादिवच्चेति शपो लुकि 'झषस्तथोर्धोऽधः' । झष उत्तरयोस्तकारथकारयोर्दधातिं वर्जयित्वा धकार इति धत्वे 'झलां जश् झशी'ति जश्त्वम् । आन्तरतम्याद्दकारः । पास्पर्द्धि, एवं वचनान्तरेषु । पास्पर्द्धः । पास्पर्द्धति ॥ 'अदभ्यस्तात्' इत्यद्भावः । पास्पर्त्सि । 'खरि च' । खरि परे झलां चर इति चर्त्वे । पास्पर्द्धः । सर्वत्र हलादेः पितः सार्वधातुकस्य 'यङो वे'ति ईडुदाहार्यः । पास्पर्द्धीतीत्यादि ॥ पास्पर्द्धां चकार । पूर्ववत् कृञोनुप्रयोगस्येति नित्यं परस्मैपदम् । पास्पर्द्धिता । पास्पर्द्धिष्यति । पास्पर्द्धु । पास्पर्द्धात् । तातङि ङिच्च पिच्चेति स्थानिवत्त्वप्राप्तस्य पित्त्वस्य निषेधादीडभावः । पास्पर्द्धाम् । पास्पर्द्धतु । पास्पर्द्धि । सेर्ह्यादेशे 'हुझल्भ्यो हेर्धि'रिति धिभावः । हेरपित्त्ववचनादिडभावः । अपास्पर्त् । इतश्च लोपे हल्ङ्यादिलोपे च 'झलां जशोन्ते' इति जश्त्वे 'वावसाने' इति चर्त्वे तकारः । तदभावे अपास्पर्द् । 'रात्सस्ये'ति नियमाच्च संयोगान्तलोपः । अपास्पर्द्धाम् । अपास्पर्धुः सिजभ्यस्तेति जुस् । अपास्पर्त् । अपास्पर्द् । अपास्पाः । सिपि हल्ङ्यादिलोपे पूर्ववज्जश्त्वे चर्त्वे वा च तदभावे 'दश्चे'ति सिपि परे वा रुः । 'रो री'ति पूर्वस्य रेफस्य लोपः । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति पूर्वस्याणो दीर्घः । ढ्रलोपइति ढकाररेफयोर्लोपनिमित्ते ढकाररेफावुच्येते । अपास्पर्द् । अपास्पर्त् । पास्पर्द्ध्यात् । पास्पर्द्ध्याताम् । पास्पर्द्ध्युः । यासुटो ङित्त्वेनापित्त्वादीडभावः । आशिषि पास्पर्द्ध्यात् । पास्पर्द्ध्यास्ताम् । आर्धधातुकत्वादीडभावः ।

अपास्पर्द्धीत् । अपास्पर्द्धिष्टाम् । अपास्पर्द्धिषुः । अपास्पर्द्धीः । अपास्पर्द्धिषं । 'अस्तिसिच' इति पितो नित्यमीट् । 'इट ईटी'ति सिचो लोपे 'सिज्लोप एकादेशे सिद्धः' इति सवर्णदीर्घः । 'वदव्रजहलन्तस्याचः' इति परस्मैपदपरे सिचि विहिता वृद्धि'र्नेटी'ति निषिध्यते । अपास्पर्द्धिष्यत् इत्यादि । भावे सर्वत्र यङन्तवद्रूपम् । पास्पर्द्ध्यते इत्यादि, णौ स्पर्धयतीत्यादि एधतिवदुदाहार्यम् । लुङ्यनजादित्वात्प्रथमस्यैकाचो द्विर्वचनम् । 'संयोगे गुर्वि'ति संयोगपरस्य ह्रस्वस्य गुरुसंज्ञाविधानात्सन्वल्लघुनीति इत्वम् । 'दीर्घो लघो'रिति दीर्घश्च न भवति गुरुसंज्ञया ग्रावकहारीयतयानवकाशया लघुसंज्ञा बाध्यते, कर्मणि यक्चिणोर्विषये णिलोपे स्पर्ध्यते इत्यादि, प्रकृतौ भाववद्रूपाणि उदाहार्याणि । अन्यत्र स्पर्धयां चक्रे इत्यादि कर्तृवत् । लुङि चिण् । द्विर्वचनादौ सिच् । अस्पर्द्धि । अस्पर्द्धियिषातामित्याद्युदाहार्यम् । ध्वमि 'विभाषेट' इति मूर्धन्यविकल्पः । स्यादिषु चिण्वदिटि तस्यासिद्धवदत्रेत्यसिद्धत्वाण्णिलोपे स्पर्द्धिष्यते इत्यादि प्रकृतिवद्रूपम् । कर्मकर्तरि यक्चिणोर्निषेधात् अपि स्पर्धयते इत्यादि कर्तृवच्चेयम् । अत्रापि स्यादिषु चिण्वत्पक्षे कर्मवत् । वस्तारवात् स्वाश्रये भावे लकारे सर्वं कर्मवत् । कर्तरि तृतीया विशेषः । स्पर्धनः । 'अनुदात्तेतश्च हलादेरि'ति तच्छीलादौ युच् । स्पर्द्धा । 'गुरोश्च हल' इति गुरुमतो हलन्तात् स्त्रियामकारप्रत्ययः । वा सरूपेण क्तिन्स्त्रियामिति निषेधाच्च भवति । इदमेषां स्पर्द्धितम् । स्पर्द्धितमनेन । स्पर्द्धितः । क्तोऽधिकरणे चेति कर्तृभावाधिकरणेषु क्तः । स्पर्धानुप्रयोगमश्विनस्य: ॥ ३ ॥

गाधृप्रतिष्ठालिप्सयोर्ग्रन्थे च । स्थापना तत्स्थापनं वा प्रतिष्ठा । लब्धुमिच्छा लिप्सा । एकत्र स्थापनं संदर्भो वा ग्रन्थः । तत्राद्ये ऽकर्मकः । इतरयोः सकर्मकः, गाधते । गाधसे । गाधे । गाधमानः । जगाधे । गाधिता । गाधितासे । गाधिताहे । गाधिष्यते । गाधिष्यमाणः । गाधताम् । गाधस्व । गाधै । अगाधत । अगाधथाः । अगाधे । गाधेत । गाधेथाः । गाधेय । आशिषि गाधिषीष्ट । अगाधिष्ट । अगाधिष्ठाः । अगाधिषि । अगाधिष्यतेत्यादि । भावकर्मकर्तृषु लट्लोट्लङ्लिङ्विधिलिङ्षु यक् । गाध्यते । गा-

ध्यसे । गाध्यताम् । अगाध्यत । गाध्येतेत्यादि । अन्येषु लेषु कर्तृवत् लुङ्येकवचने तु चिषयगाधीति । लिप्सायामप्यार्थेन न्यायेनेष्यमाणप्रधानत्वात्तस्य च कर्मस्थत्वात्सनन्तवत् कर्मकर्तृत्वोपपत्तिः । जिगाधिषते । जिगाधिषां चक्रे । जिगाधिषिता । जिगाधिषिष्यते । जिगाधिषताम् । अजिगाधिषत । जिगाधिषेत । आशिषि जिगाधिषिषीष्ट । अजिगाधिषिष्ट । अजिगाधिषिष्यतेत्यादि । सर्वत्राभ्यासकार्यम् । आर्धधातुके ऽतो लोपः । भावकर्मणोर्यक्चिण्विषये जिगाधिष्यते । अजिगाधिषीत्यादि । कर्मकर्तरि यक्चिणोर्निषेधात् कर्तृवदेव । जागाध्यते । जागाधां चक्रे । जागाधिता । जागाधिष्यते । जागाध्यताम् । अजागाध्यत । जागाध्येत । आशिषि जागाधिषीष्ट । अजागाधिष्ट । अजागाधिष्यत । सर्वत्राभ्यासस्य 'दीर्घोऽकितः' ॥ आर्धधातुके ऽतो लोपो 'यस्य हल' इति यलोपाल्लोपौ । भावादिषु यक्यल्लोपयलोपयोः सर्वत्र कर्तृवद्रूपम् । लुङ्येकवचने त्वजागाधीति । चिण्विशेषः । सन्यङोश्चिण्वदिट्यतो लोपेन वृद्धिबाधाद् न विशेष इत्युक्तम् । यङ्लुकि 'झषस्तथोर्धोऽधः' । 'झलां जश् झशि' जागाद्धीत्यादि । सिपि 'एकाचो बशो भष् झषन्तस्य स्ध्वोरि'ति धातोरवयवस्य झषन्तस्यैकाचो बशः स्थाने भषादेशः । सकारादौ प्रत्यये ध्वे च परे पदान्ते च विषयइत्यान्तरतम्यात् गकारस्य घकारे 'खरि चे'ति धकारस्य तकारे जाघात्सीति । जागाधां चकार । पूर्ववत्क्रञ इति परस्मैपदम् । जागाधिता । जागाधिष्यति । जागाद्धु । जागाद्धात् । जागाधानि । अजाघात् । अजाघाद् । हल्ङ्यादिलोपे पदान्ते चेति बशो भषादेशे जश्त्वे च चर्त्वम् । सिपि तु 'दश्चे'ति वा रुत्वे अजाघा इत्यपि । जागाध्यात् । जागाध्याताम् । आशिषि जागाध्यात् । जागाध्यास्ताम् । अजागाधीत् । अजागाधिष्टाम् । अजागाधिष्यदित्यादि । सर्वत्र यङ्लुगन्तात्परस्य हलादेः पितः सार्वधातुकस्य पक्षे ईडुदाहार्यः । लुङि त्वस्तिसिच इति नित्यः । भावादौ यङन्तवत् । गाधयति । गाधयां चकार । गाधयिता । गाधयिष्यति । गाधयतु । अगाधयत् । गाधयेत् । आशिष्यनिडत्वार्धधातुकत्वाण्णिलोपे । गाध्यात् । अजगाधत् । अचास्य चङि-

Digitized by Google

स्वा'चाग्लोपिशास्वृदितामि'ति णौ चङि ह्रस्वे निषिद्धेऽभ्यासस्यालघुपरत्वात्सन्वद्भित्त्वलघुदीर्घत्वे न भवतः । गाधयतस्त्वगाद्युदाहार्यम्, प्रतिष्ठायामथावकर्मकादिति चित्तवत्कर्तृकत्वे परस्मैपदमेव । भावकर्मणोर्यक्चिणोर्विषये णिलोपे गाधतिवद्रूपम् । स्यादिषु तु यगन्ते कर्तृवत् । चिण्वदिटि तु णिलोपे गाधितेत्यादि प्रकृतिवदेव । कर्मकर्तरि यक्चिणोर्निषेधाच्चवसु लकारेषु कर्तृवत् । गाधनः । अनुदात्तेत इति युच् । गाधा । 'गुरोश्च हल' इत्यकारः । प्रतिष्ठायां स्पर्द्धिवत्, भावकर्माधिकरणेषु क्त उदाहार्यः, इतरयोस्तु तयोरेवेति नियमात्कर्मणि ॥ ४ ॥

बाधृ लोडने। लोडनं प्रतिघातः । गाधिवत् । बाहुः । 'अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुगधुग्दीर्घहकाराश्चे'ति कुप्रत्यये धातोर्हकारः । भद्रबाहूः । चतुष्पाद्विशेषः । 'बाह्वन्तात्संज्ञायामि'ति स्त्रियामूङ् प्रत्ययः । सुबाहुर्नाम कश्चित्, तस्यापत्यं सौबाहविः । 'बाह्वादिभ्यश्चे'ति षष्ठ्यन्तादपत्यइञ् । ओर्गुणः । उवर्णान्तभस्याङ्गस्य तद्धिते गुण इति गुणे ऽवादेशः, यद्यपि बाह्वादिषु केवलो बाहुशब्दः पठ्यते 'समासप्रत्ययविधौ तदन्तविधेः प्रतिषेध' इति तदन्तविधिश्च प्रतिषिध्यते तथापि केवलस्यापत्येनायोगात्तदन्तत्वलाभः । संज्ञात्वेन विनियुक्ताद् बाहोस्तु प्रत्ययो नेष्यते । यदाह ॥

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु ॥

इति । 'राजश्वशुराद्यद्' इत्यत्र भाष्यादौ चोक्तं संज्ञायां श्वशुराद्येति,उभाबाहु । उभयाबाहु प्रहरति । 'द्विदण्ड्यादिभ्यश्चे'तीच् समासान्तः ॥ तस्य च द्विदण्ड्यादिष्वेव पाठाल्लोपः, प्रत्ययलक्षणेन तदन्तत्वात् तिष्ठद्गुप्रभृतिष्विचः पाठात्तदन्तस्याव्ययीभावत्वविधानादव्ययीभावश्चेत्यव्ययत्वे सुपो लुक् । उभयबाह्वित्यत्रोभादुदात्तो नित्यमित्यत्रास्वरितत्वादेव वाग्रहणाननुवृत्तेर्नित्यमयचि सिद्धे नित्यग्रहणं योगभेदेन वृत्तौ नित्यमयजन्तस्य प्रयोगार्थमित्युभशब्दस्योभयादेशः । अयमर्थः सर्वादिसूत्रे कैयटादौ स्फोरितः । तथा च तत्र वार्त्तिकमपि उभस्य सर्वनामत्वेऽकजर्थः पाठः ।

अन्याभावो द्विवचनटाप्विषयत्वात् उभयोन्यत्रेति । उभावाद्विस्त्वत्र तु द्विवचनाद्विपाठात् उभयाभावः ॥

नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु । उपतापो रोग इति वृत्तौ । उपघात इति तरङ्गिण्याम् । आद्यो धान्तः अपरस्थान्तः । अस्य थान्तस्य धान्तकाण्डे पाठोऽर्थसाम्यात् । उभावपि दन्त्यादी । सर्वं गाधतिवत् । द्वितीयस्य तु विशेषः । आशिषि नाथ इत्याशिष्येवात्मनेपदं, कर्मणि शेषत्वेन विवक्षिते षष्ठी च । सर्पिषो नाथत इत्यादि । 'षष्ठी शेष' इत्येवात्र षष्ठीसिद्धौ वचनमिदं सर्पिषो नाथनमित्यादौ समासनिवृत्त्यर्थं षष्ठी श्रूयतएव न लुप्यतइति स लोपश्च समासे । उक्तं च ।

साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥

इति । न तर्हीदानीमिदं संभवति सर्पिर्नाथनमिति । भवति यदा कृद्योगलक्षणा षष्ठी । तथा च वार्त्तिकं । 'प्रतिपदविधाना च षष्ठी न समस्यते' 'कृद्योगा च षष्ठी समस्यत' इति । न चैवं सति समासनिषेधस्य वैयर्थ्यमिति वाच्यम् । यतः शेषषष्ठ्याः समासे समासस्येत्यन्तोदात्तत्वेन भाव्यं, अन्यस्यास्तु 'गतिकारकोपपदात् कृत्' । गत्यादिभ्यः परं कृदन्तमुत्तरपदं प्रकृतिस्वरमित्युत्तरपदप्रकृतिस्वरेण भाव्यं, स च लिति प्रत्यये पूर्वमुदात्तमित्याद्युदात्तत्वम् । अनाशिषि परस्मैपदे द्रष्टव्यम् । नाथति । ननाथ । नाथिता । नाथिष्यति । नाथतु । अनाथत् । नाथेत् । नाथ्यात् । अनाथीत् । अनाथिष्यत् । निनाथिषतीत्यादि, यङ्लुक्यझषन्तत्वात् झषस्तथोर्धोध इति धत्वाभावे खरि चेति चर्त्वे नानात्ति । नानात्तः । नानात्थ इत्यादि विशेषः । अत्र मैत्रेयाभरणकाराद्याश्च णोपदेशं पठन्तो 'णो न' इति धात्वादित्वाण्णकारस्य नकारं विधायो'पसर्गादसमासेपि णोपदेशस्ये'ति उपसर्गस्थान्निमित्तात्परस्य णोपदेशनकारस्य समासासमासयोर्णत्वविधानात् प्रणाधत इत्यादौ णत्वप्रयोजनमाहतुः । सर्वे नादयो णोपदेशा इत्यस्य पर्युदासे नृतिनन्दिनर्दिनक्किनटिनाथृनाधवर्ज्जमित्यत्र च न पेठतुः ॥ अत्र काश्यपः नाधतेर्णोपदेशत्वमयुक्तं, गणकारवृत्तिकारादीनामनिष्टत्वादिति ।

मृतीमन्दीत्यादिवाक्ये माधृमृवसे नृत्यादीन् पठित्वैतान्सप्त वर्जयित्वेति वदन् श्रीकरोऽप्यत्रैवानुकूलः । तथा पर्युदासवाक्ये नर्दतिवर्जं सर्वानेतान् पठतः शाकटायनस्यासम्मतोऽप्ययमेव पक्षोऽभिमतः । उभयोस्त्वान्तपाठस्तु धात्वप्रकरणविरोधाच्चाशङ्क्यः । इमौ याच्ञायामर्थिते ऽप्सिततमाभ्यां द्विकर्मकौ ।

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना ॥

इत्यत्र भिक्षेरर्थपरत्वात् । उक्तं च कैयटे । दुह्यादीनां चार्थोपलक्षणायोपादानात् पर्यायप्रयोगेऽपि कर्मसंज्ञां भवतीति । अर्थाश्रया चेयं संज्ञा न दुह्यादिस्वरूपाश्रयेति भिक्षिं प्रस्तुत्य वदतो हरदत्तस्यापि मतेऽत्र न विवादः ॥ श्लोकार्थस्तु उपयुज्यतइत्युपयोगः पयःप्रभृति प्रधानं कर्म तस्य निमित्तं गवादि तच्च यच्च ब्रुविशास्योर्गुणेन प्रधानकर्मणा धर्मादिना क्रियां प्रति साधनत्वेन गुणत्वात् लब्धगुणव्यपदेशेन सचते संबन्धमुपैति माणवकादि, तदुभयं कारकं पूर्वविधौ विशेषेणाविवक्षितत्वादपादानादिसंज्ञाभावे कविना क्रान्तदर्शिना सूत्रकारेणाकथितं कर्मोक्तमिति । याचिरिहानुनयार्थः । याचनार्थस्य तु भिक्षिणैव सिद्धम् । अथान्येऽपि द्विकर्मकाः प्रसङ्गात् प्रदर्श्यन्ते । यदाह ॥

नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च ।
द्विकर्मकेषु ग्रहणं कर्त्तव्यमिति निश्चयः ॥

गत्यर्थग्रहणं गत्यादिसूत्रोपात्तानामुपलक्षणम्,

जयतेः कर्षतेर्मन्थेर्मुषेर्दण्डयतेः पचेः ।
तारयाहेस्तथा मोचेस्त्याजेर्दापेश्च संग्रहः ॥
कारिकायां चशब्देन सुधाकारमुखैः कृतः ।
ग्राहेरिह ग्रहो नैव हरदत्तस्य संमतः ॥

यदसौ गतिबुद्धीत्यत्राथ कथमयाचितारं नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेति, स्वतन्त्राः कवयः । यद्वा सुतां प्रति न किंचिदुद्वाहविषयं ग्राहयितुं बोधयितुं शशाकेत्येवं व्याख्येयम् । अत्र बुद्ध्यर्थत्वात्

द्विकर्मकत्वं सिद्धमिति समर्थयते इतीयं च निर्व्याहरणादिक् । प्रतिग्रहणस्य ममेदमिति बुद्धिविशेषनिरूप्यत्वात् सुतां ग्राहयितुं ममेयमिति बोधयितुं न शशाक इत्येवं व्याख्यातुमुचितत्वात् । इदानीं न किंचिद्दुग्राहविषयमित्याद्यध्याहर्तव्यं भवति । तथा श्रीकराचार्यस्याप्यनभिमतमुपादानार्थस्य द्विकर्मकत्वम् ।

अजिग्रहत्तं जनको धनुस्तद्येनार्दिदद्दैत्यपुरः पिनाकी ।
जिज्ञासमानो बलमस्य बाह्वोर्हंसचतालीद्रघुनन्दनस्तत् ॥

इति भट्टिश्लोकं विवृण्वन्यदाह तद्धनुस्तं रामं जनकोऽजिग्रहत् बोधितवान् अनेन धनुषा त्रिपुरं दग्धमिति ग्रहेश्च बुध्यर्थत्वात् गतिबुद्धीत्यादिना रामस्य कर्मसंज्ञा धनुषस्तु कर्तुरीप्सिततममिति ग्रहिर्द्विकर्मकः । उपादानार्थत्वे तु ग्रहिर्गत्यादिष्वेकोऽपि न भवतीति कथं तमितीति । अत एव

तमादौ कुलविद्यानामर्थमर्थविदां वरः ।
पश्चात्पार्थिवकन्यानां पाणिमग्राहयत् पिता ॥

इत्यर्थमबोधयदित्यर्थः । बुध्यर्थत्वाद् द्विकर्मकत्वमुक्त्वा पाणिमग्राहयदित्यत्र तेनेत्यध्याहारेण व्याख्यानात् प्रकृत्युपश्लेषेण बुध्युपादानयोर्ग्रहणं, किं चास्य द्विकर्मकत्वे अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्यामित्यत्र ण्यन्ते कर्तुश्च कर्मेण इति प्रयोज्याया धेनोरभिधानेन भाव्यं ततश्च जायया गन्धमाल्ये या धेनुः प्रतिग्राहितेति विग्रहीतव्यम्, अत्र च प्रथमार्थं वर्जयित्वा सर्वविभक्त्यर्थेषु बहुव्रीहिरित्युक्तत्वात्समासो न स्यात् सत्यपि समासे समानाधिकरणोत्तरपदाभावात् स्त्रियाः पुंवदिति पुंवद्भावो न स्यात् । पक्षान्तरे तु गन्धमाल्ययोरेव कर्मत्वात्तयोरेव क्ते तेनाभिधानात् जायया प्रतिग्राहिते गन्धमाल्ये यया धेन्वेत्यूढरथादिवत् तृतीयार्थेन समासः सिध्यतीति गतमदः । हरिग्रही च द्विकर्मकौ भाष्यउक्तौ । एवं चायाचितारं नहि देवदेवमित्यत्रापि देवः शक्यपेक्षया कर्मसुताप्रतिग्रहापेक्षयेति न संकटं किं चित् ॥ अथ द्विकर्मकता-

धारणमिदं विचार्यते । किमेते लादयः प्रधाने कर्मणि भवन्ति अथाप्रधाने । न चानयोर्युगपदभिधानसंभवो भिन्नकक्षत्वात् ॥ अत्राह ।

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां ण्यन्ते कर्त्तुश्च कर्मणः ॥

इति । अभिधानइति शेषः । अत्र द्विकर्मणामित्यनेन नीवह्योर्हर-तेश्चेति चशब्दसमुच्चतः कृषिः नयत्यादयश्च त्रय उच्यन्ते । अन्येषां विशेषस्य वक्ष्यमाणत्वात् । तथा दुह्यादीनामित्यनेन कारिकोपात्ताश्चशब्द-समुच्चितेष्वहेतुमण्ण्यन्ता जिदण्ड्यादयश्चोच्यन्ते ण्यन्तइत्यनेन तु गत्यादिसूत्रोपात्ताश्चशब्दसमुच्चितास्तायादयश्च । अत्र बुद्धिप्रत्यवसानार्थशब्द-कर्मकेषु प्राकृते वा कर्मणि प्रयोज्ये वा लादयः । यदाह ।

कथितेभिहिते त्वविधिस्त्वमतिर्गुणकर्मणि लादिविधिः सपरे ।
ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरति ॥

अस्यार्थः । तत्र प्रथमः पादः प्रधानकर्मणि लादिभिरभिहिते गुणकर्मणि षष्ठीत्येकीयमतदूषणपर इति इहानुपयोगात् न व्याख्यायते । सपरे गत्यादिसूत्रोपात्तसहिते दुह्यादौ गुणकर्मणि लादयः । गुणकर्मेति पुरुषप्रवृत्तेः पयःप्रभृत्यर्थत्वात् दुह्यादावप्रधानं गवाद्युच्यते । ण्यन्ते तु शब्दतः प्रयोजकव्यापारस्य प्राधान्यं प्रयोज्यव्यापारस्य त्व-प्राधान्यमिति तदाप्यं धर्माद्युच्यते । ध्रुवयुक्तयोऽकर्मकाः चेष्टितयुक्तयो गत्यर्थाः, एष्वगुणे प्रयोज्ये, तदेतदनल्पमतेर्मेधाविन आचार्यस्य वचन-मिति । अत्र स्मरतीत्यनेनागमस्याविच्छेदं दर्शयति । एवं चात्रापि याचनस्य धनाद्यर्थत्वात्तस्यैव प्राधान्यादन्यत्राजादि कर्माप्रधानमिति तत्रैव लादयो भवन्तीति । नाथ्यते राजा धनं नाथ्यः नाथितः सुनाथ इत्यादि भवति । नाथिता धनस्य राज्ञ इत्यत्र द्वितीया च कर्मणि षष्ठ्युभयत्र भवति । गुणकर्मण्युभयथा गोर्धिकापुत्र इति भाष्ये उक्तत्वात् द्वितीयापि द्रष्टव्या । नाथिता धनस्य राजानमिति भाष्ये नयतेरुदाहरणं प्रदर्शनमात्रं स्पष्टं चैतत् पदमञ्जर्यादिषु । नाथितव्यो राजा धनं देवदत्तेनेत्यत्र कर्त्तु-

कर्मणोः प्राप्ता कृद्योगलक्षणा षष्ठी कृत्यानां कर्त्तरि वेत्यत्र कृत्यानामिति योगं विभज्य प्राप्तौ नेति चानुवर्त्त्य उभयप्राप्तौ कृत्ये षष्ठ्यभावस्य भाष्ये प्रतिपादितत्वाच्च भवति । स्पष्टं चैतत्कैयटादौ । यत्तु कृत्यानामित्यत्रोभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेध इति वृत्तिमुपादाय प्रतिषेधोऽयं कर्त्तरि षष्ठ्याः कर्मणि षष्ठ्यास्तु प्रधानस्य कर्मणः कृत्येनाभिधानादन्यस्याप्राधान्यादप्रसङ्ग इति न्यासेऽर्थसत्त्वमुक्तं तद्द्वितीयावदप्रधाने षष्ठ्यनिवार्य्येति यत्किंचित् । कर्त्तरि चेति विधीयमानषष्ठीविकल्प उभयप्राप्तिव्यतिरिक्तकृत्यविषयः । नाथितव्यं सर्पिर्देवदत्तेन देवदत्तस्येति ४१ ॥

दध धारणे ॥ दान इति केचित् पठन्ति दद दान इत्यत्र धारण इति । तदयुक्तम् ।

तद्वेषोसदृशोन्याभिस्त्रीभिर्मधुरताभृतः ।
दधते सुलभां शोभां तदीया विभ्रमा इव ॥
पिबति च पाति च यासकौ रहस्त्वाम् ।
व्रज विटपममुं ददस्व तस्यै
दाददो दुद्दुदुद्दादी दादादीदूददीददोः ।
दुद्दादं दददे दुद्दे ददादददोऽददः ॥

इत्यादौ दधेर्धारणार्थत्वस्यान्यस्य दानार्थत्वस्य च व्यवस्थितत्वात् । दधते । दधेते । दधन्ते । दधसे । दधावहे । दधामहे । देधे । देधाते । देधिरे । देधिषे । देधे । देधिवहे । अत एकहल्मध्येनादेशादेर्लिटि । किति लिटि परत्रावस्थिते यस्यादिरादेशो नास्ति तस्यासहाययोर्हलोर्मध्यगतस्याकारस्यैकार अभ्यासस्य लोप इत्येत्वाभ्यासलोपौ । अयं शिदिति सर्वादेशः । नन्वभ्यासादेर्दकारस्य जश्त्वेन प्रकृतिजशां प्रकृतिजश इति दत्वे कथमनादेशादित्वम् । न च पूर्वत्रासिद्धत्वम् । तॄफलभजत्रपश्चेति फलभजिग्रहणात् । असिद्धत्वे ह्यनादेशादित्वेनैवेत्वाभ्यासलोपयोः सिद्धत्वाच्च तत्कुर्यात् । एवं तर्हि 'न शसददवादिगुणाना'मिति शसददयोरेत्वाभ्यासलोपप्रतिषेधाद्रूपाभेदे आदेशादित्वं नाश्रयिष्यते । तथा च वार्त्तिकम् । प्रथमतृतीयादीनामादेशादित्वादेत्वाभाव इति

चेच्छसिवदिप्रतिषेधो ज्ञापको रूपाभेदे एत्वविज्ञानस्येति । दधिता । दधितासे । दधिताहे । दधिष्यते । दधिष्यमाणः । दधताम् । दधस्व । दधै । अदधत । अदधेताम् । अदधन्त । अदधथाः । अदधे । अदधावहि । दधेत । दधेयाताम् । दधेथाः । दधेय । आशिषि । दधिषीष्ट । अदधिष्ट । अदधिषाताम् । अदधिष्ठाः । अदधिषि । अदधिष्यत इत्यादि । कर्मकर्त्रायंक्चिण्विषये दध्यताम् । अदध्यत । दध्येत । अदाधीत्यादि । अन्यत्र कर्तृवत् । दिदधिषते । दिदधिषां चक्रे । दिदधिषिता । दिदधिषिष्यते । दिदधिषताम् । अदिदधिषत । दिदधिषेत । आशिषि । दिदधिषीष्ट । अदिदिधिषिष्ट । अदिदधिषिष्यत इत्यादि । कर्मणि यक्चिण्विषये दिदधिष्यत इत्यादि ॥ अन्यत्र कर्तृवत् ॥ कर्मकर्तरि तु यक्चिणोर्निषेधात्सर्वत्र कर्तृवत् । अतो लोप आर्धधातुके । दादध्यते । दादधां चक्रे । दादधिता । दादधिष्यते । दादध्यताम् । अदादध्यत । दादध्येत । आशिषि । दादधिषीष्ट । अदादधिष्ट । अदादधिष्यत । दीर्घोकित इत्यभ्यासदीर्घः । सर्वत्रार्धधातुके 'यस्य हलः' 'अतो लोप' इति यलोपाल्लोपौ । कर्मकर्त्रायंक्न्तेऽपि विशेषो नेति गाधतावेवोपपादितम् । दादद्धि । दादद्धः । दाधत्सि । दादध्मि । दधस्तथोश्चेत्यत्र कृतद्विर्वचनस्य दधातेर्ग्रहणात् । तकारथकारादौ चकारात् सकारादौ ध्वे पदान्ते वशो विधीयमानो भष्भावोऽस्य न भवतीत्येकाच इति सादौ ध्वे पदान्ते च विधीयमानः सामान्य एव भवति । दादधां चकार । दादधिता । दादधिष्यति । दादद्धु । दादद्धात् । दादर्द्धि । दादधानि । अदाधत् । अदाधद् । अदादद्धाम् । अदादधुः । अदाधाः । अदाधत् । अदाधद् । अदादद्ध । अदादधं । अत्र हल्ङ्याब्भ्य इति तिप्सिपोर्लोपे पदान्तत्वादेकाच इति भष्भावे जश्त्वे वा चर्त्वम् । सिपि तु दश्चेति वा रुत्वं च । जशादौ 'झलां जश् झशी'ति धकारस्य दकारः । दादध्यात् । दादध्याताम् । आशिषि दादध्यात् । दादध्यास्तामित्यादि । अदादधीत् । अदादाधीत् । 'अतो हलादेर्लघो'रिति हलादेर्हलन्तस्य लघोरतः स्थाने वा वृद्धिरिडादौ परस्मैपदपरे सिचि । एवमदादधिष्टाम् । अदादाधिष्टामित्यादि ।

अदादधिष्यदित्यादि । सर्वत्र यङ्लुकः परस्य हलादेः पितः सार्वधातुकस्य पक्षईडुदाहार्यः । कर्मणि यङन्तवदिति आधतावुपपादितम् । दाधयतीत्यादि । बाधयतिवत् । चङि तु णौ चङीति ह्रस्वत्वे सन्वदित्वदीर्घत्वे विशेषः । अदीदधदित्यादि । दधनः । अनुदात्तेत इति युच् ॥

स्कुदि आप्रवणे ॥ आप्रवणमुत्प्लवनमुत्प्लुत्य गमनं वेति तरङ्गिणी । उद्धरणमिति भोजः । अत्र सकर्मकः । 'इदितो नुम्धातो'रित्यन्तोदित्वा-नुमागम उपदेशिवद्वचनादुपदेशावस्थायाम् । स्कुन्दते । स्कुन्दसे । स्कुन्दे । चुस्कुन्दिषे । चुस्कुन्दिवहे । शर्पूर्वा इति खयः शेषः । कुहोश्चुः । अभ्यास-कवर्गहकारयोश्चवर्ग इत्यान्तर्यात् ककारस्य चकारः । स्कुन्दिता । स्कुन्दिष्यते । स्कुन्दताम् । अस्कुन्दत । स्कुन्देत । आशिषि । स्कुन्दिषीष्ट । अस्कुन्दिष्ट । अस्कुन्दिष्यत । भावादिषु यक्चिणो ॥ स्कुन्द्यते । स्कुन्द्यताम् । अस्कुन्द्यत । स्कुन्द्येत । अस्कुन्दीत्यादि । चुस्कुन्दिषते । चुस्कुन्दिषाञ्चक्रे । चुस्कुन्दिषिता । चुस्कुन्दिषिष्यते । चुस्कुन्दिषताम् । अचुस्कुन्दिषत । चुस्कुन्दिषेत । आशिषि । चुस्कुन्दिषिषीष्ट । अचुस्कुन्दिषिष्ट । अचुस्कुन्दिषिष्यत । चोस्कुन्द्यते । चोस्कुन्दाञ्चक्रे । चोस्कुन्दिता । चोस्कुन्दिष्यते । चोस्कुन्द्यताम् । अचोस्कुन्द्यत । चोस्कुन्द्येत । चोस्कुन्दिषीष्ट । अचोस्कुन्दिष्ट । अचोस्कुन्दिष्यत । भावादौ न विशेष इति गाधतौ प्रतिपादितम् । चोस्कुन्दीति । चोस्कुन्ति । चोस्कुन्दाञ्चकारेत्यादि ॥ लङि तिप्सिपोर्हल्ङ्यादिसंयोगान्तलोपयोरचोस्कुन् । भावादौ यङन्तवदित्युक्तम् । स्कुन्दयति । स्कुन्दयतइत्यादि । स्कुन्दनः । युच् । स्कुन्दा । उपदेशावस्थायां नुमो विधानाद् धातोर्गुरुमत्त्वाद् 'गुरोश्च हल' इति स्त्रियामकारो लघूपधगुणाभावश्च ॥ ९ ॥

श्विदि श्वैत्ये । अकर्मकः । श्वेतस्य गुणस्यापि धातुना साध्यतया क्रमिकतया वाभिधानात् क्रियात्वम् । यदाह ।

श्वेतते: श्वेत इत्येतत् श्वेतत्वेन प्रकाश्यते ।
आश्रितक्रमरूपत्वादभिधानं प्रवर्त्तते ॥

इति । पूर्ववन्नुमागमः । श्विन्दते इत्यादि स्कुन्दिवत् ॥ १० ॥

Digitized by Google

वदि अभिवादनस्तुत्योः ॥ प्रणतिपूर्वमाशिषो वाचनमभिवादनं तथा च प्रयोगः । अभिवदति माभिवादयते प्याचार्यं श्वशुरं राजानमिति । वन्दते । ववन्दे । वन्दितेत्यादि । पूर्ववन्नुमि कृते ऽकारस्यासहायहल्मध्यगतत्वाभावाचेत्वाभ्यासलोपौ । न शसददवादिगुणानामिति निषेधाद्वा । गुण इति तद्भावितोऽकार उच्यते । वन्दारुः । 'शृवन्द्योरारुरि'ति तच्छीलादिकर्तृष्वा रुप्रत्ययः । वन्दना । 'घट्टिवन्दिविदिभ्यश्चे'ति स्त्रियां युच् । वन्दा वृक्षरुहा । बाहुलकात् स्त्रियां संज्ञायामकारः । वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपीत्यमरः । वन्दीति । स्तोतर्यावश्यकर्मण्यन्तः । हठहृतमहिलायां त्विचिति सर्वधातुविषयेचन्तात्सर्वतोऽक्तिन्नर्थादित्येकइति ङीषि ॥ अयं बशादिरपभ्रंशः । यदाह राजानकः संदिग्धस्योदाहरणे ।

आलिङ्गितस्तत्रभवान्संपराये जयश्रिया ।
आशीःपरंपरां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥

अत्र वन्द्यामिति किं हठहृतमहिलायां उत नमस्यामिति सन्देह इति । वन्द्रः पूजकः । स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रगिति रक् प्रत्ययः ॥ ११ ॥

भदि कल्याणे सुखे च ॥ कल्याणं मङ्गलं सुखमात्मगुणः । भन्दते । बभन्दे । भन्दितेत्यादि स्कुन्दिवत् । देवदत्ताय भद्रं भूयाद्देवदत्तस्येति वा ॥ ऋज्रेन्द्राग्रवज्रविप्रकुप्रचुप्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवर्णेरामाला इति रन्प्रत्ययेऽनुनासिकलोपे भद्रशब्दो निपातितः । तद्युक्ता'च्चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहिते'रित्याशिषि गम्यमानायां चतुर्थीषष्ठ्यौ । अत्रायुष्यादयोऽर्थपराः ॥ भद्राकरोति मुण्डयतीत्यर्थः । 'भद्राच्चेतिवक्तव्य'मिति परिवापणे मुण्डने कृञो योगे डाच् प्रत्ययः । अस्य चो 'र्यादिच्विडाचश्चे'ति गतित्वात्पूर्वं प्रयोगः । अत एव निपातत्वेनाव्ययत्वात्सोर्लुक् ॥ १२ ॥

मदि स्तुतिमोदमदस्वप्नगतिषु ॥ कान्तिगतिष्वित्येके । मोदो हर्षः । मदो गर्वः । स्वप्न आलस्यम् । चन्द्रस्तु मदिजयइत्यपि पपाठ । स्तुतिगति-

भ्यामन्यत्राकर्मकः । मन्दते । ममन्दे । मन्दितेत्यादि पूर्ववत् ॥ मन्दुरा । मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरचित्युरच् । मन्दिरम् । इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमुहिमिहिमुचिरुचिरुधिशुषिबन्धिभ्यः किरजिति किरच् । मन्द्रम् । स्फायितञ्चीत्यादिना रक् । मन्दारः ॥ अगिमदिमन्दिभ्य आरचित्यारन् । मन्दरः । बाहुलकादरः यद्वा, मन्दं रातीति मन्दरः । अयं मदी हर्षे दिवादौ । मदहर्षग्लेपनयोर्घटादौ । मदतृप्तियोग इति चुरादौ ॥ १३ ॥

स्पदि किंचिच्चलने । चलनं कम्पनम् । अकर्मकः । स्पन्दते । पस्पन्दे । स्पन्दितेत्यादि पूर्ववत् । स्पन्दयति । 'निगरणचलनार्थेभ्यश्चे'ति णयन्तात्परस्मैपदमेव । निगरणमभ्यवहारः ॥ १४ ॥

क्लिदि परिदेवने ॥ परिदेवनं शोचनम् । सकर्मकः । क्लिन्दते देवदत्तम् । चिक्लिन्दे । क्लिन्दितेत्यादि ॥ क्लेदा ॥ क्लेदौषधिशशाङ्कयोरिति यादवप्रकाशः । श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्द्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति कनिनि गुणानुमभावयोर्निपातितः । सर्वनामस्थाने चासंबुद्धाविति नान्तस्यादुपधाया दीर्घः ॥ संबुद्धौ हल्ङ्यादिलोपे प्रत्ययलक्षणेन सुबन्तत्वात्पदत्वाच्चलोपः प्रातिपदिकेति प्राप्तो नलोपो 'न ङिसंबुद्ध्यो'रिति निषिध्यते भसंज्ञायामल्लोपे क्लेद्न इत्यादि, सप्तम्येकवचने 'विभाषा ङिश्योरि'त्यल्लोपस्य विकल्पनात् क्लेद्नि क्लेदनीत्यपि भवति । हलादौ पदत्वान्नलोपे क्लेदभ्यामित्यादि । नलोपस्य पूर्वत्रासिद्धत्वात्'सुपि च' 'अतो भिस ऐस्' 'बहुवचने झल्ये'दित्येते विधयो न भवन्ति । स्कुन्त्यादय एतदन्ताः सप्त इदितः । अयं परस्मैपदिष्वपि पठिष्यते । क्लिदू आर्द्रीभावे दिवादौ ॥ १५ ॥

(शेषमवे)

सटीकसंक्षेपशारीरकम् ।

(*Continued from page 592.*)

मू० ॥ प्रत्यग्भावस्तावदेकोऽस्ति बुद्धौ
प्रत्यग्भावः कश्चिदन्यः प्रतीचि ॥
प्रत्यग्भावस्तत्कृतस्तत्र चाऽन्यो
व्युत्पन्नोऽयं तत्र चात्मेति शब्दः ॥ १५८ ॥

टी० ॥ एवं महावाक्यस्थब्रह्मादिपदवाच्यं शबलं तत्र शब्दस्य शक्तिं व्युत्पत्तिं च दर्शयित्वा तद्वाक्यस्थाऽहमादिपदवाच्यशबलं तत्राऽहमादिपदसंबन्धग्रहं च दर्शयति । प्रत्यग्भाव इति । आन्तरत्वमिति यावत् । बुद्धौ अन्तःकरणे । शरीरेन्द्रियाऽऽद्यपेक्षया हि तदधिष्ठानन्तःकरणमान्तरमित्यर्थः । अन्य आपेक्षिकादन्तःकरणनिष्ठप्रत्यक्त्वादन्यः । प्रतीचि साक्षिणि । तस्य य आत्मा सर्वान्तर इतिश्रुतेः सर्वान्तरत्वमन्यः प्रत्यग्भावोऽस्तीत्यर्थः । तत्कृतस्ताभ्यां प्रत्यक्त्वाभ्यां कृतस्तत्र तदुभये शबलेऽन्यः ताभ्यां प्रत्यक्त्वाभ्यामन्यः प्रत्यग्भावोऽस्तीत्यनुषङ्गः । ततः किं तत्राह । व्युत्पन्नोऽयमिति । तत्र शबले । आत्मेतिशब्दः त्वमहमादिशब्दः । यद्यप्यहमादिशब्दसङ्केतग्रहसमये तदर्थे शबलत्वं न प्रतीयते तथापि तस्मिन्विचारकाले तत्प्रतीतीति वक्ष्यति ततस्तदपि तदुभयाऽऽत्मकमेवेत्येवमुक्तम् ॥ १५९ ॥

मू० ॥ तच्छब्दवाच्यगतमद्वयभागमेकं
प्रत्यक्त्वमात्रमविरोधमपेक्षमाणः ॥
त्वंशब्दवाच्यशबलस्थमुपाददानो
वाक्यादखण्डमथ तत्त्वमसीति विद्यात् ॥ १६० ॥

टी० ॥ एवं पदद्वयवाच्यशबलं तत्र ब्रह्मादिपदसङ्केतग्रहं चोक्त्वा वाक्यस्य जहदजहल्लक्षणयाऽखण्डार्थप्रतिपादनप्रकारमाह । तच्छब्दवाच्यगतमिति । वाक्यार्थे अविरोधमपेक्षमाणोऽधिकारी तच्छब्दवाच्यशबलगतं प्रविष्टमेकमद्वयभागं पारमार्थिकाऽद्वयभागं त्वंशब्दवाच्यशबलस्थं प्रत्यक्त्वं

सर्वान्तरत्वं जहदजहल्लक्षणयोपाददानोऽनन्तरं तत्त्वमसीतिवाक्यादखण्डं विद्यादिति संबन्धः ॥ १६० ॥

मू० ॥ आदेयांशे नाणुमात्रोऽपि भेदो
यद्यप्येवं भिन्नमादाय शब्दौ ॥
वर्तेते त्वय्यद्वयात्मप्रकाशे
बाह्यं हेतुं नामिता नास्ति तस्मात् ॥ १६१ ॥

टी० ॥ ननु तत्त्वंपदयोरेकार्थत्वमनुपपन्नं तथा सति पर्यायताऽऽपत्तेरत्यन्तभिन्नाऽर्थत्वे च सामानाधिकरण्याऽयोगादिति, भेदाऽभेदनिष्ठं तद्वाक्यमित्याशङ्क्याह । आदेयेति । तात्पर्यविषये लक्ष्ये अपरोक्षचैतन्याऽद्वयभाग इत्यर्थः । अणुमात्रोऽपि ईषदपि । चैतन्यानन्दयोरत्यन्तमभेदात् । अन्यथाऽऽनन्दस्याऽभानप्रसङ्गात् चैतन्ये वा कल्पितत्वं स्यात् । अन्यथा तदसंबन्धात् । एवं चैतन्यस्याऽप्यानन्दभेद उपेक्षणीयतापत्तिः । भेदाऽभेदौ च विरुद्धाविति तदुभयमेकरसं न तु भिन्नाभिन्नमित्यर्थः । एवं चेत्कथमपर्यायता पदयोरित्याशङ्क्योक्तानुवादेन तामुपपादयति । यद्यप्येवमिति । भिन्नं परस्परमितिशेषः । शब्दौ तत्त्वमादिशब्दौ । बाह्यं वाक्यार्थाद्बहिर्भूतम् । हेतुं शब्दप्रवृत्तिनिमित्तं वाच्यमिति यावत् । नामिता पर्यायता । पदद्वयलक्ष्यस्यैकरसत्वेऽपि वाच्यभेदादपर्यायतेत्यर्थः ॥१६१ ॥

मू० ॥ अद्वैतेऽर्थे प्रत्यगर्थोऽस्ति तद्व-
त्प्रत्यक्तत्वे चाऽद्वयस्याऽपि भावः ॥
यद्यप्येवं नातिरेकाऽवकाशः
पूर्णे तत्त्वे तत्त्वमोऽपपत्तेः ॥ १६२ ॥

टी० ॥ ननु जीवब्रह्मणोरत्यन्तमभेदे घटकुटशब्दवत्तत्त्वं पदसामानाधिकरण्यं न स्यात् नीलमुत्पलमित्यादावीषद्भेदे सत्येव सामानाधिकरण्यदर्शनादित्याशङ्क्याह । अद्वैतेऽर्थे इति । शुद्धाऽद्वयानन्द इत्यर्थः । प्रत्यगर्थः केवलसाक्षी सर्वान्तरोऽस्ति तदभिन्न इति यावत् । तद्वत्प्रत्य-

गभिन्नाऽद्वयवत्प्रत्यक्तत्त्वे उक्तसाक्षित्वे अद्वयस्याऽपि भावः अस्त्येवेति संबन्धः । अद्वयाऽर्थोऽपि प्रत्यगभिन्न इत्यर्थः । यद्यपि शब्दो सतीत्यस्याऽर्थे एवं सतीत्यर्थः । अतिरेकः इषद्भेदः । अथ वाऽद्वैतेत्यादिना प्रत्यगद्वयाऽभेदो दर्शितः यद्यपीत्यादिना सामानाधिकरण्यनिमित्तं भेदमनूद्य दूषयति एवमपि सामानाधिकरण्यादतिरेकावकाश इति यदि तच्चेत्यर्थः । तत्रहेतुमाह । पूर्णे तत्त्व इति । तदा खलु ब्रह्म प्रतीचो व्यावर्त्तेत प्रत्यगपि ब्रह्मणः । एवं च तदर्थब्रह्मणो निरवधिकबृहत्त्वं त्वमर्थस्य च प्रतीचः सर्वान्तरत्वं न स्यात् पूर्णे तत्त्वे सत्येव तत्त्वमर्थयोस्तदुपपत्तेरित्यर्थः ॥ १६२ ॥

मू० ॥ न च विनिगमनायां कारणं किं चिदस्ति
स्फुटमुभयपदस्या लक्षणा शस्यतेऽतः ॥
न हि विनिगमनायां हेत्वभावे कदा चि-
त्क चिदियमुपलब्धा सोऽयमित्यादिवाक्ये ॥ १६३ ॥

टी० ॥ नन्वेकस्मिन् वाक्ये प्रयुक्तनिखिलपदलक्षणाऽनुपपन्ना लोके तथाऽदर्शनात् शक्तपदं विना वाक्यार्थोऽनुभवाऽयोगाच्च तस्यैव तज्जनकत्वादिति चेन्न । न तावल्लोके तददर्शनं विषं भुंक्ष्वेत्यादौ तद्दर्शनात् । तेन हि वाक्येन शत्रुगृहाचोदकादेर्भक्षणपानादीष्टसाधनं न भवतीति प्रतीयत इति सर्वपदलक्षणा । एवमर्थवादवाक्यस्यसर्वपदेऽपि प्राशस्त्ये लक्षणा दृष्टा । किंच तात्पर्यानुपपत्तिर्हि लक्षणाबीजं नाऽन्वयानुपपत्तिः क्रय्येयं गौर्यतो बहुक्षीरेत्यर्थवादवाक्ये तदभावात् । एवं च यथातात्पर्यमेकस्मिन्सर्वस्मिन्वा पदे लक्षणा न विरुद्धा । अत एव सोऽयमित्यऽत्रापि पदद्वयलक्षणैव न्याय्या । शब्दस्य वाक्यार्थोऽनुभवजनकत्वे चाऽन्वीयमानोपस्थापकत्वमेव तन्त्रं न तु शक्त्या तदुपस्थापकत्वं गौरवादित्युपक्रमाद्यनुरोधेन प्रत्यगद्वयमात्रपर्यवसायितत्त्वमसिवाक्यस्यपदद्वयलक्षणा न विरुध्यते । आवश्यकी चाऽन्यथा श्रुतितात्पर्यानिर्वाहादिति । न्यायसिद्धेऽर्थे अविनिगमनतर्कमप्यनुग्राहकमाह । न च विनिगमनायामिति । चकारेणोक्तं न्यायं

समुच्चिनोतीति । अस्मिन्नेव पदे लक्षणा नाऽन्यत्रेति निर्धारणायामित्यर्थः । शस्यते प्रशस्यते यतो विनिगमनायां किमपि स्फुटं कारणं नास्ति अत उभयपदस्येत्यादिसंबन्धः । ननु तिष्ठतु कारणान्तरगवेषणं श्रोतुरिच्छैव तन्निमित्तमित्याशङ्क्य तर्हि वाक्याऽर्थव्यवस्था न सिद्ध्येत्सर्वेषामेकस्य वा श्रोतुर्नियतेच्छाभावादित्याशयेनाह । नहीति । इयमेकपदलक्षणा ॥ १६३ ॥

मू० ॥ प्रथमचरमभावो निर्णये कारणं चे-
दयमपि नियमो न ह्यन्यथाऽप्यस्य दृष्टेः ॥
प्रथमपठितमासीत्तत्पदं सामवेदे
चरमपठितमेतद् दृष्टमध्वर्युवेदे ॥ १६४ ॥

टी० ॥ ननु यस्मिन्वाक्ये यत्पदं प्रथमं श्रूयते तदसंजातविरोधितया प्रबलं स्वार्थनिष्ठं तद्विरुद्धार्थं द्वितीयं तदनुकूलं लक्षयिष्यतीति तत्र कारणाभावोऽसिद्ध इत्याशङ्क्याऽत्राऽपि वाक्यार्थाऽव्यवस्थैव दोषः प्राथम्यादेरपि शाखाभेदेनाऽव्यवस्थितत्वादित्याह । प्रथमेति । निर्णये लक्षणानिर्णये । अस्य प्रथमचरमभावस्याऽन्यथादर्शनमेवाऽऽह । प्रथमेति । तत्पदमद्वयब्रह्मबोधकम् । सामवेदे तत्त्वमसिवाक्य इत्यर्थः । अध्वर्युवेदे यजुर्वेदे अहं ब्रह्मास्मीतिवाक्ये । एतत्तत्पदार्थबोधकं ब्रह्मपदमित्यर्थः । एवं च तत्त्वमसिवाक्येन जगत्कारणत्वादिविशिष्टस्य ब्रह्मणस्त्वंपदलक्ष्यसाक्ष्यभेदः प्रतिपाद्यः । यजुर्वेदेन तु अहंकारकर्तृत्वादिविशिष्टस्य शुद्धाऽद्वयाऽभेदः प्रतिपादनीय इति सर्वेषामेकरूपं ब्रह्म न सिद्ध्येत्तच्चाऽयुक्तमेकस्य वैरूप्याऽयोगाद्वस्तुनि विकल्पाऽसंभवाच्चेति भावः ॥ १६४ ॥

मू० ॥ सोऽयं पुमानयमसाविति पौरुषेये
वाक्ये तथा व्यतिहृतेऽपि विशेषहेतुः ॥
पूर्वाऽपरत्वमिति शक्यमिदं न वक्तुं
मुख्यत्वलाक्षणिकते प्रति शब्दवृत्त्योः ॥ १६५ ॥

टी० ॥ प्रथमचरमभावस्याऽनिर्णायकत्वं सोऽयमित्यादिलौकिकवाक्येऽप्याह । सोऽयं पुमानिति । अत्र वाक्ये तच्छब्दः पूर्वाऽयंशब्दः

पश्चात्प्रयुक्तः । अयमसावितिवाक्ये तु विपरीतः प्रयोगस्तदिदमाह । व्यतिहृत इति । व्यत्यस्त इत्यर्थः सोऽयं पुमान् । तथा तथाविधे अयमसाविति च व्यतिहृतेऽत्र पौरुषेये वाक्ये प्रत्यवृत्त्योर्मुख्यत्वस्याधिकृते प्रति इदंपूर्वाऽपरत्वं विशेषहेतुर्विनिगमनाहेतुरिति वक्तुं न शक्यमिति संबन्धः । अत्राऽपि वाक्यप्रयोक्तृणामुच्चारणे पूर्वाऽपरत्वनियमाऽदर्शनादिति भावः ॥ १६५ ॥

मू० ॥ न च भवति विरोधस्योत्थितस्याऽपनीतिः
पदयुगलनिविष्टां लक्षणामन्तरेण ॥
न हि भवति कदाचित्सद्वयस्याऽद्वयत्वं
न च भवति परोक्षः प्रत्यगर्थोऽपि तद्वत् ॥ १६६ ॥

टी० ॥ एवमखण्डे ब्रह्मणि तात्पर्याऽनुपपत्त्या विनिगमनाभावेन च पदद्वयलक्षणेत्युक्तम् । इदानीं मुख्याऽर्थयोरभेदाऽन्वयाऽनुपपत्त्याप्यविनिगमोपोद्बलितया सा वक्तव्येत्याह । न च भवतीति । विरोधस्याऽभेदे विरोधस्योत्थितस्य ज्ञातस्याऽपनीतिर्निराकरणं पदद्वयलक्षणामन्तरेण न च नैव भवतीति संबन्धः । विरोधमेव व्यनक्ति । नहीति । तद्वत्सद्वयस्याऽद्वयाऽभेद इवैतेन तदादिशब्दस्योपस्थितवाचकत्वात् शुद्धस्य च तात्पर्यविषयतयोपस्थितत्वाद्विनैव लक्षणान्ततः शुद्धोपस्थितिसंभव इति प्रत्युक्तमुपस्थितिविशिष्टस्य शुद्धत्वाऽसंभवात्तदादिपदघटितवाक्यगर्भमहावाक्यातिरिक्ताऽवान्तरवाक्यस्य शुद्धे तात्पर्याऽसंभवाच्च । न हि महावाक्यतदर्थप्रतिसन्धानं विना वाक्यैकदेशस्य शुद्धे तात्पर्यनिरूपणं संभवति । महावाक्यतदर्थप्रतिसन्धानं तु तत्पदतदर्थप्रतिसन्धानमृते न भवतीति तात्पर्यनिरूपणात्प्रागेव तत्पदार्थनिर्णयो वाच्य इति सृष्ट्यादिवाक्यानुरोधेन विशिष्टमेव तत्पदार्थ इति तत्राऽपि लक्षणा आवश्यकीति भावः । अत्र त्वमर्थगतसद्वितीयत्वांशपरित्यागवदपरोक्षस्याऽपि परित्यागो वक्तव्यस्तस्मिन्सत्येव विरोधस्य परिहारादुद्देश्यविशेषणत्वेन तस्याऽपि परित्याज्यत्वाच्चेति न शङ्कास्पदत्वं प्रत्यक्त्वमात्रस्य त्वंपदे लक्षणयोपादेयस्य वे-

तत्त्वमात्रस्याऽऽपरोक्ष्यस्वभावत्वात्स्वभावत्यागे च भावत्यागापत्तेः । न हि यद्गतमेकत्वमविवक्षितमिति यद्गतमप्युद्देश्यविशेषणत्वादविवक्षितं भवति तस्य तत्स्वभावत्वात् । न च स्वयं चाऽऽत्मा परोक्षश्चेति कस्य चिदनुभवः संभाव्यते तस्मात्पारोक्ष्यसद्वयत्वपरिहारायोभयपदे लक्षणाऽऽवश्यकाश्येति भावः ॥ १६६ ॥

मू० ॥ अविरुद्धविशेषणद्वय-
प्रभवत्वेऽपि विशिष्टयोर्द्वयोः ॥
घटते न यदैकता तदा
नितरां तद्विपरीतरूपयोः ॥ १६७ ॥

टी० ॥ नन्वेकपदेऽपि लक्षणा व्यर्था एकस्यैव ब्रह्मणो विशेषणद्वयविशिष्टतया पदद्वयवाच्यत्वेन दण्डी कुण्डलीतिप्रयोगवदभेदप्रतीत्युपपत्तेरिति चेन्न । विशिष्टाभ्यां तदुभयाश्रयकेवलस्वरूपस्याऽन्यत्वेन लक्षणां विना तत्पदाभ्यामुपस्थित्यसंभवात् । तथाहि इदानीमयं दण्डी न भवतीति हि दण्डिनो देवदत्तात्केवले तस्मिन् भेदः प्रतीयते अभेदनिषेधस्य भेदविषयतयान्यत्र क्लृप्तस्य विशेषमात्रसंसर्गाभावविषयत्वाऽयोगात् । अन्यथा घटः पटो न भवतीति प्रतीतेरपि घटत्वाऽत्यन्ताभावविषयत्वप्रसङ्गेन क्वाऽपि भेदो न सिद्ध्येच्च च प्राग् दण्ड्यवाऽयमिति प्रत्यभिज्ञया तदभेदे सिद्धे निषेधधियो विशेषणाऽभावविषयतेति वाच्यम् । भेदबुद्ध्यनुरोधेन प्रत्यभिज्ञाया एव तज्जातीयविषयतयोपपत्तेरात्मैवेदं सर्वमित्यादिना सर्वभेदसिद्धेः घटाऽऽद्यभेदनिषेधोऽपि न स्यात् । विशिष्टभेदस्तु उभयत्राऽपि समान एवाऽभेदबुद्धिरपि स्वरूपमात्राऽभेदविषयैवेति तयोर्भिन्नविषयतैव । एवं सति दण्डिकुण्डलिनोरपि परस्परं स्वसमानसत्ताकभेदबलात्तत्राऽपि लक्षणयैव तदुभयाऽऽश्रयाऽभेदसिद्धिः । एवमेकदैकत्राऽविरुद्धविशेषणद्वयविशिष्टयोरपि परस्परभेदेन यदैकता न घटते तदा किमु वक्तव्यं विरुद्धविशेषणद्वयविशिष्टयोर्जीवेश्वरयोरित्याह । अविरुद्धेति । स्पष्टम् ॥ १६७ ॥

मू० ॥ अथ केन चिदात्मनेकता
वचनेन प्रतिपाद्यते तयोः ॥
तदसुन्दरमस्तमेति हि
स्फुटमेवं त्रिविधाऽपि लक्षणा ॥ १६८ ॥

टी० ॥ ननु विरुद्धरूपयोरपि जीवेश्वरयोः सत्त्वादिना केन चित्स्वरूपेणैकत्वसंभवात्तत्त्वमादिवचनं कथं लक्षणां विना नैव प्रतिपादयेदिति शङ्कते । अथेति । किं तत्स्वरूपं पदेन केन चिदुपस्थापनीयम् । उत न । आद्ये तद्वाचकपदाऽभावेन ब्रह्माहंपदयोस्तत्र लक्षणाप्रसङ्गः । द्वितीये शब्दाऽऽदिना लक्षणाऽनुपस्थितस्याऽपि वाक्यप्रतिपाद्यत्वे गङ्गासंबन्धिनस्तत्पदादनुपस्थिततीरादावपि घोषान्वयित्वप्रतीत्युपपत्तेः । एवं शोणादिना लक्षणामन्तरेणाऽश्वादेर्बहिःस्थित्यन्वयसंभवात्तथा सोऽयमित्यत्राऽपि शुद्धस्य वाक्यार्थत्वसंभवात्प्रसिद्धलक्षणोच्छेदप्रसङ्गः । तस्मात्पदोपस्थितपदार्थयोरन्वयो वाच्य इत्यभेदयोग्यस्वरूपोपस्थितये पदद्वयलक्षणाऽवश्यं वाच्येत्याशयेनाह । तदसुन्दरमिति । एवमेवं सति स्फुटमस्तमेतीति संबन्धः ॥ १६८ ॥ ॥

मू० ॥ साऽऽभासाऽज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तथाऽहंशब्दोऽहंकारवाची भवति तु जहती लक्षणा तत्र पक्षे ॥
नीरेषा रौति लोहं दहति विषधरो रज्जुरग्रे तवाऽसावित्यत्रेवात्मवस्तुन्यपि भवतु जहल्लक्षणा को विरोधः ॥ १६९ ॥

टी० ॥ एवं ब्रह्माहंपदयोर्लोकवेदव्यवहारानुरोधेन शबलवाचकयोर्जहदजहल्लक्षणयाऽखण्डाऽर्थत्वमुक्तम् । इदानीमज्ञानमात्रवाची ब्रह्मशब्दः मम योनिर्महद्ब्रह्मेत्यत्र केवलाज्ञाने ब्रह्मशब्दप्रयोगात् । एवमहंशब्दोऽपि व्यवहारबलेन लाघवाच्च केवलाऽहंकारवाची भवत्विति ताभ्यां जहल्लक्षणयैवाऽखण्डवस्तुप्रतिपत्तिरिति पक्षान्तरमाह । साऽऽभासाऽज्ञानेति । चिच्छायायुक्ताऽज्ञानवाचीत्यर्थः । यदीति निश्चयार्थे । जहल्लक्षणाया अतिप्रसिद्धतया प्रस्तुते तदौचित्यार्थं दृष्टान्तमाह । नीरिति । रौति शब्दं

करोति । नावः शब्दकर्तृत्वाऽनुपपत्तेस्तया तत्स्थः पुरुषो लक्ष्यते । एवमुत्त-रत्राऽपि । लोहरज्जुशब्दाभ्यां वह्निसर्पयोर्लक्षणा । रज्जुर्विषधर इति लोकप्र-सिद्धप्रयोगाऽनुवादत्वाद् ग्रन्थकर्तुर्न विलिङ्गप्रयोगदोषः । विषधरा उ इति छेदो वाऽस्तु । विषधरपदं वा दीर्घद्रव्यलक्षकं तथा च न विलिङ्गता । दा-र्ष्टान्तिकमुपसंहरति । आत्मवस्तुनीति । अत्राऽनिश्चिताऽर्थयदिशब्द-स्वारस्येन प्रौढिवादोऽयं ग्रन्थकारस्येति केचित् । तत्र च बीजं ब्रह्म-शब्दस्य जगत्कारणे प्रचुरप्रयोगाऽनुरोधः अज्ञाने तत्प्रयोगस्य क्वाचित्क-त्वादेवमात्मवचनाऽहंशब्दस्याऽपि नियमेन शबल एव प्रयोग इति ॥ १६९ ॥

मू० ॥ प्रत्यक्त्वादिगुणाऽन्वयेन यदि वा गौण्यस्तु वृत्तिस्तयो-
ब्रह्माऽहंपदयोः परेतरदृशोर्मुख्यो विरोधो यतः ॥
मुख्याऽर्थाऽनुपपत्तिहेतुकतया गौण्यस्ति वृत्तिर्यतो
लोके माणवको विभावसुरसौ सिंहः पुमानित्यपि ॥ १७० ॥

टी० ॥ निर्गुणे कस्याऽपि गुणस्याऽभावात्प्रौढिवादेनैव पक्षान्तर-माह । प्रत्यक्त्वादीति । आदिपदेन बृहत्त्वं गृह्यते । तयोः परेतरदृशोः ईश्वरजीवयोरिति सप्तम्यौ । यदि प्रत्यक्त्वाऽऽदिगुणान्वयेन वृत्तिस्तर्हि गौण्यस्त्विति संबन्धः । तयोर्ब्रह्माऽहंपदयोरिति वाऽन्वयः । लक्षणयोः परेतरदृशोः परापरयोर्ब्रह्मप्रत्यगात्मनोर्दृग्ज्ञानं याभ्यां तयोरिति विग्रहः । तत्र हेतुर्मुख्य इति । ननु लक्षणामन्तरेण गौणी का चिदमुख्यवृत्तिर्न लोके सिद्धेत्याशङ्क्याऽऽह । मुख्याऽर्थेति । मुख्याऽर्थाऽन्वयाऽनुपपत्तिर्हेतुर्यस्मि-न्नमुख्यसंबन्धे स तथा तस्य भावस्तत्ता तयेत्यर्थः । तत्र दृष्टान्तमेव हेतु-माह । यत इति । विभावसुरग्निः । अग्निर्माणवकः सिंहो देवदत्त इत्यादौ वह्न्यादिशब्दस्य स्वाऽर्थगुणयोगेन माणवकाऽऽदावनेकत्र प्रयोगाल्लोके गौणीवृत्तिर्यतः प्रसिद्धतमेत्यर्थः ॥ १७० ॥

मू० ॥ परशब्दवृत्तिरपरत्र भवे-
दिति यद्यपीदमुभयोः सदृशम् ॥

अनयोस्तथाऽपि तु विभागकरं
स्फुटमस्ति लक्षणमवान्तरकम् ॥ १७१ ॥

टी० ॥ ननु स्वार्थं विहायाऽर्थान्तरे वृत्तिर्गौण्यप्यस्ति चेत्कस्तर्हि लक्षणागौण्योर्भेद इति शङ्कामनूद्य तयोरवान्तरभेदोऽस्तीत्याह । परशब्दवृत्तिरिति । परस्य लक्ष्यमाणादन्यस्य गङ्गादेर्माणवकाऽऽदेरन्यस्य ज्वलनाऽऽदेर्वाचकशब्दस्य वृत्तिरित्यर्थः । अपरत्र स्वार्थादन्यत्रोभयोर्लक्षणागौण्योः सदृशं यद्यपीति संबन्धः । अनयोरित्यादि स्पष्टम् ॥ १७१ ॥

मू० ॥ गुणतो गुणवृत्तिरिष्यते
ह्यपरा लाक्षणिकी तु सङ्गतेः
इति भेदकमस्ति लक्षणा-
गुणवृत्त्योरिति वेदवादिनः ॥ १७२ ॥

टी० ॥ अवान्तरभेदमेव दर्शयति । गुणत इति । लक्ष्यमाणगुणयोगेन स्वाऽर्थादन्यत्र वृत्तिर्गौणी । लाक्षणिकी तु अपराऽन्या सा संगतेः स्वार्थसंबन्धमात्रादर्थान्तरे वृत्तिर्न तु गुणयोगादित्यर्थः । इत्यनेन प्रकारेण लक्षणागुणवृत्त्योर्भेदकमस्तीति वेदवादिनो मीमांसकाः । अभिधेयाऽविनाभूते प्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तिरिष्टा तु गौणतेत्याहुरित्यर्थः । गङ्गाऽऽदिपदं हि स्वाऽर्थाऽन्वयाऽनुपपत्तौ सत्यां तद्विहाय तत्संबन्धिनि वस्तुनि वर्तते न तु तद्गुणयोगमपेक्षते तीरे गङ्गासादृश्याऽप्रतीतेः । ज्वलनाऽऽदिपदं तु स्वाऽर्थाऽसंबन्धिन्यपि माणवकाऽऽदौ लक्षितस्वाऽर्थं शुचित्वादिगुणयोगेन वर्तते अत एवाऽग्निसदृशो माणवक इति ततः प्रतीयत इति तयोः स्फुटमस्ति भेदकमित्यर्थः ॥ १७२ ॥

मू० ॥ नित्यः शुद्धो बुद्धमुक्तस्वभावः
सत्यः सूक्ष्मः सन्विभुश्चाऽद्वितीयः ॥
आनन्दाऽब्धिर्यः परः सोऽहमस्मि
प्रत्यग्धातुर्नोऽत्र संप्रीतिरस्ति ॥ १७३ ॥

टी० । एवं जहदजहल्लक्षणया तत्त्वंपदाभ्यामुपात्तप्रत्यग्ब्रह्माऽभेदनिष्ठं महावाक्यमित्युक्तमिदानीं तदनुवदनुपाऽऽदेयप्रत्यग्ब्रह्मणोरवान्तरश्रुतितात्पर्यगोचरस्वरूपमाह । नित्य इत्यादिना । वस्तुतः कालत्रयाऽपरिच्छेद्यो नित्यः । शुद्धः अविद्याकलङ्करहितः । बुद्धः स्वप्रकाशबोधः न तु बोधविषयः । मुक्तो रागद्वेषाऽऽदिबन्धरहितः । सत्यः त्रिकालाऽबाध्यः । सूक्ष्मः स्थौल्यरहितः दुर्विज्ञेयो वा । सन् विद्यमानः भावस्वरूप इति वा । विभुः देशाऽपरिच्छिन्नः स्वतन्त्र इति वा । अद्वितीयः वस्त्वन्तररहितः । आनन्दाऽब्धिः अनवच्छिन्नानन्दः । परः परमात्मेति विशेष्यम् । एवं तत्पदलक्ष्यस्वरूपं निर्दिश्य त्वंपदलक्ष्यस्वरूपमाह । प्रत्यग्धातुरिति । अहमनुभवे प्रकाशमानोऽहंकारादिसाक्षी प्रत्यग्धातुशब्दः स्वरूपवाची सोऽपि उक्तलक्षण एवाऽतो न किं चिदपि तदुभयवैलक्षण्यमिति तदत्यन्तमभिन्नमेवेत्याशयेन वाक्याऽर्थमाह । सोऽहमस्मीति । विद्धीति शेषः । अस्याऽर्थस्य प्रागुपपादितत्वाऽत्राऽग्रे चोपपादयिष्यमाणत्वात्संशयं माकुर्वित्याशयेनाह । नात्रेति । अथ वास्मीत्यविवक्षितं य एतादृशः परमात्मा सोऽहंपदलक्ष्यप्रत्यक्चैतन्यमित्यर्थः । यथा चिदेकरसमपि ब्रह्म वस्तु स्वभावतः सत्यज्ञानाऽऽदिपदैरपर्यायैस्तात्पर्येण प्रतिपादनाच्च सत्यज्ञानाऽऽनन्दाऽऽत्मकमित्युच्यते एवं नित्यो नित्यानामज आत्मा महान् अजोऽयं पुरुषः स्वयं ज्योतिः असङ्गो ह्ययं पुरुषः अकामं रूपं शोकान्तरं विमुक्तश्च विमुच्यते सत्यं ज्ञानं विभुं सर्वगतं सुसूक्ष्मं सदेवसोम्येदम् एकमेवाद्वितीयम् एषोऽस्य परम आनन्द इत्येवमादितत्तद्वाक्यस्थैरपर्यायैर्नित्याऽऽदिशब्दैस्तात्पर्यतः प्रतिपादनात्तन्नित्यशुद्धाऽऽदिस्वभावमित्युच्यत इति ॥ १७३ ॥

मू० ॥ सच्चित्सुखाऽद्वयवपुः कथयन्ति के चि-
त्सच्चित्सुखाऽऽत्मकमिति प्रथयन्ति के चित् ॥
ब्रह्मेतराणि किल नाऽस्य वपूंषि तेषां-
बुद्ध्या स्फुरन्त्यपररूपनिवृत्तिभावात् ॥ १७४ ॥

टी० ॥ नित्यत्वादीनामभावरूपाणां न भावरूपब्रह्मस्वरूपत्वमिति

मन्वानानां मतभेदमाह । सच्चिदिति । सच्चिदद्वयानन्दस्वरूपं ब्रह्मेति के चित् । अद्वयत्वं च द्वयाऽभावोपलक्षितं भावस्वरूपम् । एतच्चाऽऽनन्दपदार्थः । अपरे त्वद्वयत्वमपि मुक्त्वा सदादिकमेव ब्रह्मेति वर्णयन्ति । नित्यत्वाऽऽदीनां ब्रह्मस्वरूपत्वे तेषामरुचिनिमित्तमाह । इतराणीति । अस्य ब्रह्मण इतराणि नित्यत्वादीनि वपूंषि सन्ति वपुःशब्देन बुद्धौ न स्फुरन्ति किल । कुतः तेषां नित्यत्वादीनामपररूपस्य कालपरिच्छेद्यत्वादेः निवृत्तिभावादभावरूपत्वादित्यर्थः । ब्रह्मणो भावरूपत्वाद्भावरूपमेव सदाऽऽनन्दादिकं स्वरूपं भवितुमर्हति न नित्यत्वादिकमप्यभावरूपं विरोधात्किं तु तेषां तद्धर्मत्वमेवेति तदाशयः । अत्र के चित् किलशब्दाभ्यामस्वारस्यं द्योतितं तत्र चेदं निमित्तं यथा सदादिशब्दैर्लक्षणया भावरूपं ब्रह्म प्रतिपाद्यते एवं नित्यादिशब्दैरपि तत्तच्छबलशक्तेस्तदधिष्ठानं ब्रह्मैव लक्षणया प्रतिपाद्यत इति तन्नित्यादिस्वभावमिति व्यवह्रियत इति न ब्रह्मणोऽभावाऽऽत्मताऽऽपत्तिः नाऽप्यभावधर्मकत्वमद्वये धर्मधर्मिभावाऽयोगादभावस्य दुर्निरूपस्य श्रुतिप्रतिपाद्यत्वाऽनुपपत्तेश्चेति ॥ १०४ ॥

मू० ॥ ब्रह्मेति शेषि पदमत्र हि लक्ष्यमेकं
शेषाणि लक्षणसमर्पणमस्य कुर्युः ॥
लक्ष्याऽर्पणेन सह लक्षणवाचि सर्वं
संगच्छतेऽरुणपदक्रयवाचिनेव ॥ १०५ ॥

टी० ॥ इदानीमवान्तरवाक्यस्याऽखण्डाऽर्थत्वं वक्तुं सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मलक्षणवाक्ये लक्ष्यलक्षणविभागमाह । ब्रह्मेति । ब्रह्मेतिपदं शेषीतिसंबन्धः । शेषिणः प्रधानस्य पदमितिवा । ननु ज्ञानाऽऽनन्दादेरपि ब्रह्मस्वरूपत्वात्तत्पदमपि तथाविधं किं न स्यात्तत्राऽऽह । अत्र हीति । अस्मिन्वाक्ये एकं पदं लक्ष्यं हि यतः शेषाणि सत्यादिपदानि अस्य ब्रह्मणो लक्षणसमर्पणं कुर्युरित्यर्थः । एकस्मिन्वाक्ये एकमेव पदं लक्ष्यमुद्देश्यं समर्पयतीति वक्तव्यं सर्वपदानामुद्देश्यत्वे तेषां परस्पराऽऽनन्वयेन वाक्यमनर्थकं स्यात् । विधेयं विना सर्वोद्देशानर्थक्यात्तच्चेशं ब्रह्मपदोप-

स्थितमेव भवितुमर्हति तस्यैव ज्ञानस्य पूर्ववाक्ये ब्रह्मविदाप्नोति परमित्यत्र परमपुरुषार्थसाधनत्वदर्शनात् । यच्च पुरुषार्थसाधनं तदेवाऽऽधिकारिणा जिज्ञास्यं तदेव च लक्षणेनाऽऽपि निरूप्यम् । एवं च ब्रह्मपदसामर्थ्याद्यतो वा इमानि भूतानि जायन्त इतिवाक्ये भूतसृष्टिस्थित्यादिकारणे ब्रह्मशब्दप्रयोगाच्च जगत्कारणमद्वयं ब्रह्मैव कार्यानुमानेन सामान्यतोऽवगतं विशिष्य जिज्ञास्यमिति तदेव लक्ष्यं शेषीति ज्ञानादिपदान्यस्य लक्षणं प्रतिपादयेयुरिति भावः । ततः किं तत्राऽऽह । लक्ष्यार्पणेनेति । पदेनेति शेषः । लक्षणवाचि पदमिति शेषः । संगच्छते यद्ब्रह्म तत्सत्यज्ञानाऽऽद्यात्मामितिवाक्यभावेन संगतं भवति ज्ञानाऽऽद्यात्मतयाऽज्ञातब्रह्मण एव तथा प्रतिपाद्यतया प्रधानत्वात्तत्पदेन लक्षणवाचिपदानां तद्गुणभूतार्थानां संबन्धो वक्तव्यः अन्यथा प्रतिपिपादयिषिताऽर्थाऽसिद्धेरिति भावः । प्रधानेनेतरेषामन्वये दृष्टान्तमाह । अरुणपदमिति । अरुणया पिङ्गाक्ष्या गवा सोमं क्रीणातीत्यत्र तृतीयान्ताऽरुणाऽऽदिपदानि क्रयसाधनार्थानि क्रीणातीत्यनेनाऽन्वीयन्ते चारुण्यादिविशिष्टक्रयस्यैव विधेयत्वादिति यद्वत्तद्वदित्यर्थः ॥ १७५ ॥

मू० ॥ पृष्ठात्परस्परयुजाप्रतिपत्तिरेषा-
मेवंविधत्वमुपपादयितुं समर्था ॥
लक्ष्यस्य तस्य महतः क्रयवस्तुवत्स्या-
त्सर्वस्य कारकपदस्य परस्परेण ॥ १७६ ॥

टी० ॥ नन्वेवं सत्यारुण्यादीनां यथा प्रत्येकमेव क्रयेणाऽन्वयः प्रत्येकं निरपेक्षकरणविभक्तिश्रवणात् । एवं यद्ब्रह्म तत्सत्यं ज्ञानं तदनन्तमिति सत्यादिपदानामन्योन्यं निरपेक्षमेव ब्रह्मणाऽन्वयः स्यात् न तु परस्परमेलनमिति नास्माद्वाक्यात्सत्यज्ञानात्मकं ब्रह्मसिद्ध्येदनेकरूपं च तत्स्यादिति तत्राऽऽह । पृष्ठादिति । सत्यादीनां प्रत्येकं ब्रह्माऽन्वयप्रतिपत्तेः पश्चादेषां सत्यादीनां परस्परयुजा अन्योन्यं संबन्धः अभेद इति यावत् । एषा प्रतिपत्तिः । लक्ष्यस्य तस्य महतो ब्रह्मणः । एवं विधत्वं सत्यज्ञानाद्यखण्डैकरसत्वमुपपादयितुं समर्था स्यादिति संबन्धः । इममप्यर्थमुक्त-

Digitized by Google

दृष्टान्तेनाऽऽह । श्रयवस्तुवदिति । श्रयवस्तुन इवेत्यर्थः । कारकपदस्याऽरुणा-ऽऽदिपदस्य । यथा श्रयेण प्रत्येकमन्विताऽऽरुण्याऽऽदिगुणानां साक्षात्क्रय-साधनत्वाऽयोगादेकहायनीद्रव्यावच्छेदकत्वेनान्वीयमानानां परस्परमन्वयः प्राप्नोति एवं निरवधिकमहत्त्वशालित्वलक्षणा लक्ष्येणाऽभेदाऽनुपपत्त्येकस्या-ऽनेकस्वरूपताऽनुपपत्तेश्च परस्परं मेलनादभिप्रेतब्रह्मस्वरूपसिद्धिरिति ॥ १७६ ॥

मू० ॥ तत्त्वंपदार्थविषयो नय एव योज्यः

सत्यादिवस्तुषु न तत्र विशेषकल्पः ॥

सत्यादिशब्दविषयाः शबलास्तदर्थ-

भागेषु लाक्षणिकवृत्तिरपीह तुल्या ॥ १७७ ॥

टी० ॥ ननु सत्यादिपदवाच्याऽर्थोपादानेनोक्तब्रह्मस्वरूपलाभः ते-षामवश्यं परस्परं भेदात् । सत्यादिपदलक्षणायां च तस्यासत्याद्यात्मतापत्ति-रित्याशङ्क्याऽऽह । तत्त्वंपदार्थेति । सत्यादिवस्तुषु सत्यादिपदार्थेषु । ननु सत्यादिपदार्थस्य ब्रह्मपदार्थेनान्वयात्तत्र च गुणगुणिभावेन नीलोत्पलव-न्मुख्यार्थस्यैवाऽन्वयसंभवात् किं तत्त्वंपदयोरिव लक्षणाया येन तद्विषयो नयोऽत्रातिदिश्येत तत्राऽऽह । न तत्रेति । सत्यादिपदार्थेषु तत्त्वंपदार्था-भ्यां सकाशादन्वये विशेषप्रकारो नेत्यर्थः । सत्यादिपदार्थानां मुख्यब्रह्मान्व-यानुपपत्तेर्लक्षणाऽवश्यं वाच्येति भावः । यदुक्तं ब्रह्मणा एवं सत्यसत्या-द्यात्मतापत्तिरिति तदपि तदीयन्यायान्तराऽतिदेशेन परिहरति । सत्या-दीति । शबला इति । तांश्च शबलाननुपदमेव वक्ष्यति सत्यादिपदानामपि तत्त्वंपदयोरिव शबले शक्तिः । ततो जहदजहल्लक्षणाया च वक्ष्यमाण-न्यायेन तेषामभिमताऽऽत्मनि वृत्तिरिति न त्वदुक्तदोष इत्यर्थः ॥ १७७ ॥

मू० ॥ आकाशादौ सत्यता तावदेका

प्रत्यङ्मात्रे सत्यता का चिदन्या ॥

तत्संपर्कात्सत्यता का चिदन्या

व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र ॥ १७८ ॥

ननु किं तत्सत्यादिवाच्यं शबलं कथं वा तत्र व्युत्पत्तिरिति जिज्ञासायां तदाह । आकाशादौ सत्यतेत्यारभ्याऽऽकाशाऽऽदावस्तितेत्यन्तैः सप्तभिः श्लोकैः । आकाशघटाऽऽदौ सत्यता व्यावहारिकसत्यता । व्यवहारिकसत्यत्वं च परमाऽर्थसत्यत्वात् कल्पितभेदमस्त्येव सत्यं चाऽनृतं च सत्यमभवदितिश्रुतेः । आकाशाऽऽदेरात्मकार्यस्याऽर्थक्रियाकारित्वदर्शनाच्च परमार्थसत्यताऽतिरिक्ता वियदादिसत्यताऽस्तीत्यर्थः । प्रत्यङ्मात्रे शुद्धाऽऽत्मनि । सत्यता पारमार्थिकी सत्यता । अन्याऽऽकाशाऽऽदिसत्यत्वाद्विलक्षणाऽत्यन्ताऽबाध्याऽर्थलक्षणा । व्यावहारिकसत्यमेकमाकाशाद्यस्ति परमाऽर्थसत्यं च प्रत्यग्रूपमन्यदस्तीत्यर्थः । ततः किं तत्राऽऽह । तत्संपर्कात्तयोः सत्ययोः परस्परं तादात्म्याभिव्यक्त्येति शेषः । तत्रेत्यनुषङ्गः । सत्यता का चिदन्या समुदायात्मिका । ततोऽपि किं तत्राऽऽह । व्युत्पत्त इति । तत्र सति शबले प्रत्यक्षाऽऽदिसिद्धे सत्यशब्दस्य व्यवहाराऽनुरोधेन शक्तिग्रह इत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ १७८ ॥

मू० ॥ बुद्धेर्वृत्तौ ज्ञानता तावदेका
प्रत्यग्बोधे ज्ञानता का चिदन्या ॥
तत्संपर्काज्ज्ञानता तत्र चाऽन्या
व्युत्पन्नोऽयं ज्ञानशब्दस्तु तत्र ॥ १७९ ॥

टी० ॥ बुद्धेर्वृत्तौ चक्षुरादिजन्यान्तःकरणवृत्तौ । ज्ञानता चैतन्याऽभिव्यञ्जकत्वरूपा ज्ञानता । प्रत्यग्बोधे प्रत्यक्चैतन्ये । ज्ञानता स्वप्रकाशज्ञानस्वरूपता ॥ १७९ ॥

मू० ॥ बुद्धेर्वृत्तौतावदानन्दतैका
प्रत्यग्ज्ञाने का चिदानन्दताऽन्या ॥
तत्संपर्कात्तत्रचाऽनन्दताऽन्या
व्युत्पन्नोऽयं तत्र चाऽऽनन्दशब्दः ॥ १८० ॥

टी० ॥ आनन्दता आनन्दपदव्यवहारयोग्यता प्रथमा । परमप्रेमाऽऽस्पदत्वयोग्यतारूपाऽऽनन्दता द्वितीया ॥ १८० ॥

मू० ॥ आकाशाऽऽदौ नित्यता तावदेका
प्रत्यङ्गावे नित्यता का चिदन्या ॥
तत्संपर्कान्नित्यता तत्र चाऽन्या
व्युत्पन्नोऽयं नित्यशब्दस्तु तत्र ॥ १८१ ॥

टी० ॥ नित्यता कल्पस्थायिताऽरूपा नित्यतेत्यर्थः । त्रिकालाऽपरिच्छेद्यत्वरूपा द्वितीया नित्यता द्रष्टव्या ॥ १८१ ॥

मू० ॥ आकाशाऽऽदौ शुद्धता तावदेका
प्रत्यङ्गावे शुद्धता का चिदन्या
तत्संपर्काच्छुद्धता तत्र चाऽन्या
व्युत्पन्नोऽयं शुद्धशब्दस्तु तत्र ॥ १८२ ॥

टी ० ॥ शुद्धता अस्पृश्यताप्रयोजकरूपरहितताऽरूपा पङ्कादिमलवद्द्रव्यसंबन्धराहित्यरूपा वा । प्रतीचि तु सा सर्वप्रकाराऽशुचित्वाऽभावोपलक्षितस्वरूपाऽऽत्मिकाऽविद्याराहित्यरूपा चेत्यर्थः ॥ १८२ ॥

मू० ॥ गोवत्सादौ मुक्तता तावदेका
प्रत्यङ्गावे मुक्तता का चिदन्या ॥
तत्संपर्कान्मुक्तता तत्र चाऽन्या
व्युत्पन्नोऽयं मुक्तशब्दस्तु तत्र ॥ १८३ ॥

टी० ॥ मुक्तता बन्धनराहितताऽरूपा । प्रतीचि तु संसाराऽनर्थस्य निवृत्तिरूपा सा ॥ १८३ ॥

मू० ॥ आकाशादावस्तिता तावदेका
प्रत्यक्तत्वे चाऽस्तिता का चिदन्या ॥
तत्संपर्कादस्तिता तत्र चाऽन्या
व्युत्पन्नोऽयं तत्र चास्तीति शब्दः ॥ १८४ ॥

टी० ॥ अस्तिता विद्यमानता नञर्थोऽनुल्लिखितधीविषयताऽऽरूपभावता वा । प्रतीचि तु सा सदिति प्रतीतियोग्यताऽऽरूपा । एवं सूत्रविम्बाऽऽदिपदानां केशाऽऽकाशाऽऽदिशबले व्युत्पत्तिर्द्रष्टव्या ॥ १८४ ॥

मू० ॥ यो यः शब्दो यत्कृतेऽर्थे निरूढ-
स्तत्रैवाऽर्थे लक्षणा वृत्तिरस्य ॥
वक्तव्या स्यात्पण्डितैरेवमेत-
त्प्रत्यक्पूर्णं ब्रह्मवेदान्तवेद्यम् ॥ १८५ ॥

टी० ॥ नन्वेवं भवतु सत्याऽऽदिवाच्यस्वरूपं तत्र च सत्याऽऽदिशब्दस्य व्युत्पत्तिः तथापि कथं तल्लक्ष्यस्य निर्णयः तद्वाच्ये भागद्वयसत्त्वेन हेयोपादेयभागविभागाऽसंभवादित्याशङ्क्याऽऽह । यो य इति । येन कृतं यत्कृतं तस्मिन्नर्थे सत्याऽऽदिशबले निरूढः वाचकत्वेन प्रसिद्धस्तत्रैव निमित्तभूते परमाऽर्थसत्याऽऽदिस्वभावे अस्य सत्याऽऽदिपदस्य लक्षणेति संबन्धः । यद्यपि सत्याऽऽदिपदवाच्यमात्मानात्मभागद्वयं कृतं तथापि गगनादेस्तद्वाच्यभागस्य यत्सत्यत्वाऽऽद्युक्तं तत्सत्याऽऽदिस्वभावाऽधिष्ठाननिरपेक्षं न भवति तदात्मनैव तस्याऽर्थक्रियाजनकत्वादिरूपवत्त्वादन्यथा निरात्मनस्तस्य तदयोगाद्देवं चात्माऽऽकाशादिस्वरूपं भूत्वैव तेन शबलितः सन्सत्याऽऽदिशब्दवाच्यतां लभत इति निरपेक्षतत्कृत एव सत्याऽऽदिपदवाच्यताऽर्होऽर्थ इति स एव निरपेक्षः सत्याऽऽदिस्वभावो लक्षणयोपादीयत इति न तस्मिन्निर्णयकारणशून्यतेत्यर्थः । एतच्च पण्डितैरित्यनेन द्योतितम् । एवमद्वयब्रह्माऽभेदप्रमितिबलादपि लक्ष्यनियमसिद्धिरित्यभिप्रेत्याह । एवमेतदिति । वेदान्तवेद्यमेतत्प्रत्यग्ब्रह्म एवं सति पूर्णं स्यादित्यत्राऽपि संबन्धः । वियदादेर्वाच्यभागस्य ब्रह्माऽभेदाऽनुपपत्तेश्च न तल्लक्षणा व्यर्था न च न ब्रह्म पूर्णं सिद्ध्येदिति भावः ॥ १८५ ॥

मू० ॥ सत्येऽप्यस्ति ज्ञानता ज्ञानतायां
सत्यत्वं च स्पष्टमस्त्येव तद्वत् ॥

सत्यप्येवं नाऽतिरेकाऽवकाशः
पूर्णे तत्त्वे ज्ञानसत्योपपत्तेः ॥ १८६ ॥

टी० ॥ ननु सत्याऽऽदिवाक्यस्यैकरसब्रह्माऽर्थत्वे तत्पदानां पर्यायताऽऽपत्तिरित्याशङ्क्य किं सत्याऽऽदिपदानामपर्यायत्वेन तदर्थभेदः सिषाधयिषितः । उत सिद्धान्ते तत्परिहाराऽजिज्ञासामात्रमिति विकल्प्याऽऽद्येऽत्यन्तभेदवादिनं प्रत्याह । सत्येऽपीत्यादिना । सत्यपदलक्ष्येऽपीत्यर्थः । ज्ञानता ज्ञानाऽभेदः । तर्हि किं रजताऽधिष्ठानशुक्तिरिव स्वाऽभिन्नाद्रजतात् सत्यमपि स्वाऽभिन्नाज्ज्ञानाद्भिद्यते नेत्याह । ज्ञानतायामिति । ज्ञाने यथा ज्ञानं सत्याऽभिन्नं तथा स्पष्टं सत्यस्त्वं च ज्ञानाऽभिन्नं सत्यज्ञानयोरत्यन्तमभेद इत्यर्थः । ननु भवतु सत्यज्ञानयोरभेदस्तथाप्यतिरेकरूपेषद्भेदोऽपि वाच्यः । अन्यथा तत्पदद्वयसामानाधिकरण्याऽयोगादिति न तदुभयलक्ष्यमत्यन्ताऽभिन्नमिति भेदाऽभेदमाशङ्क्याऽऽह । सत्यप्येवमिति । एवं सत्यप्यतिरेकाऽवकाश इति यत्तन्नेति संबन्धः । कुतस्तत्त्वे ज्ञानाऽऽनन्दाऽऽत्मके वस्तुनि पूर्णेऽत्यन्तमभिन्ने सति ज्ञानसत्योपपत्तेः ज्ञानस्य ज्ञानत्वं सत्यस्य सत्यत्वं चोपपद्यत इत्यर्थः । यदि सत्यं ज्ञानाद्भिन्नं स्यात्तदा तस्य दृश्यतया सत्यत्वं न स्यात् । एकदेशिमते ज्ञानाऽभेदोऽप्यस्तीति चेज्ज्ञानभेदस्याऽपि सत्त्व तदपरिहारात् । अन्यथा तदस्फुरणात् । एवं ज्ञानमपि सतो भिन्नं चेदसदेवेति न ज्ञानं स्यादिति तयोरत्यन्तमभेद एव । शब्दाऽपर्यायत्वं सामानाधिकरण्यं च लक्ष्यैक्येऽपि वाच्यभेदादुपपन्नतरमिति द्वितीयकल्पोऽपि निरस्त इति भावः । एवमुत्तरश्लोकयोरपि द्रष्टव्यम् ॥ १८६ ॥

मू० ॥ आनन्दत्वे ज्ञानता ज्ञानतायामानन्दत्वं विद्यते निर्विशङ्कम् ॥
सत्यप्येवं नातिरेकाऽवकाशः
पूर्णे तत्त्वे ज्ञानसौख्योपपत्तेः ॥ १८७ ॥

टी० ॥ आनन्दत्वे आनन्दे ज्ञानसुखयोर्भेदे सुखस्य दृश्यत्वादिदोषो ज्ञानस्य प्रेक्षावदुपेक्ष्यताऽऽपत्तिरितिभावः ॥ १८७ ॥

मू० ॥ आनन्दत्वे सत्यता सत्यतायामानन्दत्वं निर्विवादं प्रसिद्धम् ॥
सत्यप्येवं नातिरेकाऽवकाशः
पूर्णे तत्त्वे सत्यसौख्योपपत्तेः ॥ १८८ ॥

टी० आनन्दत्व इति श्लोकान्तरं स्पष्टम् ॥ १८८ ॥ :: ॥

मू० ॥ शेषेऽप्यूह्यं न्यायसाम्यादशेषमन्योन्यस्मिन्नस्तिता पूर्णता च ॥
अन्योऽन्यस्याजामिताशब्दशक्तेरेवं सुस्थं सर्वमुक्तोपपत्तेः १८९ ॥

टी० ॥ ननु भवतु सत्यादीनामत्यन्तमभेद एकस्मिन्वाक्ये समानाऽधिकरणपदैस्तेषामुपादानात् । नित्यशुद्धत्वादीनां तु तत्रतत्र वाक्ये पृथक्पृथगुपात्तानामत्यन्ताऽभेदे न किं चित्प्रमाणमित्याशङ्क्य तेषामपि पूर्णब्रह्माऽभेदाऽनुपपत्त्या परस्परभेदे तेषामशुद्धाद्यापत्तेश्चात्यन्ताभेद एवोचित इत्याह । शेषेऽपीति । सत्यज्ञानानन्दाऽतिरिक्तेषु नित्याऽऽदिपदार्थेषु । अशेषं सत्याऽऽदिपदार्थेषु यदुक्तं तदैक्याऽऽदि तत्सर्वमुक्तन्यायसाम्यादूह्यम् । अशेषमित्युक्तमेव विशदयति । अन्योऽन्यस्मिन्नित्यादिना । अन्योऽन्यस्याऽन्योऽन्यस्मिन्नस्तितेति संबन्धः । चकारात्सामानाधिकरण्यं सूचयति । शब्दशक्तेरजामितेतिसंबन्धः । जामिता पुनरुक्तता कार्यान्तराऽभावेनाऽप्रयोजकता वा नास्तीत्यर्थः । उपसंहरति । एवं सुस्थमिति ॥ १८९ ॥

मू० ॥ बोधाऽऽत्मत्वे निर्निमित्ते प्रतीचो
बोधाऽऽत्मत्वे तन्निमित्ते च बुद्धेः ॥
बोधाऽऽत्मत्वे बुद्धिधर्मो च बुद्धेरुक्तो साक्षाद्वेदसिद्धान्तविद्भिः ॥ १९० ॥

टी० ॥ ननु शबलं ब्रह्माऽऽत्माऽऽदिपदानां वाच्यमित्युक्तं तदनुपपन्नं मूलग्रन्थे तथाऽदर्शनात् । अत एव प्रत्यक्त्वं बोधत्वं च बुद्धेरित्यप्ययुक्तमि त्याशङ्क्य नैष्कर्म्यसिद्धावाचार्यैस्तदुभयमप्युक्तमित्याह । बोधाऽऽत्मत्वे इति । निर्निमित्ते स्वाभाविके । तन्निमित्ते स्वाभाविकप्रत्यग्बोधात्मनिमित्ते बुद्धेरिति संबन्धः । बुद्धेर्बोधाऽऽत्मत्वे बुद्धिधर्मावेव न स्वात्मन एव स्वरूपभूते आत्मनो हि सर्वान्तरस्वप्रकाशस्य प्रत्यक्त्वं बोधत्वं च स्वाभाविकं बुद्धेस्तु तदध्यासात्तद्धर्मसंबन्ध इति ते स्वाभाविके नेत्यर्थस्तदुक्तमाचार्यैः । कूटस्थबोधः प्रत्यक्त्वमनिमित्तं सदाऽऽत्मनः । बोद्धृताहन्तयोर्हेतुस्ताभ्यां तेनोपलक्ष्यते । बुद्धेरित्युत्तरश्लोके लभ्यते । एवं च बुद्धेरपि बोद्धृताहन्तयोरन्यनिमित्तयोरभिधानादात्मनश्च तदुपलक्ष्यत्वोक्तेर्बोधसद्भावास्तवप्रत्यक्त्वद्वयशबलस्यैवाऽहंपदवाच्यत्वं बुद्धेश्च बोधाऽऽत्मत्वादिधर्मवत्त्वं तत्संमतमिति नाऽस्माभिः स्वेच्छया कल्पितमिति भावः । एवं च ब्रह्मादिपदस्याऽपि शबले संगतिरविरुद्धेति द्रष्टव्यम् ॥ १९० ॥

मू० ॥ जहतीह च लक्षणा मता

गुणवृत्तिश्च तथाऽभ्युपेयते ॥

न विशेषविनिर्णयक्षमं

किमपीहाऽस्ति विशेषकारणम् ॥ १९१ ॥

टी० ॥ तत्त्वंपदयोरिव सत्यादिपदेष्वपि जहदजहल्लक्षणोपपादिता । इदानीं तद्वदत्राऽपि लक्षणान्तरं वृत्त्यन्तरं चाऽतिदिशति । जहतीति । इह अवान्तरवाक्ये जहती लक्षणा च मतेष्टेत्यर्थः । तथा तत्त्वंपदार्थयोर्यथेत्यर्थः । तथा प्राणादतिवद्गुणवद्धितपरामर्शस्याऽपि संभवात् तथेह जहतीति योजनीयं यथा जहती मता तथैव वृत्त्यन्तरं चाऽस्तु । विशेषविनिर्णयक्षमं जहल्लक्षणैव सत्याऽऽदिपदेषु न वृत्त्यन्तरमिति न निर्णययोग्यमित्यर्थः । विशेषकारणं विशेषप्रमाणम् । एतदपि प्रेष्ठैवोक्तं वृद्धानां सत्याऽऽदिपदव्यवहारस्य गगनाऽऽदिशबल एवाऽनियमेन दर्शनात् । गगनं सत्यमित्यादिप्रयोगाद्धि गगने सत्याऽऽदिशब्दसंगतिग्रहो वाच्यः । स च प्रयोग

आत्मानात्मसमुदायगोचरः आत्माऽन्यस्य सत्यपदार्थस्याऽसंभवात् । यद्यपि व्यावहारिकी सत्यता गगनाऽऽदावप्यस्ति । तथापि सा तथा वक्ष्यमाणा-ऽऽत्मानं व्यावर्तयेत्त तु सत्यत्वादिरूपेण वक्ष्यमाणा । वक्ष्यमाणरीत्या व्युत्पत्तिकाले तस्या विविच्य ज्ञातुमशक्यत्वाच्च विचारदशायामेव तत्कल्पनात् । ततश्चाऽधिष्ठानव्यावृत्तरूपेण गगनाऽऽदिस्फुरणाभावाच्च केवलतद्गोचरः शक्तिग्रहः । न चैवमपि विशिष्टादन्यस्मिन्केवले जहल्लक्षणैव पदानां युक्तेति वाच्यम् । विशिष्टस्वरूपस्य विशिष्टरूपेण स्वस्मात्कल्पितभेदेऽपि तत्त्वतस्तदभावेन विशिष्टरूपस्य केवलाऽभिन्नस्य त्यागाऽसंभवेन जहदजहल्लक्षणाया तस्योपादेयत्वात् । एतच्चाऽग्रे स्वयमेव वक्ष्यति । एवं वाक्याऽर्थैकस्याऽपि गुणस्य योगाप्रतीतेर्गौण्यपि न संभवतीति ॥ १९१ ॥

मू० ॥ ऐश्वर्यमप्यनुभवाऽऽदिवदात्मरूपं
तस्मादबोधगतमस्य च तानि कस्मात् ॥
नेष्टानि पूर्ववदिति ब्रुवतो मुखस्य
सद्यः पिधानमनुसृत्य वचांसि कुर्मः ॥ १९२ ॥

टी० ॥ ननु यथा सत्याऽऽदिवाक्यसामर्थ्यात्तत्तत्पदेषु भागत्यागोपादानलक्षणाया सदाद्यात्मकं ब्रह्मेत्यङ्गीकृतम् । एवमेव सर्वेश्वर इति श्रुतिसामर्थ्यादैश्वर्यमप्यात्मस्वरूपं जहदजहल्लक्षणाया किमिति नाङ्गीक्रियते तस्यापि ज्ञानाद्यविशेषादिति शङ्कते । ऐश्वर्यमिति । आत्मरूपमेकं तत्तस्मा * दबोधगतं मायागतमन्यदितिशेषः मायायामपि तत्रतत्र पुराणे दुर्गादिरूपायामीश्वरीशब्दप्रयोगात् । अस्य तदुभयशबलस्य चापरम् । तानि त्रिविधान्यैश्वर्याणि । पूर्ववत्त्रिविधसत्यत्वादिवत् । तद्दूषणं प्रतिजानीते । इति ब्रुवत इति । वचांस्यनुसृत्येतिसंबन्धः तस्मै निरुत्तरमुत्तरंदद्म इत्यर्थः ॥ १९२ ॥

(शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

१ इष्टिप्रकरणम् ।

(*Continued from page 680.*)

१६० एतस्य सामिधेन्यनुवचनस्य अध्यर्धकारं पठनरहितस्य अभिहिंकारपूर्वकस्य चतुर्मात्रप्रणवान्तस्य यस्के शाखायां निगदे अनुवचने अभिष्टवने संस्तवने च अतिदेशः आश्वलायनसूत्रे कृतः अन्वाह अनुब्रूयात् इत्यादिशब्दैर्विहितं अभिहिंकारपूर्वकं अभ्यासविशिष्टं प्रथमाया ऋचः प्रथमार्धर्चं अवसाय द्वितीयार्धर्चान्त्यप्रणवेन प्रथमाया एव ऋचः द्वितीयपाठगतप्रथमार्धर्चं संधाय तदन्ते ऽवस्येत् अनया रीत्या सर्वा ऋचः पठित्वा अन्तिमाया ऋचः तृतीयपाठगतद्वितीयार्धर्चस्य अन्ते चतुर्मात्रप्रणवविशिष्टस्य परिशेषात् केवलस्य तावन्मात्रस्य पठनं अनुवचनमित्युच्यते ॥

१६१ एकस्या ऋचः द्वयोर्वा ऋचोरनुवचने अभ्यासो न भवति सामिधेन्यनुवचने अध्यर्धकारं पठनं विशेषः अनुवचनमात्रे अवसाने यः प्रणवः स चतुर्मात्रो भवति अन्यत्र तु त्रिमात्र एव तदन्तिमस्य मकारस्य स्थाने स्पर्शेषु परेषु तत्तद्वर्गस्य पञ्चमो वर्ण आदेशो भवति यवलेषु परेषु क्रमेण अनुनासिकायवला आदेशा भवन्ति रेफोष्मसु परेषु अनुस्वार आदेशो भवति अन्यत्र अविकृत एव मकारः एतस्य विकारमात्रस्य आश्वलायनसूत्रे मन्त्रापत्तिरिति संज्ञा ॥

१६२ एकश्रुति अनुब्रूयात् इति उच्यते तथा च अनुवचनमात्रे एकश्रुतिः त्रिश्रुति तत्र एकश्रुतिर्नाम उदात्तानुदात्तस्वरितानां स्वराणामभावः ॥

१९३ अध्वर्युः सामिधेन्यारम्भे एकां समिधमाहवनीये ऽभ्याधाय प्रणवे-प्रणवे द्वितीयाद्येकादश समिधो ऽभ्याधाय उपान्त्यायाः प्रणवे तिस्रः समिधः सहैवाभ्याधाय आहवनीयस्योपरि प्रक्षिप्तानां समिधां प्रदीपनानुकूलवातोत्पादनार्थं अन्तिमाया ऋचः अभ्यास-काले वेदं त्रिवारं प्राक् कम्पयति एतत्कम्पनं वाजनमित्युच्यते ।

१९४ ध्रुवाज्यात् स्रुवेणोपहत्येत्यादौ उपहननं ग्रहणमेवोच्यते ।

१९५ वह्नेः कंचिद्देशमारभ्य देशान्तरपर्यन्तं समन्तकं आज्यधाराया आहरणं प्रक्षेपणं आघार इत्युच्यते ।

१९६ स्रुवस्याधस्ताद् वेदं धृत्वा तेन दक्षिणं परिधिमारभ्य उत्तरप-र्यन्तं समन्तकं आज्यधाराहरणं स्रौवाघार इति तिर्यगाघार इति चोच्यते ।

१९७ प्रादेशतालगोकर्णास्तर्जन्यादियुते तते अङ्गुष्ठे इति कोशात् वि-स्तृताङ्गुष्ठाग्रमारभ्य विस्तृततर्जन्यग्रपर्यन्तः प्रादेश इत्युच्यते ।

१९८ तस्य वेद्यां प्रागग्रतया मन्त्रेण स्थापनं प्रादेशकरणमित्युच्यते ।

१९९ प्रादेशकरणपर्याप्तवेद्यन्तर्गतभूमेः सकाशाद् वेद्यास्तृतबर्हिषः उदग्देशे वेद्यामेव नयनं व्यूहनमित्युच्यते ।

२०० सामिधेन्यनुवचनानन्तरं होतृकर्तृकं प्रवरप्रवरणं विहितं तत्र प्रवरो नाम आश्वलायनादिभिः प्रवराध्याये यद्गोत्रस्य यावन्तः प्रकर्षेण वराः ऋषयः संबुद्ध्यन्तपदेन उक्तास्ते यथा शाण्डिला-नां शाण्डिलासितदेवलेति ।

२०१ तेषामुच्चारणं प्रवरणमित्युच्यते ।

२०२ तत्र क्षत्रियवैश्ययोर्यजमानयोः पुरोहितस्य प्रवरा वक्तव्याः प्र-वरसंशये मानव इत्येव प्रवरो वक्तव्यः । प्रवरानन्तरं अस्यां

निगदशेषो वक्तव्यः तच गायत्र्यादिच्छन्दोरहितः ऋग्वेदे विहितः यजुर्मन्त्रः निगद इत्युच्यते ॥

२०३ होता निगदपाठानन्तरं द्वितीयान्तं देवतावाचकं शब्दमुच्चार्य संबुद्ध्यन्तमग्निशब्दमुच्चार्य आवहेति पदं प्लुताद्यक्षरं पठित्वा अवस्यति ततः द्वितीयादिदेवतावाचकानि पदानि पूर्ववत् अग्निपदरहितानि आवहशब्दान्तानि पठति एतद्देवताह्वानमित्युच्यते ॥

२०४ आह्वानानन्तरं त्रयोदशाक्षरं निगदशेषं ब्रूयात् अयं सर्वो निगदः देवताह्वानगर्भत्वात् आवाहननिगद इत्युच्यते ॥

२०५ अध्वर्युप्रेषितः आग्नीध्रः इध्मसंनहनवेष्टितेन स्फ्येन मूलमारभ्याग्रपर्यन्तं मध्यमदक्षिणोत्तरान् परिधीन् क्रमेण संमृज्य मन्त्रेणाहवनीयं संमार्ष्टि यागापेक्षया पूर्वत्वादयं पूर्वोऽग्निसंमार्ग इत्युच्यते ॥

२०६ ततोऽध्वर्युः जुहूपभृतोरग्रे प्राञ्चमञ्जलिं निधाय अग्निं नमस्करोति मन्त्रेण एतत्कर्म अञ्जलिकरणमित्युच्यते ॥

२०७ देवताह्वानकाले दक्षिणहस्तेन मन्त्रेण जुहूमादाय सव्येन तथैवोपभृतमादाय दक्षिणेन सव्येन वा पादेन अन्वाहार्यपचनमध्यमार्गेण मन्त्रेण वेद्या दक्षिणतो गच्छति तदेतत्सर्वं समन्त्रकं गमनं द्वितीयादिकममन्त्रकं गमनं च अत्याक्रमणमित्युच्यते ॥

२०८ तत आहवनीये आहुतिप्रक्षेपार्थे तस्य दक्षिणतः मन्त्रेण स्वस्य स्थानं कल्पयति एतदध्वर्युस्थानमित्युच्यते ॥

२०९ ततः यजमानेन स्रुचि अन्वारब्धः सन् मध्यमपरिधेर्मध्यं जुह्वा संस्पृश्य मन्त्रेण अविच्छिन्नं प्राक्संस्थमाघारमाघारयति अयमाघारो जोहव आघारः प्राक्संस्थ आघार इति चोच्यते ॥

२१० आघारहोमार्थं वन्हेः संनिधौ अधःकृतां जुहूं मन्त्रेण ऊर्ध्वां करोति एतत् उद्ग्रहणमित्युच्यते ॥

२११ ततः सव्यपादेनैव प्राङ्मुख एव मन्त्रेण पूर्वमार्गेणैव वेद्या उत्तरत आगच्छति तदेतदागमनं द्वितीयादिकममन्त्रकं चागमनं प्रत्याक्रमणमित्युच्यते ॥

२१२ ततः सकृत् मन्त्रेण द्विस्तूष्णीं जुह्वा ध्रुवायामाज्यं स्रावयति एतद् ध्रुवासमञ्जनमित्युच्यते ॥

२१३ यथायतनं स्रुचो सादयतीत्यादौ पूर्वं यस्मात् स्थानात् स्रुचो गृहीते तस्मिन्नेव स्थाने पुनः स्थापनं यथायतनसादनमित्युच्यते ॥

२१४ ततः उत्करदेशे संसृष्टं ऊर्ध्वाग्रं स्फ्यं धृत्वा स्वपृष्ठभागे आग्नीध्रमुपश्लिष्टं कृत्वा आश्राव्य आग्नीध्रेण प्रत्याश्राविते एकश्रुत्या मन्त्रं पठति तस्य मन्त्रस्य भरतवत्पदानन्तरं यजमानप्रवरान् तद्धितप्रत्ययरहितान् होतुर्विपरीतान् वतिप्रत्ययान्तान् पठित्वा अवशिष्टं ब्रह्मण्वदित्यादिमन्त्रभागं पठति तदेतत् अध्वर्युकर्तृकप्रवरप्रवरणमित्युच्यते ॥

२१५ ततोऽमुकशर्मा मानुष इति होतुर्नाम गृह्णाति तत् श्रुत्वा होता मन्त्रेण उत्थाय अन्यं मन्त्रं जपति एतदुपोत्थानमित्युच्यते ॥

२१६ ततो मन्त्रेण अध्वर्युसमीपं गच्छति एतद्गमनं अभिक्रमणमित्युच्यते ॥

२१७ तत एकेनैव मन्त्रेण दक्षिणहस्तेन दक्षिणेऽसे अध्वर्युं दक्षिणेनोत्तरेण सव्यहस्तेन वा आग्नीध्रं च स्पृशति अयमध्वर्य्वाग्नीध्रान्वारम्भ इत्युच्यते ॥

२१८ ततः स्फ्यवेष्टनेध्मसंनहनाग्रैः सकृन्मन्त्रेण द्विस्तूष्णीं स्रुमुख-
मभ्यात्मं स्पृशति तन्मुखसंमार्ग इत्युच्यते ॥

२१९ ततो होतृषदनं होता अभिमन्त्रयते तच्च होतृषदनं नाम
वेद्युत्तरश्रोण्युत्तरदेशः होतुरुपवेशनस्थानम् ॥

२२० होतृषदने उपवेशनार्थमास्तीर्णानां दर्भाणां किंचिदेकं तृणं
अङ्गुष्ठानामिकाभ्यां गृहीत्वा मन्त्रेण नैर्ऋत्यां प्रक्षिपति तत् प्रक्षे-
पणं निरसनमित्युच्यते ॥

२२१ करणव्युत्पत्त्या मन्त्रोऽपि निरसन इत्युच्यते ॥

२२२ ततो मन्त्रेण होता स्वस्थाने उपविशति दक्षिणोत्तरिणोपस्थेन
उपविश्यतेऽनेनेति करणव्युत्पत्त्या स मन्त्र उपवेशन इत्युच्यते ॥

१२३ ततो वेद्यास्तृतबर्हिः दक्षिणजानुशिरसा मन्त्रेण स्पृशति तदेत-
द्बर्हिरुपस्पर्शनमित्युच्यते ॥

२२४ होता इध्मप्रदीपनसमये एकं यजुर्मन्त्रं पञ्च ऋचश्च जपित्वा
इध्मे प्रदीप्ते सति यस्य निगदस्य षडक्षरो मध्यभागः उपांशु
पठ्यते तं निगदमुच्चैः एकश्रुत्या पठति तन्निगदघटकघृतवती-
शब्दस्य श्रवणानन्तरं अध्वर्युः प्रयाजहोमाद्यर्थं जुहूपभृतौ
गृहीत्वातिक्रामति स्रुचौ जुहूपभृतौ आदाप्यन्ते अनेनेति कर-
णव्युत्पत्त्या स निगदः स्रुगादापन इत्युच्यते ॥

२२५ अध्वर्युर्जुहूपभृतावादाय अत्याक्रम्य स्वस्थाने तिष्ठन् आश्राव-
यति तच्च आश्रावणं आश्रुतं इति च प्लुताकारपूर्वकप्लुताश्राव-
येति पदोच्चारणं आश्वलायनसूत्रे तु प्लुतो य ओंकारस्तत्पूर्वक-
श्रावयेतिपदोच्चारणम् ।

२२६ आग्नीध्र इध्मसन्नहनवेष्टितं स्फ्यमूर्ध्वाग्रं धृत्वा उत्करे दक्षि-

वामुख: तिष्ठन् सर्वदा आश्रावणानन्तरं अस्तुशब्दपूर्वकप्लुता-
दिश्रौषट्पदमुच्चारयति तदेतत् प्रत्याश्रवणं प्रत्याश्रुतमिति
चोच्यते ॥

२२७ यजेत्यादिलोण्मध्यमपुरुषान्तपदघटितेन येन वाक्येन अध्वर्य्वा-
दिना होत्रादि: प्रेर्यते तद्वाक्यं प्रैष इत्युच्यते ॥

२२८ अध्वर्युप्रेषितो होता एकश्रुत्या पुरोनुवाक्यां पठति सा च
प्राय: एकैव ऋक् भवति तस्या: प्रथमार्धर्चे एकमवसानं चतुर्मो-
चप्रणवान्ताद्वितीयार्धर्चे द्वितीयमवसानं यस्मिन् यागे मैत्रावरुणो
भवति तत्र स एव पुरोनुवाक्यां पठति पुर: पूर्वं यागाद् देवतां
अनुकूलयितुं या ऋगुच्यते इति व्युत्पत्त्या पुरोनुवाक्यापदं
अनुवाक्यापदं च ऋग्विशेषबोधकम् ॥

२२९ यच्छब्दस्य प्रथमाबहुवचने ये इति भवति तत्र एकार: प्लुत:
पाठ्य: तत्पूर्वकं यजामहे इति तिङन्तं रेफान्तेन आगू:शब्दे-
नोच्यते ॥

२३० पित्र्यायामिष्टौ तु यजामहे इत्यस्य स्थाने स्वधामहे इति पठ्यते
सैव तत्र आगूरित्युच्यते ॥

२३१ वकारोत्तरवर्त्यकारस्य स्थाने प्लुतमोकारं कृत्वा वषट् इति शब्द:
पठ्यते स वषट्कार इत्युच्यते ॥

२३२ पित्र्यायां तु वषट्कारस्थाने स्वधापदपूर्वकं नम इति पदं पठ्यते
स एव तत्र वषट्कारो भवति ॥

२३३ आगू:पूर्विका वषट्कारान्ता प्रायशो ऽर्धर्चावसाना बहुस्थानेषु
एकैव ऋक् क्वचिदनृगपि याज्यापदेनोच्यते ॥

२३४ याज्याया ऋचां मध्ये अन्त्योऽच् प्लुतो भवति हस्थानिको विसर्ग:
याज्याया अन्ते भवति चेत् वषट्कारेण संधो अवसानाभावात्

रेफ एव विसर्गस्थाने ऽवतिष्ठते रेफस्थानिको विसर्गो यत्र तत्र लोप एव विसर्गस्य भवति याज्यान्तानामन्येषां तु व्यञ्जनानां यथाव्याकरणं वषट्कारेण सह संधिर्भवति एकारस्य ऐकारस्य वा याज्यान्तत्वे तयोः संध्यक्षरत्वात् प्लुतमकारं पृथगुच्चार्य इकारं ह्रस्वमेव अन्ते पठित्वा वषट्कारं पठेत् एवं ओकारस्य औकारस्य वा तथात्वे तयोरपि प्लुतं अकारं पृथगुच्चार्य उकारमन्ते पठित्वा वषट्कुर्यात् तत्र केवलः रकार रेफ इत्युच्यते ॥

२३५ कादयो मान्ताः यादयो हान्ताश्च वर्णा व्यञ्जनपदवाच्याः ॥

२३६ एकारादयश्चत्वारः अइउऋऌ इति च पञ्च वर्णाः अच इति स्वरा इति चोच्यन्ते ॥

२३७ संधिसंपन्नानि अक्षराणीतिसमासे एकारादयश्चत्वारो वर्णाः संध्यक्षराणीत्युच्यन्ते ॥

२३८ सामिधेनीप्रभृतिप्रयाजान्तं शंयुवाकानन्तरं च मन्द्रस्वरेण पठ्यते माहृतस्तूरपि चरन्मन्द्रं चानयति स्वरं प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितमिति शिक्षातया मन्द्रस्तु गम्भीरे इत्यमरोक्त्या च कायाग्निप्रेरितो वायुः उरोदेशे संचारं कृत्वा मुखं प्राप्य यथास्थानं यत्र गम्भीरे स्वरे वर्णानुत्पादयति गानशास्त्रे यं प्रथमयाम इति वदन्ति स मन्द्रस्वर इत्युच्यते ॥

२३९ तस्य सप्त यमा भवन्ति तत्र षष्ठेन यमेन याज्या पठ्यते सप्तमेन वषट्कारः उच्चैस्तरां बलीयान् याज्याया इत्याश्वलायनसूत्रात् उच्चैस्तरां वा वषट्कार इति पाणिनिसूत्राच्च तत्र उच्चनीचभावेन आरोहणावरोहणक्रमेण संपाद्यमानाः गानशास्त्रे षड्जादिनामभिः प्रसिद्धा यमा इत्युच्यन्ते ॥

२४० दर्शश्च पूर्णमासश्च यागौ प्रधानयोः पृथक् इति कोशात् अमावास्यायामन्वाधानं कृत्वा प्रतिपदि यागः क्रियते स यागो दर्श इत्युच्यते ॥

२४१ पौर्णमास्यामन्वाधाय प्रतिपदि क्रियमाणो यागः पौर्णमासेनेष्टि-पशुसोमा उपदिष्टा इति सूत्रात् पूर्णमासे भव इति व्युत्पत्त्या पौर्णमासशब्दप्रतिपाद्यः दर्शशब्दवत् लक्षणया पूर्णमासशब्दप्रति-पाद्यश्च भवति ॥

२४२ दर्शपूर्णमासयोरेव श्रुत्यादिषु सर्वविधेरुपदेशात् अन्यत्र च अमत्यस्य सर्वेतिकर्तव्यताकलापस्य अतिदेशात् दर्शपूर्णमासौ प्रकृतिपदवाच्यौ ॥

२४३ यत्रयत्र अतिदेशः प्रवर्तते स यागो विकृतिपदेन व्यवह्रियते ॥

२४४ तत्र प्रकृतौ पञ्च प्रयाजा भवन्ति ते च स्रगुरादयो यजूरूपाः वषट्कारान्ताः याज्यात्वात् भवन्ति तेषामन्ते वषट्कारात्पूर्वे सूत्रे वेतु वीतां व्यन्तु इति पदत्रयमध्ये अन्यतमं यद् पठि-तमस्ति याज्यान्तत्वप्रयुक्ता प्लुतिश्च तस्यैव भवति ॥ चतुर्णां प्रयाजानां वसन्तग्रीष्मवर्षाशरदो देवताः पञ्चमस्य तु हेमन्त-शिशिरौ समस्तौ देवता तत्र द्वितीयः प्रयाजः यजमानस्य गोत्रेण वासिष्ठत्वे शौनकत्वे आत्रेयत्वे वाध्र्यश्वत्वे क्षत्रियत्वे वा आदौ नराशंसपदघटितः अन्येषां तु तनूनपात्पदघटितः चातुर्मास्यगतमुख्येष्टिषु नव प्रयाजा भवन्ति तत्र आद्याश्च-त्वारः प्राकृता एव तदुत्तरं चत्वारो ऽपूर्वाः विहिताः तेषां मध्ये प्रथमस्य देव्यो द्वारो देवता द्वितीयस्य उषासानक्ता तृतीयस्य दैव्या होतारौ चतुर्थस्य तिस्रो देव्यः नवमो ऽपि

प्राकृत एव पाशुके तु एकादश प्रयाजा भवन्ति ते च सर्वे ऽपि ऋग्रूपाः तत्र शाकलसंहितायां वसिष्ठेन दृष्टानि यानि सूक्तानि तदन्तर्गता एकादश ऋचः वासिष्ठगोत्रस्य यजमानस्य भवन्ति एवमात्रेयगोत्रस्य तद्दृष्टसूक्तान्तर्गताः वध्र्यश्वदृष्टसूक्तान्तर्गतास्तद्गोत्राणां गृत्समदस्य शौनकत्वात् गृत्समददृष्टसूक्तान्तर्गताः शौनकगोत्रस्य भवन्ति अत्र सर्वत्र द्वितीया ऋचो नराशंसपदघटिताः एते चतुर्विधाः प्रयाजा नाराशंसवन्त इत्युच्यन्ते ॥

२४५ मेधातिथिदृष्टसूक्तान्तर्गताः द्वादश ऋचः तत्र द्वितीयतृतीये ऋचौ क्रमेण तनूनपान्नराशंसपदघटिते अत एव ताः सर्वविधयजमानार्थाः एवं दीर्घतमसा दृष्टा अपि द्वादश व्यवस्थया पूर्वोक्तया एकादश सर्वार्था भवन्ति यत्र एकादश प्रयाजास्तत्र तेषां प्रैषाः मैत्रावरुणेन पठ्यमाना द्वादश प्रैषसूक्ते पठिता अपि पूर्वोक्तव्यवस्थया एकादशैव भवन्ति अत्र सूक्तद्वयगताः प्रयाजाः प्रैषाश्च उभयवन्त इत्युच्यन्ते ॥

२४६ ऋष्यन्तरदृष्टाः प्रयाजास्तनूनपात्पदघटितद्वितीयप्रैषवत्त्वात् तनूनपात्वन्त इत्युच्यन्ते ॥

२४७ प्रधानयागात्पूर्वं इज्यते यैरिति व्युत्पत्त्या एते सर्वे प्रयाजा इत्युच्यन्ते ॥

२४८ होता अन्यो ऽपि वा वषट्कारानन्तरं नियमेन यं मन्त्रं जपति स वषट्कारानुमन्त्रणमित्युच्यते ॥

२४९ वषट्कारसमकालं अध्वर्युर्जुहोति तदानीमेव चतुर्थ्यन्तं देवतानाम उद्दिश्य न ममेति यजमानः पठति स त्याग इत्युच्यते ॥

२५० अनूयाजाः प्रयाजाः वीधातूत्तरलोडन्तपदान्तकत्वात् वीतवत्पदान्ता इत्युच्यन्ते ॥

२५१ अध्वर्युः प्रयाजेरिष्ट्वा उदङ्कुत्याक्रम्य जुहूस्थाज्यशेषेण ध्रुवामभिघार्य क्रमेण हवींष्यभिघार्य उपभृतमभिघारयति तदेतत्प्रयाजशेषाभिघारणमुच्यते ॥

२५२ अध्वर्युः ध्रुवाज्यात् स्रुवेण जुह्वां एकवारमाज्यं गृहीत्वा अनुवाक्यापठनार्थं होतारं अनुब्रूहीत्यन्तेन मन्त्रेण संप्रेष्य पुनस्त्रिवारं गृह्णाति तदेतत् चतुरवत्तमित्युच्यते ॥

२५३ यस्यैवं भवति स यजमानश्चतुरवत्ती भवति ॥

२५४ जामदग्न्या वत्सविदाश्चार्ष्टिषेणास्तथैव च भार्गवाश्च्यावना और्वाः पञ्चावत्तिन ईरिता इति वचनात् एतद्वचनोक्तगोत्राणां यजमानानां पञ्चवारमवद्यति एतत्पञ्चावत्तमित्युच्यते ॥

२५५ यजमानश्च पञ्चावत्ती भवति ॥

२५६ द्वौ अवखण्डने इति पठितत्वात् स्थापितहविषः होमपरिमितस्य भागस्य ग्रहणार्थं खण्डनं अवदानमित्युच्यते ॥

२५७ अनया रीत्या अवदाय गृहीत्वा अत्याक्रम्य दक्षिणाभिमुख्या स्रुचा आहवनीयस्यैशानभागे आग्नेयमाज्यभागं हुत्वा उदङ्कुत्याक्रम्य पूर्ववदवदाय गृहीत्वा अत्याक्रम्य उदङ्मुख्या स्रुचा आग्नेयदेशे सोम्यमाज्यभागं जुहोति तत्र आज्यं भागो ययोरिति व्युत्पत्त्या तद्देवते अग्नीषोमौ आज्यभागपदार्थौ ॥

२५८ आज्यभागानन्तरं जुह्वामुपस्तीर्य मन्त्रेण दक्षिणहस्तनमस्कारेण पुरोडाशादिरूपं हविरुपस्थाय उपविश्य मन्त्रेण हविरभिमृश्य पञ्चभिरङ्गुलिभिः अङ्गुष्ठमध्यमानामिकाभिर्वा प्रथमपुरोडा-

Digitized by Google

शादेः पूर्वार्धात् अवदाय चर्वादिद्रव्यस्य तु मेक्षणेनैवावदाय द्वितीयं पश्चार्धादवदाय पञ्चावत्तिनस्तु * मध्यात्पूर्वार्धात्पश्चार्धादिति त्रिरवदाय अभिघारयति एवं रीत्या क्रियमाणं चरुपुरोडाशाद्यवदानमुच्यते ॥

२५९ अवत्तं हविरभिघार्य आज्यस्थाल्याज्येन मन्त्रेण अवदानस्थानान्याप्याययति तदेतत् प्रत्यञ्जनमित्युच्यते ॥

२६० एवं रीत्या अवदाय अत्याक्रम्य वषट्कृते प्राक्संस्थाः उदक्संस्था वा प्रधानाहुतीर्जुहोति सोऽयं प्रधानयाग इत्युच्यते ॥

२६१ प्रधानयागे अवदानानन्तरं अत्याक्रमणात्पूर्वं ध्रौवाज्येन स्रुवेण तूष्णीं करिष्यमाणतत्तत्प्रधानहोमदेशे स्विष्टकृद्धोमदेशे च एकामाहुतिं जुहोति सा पुरस्तादाहुतिरित्युच्यते ॥

२६२ एवं प्रत्याक्रमणानन्तरं प्रक्षिप्तस्य हविष उपरि अन्यामाहुतिं जुहोति सा उपरिष्टादाहुतिरित्युच्यते ॥

२६३ प्रधानहोमानन्तरं उपस्तीर्य सर्वेषां हविषां उत्तरार्धात् सकृत्सकृदवदानं पञ्चावत्तिनस्तु द्विरवदानं भवति एवं ततो द्विरभिघारयति अवत्ते स्विष्टकृति स्रुवेण दर्शे अमावास्यादेवताभ्यां पौर्णमासे पौर्णमासीदेवताभ्यामाहुतिं जुहोति स पार्वणहोम इत्युच्यते ॥

२६४ अत्र पुरोडाशादेरुपस्थानाभिमर्शने न भवतः अवदानदेशानां प्रत्यञ्जनं च न भवति एवमवदाय अत्याक्रम्य वषट्कृते अग्नौ ऐशानदेशे जुहोति सोऽयं स्विष्टकृद्धोम इत्युच्यते ॥

२६५ होता आज्यभागप्रभृति स्विष्टकृत्पर्यन्तं याज्यापाठे आगुरं

* द्वितीयपुरोडाशादीनां तु अन्ततः प्राक्संस्थतासंपादनाय पूर्वं पश्चार्धादवदानं ततः पूर्वार्धादवदानं अत्र पञ्चावत्तिनस्तु मध्यात् पूर्वार्धात् पश्चार्धाच्च क्रमेणावदानम् ।

उच्चार्य संहितया द्वितीयान्तं देवतानाम उच्चार्य याज्यां संहितया पठति तदेतत् देवतानामोच्चारणं देवतादेश इत्युच्यते ॥

२६६ स्विष्टकृतं यजेति श्रुत्वा आगुरमुच्चार्य देवतामादिश्य निगदं पठित्वा याज्यासंज्ञामृचं पठति स स्विष्टकृन्निगद इत्युच्यते ॥

२६७ अध्वर्युः स्विष्टकृद्धोमानन्तरं प्रत्याक्रम्य उपरिष्टादाहुतिं हुत्वा जुह्वां जलं गृहीत्वा संक्षाल्य तज्जलं मध्यमपरिधेरन्तर्देशे मन्त्रेण उदक्संस्थं प्रक्षिपति तत् अन्तःपरिधिनिनयनमित्युच्यते ॥

२६८ पुनर्जुहूं जलेन प्रक्षाल्य वह्नौ निष्टप्य पूरयित्वा मन्त्रेण परिधेर्बहिः जलं पूर्ववत् प्रक्षिपति तत् बहिःपरिधिनिनयनमित्युच्यते ॥

२६९ तत उपभृति विद्यमानमाज्यं जुह्वां कृत्वा यथायतने जुहूपभृतौ सादयित्वा मन्त्रेण प्राशित्रहरणे प्रथमप्रधानद्रव्यसंबन्धिनं प्राशित्रमवद्यति स्रुवदण्डेनाभिघार्य प्रणीतानां पश्चिमतः सादयति स भागः प्राशितुः ब्रह्मणः अयमिति विग्रहेण प्राशित्रपदवाच्यः ॥

२७० तत इडापात्रं वेद्यां उदगग्रं निधाय तस्मिन् यावन्ति प्रधानद्रव्याणि तावदर्थं सकृदेव उदक्संस्थं आज्यस्थाल्याज्येनोपस्तीर्य प्रथमप्रधानद्रव्यदक्षिणार्धादवदानदेशसंस्पर्शमकुर्वन् मन्त्रेण अवदाय इडापात्रे उपस्तीर्णदेशे निधाय उत्तरार्धात् तूष्णीं अवदानदेशसंस्पर्शं कुर्वन्नेवावदाय तथैव निदधाति ततस्तस्यैव द्रव्यस्य पूर्वभागात्त्र्यङ्गुलं चतुरङ्गुलं खण्डं तूष्णीमवदाय आज्यस्थाल्याज्येन सुसंतृप्तं संतर्प्य ध्रुवायाः पूर्वभागे निदधाति

तत्खण्डं यजमानकर्तृकप्राशनार्थत्वात् यजमानभाग इत्यु-
च्यते ॥

२०१ ततः द्वितीयादिप्रधानद्रव्याणां प्रथमवदवदाय निधाय उप-
स्तरणवदभिघारयति एतदिडावदानमुच्यते ॥

२०२ होतुः प्रदेशिन्याः उत्तमे पर्वणी आज्येन स्रुवेण अनक्ति
तदङ्गुलिपर्वाञ्जनमुच्यते ॥

२०३ ततः होता उत्तरेण पर्वणा उत्तरं स्वीयमोष्ठं मन्त्रेण निमृज्य
अधरं ओष्ठं अधरेण पर्वणा मन्त्रेण निमार्ष्टि अयमोष्ठनिमार्ग
इत्युच्यते ॥

२०४ ततोऽपः स्पृष्ट्वा अध्वर्युणा दीयमानामिडापात्रीं अञ्जलिना
प्रतिगृह्य सव्ये पाणौ कृत्वा तस्याः पश्चात् उदगङ्गुलिं पाणि-
मुपधाय तस्मिन् अध्वर्युः उपस्तरणपूर्वकं इडायाः कंचिदंशं
ददाति तं गृहीत्वा अङ्गुल्यङ्गुष्ठयोर्मध्येन स्वयं द्वितीयमंशं
गृह्णाति अध्वर्युस्तदुपरि अभिघारयति होता तत् भागद्वयम-
ङ्गुष्ठेनाभिसंगृह्य अङ्गुलीः प्रत्याहृत्य मुष्टिमकृत्वा दक्षिणभागे
इडापात्रं प्रागग्रमुदगग्रं वा प्रतिगृह्य मुखसंमितं नासिकासंमितं
वा धारयति तच्च पाणिगृहीतं भागद्वयं अवान्तरेडा इत्युच्यते ॥

२०५ तथा धारयित्वा कंचिन्मन्त्रं जपित्वा उच्चैरन्यं मन्त्रं पठति
तच्च मन्त्रे यदध्वर्यव इति पदं तत् श्रुत्वा अध्वर्युः प्रथमं पुरो-
डाशं चतुर्धा कृत्वा बर्हिषि निदधाति तदेतत् चतुर्धाकरण-
मित्युच्यते ॥

२०६ अनया रीत्या इडापात्रं धारयित्वा मन्त्रपठनं इडोपह्वानमि-
त्युच्यते ॥

२७७ उपहूतायामिडायां अध्वर्युराग्नीध्रस्य हस्ते उपस्तीर्य प्रथमं इडायाः कंचिदंशं दत्त्वा अभिघार्य पुनरुपस्तीर्य द्वितीयं दत्त्वा अभिघारयति तदेतत् षडवत्तमित्युच्यते ॥

२७८ ततो ब्रह्मणे होत्रे च इडाभागं दत्त्वा स्वं भागं गृहीत्वा यजमानाय ददाति होता पाणिगृहीतामवान्तरेडां मन्त्रेण भक्षयति जुष्टिरसीत्यादिमन्त्रेण यजमानोऽनुमन्त्रयते । ततः सर्वे ऋत्विजः सयजमाना इडां भक्षयन्ति तदेतदिडाप्राशनमित्युच्यते ॥

२७९ इडापात्र्यां पूर्वं विधिना गृहीतं हविरिडेत्युच्यते ॥

२८० ततः अध्वर्य्वाग्नीध्रौ बर्हिषि उत्तानं दक्षिणं हस्तं निधाय तस्मिन् जलं सिञ्चतः होतृब्रह्माणौ तु प्रस्तरस्याधस्तादञ्जलिं निधाय अन्येन जलं सेचयतः यजमानस्तु मन्त्रं पठन् प्रस्तरस्याधस्तादञ्जलिं निधाय अध्वर्युणा जलं सेचयति तदेतत् सर्वं इडामार्जनमित्युच्यते ॥

२८१ अध्वर्युणा प्रेषितः आग्नीध्रः प्रणीतापश्चिमतः स्थापितं प्राशित्रहरणं गृहीत्वा आहवनीयपूर्वमार्गेण गत्वा ब्रह्मणे ददाति-ब्रह्मा मन्त्रेण तत् प्राशित्रं दृष्ट्वा मन्त्रेण अञ्जलिना प्रतिगृह्य वेद्यां कुशेषु प्राग्दण्डं मन्त्रेण निदधाति तदेतत्कर्म प्राशित्रपरिहरणमित्युच्यते ॥

२८२ ब्रह्मा पात्रात्प्राशित्रभागमादाय स्थानान्तरं गत्वा मन्त्रेण प्राश्नाति एतत्प्राशित्रप्राशनमित्युच्यते ॥

२८३ ततः स्मृत्युक्तमाचमनं कृत्वा मन्त्रेण पुनराचामति तदन्वाचमनमित्युच्यते ॥

Digitized by Google

२८४ ततः मन्त्रेण वेदकोन पाणिना नाभिं स्पृशति तत् नाभ्यालम्भनमित्युच्यते ॥

२८५ ततः स्वस्थाने उपविश्य प्राशित्रहरणं प्रक्षाल्य तस्मिन् जलं प्रक्षिप्य तेन आत्माभिमुखं त्रिवारं भूमौ सिञ्चति एतत् अभ्यात्माग्निनयनमुच्यते ॥

२८६ अध्वर्युकर्तृकप्राशित्रपरिहरणप्रैषोच्चारणानन्तरं यजमानो बर्हिषि निहितान्प्रथमपुरोडाशस्य चतुरो भागाननुमन्त्र्य एकैकं भागं दर्भेण स्पृष्ट्वा इदं ब्रह्मणः इदं होतुः इदमध्वर्योः इदमाग्नीध्रः इति उद्दिशति तदेतत् चतुर्धाकृतभागदानमित्युच्यते ॥

२८७ ततोऽध्वर्युराग्नीध्रभागं द्विधा कृत्वा आग्नीध्रहस्ते उपस्तीर्य भागस्यैकदेशं दत्त्वा पुनरुपस्तीर्य द्वितीयमेकदेशं दत्त्वा द्विरभिघारयति अथ एतादृशं षडवत्तं भवति इडाभागे अन्यादृशं षडवत्तमुक्तं ततो वेदेन ब्रह्मणे ब्रह्मभागं ददाति स्रुवेण होत्रे होतृभागं दत्त्वा स्वयं स्वभागं जुह्वा गृह्णाति एतत् चतुर्धाकृतभागपरिहरणमित्युच्यते ॥

२८८ ब्रह्मा स्वभागं गृहीत्वा अग्निनयनानन्तरं वेद्यां कुशेषु स्थापिते प्रत्यग्दण्डे प्राशित्रहरणे निधाय अध्वर्युणा पूर्वं ध्रुवायाः पूर्वदेशे स्थापितं यजमानभागं तस्य पश्चात् कुशेषु निदधाति इदं भागनिधानमित्युच्यते ॥

२८९ ततः सर्वे ऋत्विजः स्वंस्वं भागं स्वस्वमन्त्रैः कामस्तुतिनामकैः प्रतिगृह्णन्ति स भागप्रतिग्रह इत्युच्यते ॥

२९० ततो ब्रह्मा आहवनीयस्य पूर्वमार्गेण वेद्या उत्तरतः गार्हपत्यस्य पश्चिमतश्च गत्वा दक्षिणाग्नौ सुघर्तं अध्वर्युणा अभि-

चार्यं दक्षिणस्यां श्रोण्यां स्थापितं अन्वाहार्यं मन्त्रेण पश्यति तदन्वाहार्यावेक्षणमित्युच्यते ॥

२६१ ततो मन्त्रेण स्पर्शमकुर्वन् तदीयगन्धं जिघ्रति तदन्वाहार्यावघ्राणमित्युच्यते ॥

२६२ ततो ब्रह्मणि अङ्गुष्ठानामिकाभ्यामन्वाहार्यैकदेशं गृहीत्वा यथागतमागत्य स्वस्थाने उपविश्य ब्रह्मभागे प्राशित्रहरणस्थे तमेकदेशं स्थापयति सति अध्वर्युरन्वाहार्यस्थालीं वेद्यां यजमानसंमुखां स्थापयति यजमानस्तन्मध्यगतमन्वाहार्यं पश्यति तद्यजमानकर्तृकमन्वाहार्यावेक्षणमुच्यते ॥

२६३ ततः सर्वान् ऋत्विजः संबोध्य अयं वः ओदनः यूयं यथाभागं प्रतिगृह्णीध्वमिति वदति तदन्वाहार्यदानमित्युच्यते ॥

२६४ अध्वर्य्वाग्नीध्रौ सप्तदशकृत्वो ऽपान्य मन्त्रेण प्रतिगृह्णीतः होतृब्रह्माणौ आश्वलायनसूत्रपठितेन कामस्तुतिसंज्ञकेन मन्त्रेण प्रतिगृह्णीतः सो ऽयमन्वाहार्यप्रतिग्रह इत्युच्यते ॥

२६५ अपाननं नाम बाह्यवायोः नासापुटाभ्यामन्तराकर्षणम् ॥

२६६ ततो वेद्यां विद्यमानानां हविःशेषाणां वेद्या बहिः उत्तरतः प्रक्षेपणं हविरुद्वासनमित्युच्यते ॥

२६७ ततः एकविंशतिदारुकेध्मसंबन्धिनीं परिशेषितां समिधं आहवनीये प्रक्षेप्तुं ब्रह्मणो ऽनुज्ञां याचमानः आग्नीध्रं आहवनीयसंमार्गं प्रेष्यति ब्रह्मा च कंचिन्मन्त्रं जपित्वा उच्चैरनुज्ञां ददाति अध्वर्युस्तां समिधमनुयाजहोमार्थमाहवनीये ऽभ्यादधाति तदनुयाजसमिदाधानमित्युच्यते ॥

२६८ आग्नीध्रः स्फ्ये पूर्वं वेष्टितमिध्मसन्नहनं विमुक्तं कृत्वा तेन

पूर्ववत् सकृत् परिधीन् संमृज्य मन्त्रेण आहवनीयं संमार्ष्टि सोऽयमुत्तराहवनीयसंमार्ग इत्युच्यते ॥

२९९ अध्वर्युर्जुहूपभृतावादायात्याक्रम्याश्राव्य आग्नीध्रेण इध्मसंनहनरहितस्फ्यहस्तेन प्रत्याश्राविते होतारं याज्यापठनार्थं प्रेष्यति होत्रा वषट्कृते प्रचिप्तसमित्पूर्वार्धे जुहोति पुनस्तथैवाश्रावणादि कृत्वा वषट्कारे समिन्मध्ये जुहोति पुनस्तथैव कृत्वा वषट्कृते समिधो मूलमारभ्याग्रपर्यन्तं संततधारया जुहोति सो ऽयमनुयाजप्रचारो ऽनुयाजहोमश्चोच्यते ॥

३०० अथ अनु पश्चात् प्रधानयागानन्तरं इज्यते यैरिति व्युत्पत्त्या होत्रा पठ्यमाना याज्यामन्त्रा अनुयाजा इत्युच्यन्ते ॥

३०१ ते च वीधातुप्रकृतिकलोट्प्रथमपुरुषान्ताः वीतवत्पदान्ता इति प्रयाजवदुच्यन्ते ॥

३०२ अनुयाजप्रचारानन्तरं उदगागत्य यथास्थानं स्रुचौ सादयित्वा यजमानेन सह मन्त्रेण जुहूमूर्ध्वां उत्तानेन दक्षिणहस्तेन गृह्णाति एवं नीचेन सव्यहस्तेन अधस्तात् उपभृतं अध्वर्युयजमानौ कुरुतः तत उभौ प्रागग्रां जुहूं मन्त्रेण दक्षिणांसपर्यन्तं प्रापयतः तथैवोपभृतं प्रत्यगग्रां उत्तरश्रोणिपर्यन्तं प्रापयतः तदेतत्कर्म स्रुग्व्यूहनमित्युच्यते ॥

३०३ ततो ऽध्वर्युर्जुह्वा मध्यमदक्षिणोत्तरान्परिधीन् क्रमेण पृथक्पृथक्मन्त्रैरनक्ति एतत्कर्म परिध्यञ्जनमित्युच्यते ॥

३०४ ततः उपभृतं जलेन संस्पृश्य यथास्थानं स्रुचौ सादयित्वा जुह्वा आधारभूतं सविधृतिपवित्रं प्रस्तरं गृहीत्वा मन्त्रेण प्रस्तराग्राणि

जुह्वामनक्ति तथैवोपभृतिमध्यानि अनक्ति तथैव ध्रुवायां मूलानि अनक्ति तदेतत्प्रस्तराञ्जनमित्युच्यते ॥

३०५ प्रस्तरसंग्रन्थ्येकं तृणमादाय प्रज्ञातं निधाय दक्षिणोत्तराभ्यां हस्ताभ्यां प्रस्तरं धृत्वा जुह्वामूर्ध्वाग्रमवष्टभ्य आश्राव्य प्रत्याश्राविते प्रैषं पठति स सूक्तवाकप्रैष इत्युच्यते ॥

३०६ अध्वर्युप्रेषितो होता यं मन्त्रं पठति स सूक्तवाक इत्युच्यते ॥

३०७ सूक्तवाकान्तर्गतमन्त्रविशेषपठनकाले अध्वर्युर्यद्यजमानं मन्त्रं पाठयति तत् उज्जितिवाचनमित्युच्यते ॥

३०८ सूक्तवाकस्य अन्तिमं देवेभ्य इति श्रुत्वा तिर्यञ्चं हस्तं कृत्वा कर्षन्निव प्रस्तरमाहवनीये ऽनुप्रहरति मन्त्रेणाध्वर्युस्तत्प्रस्तरप्रहरणमिति गीयते ॥

३०९ ततः पूर्वं प्रज्ञातं यथास्यात्तथा निहितं तृणं गृहीत्वा आग्नीध्रं संबोधयति अग्नीत् इति आग्नीध्रस्तु अध्वर्युं प्रति संवदस्व इति वदति पुनरध्वर्युस्तमाह अगानग्नीत् इति पुनराग्नीध्रस्तमाह अगन् इति पुनरध्वर्युस्तमाह श्रा ३ वय इति पुनराग्नीध्रस्तमाह श्रौ ३ षट् इति पुनरध्वर्युर्गृहीतं तृणं प्रदर्शयन्नाग्नीध्रं प्रत्याह इदं ब्रू ३ हि इति तत आग्नीध्रस्तं प्रत्याह अनुप्रहर इति ततो ऽध्वर्युस्तत् तृणमाहवनीये ऽनुप्रहरति तदेतत् तृणप्रहरणमित्युच्यते ॥

३१० ततो ऽध्वर्युर्होतारं प्रेष्यति स शंयुवाकप्रैष इत्युच्यते ॥

३११ अध्वर्युप्रेषितो होता यामृचं अर्धर्चे अवसाय एकश्रुत्या अन्ते प्रणवरहितां पठति सा ऋक् शंयुपदघटितत्वात् शंयुवाक इति गीयते ॥

३१२ आज्यभागप्रभृति सर्वं प्रधानयाज्यादिकं मध्यमस्वरेण पठनीयं तत्र कण्ठे माध्यन्दिनयुगं मध्यममिति शिक्षोक्तेर्जठराग्निना प्रेरितो वायुः कण्ठदेशे संचारं कृत्वा मुखं प्राप्य यथास्थानं यत्र वर्णानामभिव्यक्तिं करोति स मध्यमस्वर इति उच्यते ॥

३१३ स्विष्टकृत्प्रभृति शंयुवाकान्तमुत्तमस्वरेण पठ्यते तत्र तारं तार्तीयसवनं शीर्षण्यमिति शिक्षावचनात् जठराग्निप्रेरितो वायुः मस्तकदेशे संचारं कृत्वा पूर्ववत् वर्णानभिव्यञ्जयति स उत्तमस्वर इति पठ्यते ॥

३१४ शंयुवाकानन्तरं अध्वर्युर्होत्रे वेदं प्रदाय दक्षिणहस्तेन स्रुवमाज्यस्थालीं सव्येन जुहूमादाय दक्षिणेन यद्वा गार्हपत्यदक्षिणाग्न्योर्मध्येन गत्वा स्वयं पत्नीपश्चाद्भागेन गत्वा स्रुवादीनि पत्नीपुरोभागेन नीत्वा गार्हपत्यस्य पश्चादूर्ध्वज्ञानुरुपविश्य होतुः सकाशात् वेदं गृहीत्वा जुह्वा अधस्तादुपभृत्स्थाने धृत्वा आश्राव्य प्रत्याश्रावितो होतारं यजेति प्रेष्य तेन वषट्कृते आज्यस्थाल्याज्येन चतुरवत्तेन जुह्वा गार्हपत्ये सोमाय जुहोति पुनश्चतुरवत्तेन त्वष्ट्रे ततो देवानां पत्नीभ्यः ततो यजमानस्य प्रजाकामत्वे राकायै सिनीवाल्यै कुह्वै अनुमत्यै च पृथक्पृथक् चतुरवत्तेन हुत्वा स्वाहान्तैरेतैरेव चतुर्भिर्नाममन्त्रैः स्रुवाहुतीर्हुत्वा त्रिभिर्ऋङ्मन्त्रैः स्रुवाहुतीरेव हुत्वा आश्राववादि कृत्वा अग्नये गृहपतये यजति देवानां पत्नीनां यागकाले गार्हपत्यकुण्डस्योपरि पूर्वभागे अन्तर्धानाय अन्तर्धानकटं उदग्गयं स्थापयित्वा देवानां पत्नीरिष्ट्वा होतुरग्रेण गच्छति सोऽयं पत्नीसंयाजप्रचार इत्युच्यते ॥

Digitized by Google

३१५ तत्र गत्वा पूर्ववत् होतुरङ्गुलिपर्वणी अङ्क्त्वा होतुर्हस्ते चतुष्कृत्व आज्यं स्रुवेण ददाति एतदाज्यं आज्येडा इत्युच्यते ॥

३१६ पूर्वं इडापात्रं गृहीत्वा होता कांश्चिन्मन्त्रान् उच्चैः कांश्चिदुपांशु पठति तदा अध्वर्युयजमानाग्नीध्राः इडापात्रमन्वारभन्ते आज्येडां गृहीत्वा यदा पूर्ववत् मन्त्रान् पठति तदा अध्वर्युः पत्नी चान्वारभते । अयं मन्त्रपाठः आज्येडोपह्वानमित्युच्यते ॥

३१७ ततोऽध्वर्युराग्नीध्रहस्ते षट्कृत्वः आज्यं स्रुवेण ददाति होता स्वहस्तगतमाज्यं प्राश्नाति आग्नीध्रश्च स्वहस्तगतमाज्यं प्राश्नाति अथ होतृकं प्राशनं आज्येडाप्राशनमित्युच्यते ॥

३१८ तत आचम्य होता परिस्तरणोरञ्जलिमन्तर्धाय अन्येनापः सेचयति आग्नीध्रस्तु बर्हिषि दक्षिणं उत्तानं हस्तं निधाय सव्येन जलं सिञ्चति एतदाज्येडामार्जनमित्युच्यते ॥

३१९ एतदनन्तरं शंयुवाकस्य विकल्पः अध्वर्युर्जुह्वां चतुर्गृहीतं गृहीत्वा सव्येनाङ्गेन होतुरग्रेण गार्हपत्यस्य पश्चिममार्गेण गत्वा दक्षिणाग्नौ मन्त्रेण हुत्वा अपरं चतुर्गृहीतं गृहीत्वा इध्मप्रव्रश्चनान्यभ्याधाय जुह्वां फलीकरणानोप्य मन्त्रेण जुहोति अथ पूर्वहोमो दक्षिणाग्निप्रायश्चित्तहोम इत्युच्यते ॥

३२० द्वितीयस्तु फलीकरणहोम इत्युच्यते ॥

३२१ ततः अपरेण गार्हपत्यं उत्तरतो गत्वा यजमानाय वेदं दत्त्वा मन्त्रं वाचयति ततो यजमानाद्वेदमादाय होत्रे प्रददाति इदं वेदवाचनमित्युच्यते ॥

३२२ होता वेदं पत्न्यै प्रदाय मन्त्रं वाचयति अथ होताध्वर्युर्वा, इत्याश्वलायनसूत्रात् अध्वर्युर्वा वाचयति एतत्पत्नीवेदवाचनमित्युच्यते ॥ (शेषमग्रे)

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

RETURN TO → **CIRCULATION DEPARTMENT**
198 Main Stacks

LOAN PERIOD 1 HOME USE	2	3
4	5	6

ALL BOOKS MAY BE RECALLED AFTER 7 DAYS.
Renewls and Recharges may be made 4 days prior to the due date.
Books may be Renewed by calling 642-3405.

DUE AS STAMPED BELOW

AUG 1 8 2000		

FORM NO. DD6

UNIVERSITY OF CALIFORNIA, BERKELEY
BERKELEY, CA 94720-6000

LD 21-95m-7,'37

Digitized by Google

U. C. BERKELEY LIBRARIES
C051288577

Digitized by Google

Digitized by Google